वतति 1 । अयते 2 । लोटते 3 । लोठते 4 । स्यन्दते 5 । कसति 6 । सर्पति 7 । स्यमति 8 । स्रवति । 9 स्रंसते 10 । अवति 11 । श्चोतति 12 । ध्वंसति 13 । वेनति 14 । मार्ष्टि 15 । भुरण्यति 16 । शवति 17 । कालयति 18 । पेलयति 19 । कण्टति 20 । पिस्यति 21 । बिस्यति 22 । मिस्यति 23 । प्रवते 24 । प्लवते 25 । च्यवते 26 । कवते 27 । गवते 28 । नवते 29 । क्षोदति 30 । नक्षति 31 । सक्षति 32 । म्यक्षति 33 । सचति 34 । ऋच्छति 35 । तुरीयति 36 । चतर्ति 37 । अतति 38 । गाति 39 । इयक्षति 40 । सश्चति 41 । त्सरंति 42 । रंहति 43 । यतते 44 । भ्रमति 45 । ध्रजति 46 । रजति 47 । लजति 48 । क्षियति 49 । धमति 50 । मिनाति 51 । ऋण्वति 52 । ऋणोति 53 । स्वरति 54 । सिसर्ति 55 । वे (वि) षिष्टि 56 । चोषिष्टि 57 । रिणाति 58 । रीयते 59 । रेजति 60 । दंध्यति 61 । दभ्नोति 62 । युध्यति 63 । धन्वति 64 । अरुषति 65 । आर्यति 66 । डीयते 67 । तकति 68 । दीयात 69 । ईषति 70 । फणति 71 । हनति 72 । अर्दति 73 । मर्दति 74 । ससृते 75 । नसते 76 । हर्यति 77 । इयर्ति 78 । ईर्ते 79 । ईङ्खते 80 । जयति 81 । श्चात्रति 82 । गन्ति 83 । आ गनीगन्ति 84 । जङ्गन्ति 85 । जिन्वति 86 । जसति 87 । गमति 88 । ध्रति 89 । ध्राति 90 । ध्रयति 91 । वहते 92 । रथर्यति 93 । जेहते 94 । प्वः कति 95 । क्षुम्पति 96 । प्साति 97 । वाति 98 । याति 99 । इषति 100 । द्राति 101 । द्रूळति 102 । एजति 103 । जमति 104 । जवति 105 । वश्चति 106 । अनिति 107 । पवते 108 । हन्ति 109 । सेधति 110 । अगन् 111 । अजगन् 112 । जिगाति 113 । पतति 114 । इन्वति 115 । द्रमति 116 । द्रवति 117 । वेत्ति 118 । हयन्तात् 119 । एंति 120 ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

जागायात् 121 । अयुथुः 122 । **इति द्वाविंशशतं गतिकर्माणः ॥ 14 ॥**

नु 1 । मक्षु 2 । द्रवत् 3 । ओषम् 4 । जीराः 5 । जूर्णिः 6 । शूर्ताः 7 । शूधनासः 8 । शीभम् 9 । तृषु 10 । तूयम् 11 । तूर्णिः 12 । अजिरम् 13 । भुरण्युः 14 । शु 15 । आशु 16 । प्राशुः 17 । तूतुजिः 18 । तूतुजानः 19 । तुज्यमानासः 20 । अज्राः 21 । साचीवित् 22 । द्युगत् 23 । ताजत् 24 । तरणिः 25 । वातरंहाः 26 । **इति षड्विंशतिः क्षिप्रनामानि ॥ 15 ॥**

तळित् 1 । आसात् 2 । अम्बरम् 3 । तुर्वशे 4 । अस्तमींके 5 । आके 6 । उपाके 7 । अवकि 8 । अन्तमानाम् 9 । अवमे 10 । उपमः 11 । **इति एकादश अन्तिकनामानि । 16 ॥**

रणः 1 । विवाक् 2 । विखादः 3 । नदनुः 4 । भरे 5 । आक्रन्दे 6 । आह्वे 7 । आजौ 8 । पृतनाज्यम् 9 । अभीके 10 । समीके 11 । ममसत्यम् 12 । नेमधिता 13 । सङ्काः 14 । समितिः 15 । समनम् 16 । मीळ्हे 17 । पृतनाः 18 । स्पृधः 19 । मृधः 20 । पृत्सु 21 । समत्सु 22 । समर्ये 23 । समरणे 24 । समोहे 25 । समिथे 26 । संख्ये 27 । संगे 28 । संयुगे 29 । संगथे 30 । संगमे 31 । वृत्रतूर्ये 32 । पृक्षे 33 । आणौ 34 । शूरसातौ 35 । वाजसातौ 36 । समनीके 37 । खले 38 । खजे 39 । पौंस्ये 40 । महाधने 41 । वाजे 42 । अज्म 43 । सद्म 44 । संयत् 45 । सेवतः 46 । **इति षट्चत्वारिंशत् संग्रामनामानि ॥ 17 ॥**

इन्वति 1 । नक्षति 2 । आक्षाणः 3 । आनट्र 4 । आष्ट 5 । आपानः 6 । अशत् 7 । नशत् 8 । आनशे 9 । अश्नुते 10 । **इति दशः व्याप्तिकर्माणः ॥ 18 ॥**

दभ्नोति 1 । श्नथति 2 । ध्वरति 3 । धूर्वति 4 । वृणक्ति 5 । वृश्चति 6 । कृण्वति 7 । कृन्तति 8 । श्वसिति 9 । नभते 10 । अर्दयति 11 । स्तृणाति 12 । स्नेहयति 13 । यातयति 14 । स्फुरति 15 । स्फुलति 16 । निवपन्तु 17 । अवतिरति 18 । वियातः 19 । आतिरत् 20 । तळित् 21 । आखण्डल 22 । द्रूणाति 23 । रम्णाति 24 । शृणाति 25 । शम्नाति 26 । तृणेहूळि 27 । ताहूळि 28 । नितोशते 29 । निबर्हयति 30 । मिनाति 31 । मिनोति 32 । धमति 33 । **इति त्रयस्त्रिंशत् वधकर्माणः ॥ 19 ॥**

दिद्युत् 1 । नेमिः 2 । हेतिः 3 । नमः 4 । पविः 5 । सृकः 6 । वृकः 7 । वधः 8 । वज्रः 9 । अर्कः 10 । कुत्सः 11 । कुलिशः 12 । तुञ्जः 13 । तिग्मः 14 । मेनिः 15 । स्वधितिः 16 । सायकः 17 । परशुः 18 । **इति अष्टादश वज्रनामानि ॥ 20 ॥**

इरज्यति 1 । पत्यते 2 । क्षयति 3 । राजति 4 । **इति चत्वारः ऐश्वर्यकर्माणः ॥ 21 ॥**

राष्ट्री 1 । अर्यः 2 । नियुत्वान् 3 । इनः इनः 4 । **इति चत्वारि ईश्वरनामानि ॥ 22 ॥**

(इति निघण्टौ द्वितीयोऽध्यायः)

॥ तृतीयोऽध्यायः ॥

उरु 1 । तुवि 2 । पुरु 3 । भूरि 4 । शश्वत् 5 । विश्वम् 6 । परीणसा 7 । व्यानशिः 8 । शतम् 9 । सहस्रम् 10 । सलिलम् । 11 । कुवित् 12 । **इति द्वादश बहुनामानि ॥ 1 ॥**

ऋहन् 1 । ह्रस्वः 2 । निघृष्वः 3 । मायुकः 4 । प्रतिष्ठा 5 । कृधु 6 । वम्रकः 7 । दभ्रम् 8 । अर्भकः 9 । क्षुल्लकः 10 । अल्पः 11 । **इति एकादश ह्रस्वनामानि ॥ 2 ॥**

महत् 1 । ब्रध्नः 2 । ऋष्वः 3 । बृहत् 4 । उक्षितः 5 । तवसः 6 । तविषः 7 । महिषः 8 । अभ्वः 9 । भुक्षाः 10 । उक्षा 11 । विहायाः 12 । यह्वः 13 । ववक्षिथ 14 । विवक्षसे 15 । अम्भृणः 16 । माहिनः 17 । गभीरः 18 । ककुहः 19 । रभसः 20 । व्राधन् 21 । विरप्शी 22 । अद्भुतम् 23 । बंहिष्ठः 24 । बंहिषत् 25 । **इति पञ्चविंशतिः महन्नामानि ॥ 3 ॥**

गयः 1 । कृदरः 2 । गर्तः 3 । हर्म्यम् 4 । अस्तम् 5 । पस्त्यम् 6 । दुरोणे 7 । नीळम् 8 । दुर्याः 9 । स्वसराणि

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

10 । अमा 11 । दमे 12 । कृतिः 13 । योनिः 14 । सद्म 15 । शरणम् 16 । वरुथम् 17 । छर्दिः 18 । छदिः 19 । छाया 20 । शर्म 2 । अज्म 22 । **इति द्वाविंशतिः गृहनामानि ॥ 4 ॥**

इरज्यति । विधेमं 2 । सपर्यति 3 । नमस्यति 4 । दुवस्यति 5 । ऋध्नोति 6 । ऋणद्धि 7 । ऋच्छति 8 । सपतिं 9 । विवासति 10 । **इति दश परिचरणकर्माणः ॥ 5 ॥**

शिम्बाता 1 । शतरा 2 । शातपन्ता 3 । शिल्गुः 4 । स्यूमकम् 5 । शेवृधम् 6 । मयः 7 । सुग्म्यम् 8 । सुदिनम् 9 । शूषम् 10 । शुनम् 11 । शुग्मम् 12 । भेजषम् 13 । जलाषम् 14 । स्योनम् 15 । सुम्नम् 16 । शेवम् 17 । शिवम् 18 । शम् 19 । कम् 20 । **इति विंशतिः सुखनामानि ॥ 6 ॥**

निर्णिक् 1 । वव्रिः 2 । व्रपुः 3 । वपुः 4 । अमतिः 5 । अप्सः 6 । प्सुः 7 । अप्नः 8 । पिष्टम् 9 । पेशः 10 । कृशनम् 11 । मरुत् 12 । अर्जुनम् 13 । ताम्रम् 14 । अरुषम् 15 । शिल्पंम् 16 । **इति षौडश रूपनामानि ॥ 7 ॥**

अस्रेमा 1 । अनेमा 2 । अनेद्यः 3 । अनवद्यः । अनभिशस्त्यः 5 । उक्थ्यः 6 । सुनीथः 7 । पाकः 8 । वामः 9 । वयुनम् 10 । **इति दश प्रशस्यनामानि ॥ 8 ॥**

केतुः 1 । केतः । 2 चेतः 3 । चितम् 4 । क्रतुः 5 । असुः 6 । धीः 7 । शची 8 । माया 9 । वयुनम् 10 । अभिख्या 11 । **इति एकादश प्रज्ञानामानि ॥ 9 ॥**

बट् 1 । श्रत् 2 । सत्रा 3 । अद्धा 4 । इत्था 5 । ऋतम् 6 । **इति षट् सत्यनामानि ॥ 10 ॥**

चिक्यत् 1 । चाकनत् 2 । आचक्ष्म 3 । चष्टे 4 । विचष्टे 5 । विचर्षणिः 6 । विश्वचर्षणिः 7 । अवचाकशत् 8 । **इति अष्टौ पश्यतिकर्माणः ॥ 11 ॥**

हिकम् 1 । नुकम् 2 । सुकम् 3 । आंहिकम् 4 । आकीम् 5 । नकिः 6 । माकिः 7 । नकीम् 8 । आकृतम् 9 । **इति नव उत्तराणि पदानि सर्वपदसमाम्नाय ॥ 12 ॥**

इदमिव 1 । इदं यथा 2 । अग्निर्न ये 3 । चतुरश्चिद्ददमानात् 4 । ब्राह्मणा व्रतचारिणः 5 । वृक्षस्य नु ते पुरुहूत वयाः 6 । जार आ भगम् 7 । मेषो भूतोऽभि यन्नयः 8 । तद्रूपः 9 । तद्वर्णः 10 । तद्वत् 11 । तथा 12 । **इति उपमा ॥ 13 ॥**

अर्चति 1 । गायति 2 । रेभति 3 । स्तोभति 4 । गूर्धयति 5 । गृणाति 6 । जरते 7 । ह्वयते 8 । नदति 9 । पृच्छति 10 । रिहति 11 । धमति 12 । कृपायति 13 । कृपण्यति 14 । पनस्यति 15 । पनायते 16 । वल्गूयति 17 । मन्दते 18 । भन्दते 19 । छन्दति 20 । छदयते 21 । शशमानः 22 । रञ्जयति 23 । रजयति 24 । शंसति 25 । स्तौति 26 । यौति 27 । रौति 28 । नौति 29 । भनति 30 । पणायति 31 । पणते 32 । सपति 33 । पपृक्षाः 34 । महयति 35 । वाजयति 36 । पूजयति 37 । मन्यते 38 । मदति 39 । रसति 40 । स्वरति 41 । वेनति 42 । मन्द्रयते 43 । जल्पति 44 । **इति चतुश्चत्वारिंशत् अर्चतिकर्माणः ॥ 14 ॥**

विप्रः । विग्रः 2 । गृत्सः 3 । धीरः 4 । वेनः 5 । वेधाः 6 । कण्यः 7 । ऋभुः 8 । नवेदाः 9 । कविः 10 । मनीषी 11 । मन्धाता 12 । विधाता 13 । व्रिपः 14 । मनश्चित् 15 । विपश्चित् 16 । विपन्यवः 17 । श्चांकेनिपः 18 । उशिजः 19 । कीस्तासः 20 । आद्धातयः 21 । भतयः 22 । मतुथा 23 । वाघतः 24 । **इति चतुर्विंशतिः मेधाविनामानि ॥ 15 ॥**

रेभः 1 । जरिता 2 । कारुः 3 । नदः 4 । स्तामुः 5 । कीरिः 6 । गौः 7 । सूरिः 8 । नादः 9 । छन्दः 10 । स्तुप् 11 । रुद्रः 12 । कृपण्युः 13 । **इति त्रयोदश स्तोतृनामानि ॥ 16 ॥**

यज्ञः 1 । वेनः 2 । अध्वरः 3 । मेघः 4 । विदथः 5 । नार्यः 6 । सवनम् 7 । होत्रा 8 । इष्टि 9 । देवताता 10 । मखः 11 । विष्णुः 12 । इन्दुः 13 । प्रजापतिः 14 । धर्मः 15 । **इति पञ्चदश यज्ञनामानि ॥ 17 ॥**

भरताः 1 । कुरवः 2 । वाघतः 3 । वृक्तबर्हिषः 4 । यतस्रुचः 5 । मरुतः 6 । सबाधः 7 । देवयवः 8 । **इति अष्टौ ऋत्विङ् नामानि ॥ 18 ॥**

ईमहे । यामि 2 । मन्महे 3 । दद्धि 4 । शग्धिः 5 । पूर्धि 6 । मिमिड्ढि 7 । मिमोहि 8 । रिरिड्ढि 9 । रिरीहि 10 । पीपरत् 11 । यन्तारः 12 । यन्धि 13 । इषुध्यति 14 । मदेनहि 15 । मनामहे 16 । मायते 17 । **इति सप्तदश याच्ञाकर्माणः ॥ 19 ॥**

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

: दाति 1 । दाशति 2 । दासति 3 । राति 4 । रासति 5 । पृणक्षि 6 । पृणाति 7 । शिक्षति 8 । तुञ्जति 9 । मंहते 10 । **इति दश दानकर्माणः ॥ 20 ॥**

परिस्रव 1 । पवस्व 2 । अभ्यर्ष 3 । आशिषः 4 । **इति चत्वारः अध्येषणाकर्माणः ॥ 21 ॥**

स्वपिति 1 । सस्ति 2 । **इति द्वौ स्वपितिकर्माणौ ॥ 22 ॥**

कूपः 1 । कातुः 2 । कर्तः 3 । वव्रः 4 । काटः 5 । खातः 6 । अवतः 7 । क्रिविः 8 । सूदः 9 । उत्सः 10 । ऋश्यदात् 11 । कारोतरात् 12 । कुशयः 13 । केवटः 14 । **इति चतुर्दश कूपनामानि ॥ 23 ॥**

तृपुः 1 । तक्वा 2 । रिभ्वा 3 । रिपुः 4 । रिक्वा 5 । रिहायाः 6 । तायुः 7 । तस्करः 8 । वनर्गुः 9 हुरश्चित् 10 । मुषीवान् 11 । मलिम्लुचः 12 । अघशंस 13 । वृकः 14 । **इति चतुर्दश एव स्तेननामानि ॥ 24 ॥**

निण्यम् 1 । सस्वः 2 । सनुतः 3 । हिरुक् 4 । प्रतीच्यम् 5 । अपीच्यम् 6 । **इति षट्निर्णीतान्तर्हितनामधेयानि ॥ 25 ॥**

आके 1 । पराके 2 । पराचैः 3 । आरे 4 । परावतः 5 । **इति पञ्च दूरनामानि ॥ 26 ॥**

प्रत्नम् 1 । प्रदिवः 2 । प्रवयाः 3 । सनेमि 4 । पूर्व्यम् 5 । अह्नाय 6 । **इति षट् पुराणनामानि ॥ 27 ॥**

नवम् 1 । नूत्नम् 2 । नूतनम् 3 । नव्यम् 4 । इदा 5 । इदानीम् 6 । **इति षट् एव नवनामानि ॥ 28 ॥**

प्रपित्वे 1 । अभीके 2 । दभ्रम् 3 । अर्भकम् 4 । तिरः 5 । सतः 6 । त्वः 7 । नेमः 8 । ऋक्षाः 9 । स्तृभिः 10 । वम्रीभिः 11 । उपजिह्विका 12 । ऊर्दरम् 13 । कृदरम् 14 । रम्भः 15 । पिनाकम् 16 । मेना 17 । ग्नाः 18 । शेपः 19 । वेतसः 20 । अया 21 । एना 22 । सिषक्तु 23 । सचते 24 । भ्यसते 25 । रेजते 26 । **इति षड्विंशतिः द्विशः उत्तराणिनामानि ॥ 29 ॥**

स्वधे 1 । पुरन्धी 2 । धिषणे 3 । रोदसी 4 । क्षोणी 5 । अम्भसी 6 । नभसी 7 । रजसी 8 । सदसी 9 । सद्मनी 10 । घृतवती 11 । बहुले 12 । गभीरे 13 । गम्भीरे 14 । ओण्यौ 15 । चम्वौ 16 । पार्थ्वी 17 । मही 18 । उर्वी 19 । पृथ्वी 20 । अदिती 21 । अही 22 । दूरे अन्ते 23 । अपारे अपारे 24 । **इति चतुर्विंशतिः द्यावापृथिव्योः नामधेयानि ॥ 30 ॥**

(इति निघण्टौ तृतीयोऽध्यायः)

॥ चतुर्थोऽध्यायः ॥

जहा 1 । निधा 2 । शिताम 3 । मेहना 4 । दमूनाः 5 । मूषः 6 । इषिरेण 7 । कुरुतन 8 । जठरे 9 । तितउ 10 । शिप्रे 11 । मध्या 12 । मन्दू 13 । ईर्मान्तासः 14 । कायमानः 15 । लोधम् 16 । शीरम् 17 । विद्रधे 18 । द्रुपदे 19 । तुग्वनि 20 । नसन्ते 21 । नसन्त 22 । आहनसः 23 । अद्मसत् 24 । इष्मिणः 25 । वाहः 26 । परितक्म्या 27 । सुविते 28 । दयते 29 । नूचित् 30 । नूच 31 । दावने 32 । अकूपारस्य 33 । शिशीते 34 । सुतुकः 35 । सुप्रायणाः 36 । अप्रायुवः 37 । च्यवनः 38 । रजः 39 । हरः 40 । जुहुरे 41 । व्यन्तः 42 । क्राणाः 43 । वाशी 44 । विषुणः 45 । जामिः 46 । पिता 47 । शंयोः 48 । अदितिः 49 । एरिरे 50 । जसुरिः 51 । जरते 52 । मन्दिने 53 । गौः 54 । गातुः 55 । दंसयः 56 । तूताव 57 । चयसे 58 । वियुते 59 । ऋधक् 60 । अस्याः 61 । अस्य 62 । **इति द्विषष्टिः पदानि ॥ 1 ॥**

सस्निम् 1 । वाहिष्ठः 2 । दूतः 3 । वावशानः 4 । वार्यम् 5 । अन्धः 6 । असश्चन्ता 7 । वनुष्यति 8 । तरुष्यति 9 । भन्दनाः 10 । आहनः 11 । नदः 12 । सोमो अक्षाः 13 । श्वात्रम् 14 । ऊतिः 15 । हासमाने 16 । पड्भिः 17 ।ससम् 18 । द्विता 19 । व्राः 20 । वराहः 21 । स्वसराणि 22 । शर्या 23 । अर्कः 24 । पविः 25 । वक्षः 26 । धन्व 27 । सिनम् 28 । इत्था 29 । सचा 30 । चित् 31 । आ 32 । द्युम्नम् 33 । पवित्रम् 34 । तोदः 35 । स्वश्राः 36 । शिपिविष्टः 37 । विष्णुः 38 । आघृणिः 39 । पृथुज्रयाः 40 । अथर्युम् 41 । काणुका 42 । अध्रिगुः 43 । आङ्गुषः 44 ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

आपान्तमन्युः 45 । श्मशा 46 । उर्वशी 47 । वयुनम् 48 । वाजपस्त्यम् 49 । वाजगन्ध्यम् 50 । गध्यम् 51 । गधिता 52 । कौरयाणः 53 । तौरयाणः 54 । अह्रयाणः 55 । हरयाणः 56 । आरितः 57 । व्रन्दी 58 । निष्षपा 59 । तूर्णाशम् 60 । क्षुम्पम् 61 । निचुम्पुणः 62 । पदिम् 63 । पादुः 64 । वृकः 65 । जोषवाकम् 66 । कृत्तिः 67 । श्वघ्नी 68 । समस्य 69 । कुट्स्य 70 । चर्षणिः 71 । शम्बः 72 । केपयः 73 । तूतुमा कृषे 74 । अंसत्रम् 75 । काकुदम् 76 । बीरिटे 77 । अच्छ 78 । परि 79 । ईम् 80 । सीम् 81 । एनम् 82 । एनाम् 83 । सृणिः 84 । **इति चतुरुत्तरम् अशीतिः पदानि ॥ 2 ॥**

आशुशुक्षणिः 1 । आशाभ्यः 2 । काशिः 3 । कुणारुम् 4 । अलातृणः 5 । सललूकम् 6 । कत्पमम् 7 । विस्रुहः 8 । वीरुधः 9 । नक्षद्दाभम् 10 । अस्कृधीयुः 11 । निशृम्भाः 12 । बृबदुक्थम् 13 । ऋदूदरः 14 । ऋदूपे 15 । पुलुकाम 16 । असिन्वती 17 । कपना 18 । भाऋजीकः 19 । रुजानाः 20 । जूर्णिः 21 । ओमना 22 । उपलप्रक्षिणी 23 । उपसि 24 । प्रकलवित् 25 । अभ्यर्धयज्वा 26 । ईक्षे 27 । क्षोणस्य 28 । अस्मे 29 । पाथः 30 । सवीमनिः 31 । सप्रथाः 32 । विदथानि 33 । श्रायन्तः 34 । आशी : 35 । अजीगः 36 । अमूरः 37 । शशमानः 38 । देवो देवाच्या कृपा 39 । विजामातुः 40 । ओमासः 41 । सोमानम् 42 । अनवायम् 43 । किमीदिने 44 । अमवान् 45 । अमीवा 46 । दुरितम् 47 । अप्वा 48 । अमतिः 49 । श्रुष्टी 50 । पुरन्धिः 51 । रुशत् 52 । रिशादसः 53 । सुदत्रः 54 । सुविदत्रः 55 । आनुषक् 56 । तुर्वणिः 57 । गिर्वणसे 58 । असूर्ते सूर्ते 59 । अम्यक् 60 । यादृश्मिन् 61 । जारयायि 62 । अग्रिया 63 । चनः 64 । पचता 65 । शुरुधः 66 । अमिनः 67 । जज्झतीः 68 । अप्रतिष्कुतः 69 । शाशदानः 70 । सृप्रः 71 । सुशिप्रः 72 । शिप्रे 73 । रंसु 74 । द्विबर्हाः 75 । अक्रः 76 । उराणः 77 । स्तियानाम् 78 । स्तिपाः 79 । जबारु 80 । जरूथम् 81 । कुलिशः 82 । तुञ्जः 83 । बर्हणा 84 । ततनुष्टिम् 85 । इलीविशः 86 । कियेधाः 87 । भृमिः 88 । विष्पितः 89 । तुरीपम् 90 । रास्पिनः 91 । ऋजीतिः 92 । ऋजुनीती 93 । प्रतद्वसू 94 । हिनोत 95 । चोष्कूयमाणः 96 । चोष्कूयते 97 । सुमत् 98 । दिविष्टिषु 99 । दूतः 100 । जिन्वति 101 । अमत्रः 102 । ऋचीषमः 103 । अनर्शरातिम् 104 । अनर्वा 105 । असामि 106 । गल्दया 107 । जल्हवः 108 । बकुरः 109 । बेकनाटान् 110 । अभिधेतन 111 । अंहुरः 112 । बतः 113 । वाताप्यम् 114 । चाकन् 115 । रथर्यति 116 । असक्राम् 117 । आधवः 118 । अनवब्रवः 119 । सदान्वे 120 । शिरिम्बिठः 121 । पराशरः 122 । क्रिविर्दती 123 । करूलती 124 । दनः 125 । शरारुः 126 । इदंयुः 127 । कीकटेषु 128 । बुन्दः 129 । वृन्दम् 130 । किः 131 । उल्बम् 132 । ऋबीसम् ऋबीसम् 133 । **इति त्रयस्त्रिंशच्छतं पदानि ॥ 3 ॥**

(इति निघण्टौ चतुर्थोऽध्यायः)

॥ पञ्चमोऽध्यायः ॥

अग्निः 1 । जातवेदाः 2 । वैश्वानरः 3 । **इति त्रीणि पदानि ॥ 1 ॥**

द्रविणोदाः 1 । इध्मः 2 । तनूनपात् 3 । नराशंसः 4 । इळः 5 । बर्हिः 6 । द्वारः 7 । उषासानक्ता 8 । दैव्या होतारा 9 । तिस्रो देवीः 10 । त्वष्टा 11 । वनस्पतिः 12 । स्वाहाकृतयः 13 । **इति त्रयोदश पदानि ॥ 2 ॥**

अश्वः 1 । शकुनिः 2 । मण्डूकाः 3 । अक्षाः 4 । ग्रावाणः 5 । नराशंसः 6 । रथः 7 । दुन्दुभिः 8 । इषुधिः 9 । हस्तघ्नः 10 । अभीशवः 11 । धनुः 12 । ज्या 13 । इषुः 14 । अश्वाजनी 15 । उलूखलम् 16 । वृषभः 17 । द्रुघणः 18 । पितुः 19 । नद्यः 20 । आपः 21 । ओषधयः 22 । रात्रिः 23 । अरण्यानी 24 । श्रद्धा 25 । पृथ्वी 26 । अप्वा 27 । अग्नायी 28 । उलूखलमुसले 29 । हविर्धाने 30 । द्यावापृथिवी 31 । विपाट् छुतुद्री 32 । आर्त्नी 33 । शुनासीरौ 34 । देवी जोष्ट्री 35 । देवी ऊर्जाहुती 36 । **इति षट्त्रिंशत् पदानि ॥ 3 ॥**

वायुः 1 । वरुणः 2 । रुद्रः 3 । इन्द्रः 4 । पर्जन्यः 5 । बृहस्पतिः 6 । ब्रह्मणस्पतिः 7 । क्षेत्रस्य पति : 8 । वास्तोष्पतिः 9 । वाचस्पतिः 10 । अपां नपात् 11 । यमः 12 । मित्रः 13 । कः 14 । सरस्वान् 15 । विश्वकर्मा 16 ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

तार्क्ष्यः 17 । मन्युः 18 । दधिकाः 19 । सविता 20 । त्वष्टा 21 । वातः 22 । अग्निः 23 । वेनः 24 । असुनीतिः 25 । ऋतः 26 । इन्दुः 27 । प्रजापतिः 28 । अहिः 29; अहिर्बुध्न्यः 30 । सुपर्णः 31 । पुरूरवा 32 । **इति द्वात्रिंशत् पदानि ॥ 4 ॥**

श्येनः 1 । सोमः 2 । चन्द्रमा 3 । मृत्युः 4 । विश्वानरः 5 । धाता 6 । विधाता 7 । मरुतः 8 । रुद्राः 9 । ऋभवः 10 । अङ्गिरसः 11 । पितरः 12 । अथर्वाणः 13 । भृगवः 14 । आप्त्याः 15 । अदितिः 16 । सरमा 17 । सरस्वती 18 । वाक् 19 । अनुमतिः 20 । राका 21 । सिनीवाली 22 । कुहूः 23 । यमी 24 । उर्वशी 25 । पृथिवी 26 । इन्द्राणी 27 । गौरी 28 । गौः 29 । धेनुः 30 । अघ्न्या 31 । पथ्या 32 । स्वस्तिः 33 । उषाः 34 । इळा 35 । रोदसी 36 । **इति षट्त्रिंशत् पदानि ॥ 5 ॥**

अश्विनौ 1 । उषाः 2 । सूर्या 3 । वृषाकपायी 4 । सरण्यूः 5 । त्वष्टा 6 । सविता 7 । भगः 8 । सूर्यः 9 । पूषा 10 । विष्णुः 11 । विश्वानरः 12 । वरुणः 13 । केशी 14 । केशिनः 15 । वृषाकपिः 16 । यमः 17 । अज एकपात् 18 । पृथिवी 19 । समुद्रः 20 । अथर्वा 21 । मनुः 22 । दध्यङ् 23 । आदित्याः 24 । सप्तऋषयः 25 । देवाः 26 । विश्वेदेवाः 27 । साध्याः 28 । वसवः 29 । वाजिनः 30 । देवपत्न्यः देवपत्न्यः 31 । **इति एकत्रिंशत् पदानि ॥ 6 ॥**

(इति निघण्टौ पञ्चमोऽध्यायः)

Total = 151

॥ इति निघण्टुः समाप्तः ॥

(આ નિઘણ્ટુ ઉપર દેવરાજ યજ્વન્‌ની એક ટીકા પ્રાપ્ત થાય છે.)

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

॥ श्रीः ॥

यास्कप्रणीतम्

निरुक्तम्

प्रथमोऽध्यायः

1. ॐ समाम्नायः समाम्नातः, स व्याख्यातव्यः ।

(दुर्गाचार्यस्य टीका) अयश्च तस्या द्वादशाध्यायी भाष्यविस्तरः । तस्य इदमादिवाक्यम्– "समाम्नायः समाम्नातः"– इति । गवादिर्देवपत्न्यन्तः शब्दसमुदायः समाम्नाय उच्यते । समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य कर्मणि कारके समाम्नायः । समभ्यस्यते मर्यादयाऽयमिति समाम्नायः । स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः पञ्चाध्यायी शास्त्रसंग्रहभावेन एकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः ॥

तस्य किमिति ? "स व्याख्यातव्यः" । स च यो [यः] । समाम्नातः छन्दस्येवावस्थितो गवादिभिरन्यैर्वा निरुक्तैर्यः समाम्नातः । अयश्च एतस्मिन्निरुक्ते स एष उभयलक्षणोऽपि व्याख्यातव्यः ॥ आह, कथमेतद्गम्यते असमाम्नातव्याख्यानमप्यत्राभिप्रेतमिति ? समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति उच्यते – निर्वचनलक्षणोपदेशात् । निर्वचनप्रसक्तानाञ्चमृगकर्णदक्षिणालक्ष्मी–निघण्टुभद्राधःशब्दप्रभृतीनामेवमाद्यानां निर्वचनोपदेशात् ज्ञायतेऽसमानव्याख्यानमप्यत्राभिमतमिति । यत्पुनरेतदुक्तं समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति । अत्र ब्रूमः, न हि समाम्नानार्हाणामन्तोऽस्ति, तेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात्; अतश्चाध्ययनश्रवणज्ञानशक्तिहानदोषः प्रसज्येत । शक्यश्च तावल्लक्षणोद्देशोदाहरणभूतनिघण्टुशब्दसमवायेनाधीतवेदेन मेधाविना तपस्विना लक्षणविनियोगार्थच्छन्दोदैवतनिदानविदाभियुक्तेनागमवता मन्त्रार्थोऽभ्यूहितुमित्येतावानानेन निघण्टुषु शब्दसमुदायः समाम्नातः । तस्मादुपपन्नमसमाम्नातव्याख्यानमप्यत्राभिमतमिति । असमाम्नानञ्च सर्वेषां शास्त्रातिगौरवभयादिति । "व्याख्यातव्यः" विभज्य इमान्यत्र नामानि, इमान्याख्यातानि, उपसर्गा इमे निपाता इमे, इदं सामान्यलक्षणम्, इदं विशेषलक्षणम्, इमान्येकार्थानि, इमान्यनेकार्थानि, इमान्यवगतसंस्काराणि, इदमभिधानम्, इदमभिधेयम्, इदमभिधानस्य निर्वचनमित्येवंविधया मर्यादया परिपाट्या यथासमाम्नात आख्यातव्यो निर्वक्तव्य इत्यर्थः ॥

(અનુવાદ) 'સમામ્નાય' (= સંગ્રહ) સંગૃહીત કરવામાં આવ્યો, હવે તેની ઉપર વ્યાખ્યાન કરવું જોઈએ.

ભૂમિકા : યાસ્કના નિરુક્ત ઉપર દુર્ગાચાર્યે ટીકા લખી છે. આ ટીકાના પ્રારંભે તેમણે જણાવ્યું છે કે મોક્ષ પર્યન્તના પુરુષાર્થની પ્રાપ્તિને અર્થે વેદ પ્રવૃત્ત થયો છે અને આ વેદજ્ઞાનને માટે વેદાંગોની પ્રવૃત્તિ થઈ છે. શિક્ષા, કલ્પ, જ્યોતિષ, છન્દ, વ્યાકરણ અને નિરુક્ત— એ છ વેદાંગોમાંથી નિરુક્તનું સવિશેષ મહત્ત્વ છે, કારણ કે નિરુક્ત સિવાય બીજું એકેય એવું વેદાંગ કે અન્ય કોઈ શાસ્ત્ર નથી કે જે અશેષપણે શબ્દોને સમજાવે, તેમનું નિર્વચન કરે. આમ દુર્ગાચાર્યે (દુર્ગ) બહુ સ્પષ્ટ રીતે નિરુક્તના અધ્યયનનું પ્રયોજન દર્શાવ્યું છે. પરંતુ વેદાંગોના અધ્યયન–અધ્યાપનમાં પ્રયોજક એવું એક આપ્તવાક્ય (શ્રુતિ) પણ સાંભળવા મળે છે : "બ્રાહ્મણે નિષ્કારણ (નિત્યકર્મવત્) ષડ્ અંગો સહિત વેદોનું અધ્યયન–અધ્યાપન કરવું જોઈએ.

(વિમર્શ 1) ગૌઃ શબ્દથી આરંભીને દેવપત્ન્યઃ સુધીના વૈદિક શબ્દોને રજૂ કરતા 'નિઘંટુ' નામના પાંચ અધ્યાયવાળા સંગ્રહ ઉપર બાર અધ્યાયવાળું આ 'નિરુક્ત' નામનું ભાષ્ય રચવામાં આવે છે; તેનું આ પ્રથમ વાક્ય છે: "નિઘંટુ" નામનો સંગ્રહ કર્યો, તેની ઉપર વ્યાખ્યાન કરવું જોઈએ."

ગો વગેરે શબ્દોના સમૂહને 'નિઘંટુ' કહેવામાં આવે છે. આ નિઘંટુને માટે જ 'સમામ્નાય' એવો શબ્દ વાપરવામાં આવ્યો છે. કેમ કે સમામ્નાય શબ્દમાં सम् + आङ् ઉપસર્ગપૂર્વક અભ્યાસાર્થક √म्ना ધાતુનો પ્રયોગ થયો છે. समभ्यस्यते मर्यादयाऽयमिति समाम्नायः । (दुर्गः) (સમ્યક્પણે અને મર્યાદાપૂર્વક જેનો પાઠ કરવામાં, અભ્યાસ કરવામાં આવે છે તેને 'સમામ્નાય' કહે છે.) ઋષિઓએ મન્ત્રાર્થના પરિજ્ઞાનને માટે ઉદાહરણ રૂપ કેટલાક વૈદિક શબ્દોનો પાંચ અધ્યાયવાળો આ સંગ્રહ કર્યો છે. આવા આ સમામ્નાય (સંગ્રહ)નું વ્યાખ્યાન કરવું જોઈએ. એટલે કે 'નિઘંટુ'માં સંગ્રહાયેલા બધા જ શબ્દો

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ઉપર અહીં (નિરુક્તમાં) વ્યાખ્યાન કરવામાં આવશે' એવો આ પ્રથમ વાક્યનો અર્થ થાય, પરંતુ દુર્ગ સ્પષ્ટ કરે છે કે 'આ સંગ્રહ (નિઘંટુ)માં' ન હોય, પણ વેદમાં જોવા મળતા હોય, એવા બીજા કેટલાક શબ્દો ઉપર પણ વ્યાખ્યાન કરવું અભિમત છે. આ સન્દર્ભમાં ઉમેરવું જોઈએ કે વર્તમાન નિઘંટુમાં ન હોય અને વેદમાં પણ ન હોય તેવા કેટલાક પ્રશિષ્ટ સંસ્કૃત સાહિત્યના શબ્દો ઉપર પણ યાસ્કે વ્યાખ્યાન કર્યું છે. તથા નિઘંટુના બધા જ શબ્દો ઉપર અહીં વ્યાખ્યાન મળતું નથી, કેટલાક શબ્દોને 'નિગદવ્યાખ્યાત' ગણીને યાસ્કે નિર્વચન (વ્યુત્પત્તિ) આપ્યા વિના છોડી દીધા છે. સામાન્ય રીતે 'વ્યાખ્યાન'નું લક્ષણ આ પ્રમાણે આપવામાં આવે છે:

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
पूर्वापरसमाधानं व्याख्यानं पञ्चलक्षणम् ॥

પદચ્છેદ (= સન્ધિ છોડવો), પદોના અર્થો દર્શાવવા, સમાસાદિનો વિગ્રહ કરી બતાવવો, વાક્યયોજના = પદોનો પરસ્પર અન્વય દર્શાવવો અને પૂર્વઅપર વાક્યોની સંગતિ કરી બતાવવી– એવા પાંચ પ્રકારનાં લક્ષણોવાળું જે કથન હોય તેને 'વ્યાખ્યાન' કહે છે.

પરંતુ જ્યાં વિભાજન કરીને આ નામ છે, આ આખ્યાત છે, આ ઉપસર્ગો છે, આ નિપાત છે, આ સામાન્યલક્ષણ છે, આ વિશેષલક્ષણ છે, આ એકાર્થક શબ્દો છે, આ અનેકાર્થક શબ્દો છે, આ અનવગતસંસ્કારવાળા શબ્દો છે; આ અભિધાન (નામ) છે, આ અભિધેય (અર્થ) છે અને આ અભિધાનનું નિર્વચન છે– એ પ્રમાણે શબ્દોની સમજૂતી રજૂ કરવામાં આવે છે તેને દુર્ગ 'વ્યાખ્યાન' કહે છે. કેટલાક વિદ્વાનો શબ્દાર્થની સમજૂતી ઉપરાંત વ્યુત્પત્તિની વિચારણાનો જેમાં સમાવેશ થાય છે તેને 'વ્યાખ્યાન' કહે છે.

---

2. तमिमं समाम्नायं निघण्टवः इत्याचक्षते । निघण्टवः कस्मात् ? निगमा इमे भवन्ति । छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातः । ते निगन्तव एव सन्तो निगमनान् 'निघण्टव' उच्यन्त इत्यौपमन्यवः । अपि वा आहननाद् एव स्युः, समाहता भवन्ति । यद्वा समाहृता भवन्ति ॥

(दुर्गः) "तमिमं समाम्नायं निघण्टव इत्याचक्षते" । तं च योऽसमाम्नातश्छन्दस्येवावस्थितोऽगवादिरन्यैर्वा निरुक्तैः समाम्नातः, तमिमं च निघण्टव इत्याचक्षते । अन्येऽप्याचार्या इति वाक्यशेषः । निरूढाहीयमेतस्मिंश्छन्दःसमुदाये सञ्ज्ञेत्यभिप्रायः ॥

"निघण्टवः कस्मात्'.– इति । निघण्टुशब्दव्युत्पिपादयिषया प्रश्नः ॥

"निर्विवक्षयेदमाह– "निगमा इमे भवन्ति" । येष्वभिधाननिर्वचनप्रारम्भकेष्वाचार्यः अयं यास्को निरुक्तकारः कस्माच्छब्दमुत्तरत्र न कुर्यात्, तेष्वपि व्याख्याकाले कस्मादिति शब्दः समुत्पाद्यः । तथाहि व्याख्यासाफल्यं भवति । निगमा इमे भवन्ति । निश्चयेनाधिकं वा निगूढार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ततो निगमसञ्ज्ञा निघण्टव एव इमे भवन्ति ॥

आह, – कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति । उच्यते, – यस्मादेते गवादयः "छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः" । छन्दांसि मन्त्राः तेभ्य उपलक्षितसामर्थ्याः समाहृत्य ग्रन्थीकृता इत्यर्थः । आह, – कस्मात् पुनरेतावन्त एव ग्रन्थीकृता इति । उच्यते. – इतो यस्मादेतैरेव छन्दस्यवस्थितैरभिनिविष्टधियामपि मेधाविनां तपस्विनां लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदामपि सतां मन्त्रार्थपरिज्ञानायोद्यमभङ्गः क्रियते, दुःपरिज्ञानत्वात् तेषाम्, एतेषु परिज्ञातेषु अप्रतिबन्धेन शक्यते मन्त्रार्थः परिज्ञातुमिति अत उच्यते त एव ज्ञापका भवन्तीति । अतश्चैत एवोन्नीतसामर्थ्याः समाहृत्य समाम्नाता इति ॥

समाम्नानमात्रमेव दर्शयति । प्रकरणगताश्च नित्या एवैत इति गम्यते । "ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः । उदाहृताः समाम्नाताः निर्वचनप्रसङ्गतो निरुच्यन्ते । य एते समाम्नाता गवादयः त एते मन्त्रार्थनिगमयितृत्वादुभयेऽपि निगन्तवः सन्तो निगमनाद्धेतोर्निघण्टव उच्यन्त इत्यौपमन्यवः । इत्येवमर्थनिगमयितृत्वान्निगन्तव एते सम्पन्नाः सन्तोऽतिपरोक्षवृत्तिना शब्देन गकारस्थाने घकारं कृत्वा तकारस्थाने च टकारं कृत्वा वर्णव्यापत्त्यादिलक्षणम् । अथाप्यादिविपर्यय इत्येवमादि तदेतत्परोक्षातिपरोक्षवृत्तिषु यथासम्भवं द्रष्टव्यम् । त्रिविधा शब्दव्यवस्था, – प्रत्यक्षवृत्तयः, परोक्षवृत्तयः अतिपरोक्षवृत्तयश्च । तत्रोक्तक्रियाः प्रत्यक्षवृत्तयः, अन्तर्लीनक्रियाः परोक्षवृत्तयः, अतिपरोक्षवृत्तिषु शब्देषु निर्वचनाभ्युपायः । तस्मात्परोक्षवृत्तितामापाद्य

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः । तद्यथा, – निघण्टव इत्यतिपरोक्षवृत्तिः, निगन्तव इति परोक्षवृत्तिः, निगमयितार इति प्रत्यक्षवृत्तिः । यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यते । उक्तश्च, – वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" ॥ वक्ष्यति चायमपि, – वर्णविपर्ययवर्णव्यापत्तिलक्षणम् । त एते निगन्तवः सन्तो निघण्टव उच्यन्ते । इत्येवमतिपरोक्षवृत्तयो निर्वक्तव्याः । प्रायेण चोणादिषु परोक्षवृत्तयः शब्दाश्चिन्त्यन्ते । तत्र तेषां लक्षणमुपेक्षितव्यम् । येषामपि लक्षणं नास्ति, तेषामपि तत्र कल्प्यम् । अपरिसमाप्ता ह्युणादय इति लक्षणविदः प्रतिजानते सर्वथापि लक्षणासम्भवे पृषोदरादिपाठसिद्धिरेव द्रष्टव्या । तत्र हि यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्यभिव्याहारानभिघातायेति हि लक्षणविदो मन्यन्ते । इत्यौपमन्यवः आचार्यो मन्यत इति वाक्यशेषः । उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः । कीर्त्तिप्रथनार्थमौपमन्यवग्रहणम् ॥

"अपि वाऽऽहननादेव स्युः समाहता भवन्ति" । अपि चैवं यथोक्तम् । अपि चैवमन्यथा निघण्टवः स्युः । कथमिति ? आहननादेव । न निगमनादित्यभिप्रायः । विद्यमानमपि निगमनमविवक्षितमेतस्मिन् पक्षे । अनेकक्रियायोगेऽपि हि सति काञ्चिदेव क्रियामङ्गीकृत्य नामधेयप्रतिलम्भो भवति । तदुत्तरत्र वक्ष्यामः । आह, किमेतेष्वाहतमिति ? उच्यते, – समाहता भवन्ति । समः स्थाने नीत्येष नियुक्तः । दर्शयिष्यति चायमुपसर्गव्यत्ययं निरित्येष समित्येतस्य स्थाने इति । आङ् विद्यमान एवाध्याहृतो मर्यादार्थप्रकाशनाय हन्तेः पाठार्थे वर्त्तमानस्यानेकार्थत्वाद्धातूनां वर्णव्यापत्त्या आघशब्दवत् हकारस्थाने घकारः । अथ कोऽर्थः एतस्मिन् पञ्चाध्यायीसंग्रहे मर्यादया पठिता ह्येते भवन्ति ? तस्मात्समाहताः समाहन्तव एते सन्त उपसर्गव्यत्ययोपसर्गाध्याहारवर्णव्यापत्तिभिर्निघण्टव इत्युच्यन्ते । प्रसिद्धश्च पाठार्थे हन्तेः प्रयोगः, एवं हि वक्तारो भवन्ति – 'ब्राह्मणे इदमाहतम्' 'सूत्रे इदमाहतम्' — इति । अर्थप्राधान्यादर्थनिर्वचनवशेन शब्दविपरिणामोऽयं प्रदर्शितः ॥

"यद्वा, समाहृता भवन्ति" । पूर्ववदेवोपसर्गव्यत्यय उपसर्गाध्याहारोऽत्रापि । धातुस्तु हरतिरत्र । यत् यस्मादित्यर्थः । यस्माद्वा एते समाहृता भवन्ति छन्दोभ्यः तस्मात् समाहरणक्रियायोगात् समाहर्त्तवः एते समाहृताः सन्तः पूर्ववदेवोपसर्गव्यत्ययादिक्रमेण निघण्टव इत्युच्यन्ते । एतस्मिन्नपि निगमनसमाहननक्रिये निघण्टुषु विद्यमाने अर्थविवक्षिते कृत्वा समाहरणक्रियायोगहेतुको नामधेयप्रतिलम्भ उक्तः । एवमेष निघण्टुशब्दो गमेर्वैकोपसर्गात् हन्तिहरतिभ्यां वा द्व्युपसर्गाभ्यां निरुक्तः ॥

आह, – किमयं पुनरतिमहान् यत्न एकस्मिन्नभिधाने अनेकधात्वर्थनिर्वचनकृत इति ? उच्यते, – इह तावत् सर्वाण्याख्यातजानि नामानीति सिद्धान्तः सत्याख्यातजत्वेऽभिधेयस्था या क्रिया लक्ष्यते, तदभिधानसमर्थे परोक्षवृत्तौ वा तदभिधायिनिरूढिशब्दे धातुरुपकृतः, स च पुनः स्ववर्णक्रियासामान्येन, तत्रैवं सति रूढिशब्दे यावन्तो धातवः स्वलिङ्गं रूढिगतं वर्षयन्ति तावन्तः सङ्गृह्य स रूढिशब्दो निर्वाच्यः । किं कारणम् ? विशेषलक्षणव्यवस्थाभावात् । न हि तत्र विशेषलक्षणव्यवस्था काचिदस्ति योऽयमेकोऽवतिष्ठेत, अन्ये व्यावर्तेरन् अपि चोक्तं वार्त्तिककारेण । "यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् । अर्थश्चाप्यभिधेयस्थतावद्भिर्गुणविग्रहः" – इति । रूढ़िशब्दगतानाञ्च धातूनां रूढ़िशब्दवाच्येऽर्थे क्रियायोगे सति एतदभावे तु क्रियाया रूढ़िशब्दे वर्त्तमानमपि धातुलिङ्गमकिञ्चित्करम् । स एव क्रियाभावः तदाश्रयनिर्वचनव्यावर्त्तको भवति । ता एताः तिस्रः क्रिया निगमनसमाहननसमाहरणाख्याः निघण्टुषु विद्यन्ते, तदभिधायिन्यपि च रूढ़िशब्दनिरुच्यमाने गमिर्हन्तिर्ह्रतिश्चाहम्पूर्विकया सन्निपत्य वदन्ति' – 'ममानुरूपं मयैतं निर्ब्रूहि' 'मयैतं निर्ब्रूहि' इति । गमिस्तत्र गकारमात्मीयं व्यापन्नं मन्यते घकारं तथा हन्तिहरती हकारं व्यापन्नं घकारं मन्यते । तस्मादयमनेकैर्धात्वर्थैर्निघण्टुशब्दो निरुक्त एवञ्जातीयाभिधाननिवर्चनप्रदर्शनाय ॥

(અનુવાદ-2.) તે આ સમામ્નાય (વૈદિક શબ્દોના સંગ્રહ)ને 'નિઘંટુ' કહેવામાં આવે છે. निघण्टवः એવો શબ્દ કયા ધાતુમાંથી બન્યો હશે ? આ શબ્દો (વેદમન્ત્રનો) અર્થબોધ કરાવનારા (નિગમ) છે. વેદોમાંથી સમાહરણ કરી કરીને તેમને એકત્ર કરવામાં આવ્યા છે. ૧. અર્થબોધ કરાવનારા હોઈને જ नि + √गम् ઉપરથી निघण्टवः એવો શબ્દ બન્યો છે એમ ઔપમન્યવનું માનવું છે. ૨. અથવા તો વિભાજનને કારણે सम् + आ + √हन् ધાતુ ઉપરથી જ निघण्टवः શબ્દ બન્યો હશે કેમ કે (નિઘંટુ)માં આ બધા શબ્દોનું વિભાજન (વર્ગીકરણ) કરવામાં આવ્યું છે. અથવા તો - નિઘંટુમાં આ બધા શબ્દોનો પાઠ કરવામાં આવ્યો છે. ૩. અથવા તો सम् + आ + √हृ ધાતુ ઉપરથી આ શબ્દ બન્યો હશે, કેમ કે નિઘંટુમાં શબ્દો ભેગા કરવામાં આવ્યા છે.

2. (વિમર્શ) : કેટલાક આચાર્યો આ સમામ્નાય (સંગ્રહ) અને ગો વગેરેથી ભિન્ન એવા, એટલે કે આ સંગ્રહમાં ન આવ્યા હોય તેવા, અથવા તો અન્ય નિરુક્તકારોએ એકત્ર કરેલા શબ્દોને પણ निघण्टवः કહે છે. આવા વૈદિક શબ્દસમુદાયને માટે 'નિઘંટુ' એવી સંજ્ઞા રૂઢ થઈ ગયેલી છે. દુર્ગના ઉપર્યુક્ત સ્પષ્ટીકરણમાંથી એવું સૂચન નીકળે છે કે 'નિઘંટુ' એ જાતિવાચક નામ છે અને વર્તમાન નિઘંટુ ઉપરાંત અન્ય નિઘંટુઓ પણ હશે.

'નિઘંટુ' શબ્દની વ્યુત્પત્તિ (પ્રકૃતિ-પ્રત્યયનો વિભાગ વગેરે) દર્શાવવાની ઇચ્છાથી, 'निघण्टवः શબ્દ કયા ધાતુમાંથી બન્યો હશે ?' એવો પ્રશ્ન કરવામાં આવ્યો છે. આના જવાબમાં યાસ્ક ત્રણ વ્યુત્પત્તિઓ નોંધે છે : (૧) नि + √गम् ધાતુ ઉપરથી આ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

શબ્દ બન્યો હશે. કેમ કે આ વૈદિક શબ્દો, કે જેમને માટે 'નિઘંટુ' એવી સંજ્ઞા વાપરવામાં આવે છે. (નિઘંટુ નામના વૈદિક શબ્દકોશની અંદર આવેલા પ્રત્યેક શબ્દને પણ 'નિઘંટુ' કહેવામાં આવે છે) તે "નિગમ" છે. એટલે કે (ક) નિગૂઢ અર્થવાળા આ શબ્દો યથાર્થ રીતે જાણવામાં આવે તો મન્ત્રાર્થનો નિશ્ચયપૂર્વક બોધ કરાવનારા છે અથવા તો (ખ) નિગૂઢ અર્થવાળા આ શબ્દો યથાર્થ રીતે જાણવામાં આવે તો વેદમંત્રમાં અંતર્નિહિત અર્થને બહાર ખેંચી કાઢીને અધિકપણે અર્થબોધ કરાવનારા છે. હવે કોઈને પ્રશ્ન થાય કે આ શબ્દો ક્યાંથી લેવામાં આવ્યા છે ? તો જવાબ છે કે આ ગો વગેરે શબ્દો છંદ (વેદ)માંથી જ સમાહરણ કરી કરીને એકત્ર કરવામાં આવ્યા છે અને તે શબ્દો મંત્રોનો અર્થબોધ કરાવનારા (= નિગમન કરાવનારા) હોઈને જ निगन्तवः = निघण्टवः । એવા નામથી ઓળખાય છે. [नि + √गम् ઉપરથી निगमयितृ > निगमयितारः । > निगन्तृ > निगन्तु > (હવે ग કારને સ્થાને घ કાર; त કારને સ્થાને ट કાર અને પરિણામે न् કારનો ण् કાર થઈને) निघण्टु ॥ (निगन्तवः > निघण्टवः)] (૨) सम् + आङ् + √हन् ધાતુમાંથી 'નિઘંટુ' શબ્દ બન્યો હશે, કેમ કે નિઘંટુમાં વૈદિક શબ્દોનું સમાહનન (વિભાજન) થયું છે, જેમ કે – આટલાં અન્તરિક્ષ નામો છે, આટલાં પૃથ્વીનાં નામો છે વગેરે. સમાહનનનો બીજો અર્થ 'પાઠ કરવો' એવો થાય છે : 'અહીં વૈદિક શબ્દોનો પાઠ કરવામાં આવ્યો છે.' सम् + आङ् + √हन् । આ સ્થિતિમાં सम् ને સ્થાને निનો પ્રયોગ કરવામાં આવે છે તથા आङ्नो અધ્યાહાર સમજવામાં આવે છે. અહીં सम् ઉપસર્ગને સ્થાને नि થાય છે. એમાં निः इति एषः सम् इत्येतस्य स्थाने । (नि. ૧૨/૭) એવું યાસ્કનું વચન જ પ્રમાણ છે. [आ + हताः = पठितः । नि + हन्तृ > निहन्तु > (હવે ह > घ અને त > ट; પરિણામે न् > ण् થઈને) निघण्टु ।] (૩) सम् + आङ् + √हृ > समाहरण । "અહીં (નિઘંટુમાં) વૈદિક શબ્દો ભેગા કરવામાં આવ્યા છે." આ વ્યુત્પત્તિમાં પણ પૂર્વની જેમ समને સ્થાને नि અને आङ्નો અધ્યાહાર કરીને नि + हर्तृ > निहर्तु, રેફનો લોપ, (તથા ह > घ, त > ट અને न् > ण् થઈને) निघण्टु ॥

આ પ્રમાણે યાસ્કે પોતે જ નિઘંટુ શબ્દની ત્રિવિધ વ્યુત્પત્તિ દર્શાવી છે. આવા ત્રણ વિકલ્પો રજૂ કરવા પડ્યા છે. એનો અર્થ એ થાય કે યાસ્ક પોતે નિઘંટુ શબ્દની વ્યુત્પત્તિ વિશે કદાચ નિશ્ચિત નહીં હોય, છતાંય આ ત્રણેય વિકલ્પોમાંથી કયો વિકલ્પ સત્યની વધુ નજીક હશે અથવા તો કયો વિકલ્પ યાસ્કને અભિમત હશે એ વિચારી શકાય એમ છે. પહેલો વિકલ્પ ઔપમન્યવ નામના યાસ્કના કોઈક પુરોગામી આચાર્યનો મત છે. અહીં યાસ્કે ઔપમન્યવને પોતાના સમયના એક પ્રમાણભૂત આચાર્ય તરીકે ઉલ્લેખ્યા છે. દુર્ગ કહે છે : उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः । આચાર્ય તરફ આદરભાવ સૂચિત કરવા માટે 'ઔપમન્યવ' શબ્દનું ગ્રહણ કરવામાં આવ્યું છે. આથી સંભવતઃ યાસ્કને મન આ પ્રથમ વ્યુત્પત્તિ વધારે પ્રમાણભૂત અથવા તો સ્વીકાર્ય હશે. બીજો વિકલ્પ રજૂ કરતાં યાસ્કે अपि वा आहननादेव स्युः । એ વાક્યમાં ભાર સૂચવવા एव કારનું ગ્રહણ કર્યું છે. આથી પ્રો.રાજવાડેનું કહેવું છે કે આ મત યાસ્કનો પોતાનો હશે તથા ત્રીજા વિકલ્પમાં કોઈ આચાર્યનું નામ કે વિશેષ આગ્રહ સૂચવતું કોઈ પદ જોડવામાં આવ્યું નથી, તથા તેનો સૌથી છેલ્લો નિર્દેશ કરવામાં આવ્યો છે તેથી આ ત્રીજો વિકલ્પ યાસ્કને બહુ સ્વીકાર્ય નહીં હોય.

અહીં ત્રણેય વ્યુત્પત્તિઓ રજૂ કરતી વખતે गनो घ અને तनो ट થાય છે, અથવા તો सम्ने સ્થાને नि અને आङ्नो અધ્યાહાર, કે हर्तुमांना રેફનો લોપ દર્શાવવામાં આવે છે તે જોઈને સંભવ છે કે કોઈને શંકા થાય કે શબ્દની વ્યુત્પત્તિ રજૂ કરવામાં આ પ્રકારની પદ્ધતિ વ્યાકરણશાસ્ત્રસમ્મત હશે કે નહિ. આ સંદર્ભમાં નિરુક્તનું લક્ષણ રજૂ કરતો એક શ્લોક નોંધપાત્ર છે :

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

(વર્ણનો આગમ અર્થાત્ ઉમેરો, વર્ણનો વિપર્યય, વર્ણમાં વિકાર, વર્ણનો નાશ તથા અર્થના અતિશયને કારણે અમુક ધાતુનો યોગ— એવી પંચવિધ પ્રવૃત્તિઓ જ્યાં જોવા મળે તેને 'નિરુક્ત' કહે છે.) આ લક્ષણ મુજબ વર્ણવિપર્યય, વિકાર કે નાશથી આગળ વધીને અર્થના પ્રાધાન્યને કારણે અર્થાનુસારી નિર્વચનને વશવર્તીને સમાહનન કે સમાહરણ જેવા સમગ્ર શબ્દનું 'નિઘંટુ' એવા શબ્દમાં વિપરિણામ અહીં દર્શાવવામાં આવ્યું છે.

અહીં દુર્ગ નોંધે છે કે શબ્દની વ્યવસ્થા ત્રિવિધ છેઃ પ્રત્યક્ષવૃત્તિ, પરોક્ષવૃત્તિ અને અતિપરોક્ષવૃત્તિ. निघण्टवः એ અતિપરોક્ષવૃત્તિ પ્રકારનો શબ્દ છે, તેને निगन्तवः એ રીતે પરોક્ષવૃત્તિમાં ફેરવીને પછી निगमयितारः એમ પ્રત્યક્ષવૃત્તિથી સમજાવવામાં આવે છે : यस्मान्निगमयितारः एते निगन्तवः इति निघण्टवः उच्यन्ते ॥ આ રીતે 'નિઘંટુ' પદનું નિર્વચન કર્યા પછી "વાક્યમાં ચાર પ્રકારનાં પદો જોવાં મળે છે" તેની ચર્ચાનો ૩. तद्यानि एतानि૦થી પ્રારંભ કરે છે.

3. तद् यानि एतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानि इमानि भवन्ति ॥

(દુર્ગઃ) "तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति" । इहैतावदेवोक्तं समाम्नायो निघण्टव इति, समाम्नायशब्दपर्य्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता, न तु निघण्टुशब्दस्यार्थतत्त्वमवधारितं, तदवधार्य्यत इति पर्य्युपयुक्तस्तच्छब्दः । किं पुनस्तदिति ? यान्येतानि चत्वारि पदजातानि, या एताश्चतस्रः पदजातयः । क्व? लोके वेदे

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

च । कतमानि तानि ? नामाख्याते चोपसर्गनिपाताश्च । किन्तेषामिति ? इमानि चत्वार्य्यपि पदजातानि सन्त्येतस्मिन् शास्त्रे । किमिति निघण्टुसञ्ज्ञानि भवन्ति ? नित्यमेवानुविधीयमानानि भवन्तीत्याह । न कदाचिदपि न भवन्ति, नित्यं भवन्त्येवेत्यभिप्रायः ॥ चत्वारीति चतुर्ग्रहणमवधारणार्थम्, नैकं पदजातं, यथार्थः पदमैन्द्राणामिति, नापि द्वे, यथा सुबन्तं तिङन्तश्च, नापि त्रीणि, निपातोपसर्गाविकतः कृत्वा, नापि पञ्च, षड्वा, यथा गतिकर्मप्रवचनीयभेदेनेति ॥ पदजातानीति पदगणा इत्यर्थः । जातशब्दो हि गणे प्रसिद्धः । तद्यथा । गोजातमश्वजातमिति । तद्वदिहापि । तत्र, नामपदगणः स्त्रीपुन्नपुंसकलिङ्गप्रविभागेन, तथाऽऽख्यातपदगणः कर्तृवचनभावचनकर्मवचनप्रविभागेन, तथोपसर्गगणः, आङादि, तथा निपातगणः, इवादिः । एवमभिप्रेत्योक्तं चत्वारि पदजातानीति । अत्र नामाख्यातयोः पूर्वमभिधानं प्राधान्यात्, अप्राधान्यादुपसर्गनिपातानां पश्चात् । उभे अपि नामाख्याते निपातोपसर्गनिरपेक्षे अपि सती स्वमर्थं ब्रूतः; न तूपसर्गनिपातानां नामाख्यातनिरपेक्षाणामर्थोऽस्ति । वक्ष्यति हि, – "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः" – इति । वाच्ये, न चैते अर्थेनार्थवर्ता । द्योत्ये, नोपसर्गनिपाता इति वाप्राधान्यम् । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति । तस्मादुपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वमभिधानम्, अप्राधान्याच्च पश्चादुपसर्गनिपातानामिति । नामाख्याते इतीतरेतराकाङ्क्षित्वमुभयोर्नामाख्यातयोः समासेनाभिधानम् । कथमितरेतराकाङ्क्षित्वमिति ? यज्ञदत्त इति हि नामशब्दस्तावदेव साकाङ्क्षो भवति, यावत् पचति पठति इत्याद्याख्यातशब्दैर्न निराकाङ्क्षीक्रियत इति, तथा पचतीत्याख्यातशब्दस्तावदेव साकाङ्क्षो भवति, यावन्न यज्ञदत्तशब्दः पचति यज्ञदत्त ओदनमिति, इतरेतराकाङ्क्षित्वमुभयोर्नाख्यातयोः समानकार्य्यत्वं चैतयोर्लक्ष्यते ॥ वाच्येनार्थेनार्थवत्त्वमित्यर्थः समस्येते नामाख्याते इति । नाम्नः पूर्वनिपातोऽल्पाच्तरत्वात् । नामपदवाच्यर्थाश्रयक्रियोपलक्ष्यत्वाच्चाख्यातस्य पश्चान्निपातः उपसर्गनिपाता इति । उभयेषामुपसर्गनिपातानां नामाख्यातयोरर्थविशेषद्योतकत्वात् समानकार्य्यत्वमित्यतः समस्यन्ते । आख्यातसह्ययोगित्वादुपसर्गाणामाख्यातानन्तरं पाठः, परिशेषाणां निपातानां पश्चात् अपरिमिताश्च निपाता इति ॥

(અનુ.) (વાક્યમાં) જે ચાર પ્રકારના પદગણો (પદસમૂહો) છે, જેમ કે, નામ અને આખ્યાત, તથા ઉપસર્ગ અને નિપાત તે (જ) આ (નિઘંટુઓ) છે.

3. ***(વિમર્શ)*** : અગાઉની ચર્ચામાં 'સમામ્નાયને નિઘંટુ કહેવામાં આવે છે' એમ કહ્યા પછી निघण्टवः कस्मात् । એવો પ્રશ્ન પૂછીને નિઘંટુ શબ્દની વ્યુત્પત્તિ વિશે વિચારણા કરવામાં આવી, પરંતુ 'નિઘંટુ' એ શું છે ? અર્થાત્ એ શબ્દ કોને માટે વપરાય છે ? તેનો સ્પષ્ટ નિર્દેશ કર્યો નથી. આથી આ વાક્ય દ્વારા એ દર્શાવવામાં આવે છે કે જે ચાર પ્રકારનાં પદો લોકમાં અને વેદમાં સાંભળવા મળે છે તેને જ નિઘંટુ કહે છે. દુર્ગ નોંધે છે : અહીંયાં 'પદગણો ચાર હોય છે' એ કથનમાં જે ચતુર્ (चत्वारि)નું ગ્રહણ કર્યું છે તે અવધારણાર્થે છે. ૧. अर्थः पदम् । એમ કહીને પદ એક જ છે એમ કહેનાર ઐન્દ્ર પરંપરા ૨. सुप्तिङन्तं पदम् । (पा.सू. १।४।१४) એવા સૂત્રથી પદો બે પ્રકારના (જ) છે એમ કહેનાર પાણિનીય પરંપરા. ૩. નિપાત અને ઉપસર્ગને એક જ (અભિન્ન) ગણીને પદો ત્રણ છે એમ કહેનારી કોઈક પરંપરા. ૪. कर्मप्रवचनीयाः । (पा.सू. १/४/८३) સૂત્રોક્ત કર્મપ્રવચનીયને (પૂર્વોક્ત ચાર પદોથી ભિન્ન) પાંચમું પદ માનીને પદો પાંચ છે એમ કહેનારી પરંપરા (જુઓ : વાક્યપદીય ૩/૧/૧) અને પં.પૂર્વોક્ત પાંચ પદોની સાથે गतिश्च । (पा.सू. १/४/६०) સૂત્રોક્ત ગતિસંજ્ઞક પદને પણ છઠ્ઠું પદ ગણીને છ પ્રકારનાં પદો ગણાવનારી પરંપરા યાસ્કને સ્વીકાર્ય નથી. યાસ્કના મતે તો નામ, આખ્યાત, ઉપસર્ગ અને નિપાત – એ ચાર જ પદો છે અને એ સ્પષ્ટ કરવા માટે चत्वारि એમ લખ્યું છે. અહીં पदजातानिમાંનો जात શબ્દ 'ગણ' અર્થમાં છે. સ્ત્રીલિંગ, નપુંસકલિંગ અને પુંલિંગ નામો એ નામપદોનો ગણ છે. કર્તૃવચન, કર્મવચન અને ભાવવચન ધાતુઓ આખ્યાતપદોનો ગણ છે. प्र, परा, अप, सम्, अभि વગેરે ઉપસર્ગપદોનો ગણ છે તથા इव, च, ननु વગેરે નિપાતપદનો ગણ છે.

આ ચાર પ્રકારનાં પદોમાં નામ અને આખ્યાતનું પ્રાધાન્ય હોઈને તેમનો પ્રથમ ઉલ્લેખ કરવામાં આવ્યો છે, તથા ઉપસર્ગ અને નિપાત અપ્રધાન હોઈને તેમનો પાછળ ઉલ્લેખ કર્યો છે. વાક્યમાં ઉપસર્ગ અને નિપાતથી નિરપેક્ષ રહીને (સ્વતંત્ર રીતે) પણ નામ અને આખ્યાત પોતાના અર્થને કહેનારા છે, પરંતુ નામ અને આખ્યાતથી નિરપેક્ષ રહીને ઉપસર્ગ અને નિપાત પોતાના અર્થને કહી શકતા નથી. બીજું, નામ અને આખ્યાત અર્થના વાચક છે, પણ ઉપસર્ગ અને નિપાત અર્થના દ્યોતક છે.

4. तत्र एतन् नामाख्यातयोर्लक्षणं प्रदिशन्ति–भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि ॥

(दुर्गः) "तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति" । तत्र तस्मिन्, लोकवेदप्रसिद्धे पदचतुष्टये निघण्टुशब्दसमानसञ्ज्ञोपलक्षिते, ये तावन्नामाख्याते तयोस्तावदेतल्लक्षणं प्रदिशन्ति । कतमत् ? यदेतद्वक्ष्यमाणमित्यभिप्रायः । प्रदिशन्ति प्रविभज्येदं नाम्नां लक्षणमिदमाख्यातस्येत्येवं दिशन्ति उपदिशन्त्याचार्या इति वाक्यशेषः । आह, लक्षणोपदेशः कस्मात् ? अनुक्रमणेनैव सिद्धत्वात् । अनुक्रमणेनैव हि वक्ष्यति "इमानि पृथिवीनामधेयान्येकविंशतिः (२,२,१०)" "हिरण्यनामान्युत्तराणि पञ्चदश (२,३,१)"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कान्तिकर्माण उत्तरे धातवोऽष्टादश (३,२,१०)" गतिकर्मण उत्तरे धातवो द्वाविंशं शतम् (३,२,१०)" – इति । तत एव विज्ञास्याम इमानि नामानीमान्याख्यातानीति । तस्मादयमनर्थको लक्षणोपदेशः ? नानर्थकः । कस्मात् ? अथापि हि लक्षणं समाम्नातान्यसमाम्नातानि च व्याप्य वर्त्तते । यत्पुनरेतदुक्तमनुक्रमणादेव विज्ञास्याम इति । अत्र ब्रूमः, – निर्देशोऽसौ न हि लक्षणम्, निर्देशश्च परिच्छिन्नविषयः । स तर्हि किमर्थ इति ? शास्त्रे रूपस्वभावोपप्रदर्शनार्थः । तस्मादसमाम्नातार्थोऽयमादितो लक्षणोपदेशो युक्त इत्युपपन्नम् ॥

आह, – तात्पर्य्येणैवेदमन्तरेण समाम्नातवदसमाम्नातानि कस्मान्नोपदिश्यन्ते, अपि च तथा सूपदिष्टानि भवन्तीति ? उच्यते, – तथाह्युपदेशगौरवं भवति, ग्रहणशक्तिहानश्च । अपिचोक्तम् । "ऋषयो ह्युपदेशस्य नान्तं यान्ति पृथक्तशः । लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥" – इति । तस्मादुपदेशगौरवभयाद् ग्रहणशक्तिहानदोषाश्च समानलक्षणोपदेशः क्रियते इति ।

आह, – किं पुनस्तल्लक्षणमिति ? उच्यते, – "भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि" । नामपदवाच्यार्थाश्रयक्रिया-व्यङ्ग्यो भावः । पाकरागत्यागाख्यः । स यत्र प्रधानं, गुणभूता क्रिया, तदिदं भावप्रधानम् । किं पुनस्तदिति । आख्यातम् । आख्यायतेऽनेन गुणभावेन वर्त्तमाना अनेककारकप्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया । तस्याश्च प्राधान्येन प्रवर्त्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः ।

आह, – कथं पुनर्गुणभूता क्रियेति ? उच्यते, – तदर्थत्वात् । तदर्था हि सा । भावार्था भावसिद्ध्यर्थमात्मलाभमनुभूय कारकेषु तण्डुलादौ पाकाख्यं भावमभिनिष्पाद्यावसितप्रयोजनैकदेश एव तिरोभवति । यस्य च यदर्थ आत्मलाभस्तत्तद्गुणभूतं भवति । भावसिद्ध्यर्थश्च क्रियाया आत्मलाभस्तस्माद् गुणभूतेति गम्यते । भावसिद्ध्यैव चानुमीयते क्रिया परोक्षापि सती ॥

आह, – कथं पुनः परोक्षा क्रियेति ? उच्यते, – न हि सेन्द्रियाणामन्यतमेन स्वरूपस्था सती कदाचिदपि सन्निकृष्यते । किं तर्हि ? तदवसाने योऽभिनिष्पद्यते भावः, तेन लिङ्ग्यते । नूनमभिनिर्वृत्ता क्रिया यथा भावोऽयमभिनिष्पादित इति नाभिनिर्वृत्ता चेदभविष्यद् यथैव सा क्रियानिर्वृत्तेर्नाभवदयं भावः, एवं साम्प्रतमपि नाभविष्यत्, अस्ति चायम् । तस्मादभिनिर्वृत्ता क्रियेत्येव-मनुमीयते । तदेतदाख्यातं क्रियावाचकमपि सद्भावार्थत्वात् क्रियाया भावं प्रधानमुच्यत इति एवमेके मन्यन्ते । एके पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते । प्रकृत्यर्थविशेषणं हि प्रत्ययार्थादय इति । भावः, कर्मः क्रिया, धात्वर्थः, इत्यनर्थान्तरम् । स यत्र प्रधानं गुणभूतानि साधनानि तदिदं भावप्रधानम् । किं पुनस्तत् ? आख्यातम् । आख्यायन्ते स्त्रीपुन्नपुंसकानि क्रियागुणभावेन वर्त्तमानान्यनेन क्रिया च तेषामुपरि प्राधान्येन वर्त्तमानेत्याख्यातम् ॥

आह, – कथं पुनरत्र क्रियायाः प्राधान्यमिति ? उच्यते, – सा ह्यत्र शब्दवाच्या । अर्थगृहीतानि तत्साधनानीति । अतः प्राधान्यमत्र क्रियायाः । इतश्च प्राधान्यम् । कुतः ? विशेषप्रत्ययाधानात् । पचतीति प्रथमपुरुषैकवचनान्ते आख्यातशब्दो वर्त्तमानकालकर्तृविषयो यत्किञ्चिदविवक्षितविशेषमेव पक्त्रादिसाधनमात्मन आश्रयभावेनोपलक्षयन्ननेकक्रियाशक्तिमत्यपि पक्त्रादौ साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति, नान्यासु क्रियासु, नापि विशिष्टे पक्त्रादौ साधने । यश्च यस्मिन्नर्थे विशेषेण वर्त्तते शब्दः, स एव तस्य प्रधानम् । विशेषेण च क्रियायामाख्यातशब्दो वर्त्तते, गुणभावेन कारके । तस्माद्विशेष प्रत्ययाधानाद्भावप्रधानमाख्यातमित्युपपन्नम् । अपि च क्रियाव्यापारविज्ञानपरतया पृष्टः – 'किं करोति देवदत्तः' ? क्रियाख्यानपरतयैव प्रत्याचष्टे – 'पचतीति' । न त्वोदनमिति पूर्वमुक्त्वा ततः पचतीति ब्रवीति ॥

अथ कथमुच्यते भावप्रधानमाख्यातमिति ? शृणु, – अमूर्त्ता हि क्रिया निरुपाख्या, सा हि कारकैरभिव्यज्यमाना कारकशरीरे च सती शक्यते निर्देष्टुम् । इतरथा हि अशरीरा सती सा न गृह्येत, अग्रहणे च सति कथमिव निर्दिश्येत । तत्रैवं सति कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्टमात्मीयं कार्य्यमारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद् ग्रहणासम्भवान्निर्दिश्यते । न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाकृतिरिति साक्षाद् ग्रहणासम्भवः । तस्मादोदनकर्मकार्य्या देवदत्तकर्तृकौ-दनशब्दोपपदैव निर्दिश्यते, – ओदनं पचति देवदत्त इति । तत्राविवक्षितस्वार्थ ओदन शब्दः । अपि च क्रियाव्यापारपिपृच्छिषयैव पृष्टः – किं करोतीति, क्रियाव्यापारमात्रमेव प्रत्याचष्टे – पचतीति । ततः किमिति, पर्य्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति । तस्माच्छब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम् । यत् पुनरेतदुक्तमोदनमिति पूर्वमुक्त्वेति, तत्र ब्रूमः, – स हि पर्य्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्य्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्य्यनुयोगोऽनुक्तो दृष्टव्यः । तस्मात् पचतीति शब्दवाच्यत्वादत्र क्रियायाः शब्दान्तरवाच्यत्वात् द्रव्यस्य क्रियैव प्रधानमिति । इतश्च न द्रव्यप्रधानमाख्यातम् । एकस्मिन् वाक्ये द्वयोराख्यातयोरसमवायात् । पचतिपठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति । न हीतरः शब्द इतरत्र गुणी भवति । द्रव्यशब्दे च समवायात्, समवैति

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

द्रव्यशब्देनाख्यातशब्दः । पचति देवदत्त इत्युक्ते पचिक्रियागुणभूतो लक्ष्यते देवदत्तः । तस्मादुपपन्नं भावप्रधानमाख्यातमिति । अपिचोक्तम् । "क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते । त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते" – इति । तत् पुनरेतच्चतुः प्रभेदमाख्यातं भवति । कर्त्तरि, भावे, कर्मणि, कर्मकर्त्तरि चेति । पचतीति कर्त्तरि । 'भूयते, पच्यते इति भावकर्मणोः । पच्यते स्वयमेवेति कर्मकर्त्तरि । चतुर्ष्वप्यवयवार्थानि द्रवाण्यप्रधानानीति क्रिया एव प्रधानम् । तामभिदधत् तयैव लक्ष्यमाण आख्यातसञ्ज्ञो भवतीत्युक्तम् । आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तम्, पश्चान्नामलक्षणमुच्यते । किं पुनस्तत् ? सत्वप्रधानानि नामानि । लिङ्गसङ्ख्ययोरत्र सद्भाव इति सत्त्वम् । तथा लक्षणोपपत्तेः । तद्येषु प्रधानं गुणभूता क्रिया नामान्येव तानि । नमन्त्याख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि । यथैव ह्यख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रिया अविवक्षिता । द्रव्यपरत्वात्सत्वशब्दस्य तद्धिक्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थोऽसौ व्यावर्त्तते ॥

आह, – कथं पुनर्नाम्नि क्रिया विद्यत इति, विद्यमानापि वा विवक्षितेति ? उच्यते । प्रकृतिः, प्रत्ययः, विभक्तिरिति त्रेधा विभज्यमानमेतावदेवैतन्नाम । तत्र प्रकृतिर्धातुरित्येकोऽर्थः । धातुश्च पुनः क्रियावचनः स च नाम्नि विद्यत इति तदभिधेयभूतया क्रियया भवितव्यम् । यथावश्यं यत्रार्थस्तत्र तदभिधायकः शब्दः, यत्र शब्दस्तत्र तद्वाच्योऽर्थ इति । सम्बुद्धौ हि शब्दार्थौ वाच्यवाचकत्वेन नित्यमिति । एवं तावत् क्रिया विद्यते यत् पुनरेतदुक्तं – विद्यमानापि क्रिया कथमविवक्षितेति ? अत्र ब्रूमः, – नाम्नि यो धातुः सकृत् प्रयोजयति तेन प्रातिपदिकेनाभिभूतक्रियाभिधानशक्तिः प्रातिपदिकान्तर्लीनवृत्तिरेव स्वमर्थमुद्भावयितुमशक्नुवन् प्रातिपदिकार्थमिवानुवर्त्तमानो द्रव्यप्रधान एव भवतीत्येवं न विवक्षिता क्रिया । सा तु विद्यमानापि विगृह्यमाणे नाम्नि प्रातिपदिकनिवन्धनादुन्मुच्यमाना द्रव्यगतमर्थं प्रकाशयति, न प्राग्विग्रहादिति. द्रव्यपरता सत्वशब्दस्य गम्यते । तथाचोक्तम् । "शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते । तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥" – इति । पुनश्चोक्तम् । "अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः । तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ निर्देशः कर्म करणं प्रदानमपकर्षणम् । स्वाम्यर्थोऽप्यधिकरणं विभक्त्यर्थाः प्रकीर्त्तिताः ॥" – इति । स्त्रीपुन्नपुंसकमेदं निपातोपसर्गाणामपि वा क्वचिन्नामत्वमपेक्ष्य बहुवचनेनोक्तं नामानीति । अपरे पुनर्भावकालकारकसङ्ख्याश्चत्वार एतेऽर्था आख्यातस्य । तेषां भावप्रधानता भवति । अतो भावप्रधानमाख्यातमित्युक्तम् । नामनोऽपि सत्ता द्रव्यं सङ्ख्या लिङ्गमित्येतेऽर्थाः । तेषां द्रव्यं प्रधानमित्यतः सत्वप्रधानानि नामानीत्युक्तम् ॥

(અનુ.) (તે પૂર્વોક્ત પદચતુષ્ટય)માંથી નામ અને આખ્યાતનાં લક્ષણ કહે છે : (૧) ભાવ અર્થાત્ ક્રિયાના પ્રાધાન્યવાળા પદને આખ્યાત કહે છે અને (૨) સત્ત્વના પ્રાધાન્યવાળા પદને નામ કહે છે.

4. (વિમર્શ) : इमानि पृथिवीनामधेयान्येकविंशतिः ।.. कान्तिकर्माण उत्तरे धातवोऽष्टादश । આ પ્રકારનું અહીં નામ અને આખ્યાતાદિનું માત્ર પરિગણન કરવામાં આવે અને જો તેમનાં લક્ષણ (વ્યાખ્યા) ન આપવામાં આવે તો એક મોટી આપત્તિ ઊભી થાય. જેમ કે, નિઘંટુમાં જે નામ કે આખ્યાત અસમામ્નાત (અસંગૃહીત) હોય તેમને નામ કે આખ્યાત કહી શકાશે નહિ, એટલે કે પરિગણન અપર્યાપ્ત છે, વ્યાપ્ય છે. જ્યારે લક્ષણ પર્યાપ્ત છે, વ્યાપક છે. આથી જો નામ અને આખ્યાતનું લક્ષણ આપ્યું હશે તો તે નિઘંટુમાં નહીં ગણાવેલાં નામ અને આખ્યાતને પણ લાગુ પડશે. આમ સૌથી પહેલાં નામ અને આખ્યાતનું લક્ષણ રજૂ કરવામાં આવે છે : (૧) જે પદમાં ભાવ (ક્રિયા)નું પ્રાધાન્ય જણાતું હોય તેને આખ્યાત કહે છે. આખ્યાત શબ્દનો વિવિધ અર્થમાં પ્રયોગ જોવા મળે છે, જેમ કે, (क) આખ્યાત એટલે તિઙન્ત = ધાતુ + તિ વગેરે પ્રત્યયનો સમુદાય. દા.ત. पचति । (ख) આખ્યાત એટલે કેવળ તિઙ્ પ્રત્યયો = પરસ્મૈપદ અને આત્મનેપદના નવ નવ પ્રત્યયો. (ग) આખ્યાત એટલે કેવળ ધાતુ. ઉદા. ત., √पच्, √भू, √कृ, આમાંથી પહેલો (क) મત કેટલાક વૈયાકરણોનો છે. બીજો (ख) મત નૈયાયિકોનો છે તથા ત્રીજો (ग) મત યાસ્કનો અને બીજા ઘણા વૈયાકરણોનો છે. અહીં પ્રસ્તુત ચર્ચામાં આખ્યાતનો અર્થ ધાતુ જ લેવાનો છે. કેમ કે, નામના લક્ષણમાં सत्त्वप्रधानानि नामानि । નામ પદથી કેવળ પ્રકૃતિ (પ્રાતિપદિક)નો નિર્દેશ કર્યો છે. તેથી સાહચર્યના નિયમ વડે આખ્યાતના લક્ષણ भावप्रधानम् आख्यातम् ।માં પણ આખ્યાત શબ્દ કેવળ પ્રકૃતિનો એટલે કે ધાતુનો જ વાચક છે. અહીં તે પ્રકૃતિ-પ્રત્યયના સમુદાયનો કે કેવળ પ્રત્યયનો વાચક નથી.

[વિશેષ નોંધ: વૈયાકરણો શાબ્દબોધમાં વ્યાપારને મુખ્ય (વિશેષ્ય) માને છે. આથી તેઓ 'भावप्रधानम्'માં બહુવ્રીહિ સમાસ સમજે છે. तद्यथा–भावः = क्रिया प्रधानं यस्मिन् तत् भावप्रधानं आख्यातम् । भावोऽत्र क्रिया, सा च करणव्युत्पत्त्या व्यापारं, कर्मव्युत्पत्त्या च फलं बोधयति । एवञ्चाख्याते फलव्यापारयोः प्राधान्यमिति फलति ॥ જેમાં ક્રિયા અથવા ક્રિયાનુકૂલ વ્યાપાર (ભાવ)નો અર્થ મુખ્ય = પ્રધાન હોય તેને આખ્યાત (ધાતુ) કહે છે. નૈયાયિકો શાબ્દબોધમાં, વાક્યમાં વપરાયેલા

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પ્રથમાન્તપદનો (ઉદ્દેશ્યનો) અર્થ મુખ્ય (વિશેષ્ય) માને છે. આથી તેમના મતે આખ્યાતનો અર્થ (કર્તા-કર્માદિના વાચક) તિઙ્ પ્રત્યયો એવો થાય છે. અહીં 'ભાવપ્રધાનમ્'ને ષષ્ઠી તત્પુરુષ સમાસ રૂપે લેવામાં આવે છે એને આખ્યાત (તિઙ્)માં ભાવ = કૃતિ = યત્નની પ્રધાનતા સમજવામાં આવે છે. (કૃતિ = કૃત્યાશ્રય કર્તા = પ્રથમાન્તપદ. भावप्रधानम् आख्यातम् । એ વાક્યમાં આવેલા 'આખ્યાત' શબ્દના અર્થઘટન પરત્વે વિવાદ હોઈ શકે છે, (કેમકે સ્વયં યાસ્કે જ આ શબ્દને અન્યત્ર જુદા અર્થમાં વાપર્યો છે; જેનો આપણે આ ચર્ચાના અંતે પરિચય કરીશું). પરંતુ વૈયાકરણો જે રીતે નિરુક્તના આ વાક્યને સમજે છે અને ઉપયોગમાં લે છે, તે સમજવું અહીં આવશ્યક છે :- વૈયાકરણોના મતે आख्यात એટલે 'તિઙન્ત પદ' અર્થાત્ ક્રિયાપદ. (એટલે કે ધાતુ + વિકરણ પ્રત્યય + કાળવાચક तिप् - तस् - अन्ति વગેરે પ્રત્યયોના સંયોજનથી બનેલું पच् + अ + ति = पचति । पठति । गच्छति । જેવું આખું 'ક્રિયાપદ.') આવા આખ્યાત = ક્રિયાપદમાંથી કુલ પાંચ અર્થોની પ્રાપ્તિ થાય છે. જેમકે,

पच्	+	अति
↓		↓
૧. ક્રિયા		૩. (વર્તમાન)કાળ
(=વ્યાપાર)		૪. પુરુષ
૨. ફળ		૫. સંખ્યા

આમ કોઈપણ આખ્યાત = ક્રિયાપદ = તિઙન્ત પદમાંથી અર્થો તો પાંચ મળે છે; પણ તેમાં પ્રાધાન્ય કોનું ? એવો પ્રશ્ન થાય તો યાસ્ક કહે છે કે - જે પદના (પાંચ) અર્થોમાંથી 'ભાવ'નું અર્થાત્ 'ક્રિયા'નું (એટલે કે 'વ્યાપાર'નું) પ્રાધાન્ય હોય તેને "આખ્યાત" કહે છે. [આમ भावप्रधानम् શબ્દમાં બહુવ્રીહિસમાસ લેવાનો છે.] હવે, ક્રિયાપદમાંથી મળતા પાંચ અર્થોમાંથી જો 'ભાવ'નું = ક્રિયાનું પ્રાધાન્ય રહેતું હોય, તો બીજા ચાર અર્થો (તે પ્રધાન અર્થની પ્રત્યે) ગુણભાવે = વિશેષણભાવે જોડાય છે. અર્થાત્ ભાવ (એટલે કે ક્રિયા) રૂપ અર્થ વિશેષ્ય બને છે; અને ફળ, કાળ, પુરુષ. સંખ્યા રૂપ અર્થો વિશેષણ બને છે. - આને આધારે વૈયાકરણોએ "ધાત્વર્થ-વ્યાપારમુખ્ય વિશેષ્યક શાબ્દબોધ" માન્યો છે. ઉદા. ત., चैत्रः तण्डुलान् पचति । જેવા (વાક્ય (= શબ્દો) માંથી જે (અર્થ)બોધ થાય છે તે આ પ્રમાણે છે : एकत्वावच्छिन्न-चैत्राभिन्न-कर्तृको वर्तमानकालिकस् तण्डुलाभिन्न-कर्मनिष्ठ-विक्लित्त्यनुकूलः फूत्कारत्वादिरूपो व्यापारः ॥ અર્થાત્ ૧. એકત્વ સંખ્યાથી યુક્ત એવો; ૨. ચૈત્રથી અભિન્ન (= જુદો નહીં)- તેવો પુરુષ જેનો કર્તા છે તેવો; ૩. વર્તમાનકાળમાં થનારો અને ૪. તંડુલથી અભિન્ન એવા કર્મકારકમાં રહેનાર વિક્લિત્તિ રૂપ ફળને જન્માવનારો ફુત્કાર (= ફુંકવું) વગેરે ક્રિયા કરવા રૂપ વ્યાપાર. (આમાં પહેલાં ચાર પદો, કે જે સંખ્યા, પુરુષ અને કાળ તથા ફળ રૂપ અર્થોને કહેનાર છે, તે વિશેષણ રૂપે અવભાસે છે; અને છેલ્લો પાંચમો 'વ્યાપાર' રૂપ અર્થ વિશેષ્ય રૂપે અવભાસે છે. આમ વૈયાકરણોએ भावप्रधानम् आख्यातम् । વાક્યમાંથી પોતાના શાબ્દબોધનો મુખ્ય સિદ્ધાન્ત વિકસાવ્યો છે. ટૂંકમાં - "ભાવ = વ્યાપાર = ક્રિયા રૂપ અર્થ છે પ્રધાન જેમાં, તે પદને આખ્યાત (= ક્રિયાપદ કહે છે." - આ भावप्रधानम् आख्यातम् । વાક્યનો અર્થ છે.

★ ★ ★

યાસ્કે આગળ ઉપર જ્યારે नामानि आख्यातजानि । એવા શાકટાયનના મતને પુરસ્કારીને, તે નૈરુક્તોનો સિદ્ધાન્ત છે. - એવું જ્યાં કહ્યું છે, ત્યાં તેમણે आख्यात શબ્દનો અર્થ આખું "ક્રિયાપદ" એવો કર્યો નથી. ત્યાં લક્ષણાથી આખ્યાત = આખા ક્રિયાપદના એક ભાગ = એક અંશ રૂપ 'ધાતુ'ને સમજવાનો છે. पच् + अ + ति = पचति । તેવા આખ્યાતમાંથી કેવળ ધાત્વંશ (पच्)ને માટે (જ) શાકટાયનના ઉપર્યુક્ત સિદ્ધાન્તમાં आख्यात શબ્દ વપરાયો છે. આથી આપણે भावप्रधानम् आख्यातम् । માં પણ आख्यात શબ્દનો અર્થ (કેવળ) 'ધાતુ' એમ કરીશું તો તે પણ અપ્રસ્તુત કે ખોટું નહીં ગણાય. અર્થાત્ 'ભાવ'નો, એટલે કે ક્રિયાનો અર્થ જેમાંથી પ્રાધાન્યેન મળે છે તે ('ધાતુ')ને 'આખ્યાત' કહે છે. - એમ કહીશું તો પણ તે વાંધાજનક નહીં બને.]

(૨) જે પદમાં સત્ત્વનું પ્રાધાન્ય હોય તેને નામ કહે છે. અહીં સત્ત્વનો અર્થ દ્રવ્ય થાય છે. ભાવ અર્થાત્ ક્રિયા અમૂર્ત છે, પરંતુ સત્ત્વ એટલે દ્રવ્ય મૂર્ત છે. ભાવ અને સત્ત્વ વચ્ચે ખાસ અંતર નથી. કેમ કે તે શબ્દો અનુક્રમે √भू सत्तायाम् અને √अस् भुवि એવા લગભગ સમાનાર્થક ધાતુઓમાંથી નિષ્પન્ન થયેલા છે. પાણિનીય વ્યાકરણ પરંપરામાં ક્રિયાનાં બે સ્વરૂપ બતાવવામાં આવ્યાં છે : (૧) સાધ્યાવસ્થાપન્ન ભાવ અને (૨) સિદ્ધાવસ્થાપન્ન ભાવ. એટલે કે જેમાં ક્રિયા પૂરી ન થઈ હોય, જેમ કે पचतिમાં, 'રાંધવાની ક્રિયા થઈ રહી છે' એવો બોધ થાય છે, એટલે કે રાંધવાની ક્રિયાનો પ્રારંભ થયો છે પણ અંત આવ્યો નથી એટલે કે

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

તે ક્રિયા હજી સાધ્ય અવસ્થામાં છે, તેને જ સાધ્યાંવસ્થાપન્ન ભાવ કહે છે. હવે જ્યારે રાંધવાની ક્રિયા પૂરી થઈ જાય છે. ત્યારે पाकः એમ કહેવામાં આવે છે. અહીં રાંધવાની ક્રિયા સાધ્ય અવસ્થામાં પસાર થઈને, સિદ્ધ અવસ્થામાં પહોંચી છે અને આથી જ ક્રિયા પૂર્ણ થઈ જતાં તે સકર્મક ક્રિયાએ મૂર્ત સ્વરૂપ પકડ્યું છે (कृदभिहितो भावः द्रव्यवत् प्रकाशत इति पतञ्जलिः – ३/१/६७ भाष्यम्) તેથી તેને पाकः કહેવામાં આવે છે. આવા સત્ત્વ રૂપ અર્થાત્ દ્રવ્ય રૂપ બનેલા સિદ્ધાવસ્થાપન્ન ભાવ (पाकः)ને જ યાસ્ક 'નામ' કહે છે. પાણિનીય પરંપરામાં ક્રિયા અપૂર્ણ સ્થિતિમાં હોય કે પૂર્ણ સ્થિતિમાં હોય, પણ તેને માટે 'ભાવ' શબ્દ જ વપરાય છે : સિદ્ધાવસ્થાપન્ન ભાવ કે સાધ્યાવસ્થાપન્ન ભાવ, પરંતુ યાસ્કે આને માટે અનુક્રમે ભાવ (ક્રિયા) અને સત્ત્વ (દ્રવ્ય) એવા શબ્દો વાપર્યાં છે. સાધ્યાવસ્થાપન્ન ભાવ = ક્રિયા અમૂર્ત છે. કોઈપણ ક્રિયા પિંડીભૂત કરીને બતાવી શકાતી નથી. [क्रिया नामेयमत्यन्तापरिदृष्टा । अशक्या क्रिया पिण्डीभूता निदर्शयितुं यथा गर्भो निर्लुंठितः । सासावनुमानगम्या ॥ पा.सू. १–३–१ सूत्रभाष्य.] અને તેને માટે 'આખ્યાત' શબ્દ વાપર્યો છે. સિદ્ધાવસ્થાપન્ન ક્રિયા હંમેશાં મૂર્ત હોય છે, સત્ત્વભૂત એટલે કે દ્રવ્ય હોય છે. તેને માટે 'નામ' શબ્દ વાપર્યો છે.

'નામ'ના સંદર્ભમાં થોડીક વધુ સ્પષ્ટતા કરી લઈએ. આપણે गौः । पुरुषः । हस्ती । વગેરેને નામ કહીએ છીએ. તદ્ઉપરાંત, ઉપર જોયું તેમ સિદ્ધાવસ્થાપન્ન ભાવ જેવાં કે पाक । गमन । पाठ । વગેરેને પણ 'નામ' કહેવામાં આવે છે. વ્યાકરણની પરિભાષામાં આને કૃદન્તો કહેવામાં આવે છે. એટલે કે તેઓ ધાતુ ઉપરથી સાધવામાં આવેલાં નામો છે. આવાં કૃદન્તોને પણ राम । वन । જેવાં પ્રાતિપદિક (નામ) ગણીને (कृत्तद्धितसमासाश्च । पा.सू. १/२/४६), તેમને વિભક્તિપ્રત્યય લગાવવામાં આવે છે. જેમ કે, पाकः । गमनम् । पाठः । અહીં પ્રશ્ન થાય કે गौः । पुरुषः । हस्ती । વગેરે નામો છે, તે દ્રવ્ય છે એમ સમજવામાં કોઈ મુશ્કેલી પડતી નથી. પણ पाकः કે गमनम् જેવાંને મૂર્ત દ્રવ્ય ગણી શકાય ? યાસ્કના મતે તે બન્ને પ્રકારનાં નામો સત્ત્વભૂત (સત્ત્વપ્રધાન) છે અને તેથી તે દ્રવ્ય જ છે. पाकः । गमनम् । पाठः ।માં આપણને ધાતુનું જ્ઞાન સ્પષ્ટ છે અને गौः । पुरुषः । हस्ती । વગેરે શબ્દો પણ ધાતુસાધિત જ છે. (નિરુક્તકાર બધાં નામોને ધાતુજ માને છે. એ ન્યાયે) માત્ર આપણને તેનું જ્ઞાન નથી, એટલે જ पाकः । गमनम् । વગેરેને સત્ત્વભૂત મૂર્ત દ્રવ્ય તરીકે સ્વીકારતાં આપણને મુશ્કેલી પડે છે. પાણિનીય વ્યાકરણ પરંપરામાં આ મુશ્કેલીને દૂર કરવા માટે गौः । पुरुषः । જેવાં નામોને દ્રવ્ય કહ્યાં છે અને पाकः । गमनम् । જેવાં કૃદન્ત નામોને દ્રવ્યવત્ કહ્યાં છે. તો નામ અને આખ્યાતને આમ સમજી શકાય.

આખ્યાત	નામ	
સાધ્યાવસ્થાપન્ન	સિદ્ધાવસ્થાપન્ન	સત્ત્વ
ભાવ–અમૂર્ત ક્રિયા	ભાવ–મૂર્ત	દ્રવ્યો
દા.ત. पचति	पक्तिः । पाकः ।	पुरुषः । हस्ती ।
ક્રિયા	દ્રવ્યવત્	દ્રવ્ય

(આગળ ઉપર આવાં દ્રવ્યવાચક નામોને પણ 'આખ્યાતજ' જાહેર કરવામાં આવશે.) એટલે કે નિરુક્તકારોની દૃષ્ટિએ આ દ્રવ્યો પણ 'સિદ્ધાવસ્થાપન્ન ભાવ' જ છે.

5. तद् यत्र उभे भावप्रधाने भवतः । पूर्वापरीभूतं भावमाख्यातेन आचष्टे – व्रजति पचतीत्पुपक्रमप्रभृत्यपवर्गपर्यन्तम् । मूर्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्तिरिति । अदः इति सत्त्वानामुपदेशः । गौः अश्वः पुरुषो हस्तीति ॥ भवतीति भावस्य, आस्ते शेते व्रजति तिष्ठति इति ॥

(दुर्गः) एवमेके मन्यन्ते, – "तद्यत्रोभे भावप्रधाने भवतः." । एवं तावदनयोर्नामाख्यातयोः परस्पराविनाभूतयोः स्वपदार्थोक्तावेकस्य भावप्राधान्यमेकस्य सत्त्वप्राधान्यम् । अथ पुनर्यत्रैते उभे भवतः । क्व च पुनरेते उभे भवतः ? वाक्ये । तत्र कस्य प्रधानमर्थः, कस्य गुणभूत इति ? शृणु – भावप्रधाने भवतः, तस्य चिकीर्षितत्वांत् । वाक्ये ह्याख्यातं प्रधानं, तदर्थत्वात् गुणभूतं नाम । तदर्थस्य भावनिष्पत्तावङ्गभूतत्वात् । एवं तावदाख्यातं वाक्ये प्रधानम् ॥

अथ पुनः कथमभिनिर्वर्त्त्यमानो भाव आख्यातेनोच्यते ? किं वा तदाख्यातमिति ? यतो लोकप्रसिद्ध्यैवोदाहरति । तत् प्रसिद्धत्वाच्छब्दार्थसम्बन्धस्य । "पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजतिपचतीत्पुपक्रमप्रभृत्यपवर्गपर्य्यन्तम्" । अपूर्वमनपरं सन्तमेकत्वात् पूर्वापरीभूतं पूर्वापरमिव पौर्वापर्य्येणावस्थितमेक–मनेकासु क्रियासु आश्रितमुपानदधिनहनपूर्वोत्तरपदविहरण मथिभोजनशयनासनोदकपानाद्यास्वाश्रितं तदभिनिर्वृत्तिवशेनाभिनिर्वर्त्तमानं कस्मैचित् पृच्छते किं करोति ? अन्य आचष्टे व्रजतीति । अविभक्तकर्तृकं द्वितीयमिति उदाहरणद्वयं भावद्वयोपप्रदर्शनार्थम् । उपक्रमप्रभृतीति । उपक्रम आरम्भस्तस्मादारभ्यापवर्गपर्य्यन्तं यावदन्त्या क्रियेत्यर्थः ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

आह, – अन्त्यासन्निधौ भावनिर्वृत्तिदर्शनादन्त्ययैव निर्वर्त्यत इति ? शृणु, पूर्वासामभावे अन्त्यैव न स्यात्, पूर्वपक्षं हि तस्या अन्त्यात्वम् । अपि च । प्राप्तिफलो हि व्रजतिर्न चैकया क्रिययाऽभिमतदेशान्तरे प्राप्तिरस्ति । तस्मादुपक्रमाद्याभिः क्रियाभिरीषदभिनिष्पाद्यमानो भावोऽन्त्यायामभिसन्तिष्ठते । ततः सन्निकर्षे गृह्यते न त्वसावन्त्ययैव निर्वृत्त इत्यन्ते गृह्यीत: । अपि च, प्रसिद्धमेतदुपक्रमादारम्य यच्च व्रजितं, यच्च व्रज्यते, व्रजिष्यमाणं, तत्सर्वमेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति न प्रसिद्धिरुपरोद्धं न्याय्या । यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव शास्त्रेण क्रियते, नोत्पाद्यन्ते शब्दाः, नाप्यर्थपृ विधीयन्ते । तस्मात् प्रसिद्धशास्त्रसमयोऽपि लौकिकप्रसिद्धचैव पूर्वापरीभूतं भावमाख्यातेनाचष्टे, व्रजतिपंचतीत्युपक्रमप्रभृत्यपवर्गपर्य्यन्तम् । तस्मादुपपन्नमनेकक्रियाभिर्निर्वर्त्यमानो भाव आख्यातेनोच्यत इति । आह च "क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव । क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः ॥ – इति ॥

"मूर्त्तं सत्वभूतं सत्वनामभिः" । कदाचित् तु तमेव भावं तथैवोपक्रमप्रभृत्यभिनिर्वर्त्तमानममपवर्गपर्य्यन्तं मूर्त्तं सत्वभूतं सत्वरूपिणं लिङ्गसङ्ख्यायुक्तं सत्वनामभिराचष्टे ॥

कथम् ? "व्रज्या पक्तिरिति" । तत्रोक्तो विशेषः । कृदभिहितो भावो द्रव्यवद्भवति सोऽयं प्रयुक्तस्य लक्षणस्य प्रयोगमपेक्ष्य क्वचिदपवादः । आह च । "क्रियाभिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात् । सङ्ख्याविभक्त्यव्ययलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्ये ॥" – इति ॥

आह, – कस्मात् पुनरेक एव भावस्तिङन्तेन कृदन्तेन चान्यथोच्यत इति ? उच्यते, – शब्दस्वाभाव्यादृते नान्यदत्र प्रयोजकमस्ति । अपिचोक्तमस्माभिरवस्थितानामेव शब्दानामभिधानाभिधेयसम्बन्धेनाभिसम्बन्धानामेंव नित्यमन्वाख्यानमात्रमेव क्रियते । नोत्पाद्यन्तेऽर्थेषु वा विधीयन्ते शब्दा इति । व्रज्यापक्तिरित्युदाहरणद्वयमुक्तप्रयोजनम् ॥

"अद इति सत्वानामुपदेशः" इति । भावोऽधिकृतः । स च पुनः सत्वभूतो नेतरः, यतस्तत्सम्बन्धेनैव नाम्नो यदवशिष्यते तदुच्यते । किं पुनस्तत् सामान्यविशेषवाचित्वम् ? तत्राद इति सत्वानामुपदेशः । सामान्यत इति वाक्यशेषः । सर्वेषामपि सत्वानामध्ययने प्राप्ते लिङ्गविशिष्टत्वादिदमेवैकमुदाहृतमुपप्रदर्शनार्थम् ॥१॥

आह, – विशेषोपदेशः कथमिति ? उच्यते खण्डसूत्रम्, –

"गौरश्वः पुरुषो हस्तीति" । सत्त्वानां विशेषोपदेश इति वाक्यशेषः ॥ सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम् । सामान्यवृत्त्या विशेषवृत्त्या चोभयथा शब्दः प्रवर्त्तत इत्युभयमुपदर्शितम् ॥

"भवतीति भावस्य" । सामान्येनोपदेशः । अत्र हि सर्वेषां सत्तावाचिनामध्ययने प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः । विद्यमानत्वमेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्याभिर्विशेषक्रियाभिरभिसम्बन्ध्यन्ते । तस्माद्भवतीति सर्वक्रियाप्रसवबीज–भूतमस्तित्वमात्रमेव निरुपपदेन भवतिशब्देनोच्यत इत्युपपन्नं भवति । सामान्यवाचित्वं विशेषनिर्देशः ॥

कथमिति ? उच्यते, – "आस्ते शेते व्रजति तिष्ठतीति" । सकर्मकाकर्मकोपदर्शनार्थमुभयेषामुदाहरणम् ॥

(અનુ.) જ્યાં (વાક્યમાં) નામ અને આખ્યાત્ બન્નેનો પ્રયોગ હોય ત્યાં ભાવ અર્થાત્ આખ્યાતપદનું પ્રાધાન્ય માનવામાં આવે છે. પૂર્વાપરીભૂત ભાવ (ક્રિયા)ને આખ્યાત (ધાતુ)થી કહેવામાં આવે છે. જેમ કે, व्रजति । पचति । અહીં આરંભથી માંડીને અંત સુધીનું કથન જોવા મળે છે. તથા સત્ત્વભૂત મૂર્ત દ્રવ્યને સત્ત્વનામ (નામ)થી કહેવામાં આવે છે. જેમ કે, व्रज्या । पक्तिः ॥ અહીં अदस् એવા સર્વનામના ઉપયોગથી સત્ત્વ (દ્રવ્ય)નો નિર્દેશ કરવામાં આવે છે. તેનાં વિશેષ ઉદાહરણો गौः । पुरुषः । हस्ती । વગેરે છે. આ જ પ્રમાણે, भवति । એવી ક્રિયાથી ક્રિયાસામાન્યનો બોધ થાય છે. તે (ક્રિયા)નાં વિશેષ ઉદાહરણો आस्ते । शेते । व्रजति । तिष्ठति । વગેરે છે.

5. (વિમર્શ) : અહીં यत्र उभे भावप्रधाने भवतः । વાક્યનો અર્થ તથા અનુગામી ચર્ચા સાથે તેનો અન્વય થોડોક વિવાદાસ્પદ જણાય છે. દુર્ગ તેને આ પ્રમાણે સમજાવે છે : પરસ્પર અવિનાભૂત એવા નામ અને આખ્યાતનો વાક્યમાં જ્યારે પ્રયોગ થયો હોય છે ત્યારે કોનો અર્થ પ્રધાન કે ગુણભૂત (ગૌણ) ? તો વાક્યમાં આખ્યાત જ પ્રધાન છે અને તેનો અર્થ જ પ્રધાન ગણવામાં આવે છે. કેટલાક વિદ્વાનોના મતે भावः प्रधानं ययोस्ते भावप्रधाने । અર્થાત્ पचति અને पक्तिः એ બંને શબ્દોમાં ભાવ (ક્રિયા)નું પ્રાધાન્ય છે તેથી તેને ભાવપ્રધાને કહે છે. આમ 'ભાવ છે પ્રધાન જે બે શબ્દોમાં' (દા.ત. पचति । અને पक्तिः) એ બેમાંથી કોણ આખ્યાત છે અને કોણ નામ છે ? એવા પ્રશ્નનો અહીં पूर्वापरीभूतम्.. એ વાક્યથી જવાબ આપવામાં આવે છે. એટલે કે વાક્યમાં જ્યારે पचति અને पक्तिः એવા બન્નેય ભાવપ્રધાન શબ્દો વપરાયા હોય ત્યારે (૧) જે પૂર્વ અને અપર એવા

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ક્રમવાળો ભાવ (સાધ્યાવસ્થામાં રહેલી ક્રિયા) હોય છે તેને 'આખ્યાત' કહે છે. દા.ત., पचति । व्रजति इति । અહીં इति પછી વાક્ય પુરું થયેલું સમજવામાં આવે છે અને ત્યાર પછીના વાક્યમાં નામ કોને કહેવાય તેનો જવાબ છે : उपक्रमप्रभृति.. અર્થાત્ ઉપક્રમ (આરંભ)થી માંડીને અપવર્ગ (અન્ત) સુધીનું જેમાં કથન હોય તેવા મૂર્ત સત્ત્વભૂત દ્રવ્યને નામ કહે છે. જેમ કે, व्रज्या । पक्तिः इति ।

પ્રા. રાજવાડેના મતે तद्यत्रोभे भावप्रधाने भवतः (तत्र) पूर्वापरीभूतं.. पचतीति ॥ उपक्रमप्रभृति.. पक्तिरिति ॥ એવી વાક્યરચના સંતોષપ્રદ નથી. કેમ કે ભાવ એટલે થવું - becoming - તો શું व्रजतिની જેમ व्रज्या એ પણ 'થવું' - becoming - છે ? व्रज्या એ તો સિદ્ધ થયેલ સત્ત્વ - being છે અને તેથી 'નામ' છે. આમ व्रज्या એ 'ભાવપ્રધાન' નથી. પ્રા. રાજવાડે કહે છે કે तद्यत्रोभे भावप्रधाने भवतः એ વાક્ય યાસ્કે ન લખ્યું હોય. કેમ કે તે વાક્ય આખ્યાત અને નામનાં ઉદાહરણોની વચ્ચે ઘડીભર અવરોધરૂપ બને છે.

6. इन्द्रियनित्यं वचनमौदुम्बरायणः ॥ १ ॥

तत्र चतुष्ट्वं नोपपद्यते । अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः, शास्त्रकृतो योगश्च ॥

(दुर्गः) "इन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्ट्वं नोपपद्यते" । आह, – इह तावदुक्तं पदचतुष्टयम् । भाववचनता, द्रव्यवचनता, गुणभावः, प्रधानभावः, पूर्वापरीभावः, सामान्यवाचित्वं, विशेषवाचित्वमिति । नोपपद्यते । कस्मात् ? वचनानित्यत्वात् । कः पुनरेवमाहाऽनित्यं वचनमिति ? उच्यते, – इन्द्रियनित्यं वचनमिति । इन्द्र आत्मा, स येन ईयते लिङ्ग्यते अनुमीयते चास्त्यसावात्मा कर्त्ता, यस्येदं करणम्, नाकर्तृकं करणमस्तीति, तदिन्द्रियम् । तस्मिन्नित्यमिन्द्रियनित्यम् । किं पुनस्तत् ?. वचनम् । उच्यते अनेनेति वचनं वाक्यमित्यर्थः । कतमत् ? यदेतन्नामाख्यातोपसर्गनिपातात्मकम् । औदुम्बरायणः आचार्यो मन्यत इति वाक्यशेषः । उदुम्बरस्यापत्यमौदुम्बरिः, तस्यापत्यमौदुम्बरायणः ॥

आह, – ततः किमिति ? उच्यते, – तत्र तस्मिन् वाक्ये एवमिन्द्रियनित्ये सति यदेतत् पदचतुष्ट्वमुक्तमेतन्नोपपद्यते कस्मात् ? शृणु, – यावदेव वक्तुर्वागिन्द्रिये वचनम्, तावदेव तदस्तीति शक्यते वक्तुं, प्रच्युतं च नास्ति । अपि च । वाक्यमपि वाक्यं समस्तमुद्भूतं तदिन्द्रियेणावतिष्ठते । यदवयवभूतानि पदान्यवस्थितानि परिसङ्ख्यातुम् । न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यानमस्ति । तस्माद्वचनानित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युपपन्नम् ॥

किं चान्यत्, – "अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः" । वाशब्दः समुच्चयार्थो "वा विकल्पोपमानद्वन्द्व-समुश्चयार्थेष्विति" हि निपातविदः पठन्ति । वक्ष्यति चायमपि । "वेति विचारणार्थे" – इत्युपक्रम्य "अथापि समुच्चयार्थे भवति" – इति (१, २, ३) । एवं चैतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानां योऽयमितरेतरोपदेशः । इतरेतरगुणप्रधानभावो नाम्न आख्यातं प्रति गुणभावेनोपदेशः । आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशः । अयं च नोपपद्यते इत्यनुवर्त्तते । किं कारणं ? न हि विनष्टं नाम गुणभावमियादाख्याते, नापि नष्टमाख्यातं प्रधानभावमियान्नाम्नि । न हि विनष्टाविनष्टयोरितरेतरगुणप्रधानभावोऽस्ति किं वान्यतः ॥

"शास्त्रकृतोयोगश्च" । यश्चायं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः । तद्यथा । उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य लोपागमवर्णविकारैः । अयं वचनानित्यत्वान्नोपपद्यते । किं कारणं ? अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चारितो विनष्टः स चायमुपसर्गेण योक्ष्यते, प्रत्ययेन वा । न हि विनष्टाविनष्टयोर्योगोऽस्ति । तस्माद्य एव नामाख्यातयोरितरेतरगुणः प्रधानभाव उपसर्गनिपातानां नामाख्याताभ्यां योगे, यच्च पदचतुष्टयमुक्तं, सर्वमेतदसम्यगिति । युगपदुत्पन्नानामयुगपदुत्पन्नानामित्येवमारभ्यमाणयोर्वाक्ययोरन्यो व्याख्यामार्गो भवति । नोपपद्यते । युगपदुत्पन्नानामयुगपदुत्पन्नानामित्युभावपि व्याहारौ प्राप्नुतः । समानसंहितत्वात् । इन्द्रियनित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युच्चारयता शङ्काद्वारेणैतदवतार्य्यते, – युगपदुत्पन्नानामिति । अथ मतम्, – "अविचालिन एवैते कूटस्था अविनाशिनः शब्दास्ते तु कल्पान्ते" । तस्माद्व्याप्तिरुपाद्धिशीर्णेष्वभिधेयेष्वभिधातृषु कारणभावमापद्यमानेष्वाश्रयाभावादेवावस्थातुमशक्नुवतः अभिधेयाभिधातृसहिता एव कारणात्मभावमधिकमनुभूयाभिसंस्तवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्य्यकारणसर्वभूतसाधारणात्मभूते हिरण्यगर्भे विवर्त्तमाने तद्बुद्धिमाश्रयं प्राप्यते, नैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति । अत्र ब्रूमः, – एवमप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टयं प्राप्नोत्येव सहावस्थितानां, तथापीतरेतरोपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति । न हि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति । किं चान्यत्, – कूटस्थेषु चाविचालिषु नित्येषु शब्देषु य एव शास्त्रकृतो योगः, स एष नोपपद्यते । किं कारणम् ? अयुक्तो हि युज्यते, नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च, प्रत्ययाश्च लोपागमवर्णविकारैरिति । तस्मान्नित्यपक्षेऽपि वचनस्य तदेतदुपवर्णितम् । गुणप्रधानभावादिपदचतुष्टयमधिकृत्य सर्वमेतदसम्यगिति ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

અનુ૦ ઔદુમ્બરાયણ નામના આચાર્યના મતે વાક્યની અર્થાત્ શબ્દોની સત્તા ઇન્દ્રિયપર્યન્ત (જ) છે. (ઔદુમ્બરાયણના આ મતનો સ્વીકાર કરવામાં આવે તો (૧) પદચતુષ્ટયની સિદ્ધિ થશે નહીં, (૨) એક સાથે ઉત્પન્ન નહીં થનારા શબ્દોમાં પરસ્પર સંબંધ કે પ્રધાનગૌણભાવ (સિદ્ધ નહીં થાય) અને (૩) (વ્યાકરણ) શાસ્ત્રમાં વર્ણવેલો ધાતુ અને ઉપસર્ગાદિનો યોગ પણ (સિદ્ધ નહીં થાય).

6. (વિમર્શ) : અહીંથી શબ્દના નિત્યત્વાનિત્યત્વની ચર્ચાનો પ્રારંભ થાય છે. યાસ્ક સૌથી પહેલાં પૂર્વપક્ષી રૂપે ઔદુમ્બરાયણનો મત રજૂ કરે છે. ઔદુમ્બરાયણના મતે શબ્દો અનિત્ય છે. અહીં इन्द्रियनित्यम् શબ્દને સમજાવતાં દુર્ગાચાર્ય લખે છે કે ઇન્દ્ર એટલે આત્મા. તેનું જેનાથી અનુમાન થઈ શકે છે તે ઇન્દ્રિય, કેમ કે આત્મા કર્તા છે અને તેનું આ (ઇન્દ્રિય) કરણ (સાધન) છે. કર્તા વગરનું કરણ હોઈ શકતું નથી. આવી ઇન્દ્રિયને વિશે જે નિત્ય તે 'ઇન્દ્રિયનિત્ય' કહેવાય. આમ વક્તાની વાગિન્દ્રિયમાં અને શ્રોત્રેન્દ્રિયમાં જ વચન (શબ્દો) રહેશે, તેથી પર નહીં. બધાં જ દર્શનોમાં ઇન્દ્રિયને અનિત્ય માનવામાં આવી છે. તેથી ઇન્દ્રિયપર્યન્ત રહેનારું વચન કે શબ્દો અનિત્ય છે એમ આ વાક્યનો અર્થ થશે. આ વાક્યને અંતે નિરુક્તના પહેલા અધ્યાયનો પહેલો ખંડ સમાપ્ત થાય છે.

तत्र चतुष्ट्वं.. થી નિરુક્તના પહેલા અધ્યાયના બીજા ખંડનો પ્રારંભ થાય છે. પહેલા ખંડના છેલ્લા વાક્યથી જણાવવામાં આવ્યું હતું કે શબ્દો અનિત્ય છે, પરંતુ જો ઔદુમ્બરાયણના આ મતનો સ્વીકાર કરવામાં આવે તો ત્રણ આપત્તિઓ આવી પડે છે.

(૧) નામ, આખ્યાત, ઉપસર્ગ અને નિપાતનો જેમાં સમાવેશ થાય છે તે પદચતુષ્ટયની સિદ્ધિ થશે નહીં. એટલે કે 'પદો ચાર છે' એમ કહી શકાશે નહીં. કારણ કે શબ્દો જો અનિત્ય હોય તો તેમનું ઉચ્ચારણ થતાંની સાથે જ તેમનો નાશ થશે અને પરિણામે આ એક પદ, આ બીજું એમ ગણી શકાશે નહીં. એક પદ ઉચ્ચાર્યા પછી બીજું પદ ઉચ્ચારશો ત્યારે પહેલા પદનો તો નાશ થઈ ગયો હશે. આમ પદો ચાર છે એમ ગણાવી શકાશે નહિ. [વ્યાકરણ મહાભાષ્યમાં પણ આવી એક ચર્ચા મળે છે :.. न हि वर्णानां पौर्वापर्यमस्ति । किं कारणम् । एकैकवर्णवर्तित्वाच्च उच्चरितप्रध्वंसित्वाच्च वर्णानाम् । (वा–१०) एकैकवर्णवर्तिनी वाक् । न द्वौ युगपदुच्चारयति । गौरिति यावद्गकारे वाग्वतति, नौकारे, न विसर्जनीये । यावदौकारे, न गकारे, न विसर्जनीये । यावद्विसर्जनीये, न गकारे, नौकारे । उच्चरितप्रध्वंसित्वात् । उच्चतरितप्रध्वंसिनः खल्वपि वर्णाः । उच्चरितः प्रध्वस्तः । अथापरः प्रयुज्यते, न वर्णो वर्णस्य सहायः ॥ परः संनिकर्षः संहिता । पा.सू. १/४/१०१ इत्यत्र भाष्यम्]

(૨) अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः । આ વાક્યમાં वा શબ્દ વિકલ્પાર્થક નથી, પણ સમુચ્ચયાર્થક છે અને પૂર્વવાક્યમાંના नोपपद्यते એ પદને અહીં પણ જોડવાનું છે. આમ, પદચતુષ્ટયની સિદ્ધિ નહીં થવાની સાથે સાથે 'એક સાથે ઉત્પન્ન નહીં થનારા શબ્દોનો ઇતરેતરોપદેશ પણ સિદ્ધ થતો નથી.' એ બીજી આપત્તિ છે. ઇતરેતરોપદેશ એટલે શબ્દોનો પરસ્પર સંબંધ અથવા પ્રધાનગૌણભાવ, જેમ કે, નામની પ્રત્યે આખ્યાત પ્રધાન છે અને આખ્યાતની પ્રત્યે નામ ગૌણ છે. અહીં ઉચ્ચારાયા પછી વિનષ્ટ થયેલું આખ્યાત નામ પ્રત્યે પ્રધાનભાવને પ્રાપ્ત કરશે નહીં અથવા તો વિનષ્ટ થયેલું નામ આખ્યાતની પ્રત્યે ગૌણભાવને પ્રાપ્ત કરશે નહિ.

(૩) જો શબ્દો અનિત્ય હોય તો વ્યાકરણશાસ્ત્રમાં ધાતુ અને ઉપસર્ગનો, ધાતુ અને પ્રત્યયનો કે પ્રાતિપાદિક અને પ્રત્યયનો જે સંયોગ વર્ણવ્યો છે એ પણ ઉપપન્ન નહીં થાય–એ ત્રીજી આપત્તિ છે. વ્યાકરણ √भू+अ+ति >भो+अ+ति >भव्+अ+ति > (भवति । प्र+भवति > प्रभवति ॥ राम + सु >रु > र्) > रामः ॥ એવા પ્રકૃતિ + પ્રત્યયના જે સંયોગો નિર્દેશ્યા છે તે પણ અનર્થક છે, કારણ કે જો શબ્દ અનિત્ય હશે તો √भू કે राम એવી પ્રકૃતિ બોલ્યા પછી તરત તેમનો નાશ થઈ ગયો હશે, એવી સ્થિતિમાં પ્રત્યય કોને લગાવીશું ? આમ શબ્દ અનિત્ય હોય તો સમગ્ર વ્યાકરણશાસ્ત્રમાં વર્ણવેલો પ્રકૃતિ-પ્રત્યયનો (સં)યોગ અનર્થક બની જશે.

---

7. व्याप्तिमत्त्वात्तु शब्दस्य । अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तेषां मनुष्यवत् देवताभिधानम् । पुरुषविद्याऽनित्यवात् कर्मसम्पत्तिर्मन्त्रो वेदे ॥

(दुर्गः) "व्याप्तिमत्वात्तु शब्दस्य" । उच्यते, – सर्वमितदुपपद्यते, कस्मात् ? व्याप्तिमत्त्वाच्छब्दस्य । व्यापनं व्याप्तिः, सा यस्मिन्नस्ति, सोऽयं व्याप्तिमान् शब्दः, तद्भावो व्याप्तिमत्त्वम् । तस्माद् व्याप्तिमत्त्वाच्छब्दस्य सर्वमेतदुपपद्यत इति वाक्यशेषः । आह, – कथं पुनर्व्याप्तिमान् शब्द इति ? शृणु, – शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयागन्तर्गताकाशप्रतिष्ठितयोरभिधानरूपाभिधेयरूपयोर्बुद्ध्योर्मध्येऽभिधानरूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया बुद्ध्या पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन प्रयत्नेनोदीर्यमाणः शब्दः उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानस्तया पुरुषार्थाभिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन बहिर्विनिक्षिप्तोऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रत्याख्यास्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमान् शब्दः । आह, – ततः किं यदि व्याप्तिमाञ्छब्दः ? उच्यते – यदि नित्यो यदा नित्यः पदचतुष्ट्वादि सर्वमुपपद्यत एव । किं कारणम् ? न ह्यसंव्याप्य पुरुषस्य बुद्ध्यस्थ–मर्थप्रत्ययमादधीत, न चानवस्थितो व्याप्नुयात् । ततश्च किम् ? स शब्दः स्वमर्थमभिदधत स्वक्रियाप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानमभिसम्बध्य तिरोभवितुमुपक्रमते, विनाशश्चोपेति । तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एव । तस्मात्सम्यगेवोक्तम् । यत पुनरेतदुक्तं न हि विनष्टाविनष्टयोः परिसङ्ख्यानमस्तीति । अत्र ब्रूमः, – पुरुषप्रयत्नोपजनिताद्वक्तोद्घातात् परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते, न तु शब्दाकृतयः । तास्तु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति । तासु साक्षात्पदपरिसङ्ख्यानं वर्त्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणयोपचर्य्यति । तस्माद् व्याप्तिमत्त्वाच्छब्दस्य पदचतुष्ट्वादि सर्वमुपपद्यत एव । व्याप्तिमत्त्वादित्यनेनैवेतरेतरोपदेशः प्रत्युक्तः । शास्त्रकृतो योगश्च । नामाख्यातपदरूपबुद्धित्वे सत्त्वे क्रियाविषये गुणप्रधानभावेनातिष्ठेत् । तयोर्गुणप्रधानभावे सति तच्छब्दे लक्षणयोपचर्य्यति । तथाच धातुरूपा बुद्धिस्तदर्थया संयुज्यते । बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते । तस्यां संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते । तदभिधायकत्वाच्छब्दस्य । तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः, शास्त्रकृतस्य योगो नोपपद्यत इत्येतदयुक्तमिति । नित्यत्वपक्षेऽपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तम्, अनैकान्तिकोऽसौ दृष्टान्तः । दृष्टो हि युगपदुत्पन्नयोः एककाले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः । तत्र यदुक्तं युगपदुत्पन्नानामितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं, व्याप्तिमत्वाच्छब्दस्य सर्वमुपपद्यत इति, तदेव सम्यगिति ॥

अपरो व्याख्यामार्गः । – इन्द्रियनित्यत्वात्पदचतुष्ट्वानुपपत्तिस्तदाश्रयस्य च सर्वस्येत्येवमाक्षिप्ते परिहारपक्षेणेदमवतार्य्यते । युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेश इति । अत्र समअस एव वाशब्दः । कथम् ? अयुगपदुत्पन्नानां वा युगपदुत्पन्नानां वा नित्यानां वा अनित्यानां वेत्यर्थः । इतरेतरोपदेशः, इतरस्येत्याख्यातस्य क्रियावचने शब्देऽभिधानत्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्त्ववचने शब्देऽभिधानत्वेनोपदेशः । शास्त्रकृतो योगश्च । लक्षणशास्त्रेण चैते क्रियासत्वे आख्यातनामशब्दाभ्यां युज्येते । तस्मादुपपद्यते पदचतुष्ट्वमिति ॥

आह, – आगमनमात्रमेतत् । हेतुरुच्यतां, कथं विनष्टाविनष्टयोः सह परिसङ्ख्यानम्, अवस्थितयोर्वा गुणप्रधानभाव इति ? उच्यते, – व्याप्तिमत्त्वात् तु शब्दस्य । हेत्वर्थः समान एव पूर्वेण ॥

आह, – यदि व्याप्तिमत्त्वाच्छब्दस्य व्यवहारार्थं पदचतुष्ट्वमुपादीयते, एवमपि नोपादेयम् । किं कारणम् ? अभिनया अपि व्याप्तिमन्तः, पाणिविहाराक्षिनिकोचादयः, तैरेव कार्य्यसिद्धिरस्त्विति । अपि चैवं पदचतुष्टयदोषैर्न सम्भक्ष्यामहे, न चायमतिमहान् वेदसमुद्रः पठितव्यो भविष्यति क्लेशेनेति । उच्यते, – स्यादेतदेवं यद्ययमपरो विशेषहेतुर्न स्यात् । कतमः ?

"अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके" । सत्यम् । अभिनया अपि व्याप्तिमन्तः, न त्वणीयांसः, ते महता यत्नेन व्याप्नुवन्ति, न च निःसन्दिग्धं कुर्वन्ति । तत्प्रतीतशब्दार्थसम्बन्धस्यैव नेतरस्य शब्दस्त्वपरिमितमर्थमल्पीयसा यत्नेनोच्चारितो व्याप्नोति । तस्मादणीयस्त्वादिति विशेषहेतूपपत्त्या शब्देनैव सञ्ज्ञाकरणं व्यवहारार्थं लोके इत्युपपन्नम् । यत् पुनरेतदुक्तमध्ययनदोषैर्न सम्भक्ष्यामहे, न चायमतिमहान् वेदसमुद्रोऽध्येतव्यो भविष्यतीति । अत्र ब्रूमः – अभ्युदयो ह्यत्र वेदानुरूप एव भवति, अभ्युदयार्थं नः शास्त्रारम्भे यत्नः ॥

"तेषाम्मनुष्यवद्देवताभिधानम्" । आह, – एवं तावन्मनुष्याणां मनुष्येषु शब्देन चतुर्द्धा भक्तेनावबोधकरणम्, अथ मनुष्याणां वेदेषु हविः सम्प्रदानाशीः प्रार्थनादिव्यवहारः केनेति ? उच्यते, – तेषामेव शब्दानामियमेव व्यवस्था देवेष्वपि देवानपिप्रति । कतमा ? मनुष्यवद्देवताभिधानमिति । मनुष्येण तुल्यां मनुष्यवत्, देवताभिधानमभिहितुरभिधानम् । यथैव हि मनुष्याः – प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिदधाति । एवमेव देवा अपि । देवेष्वपि शब्दस्याभिधानेनापि शक्तिरपरिहीनेत्यभिप्रायः । तेऽपि हि मनुष्यवद्देवा अङ्गादियुक्ताः पौरुषविधिकैरङ्गैः कर्मभिश्च संस्तूयन्त इति हि वक्ष्यति तस्मादुपपद्यते मनुष्यवद्देवताभिधानमिति ॥

आह, – यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवानप्यभिधातुमथ किमर्थं वेदे मन्त्रः समाम्नातः । इत्युच्यते, – "पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे" । पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात् पुरुषविद्यानित्यत्वाद्धेतोः कर्मसम्पत्तिः फलेन सम्पादनं अविगुणकर्मसम्पत्तिः, फलसम्पन्नमेव कर्म भविष्यतीत्येवमर्थं वेदे मन्त्रः समाम्नातः इति वाक्यशेषः । इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभिदधते देवान्नामाख्यातोपसर्गनिपातैरशिक्षितत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा देवानामपराध्ये यथावत् प्रयुञ्जानाः नामाख्यातोपसर्गनिपातान् । ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वल्पमप्ययथावदभिधानं न मर्षयन्ति । विगुणमेतदिति विद्याऽनित्यत्वात्तदभावेनेयुः कर्मणि । ततश्च देवताहीनं कर्मफलं सम्पद्यते । न च केवलं फलासम्पत्तिः । किं तर्हि ?

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

दुरिष्टहेतुको दोषोऽपि स्यात् । तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । नहि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति । एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्ते ।

आह, – कथमनित्यत्वं विद्यायाः पुरुषेष्विति ? उच्यते, – इह तु न वाक्यविरचनानुक्रमेण अर्थवस्त्वनुप्रेष्यते, मनुष्य एवमेतद् ब्रूयात् – "त्वं गन्तुं देवदत्तमिति" । स तेनैव वाक्यविरचनानुक्रमेण बह्वमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम् । एवमनित्यत्वं विद्यायाः पुरुषेषु । तद्दोषं वा मनुष्यान् प्रति, सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्यायाः । अयमपि हि येन वाक्यानुक्रमेण वक्ति मनुष्यः कश्चिदर्थं, न तेनैव श्वा शक्नोति वक्तुम् । तत्र यदुक्तं – किमर्थं मन्त्रो वेदे समाम्नात इति । इदं न युक्तम् । पुरुषविद्यानित्यत्वात्कर्मफलसम्पत्त्यर्थं मन्त्रो वेदे समाम्नात इति । नह्यविचारितमेव विज्ञायते । अत इदमाह । पदचतुष्टमाक्षिप्य पक्षप्रतिपक्षशो विचार्य्य अवधारितम् । विषयाश्चाक्षेपप्रसङ्गेनैवास्य परिक्लिप्ताः । देवमनुष्यव्यवहारार्थमितदिति । तदेतत्सर्वमपि चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम् । भावस्तु प्रकृतो यतस्तच्छेषमधुना वर्णयिष्यामः । स च पुनरुभयात्मा भावः । कार्य्यात्मा कारणात्मा च । तयोर्यः कार्यात्मा तमधिकृत्योक्तम्, – "क्रियानिर्वर्त्योऽर्थः स भावः, क्रियैव वा भावः" – इति । इदानीं कारणात्मा भावो निरूप्यते । कथं क्रियाद्रव्ययोः स्वात्मस्थो विशेषः कार्य्यात्मप्रध्वस्तयोः– पुरुषोपभोगसन्तानोपक्षये कार्य्यात्मभावातीतः, येनात्मभावेन सदनमात्राभिसम्बन्धिना प्रलयकालेऽवतिष्ठते, सोऽत्यन्ताविनाशधर्ममात्र आत्मा भाव इत्युच्यते ।

आह, – कथमयमिह प्रसक्तः ? शृणु, – तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभिधीयन्ते । स्थितिकाले असावपि च प्रहीणसर्वविशेषभवनमात्रक्रियाभिसम्बन्धी सन् व्यावृत्तसर्वोपपदाभ्यां नामाख्यातशब्दाभ्यामुच्यते भवतीति भाव इति च शब्दगतत्वादपोढसर्वविशेषामप्येतामवस्थामेतौ शब्दावास्कन्दतः । यत एतयोरेव साधारण्यार्थमयमिह प्रसज्जितः पदचतुष्टवाधिकरणे ।

आह, – प्रधानमेतत् स्यात् । किं कारणम् ? तद्भावे न ह्येतज्जगदवतिष्ठते प्रलयकाल इत्येके मन्यन्ते । तच्च नैव । किं कारणम् ? भावविकार एव हि सोऽयं पदशब्दवाच्यत्वात् प्रधानभाव इति ह्युच्यते । पुरुषस्तर्हि ? तत्राप्ययमेव हेतुः, अनुपक्षीयशक्तित्वात् । एतेनैव ईश्वरपरमाण्वादिभावाः प्रत्युक्ताः । ईश्वरभावः परमाणुभाव इति सोपपदत्वात् । शून्यं तर्हि ? तदपि न । यस्माच्छून्यशब्देऽपि भावशब्दासङ्गदर्शनम्, न ह्यसत्यर्थे शब्दः प्रयुज्यते । शब्दो हि शब्दस्यार्थेन सम्बन्धः । किञ्चित्तदस्ति यच्छून्यमिति । लोके हि प्रसिद्धं गृहं शून्यं, ग्रामः शून्यः, शून्ये शब्दमहत्त्वे इति । तस्मान्न शून्यशब्देनाभाव एवोच्यते । किं तर्हि ? अपेक्षाकृतं शून्यत्वमिति । भावशब्द एवात्रोपपदत्वेन युक्त इति चेत्, न, प्रयोगाप्रसिद्धेः । न हि अभावे भाव इति प्रसिद्धः प्रयोगः । न च प्रयुज्यमानोऽपि भावशब्दो भावशब्द एवोपपदत्वेन प्रधानादिशब्दवत् कश्चिद्विशेषप्रत्ययमादधाति । तस्मात् सर्वोपपदहीनस्य भवतेरात्मभावेनेदं जगन्नित्यम्, इतरैस्तु भावविकारैः परमाण्वादिभिर्भावविकारात्मभिरनित्यम् । कस्मात् ? विकारात्मकत्वादेव । विकारो ह्यनित्यः, तमेवं भवनमात्राभिसम्बन्धेन प्रहीणसर्वभावविकारम् एतत्सद्भावविदोऽवधृतवेदान्त-रहस्यसम्पदः परावरविदो मेधाविन आत्मवेदविदो न कृत्स्नकारितया युक्ताधिकारबन्धना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसन्तानाः सन्त आत्मकामाः प्रतिपद्यन्ते । नेतरे प्रधानादिविदः । वेदानुशासनैकदेशानीश्वरपुरुषप्रधानादीननित्यान् भावविकारान् स्वमतिकल्पनाहेतुव्यवहितान् मत्वा स्थिरीकृत्यानेन प्रतिपद्यन्ते भवनमात्राभिसम्बन्धेन तदेतस्मादात्मन उद्विजन्त आत्मप्रकाशकान्तर्याम्ययं चित्सन्तानमिव मन्यमानाः । केचिच्च शक्तिहानादसम्बाधनादेव । स एष इह वेदाङ्गैर्वेदार्थनिर्वचनाभिनिवेशशब्दानां सामान्यविशेषवृत्त्युपदेशप्रसङ्गे प्रवर्तमाने भवतेः कृदन्तीभूतस्य भवनमात्रमेव वक्तुं सामर्थ्यम्, नेतरान् भावविकारान् विद्यमानानपीति । एतेन प्रसङ्गेनात्र संसूचितो वेदरहस्यो ब्राह्मणैः ॥२॥

तत्र विस्तरेणायं विधीयते, –

અનુ૦ શબ્દો વ્યાપક (નિત્ય) હોઈને પદચતુષ્ટય વગેરેની સિદ્ધિ થાય છે). વળી, (શબ્દો) સરળતમ હોઈને લોકમાં વ્યવહારાર્થે શબ્દોથી (બધી વ્યક્તિઓના અને વસ્તુઓના) નામ પાડવામાં આવે છે. તે (શબ્દો)ના અર્થો માણસોની જેમ દેવતાઓ માટે પણ હોય છે. માણસોનું જ્ઞાન અનિત્ય હોવાથી કર્મફળ આપનાર મન્ત્રો વેદમાં છે.

7. (વિમર્શ) ઔદુમ્બરાયણના મતે શબ્દો અનિત્ય છે, પરંતુ આ મત સ્વીકારવામાં આવે તો પૂર્વોક્ત ત્રણ આપત્તિઓ આવી પડે છે. આથી યાસ્ક જણાવે છે કે શબ્દો નિત્ય છે અને પરિણામે એ ત્રણેય આપત્તિઓ નિર્મૂળ થઈ જાય છે. 'શબ્દો વ્યાપક છે' એનો અર્થ એ કે શબ્દો અને તેના અર્થો હંમેશાં વક્તા અને શ્રોતાની બુદ્ધિમાં રહેલા જ હોય છે. આથી જ્યારે શબ્દોને ઉચ્ચારવામાં આવે છે ત્યારે તે કર્ણેન્દ્રિય દ્વારા શ્રોતાની બુદ્ધિ સુધી પહોંચે છે ત્યાં જઈને પોતપોતાના અર્થોને જાગૃત કરે છે. અહીં ઉચ્ચરિત શબ્દો (એટલે કે ધ્વન્યાત્મક શબ્દો) જો કે ક્ષણિક છે, નાશવંત છે, તથાપિ બુદ્ધિસ્થ શબ્દ કે જેને શબ્દબ્રહ્મ અથવા સ્ફોટ કહેવામાં આવે છે તે તો શ્રોતા અને વક્તા બંનેના મનમાં નિત્ય રહેલો હોય છે. આમ શબ્દો શ્રોતા અને વક્તા બંનેની

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

બુદ્ધિને વ્યાપીને રહેલા હોય છે. તેથી 'શબ્દો વ્યાપક હોય છે' અર્થાત્ શબ્દો નિત્ય છે એમ કહેવાયું છે. જો શબ્દો નિત્ય હોય તો (૧) પદચતુષ્ટયની સિદ્ધિ થશે, (૨) શબ્દોનો ઈતરેતરોપદેશ શક્ય બનશે અને (૩) વ્યાકરણશાસ્ત્રમાં વર્ણવેલો પ્રકૃતિ + પ્રત્યયનો યોગ પણ ઉપપન્ન થશે.

અહીં કોઈને પ્રશ્ન થાય કે વ્યાપક હોવાને કારણે જ શબ્દોથી વ્યવહાર કરવામાં આવતો હોય તો અભિનય એટલે કે હાથ, પગ, આંખ વગેરેની ચેષ્ટાઓ પણ વ્યાપક છે. તેનાથી જ શા માટે વ્યવહાર ન કરવો ? તો શબ્દની જેમ અભિનયથી પણ વ્યવહાર થઈ શકે એ વાત સાચી. પણ તે અભિનયો ક્યારેક ગેરસમજ ઊભી કરનારા નીવડે અને ક્યારેક તદ્દન સમજી જ ન શકાય. પરંતુ જો શબ્દથી વ્યવહાર કરવામાં આવે તો આવી કોઈ મુશ્કેલી ઊભી થતી નથી. વળી, અભિનયોથી વ્યવહાર કરવાની અપેક્ષાએ શબ્દોથી વ્યવહાર કરવો એ સરળ (अणीयः) છે અને આથી જ બધી વસ્તુઓને અને વ્યક્તિઓનું નામ પાડીને શબ્દોથી વ્યવહાર કરવામાં આવે છે.

શબ્દોથી વ્યવહાર કરવાનો બીજો એક લાભ પણ દર્શાવવામાં આવે છે. મનુષ્યોમાં જેવી રીતે આ શબ્દો અમુક અર્થોના વાચક બને છે, તેવી રીતે દેવતાઓને વિશે પણ વ્યવહાર કરવા માટે આ શબ્દો વાપરી શકાય છે, કેમ કે દેવતાઓને માટે પણ આ શબ્દો તે તે અર્થોના વાચક છે. (तेषां मनुष्यवद् देवताभिधानं = ते (शब्दाः यथा मनुष्यान् प्रति (अर्थान्) अभिदधते तथा देवताः प्रति ।।) હવે કોઈને પ્રશ્ન થાય કે મનુષ્યોના વ્યવહારમાં પ્રવર્તમાન શબ્દોના અર્થો દેવતાઓ પણ જાણતા હોય તો વેદાધ્યયનની જરૂર નથી. એટલે કે વેદમન્ત્રથી જ દેવતાઓની સ્તુતિ કરવી એવું કોઈ બંધન રહેશે નહીં. પરિણામે આપણે પોતે રચેલી નવી પ્રાર્થનાઓથી પણ દેવોને પ્રસન્ન કરી શકાશે. આના જવાબમાં યાસ્ક જણાવે છે કે જો મનુષ્યની ભાષામાં દેવતાઓ સાથે વ્યવહાર કરવામાં આવશે તો મનુષ્યોનું જ્ઞાન અનિત્ય હોઈ, સીમિત હોઈ ક્યારેક તેવી પ્રાર્થનાઓ ઈષ્ટ વસ્તુની પ્રાપ્તિ કરાવનાર બનશે નહીં. તથા ક્યારેક ક્ષતિ થવાથી પ્રાયશ્ચિત્ત પણ લાગશે. પરંતુ જો વેદોક્ત મન્ત્રોથી જ દેવતાઓની સ્તુતિ કરવામાં આવશે તો વેદનો શબ્દ નિત્ય હોઈ નિશ્ચિતરૂપે તે ઇષ્ટ વસ્તુની પ્રાપ્તિ કરાવનાર નીવડશે. માટે વેદના અધ્યયન અર્થે અનિવાર્ય જરૂર છે. कर्मसम्पत्तिः मन्त्रो वेदे । અર્થાત્ कर्मणां सम्पत्तिः यस्मात्स मन्त्रः । કર્મોનું ફળ જેમાંથી મળે છે તેને મન્ત્ર કહેવાય છે અને આવા મન્ત્રો વેદમાં જ છે, તેથી તેના દ્વારા જ દેવતાસ્તુતિ કરવી.

અહીં પ્રા. રાજવાડેનું કહેવું છે કે ઔદુ.ના મતની સામે વિરોધ ઉઠાવીને શબ્દના નિત્યત્વાનિત્યત્વની જે ચર્ચા રજુ કરવામાં આવી છે તે વિષયાન્તર છે, નામ અને આખ્યાતની ચર્ચા કર્યા પછી તરત જ ઉપસર્ગ અને નિપાતની ચર્ચા આવવી જોઈએ. અથવા તો નામ અને આખ્યાતના અનુસન્ધાનમાં જ વિશેષ ચર્ચા થવી જોઈએ. શબ્દના નિત્યત્વાદિની ચર્ચા આ નિરુક્તમાં કોઈ રીતે ઉપયોગી નથી, માત્ર તત્ત્વજ્ઞાનની દૃષ્ટિએ જ તેની કાંઈક કિંમત છે. 'ભાવ' વિશે ચર્ચા કરતાં भवतीति भावस्य, आस्ते शेते व्रजति तिष्ठति इति । એમ જે કહ્યું છે તેના પછી તરત જ નીચે આપેલી ષડ્ભાવવિકારની ચર્ચા જોડાઈ જવી જોઈએ. પ્રા. રાજવાડે એમ પણ કહે છે કે કદાચ એ યાસ્કનું લખાણ નહીં હોય, પણ પ્રક્ષેપ હશે, કેમ કે આ લખાણ શૈલીની દૃષ્ટિએ ગૂઢ અને સૂત્રાત્મક છે, જ્યારે યાસ્કની રજૂઆત લગભગ સ્પષ્ટ, બલ્કે લંબાણપૂર્વકની હોય છે.

ઔદુમ્બરાયણના મતની ઉપર એક વિશિષ્ટ વ્યાખ્યાન આ પ્રમાણે કરવામાં આવ્યું છે:—

આધુનિક ભાષાવિજ્ઞાનમાં અને ભાષાના દાર્શનિક અભ્યાસમાં સ્ફોટસિદ્ધાન્તનું ખૂબ જ મહત્ત્વ છે. પાણિનિની 'અષ્ટાધ્યાયી' સુધી આ સ્ફોટસિદ્ધાન્તનાં મૂળ જાય છે એવો દાવો કરવામાં આવ્યો છે. (જુઓ: अवङ् स्फोटायनस्य । पा.सू. ૬-૧-૧૨૩ ઉપર પદમંજરી). પરંતુ John Brough જેવા વિદ્વાનોનું માનવું છે કે આ સ્ફોટસિદ્ધાન્તનો સૌથી પહેલો પરોક્ષ ઉલ્લેખ યાસ્કના નિરુક્તમાં મળે છે : इन्द्रियनित्यं वचनम् औदुम्बरायण इत्यादिः । (૧-૧) ઔદુમ્બરાયણ માને છે કે શબ્દોને ચાર પ્રકારમાં વહેંચવા એ શક્ય નથી. એક પછી એક ઉત્પન્ન થતા ધ્વનિઓમાંથી (ધ્વનિ-શ્રેણીમાંથી) શબ્દો છૂટા પાડવા શક્ય નથી; કેમ કે શબ્દોનું અલગ અસ્તિત્વ નથી. વક્તા/શ્રોતાની ઇન્દ્રિય = બુદ્ધિમાં (નિત્ય =) હંમેશાં- સતત- જે ઉપસ્થિત થાય છે તે તો વચન = 'વાક્ય' જ છે. (આથી વાક્યમાંથી નામ, આખ્યાતાદિને જુદા જુદા શબ્દો તરીકે અલગ તારવવા શક્ય નથી.) આમ, ઔદુમ્બરાયણના મતમાં સ્ફોટસિદ્ધાન્તનું બીજ રહેલું છે, જે પાછળથી ભર્તૃહરિએ વિકસાવ્યું છે.

આમ, પ્રાચીન ભારતમાં પણ એવા કેટલાક આચાર્યો હતા કે જેમણે વાક્યનો મહિમા પુરસ્કાર્યો હતો. અને વાક્યના એકમને જ સાચું/સ્વાભાવિક માન્યું હતું. આમ, યાસ્કે ઔદુમ્બરાયણનો જે મત ઉદ્ધૃત કર્યો છે તેમાં જણાવ્યું છે કે શ્રોતાની કર્ણેન્દ્રિયમાં હંમેશાં જે સમગ્રતયા રજૂ થાય છે તે તો ઉક્તિ/વિધાન (વચનમ્) જ છે. પરિણામે શબ્દોનું નામ-આખ્યાતાદિમાં ચતુર્વિધ પૃથક્કરણ કરવું યોગ્ય લાગતું નથી. (આ વિદ્વાને ઔદુમ્બરાયણના મતમાં નિત્યમ્‌નો અર્થ 'હંમેશાં', 'સતત' કર્યો છે અને વચનમ્‌નો અર્થ 'શબ્દ' નહીં, પણ ઉક્તિ-વાક્ય-એવો કર્યો છે.) લોકવ્યવહારમાં, રોજબરોજની જિંદગીમાં વસ્તુઓનાં નામ પાડવા માટે શબ્દોનો જે ઉપયોગ થાય છે તેનું કારણ એ છે કે શબ્દો વ્યાપ્તિમાન્ (વ્યાપક) છે. શબ્દો સરળ હોવાને કારણે

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

તેમનો વિશ્વતોમુખી ઉપયોગ થાય છે. પરંતુ તેથી કરીને શબ્દનું અસ્તિત્વ સ્વીકારવું યોગ્ય નથી, શ્રોતાની કર્ણેન્દ્રિયમાં જે કાંઈ રજૂ થાય છે તે તો કેવળ વચન (ઉક્તિ) જ છે. ભર્તૃહરિએ આ મતનો ઉલ્લેખ કર્યો છે અને કહે છે કે વાર્તાક્ષ પણ આ જ મત ધરાવે છે : वाक्यस्य बुद्धौ नित्यत्वम् अर्थयोगं च लौकिकम् । दृष्ट्वा चतुष्ट्वं नास्तीति वार्त्ताक्षौदुम्बरायणौ ॥ (વા.પ. ૨.૩૮૩)

It is the sentence which is regularly present in the mind of the hearer, and that it is the sentence which in normal everyday usage is attached to a meaning, denied altogether the existence of the four parts of speech. (BSOAS, Vol. 14. pp. 73-77) આમ, John Brough નામના વિદ્વાને ઔદુમ્બરાયણના સિદ્ધાન્તની (વાક્યપદીયને આધારે) જે સમજૂતી રજૂ કરી છે, તે જોતાં એમ લાગે છે કે યાસ્કે ઔદુમ્બરાયણનો મત અધૂરો ઉદ્ધૃત કર્યો હશે. તે મતનો પૂર્વાપર સન્દર્ભ કે તેના સમર્થનની શી દલીલો હતી તે યાસ્કે દર્શાવ્યું નથી; ઔદુ.નો જે મત મૂળમાં અખંડ વાક્યસ્ફોટ-ભાષામાં કેવળ વાક્યને જ એકમાત્ર એકમ તરીકે સ્વીકારનારો [અને નામ, આખ્યાતાદિ જેવા ચાર પ્રકારના શબ્દોનું એકમ, કે क, ख, ग વગેરે વર્ણ રૂપ એકમનો અસ્વીકાર કરનારો] મત-ને પુરસ્કારનાર હતો, તેને 'શબ્દના અનિત્યત્વની સ્થાપના' કરનારા મત તરીકે યાસ્કે રજૂ કર્યો છે એવો ભ્રાન્ત મત ઊભો થયો છે.

---

8. षड् भावविकारा भवन्तीति वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायते इति पूर्वभावस्यादिमाचष्टे । नापरभावमाचष्टे । न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् । विपरिणमते इत्यप्रच्यवमानस्य तत्त्वाद्विकारम् । वर्धते इति स्वाङ्गाभ्युच्चयम् । सांयोगिकानां वाऽर्थानाम् । वर्धते विजयेन इति वा । वर्धते शरीरेणेति वा । अपक्षीयते इति एतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे । न पूर्वभावमाचष्टे । न प्रतिषेधति ॥ २ ॥

(दुर्गः) "षड् भावविकारा भवन्तीति" । अपि च लक्षणविदो विगृह्णन्ति भावशब्दं भवतेः, स्वपदार्थे भवनं भाव इति । "सन्मात्रं भावलिङ्गं स्यात्" – इति पठन्ति । तस्य विकाराः भावविकाराः, भवन्तीति सामान्यादात्मनः प्रस्कन्दा इव सन्तत्त्वेन वैशेषिकेण भावविकारात्मलाभाय भवन्ति । इतिपरः प्रयुज्यमानः शब्दपदार्थकः ॥

क एवमाह "षड् भावविकाराः" – इति ? उच्यते, – "वार्ष्यायणिः" – इति । तिकादिपाठात् फिञ् । आचार्य्य इति वाक्यशेषः ॥ निर्देशत उपलब्धानां षडित्यवधारणं सुखार्थम् । अतोऽन्ये भावविकारा एतेषामेव भावविकारा भवन्तीति ॥

आह, – कतमन्तदिति ? उच्यते, – "जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति" ।

आह, – एतेषां जन्यादीनां भावविकारशब्दानां कः कस्यां विकारावस्थायामवस्थितं भावमाचष्टे, कं वा विद्यमानमपि नाचष्टे, कं वा न प्रतिषेधतीति ? उच्यते, – "जायत इति पूर्वभावस्यादिमाचष्टे, नापरभावमाचष्टे, न प्रतिषेधति" । जनिः पूर्वो भावः, तस्य पूर्वभावस्य षण्णां भावविकाराणां यदि वान्यो यः पूर्वो भावविकारः तस्य जायत इत्यनेन शब्देनादिमाचष्टे ॥

आह, – किमादिमेव ? नेत्युच्यते । उत्तमुपक्रमप्रभृत्यपवर्गपर्य्यन्तमिति । स एव पूर्वापरीभूतो भावस्तावदेव जायत इत्युच्यते । यावन्निष्ठाशब्दवाच्यः संवृत्तो जात इति । नापरभावमाचष्टे, न प्रतिषेधति । नेति प्रतिषेधे, न परो भावः अपरभावः ॥

आह, – कस्मादपरः ? पौर्वापर्य्यं हि देशकालकृतम् उच्यते, – जनिशब्दवाच्यो भावविकारः पूर्वः, तस्मादपरकालोऽस्तिशब्दवाच्यः । तत्रैवं सति जनिशब्दवाच्ये भावविकारे अस्तरेप्यर्थोऽस्ति विद्यमानता । किं कारणम् ? न ह्यविद्यमानो जायते । अपि च कारणात्मनि भावे सर्व एते भावविकाराः सन्ति । सर्वार्थप्रसवशक्तित्वात्तस्य । यथा पृथिव्यां घटादयो भावविकाराः । ते तु द्वारद्वारिभावेन विशेषात्मलाभं प्राप्नुवन्ति । तद्यथा । जनिद्वारेणास्तिः । अस्तिद्वारेण विपरिणमतिः । किं कारणम् ? न ह्यजातोऽस्तीत्युच्यते । नाप्यविद्यमानो विपरिणमत इति । तत्रैवं सति जायत इत्येष शब्दो जन्मैव केवलं ब्रवीत्यविवक्षितेतरभावविशेषम् । किं कारणम् ? एकार्थवृत्तित्वाच्छब्दस्य । अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्णत्वात् । अनवधृतरूपं हि तस्यामवस्थायां तद्भवत्यनुमानगम्यं किमपि जायत इति । तस्माज्जायत इत्येष शब्दो जायमानावस्थायामस्तित्वं विद्यमानमपि नाचष्टे ॥

आह, – यदि नाचष्टेऽर्थादापन्नं भवति प्रतिषेधतीति । उच्यते, – "न प्रतिषेधति" – इति । अस्तित्वस्य न प्रतिषेधं करोतीत्यर्थः । किं कारणम् ? उच्यते, – अस्तित्वात्मवानपि ह्यसौ जायेतैतस्मिन् प्रतिषिद्धेऽनात्मक एव स्यात् । कमालम्ब्य जायते ? तस्मान्न प्रतिषेधत्यस्तित्वम् । उपस्थितत्वाच्च । उपस्थित एव च प्रत्यासन्नस्तस्यावधारणकाल इत्यतश्च न प्रतिषेधति ॥

एवमेव प्रपञ्चः उत्तरेष्वपि भावविकारेषु । समासतस्तु यत्र यद्वक्तव्यं तत्र तद् ब्रूमः ॥

"अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्" । अस्तीति जातस्य सत्त्वस्यावधारणमात्रं ब्रवीति, न विपरिणाममाचष्टे अपूर्णत्वात्, प्रतिषेधत्युपस्थितत्वान् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम्" । विपरिणमत इत्येष शब्दो प्रच्यवमानस्य तत्त्वादप्रभ्रश्यमानस्य तत्त्वात्तद्भावाद्विकारम् । योऽस्य भावोऽस्तित्वं पुरुषत्वं वा, तस्माद्विकारं विक्रियामात्रं ब्रवीति, वृद्धेरर्थमाचष्टे, न प्रतिषेधति ॥

"वर्द्धत इति स्वाङ्गाभ्युच्चयम्, सांयौगिकानां वार्थानाम्" । वर्द्धत इत्येष शब्दः, स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनां, सांयौगिकानां वा हिरण्यधान्यादीनाम्, अभ्युच्चयमाह, अभ्युच्चिततां ब्रवीति ॥

आह, – कथं प्रयोगः ? उच्यते, – "वर्द्धति विजयेनेति वा वर्द्धति शरीरेणेति वा" । वर्द्धति विजयेनेति सांयौगिकम् उदाहरणम् । वर्द्धति शरीरेणेति स्वाङ्गाभ्युच्चये । अत्र वर्द्धत इति ब्रुवन्नपक्षीयतिमाचष्टे, न प्रतिषेधति ॥

"अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमम्" । यथैव हि स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते, तथैवापक्षीयते । तत्रापि नाचष्टे न प्रतिषेधति ॥

"विनश्यतीत्यपरभावस्यादिमाचष्टे, न पूर्वभावमाचष्टे, न प्रतिषेधति" । विनाश एवापरभावस्तस्यादिमाचष्टे । किमादिमेव ? न इत्युच्यते । उपक्रमप्रभृत्यपवर्गपर्य्यन्तमित्युक्तं, यावद्विनष्ट इति । स च विनाशं ब्रुवन् अपूर्वभावमाचष्टेऽपक्षीयतेरर्थं विज्ञातमपि तस्मिन् विनाशे कथं युगपदपक्षीयतेरर्थो विनाशेऽस्तीति ? उच्यते, – न ह्यनपक्षीयमाणो विनश्येत् ॥३॥

(અનુ૦) વાર્ષ્યાયણિ નામના આચાર્યના મતે છ પ્રકારના ભાવવિકારો છે. જેમ કે (૧) જન્મવું (૨) હોવું (૩) વિપરિણામ પામવું (૪) વૃદ્ધિ પામવું (૫) ઘટવું અને (૬) નાશ પામવું. અહીં જન્મવું > 'જન્મે છે' એમ કહેવાથી કોઈ પણ ક્રિયાના પ્રારંભ (આદિ)નું કથન થાય છે. આમ, ક્રિયાના પ્રારંભને (અમુક ક્રિયાનો જન્મ થઈ ગયો એમ) કહેવાથી તેના પછી થનારી ક્રિયા કહેવાઈ જતી નથી, તેમજ તેનો પ્રતિષેધ પણ થતો નથી. अस्ति । 'છે' એમ કહેવાથી ઉત્પન્ન થયેલ દ્રવ્યનું અસ્તિત્વ સૂચવાય છે. 'વિપરિણામ પામે છે' એમ કહેતાં કોઈ પણ દ્રવ્યમાં તત્ત્વથી ચ્યુત નહીં થતાં જે પરિવર્તન (વિકાર) આવે છે તે કહેવાય છે. 'વૃદ્ધિ પામે છે' એમ કહેવાથી શરીર કે શરીરના અવયવોનો વિકાસ સૂચવાય છે અથવા તો સાંયોગિક અર્થો, જેવા કે ધનધાન્યાદિ, તેમાં થતો વધારો સૂચવાય છે. ઉદા. ત. वर्धति विजयेन । वर्धति शरीरेण ॥ 'ઘટે છે' એમ કોઈ કહે તો તે 'વૃદ્ધિ પામે છે'–નું જે વિરુદ્ધ સમજવું અને 'નાશ પામે છે' એમ કહેવાથી ક્રિયાના અંતનું કથન થાય છે. એટલે કે તે ક્રિયાના અંતના આદિને કહે છે. પણ તેની પૂર્વે થયેલી ક્રિયાઓ કહેવાતી નથી અને જો કે તેનો પ્રતિષેધ પણ થતો નથી.

8. *(વિમર્શ)* : યાસ્કે भवति (થાય છે) તેને જ 'ભાવ' કહ્યો છે. આ 'ભાવ' શબ્દ ક્રિયાસામાન્યનો બોધ કરાવે છે. તેથી કોઈપણ ક્રિયાને માટે 'ભાવ' શબ્દ વાપરવામાં આવે છે અને जायते । अस्ति । વગેરે જે ક્રિયાઓ નિર્દેશી છે તે આ 'ભાવ'ની જ વિશેષ (કોઈ એક ચોક્કસ) સ્થિતિ છે.

અહીં દુર્ગ જણાવે છે કે 'ભાવ' – ના બે મુખ્ય પ્રકાર છે : કારણ રૂપ અને કાર્ય રૂપ. આ બેમાંથી કારણાત્મક ભાવ અવિકારી અને અભિન્ન છે. પરંતુ કાર્ય રૂપ ભાવ–ના અનેક વિકારીભેદો હોઈને તેને સ્પષ્ટ રૂપે ઓળખી શકાતા નથી. માટે કહેવામાં આવ્યું છે કે કાર્ય રૂપ ભાવ–ના છ પ્રકારો છે. કાર્ય રૂપ ભાવ–ના વિકારો (પરિવર્તનો) તે આ जायते । अस्ति । વગેરે છે. આમ દુર્ગે ભાવ એટલે કે મૂળ આદિમ કારણ, બ્રહ્મન્ – ની તથા તેના બે ભેદ – કારણભાવ અને કાર્યભાવ – ની સુદીર્ઘ ચર્ચા કરી છે. પરંતુ પ્રા. રાજવાડે જણાવે છે કે તે અપ્રસ્તુત છે.

---

9. अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह । ते यथावचनमभ्यूहितव्याः ॥

आह, – एतेभ्यो भावविकारेभ्यः किमन्येऽपि व्यतिरिक्ताः सन्ति भावविकारा न वा ? इत्युच्यते, – "अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह" । अतो भावविकारषट्काद्येऽन्यत्वेन भावविकाराः लक्ष्यन्ते, ते पृथक् पृथगत्यन्तभिन्नाः सन्ति । किन्तर्हि ? एतेषामेव विकारा भवन्ति । तद्यथा– जनिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्य्यायशब्दवचनो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येवमाद्युपेक्षितव्यम् । तथा अस्तिशब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्य्यायवचनश्च, अस्ति, विद्यते, भवतीत्येवमादि । तथा विपरिणमति शब्दवाच्यो विपरिणमते, जीर्य्यति, भावान्तरमापद्यते इत्येवमादि । तथा वर्द्धतिशब्दवाच्यो वर्द्धते, पुष्यति, उपचीयते, अर्थायत इत्येवमादि । तथा अपक्षीयति शब्दवाच्यो ध्वस्यति, भ्रश्यतीत्येवमादि । तथा विनश्यतिशब्दवाच्यो विनश्यति, म्रियते, विलीयत इत्येवमादि । "इति ह स्माह" । एवमाहाचार्य्यो वार्ष्यायणिरित्यनुवर्त्तते ॥

"ते यथावचनमभ्यूहितव्याः" । त एते जन्यादिशब्दवाच्याः विकाराः, यथावचनं यो यस्मिन्वचने यथावचनमवस्थिताः सन्तः प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणं प्रति अभ्यूहितव्याः वितर्क्याः प्रयुज्यमाना इति वाक्यशेषः । सर्व एव धातवो भाववचनास्तेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टम् । इह शास्त्रे व्याख्याशैलीयं द्रष्टव्या, – उद्देशो, निर्देशः, प्रतिनिर्देश, इति । तत्रोद्देशः, सूत्रस्थानीयः । तद्यथा – षड्भावविकारा इति । निर्देशो वृत्तिस्थानीयः । तद्यथा, – जायतेऽस्ति विपरिणमत इति । प्रतिनिर्देशो वार्त्तिकस्थानीयः । तद्यथा, – जायत इति पूर्वभावस्यादिमाचष्टे इति । एवं सर्वत्र यथासम्भवं योज्यम् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

सानुषङ्गमुक्तं नामाख्यातयोर्लक्षणं, नाम्नस्तु किञ्चिदवशिष्यते, तदवसरप्राप्तमपि सदधुना नोच्यते, पदचतुष्टवलक्षणप्रतिज्ञा-व्याघातभयात् उक्त्वा पदचतुष्टवलक्षणं चतुर्थेन पादेन तद्वक्ष्यामः ॥

प्रतिज्ञाप्रसक्तमेवाधुनोपसर्गलक्षणमुच्यते ॥

(અનુ.) આ સિવાય બીજા જે ભાવવિકારો જોવા મળે છે તે આ (છ) વિકારોના જ (બીજા) વિકારો છે. તે તે વાક્ય મુજબ તેમને વિચારવા.

9. (વિમર્શ) : અહીં કોઈને પ્રશ્ન થાય છે કે આ છ ભાવવિકારોથી ભિન્ન એવા બીજા કોઈ ભાવવિકારો છે કે નહીં. તેના જવાબમાં કહેવામાં આવે છે કે, આ છ ભાવવિકારોમાં જ બીજા ભાવવિકારોનો સમાવેશ થઈ જાય છે. કેમ કે √जની प्रादुर्भावे (जायते)એ ધાતુથી જે ભાવવિકાર કહેવાય છે તેજ निष्पद्यते । अभिव्यज्यते । उत्तिष्ठति । વગેરેથી કહેવાય છે. એ જ પ્રમાણે, अस्ति । विद्यते । भवति । वर्तते । વગેરે પણ એક જ છે. તથા विपरिणमते । ના અર્થમાં જ जीर्यति । भावान्तरमापद्यते । ને સમજવા. वर्धतेના બીજા સમાનાર્થકો पुष्यति । उपचीयते । आप्यायते વગેરે છે. વળી, अपक्षीयते ।ના અર્થમાં भ्रश्यति । વગેરે જોવા મળે છે અને विनश्यति ।ના અર્થમાં म्रियते । विलीयते । વગેરે જોવા મળે છે. આમ, પર્યાયવાચી શબ્દોથી વાક્યમાં વપરાયેલા આ ભાવો પરસ્પરથી અત્યંત ભિન્ન નથી એમ જાણવું.

યાસ્કના સમયથી વાર્ષ્યાયણિ સન્માન્ય આચાર્ય ગણાયા હશે. કેમ કે ષડ્ભાવવિકારની આ ચર્ચા પતંજલિએ भूवादयो धातवः । (પા.સૂ. ૧/૩/૧) અને શંકરાચાર્યે जन्माद्यस्य यतः । (બ્ર.સૂ. ૧/૧/૨) સૂત્ર ઉપરના ભાષ્યમાં ઉદ્ધૃત કરી છે. ઔદુમ્બરાયણ અને વાર્ષ્યાયણિના નામે મળતી અનુક્રમે શબ્દનિત્ય અને ષડ્ભાવવિકારની આ ચર્ચા મૂળ નિરુક્તમાં નહીં હોય, પણ પ્રક્ષેપ હશે એમ પ્રા. રાજવાડેનું માનવું છે. કેમ કે એક તરફથી તે નામ અને આખ્યાતની ચર્ચામાં તથા બીજી તરફ, ઉપસર્ગ અને નિપાતની ચર્ચામાં અંતરાયરૂપ બની રહે છે.

[વ્યાકરણશાસ્ત્રમાં √अस् being, √भू becoming, √कृ doing — આ ત્રણ ધાતુઓ જગતની તમામ ક્રિયા (action) પ્રક્રિયા(process)ઓને આવરી લેતા હોઈ, તેમને 'ક્રિયાસામાન્યવાચી ધાતુઓ' ગણવામાં આવ્યા છે. √भू भवनं भावः ।ની અંતર્ગત જ जायते । अस्ति । विपरिणमते । वर्धते । अपक्षीयते । અને विनश्यति । એ ષડ્ભાવવિકારો આવી જાય છે. તથા √कृ (करोति) doingના બે પેટાભેદ પડશે: (૧) ક્રિયા અને (૨) પ્રક્રિયા. સચેતન પ્રાણીઓ દ્વારા કરવામાં આવતી સકર્મક કે અકર્મક ક્રિયાઓ (જે કંટ્રોલ્ડ છે) તથા અચેતન જડ પદાર્થો દ્વારા કરવામાં આવતી અકર્મક-અકર્તૃક (અનકંટ્રોલ્ડ) પ્રક્રિયાઓ, દા.ત., (પવનથી) પાંદડું હાલે છે. આધુનિક ભાષાવિજ્ઞાનમાં ક્રિયા, પ્રક્રિયા, અવસ્થાની દૃષ્ટિએ જે વિચારણા કરવામાં આવે છે, તેના અનુસન્ધાનમાં આ ષડ્ભાવવિકારોની પ્રાચીન ચર્ચા પુનઃ પરીક્ષણીય છે.]

---

10. न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः ।
नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ।

आह, – वक्ष्यति भवानुपसर्गलक्षणमिदमेव तावदुच्यताम्, – किमिमे उपसर्गनामाख्यातवत् पदचतुष्टवान्निकृष्यबद्धाः सतोऽर्थानाहुः ? न इत्युच्यते, – "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः" । नेति प्रतिषेधे । निष्कृष्य नामाख्यातमध्यात् पदवाक्यरूपेण विरचिताः सन्तः । के पुनस्ते ? उपसर्गाः । आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः । "अर्थान्निराहुरिति शाकटायनः" । निश्चयेन सतोऽर्थानाहुः । साक्षान्न तेषामर्थाभिधानशक्तिरस्ति, पृथग्विरचितानामित्यभिप्रायः । यथा वर्णानां पदादपगतानामर्थाभिधानशक्तिर्नास्ति, एवमेतेषामपि नामाख्यातवियोगेऽर्थाभिधानशक्तिर्नास्ति । क एवमाह ? शाकटायनः । शकटस्यापत्यं नडादिपाठात् फक्, शाकटायनः ॥

आह, – कथं तेषामर्थवत्तेति ? उच्यते, – "नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति" । तुशब्दोऽवधारणार्थः । नामाख्यातयोरेव योऽर्थः कर्म, तत्रैव विशेषं कञ्चिदुपसंयुज्य द्योतयन्ति । स एष नामाख्यातयोरेवार्थविशेष उपसर्गसंयोगे सति व्यज्यते । यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोऽभिव्यज्यमानो द्रव्याश्रय एव भवति, न प्रदीपाश्रयः ॥

(અનુ૦) આખ્યાત (ધાતુ)ની સાથે નહીં જોડાયેલા ઉપસર્ગો અર્થનો બોધ કરાવતા નથી, એવો શાકટાયનનો મત છે.
ઉપસર્ગ નામ અને આખ્યાતનો અર્થવિશેષની સાથે યોગ કરાવીને (અર્થવિશેષના) દ્યોતક બને છે.

10. (વિમર્શ) : પદો ચાર પ્રકારનાં છે એમ કહીને નામ તથા આખ્યાતનાં લક્ષણ અને ઉદાહરણાદિની ચર્ચા કરવામાં આવી. હવે ત્રીજા પ્રકારના પદની, એટલે કે ઉપસર્ગોની ચર્ચાનો અહીંથી પ્રારંભ થાય છે. યાસ્કે ઉપસર્ગોનું કોઈ ચોક્કસ લક્ષણ નિર્દેશ્યું નથી. પરંતુ ઉપસર્ગો અર્થના વાચક છે કે નહીં, તથા વાક્યમાં તેમનો કેવી રીતે પ્રયોગ થાય છે ?– એ બે પ્રશ્નને ધ્યાનમાં રાખીને ઉપસર્ગોની ચર્ચા અહીં રજૂ કરી છે. સૌથી પ્રથમ યાસ્ક પોતાના પુરોગામી શાકટાયનનો મત ટાંકે છે. શાકટાયનના મતે જે ઉપસર્ગોનો વાક્યમાં સ્વતંત્ર પ્રયોગ કરવામાં આવે, એટલે કે (નામ અને) ધાતુની સાથે તેમને જોડ્યા વગર વાપરવામાં આવે તો

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

તે અર્થના વાચક બનતા નથી. निर्बद्धाः = नामाख्याताभ्यां निष्कृष्य बद्धाः (उपसर्गाः), અર્થાત્ न निराहुः = निश्चयेन न आहुः ॥ આમ, શાકટાયને ઉપસર્ગોનો પ્રયોગ ધાતુની સાથે જ થાય છે, વાક્યમાં તેમનો સ્વતન્ત્ર પદ તરીકે પ્રયોગ થતો નથી–એ સિદ્ધાન્ત બહુ સ્પષ્ટ રીતે રજૂ કર્યો છે. હવે પછીના વાક્યથી શાકટાયન 'ઉપસર્ગો અર્થના વાચક છે કે દ્યોતક ?' એ પ્રશ્નનો જવાબ આપે છે.

જેમ કે नामाख्यातयोः तु कर्मोपसंयोगद्योतका भवन्ति । યાસ્કે આ વાક્યથી જણાવ્યું છે કે ચાર પ્રકારનાં પદોમાં ઉપસર્ગો પણ એક પ્રકારનાં પદ છે, તથાપિ તે સ્વતન્ત્ર રીતે અર્થના વાચક બનતા નથી. તે કેવળ અર્થના દ્યોતક છે. એટલે કે પ્રદીપ જેવી રીતે ઓરડામાં પહેલેથી જ રહેલી પુસ્તક, પેન વગેરે વસ્તુઓને દ્યોતિત (પ્રકાશિત) કરે છે, પણ નવી ઉત્પન્ન કરતો નથી તેવી રીતે ઉપસર્ગો પણ ધાતુમાં પૂર્વેથી અન્તર્નિહિત અર્થવિશેષોને દ્યોતિત કરે છે, પણ તેમનો (ઉપસર્ગોનો) પોતાનો કોઈ સ્વતન્ત્ર અર્થ હોતો નથી.

ઉપરના વાક્યમાં तु શબ્દ અવધારણાર્થે (एवकारના અર્થમાં) છે અને कर्मोपसंयोगद्योतकમાં कर्म એટલે 'અર્થ' એમ સમજવાનું છે. આથી વાક્યાર્થ આમ થશે : નામ અને આખ્યાતના જ જે (કર્મ =) અર્થ છે, તેમાં જ કંઈક વિશેષ અર્થ જોડીને ઉપસર્ગો તેને દ્યોતિત કરે છે. નામ અને આખ્યાતનો આ અર્થવિશેષ ઉપસર્ગનો સંયોગ થતાં જ વ્યંજિત થાય છે એમ દુર્ગ કહે છે : तु शब्दोऽवधारणार्थः । नामाख्यातयोरेव योऽर्थः क्रर्म, तत्रैव विशेषं कञ्चिदुपसंयुज्य द्योतयन्ति । स एष नामाख्यातयोरेवार्थविशेष उपसर्गसंयोगे सति व्यज्यते ॥ ઉદા. ત. √गम् > गच्छति (જાય છે) એ ધાતુની આગળ आ કે प्रति ઉપસર્ગો લગાડતાં आगच्छति અને प्रतिगच्छति એવાં રૂપો બને છે. અનુક્રમે તેના અર્થો 'આવે છે' અને 'પાછો જાય છે' એમ થાય છે. અહીં સામેથી આવવું કે પાછા ફરવું એ आ કે प्रति ના અર્થો નથી; પણ મૂળ √गम् ધાતુના જ અર્થો છે. કેમ કે જો ઉપસર્ગોના તે અર્થો હોય તો વાક્યમાં તેમનો (ઉપસર્ગોનો) સ્વતન્ત્ર પ્રયોગ થવો જોઈએ પણ તેવો પ્રયોગ થતો નથી. માટે ઉપસર્ગોની હાજરીથી કેવળ (મૂળ ધાતુના) તે તે અર્થોનું દ્યોતન થાય છે એમ જ કહી શકાય.

11. उच्चावचाः पदार्था भवन्तीति गार्ग्यः । तद्य एषु पदार्थः, प्राहुरिमे तं, नामाख्यातयोरर्थविकरणम् ॥

आह, – कोऽन्यथा ब्रवीति येनैवमुच्यते 'शाकटायन एवमाहेति' । शृणु – "उच्चावचाः पदार्था भवन्तीति गार्ग्यः" । उच्चाश्चावचाश्च उच्चावचाः, बहुप्रकारा इत्यर्थः । एषामुपसर्गपदानामर्थाः पदार्था भवन्ति वियुक्तानामपि नामाख्याताभ्यामिति गार्ग्यः । आचार्यो मन्यत इति वाक्यशेषः । एकैकोऽप्येषां प्रादीनां नामाख्यातवियोगेऽपि अनेकार्थ इत्यभिप्रायः । तद्यथा, – प्रेत्यादिकर्मोदीर्णो भृशार्थे इत्यभिधाने शक्तिरस्त्येवेत्येवमाद्युपलक्षितव्यं लक्षणशास्त्रे । यत् पुनरेतदुक्तं वर्णवदिति, अनभ्युपगमादयुक्तं, न ह्यभ्युपगतमस्माभिरेतदनर्थका वर्णा इति । सामान्या हि वर्णेष्वभिधानशक्तिरस्त्येव । यथा मृदोऽवयवेषु सर्वमृण्मयभाण्डारम्भशक्तिः । सा तु पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते । यथा मृदोऽवयवानां घटे घटारम्भशक्तिरभिव्यज्यते, एवं तत्र यदुक्तं "वर्णवदनर्थका उपसर्गाः नामाख्यातवियोगात्" – इत्येतदयुक्तम् । अपि च । वर्णैरनर्थकैरारभ्यमाणं पदमप्यनर्थकमेव स्यात् ? न ह्यशुक्लैस्तन्तुभिरारभ्यमाणः पटः शुक्लो भवति । ततश्च पदैरनर्थकैरारभ्यमाणं वाक्यमनर्थकमेव स्यात् ? वाक्यैश्चानर्थकैरारब्धं शास्त्रमप्यनर्थकमेव स्यात् ? ततश्चाभ्युदयनिःश्रेयसार्थो योऽयमभ्युद्यमस्त्यप्रत्ययेन विदुषामयमनर्थक एव स्यात् ? अनिष्टश्चैतत् । तस्मादर्थवन्तो वर्णा इत्युपपन्नम् । यत् पुनरेतदुक्तं 'प्रदीपवदनर्थका उपसर्गाः' – इति । तत्रोच्यते, – प्रदीपोऽपि स्वेनार्थेन प्रकाशाख्येनार्थवानेव सत्यपि चार्थवत्त्वे प्रकाश्यमर्थमाधारभूतं प्रत्याययन् स्वं प्रकाशनशक्तिमभिव्यनक्ति । एवमुपसर्गा अर्थवन्तोऽपि सन्तः स्वार्थाभिधानशक्तिमनेकप्रकारां विद्यमानामपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याय्य अभिव्यञ्जयेयुः । तत्र यदुक्तं 'प्रदीपवदनर्थका उपसर्गाः' इति, एतदयुक्तम् । नामाख्यातयोरेवासावर्थ उपसर्गसंयोगे सति उपजायत इति, तत्र ब्रूमः, न हि लोके यो यत्र समर्थो भवति, स तत्रान्यमपेक्षते । नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोगमपेक्षते । तस्मादुपपन्नमुपसर्गस्य क्रियाविशेषोऽर्थः । क्रियासामान्यमात्रमाख्यातस्येति ॥

तत्र यदुक्तम् 'अनर्थकाः पृथगवस्थिता उपसर्गाः' – इति, तदयुक्तम् । कुतः ? "तद्य एषु पदार्थः प्राहुरिमे तम्" । तदेतदुपपन्नं भवति । य एषूपसर्गेषु स्वोऽनेकप्रकारोऽर्थ इति प्राहुरेव, तमिमे उपसर्गाः पदविशेषाः । पृथगपि सन्तः ॥

कः पुनरसाविति ? उच्यते, – "नामाख्यातयोरर्थविकरणम्" । अर्थविक्रियामित्यर्थः । तस्मादर्थवन्त एवेति ॥ ४ ॥

(અનુવાદ) ગાર્ગ્યના મતે (આ ઉપસર્ગ પ્રકારનાં પદોના) વિવિધ પદાર્થો = અર્થો હોય છે. (પરિણામે) આ (ઉપસર્ગો)માં જે (અનેક પ્રકારનો) પદાર્થ = અર્થ (હોય છે) એમ (કહ્યું), તે (અર્થ)ને આ (इमे) ઉપસર્ગો (= પદવિશેષો વાક્યમાં પૃથક્ વપરાયા હોય તો પણ) કહે છે; [અને તે (અર્થ) છે:] નામ અને આખ્યાતના અર્થમાં આવતો વિકાર (= ફેરફાર).

11. (વિમર્શ) અગાઉ આપણે જોયું છે કે શાકટાયનના મતે ઉપસર્ગો અર્થના વાચક નથી તથા તેમનો વાક્યમાં સ્વતન્ત્ર

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પ્રયોગ પ્રણ થતો નથી. તેના વિરોધમાં હવે ગાર્ગ્ય નામના આચાર્યનો મત રજૂ કરવામાં આવ્યો છે. उच्चावचाः । उच्च = ઊંચું અને अवच=નીચું. उच्चावच એટલે વિવિધ. उच्चावचम् नैकमेदम् । (૩/૧/૮૩) એવું અમરકોશમાં કહ્યું છે. અહીં ગાર્ગ્ય જણાવે છે કે यस्मादुपसर्गाः पदानि तस्मात् तेषां उच्चावचाः अर्थाः भवन्ति । ગાર્ગ્યના મતને સમજાવતાં દુર્ગ લખે છે કે નામ અને આખ્યાતની સાથે જોડ્યા વિના સ્વતંત્ર રીતે પ્રયોજાયેલાં ઉપસર્ગપદોના પણ અનેક અર્થ હોય છે. અહીં ઉપસર્ગો પણ જો 'પદ' ગણાતા હોય તો તેમના અર્થો પણ હોવા જોઈએ- એવી ગાર્ગ્યની દલીલ છે.

"न नूनमस्ति (ऋ.सं. २,४,१०,१)" – इति । विचार्य्यमितन्ममैतत्तावत्, – अद्यतनं हविर्मम नास्तीति । नकारं दृष्ट्वाद्यतनशब्दोऽध्याहृतः आचार्य्येण । प्रतिषेधे हि सति प्रतिषेध्येनाप्यवश्यं भवितव्यमिति । एते च मन्त्रैकदेशा एव सन्तोऽध्याहाराः, पदातिरेकादध्ययनकालेनाधीयन्ते । ते त्वर्थनिर्वचनकाले प्रकाशयितव्याः । अथापि स्यात् श्वस्तनं भविष्यतीति । 'नो श्वः' इदं तावदस्मदर्थमेव निरुप्तं सदस्मन्नोव्याप नूनमथ श्वस्तने का प्रत्याशा । किङ्कारणं ? 'कस्तद्वेद यदद्भुतम्' । को हि नाम तद्वेद जानाति यदद्भुतमनुत्पन्नं कस्य भविष्यतीति मम वा अन्यस्य वा इति । कस्मात् पुनर्न विज्ञायत इति ? अतः, यस्मात् 'अन्यस्य चित्तमभि सञ्चरेण्यम्' सञ्चरणशीलमनवस्थितमित्यभिप्रायः । 'उत' अपि, अथेति छन्दसि समानार्थाः । एतदद्यतनं हविः 'आधीतम्' आध्यातमभिप्रेतं सत् मया ममेदमित्येवं तथापि 'विनश्यति' एवान्यस्मै प्रदीयते । तत्रैवं सति श्वस्तनमस्माक भविष्यतीति कुत एतदिति समस्तार्थः ॥

अथैकपदनिरुक्तम्, – "अस्मिन् द्यवि, – द्युरित्यह्नो नामधेयम्, । द्योतत इति सतः" । द्योततेर्द्युरिति । द्योतत इति कर्तृकारकम् । सदिति यत्र ब्रूयात्, तत्रोच्चारित एव कारकनियमो द्रष्टव्यः, अन्यत्र यथेष्टं योज्यम् । "श्व उपाशंसनीयः" उपगम्यः, सचेतसा आशास्तव्यो भवति, अनागतत्वात् । "ह्यो हीनः कालः" अतिक्रान्तो हि स भवति ॥ श्वःसम्बन्धात् ह्यःशब्दोऽविमानोऽपि निरुक्तः, – "अद्भुतम् अभूतम्" । "इदमपीतरदद्भुतम्" – शोणितवर्षादि, "अभूतमिव" कादाचित्कत्वात् । शब्दसारूप्यप्रसङ्गेनेदं निरुक्तम् । "अन्यो नानेयः" नानात्वेन व्यवस्थितस्यापत्यमसत्कुलजस्येत्यर्थः । अथवा न सतामानेयः । "चितश्चेतते:" चेतत्यनेनार्थानिति चित्तम् । "उताधीतं विनश्यतीत्याध्यातमभिप्रेतम्" – इति पर्य्यायवचनम् ॥

"अथापि" अयमस्मिन्मन्त्रे "पदपूरणः" भवति ॥१॥

(અનુ૦) नूनम् નિપાત લોકમાં વિચિકિત્સા અર્થમાં વપરાય છે અને વેદમાં વિચિકિત્સા (= સંશય) ઉપરાંત પદપૂરણ-નિપાત તરીકે પણ વપરાય છે. જેમ કે, અગસ્ત્ય મુનિએ (પહેલાં) ઇન્દ્રને હવિ આપવાનું નક્કી કરીને (પાછળથી) મરુતોને (તે હવિ) આપવાની ઇચ્છા કરી, આથી ઇન્દ્ર (ત્યાં) આવીને શોક (વિલાપ) કરવા લાગ્યો : (તૃતીયપાદ ૩।૩) "આજે (હવિષાન્ન) નથી. આવતીકાલે પણ (મળવાનું) નથી. જે પૂર્વે થયેલું નથી તેને કોણ જાણે છે ? બીજાઓનાં ચિત્ત સંચારિ (અસ્થિર) હોય છે (અને માટે) પૂર્વેથી નક્કી કરેલું (= જે અભિપ્રેત) હોય છે તે નાશ પામે છે." આજે નથી, તે આવતીકાલે પણ નથી (મળવાનું). अद्य એટલે अस्मिन् द्यवि (આજના દિવસે) द्युः એ अहर् (દિવસ)નું નામ છે, કેમ કે √द्यु (પ્રકાશવું) ધાતુ ઉપરથી 'જે પ્રકાશે છે' તે द्युः (દિવસ) કહેવાય છે. श्वः એટલે આશાસ્પદ કાળ અર્થાત્ આવતીકાલ. ह्यः એટલે જે કાળ નાશ પામેલો છે (વીતેલો છે) તે અર્થાત્ ગઈકાલ. कस्तद्वेद यददभूतम् એટલે જે થયું નથી (अभूत) તેને કોણ જાણે છે ? આ બીજું અદ્ભુત એટલે કે અભૂત જેવું છે. બીજાઓનું ચિત્ત અભિસંચારિ અર્થાત્ ચંચળ હોય છે. જે (સાથે) લાવવા યોગ્ય ન હોય તે अन्यः । ચિત્ત શબ્દ √चित् (વિચારવું) ધાતુ ઉપરથી બન્યો છે. उताधीतं विनश्यतीति । એટલે પૂર્વે આધ્યાત અર્થાત્ અભિપ્રેત હતું તે નાશ પામે છે.

18. (વિમર્શ) ઇન્દ્ર પોતાને પૂર્વે જે હવિ મળવાનો હતો તે પાછળથી બીજાને આપવામાં આવશે એવું જાણે છે ત્યારે न नूनमस्ति नो श्वः० । આ ઋચાથી પરિદેવના (મન્યુપૂર્વકનો વિલાપ) કરવા લાગ્યો. આ ઋચામાં नूनम्નો વિચિકિત્સાર્થમાં પ્રયોગ થયો છે. न नूनमस्ति । એ પદમાં યાસ્કે નકારને જોઈને अद्यतन પદને અધ્યાહાર ગણ્યું છે. न એટલે 'નથી' એમ કહેવાથી જિજ્ઞાસા થાય છે કે શું નથી ? તો અદ્યતન (આજ) નથી. ત્યાર પછી યાસ્ક 'અદ્યતન' શબ્દ કેવી રીતે બન્યો તે સમજાવે છે : अद्य એટલે अस्मिन् द्यवि । આજના દિવસે. અહીં द्युः એ દિવસનું નામ છે, કેમ કે તે પ્રકાશે છે. ઋચામાં श्वः શબ્દનો પ્રયોગ છે તેને સમજાવતાં યાસ્ક કહે છે કે જે ઉપાશંસનીય (આશા રાખવા જેવો) કાળ તે श्वः = આવતીકાલ. श्वःની સાથે સાથે ઋચામાં નહીં આવેલા ह्यः (ગઈકાલ) શબ્દને પણ યાસ્કે સમજાવી દીધો છે. ह्यः એટલે જે વહી ગયેલો- અતીત- અતિક્રાન્ત- કાળ છે તે, અર્થાત્ ગઈકાલ. શબ્દસાદશ્યને આધારે યાસ્કે અદ્ભૂત શબ્દને अभूत એમ કહી સમજાવ્યો છે. જે પૂર્વે ન થયેલું (अभूत) હોય. દા.ત., શોણિતવર્ષા, તે જોઈને આપણને આશ્ચર્ય થાય છે. માટે अभूत એ જ अद्भूत કહેવાય છે. अन्यः એટલે न आनेयः । સજ્જનો વડે જે સાથે લાવવા યોગ્ય નથી તે. અસત્કુળમાં કોઈ જન્મ્યો હોય તો તેને સજ્જનોએ સાથે લાવવો યોગ્ય નથી, માટે તે 'અન્ય' કહેવાય છે. √चित् (પ્રકાશવું, વિચારવું) ધાતુ ઉપરથી चित्तम् શબ્દ બન્યો છે. જેનાથી અર્થોનું ચિંતન (વિચાર) થાય છે તે ચિત્ત. आधीतम् > आध्यातम् > अभिप्रेतम् । અહીં આ + धीतम् એ √ध्यै ધાતુનું અનિયમિત કર્મણિ ભૂતકૃદન્ત છે.

---

19. अथापि पदपूरणः ॥६॥ नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो, माति धग्भगो नो बृहद्वदेम विदथे सुवीराः ॥ (ऋ.सं. २/१६/९) सा ते प्रतिदुग्धां वरं जरित्रे । वरो वरयितव्यो भवति । जरिता गरिता । दक्षिणा मघोनी मघवती । मघमिति धननामधेयं मंहतेर्दानकर्मणः । दक्षिणा दक्षतेः समर्धयतिकर्मणः व्यृद्धं समर्धयतीति । अपि वा प्रदक्षि मनात् दिशमभिप्रेत्य । दिक् हस्तप्रकृतिः । दक्षिणो हस्तो दक्षतेः उत्साहकर्मणः । दाशतेर्वा स्यात् दानकर्मणः । हस्तो हन्तेः । प्राशुः हनने । देहि

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

स्तोतृभ्यः कामान् । मा अस्मान् अतिदंहीः । मा अस्मान् अतिहाय दाः । भगो नोऽस्तु । बृहद्वदेम स्वे वेदने । भगो भजतेः । बृहत् इति महतो नामधेयम् । परिवृढं भवति । वीरवन्तः कल्याणवीराः वा । वीरो वीरयति अमित्रान् । वेतेर्वा स्यात् गतिकर्मणः । वीरयतेर्वा ॥

"नूनं सा ते (ऋ.सं. २,६,६,६)" – इति गृत्समदस्येयमार्षम् । पृष्ठचस्य चतुर्थेऽहनि मरुत्वतीये शस्यते । 'नूनम्' इति पदपूरण एव । 'सा' 'दक्षिणा' 'ते' तव या पुत्रभावके कर्मणि । सा किं करोतु ? 'प्रति' दुग्धाम् । किम् ? 'वरम्' । कर्मणो दक्षिणागुणकात् फलप्राप्तिस्तथापि तु दक्षिणायामुपचर्य्यते । कस्मै ? 'जरित्रे' स्तुवते यजमानाय । किंलक्षणा ? 'मघोनी' मघवती हिरण्यधान्यादिधनेन संयुक्ता, तद्वतीत्यर्थः । किञ्च, 'शिक्षा' देहि कस्मै ? 'स्तोतृभ्यः' ऋत्विग्भ्योऽनुकामान् । किञ्च, 'मांति धक्' मास्मानतिहायातीत्यन्येभ्यो देहीति मादा इत्यर्थः । अस्मभ्यं तावद्देहि, ततोऽन्येभ्योऽपि दास्यसि चेत्यभिप्रायः । किञ्च, 'भगो नः' धनं नोऽस्तु । येन किं कुर्य्याम् ? 'बृहद्वदेम' महदूर्जितं वदेम दीयतां भुज्यतामिति । क्व ? 'विदथे' यज्ञे । अथवा स्वे गृहे । किञ्च, युष्मदनुग्रहाच्च सुवीराः' वीरवन्तो भवेम पुत्रवन्तः । यद्यपुत्राः, एवमयं मत्वर्थीयः'सुः' अथ पुनः पुत्रवन्तः, एवं ततः कल्याणवीरा इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । – "स वरयितव्यो भवति" व्रियते ह्यसौ । "जरिता गरिता" इति स्तुत्यर्थस्य । "मघमिति मंहतेर्दानकर्मणः" दीयते हि तत् । "दक्षिणा दक्षतेः" समर्द्धयत्यर्थस्य, यज्ञे हि यत्किञ्चिद्विगतर्द्धिकं भवति, तदियं समर्द्धयति, विशिष्टं यज्ञस्य साधनमेतदिति । "अपि वा प्रदक्षिणागमनात्" दक्षिणा । दक्षिणां "दिशमभिप्रेत्य" – सा हि दक्षिणस्यां वेदिश्रोणौ, अग्रेण गार्हपत्यं, जघनेन सदः, दक्षिणेनाग्नीध्रीयं गत्वा अन्तर्वेदिं स्थित्वा अन्तरेण चत्वालोत्करौ तमाग्नीध्रं चोत्सृज्यमाना गच्छन्तीति "दिक्" पुनर्दक्षिणा । "हस्तप्रकृतिः" प्राङ्मुखस्य प्रजापतेर्दक्षिणो हस्तो बभूव, सा दक्षिणा दिगभवत् । अथ "दक्षिणो हस्तः" कस्माद्दक्षिण इति ? "दक्षतेः" उत्साहार्थस्य, – स ह्युत्साहवान् भवति कर्मसु, न तथा सव्यः । "दाशतेर्वा स्यात्" दानार्थस्य, तेनैव हि प्रायेण दीयते । अथ "हस्तः" कस्मात् ? "हन्तेः" – तेन हि हन्यते । न, अन्येनापि केनचिदङ्गेन [illegible] । एवं यो हन्तव्यो भवति तस्य "हनने" अयमेव तु "प्राशुः" शीघ्रः इत्यर्थः । "बृहदिति महतो नामधेयम्, परिवृढं भवति" – इति । "वीरो वीरयत्यमित्रान्" नानाप्रकारं मारयतीत्यर्थः । "वेतेर्वा स्याद्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य, गच्छत्येवासावभिमुखं शत्रून् । "वीरयतेर्वा" विक्रमार्थस्य, विक्रान्तो ह्यसौ भवति ।

19. (અનુ૦) નૂનમ્‌નો પાદપૂરક નિપાત તરીકે પ્રયોગ જોવા મળે છે. જેમ કે "હે ઇન્દ્ર । તારી તે કીમતી દક્ષિણા સ્તુતિ કરનારને માટે વર આપનારી બનો, સ્તોતાઓને (કામનાઓ) આપો. તું અમને બાળીશ નહીં, અને/અથવા અમને છોડીને બીજા કોઈને આપીશ નહીં. અમારું નસીબ હજો. (જેથી) વીર-પુત્રોવાળા અમે યજ્ઞવેદીમાં મોટેથી (તારી) સ્તુતિ ગાઈએ." સ્તુતિ કરનારને વિશે તારી એ (દક્ષિણા) વરનું દોહન કરે અર્થાત્ સમ્પત્તિ આપે. જે વરણીય (પસંદ કરવા યોગ્ય) હોય તેને 'વર' કહે છે. जरितृ > जरिता 'સ્તુતિ કરનાર' શબ્દ √गॄ>गरितृ >गरिता ઉપરથી (ग>ज) બન્યો છે. 'મઘોની દક્ષિણા' એટલે મઘવતી અર્થાત્ કીમતી દક્ષિણા, અહીં મઘમ્ એ ધનનું નામ છે. 'મઘ' શબ્દમાં √मंह (દાન આપવું) ધાતુ રહેલો છે. (અર્થાત્ દાનમાં જે આપવામાં આવે છે તે ધનને 'મઘ' કહે છે.) 'દક્ષિણા' શબ્દ √दक्ष (વૃદ્ધિ પામવું) ધાતુ ઉપરથી બન્યો છે. આથી વૃદ્ધિ વગરનાને જે સમૃદ્ધ કરે તે 'દક્ષિણા'. અથવા તો દક્ષિણ દિશામાં (ગાયને) લઈ જવાતી હોઈ તે (ગાય)ને દક્ષિણા કહે છે. દિશાને ધ્યાનમાં રાખીને, (પૂર્વાભિમુખ બેસતાં) દક્ષિણ (જમણો) હાથ જે દિશામાં આવે તે (દિશા)ને 'દક્ષિણા' કહે છે. 'દક્ષિણ હસ્ત' √दक्ष 'ઉત્સાહયુક્ત હોવું, શક્તિમાન હોવું' અર્થવાળા ધાતુ ઉપરથી બન્યો છે. અથવા તો √दाशृ (આપવું) ઉપરથી 'દક્ષિણ' (જે દાન આપે તે) શબ્દ બન્યો હશે. 'હસ્ત' શબ્દ √हन् ધાતુ ઉપરથી બન્યો હશે. એટલે કે જે હનન ક્રિયામાં ઝડપવાળો છે તે હસ્ત. સ્તોતાઓને કામનાઓ અર્પો. તું અમને બાળીશ નહીં (અને અથવા) અમને છોડીને બીજા કોઈને ધન ન આપીશ. અમારું નસીબ હજો, અમે **અમારા ઘરમાં અથવા યજ્ઞવેદી**માં મોટેથી બોલીશું. 'ભગ' શબ્દ √भज् (સેવવું) ધાતુ ઉપરથી બન્યો છે. જે વિપુલ (મોટું) હોય તેને બૃહદ્ કહે છે. કેમ કે તે પરિવૃઢ થયેલું હોય છે. सुवीराः એટલે वीरवन्तः અર્થાત્ કલ્યાણકારી વીરો. જે અમિત્રો (શત્રુઓ)ને હણે છે તે 'વીર' કહેવાય છે. √वी (જવું) એવા ગત્યર્થક ધાતુ ઉપરથી 'વીર' શબ્દ બન્યો હશે અથવા वीरयति (વીરની જેમ આચરણ કરનાર) એવા નામધાતુ ઉપરથી 'વીર' શબ્દ બન્યો હશે. [મન્ત્રમાં વપરાયેલા शिक्षा स्तोतृभ्यः પદોનો અર્થ देहि स्तोतृभ्यः (कामान्) । કરવામાં આવ્યો છે. તથા मा अति धक् । ને યાસ્કે ઉપર મુજબ બે રીતે સમજાવેલ છે તે નોંધપાત્ર છે.]

19. (વિમર્શ) : અનર્થક પાદપૂરક નિપાત રૂપે નૂનમ્‌નો જેમાં પ્રયોગ થયો હોય તેવી ઋચાના ઉદાહરણ તરીકે અહીં યાસ્કે नूनं सा ते प्रति वरं जरित्रे० । એ ઋચાને ઉદ્ધૃત કરી છે. આ ઋચામાં नूनम् પદનો ખાસ કોઈ વિશેષ અર્થ નથી, કેવળ છન્દનું

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પહેલું ચરણ પૂર્ણ કરવા માટે જ તેનો પ્રયોગ થયો છે અને અહીં એટલું જ દર્શાવવું છે. પરંતુ યાસ્ક આ ઋચામાંના मघम्। दक्षिणा। वीरः। વગેરે શબ્દોને પણ પ્રાસંગિક રૂપે સમજાવે છે. આપણે અગાઉ નોંધ્યું છે તેમ યાસ્ક માત્ર નિઘંટુના શબ્દોનું જ નિર્વચન નથી આપતા. પણ તેમણે દૃષ્ટાન્ત રૂપે રજૂ કરેલી ઋચાઓમાંના અન્ય શબ્દોનું જ નિર્વચન આપે છે. આપણે આ ઋચામાંના કેટલાક મહત્ત્વના શબ્દોનાં નિર્વચનો જોઈશું : (૧) √जॄ>जरितृ (स्तुति કરનાર) શબ્દ √गॄ>गरितृ શબ્દ ઉપરથી બન્યો હશે. યાસ્ક અહીં ગમાંથી જ એવું ધ્વનિપરિવર્તન થયું હશે એમ માને છે. ઋગ્વેદમાં √जॄ ધાતુના 'સ્તુતિ કરવી' અને 'વૃદ્ધ થવું' એવા બે અર્થો છે અને પ્રશિષ્ટ સંસ્કૃતમાં √गृ 'અવાજ' કરવો એવો ધાતુ છે. (૨) मघम् એટલે ધન. યાસ્ક કહે છે मघम्માં √मह् (દાન આપવું) ધાતુ રહેલો છે. ધાતુપાઠમાં √मंह्નો અર્થ 'આપવું' થતો નથી, પણ √महि वृद्धौ (વૃદ્ધિ પામવું) અર્થ આપ્યો છે. પ્રા. રાજવાડે જણાવે છે કે શક્ય છે કે યાસ્કના સમયમાં √मंह्નો અર્થ 'દાન આપવું' થતો હોય. આમ જે ધનાદિ વસ્તુ દાનમાં અપાતી હશે તેને માટે મઘ શબ્દ વપરાતો થયો હશે. (૩) दक्षिणा શબ્દનાં યાસ્કે અનેક નિર્વચનો દર્શાવ્યાં છે : (क) વૃદ્ધિ પામવું, સમૃદ્ધ કરવું એ અર્થવાળા √दक्ष् ધાતુ ઉપરથી બન્યો હશે. એટલે કે જેમાંથી વૃદ્ધિ (સમૃદ્ધિ) જતી રહી હોય તેને જે સમૃદ્ધ કરે છે તે દક્ષિણા. અથવા તો યજ્ઞમાં સ્વાભાવિકપણે જ થતી ક્ષતિઓને જે પૂર્ણ કરે, યજ્ઞને ફળવાન બનાવે તે દક્ષિણા. આમ समर्धयति વૃદ્ધિ પામવું, વધવું, પૂર્ણ કરવું, ફળવાન બનાવવું અર્થવાળા √दक्ष् ધાતુ ઉપરથી 'દક્ષિણા' શબ્દ બન્યો હશે. (ख) અથવા તો, દાનમાં આપવામાં આવેલી ગાય દક્ષિણ દિશા તરફ જતી હશે માટે તે ગાયને 'દક્ષિણા' કહેવાતી હશે. दक्षिणां दिशमभिप्रेत्य गोः प्रदक्षिणागमनात् सा गौः दक्षिणा उच्यते। એટલે કે યજ્ઞમાં જે ડાબી તરફથી જમણી તરફ લઈ જવાતી હશે તે ગાયને દક્ષિણા કહેવાતી હશે. (મૈત્રાયણી સંહિતા ૪/૮/૩માં 'દક્ષિણા' શબ્દ આ પ્રમાણે સમજાવ્યો છે : घ्नन्ति वै एतत् सोमं यद् अभिषुण्वन्ति। यज्ञं वै एतत् घ्नन्ति। यद् दक्षिणाः दीयन्ते यज्ञं वै एतद् दक्षयन्ति। तद् दक्षिणानां दक्षिणात्वम्॥ યજ્ઞમાં જ્યારે સોમને પીસવામાં આવે છે ત્યારે તે સોમને મારી નાખે છે; આમ થતાં યજ્ઞ પોતે જ નાશ પામે છે, પરંતુ જ્યારે દાન આપવામાં આવે છે ત્યારે તે બ્રાહ્મણો યજ્ઞને ફરીથી સજીવ – સક્રિય કરે છે. આ કારણે દાનને 'દક્ષિણા' કહેવામાં આવે છે.) (ग) दिग्हस्तप्रकृतिः = दक्षिणः हस्तः प्रकृतिः यस्याः सा दिक् दक्षिणा। યજ્ઞમાં પ્રજાપતિ નામનો ઋત્વિજ પૂર્વ દિશા તરફ મુખ કરીને બેસે તો તેનો જમણો હાથ દક્ષિણ દિશા તરફ આવે. આમ, જમણો હાથ જે દિશામાં આવે તે દિશાને 'દક્ષિણા' કહે છે. (घ) જમણા હાથને 'દક્ષિણ' કેમ કહેવામાં આવે છે ? તો યાસ્ક જણાવે છે કે જે કાર્ય કરવામાં ઉત્સાહપૂર્ણ હોય છે એટલે કે જે દક્ષ હોય છે તે દક્ષિણ હસ્ત. આપણો સવ્ય અર્થાત્ ડાબો હાથ કાર્ય કરવામાં (પ્રાયઃ) જમણા હાથના જેટલો ઉત્સાહી હોતો નથી. અથવા તો √दाशृ (દાન આપવું) ધાતુ ઉપરથી (दाशृ>दश + स + इनः = दक्षिणाः) 'જે હાથે દાન અપાય છે' તેને દક્ષિણ હસ્ત કહેવામાં આવે છે. (૪) અહીં પ્રશ્ન થાય છે કે 'હસ્ત' શબ્દ કેવી પ્રચારમાં આવ્યો હશે ? તો યાસ્ક જણાવે છે કે 'હસ્ત' શબ્દમાં √हन (हन्ति) ધાતુ આવેલો છે. હાથ વડે જ હનન કરી શકાય છે, બીજા કોઈ અંગથી નહીં. આમ જેનું હનન કરવાનું હોય તેને વિશે જે શીઘ્ર પ્રવૃત્ત થાય છે તેને 'હસ્ત' કહે છે. (૫) સુવીર એટલે વીર્યવાન્ કલ્યાણકારી પુત્રોવાળા. દુર્ગ જણાવે છે કે 'હે દેવ ! તારા અનુગ્રહથી જો અમે પુત્ર વગરના હોઈએ તો પુત્રવાળા થઈએ અને પુત્રવાળા હોઈએ તો તે વીર્યશાળી થાય.' અહીં 'વીર' શબ્દ કેવી રીતે બન્યો હશે ? તો (क) वि + ईरयति > वीरयति अमित्रान्। જે શત્રુઓને અનેક રીતે વેરવિખેર કરી નાખે છે, નાશ કરે છે તે વીર. (ख) √वी (જવું) ધાતુ ઉપરથી; જે શત્રુઓની સામે જાય છે તે વીર. (ग) √वीरय् પરાક્રમ કરવું અથવા વીરના જેવું આચરણ કરવું- એવા નામધાતુ ઉપરથી 'વીર' શબ્દ બન્યો હશે.

20. सीम् इति परिग्रहार्थीयो वा। पदपूरणो वा। प्र सीमादित्यो असृजत्० (ऋ.सं. २/२८/४)। प्रासृजदिति वा। प्रासृजत् सर्वतः वा। वि सीमतः सुरुचौ वेन आवः (मैत्रा; सं. २/७/१५) इति च॥ व्यवृणोत् सर्वतः आदित्यः। सुरुचः आदित्यरश्मयः सुरोचनात्। अपि वा सीम इत्येतत् अनर्थकमुपबन्धमाददीत पञ्चमीकर्माणम्। सीम्नः सीमतः सीमातः मर्यादातः। सीमा मर्यादा विषीव्यति देशाविति॥

"सीमिति" अयं "परिग्रहार्थीयो वा पदपूरणो वा"। "प्र सीमादित्यो असृजत् (ऋ.सं. २,७,९,४)"। अस्यामेव तावदुभयमपि प्रदर्शयति। ततः परिग्रहार्थीयत्वे द्वितीयमुदाहरणं वक्ष्यति। गृत्समदस्य तत्पुत्रस्यं का कूर्मस्येयमार्षम्, "प्र सीमादित्यो असृजद् विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति। न श्राम्यन्ति न वि मुञ्चन्त्येते वयो न पप्तूरघुया परिज्मन्।" त्रिष्टुप्, सौरी। सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते। प्रासृजत्सूर्यो रश्मीन्। सीमिति पदपूरण एव, कुतोऽपीत्यविवक्षितमेवैतत् पदपूरणपक्षे। अथ परिग्रहार्थीयं सर्वमिव परिगृह्णाति, – "प्रासृजत् सर्वत इति वा"। 'विधर्त्ता' विधारयिता, रसानां, रश्मीनां वा, स्वरश्मिजालान्तर्गतस्य वा, धर्त्ता सर्वस्य जगतः। 'ऋतम्' उदकमादाय, पृथिवीलोकादन्तरिक्षलोकाच्च। "सिन्धवः" स्यन्दनाः सूर्य्यरश्मयः, – ते हि

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

आदित्यमण्डलात् प्राञ्चो वर्त्तमानाः स्यन्दन्ते वर्षकाले, सूर्य्येण प्रसृष्टा उदकमादाय सार्वलौकिकं 'वरुणस्य' सूर्यस्य स्थानं मण्डलं 'यन्ति' । तदेवमप्यनिशमुत्सर्गादानलक्षणं स्वकर्म कुर्वाणाः 'न श्राम्यन्ति' । 'न' वा श्रान्ता अपि सन्तो विरागादप्येतत् कर्म 'विमुञ्चन्ति' एते । कथं पुनः पतन्तो न श्राम्यन्ति ? किं शनकैः ? न । 'वयो न' वय इव पक्षिण इव शीघ्रं 'पप्तुः' पतन्तः 'रघुया' लघुया लघ्व्या शीघ्रिकया गत्यापि 'परिज्मन्' परिजमन्तः परिगच्छन्तः सर्वमप्येतज्जगन्न श्राम्यन्ति न विमुञ्चन्त्येतत् कर्म ॥ एतद्गुणयुक्तानामप्येतेषां सूर्य्य एव प्रतिसर्गे संयमे च ईश्वर इत्येवं सूर्य्यस्य स्तुतिरेषा ॥

"विसीमतः सुरुचो वेन आवरिति च" । इदं द्वितीयमुदाहरणम् । ब्रह्मजज्ञानमिति । "ब्रह्म जज्ञानं प्रथमं पुरस्ताद् विसी मतः सुरुचो वेन आवः । स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥" (य.वा.सं. १३,३) । सामवेदसंहितायामपि छ.आ. ४,१३,९ । वामदेवपुत्रो नकुलोऽनया त्रिष्टुभा आदित्यं तुष्टाव । प्रवर्ग्यविनियुक्ता रुक्मोपधाने चाग्निचयने । 'ब्रह्म' आदित्याख्यं 'जज्ञानं' जायमानं 'प्रथमम्' अनुत्पन्नेषु आदितः 'पुरस्तात्' प्राच्यां दिशि, तदुद्भवोपलक्षितमेव प्राच्याः प्राचीत्वम् । 'वि आवः' व्यवृणोत्, विवृतानकरोत् । 'सुरुचः' प्रशस्तरोचनान् रश्मीन् 'सीमितः' सर्वतः । किञ्च, 'सः' 'वेनः' मेधावी 'बुध्न्याः' बुध्नमन्तरिक्षं तदवयवभूताया दिशः, 'उपमाः' 'उपनिर्मात्र्यः' तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतत्, – तस्मात्ता एवोपनिर्मात्र्य उच्यन्ते । 'विष्ठाः' विस्थाः, – तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः । 'सतश्च' अभिव्यक्तस्य स्थूलस्य 'असतश्च' अनभिव्यक्तस्य सूक्ष्मस्य 'योनिं' 'क्विः' व्यवृणोदित्यर्थः । आदित्योदये ह्येवङ्गुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः । अथवा बुध्न्या आप आन्तरिक्षास्ता उपमा इत्येवमादि सर्वं योज्यम् ॥

"अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणम् । सीम्नः सीमतः सीमातो मर्य्यादातः । सीमा मर्य्यादा विसीव्यति देशाविति" । विगतसन्तानौ देशौ करोतीति ॥

(અનુ૦) સીમ્ એવો નિપાત પરિગ્રહ (ચારે બાજુએથી ગ્રહણ કરવું) અર્થમાં પ્રયોજાય છે અને અનર્થક પદપૂરક નિપાત તરીકે પણ પ્રયોજાય છે. જેમ કે प्रसीमादित्यो असृजत् । આ ઉદાહરણમાં સીમ્ એવા નિપાતનો બન્ને અર્થમાં પ્રયોગ જોઈ શકાય છે. એટલે કે "આદિત્યનાં કિરણો ફેલાયાં" અહીં સીમ્ અનર્થક છે. અને "આદિત્યનાં કિરણો ચારે તરફ ફેલાયાં" (प्रासृजत् सर्वतः) એવો અર્થ કરીએ ત્યારે સીમ્નો પરિગ્રહ અર્થમાં પ્રયોગ થયો છે એમ જાણવું. પરિગ્રહ અર્થમાં સીમ્નો પ્રયોગ થયો હોય તેનું બીજું એક ઉદાહરણ છે. वि सीमतः सुरुचो वेन आवः । "પ્રશસ્ત કાન્તિવાળાં કિરણોને સૂર્યે (वेनः) બધી બાજુએ (सीमतः सर्वतः) ફેલાવ્યાં (वि आव = व्यवृणोत्)." સૂર્યનાં કિરણોને સુરુચ કહેવામાં આવે છે, કેમ કે તે સારી રીતે પ્રકાશે છે, પ્રશસ્ત કાન્તિવાળાં છે. અથવા તો (અહીં सीमतः એ શબ્દમાં) સીમ્ એવા અનર્થક નિપાતને પંચમી વિભક્તિના અર્થવાળો (तस्) પ્રત્યય (ઉપબન્ધ) લગાડવામાં આવ્યો છે. જેથી સીમન્ શબ્દનું પંચમી વિભક્તિમાં सीम्नः એવું જે રૂપ બને છે, તે અર્થવાળું तस् પ્રત્યયાન્ત सीमतः પદ પ્રાપ્ત થાય છે. આ सीमतःનો मर्यादातः (અમુક સીમાએથી) એવો અર્થ થાય છે. અહીં સીમાનો અર્થ મર્યાદા થાય છે. કેમ કે આ સીમા બે દેશોની સરહદોને છૂટી પાડે છે.

20. (વિમર્શ) : મર્યાદાને સીમા કહે છે, કેમ કે તે બે દેશોને છૂટા પાડે છે (विषीव्यति). અહીં √सीव् (સાંધવું ધાતુને વિ ઉપસર્ગ લગાવતાં 'છૂટા પાડવું' એવો અર્થ પ્રાપ્ત થાય છે. सीमन् અને सीमा એ શબ્દમાં, પ્રા. રાજવાડે સૂચવે છે કે √सि (to bind) 'બાંધવું' એવો ધાતુ હશે તથા ईमन् અને ईमा એ પ્રત્યયાંશ હશે. આમ, ગામ કે ખેતરોની સરહદોને જે બાંધે તે સીમા. અહીં યાસ્કે सीमतः એવા પદને સીમ્ના પર્યાય તરીકે ગણાવ્યું છે. પરંતુ સીમ્ એવો નિપાત પરિગ્રહાર્થ કે પાદપૂરક હોય તો अतःનો શો અર્થ કરવો, તે ચિન્ત્ય છે. વળી, સીમ્ને એક વખત અનર્થક પાદપૂરક નિપાત કહ્યા પછી તેને પંચમ્યર્થક બતાવવો એ પણ ઉચિત નથી. તથા सीमतः = सीम + अतस् । અહીં अतस् ને પ્રત્યયાંશ ગણવામાં આવે તે પણ ખોટું છે; કેમ કે પંચમ્યર્થક પ્રત્યય તો तस् છે, નહીં કે अतस् । પ્રા. રાજવાડે જણાવે છે કે वि सीमतः सुरुचो वेन आवः । એ બીજા ઉદાહરણથી શરૂ કરીને वि सीव्यति देशाविति । એટલો અંશ પ્રક્ષિપ્ત હશે. કેમ કે प्रसीमादित्यो असृजत् । એવું સીમ્નું એક ઉદાહરણ આપ્યા પછી બીજું ઉદાહરણ સામાન્ય રીતે યાસ્ક આપતા નથી.

21. त्व इति विनिग्रहार्थीयं सर्वनाम अनुदात्तम् । अर्धनाम इत्येके ॥७॥ ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥ (ऋ.सं.१०/७१ – ११) ॥ इति ऋत्विक्कर्मणां विनियोगमाचष्टे । ऋचामेकः पोषामस्ते पुपुष्वान् होता । ऋक् अर्चनी । गायत्रमेको गायति शक्वरीषु उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्वर्यः ऋचः शक्नोतेः । तद्याभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते । ब्रह्मा एको जाते जाते विद्यां वदति । ब्रह्मा सर्वविद्यः । सर्वं वेदितुमर्हति । ब्रह्मा परिवृढः श्रुततः । ब्रह्म परिवृढं सर्वतः । यज्ञस्य मात्रां विमिमीते एकः अध्वर्युः । अध्वर्युः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अध्वरयुः । अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयते इति वा । अपि वा अधीयाने युः उपबन्धः । अध्वरः इति यज्ञनाम । ध्वरतिः हिंसाकर्मा । तत्प्रतिषेधः ॥

"त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्" निपातत्वेनैतदपि सन्दिह्यते । वक्ष्यति हि "निपात इत्येके" – इति । अतः त्व इति ह्येवं निपातकाण्ड उदाह्रियते । संशय परिशोधनाय त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम् । किमु तत् सर्वनामविप्रतिपन्नस्वरत्वात् स्वरमप्यवधारयन् अस्यानुदात्तमित्याह, कथं पुनर्विप्रतिपन्नस्वरमेतदिति ? उच्यते, – प्रातिपदिकस्यान्त उदात्त इत्यौत्सर्गिकं लक्षणम् (फि० सू० १,१) – अन्यत्र चापवादात्, – लक्षणविदोऽपि चास्यापवादं पठन्ति, – "त्वत्त्वनेमसमसिमेत्य नुच्चानि (फि.सू. ४,९,)" – इति ।

"अर्द्धनामेत्येके" । अर्द्धस्यैतन्नामेत्येवमेके आचार्य्या मन्यन्ते । वक्ष्यति चायमपि "त्वो नेम इत्यर्द्धस्य (निरु० ३,४,१)" – इति । तदेतत् प्रकरणोपपदाभ्यामध्यवसेयम्, – क्वार्द्धं नाम ? क्व सर्वनाम ? इति ॥२॥

'यथात्र सर्वनाम तथेयमृगुदाह्रियते' —

"ऋचान्त्वः (ऋ.सं. ८,२,२४,५)" – इति । बृहस्पतेरार्षम् । ऋत्विक्कर्मणां विनियोगमनयर्चाऽऽचष्टे । "ऋचां त्वः पोषमिति" । य एते चत्वारो महर्त्विजः, एतेषां 'त्वः' एक इत्यर्थः । किमेकः करोति ? 'ऋचां' 'पोषं' पुष्टिं 'पुपुष्वान्' पुनः पुनः भृशं वा देवतायाथात्म्यानुचिन्तनसन्तानमर्मस्थानकरणानुप्रदानवतीर्यथाकालमृचोऽधीयानः 'आस्ते' – स हि तासां पोषः । कतमः ? 'एकः' एतत्कर्म कुर्वन्नास्ते इति, – होता, एतत्तावदृगध्ययनकर्म तस्मिन् होतरि विनियुक्तम्, उक्तं च – "यदृचैव होत्रं क्रियते" – इति (ऐ० ब्रा० ५,५,८) । 'गायत्रं' त्वः ? गायत्रमेको 'गायति' 'शक्वरीषु' ऋक्षु । कतमः ? उद्गाता, तस्मिन्नप्येतत्सामगानकर्म विनियुक्तम्, उक्तश्च – "साम्नोद्गीथम्" – इति (ऐ० ब्रा० ५,५,८) । "ब्रह्मा त्वः" ब्रह्मा नाम एक ऋत्विक् 'जाते' प्रायश्चित्ते 'विद्यां वदति' । विद्यात्रयहेतुत्वादात्मनो विद्यां विज्ञानं वदतीतरेभ्य ऋत्विग्भ्यः इदमत्र कुरुतेति । तत्रापि ह्येतत् कर्म विनियुक्तम् । स पुनरेष सर्वविद्यः सर्वविज्ञानस्तथाविधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमिव वेदितुमर्हति । न ह्यसर्ववित् तमधिकारं शक्नुयान्निर्वर्त्तयितुम् । उक्तश्च – "अथ केन ब्रह्मत्वं क्रियत इति ? त्रय्या विद्यया" – इति (ऐ० ब्रा० ५,५,८) । "यज्ञस्य मात्रां विमिमीत उ त्वः । एक इति । मीयत इति मानं कर्म, तन्मात्रेत्युच्यते । या – काचिदितिकर्त्तव्यता यज्ञस्य, तां विमिमीतेऽध्वर्युः नानाप्रकारं करोतीत्यर्थः ॥

अथैकपदं निरुक्तम् । – "गायत्रं गायतेः" स्तुत्यर्थस्य, – स्तूयते ह्यनेन । "शक्वर्य्य ऋचः शक्नोतेः" – इत्युक्त्वा शक्वरी शब्दे वृत्तिं दर्शयति – "तद्यदाभिर्वृत्रमशकद्हन्तुं" "तत्" एव "शक्वरीणां शक्वरीत्वम्" । तत् यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रमशकद्धन्तुं तच्छक्वरीत्वम् – "इति विज्ञायते" । ऋचां शक्वरीत्वमित्येवं ब्राह्मणेऽपि शक्नोतेरेव शक्वर्य्य इति विज्ञायते । लिङ्गतोऽपि हि दर्शितं भवति, आख्यातजानि नामानीति ॥

"ब्रह्मा परिवृढः श्रुततः स हि त्रयीं विद्यां वेद । शब्दसारूप्यप्रसक्तमुच्यते, – "ब्रह्म परिवृढं सर्वतः । ऋगादिपरं चोभयमपि तत्परिवृढं सर्वासु दिक्षु । "अध्वर्य्युः अध्वरयु" एवमपि ऋगूह्यत इति । पुनरप्याह, – "अध्वरं युनक्त्यध्वरस्य नेता" प्रापयितेत्यर्थः, – स ह्यन्तं प्रापयत्यध्वरमेव । अथवा "अध्वरं कामयते" कर्त्तुम् "इति" अध्वर्य्युः । एतस्मिन्निर्वचने युः, वसूयव इति यथा । अथवा "अधीयाने" तमध्वरं कस्मिंश्चिद् ब्राह्मणे अध्वर इतीयमेव सञ्ज्ञा भवति, मञ्चाक्रोशनवत् । एतस्मिंश्च निर्वचने "युः" अयम् "उपबन्धः" नामकरणम् । अध्वरमधीते यः सोऽध्वर्य्युः । विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमाचष्टे, – 'अध्वरः – इति यज्ञनाम" । ध्वरः इत्यधुना निर्वक्तव्यः, – "ध्वरतिर्हिंसाकर्मा" । ध्वरति धूर्वतीति हिंसार्थेषु पठितौ "तत्प्रतिषेधः" अध्वरः अहिंस इत्यर्थः ॥

आह, – नन्वत्र हन्यन्ते पशवः, छिद्यन्ते तृणवनस्पतयः, तत् कथमहिंस्रः ? उच्यते, – अभ्युदय एव हि सः । एवं हि श्रूयते – "न वा उ एतस्मिन् म्रियसे (य० वा० सं० २३,१६)" – इति । तथाच – "कुशत्वमिच्छन्ति तृणानि राजन्" – इति । तस्मादभ्युदययोगादहिंस्र इत्युपपद्यते ॥

21. (અનુ૦) त्व એવું પદ વિનિગ્રહ-મર્યાદિત કરવું અર્થમાં પ્રયોજાય છે. તે સર્વનામ છે અને તેનો સ્વર અનુદાત્ત છે. બીજા કેટલાક આચાર્યોના મતે त्व એ अर्द्ध (અર્ધું)નું નામ છે (એટલે કે સર્વનામ નહીં પણ નામ છે.) (વિનિગ્રહ અર્થમાં त्वનો જ્યાં પ્રયોગ થયો હોય તેનું ઉદાહરણ આ પ્રમાણે છે: એક (त्वः) પુષ્ટિ કરનાર (બ્રાહ્મણ) ઋચાઓની પુષ્ટિ કરે છે, બીજો એક (બ્રાહ્મણ) શક્વરી (છન્દ)ને વિશે ગાયત્રી છન્દનું ગાન કરે છે. બ્રહ્મા (નામનો બ્રાહ્મણ) જાતવિદ્યાને બોલે છે, જ્યારે (ચોથો) એક (બ્રાહ્મણ) યજ્ઞની માત્રાને માપે છે". આ ઋચા દ્વારા ઋત્વિજો (યાજ્ઞિકો)નાં વિવિધ કર્મોને કહેવામાં આવ્યા છે. જેમ કે પુપુષ્વાન્ હોતા (એ નામનો બ્રાહ્મણ) ઋચાઓની પુષ્ટિ કરે છે. જેના વડે અર્ચન કરવાનું હોય તેને ઋક્ કહે છે. ઉદ્‌ગાતા નામનો બ્રાહ્મણ શક્વરી.છન્દમાં ગાયત્રી છન્દનું ગાન કરે. છે. √गैं (गायति) "સ્તુતિ કરવી" એ ધાતુ ઉપરથી "ગાયત્રી" શબ્દ બન્યો છે. (અર્થાત્ જેનાથી સ્તુતિ કરવામાં આવે છે તે ગાયત્રી). 'શક્વરી' ઋચાઓ (અહીં શક્વરી શબ્દ) √शक् (શક્તિમાન હોવું) ધાતુ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ઉપરથી સાધવામાં આવ્યો છે. કેમ કે ''આ શક્વરી ઋચાઓ વડે (ઇન્દ્ર) વૃત્રને મારવા માટે શક્તિમાન બન્યો હતો. આ શક્વરી ઋચાઓનું શક્વરીત્વ છે'' એવું (બ્રાહ્મણ ગ્રંથોને આધારે) જણાય છે. (ત્રીજો) બ્રહ્મા નામનો બ્રાહ્મણ (સંદેહના) પ્રસંગે પ્રસંગે વિદ્યા (સમાધાન) કહે છે. બધું જાણનારને બ્રહ્મા કહે છે. તેને માટે બધું જાણવું યોગ્ય છે. શ્રવણજ્ઞાનથી જે સમૃદ્ધ (વૃદ્ધ) હોય છે તેને બ્રહ્મા કહે છે. ચારે તરફથી જે વૃદ્ધિ પામેલું હોય તેને 'બ્રહ્મ' કહે છે. (ચોથો) અધ્વર્યુ નામનો બ્રાહ્મણ યજ્ઞવેદીનું માપ માપે છે. અધ્વર્યુ એ અધ્વરયુ છે. (એટલે કે) અધ્વરને જે જોડે (યુજ્) તે અધ્વરયુ. અથવા તો અધ્વર (યજ્ઞ)ના નેતાને અધ્વર્યુ કહે છે અથવા તો અધ્વર (યજ્ઞ)ની જે કામના કરે તે અધ્વર્યુ. અથવા તો અધ્વર શબ્દને 'અધ્યયન કરનાર' એ અર્થવાળો યુ એવો પ્રત્યય (ઉપબન્ધ) લગાડવામાં આવ્યો હશે. આથી અધ્વર (યજ્ઞ)નું જે અધ્યયન કરે તે અધ્વર્યુ કહેવાય. અધ્વર એ યજ્ઞનું નામ છે. અહીં 'અધ્વર' શબ્દમાં √ધ્વૃ 'હિંસા કરવી' અર્થવાળો ધાતુ રહેલો છે, આથી 'અધ્વર' એટલે જેમાં હિંસા નથી થતી તે.

21. (વિમર્શ) નિપાતોની ચર્ચાના અનુસન્ધાનમાં અહીંથી त्व એવા પદની ચર્ચાનો પ્રારંભ થાય છે. त्व એવું પદ સર્વનામ છે, નામ છે કે નિપાત છે ? એ ચર્ચાનો મુખ્ય મુદ્દો છે. 'त्व એ સર્વનામ છે' એવા એક મતની વિરુદ્ધમાં બીજા આચાર્યનું કહેવું છે કે त्व એ અર્ધું એવા અર્થનું વાચક છે, અર્થાત્ त्व એ સર્વનામ નહીં, પણ નામ છે. 'त्व નિપાત છે' એવો એક ત્રીજો પણ મત આગળ ઉપર નોંધવામાં આવશે. આ ત્રણે મતોમાંથી કયો મત સ્વીકારવો તેની ચર્ચા પછી કરીશું. અત્યારે તો त्व નો સર્વનામ તરીકે જ્યાં પ્રયોગ થયો છે તે ઋચાનો અને તે ઋચામાં આવેલા પદોનાં નિર્વચનોનો વિચાર કરીશું.

યજ્ઞમાં ચાર દિશામાં ચાર વેદના ચાર દિગ્પાલો (બ્રાહ્મણો) બેઠા હોય છે. જેમ કે, ૧. ઋગ્વેદનો જાણકાર **હોતા પૂર્વ દિશામાં,** ૨. સામવેદનું ગાન કરનાર **ઉદ્ગાતા પશ્ચિમ દિશામાં** ૩. યજ્ઞવેદીનું માપ લેવું વગેરે (યજ્ઞનાં) વિવિધ કાર્યો કરનાર યજુર્વેદનો જ્ઞાતા **અધ્વર્યુ દક્ષિણ દિશામાં** અને ૪. બધા જ બ્રાહ્મણો અને કાર્યો ઉપર ધ્યાન રાખનાર અધ્યક્ષ અથર્વવેદનો જાણકાર **બ્રહ્મા** નામનો ઋત્વિજ્ **ઉત્તર દિશામાં** બેઠેલો હોય છે. યાસ્ક જણાવે છે કે ऋचां त्वः पोषमास्ते० । એ ઋચામાં આ ચાર ઋત્વિજોનાં કર્મોનું વિભાજન દર્શાવવામાં આવ્યું છે. त्वः = एकः होता હોતા નામનો એક બ્રાહ્મણ ઋચાઓની પુષ્ટિ કરે છે., ઋક્ (ઋચા)નો અર્થ અર્ચની થાય છે. જેના દ્વારા અર્ચન થાય છે તે અર્ચની ઋક્. આ ઋક્ શબ્દમાં √अर्च् ''પૂજા કરવી'' ધાતુ રહેલો છે. શક્વરી એ વૈદિક છન્દનું નામ છે અને તેમાં છ પંક્તિ હોય છે, જેમાંથી ઘટાડીને ત્રણ પંક્તિવાળો ગાયત્રી છન્દ બનાવવામાં આવ્યો છે. આથી ઉપરની ઋચામાં કહ્યું છે કે ઉદ્ગાતા નામનો બીજો બ્રાહ્મણ શક્વરીને વિશે ગાયત્રીનું ગાન કરે છે. અહીં 'ગાયત્રી' શબ્દમાં 'સ્તુતિ કરવી' અર્થવાળો √गैं (गायति) ધાતુ રહેલો છે. 'શક્વરી' શબ્દમાં 'શક્તિમાન હોવું/થવું' અર્થવાળો √शक् (शक्नोति) ધાતુ રહેલો છે. ઇન્દ્ર જે ઋચાઓ વડે વૃત્રને મારવા માટે શક્તિમાન બન્યો તે ઋચાઓ 'શક્વરી' કહેવાઈ. एताभिः वै इन्द्रः वृत्रम् अशकत् हन्तुम् । तद् यद् आभिः वृत्रम् अशकत् हन्तुं तस्मात् शक्वर्यः ॥ कौषीतकि ब्राह्मण. ૨૩/૨). આમ, શક્વરી સર્વોત્કૃષ્ટ શસ્ત્ર ગણાયું છે અને જેની ઇન્દ્રને પણ જરૂર પડી હતી એવું આ બ્રાહ્મણગ્રંથનું ઉદ્ધરણ સૂચવે છે. બ્રહ્મા નામનો જે ત્રીજો બ્રાહ્મણ છે તે યજ્ઞમાં સંદેહના દરેક પ્રસંગે અથવા તો ભૂલ થાય ત્યારે ત્યારે તેના સમાધાનરૂપે, પ્રાયશ્ચિત્તરૂપે સમજૂતીઓ આપે છે. આ બ્રહ્મા બધી વિદ્યાઓનો જાણકાર હોય છે. આવા બ્રાહ્મણને 'બ્રહ્મા' કહેવાય છે, કેમ કે તે શ્રુતજ્ઞાનથી પરિવૃઢ (વૃદ્ધ) થયેલો હોય છે. અહીં યાસ્ક બ્રહ્મા શબ્દની સાથે સાથે 'બ્રહ્મન્' શબ્દને પણ સમજાવી દે છે ! જે ચારે તરફથી પરિવૃઢ (વૃદ્ધિ પામેલું- ફેલાયેલું) હોય તે બ્રહ્મ કહેવાય છે. દુર્ગના મતે બ્રહ્મન્ એટલે ત્રણેય વેદો, કે જે બધી દિશાઓમાં ફેલાયેલા છે. ચોથો અધ્વર્યુ નામનો બ્રાહ્મણ યજ્ઞની માત્રાને એટલે કે વિવિધ કર્મોને કરે છે. આ બ્રાહ્મણ દરેક પ્રકારનું કામ કરી શકે છે.

અહીં યાસ્ક 'અધ્વર્યુ' શબ્દના નિર્વચનનો અનેક રીતે વિચાર કરે છે. તેઓ જણાવે છે કે अध्वर्युः એટલે अध्वरयुः । = अध्वरं युनक्ति सः अवरयुः । અને अध्वर એવું દ્વિતીયાન્ત પદ ઉપપદમાં રહેતાં √युज् ધાતુને કૃત્ પ્રત્યય લાગીને ઉપપદ સમાસ થઈને अध्वरयु શબ્દ બન્યો છે. આનો અર્થ યજ્ઞનો વ્યવસ્થાપક અથવા તો યજ્ઞનો નેતા; જે યજ્ઞના વિવિધ ભાગોને ક્રમબદ્ધ રીતે જોડે. દુર્ગ अध्वरं युनक्तिનો જ अध्वरस्य नेता એવો અર્થ કરે છે. પરંતુ પ્રા. રાજવાડે કહે છે કે अध्वरयु શબ્દના બન્ને જુદા જુદા અને સ્વતન્ત્ર અર્થો છે. એમાંથી (૧) अध्वरयु શબ્દમાં यु એ √युज् ધાતુનો અંશ છે અને એનો અર્થ છે યજ્ઞને, યજ્ઞનાં કાર્યોને જોડનાર. અહીં 'અધ્વરયુ' શબ્દ કૃદન્ત છે. (૨) अध्वरને 'નેતા' અર્થવાળો તદ્ધિત यु પ્રત્યય લગાડવામાં આવ્યો છે એમ માનીએ તો अध्वर्यु શબ્દ બને છે અને તેનો અર્થ થાય છે: 'યજ્ઞનો નેતા.' અહીં 'અધ્વર્યુ' શબ્દને તદ્ધિતાન્ત સમજવાનો છે.

યાસ્ક 'અધ્વર્યુ' શબ્દનું એક ત્રીજું નિર્વચન આપે છે : √यु कामयते । જે અધ્વર (યજ્ઞ)ની કામના કરે તે અધ્વર્યુ. (અધ્વર ભૌતિક અને આધિભૌતિક સમ્પત્તિ લાવી આપનાર છે. આથી અધ્વરને ઇચ્છે છે તે અધ્વર્યુ કહેવાય છે.) અહીં પણ 'કામના કરવી' અર્થવાળો **તદ્ધિત यु પ્રત્યય છે એમ સમજવાનું છે.** આ શબ્દનું ચોથું નિર્વચન આ પ્રમાણે છે: **'અધ્યયન કરનાર'** એ **અર્થવાળો તદ્ધિત यु પ્રત્યય** (ઉપબન્ધ) લાગીને 'અધ્વર્યુ' શબ્દ બન્યો હશે. અર્થાત્ જે અધ્વર (યજ્ઞ)નું અધ્યયન કરે તે અધ્વર્યુ. અધ્વર એ યજ્ઞનું નામ છે, વિશેષે કરીને સોમયજ્ઞ માટે 'અધ્વર' શબ્દ વપરાય છે, પરંતુ યાસ્કે યજ્ઞસામાન્યના અર્થમાં

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

અધ્વર શબ્દ વાપર્યો છે. અહીં પ્રા. રાજવાડે જણાવે છે કે સોમયજ્ઞનું જે અધ્યયન કરે તે અધ્યેતાને 'અધ્વર' જ કહેવાય. આ શબ્દને ફરીથી યુ પ્રત્યય લગાડવાની જરૂર નથી. સંક્ષેપમાં अध्वर + यु એ પદસમુદાયમાં યુ ના ચાર અર્થો કલ્પી શકાય છે: (૧) યજ્ઞને જોડનાર (૨) યજ્ઞનો નેતા (૩) યજ્ઞની કામના કરનાર અને (૪) યજ્ઞનું અધ્યયન કરનાર. (અહીં अध्वरयु એવો શબ્દ કૃદન્ત છે અને તેમાંથી પ્રથમ અર્થ મળે છે. બાકીના ત્રણે અર્થો આપનાર શબ્દ છે अध्वर्यु, આ શબ્દ તદ્ધિતાન્ત છે.)

હવે अध्वर + यु એ પદસમુદાયમાંથી 'અધ્વર' શબ્દ કેવી રીતે બન્યો તેની વિચારણા કરવામાં આવે છે : યાસ્ક જણાવે છે કે અધ્વર શબ્દમાં હિંસા કરવી અર્થવાળો √ध्वृ (ध्वरति) ધાતુ રહેલો છે. આ હિંસાનો જ્યાં પ્રતિષેધ થાય છે અર્થાત્ જેમાં હિંસા થતી નથી તે અધ્વર (अध्वरः अहिंस्रः इत्यर्थः ।). દુર્ગ અહીં એક રસપ્રદ ચર્ચા કરે છે. તેઓ કહે છે કે યજ્ઞમાં પશુઓ હણાય છે, તૃણવનસ્પતિઓ છેદાય છે છતાંય યજ્ઞને અહિંસ્ર કેવી રીતે કહો છો ? તો જવાબ છે કે આ પ્રકારની હિંસામાં જેનો નાશ થાય છે તેનો તો અભ્યુદય જ થાય છે માટે યજ્ઞને અહિંસ્ર = અ-ધ્વર કહ્યો છે !)

ડો. સિદ્ધેશ્વર વર્મા જણાવે છે કે अध्वर्युः अध्वरयुः । આ શબ્દની યાસ્કે આપેલી વ્યુત્પત્તિઓ પ્રાગૈતિહાસિક કાળની (Primitive) છે, એટલે કે જેમાં ભાષાવિજ્ઞાનનો વિકાસ થયો ન હતો તે કાળની આ વ્યુત્પત્તિઓ છે. 'અધ્વર' શબ્દના નિર્વચન વિશે તેઓ નોંધે છે કે હકીકતમાં યજ્ઞનો ઇતિહાસ તપાસીએ યાસ્કે આપેલું નિર્વચન (अध्वरः अहिंस्रः જેમાં હિંસા થતી નથી તે) ભૂલભરેલું જણાય છે. તત્ત્વજ્ઞાનની દૃષ્ટિએ અધ્વર એ એક ધાર્મિક ક્રિયા છે અને મૂળમાં તે શબ્દ 'માર્ગ'નો વાચક છે. વિશેષમાં તેઓ જણાવે છે કે According to the latest researches, however, Adhvara goes back to Indo-Eur. ndh-to go, Pali andhati-he goes, Gr. anēno then - "he comes forth' and signifies - "a way, a course.' (p.73)

22. निपातः इत्येके । तत्कथम् अनुदात्तप्रकृति नाम स्यात् । दृष्टव्ययं तु भवति । उत त्वं सख्ये स्थिरपीतमाहुः (ऋ.सं.१०/७१/५) इति द्वितीयायाम् । उतो त्वस्मै तन्वं १ वि सस्रे (ऋ.सं. १०/७१/४) इति चतुर्थ्याम् ।

"निपातः" अयम् "इत्येके" मन्यन्ते ॥

एवमेकीयपक्षे निपातत्वमस्योक्त्वा अधुना चोदकपक्षे स्थित्वा परपक्षमाक्षिपन्नाह, "तत् कथमनुदात्तप्रकृति नाम स्यात्" – इति । तदेतच्छब्दरूपमनुदात्तस्वभावं सत् कथं नाम स्यात् ? ननु भवतैवोक्तम् – उत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानि – इति । उच्यते, – सत्यमुक्तम् । ननु तत्रैवेदं प्रत्युक्तम्, – अन्यत्र चापवादात् – इति । स एषोऽपवादांशः – त्वत्त्वसमसिमेत्यनुच्चानीति । उत्सर्गादपवादो बलीयान् । तस्माद्विप्रतिपन्नस्वरमपि एतन्नामैव । 'किञ्च' "दृष्टव्ययं तु भवति" । तु शब्दो हेत्वर्थः – हेतुसमुच्चयार्थो वा । अनुदात्तप्रकृतित्वेऽपि स तु 'दृष्टानुविधयश्छन्दसि' – इति दृष्टव्ययत्वान्नामेति तद्भवति । एव हेत्वर्थः । अथवैवमन्यथाहेतुसमुच्चयार्थः, अपवादस्मरणात् – व्ययदर्शनाच्च अनुदात्तमपि सदेतन्नामैव भवति । निपाता अप्याद्युदात्ता भवन्ति (फि० सू० ४,१३) । तस्मात् कृतापवादत्वाद् – दृष्टाव्ययत्वाच्च नामैवैतदित्युपपन्नम् ॥

आह, – क्व पुनरस्य व्ययो दृष्टः ? उच्यते, – "उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायाम्" एकवचने । एवम् "उतो त्वस्मै तन्वं १ वि संस्र इति चतुर्थ्याम्" एकवचने व्ययो दृष्टः । उपरिष्टाच्छेषः । "अथापि प्रथमाबहुवचने" – व्ययो दृष्ट इत्यध्याहारः ॥३॥

(અનુ૦) 'त्व એવું પદ નિપાત છે' એમ કેટલાક આચાર્યો કહે છે. (પરંતુ જો નિપાત હોય તો) તે કેવી રીતે અનુદાત્ત સ્વરવાળું નામ (સર્વનામ) કહેવાશે ? (ઉત્તર :) તે સર્વનામ છે. કેમ કે તેમાં વ્યય (વિકાર) જોવા મળે છે. દા.ત., उत त्वं सख्ये.. । આ ઉદાહરણમાં त्वનું દ્વિતીયા વિભક્તિનું त्वम् એવું રૂપ વપરાયું છે અને उतो त्वस्मै तन्वं विसस्रे । આ ઉદાહરણમાં त्वનું ચતુર્થી વિભક્તિનું त्वस्मै એવું રૂપ વપરાયું છે.

22. (વિમર્શ) : અગાઉ આપણે નોંધ્યું છે કે નિપાતોની ચર્ચાના અનુસન્ધાનમાં યાસ્કે त्व એવું પદ સર્વનામ છે, નામ છે કે નિપાત છે ? તે ચર્ચાનો પ્રારંભ કર્યો છે. પ્રારંભે त्व એ સર્વનામ છે એ મત રજૂ કરીને તેના ઉદાહરણ તરીકે ઋચાં त्वः पोषमास्ते.. । એ ઋચા પણ સમજાવી. પછી જણાવ્યું હતું કે त्व એ અર્ધનો વાચક છે, અર્થાત્ એ સર્વનામ નહીં પણ નામ છે. હવે ત્રીજો મત રજૂ કરે છે કે त्व એ નિપાત છે. આ ત્રણે મતો ભેગા થતાં વિવાદ ઊભો થાય છે : त्वને જો નિપાત (અવ્યય) ગણવો હોય તો તેનો સ્વર (હંમેશાં) અનુદાત્ત હોય છે અને જે નામ (અને સર્વનામ) હોય છે તેનો (प्रातिपदिकान्तस्योदात्तः । એ નિયમ મુજબ) સ્વર અન્તોદાત્ત હોય છે. પરન્તુ યાસ્કે તો અગાઉ કહ્યું છે કે त्व એ સર્વનામ છે અને તે અનુદાત્તપ્રકૃતિ (અનુદાત્ત સ્વરવાળો) છે. આથી પ્રશ્ન થાય છે કે જો त्व સર્વનામ હોય તો તે અનુદાત્તપ્રકૃતિ કેવી રીતે હોઈ શકે ? કેમ કે અનુદાત્તસ્વર હોવો

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

તે તો નિપાતનું લક્ષણ છે. આમ त्व ને સર્વનામ કહેવું અને તે જ સમયે તેને અનુદાત્તપ્રકૃતિ કહેવું એ સ્પષ્ટ રીતે વિસંગત છે. આ વિસંગતિને દૂર કરવા બે-ત્રણ સમાધાનો રજૂ કરવામાં આવે છે. (૧) त्व ને સર્વનામ કહેવા માટે મુખ્ય પ્રમાણ એ છે કે તે જુદી જુદી વિભક્તિમાં વપરાયેલું જોવા મળે છે. વળી, એ વિભક્તિનાં રૂપો સર્વનામનાં જેવાં રૂપો ચાલે તે પ્રમાણેનાં જોવા મળે છે. જેમ કે, त्वम् । त्वस्मै । त्वै । વગેરે. અહીં વ્યય (વિકાર) જોવા મળે છે. જો त्व એ નિપાત (અવ્યય) હોય તો તેમાં ક્યારેય વ્યય જોવા ન મળે. (જે બધા લિંગમાં અને બધી વિભક્તિનાં રૂપોમાં વ્યય પામતું નથી તેને જ અવ્યય કહે છે.) અહીં त्व માં તો વ્યય જોવા મળે છે, માટે તે સર્વનામ છે. (૨) હવે જો त्व સર્વનામ હોય તો તે અન્તોદાત્ત હોવું જોઈએ. અનુદાત્તપ્રકૃતિ (અનુદાત્તસ્વરવાળું) નહીં, છતાંય યાસ્કે તેને સર્વનામ કહેવાની સાથે સાથે અનુદાત્તપ્રકૃતિ પણ કહ્યું છે. તેનો જવાબ એ છે કે अनुदात्तप्रकृतिः = अनुदात्ता प्रकृतिः यस्य तत् । આવો બહુવ્રીહિ વિગ્રહ કરવામાં આવે છે. અર્થાત્ "જે મૂળમાં (નિપાત હોવાને કારણે) અનુદાત્ત સ્વરવાળો હતો." એટલે કે જેની મૂળ પ્રકૃતિ અનુદાત્ત સ્વરવાળી છે. આમ, त्व એ હકીકતમાં તો નિપાત (અવ્યય) જ છે અને તે કારણે મૂળમાં તો તે અનુદાત્ત સ્વરવાળો જ છે, પણ તેમાં વિકાર થતો જોવા મળતો હોઈ તેને સર્વનામ કહેવાનું પ્રાપ્ત થાય છે. (સર્વનામ બન્યા પછી તેનો સ્વર બદલાય છે.) (૧) દુર્ગ वृष्टव्ययं तु भवति । વાક્યમાંના तु શબ્દને હેત્વર્થે લઈને જણાવે છે કે वृष्टानुविधयश्छन्दसि । (વેદમાં લક્ષ્યપ્રધાન હોઈ, ઋચામાં પ્રયોજાયેલા રૂપ-વિધિને જોઈને તેને અનુકૂળ લક્ષણસૂત્ર વિચારવાનું હોય છે.) એ ન્યાયને અનુસરીને त्व એ નિપાત જ છે અને તેથી મૂળમાં અનુદાત્ત સ્વરવાળો જ છે. છતાંય તેનો જ્યાં ઋચાઓમાં પ્રયોગ થયો છે તેમાં વ્યય (વિકાર) જોવા મળે છે. આથી તેને નામ (સર્વનામ) જ કહેવું પડશે. બીજા શબ્દોમાં કહીએ તો દુર્ગના મતે આ અપવાદ (અનિયમિત) સ્થળ છે. એટલે કે त्व એ અનુદાત્તપ્રકૃતિ હોવા છતાંય તેમાં વ્યય થતો જોવા મળે છે, તેથી તેને સર્વનામ ગણવાનું છે.

(વિશેષ) त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्, अर्धनामेत्येके । એવા વાક્યથી 'त्व' શબ્દને ૧. સર્વનામ ૨. 'अर्ध' એવા અર્થનું વાચક નામ કે ૩. નિપાત (અવ્યય) ગણવું ? એ ચર્ચાનો પ્રારંભ થયો છે. અહીં બીજા મત મુજબ त्व ને अर्धनाम કહેવાયું છે, તેની ઉપર પ્રોફે. એમ. એ. મેહેન્દળેએ (Nirukta Notes - II, pp.5-8, Deccan College, Pune, 1978) એક વિશેષ વિચારણા કરી છે. જેમ કે, – નામ, આખ્યાત, ઉપસર્ગ અને નિપાત એવા ચાર પ્રકારનાં પદોમાંથી જે નામ છે તેનામાં બે લક્ષણ છે : તેના જુદી જુદી વિભક્તિઓમાં રૂપો ચાલે છે અને તેને ઉદાત્ત સ્વર મળે છે. આ 'નામ'ની અંતર્ગત જ સર્વનામ (અને વિશેષણો)નો સમાવેશ થાય છે. બીજા શબ્દોમાં કહીએ તો सर्वादि ગણવામાં આવેલા શબ્દો પણ આખા (= full or complete) નામન્ છે. કેમ કે તે (સર્વનામો) પણ નામની જેમ ઉદાત્ત સ્વર લે છે અને તેમના પણ પ્રથમાદિ વિભક્તિમાં રૂપો ચાલે છે. આમ છતાં નામથી તેમને એટલા માટે જુદા પાડવામાં આવ્યાં છે કે તેમનાં રૂપો થોડાંક જુદા થાય છે. (જેમ કે, सर्वे, सर्वस्मै, सर्वस्मात्, सर्वस्मिन् વગેરે) જ્યારે त्व એ 'अर्धनाम' (half or partly a naman) (અડધું નામ) છે, કારણ કે તે નામનાં કુલ બે લક્ષણોમાંથી એક લક્ષણ ધરાવે છે. જેમ કે, તે त्व ના જુદી જુદી વિભક્તિમાં રૂપો ચાલે છે, પણ નામના બીજા લક્ષણ મુજબ તેને ઉદાત્ત સ્વર મળતો નથી. આમ તે અડધું નામ છે. ટૂંકમાં —

નામ

નામ	સર્વનામ	અર્ધનામ
राम	सर्व	त्व
सीता	इदम्	सम
नदी	यद्	
वन વગેરે	तद् વગેરે	

આ દૃષ્ટિએ પ્રોફે. મેહેન્દળેએ નિરુક્તના ઉપર્યુક્ત વાક્યને આમ વાંચવા સૂચવ્યું છે: – त्व इति विनिग्रहार्थीयं सर्वनाम । अनुदात्तम् अर्धनामेत्येके ॥ (It is unaccented, therefore some call it अर्धनाम) (સ્વરની દૃષ્ટિએ જુદા પડતાં આ 'અર્ધનામો' સંખ્યાની દૃષ્ટિએ બે જ હોઈને વૈયાકરણોને તેનો પૃથક્ વર્ગ ઊભો કરવો ઉચિત નહીં લાગ્યો હોય, તેથી આ અર્ધનામ એવી સંજ્ઞા પ્રચારમાં આવી શકી નથી.)

---

23. अथापि प्रथमाबहुवचने ॥८॥ अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृशे (ऋ.सं. १०/७१/७ ॥ अक्षिमन्तः कर्णवन्तः सखायः । अक्षि चष्टेः । अनक्तेः इति आग्रायणः । तस्मादेते व्यक्ततरे इव भवतः इति ह विज्ञायते । कर्णः कृन्ततेः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

निकृत्तद्वारो भवति । ऋच्छतेः इति आग्रायणः । ऋच्छन्तीव खे उदगन्ताम् इति ह विज्ञायते । मनसां प्रजवेषु असमाः बभूवुः । आस्यदघ्ना: अपरे । उपकक्षदघ्नाः अपरे । आस्यम् अस्यतेः । आस्यन्दते एतद् अन्नम् इति वा । दघ्नं दघ्यतेः स्रवतिकर्मणः । दस्यतेर्वा स्यात् । विदस्ततरं भवति । प्रस्नेयाः । ह्रदाः इव एके प्रस्नेयाः दद्दृशिरे । स्नानार्हाः । ह्रदो ह्रादतेः शब्दकर्मणः । ह्लादतेर्वा स्यात् शीतीभावकर्मणः ॥

अक्षण्वन्तः कर्णवन्तः "(ऋ० सं० ८,२,३४,२)" – इत्येतस्यामृचि । बृहस्पतेरार्षं विद्यासूक्तं नाम । 'अक्षण्वन्तः' अक्षिसंयुक्ताः, एवमपि समानेन्द्रियाः समानपृष्ठौदरपाणिपादाः सन्तः अपि च, 'सखायः' समानख्यानाः सर्वे मनुष्याः । अथवा समानेषु शास्त्रेषु कृतश्रमाः । वैयाकरणा वैयाकरणानामेव समानख्यानाः, नैरुक्ता एव नैरुक्तानाम् । 'मनोजवेषु' मनोगम्येष्वर्थेषु 'असमा बभूवुः' । केचिदूहापोहनधारणवक्तृत्वसमर्थाः, केचिदमेधसः । कथमसामान्यमिति ? यतो दृष्टान्तेन प्रतिपादयति । – "आदघ्नास उपकक्षास उ त्वे ह्रदा इव" । आदघ्ना एव आदघ्नासः । आस्यदघ्नह्रदपरिमाणाः, केचित् प्रज्ञया । उपकक्षासः कक्षसन्निकृष्टदेशतुल्योदका इव ह्रदाः । एके प्रज्ञयाह्रदाः 'खात्वा' अक्षोभ्याः अपरिमेयप्रज्ञानाः । 'दद्दृश्रे' दद्दृशिरे – दृश्यन्त इति समस्तार्थः ॥

अर्थैकपदं निरुक्तम् । "अक्षि चष्टेः" पश्यत्यर्थस्य, – दृश्यते ह्यनेन । "अनक्ते" व्यक्त्यर्थस्य – "इत्याग्रायणः" मन्यते । ब्राह्मणमपि चैतस्मिन्निर्वचने भवति । "तस्मादेते व्यक्ततरे इव भवतः" – इति । यस्मादिदन्नामेति किमिति प्रकृतमपेक्ष्य । अथवा यस्मादेते तेजोऽवयवभूयिष्ठे, तस्मात्कारणादित्येवं यच्छब्दमन्वाकृष्य विद्यमानमविद्यमानं चोत्पाद्य तस्माच्छब्दस्य सामर्थ्यमुत्पाद्यते । तथाहि स निराकाङ्क्षो भवति । सर्वत्र च साकाङ्क्षेषु शब्देष्वेवं व्याख्यानधर्मो द्रष्टव्यः । एते अक्षिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे प्रकाशतरे भवतः, – अन्धकारेऽपि ह्येते प्रकाशेनैव नक्तञ्चारादीनां न तथेतराण्यङ्गानि । एवं ब्राह्मणेऽपि अनक्तेरेवाक्षिणी "– इति ह विज्ञायते" । "कर्णः कृन्ततेर्निकृत्तद्वारो भवति, ऋच्छतेरित्याग्रायणः" मन्यते । ब्राह्मणमपि चैतस्मिन्निर्वचने भवति, – "ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते" – इति । ऋच्छन्तीवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः एतावपि च उदगन्तां प्रत्युद्गच्छत इव ग्रहणाय । विचार्य्यमाणे ज्ञायते खे कर्णाविति । "आस्यमस्यतेः" क्षेपार्थस्य, — क्षिप्यते ह्येतदाभिमुख्येनान्नम् । स्यन्दतेर्वा स्यादाङ्पूर्वस्यैव स्रवणार्थस्य, – शुष्केऽपि ह्येतदन्न आगते स्रवत्येव श्लेष्माणं, येन तदार्द्रीकृतं ग्रसितुं शक्यते । "दघ्नं, दघ्यतेः" स्रवत्यर्थस्य । सुततरमिव तद्भवत्युत्तरात् परिमाणात् । "दस्यतेर्वा स्यात्" क्षयार्थस्य । "विदस्ततरं" ह्य पक्षीणतरं, तद् "भवति" उत्तरस्मात् परिमाणात् । "प्रस्न याः" प्रकर्षेण स्नातुं येषु योग्यम्, अगाधत्वात्, ते प्रस्नेयाः स्नानार्हा इत्यर्थः । "ह्रदो ह्रादतेः" शब्दार्थस्य, – शब्दं ह्यसावभिहन्यमानः करोति । "ह्लादतेर्वा स्यात्" शीतीभावार्थस्य, – ग्रीष्मेऽपि ह्यसौ शीतल एव भवति ॥

"अथापि" अयमपरो निपातः "समुच्चयार्थे भवति" एकतमः – त्वत् इति ॥४॥ किमुदाहरणम् ? –

23. (અનુ०) त्वनो પ્રથમા બહુવચનમાં પણ પ્રયોગ થયેલો જોવા મળે છે. દા.ત., अक्षण्वन्तः कर्णवन्तः सखायो० । (એ ઋચામાં त्वे પદ त्व એવા સર્વનામનું પ્રથમા બહુવચનનું રૂપ છે.) "આંખોવાળા અને કાનવાળા સખાઓ (= સમાન શાસ્ત્રના અધ્યેતાઓ) મનની ગતિને વિશે અસમાન થયા, જેવી રીતે સ્નાનને યોગ્ય એવા જળાશયમાં કેટલાક મુખ સુધી, તો બીજા કેટલાક કમ્મર (કેડ) સુધી ડૂબેલા દેખાય છે." अक्षण्वन्त = अक्षिमन्तः અને कर्णवन्तः એટલે આંખોવાળા અને કાનવાળા સખાઓ. अक्षि શબ્દ √चक्ष् ધાતુ (चक्ष + इ > चक्षि > अक्षि । च વર્ણનો નાશ થયો છે) ઉપરથી બન્યો છે. આગ્રાયણ નામના આચાર્યના મતે अक्षि શબ્દ √अञ्ज् 'પ્રકાશિત થવું' ધાતુ ઉપરથી બન્યો હશે. अञ्ज् + सि = अक् + सि = अक्षि અથવા अश् + सि = अक् + सि = अक्षि) કેમ કે "(પ્રાણીઓનાં અન્ય અંગોમાંથી) આ આંખો અતિ સ્પષ્ટરૂપે, અતિપ્રકાશિત સ્વરૂપે રહેલી હોય છે" એવું (બ્રાહ્મણગ્રંથોને આધારે) જણાય છે. कर्णः શબ્દ √कृन्त् 'કાપવું' (कृन्त् + अ > कृन् + अ > कृण > कर्ण) ધાતુ ઉપરથી બન્યો હશે, મસ્તકમાં કાનનું છિદ્ર (કાણું) પાડવામાં આવ્યું છે તેથી તેને 'કર્ણ' કહે છે. આગ્રાયણ નામના આચાર્યના મતે √ऋच्छ 'જવું' ધાતુ ઉપરથી 'કર્ણ' શબ્દ બન્યો છે. (ऋच्छ + नः = ऋक् + नः > વર્ણવિપર્યય क् ऋ + नः = > कर्णः ।) – "ઉચ્ચરિત શબ્દોનું ગ્રહણ કરવા માટે કર્ણ આકાશમાં જાય છે" એવું (બ્રાહ્મણગ્રંથોને આધારે) જણાય છે. (આંખોવાળા અને કાનવાળા સખાઓ) મનની ગતિ વિશે અસમાન થયા. એટલે કે કેટલાક (વિદ્વાનો) મુખ પર્યન્ત અને બીજા કેટલાક કેડ સુધી (જળાશયમાં ડૂબેલા છે.) (અહીં ઋચામાંના आदघ्नासः શબ્દનો અર્થ आस्यदघ्नाः કર્યો છે. તેમાં) आस्यम् (એટલે મુખ) એવો શબ્દ √अस 'ફેંકવું' ધાતુ ઉપરથી બન્યો છે. અથવા તો (आस्यम् શબ્દમાં) आङ ઉપસર્ગપૂર્વક √स्यन्द् (સ્રવવું, વહેવું –અર્થવાળો) ધાતુ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

રહેલ છે. કેમ કે તે (મુખ)માં અન્ન શ્લેષ્મ (લાળ)ની સાથે ભળીને વહે છે. (અહીં आस्यदघ्नामांथी) दघ्नम् એવો અંશ વહેવું અર્થવાળા √दघ् ધાતુમાંથી બન્યો છે. અથવા તો 'નાશ પામવું, ક્ષીણ થવું' એવા અર્થવાળા √दृस् ધાતુમાંથી दघ्न શબ્દ બન્યો હશે. કેમ કે મુખમાં અન્ન મૂકતાં તેનો નાશ થાય છે, અર્થાત્ તે કદમાં ક્ષીણ થતું જાય છે. (स्नात्वानो અર્થ प्रस्नेयाः છે.) (प्रस्नेया ह्रदा इवैके ददृशिरे स्नानार्हाः ।) પ્રસ્નેય અર્થાત્ અગાધત્વને કારણે જેમાં પ્રકર્ષપણે સ્નાન કરવું યોગ્ય છે તેવું જળાશય. (આવાં સ્નાનાર્હ જળાશયોને જોયાં.) ह्रद શબ્દ √ह्राद् 'અવાજ કરવો' ધાતુ ઉપરથી બન્યો હશે, અથવા √ह्लाद् 'શીત કરવું' ધાતુ ઉપરથી બન્યો હશે.

23. (વિમર્શ) : ઉપર્યુકત ઋચામાં त्व એવા સર્વનામનો પ્રથમા બહુવચનમાં પ્રયોગ થયો છે તે દર્શાવવું મુખ્ય છે, પરંતુ યાસ્ક પ્રાસંગિક રીતે આ ઋચામાંના सखायः । अक्षि । कर्णः । आस्यम् । हृदः । ઇત્યાદિ શબ્દો કેવી રીતે પ્રચારમાં આવ્યા હશે તેની પણ વિચારણા રજૂ કરે છે. (૧) सखायःને સમજાવતાં દુર્ગ કહે છે કે समानख्यानाः सर्वे मनुष्याख्याः । અર્થાત્ સમાન છે ખ્યાન (અભિધાન) જેમનું. એટલે કે બધાયને માટે 'મનુષ્ય' એવું સમાન નામ વપરાય છે તેથી તેઓ सखा કહેવાય છે. વિશેષમાં દુર્ગ કહે છે કે समानेषु शास्त्रेषु कृतश्रमाः । वैयाकरणाः वैयाकरणानामेव समानख्यानाः, नैरुक्ताः एव नैरुक्तानाम् । જેમણે સમાન શાસ્ત્રોમાં પ્રયત્ન કર્યો હોય, અધ્યયન કર્યું હોય તેમને 'સખા'ઓ કહે છે. જેમ કે, વૈયાકરણો વૈયાકરણોના સખાઓ છે અને નૈરુકતો (નિરુકતનું અધ્યયન કરનારાઓના) નૈરુકતોના સખાઓ છે. (૧) अक्षि શબ્દ ઉપર અનુવાદમાં દર્શાવ્યું છે તેમ √चक्ष् ધાતુ ઉપરથી બન્યો હશે. પ્રા. રાજવાડે જણાવે છે કે अक्षि શબ્દમાં (પાણિનીય ધાતુપાઠમાં આપેલો) √अक्ष व्याप्तौ (ધા.૧/૬૫૫) એ ધાતુ નહીં હોય, કેમ કે તે ધાતુનો 'જોવું' એવો અર્થ થતો નથી. માટે √चक्ष् ધાતુ જ હોવો જોઈએ. શબ્દનું નિર્વચન કરતી વખતે આપણે જે શબ્દનું નિર્વચન આપવું હોય તેના અર્થને પહેલો ધ્યાનમાં રાખવાનો હોય છે. આગ્રાયણના મતે अक्षि શબ્દમાં √अञ्ज् ધાતુ રહેલો છે. અહીં આગ્રાયણના મતના સમર્થનમાં तस्मादेते व्यक्ततरे इव भवतः इति ह विज्ञायते । એવું જે ઉદ્ધરણ આપ્યું છે, તે કયા બ્રાહ્મણગ્રંથનું છે એ અજ્ઞાત છે. આ ઉદ્ધરણને સમજાવતાં દુર્ગ નોંધે છે કે રાત્રે અંધકારમાં ફરનાર પ્રાણીઓની બે આંખો જેટલી પ્રકાશે છે, તેટલાં બીજાં અંગો પ્રકાશતાં નથી, માટે अक्षि શબ્દ √अञ्ज् 'પ્રકાશવું' ધાતુ ઉપરથી બન્યો હશે. આમ, अक्षि શબ્દને √चक्ष् અને √अञ्ज् એવા બે ધાતુને આધારે સમજાવવાનો પ્રયત્ન કર્યો છે. (૩) कर्णः શબ્દ √कृन्त् ધાતુ ઉપરથી બન્યો હશે. (પ્રક્રિયા માટે જુઓ અનુવાદમાં.) આ ઉપરાંત, એ શબ્દમાં √ऋच्छ् 'જવું' ધાતુ પણ હોઈ શકે એવો આગ્રાયણનો મત છે. આ મતના સમર્થનમાં પણ કોઈ બ્રાહ્મણગ્રંથનું ઉદ્ધરણ યાસ્ક આપે છે. (૪) आस्यम् (મુખ) શબ્દમાં √अस् 'ફેંકવું' ધાતુ રહેલો છે. મુખમાં અન્નને ફેંકવામાં (મૂકવામાં) આવે છે. આથી તેને आस्यम् કહે છે. અથવા તો आ + √स्यन्द् (ધીમેથી ટપકવું, ઝરવું) ધાતુ ઉપરથી તે શબ્દ બન્યો હશે. દુર્ગ જણાવે છે કે મુખમાં શુષ્ક અન્ન મૂકવામાં આવે છે ત્યારે પણ તે લાળને ટપકાવે છે, જેથી આર્દ્રી કૃત (ભીનું થયેલું) અન્ન ગળવું શક્ય બને છે.

અહીં ઋચામાંના आदघ्नासः શબ્દનો અર્થ યાસ્ક आस्यदघ्नाः કરે છે અને પછી आस्य અને दघ्न એ બંનેને જુદા જુદા શબ્દો ગણીને સમજાવે છે, જે ચિન્ત્ય છે. અહીં आ = आस्यम् અને તેને 'પ્રમાણ' અર્થવાળો दघ्नच् (प्रमाणे द्वयसज्दघ्नञ्मात्रचः । પા.સૂ. ૫-૨-૩૭) એવો તદ્ધિતનો પ્રત્યય લાગ્યો છે. આથી आस्यदघ्ना એટલે મુખપર્યન્ત, અર્થાત્ કેટલાંક જળાશયોનું પાણી સ્નાન કરનારના મુખ સુધી આવે એટલું ઊંડુ છે. પરંતુ યાસ્કે આવો અર્થ આપ્યો નથી. તેમણે आ = आस्यम् લઈને दघ्नને પ્રત્યય નહીં ગણતાં, જુદો જ શબ્દ ગણ્યો છે. યાસ્ક કહે છે કે दघ्न શબ્દમાં √दघ् 'સ્રવવું' અથવા √दस 'ક્ષીણ થવું' ધાતુ રહેલો છે. હવે आस्यम् અને दघ्न એ બેને ભેગા કરીને શો અર્થ કરવો તે વિવાદાસ્પદ છે. પ્રા. રાજવાડે આ ઋચામાંના आदघ्न, उपकक्ष અને स्नात्व શબ્દોને આ પ્રમાણે સમજાવે છે; કેટલાંક જળાશયોનું પ્રાણી સ્નાન કરનારના મુખ સુધી આવે એટલું ઊંડુ હોય છે, તો બીજાં કેટલાંક જળાશયોનું પાણી સ્નાન કરનારની બગલ (उपकक्षास = armpit) સુધી આવે એટલું ઊંડુ હોય છે અને ત્રીજાં કેટલાક જળાશયોનું પાણી સ્નાન કરનાર તેમાં ઊભો રહે તો (स्नात्वाः) પૂરેપૂરો ડૂબી જાય એટલું ઊંડુ હોય છે. આમ જેવી રીતે જુદા જુદા જળાશયની ઊંડાઈ જુદી જુદી હોય છે તેમ સખાઓ (સમાન શાસ્ત્રનું અધ્યયન કરનાર વિદ્વાનો)ની મનની ગતિ અર્થાત્ બુદ્ધિ પણ જુદી જુદી ઊંચાઈવાળી હોય છે. (૫) ह्रदः શબ્દ √ह्राद् 'અવાજ કરવો' અથવા ह्लाद् 'શીત કરવું' એવા ધાતુમાંથી બન્યો હશે. એટલે કે (क) માણસો જ્યારે જળાશયમાં નાહવા પડે છે ત્યારે તે અવાજ કરે છે માટે ह्रदः કહેવાય છે. અથવા (ख) ગ્રીષ્મ ઋતુમાં પણ જળાશયનું પાણી ઠંડુ હોય છે અને તાજગી અર્પનારું હોય છે તેથી ह्रदः કહેવાય છે. અહીં બન્ને વ્યુત્પત્તિઓમાં અનુક્રમે √ह्राद् अव्यक्ते शब्दे (ધા.૧/૨૬) અને ह्लादी सुखे (ધા: ૧–૨૭) ધાતુઓ કલ્પવામાં આવ્યા છે.

---

24. अथापि समुच्चयार्थे भवति । पर्याया इव त्वदाश्विनम् (कौषी. ब्रा. १७/४) । आश्विनं च पर्यायाश्च इति ॥ अथ ये प्रवृत्ते अर्थे अमिताक्षरेषु ग्रन्थेषु वाक्यपूरणाः आगच्छन्ति पदपूरणास्ते मिताक्षरेषु । अनर्थकाः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कम् ईम् इत् उ इति ॥९॥

"पर्य्याया इव त्वदाश्विनम् (ऋ० प्राति० १२, १०)" – इति । आह, किमुक्तं भवति ? उच्यते, – "आश्विनं च पर्य्यायाश्चेति" – एवं समुच्चयार्थे भवति । "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति" । व्याख्याताः क अपि संग्रहार्थीयाः, तत्प्रसङ्गेन हीत्येवमादयो अन्यार्था अप्युक्ताः । प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान् वक्ष्यामः । तेषां सामान्यमेव तावल्लक्षणमुच्यते । तत्राधिकारार्थोऽयमथशब्दोऽथ ये प्रवृत्ते परिसमाप्ते अर्थे अन्यैरेव वाक्यगतैः पदैरमिताक्षरेषु गद्यग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्त एव मिताक्षरेषु भवन्ति । उभयत्रापि तु ते अनर्थकाः अनर्थान्तरवाचकाः, प्राकृतादर्थात् न किञ्चिदर्थान्तरं द्योतयन्ति । पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरम् । उक्तं च, –

"क्रियावाचकमाख्यातमुपसर्गो विशेषवत् ।
सत्वाभिधायकं नाम, निपातः पादपूरणः ॥" – इति ।

कतमे पुनस्ते ? "कमीमिद्विति" एते चत्वारः । कम्, ईम्, इत्, उ, — इति ॥

आह, — ननु ये प्रवृत्तेऽर्थे इति पदे तदुपदिष्टं लक्षणमत एव विज्ञास्यामो येऽमिताक्षरेषु वाक्येषु पठितास्ते मिताक्षरेषु पदपूरणा भविष्यन्तीति ॥

अथ किमर्थमिते विशेषतः कमीमिदवो निर्दिश्यन्त इति ? उच्यते, – एते हि प्रायेण पदपूरणा एव । अन्ये पुनः इव – न – चिन्वादयो अर्थवन्तोऽप्यर्थासम्भवे सति पदपूरणा भवन्ति, — लक्षणं हि तानपि व्याप्नोति । एते पुनः प्रायेणानर्थका एवेति विशेषतो निर्दिश्यन्ते अथवा ते प्रायेणार्थवन्तः कदाचिदनर्थकाः इत्यतो विशेषतो निर्दिश्यन्ते ॥

आह, – एवमपि च उकारो न निर्देष्टव्यः । किं कारणम् ? स हि पुरस्तान्निर्दिष्ट एव (१अ. २पा. ४खं.) "अथापि पदपूरण इदमुतदु" – इति । उच्यते, सत्यं निर्दिष्टः । प्रासङ्गिकस्तु स तस्य निर्देशोऽयमेवात्रोकारस्य पदपूरणत्वे मुख्यो निर्देशः, स्वप्रकरणत्वात् । तत्र तर्हि अकिञ्चित्कर इति ? न अकिञ्चित्करः । किं कारणम् ? शृणु, – यदि ह्ययमुकारः तत्र पूरणत्वेन नोच्यते, इहैवोच्येत, ततः पूर्वोक्तस्य विनिग्रहार्थीयत्वस्यायमपवाद इति गम्येत । अथापि तत्रैव केवलमस्य पदपूरणत्वमुच्यते, नेह, तथापि पादपूरणेषु परिसंख्यायमानेषु नायमुक्त इति पदसंख्यया पदपूरणत्वमस्य बाध्येत । अनिष्टश्चैतत् । तस्मादुभयत्राप्यधीत इति ॥

आह, – नन्वेवं खलु नूनमित्येतयोः पदपूरणत्वस्य बाधः प्राप्त इति ? उच्यते, – नैवम् । किं कारणम् ? उकारवत्तौ ह्युभावपि । यथैव ह्युकारोऽर्थवांश्चानर्थकश्च, एवं तावपि । तस्मादुकारग्रहणेनापि तावप्यत्र गृहीतौ द्रष्टव्यौ । न केवलमुभावेव, किन्तर्हि ? अन्येऽपि तावन्त एव सन्ति । तद्यथा, – "आ घा तां गच्छानुत्तरा" – इति अत्र घकारः । तेऽपि चात्रावरुद्धा द्रष्टव्याः । उदाहरणमात्रप्रदर्शनार्थं ह्येतावन्त एवोदाहृताः । त एते सर्व एवार्थासम्भवे सत्यनर्थका एव, सम्भवे त्वर्थवन्त इति । किं कारणम् ? – न हि कस्मिंश्चिदर्थे तावत् सम्भवति अनर्थत्वकल्पना न्याय्या शब्दस्य, – अर्थप्रधानो हि शब्दः । स नाकस्मादभिधेयेनार्थेन विना वाक्ये संहन्येत । तस्माद्यावद्गम्यमेव तावदर्थः कल्पनीयः । यत् पुनरेतदुक्तम् – 'वाक्यपूरणाः' इति । अगतिरेषा । तदेतत् सर्वथाप्यर्थासम्भवे सति अगतौ सत्यां भवति । त एते प्रायोवृत्त्या इव नचिन्वादयोऽर्थवन्तः । प्रायोवृत्त्या च कमीमिदवोऽनर्थका इति द्रष्टव्यम् ॥

आह, – ननु आदौ च मध्ये च पूरणानामागमो दृष्टः, तद्यथा – "नूनं सा ते" — इति, अथ कथमुच्यते, – 'ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणाः' — इति ? उच्यते, – न ह्येतदध्ययनकालीनमानुपूर्व्यमक्षराणां पदानां व्याख्याकाले नियतमस्ति, अर्थप्रकाशनार्थनिर्वचनवशेनान्यपदानुपूर्व्यमुपजायते समाख्याकाले । तत्रैवं सत्याख्यातपदम् प्रधानम्, तदनु नाम, तदनूपसर्गाः, तदनु निपाताः, — इत्येतामानुपूर्वीमपेक्ष्यैतदुक्तम् । तत्र ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणा भवन्ति । एतामानुपूर्वीमपेक्ष्य पूर्वमाख्यातलक्षणमुक्तम् तदनु नामलक्षणम् । तस्मादादावपि निपाताः, तन्मध्ये वा अतएव द्रष्टव्यः । लोकेऽपि हि दत्तानुयोगानां ब्राह्मणानामवस्थानक्रमोऽकिञ्चित्कर एव भवति । मध्येऽन्ते वावस्थितो यः प्रधानः, सोऽग्र इत्युच्यते । तस्मात् सम्यगेवोक्तं 'ये प्रवृत्तेऽर्थे — इति ॥ व्यत्ययं चाधिकृत्य श्लोकमप्युदाहरन्ति, —

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि च ।
ब्रह्मणः परिगुप्त्यर्थं वेदे व्यवहितानि च ।" — इति ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

24. (અનુ૦) વળી, त्वत् એવો નિપાત સમુચ્ચય અર્થમાં વપરાય છે. દા.ત., पर्याया इव त्वदाश्विनम् । અર્થાત્ આશ્વિન અને પર્યાય. જ્યાં પૂર્ણ અર્થની પ્રાપ્તિ થતી હોય છે તે અમિતાક્ષર ગ્રંથોમાં વાક્યપૂરણ રૂપે અને મિતાક્ષર ગ્રંથોમાં પદપૂરણ રૂપે જે कम्, ईम्, इत् અને उ નિપાતો આવે છે તે અનર્થક છે. (એટલે કે આ નિપાતોની ગેરહાજરીમાં પણ સંપૂર્ણ વાક્યાર્થની પ્રાપ્તિ થતી હોય છે.)

24. (વિમર્શ) અહીં त्वत् એવો નિપાત ચના અર્થમાં પ્રયોજાયો છે. મૂળ ઉદાહરણમાં 'પર્યાય' શબ્દ પહેલાં આવેલો છે, તે સમજૂતીમાં પાછળ કેવી રીતે જતો રહ્યો તેનું કારણ, પ્રા.રાજવાડે કહે છે કે અજ્ઞાત છે.

ઉપમાર્થક અને કર્મોપસંગ્રહાર્થક નિપાતોની ચર્ચા કર્યા પછી ત્રીજા પ્રકારના એટલે કે "પદપૂરણ" અર્થાત્ પાદપૂરક નિપાતોની ચર્ચાનો આરંભ કરવામાં આવે છે. અમિતાક્ષર ગ્રંથ એટલે ગદ્યગ્રંથ અને મિતાક્ષર ગ્રંથ એટલે પદ્યગ્રંથ. પદ્યગ્રંથ છન્દોબદ્ધ હોઈને તેમાં ચરણ (પાદ), અક્ષર કે માત્રાની ગણતરી હોય છે. તેથી તેમને મિતાક્ષર ગ્રંથ કહ્યા છે. આવા મિતાક્ષર ગ્રંથોની વિરૂદ્ધ, જેમાં પાદ કે અક્ષરની સંખ્યાનું નિયમન હોતું નથી તે અમિતાક્ષર એટલે કે ગદ્યગ્રંથ કહેવાય છે. આ ગદ્ય કે પદ્ય ગ્રંથોમાં પૂર્વોક્ત નિપાતો પ્રકૃતાર્થથી ભિન્ન બીજું કોઈ અર્થાન્તર દ્યોતિત કરતાં નથી. પદ્યમાં પાદની કે ગદ્યમાં વાક્યની પૂર્તિ કરવી એ જ તેમનું પ્રયોજન છે. કહ્યું પણ છે કે –

શબ્દોનો ક્રમ ઊલટ સૂલટ થઈ શકે છે. જેમ કે, रामः वनं गच्छति । ને બદલે गच्छति रामः वनम् । એમ થઈ શકે છે. પરંતુ વેદમન્ત્રોમાં તો શબ્દોનો ક્રમ-વર્ણોની આનુપૂર્વી પૌર્વાપર્ય સુનિશ્ચિત છે. એટલે કૌત્સ કહે છે કે જો વેદમન્ત્રોમાં અર્થ હોત તો લૌકિક વાક્યોની જેમ તેમાં પર્યાય શબ્દોનો પ્રયોગ થઈ શકતો હોત અને શબ્દોનો પૌર્વાપર્ય ક્રમ બદલી શકાતો હોત. પરંતુ વેદમન્ત્રોમાં અર્થ નથી માટે જ તેમાં નિશ્ચિત અભિધાન કે વાક્યાવલિ તથા નિશ્ચિત પદક્રમ = આનુપૂર્વી જોવા મળે છે.

૨. વળી, યજ્ઞાદિમાં પ્રથનક્રિયા વખતે જે મન્ત્રોનો ઉપયોગ કરવામાં આવે છે તેમાં જ પ્રથનક્રિયાનું લિંગ હોય છે. જેમ કે उरु प्रथस्व उरु ते यज्ञपतिः प्रथताम् । અહીં પ્રથનક્રિયાનો સ્પષ્ટ ઉલ્લેખ છે જ, તથાપિ બ્રાહ્મણગ્રન્થો લખે છે प्रथयति । આથી નક્કી થાય છે કે મૂળ મન્ત્રમાં प्रथस्वનો કશો અર્થ નથી, માટે જ બ્રાહ્મણગ્રન્થને प्रथयति લખવાની જરૂર પડી છે.

૩. યજ્ઞાદિ કાર્ય માટે વૃક્ષને કાપવાનું હોય છે, પરંતુ યજમાન વૃક્ષને કાપતાં ડરે છે. આથી તે વૃક્ષની ઉપર દર્ભની સળી મૂકે છે અને એને કહે છે : 'હે ઔષધિ । તું આનું રક્ષણ કરજે' અને જે કુહાડીથી વૃક્ષને કાપવાનું હોય છે તેને કહે છે : 'હે કુહાડી ! તું આની હિંસા ન કરીશ' પરંતુ જે દર્ભની સળી પોતાનું જ રક્ષણ કરવા સમર્થ નથી, તે વૃક્ષને કેવી રીતે બચાવશે ! તથા કુહાડી કાપવા માટે જ પ્રવૃત્ત કરી છે તથાપિ તેને કહેવામાં આવે છે કે તું આ વૃક્ષની હિંસા ન કરીશ ! આમ શબ્દો અને કર્મો પરસ્પર વિરુદ્ધ છે.

---

44. अथापि विप्रतिषिद्धार्थाः भवन्ति । एक एव रुद्रोऽवतस्थे न द्वितीयः । असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् (मैत्रा. सं. २/९/९) । अशत्रुरिन्द्रः जज्ञिषे (ऋ.सं.१०/१३३/२) । शतं सेना अजयत्साकमिन्द्रः (ऋ.सं. १०/१०३/१) इति । अथापि जानन्तं संप्रेषयति । अग्नये समिध्यमानायानुब्रूहि (मैत्रा.सं. १/४/११, मानवश्रौतसूत्रं १/३/१/१) इति । अथाप्याहुरदितिः सर्वमिति । अदितिर्द्यौरदितिरन्तरिक्षम् (ऋ.सं.१/८९/१०) इति । तदुपरिष्टात् व्याख्यास्यामः (निरु. ४/२३) । अथाप्यविस्पष्टार्थाः भवन्ति । अम्यक् यादृश्मिन् जारयायि काणुकेति ॥१५॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम । आह, - कतमः ? इति, उच्यते, - "विप्रतिषिद्धार्था भवन्ति" इति । अन्यस्यान्येन विरूद्धार्थेन प्रतिषेधो विप्रतिषेधः इतरेतरव्याघात इत्यर्थः । तद्यथा, - "एक एव रूद्रोऽवतस्थे न द्वितीयः" "असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् (य.वा.सं. १६,५४)" "अशत्रुरिन्द्र जज्ञिषे (ऋ.सं. ८,७,२१,२)" "शतं सेना अजयत् साकमिन्द्र (ऋ.सं.८,५,२२,१) - इति" । एतान्युदाहरणानि । "एक एव रुद्रोऽवतस्थे न द्वितीयो रणे निघ्नन् पृतनासु शत्रून् । संसृज्य विश्वा भुवनानि गोप्ता प्रत्यङ् जनान् सञ्चुकोचान्तकाले ॥" 'एक एवावतस्थे रूद्रः स्थितवान्, 'रणे रणाय रणार्थम्, 'न' अन्यो द्वितीयः' कश्चिदस्ति । इति रुद्रबहुत्वप्रतिषेधः । कथमवतस्थे ? 'नि' निश्चयेन 'घ्नन्' 'पृतनासु' स्पर्द्धनीयेषु संग्रामेषु 'शत्रून्' । किञ्च, स एकः 'संसृज्य सृष्ट्वा, 'विश्वा' विश्वानि भुवनानि 'गोप्ता' रक्षिता, सृष्ट्वा च सर्गकालानन्तरमेव पालयिता च स्थितिकाले । 'प्रत्यङ्' प्रतिलोम्येन 'जनान्' 'सञ्चुकोच' सङ्कोचयति, 'अन्तकाले' प्रलयकाले । य एवं गुणयुक्तो रुद्रस्तं वयं स्तुभः । "असंख्याता० - भूम्याम् तेषां सहस्रयोजनेऽव धन्वानि तन्मसि" । (य.वा.सं. १६,५४) । एषा शतरुद्रियेऽनुष्टुप् । अनेन चाग्निचयनेऽर्कपर्णेनाजाक्षीरमिश्रा गवेधुकाः सप्तकृत्वो हूयन्ते उत्तरस्यां श्रोणावन्त्यायामिष्टकायाम् । प्रजापतेरार्षम् । 'असंख्याता' असंख्यातानि 'सहस्राणि' बहूनीति यावदुक्तं स्यात्, केषाम् ? 'ये रूद्राः' 'भूम्याम्' 'अधि' उपरि 'तेषां' 'सहस्रयोजने' अध्वनि अवस्थितानामेव 'अव' 'तन्मसि' तनुमः 'धन्वानि' धनूंषि । अप्राप्तानामेवास्मान् प्रतीत्यभिप्रायः । तावदेतानभिघ्नमो यावत्ततानि तानि धनूंषि । "त्वं सिन्धून् अवासृजोऽधराचः अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं ते त्वा परिष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥" (ऋ.सं. ८,७,२१,२) । एतया अतिच्छन्दसा इन्द्रं तुष्टाव सुराः पैजवनः । षोडशिनि शस्त्रे विनियुक्ता । हे 'इन्द्र !' 'त्वम्' 'अवासृजः' 'सिन्धून्' स्यन्दनान् एतान् माध्यमिकान् उदकसंस्त्यायान् । कथं पुनरवासृजः ? 'अधराचः' तानधिगमनान् कृत्वा सर्वानेवावासृजः, नित्यकालम् 'अहन् अहिम्' घ्नन् मेघम् । 'अशत्रुः' अशातयितव्यः 'जज्ञिषे' जायसे नित्यकालं भवसि; तस्मिन् हते मेघे । किञ्च, त्वमेतेन प्रकारेण मेघवधकर्मणा 'विश्वं' सर्वं 'पुष्यसि' पुष्णासि 'वार्यं' वारिभवं व्रीह्यादिकम् । 'तं' 'त्वा' त्वाम् एवङ्गुणसंयुक्तं वयं 'परिष्वजामहे' सर्वतः स्वजामहे । 'नभन्तां' मा भूवन् 'अन्यकेषाम्' अन्येषाम् 'ज्याका' ज्या 'अधिधन्वसु' अधिधनुःषु । किमुतान्ये केचनाभ्युद्यमाना एते स्म द्विषः अवततज्य धनुषो हतसर्वोद्यमाः सन्त्वित्यतस्त्वां परिष्वजामहे इत्यभिप्रायः । "आशुः शिशानः" – इत्येषा अप्रतिरथेन त्रिष्टुबग्निप्रणयने विनियुक्ता । अप्रतिरथस्येन्द्रपुत्रस्यार्षम् । 'आशुः शिशानो वृषभ न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अजयत् साकमिन्द्रः ॥' (ऋ.सं. ८,५,२२,१) ॥ 'आशुः' व्यापकः क्षिप्रो वा, 'शिशानः' शिश्यानः तीक्ष्णकुर्वन् आयुधम्. प्रगृहीतायुधः, 'वृषभो न' 'वृषभ इव पुष्टो योद्धा 'घनाघनः' जहिजहीत्येवं शब्दकारी,' 'क्षोभणः' केषाम् ? 'चर्षणीनाम्' प्रत्यनीकावस्थितानामसुरादीनाम्, 'सङ्क्रन्दनः' समाह्वाता शत्रूणाम्, आहूय च 'अनिमिषः' आदरवान् जयं प्रति, 'एकवीरः' एक एव विक्रान्तः अप्रतिद्वन्द्वः सङ्ग्रामेषु, 'शतं सेनाः' बह्वीः शत्रुसेनाः 'साकम्' अवस्थिताः 'अजयत्' एक इन्द्रो यः, तं वयं स्तुमः । एवमितरेतरप्रतिषिद्धान्येतानि मन्त्रवाक्यानि । यद्येको रुद्रः नासङ्ख्यातानि सहस्राणि, अथासङ्ख्यातानि, नैकः यद्यशत्रुः, कथं शतं सेना अजयत् ? अथ शतं सेना अजयत्, कथमशत्रुः ? लोके हि यान्वेवंलक्षणानि वाक्यानि उन्मत्तादीनाम्, तान्यनर्थकानीति ॥

"अथापि" अयमपरो हेतुर्मन्त्राणामानर्थक्ये । कतमः ? इति, उच्यते, – "जानन्तं सम्प्रेष्यति" अध्वर्युर्होतारम् । कथम् ? 'अग्नये समिध्यमानायानुब्रूहीति "तदु हैक आहुः । अग्नये समिध्यमानाय होतरनुब्रवीति ।" (श.ब्रा. १,३,२,३) । होता हि विधिज्ञ एव भवति, – नह्यविद्वान् विहितोऽस्तीति स विजानात्येवामुष्मिन्नवधावदिं मयानुष्ठातव्यमिति । तदेतद्विज्ञातार्थस्य सतः सम्प्रेषणमनर्थकमेव भवति । यदैतदर्थकमेवमन्येऽपि मन्त्रा इति ।

"अथापि अयमपरो हेतुर्मन्त्राणामानर्थक्ये । आह, – कतमः ? इति, उच्यते, – "आह" मन्त्रनिगमः "अदितिः सर्वमिति" । आह, – किमुदाहरणम् ? 'अदितिर्द्यौरदितिरन्तरिक्षमिति' "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥" (ऋ.सं.१,८९,१०) । "तत्" एतदुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः" । इह त्वेवमर्थमियमुदाहृता, – कथं यैव द्यौः, सा अन्तरिक्षम् ? यैव माता, स एव पुत्रः स एव पितेत्येवमादि किमपि बहुत्र परम्परासम्बद्धमुच्यते ? तदर्थवत्त्वे सत्युपपादयितुमशक्यम् । तस्मादनर्थका मन्त्रा इति ॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह, – कतमः ? इति, उच्यते, – "अविस्पष्टार्थाः" अपि हि केचित् "भवन्ति" । तद्यथा, – "अम्यग्, यादृस्मिन्, जारयायि, काणुका, – इति" एवमादयः । न ह्येषां विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम्, – न च केचिदर्थवन्तः केचिदनर्थका इति न्याय्यमभ्युपगन्तुम्, अर्द्धवैशसं हि स्यात् । तस्मात् सर्व एवानर्थका इति ॥ परिसमाप्तः पूर्वपक्षः ॥

---

44. (અનુ૦) ૪. વેદમન્ત્રો વિપ્રતિષિદ્ધ (પરસ્પર વિરુદ્ધ) અર્થવાળા હોય છે. જેમ કે, (ક) 'એક જ રુદ્ર હતો, બીજો નહીં' અને બીજી તરફ કહ્યું છે : 'પૃથિવી ઉપર અસંખ્ય હજારો રુદ્ર છે.' (ખ) 'શત્રુ વિનાનો ઇન્દ્ર જન્મ્યો' અને બીજી તરફ કહ્યું છે : ઇન્દ્રે સો સેનાઓને એકી સાથે જીતી લીધી.' ૫. જે (હોતા નામનો ઋત્વિજ) જાણે છે તેને (અધ્વર્યુ નામનો ઋત્વિજ) પ્રેરણા આપે છે : 'સળગાવવામાં આવતા અગ્નિને ઉદ્દેશીને મન્ત્ર બોલો.' ૬. (પરસ્પર અસંબદ્ધ હોય) એવા મન્ત્રો જોવા મળે છે : 'અદિતિ બધું જ છે' અને બીજી તરફ કહ્યું હોય : 'અદિતિ જ દ્યૌ છે, અદિતિ જ અન્તરિક્ષ છે' વગેરે. આ મન્ત્રની વ્યાખ્યા આગળ ઉપર કરવામાં આવશે. ૭. વળી, કેટલાક મન્ત્રોના (કે શબ્દોના) અર્થો પણ સ્પષ્ટ હોતા નથી. દા.ત. अम्यग् । यादृश्मिन् । जारयायि । काणुका । વગેરે.

44. (વિમર્શ) 'મન્ત્રો અનર્થક છે' એ મતનો પુરસ્કાર કરવા માટે કૌત્સે જે બીજી કેટલીક દલીલો આપી છે તે અહીં ચારથી સાતમાં સમાવવામાં આવી છે. આ દલીલો અનુવાદથી જ સ્પષ્ટ થઈ જતી હોઈ તેને માટે વિવરણની જરૂર નથી. તથાપિ એક મુદ્દા પરત્વે ધ્યાન આપવું જોઈએ : યાસ્કના સમયની (લગભગ ઈ.સ. પૂર્વે ૫મી-૬ઠ્ઠી સદી) પૂર્વે જ વેદમન્ત્રોના અર્થ છે કે નહીં તે વિવાદાસ્પદ બન્યું છે. વેદમન્ત્રોના અર્થો લગભગ દુર્બોધ બન્યા હોવાને કારણે કૌત્સ જેવા કેટલાક આચાર્યો એમ માનવા પ્રેરાયા છે કે મન્ત્રો અનર્થક છે. બીજું, અતિ પ્રાચીન સમયમાં જ વેદના મન્ત્રો અર્થવાન્ હોવા વિશે તથા વેદોના નિત્યત્વ વિશે શંકાઓ જાગી અને તે શંકાને નિર્મૂળ કરવા માટે જ વ્યાકરણાદિ શાસ્ત્રો અને દર્શનગ્રન્થોનો ભારતમાં વ્યવસ્થિત વિકાસ થયો છે. આમ વેદોની એક યા બીજા સ્વરૂપની રક્ષા અર્થે જ સમગ્ર ભારતીય બુદ્ધિમત્તા યુગો સુધી કાર્યશીલ રહી છે તથા વેદોની નિત્યતા-નિત્યતાની ચર્ચાના મૂળમાં જ બૌદ્ધાદિ (વૈદિકેતર) દર્શનોનો પણ વિકાસ રહેલો છે.

---

45. अर्थवन्तः शब्दसामान्यात् । 'एतद्वै यज्ञस्य समृद्धं यद् रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् (गोपथ बा. २/२/६/२/४/२) 'क्रीळन्तो पुत्रैर्नप्तृभिः' (ऋ.सं. १०/८६/४२) ॥ १. यथो एतन् नियतवाचोयुक्तयो नियतानुपूर्व्याः भवन्तीति । लौकिकेषु अपि एतत् । यथा इन्द्राग्नी पितापुत्राविति । २. यथो एतत् ब्राह्मणेन रूपसंपन्नाः विधीयन्ते इति । उदितानुवादः स भवति ॥ ३. यथो एतद् अनुपपन्नार्थाः भवन्ति इति । आम्नायवचनाद् अहिंसा प्रतीयेत ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

स्वपक्षनिदानं स्थापयिष्यामः तदर्थमिदमारभ्यते. – "अर्थवन्तः शब्दसामान्यात्" इति । अर्थवन्तः एव मन्त्रा इति प्रतिज्ञा । हेतुरुच्यते. – शब्दसामान्यादिति । समान एव हि शब्दो लोके मन्त्रे च । तथा च. य एव गोशब्दो लोके स्वरसंस्कारयुक्तः. स एव मन्त्रेष्वपि । तत्रैवं सति. स एवार्थवान् लोके स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति. असति च विशेषहेतावर्थवन्त एव मन्त्राः शब्दसामान्यादित्युपपद्यते । तत्पुनरेतदुक्तम्. – प्रयोगानियमाल्लोकेऽर्थवत्त्वं प्रयोगानियमाच्च मन्त्राणामानर्थक्यमिति. तत् प्रति वक्ष्याम एतत् लोकेऽपि हि प्रयोगनियमो दृष्टः । तद्यथा. – पितापुत्राविति ॥

किश्चान्यत् – "एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्" । एतदेव हि यज्ञकर्मणः समृद्धम् । तत् किम् ? इति. उच्यते. – 'यद्रूपसमृद्धम्' मन्त्रलिङ्गैरभिधीयते. तदेव हि समस्तवृद्ध्या युक्तं भवति, नेतरत् । एतदेव सुतरां स्पष्टीकरोति. – 'यत् कर्म क्रियमाणमृग्जुर्वाभिवदतीति च ब्राह्मणमिति' । शब्दसामान्याद्‌ब्राह्मणप्रामाण्याच्चेति । च शब्दो ब्राह्मणमपि च मन्त्राणामर्थवत्त्वमेवं दर्शयति । अनर्थका हि सन्तः कथं कर्माभिवदेयुः ? कथं वाऽनभिवदन्तः समर्द्धयेयुः ? अर्थवाचं वाभ्युपगतं भवता ब्राह्मणस्य ? अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते इति अत्र ब्राह्मणेन सिद्धमेवार्थवत्त्वमुक्तं मन्त्राणाम । तदेतदुपदर्शितमस्माभिस्तस्मादर्थवन्त एव मन्त्रा इति ॥१॥

किं पुनः समृद्धरूपत्वे मन्त्राणामुदाहरणम् ? उच्यते. – "क्रीलन्तौ" – इति । "इहैव स्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम् । क्रीलन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥" (ऋ.सं. ८.३.२८.२) । सूर्याया आर्षम् । विवाहे विनियुक्ता । अनुष्टुप् । 'इहैव' 'स्तं' भवन्तं युवां. 'स्वे गृहे' 'मोदमानौ हर्षमाणौ 'मा वियौष्टम्' मा च वियुज्येताम् । 'विश्वं' सर्वम् 'आयुः' व्यश्नुतं क्रीलन्तौ 'पुत्रैः' 'नप्तृभिः' पौत्रैश्च संहत्याशीः । स्थापितमर्थवत्त्वं मन्त्राणाम ॥

अधुना परपक्षे हेतवो निराकर्त्तव्याः. तदर्थमिदमाह. – "यो एतत्" इति । यत् पुनरेतदुक्तम् । "नियतवाचो युक्तयः, नियतानुपूर्व्या भवन्ति इति" । अत्र ब्रूमः. – "लौकिकेष्वपि" ह्यर्थवत्सु शब्देषु नियतवाचो युक्तित्वं नियतानुपूर्व्यत्यश्च दृष्टमेव । "एतद्यथा. – इन्द्राग्नी पितापुत्राविति" च । तत्र. यदुक्तं नियतवाचो युक्तियान्नियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इति । एतदयुक्तम् । लौकिकेष्वपि हि नियतप्रयोगाः सन्तः शब्दाः केचिदर्थवन्तो दृष्टाः. यथेन्द्राग्नी पितापुत्राविति । स एष प्रयोगनियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः । तस्मादर्थवन्त एवेति ॥

"यथो एतत्" यत् पुनरेदुक्तम्. – "ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति" । अत्र ब्रूमः. – "उदितानुवादः स भवति" । न समर्थ आत्मानमेव स्वेन रूपेण विधातुमित्यतो ब्राह्मणेन विधीयते किन्तर्हि आत्मनियोगाश्रयमुक्तमेव सन्तं मन्त्रेणार्थं ब्राह्मणमनुवक्ति विस्तरेण प्रकृतार्थसन्तुष्टया, न ह्यनुक्तं स्तोतुं शक्यते. सोऽयमेवमुदितानुवाद एव भवति. उक्तानुवाद इत्यर्थः । अपि चानेकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति. ते ह्यहम्पूर्विकया एकं प्रयोगं प्रति 'खले कपोत'वत् सम्पतन्ति. तेषां समुच्चये विकल्पे च प्राप्ते सति अभिमत एको नियमार्थं ब्राह्मणेन विधीयते । एवमुभयोरर्थवत्त्वं मन्त्रबाह्मणयोः । तत्र यदुक्तं रूपसम्पन्नविधानान्मन्त्रानर्थक्यम्. मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमिति, एतदयुक्तम् । तस्मादुभयमर्थवत् – मन्त्राश्च ब्राह्मणश्चेति ॥.

"यथो एतत्" यत् पुनरेतदुक्तम् – 'ओषधे त्रायस्वैनम्, स्वधिते मैनं हिंसीः, – इत्यादयः अनुपपन्नार्थाः भवन्ति । अत्र ब्रूमः. ओषध्यधिदेवतोच्यते. हे ओषधे । त्रायस्वैनम्. त्वत्पूर्वको ह्येष वृक्षश्छिद्यमानः सम्यक् छिन्नो भविष्यति, ततश्च यज्ञे विनियुक्तः । प्रतिविशिष्टमुत्कर्षमेतस्याः स्थावरत्वात् प्राप्स्यत इत्येतत् त्राणमभिप्रेत्योक्तमोषधे त्रायस्वैनमिति, न छेदनंप्रतिपत्स्तेऽल्पमित्यनेनाभिप्रायेण । तस्मादुपपन्नार्थ एवायम् । तत्र यदुक्तमनुपपन्नार्था इत्येवमादयो मन्त्रा इति, एतदयुक्तम् ॥

यदपि चोक्तम्,—"स्वधिते मै नं हि सीरित्याह हि सन्निति" । तत्र ब्रूमः,—"आम्नायवचनादहिंसा" एषा "प्रतीयेत" । आह,—कथमहिंसा ? प्रत्यक्षतो हि छिद्यते वृक्षः । शृणु,—इयमहिंसा. इयं हिंसा,—इत्यागमादेतत् प्रतीयते । प्रतिविशिष्टश्चायमेव वैदिक आम्नाय आगमः. एततपूर्वकत्वादन्येषामागमानाम । स एष कृत्स्नस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन् हिंसायां कर्त्तारं विनियोज्यत इति । कुत एतत् पुनरियमहिंसेव ? यतोऽस्मान् नियुनक्ति कर्त्तारम् । तदेतदागमप्रत्यक्षमेव यथेयमहिंसेति । अपि चैतदोषधिवनस्पतिपशुमृगपक्षिसरीसृपाः सम्यगुपयुक्ताः सन्तो यज्ञे परमुत्कर्षं प्राप्नुवन्ति । सोऽयमभ्युदय एव सम्पद्यते, न हिंसा । तत्र. यदुक्तमेनं हिंसीरित्याह हिंसन्निति. न ह्यसौ हिनस्ति । किन्तर्हि ? अनुगृह्णाति यज्ञः विनियोगार्थं विधानतः छिन्दन् । तस्मादुपपन्नार्थमेवमपि । तत्र यदुक्तमनुपपन्नार्थत्वादनर्थका मन्त्रा इति, एतदयुक्तम् ॥

---

45. (અનુ૦) (હવે કૌત્સના મતનું ખંડન કરવામાં આવે છે. પ્રારંભે યાસ્ક 'મન્ત્રો અર્થવાન છે' એવી પ્રતિજ્ઞા કરીને પોતાના મતનું સ્થાપન કરવા માટે પહેલાં બે કારણો રજૂ કરે છે : (ક) શબ્દ સામાન્યને કારણે કહી શકાય કે મન્ત્રો અર્થવાન છે. (ખ) "આ યજ્ઞની સમૃદ્ધિ (પરિપૂર્ણતા) છે કે જે રૂપથી યુક્ત જે કર્મ કરવામાં આવે છે તે ઋગ્વેદના અને યજુર્વેદના મન્ત્રો વડે

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પણ કહેવામાં આવે છે.'' એવું બ્રાહ્મણ વચન પણ છે. દા.ત., (જે સન્તાનોત્પાદન રૂપ કાર્યને માટે વિવાહ કરવામાં આવે છે. તેનું વર્ણન આ મન્ત્રમાં મળે છે :) ''તમે બન્ને (અર્થાત્ પતિપત્ની) પુત્રો અને પૌત્રોની સાથે આનન્દ કરો'' (ऋ. ૧૦/૮૬/૪૨). (હવે પૂર્વપક્ષે કરેલી પૂર્વોક્ત દલીલોનું ક્રમશઃ ખંડન કરવામાં આવે છે : ૧. અગાઉ જે કહ્યું હતું 'यथो एतत' કે 'વેદમન્ત્રો નિશ્ચિત વાક્યાવલિવાળા અને નિયત આનુપૂર્વી (વર્ણોના ચોક્કસ પૂર્વાપર ક્રમથી યુક્ત) હોય છે' તેના જવાબમાં કહેવાનું કે લોકમાં પણ આવું જોવા મળે છે. દા.ત., इन्द्राग्नी । पितापुत्रौ । (અહીં શબ્દોનો ક્રમ સુનિશ્ચિત જ છે, તેમાં ફેરફાર થઈ શકતો નથી. ૨. અગાઉ જે કહ્યું હતું કે બ્રાહ્મણ ગ્રન્થોમાં લિંગયુક્ત વેદમન્ત્રોનું વિધાન કરવામાં આવ્યું છે' તેનો જવાબ એ છે કે આ તો ઉદિત (બોલેલા)નો અનુવાદમાત્ર છે. (અર્થાત્ વેદમન્ત્રમાં જે કહ્યું છે તેનો બ્રાહ્મણ ગ્રન્થો તો માત્ર અનુવાદ કરે છે. (अनु-वाद = ફરી એક વાર બોલી બતાવે છે.) ૩. વળી, જે કહ્યું હતું કે અનુપપન્ન અર્થવાળા મન્ત્રો હોય છે' એના જવાબમાં કહેવાનું કે વેદવચનથી ત્યાં અહિંસાની પ્રતીતિ થશે.

45. (વિમર્શ) 'મન્ત્રો અનર્થક છે' એવા કૌત્સના મતની વિરુદ્ધમાં યાસ્કે જણાવ્યું છે કે મન્ત્રો સાર્થક છે. આ નવી પ્રતિજ્ઞાના સમર્થનમાં તેમણે બે કારણો રજૂ કર્યાં છે. (क) शब्दसामान्यात् । લોકમાં સ્વર અને સંસ્કારથી યુક્ત એવા જે ગા શબ્દ છે, તે જ વેદમાં પણ છે. હવે જો આ શબ્દ લોકમાં અર્થવાન હોય તો તે વેદમન્ત્રોમાં પણ અર્થવાન હોવો જ જોઈએ, કારણ કે શબ્દરૂપે તો તે બન્ને સ્થળે સરખો (સમાન) જ છે. (ख) ब्राह्मणप्रामाण्याच्च (दुर्गः) 'મન્ત્રો સાર્થક છે' એમાં બ્રાહ્મણવચન પણ પ્રમાણ બની શકે છે. જો વેદમન્ત્રો અનર્થક હોત તો જે સંતાનોત્પત્તિ રૂપ કાર્ય માટે વિવાહ કરવામાં આવે છે તેનું (સન્તાનોત્પત્તિનું) વર્ણન વેદમન્ત્રોમાં ન મળતું હોત. પરંતુ આવાં વર્ણનો મળે છે. ઉદા. ત. क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे । (ऋ. ૧૦/૮૬/૪૨) એથી સિદ્ધ થાય છે કે મન્ત્રો સાર્થક છે. હવે (यथो एतत)થી શરૂ થતા વાક્યોમાં કૌત્સના પૂર્વોક્ત મતનું ખંડન શરૂ થાય છે. ૧. પૂર્વપક્ષીએ એવી દલીલ કરી હતી કે લોકમાં જે જે શબ્દો (વાક્યો) સાર્થક છે તેમનો યથેચ્છ ક્રમે પ્રયોગ થઈ શકે છે, પરંતુ વેદના શબ્દો કે વાક્યોનો યથેચ્છક્રમે પ્રયોગ થઈ શકતો નથી. (વેદમાં તો શબ્દપ્રયોગ નિયમિત છે) માટે તે સાર્થક ન હોઈ શકે. આ દલીલને તોડી પાડતાં યાસ્કે જણાવ્યું છે કે આવું (શબ્દપ્રયોગનું નિયમન) તો લોકમાં પણ જોવા મળે છે. દા.ત., इन्द्राग्नी । पितापुत्रौ । આ શબ્દોમાંના પૂર્વપદ અને ઉત્તરપદોનો યથેચ્છ ક્રમે પ્રયોગ થઈ શકતો નથી. (અને છતાંય લોકમાં તે સાર્થક ગણાતા હોય તો વેદના શબ્દોનેય સાર્થક ગણવા જ જોઈએ.) આમ, 'પ્રયોગનિયમનને કારણે મન્ત્રો અનર્થક છે' એવું ઐકાન્તિકપણે કહી શકાતું નથી. ૨. વેદમન્ત્રમાં प्रथस्व એવું સ્પષ્ટ લિંગ હોવા છતાંય, બ્રાહ્મણગ્રન્થમાં જો इति प्रथयति એમ કહ્યું હોય તો તેને માત્ર ઉક્તાનુવાદ જ ગણવો રહ્યો. એટલે કે મન્ત્ર દ્વારા જે કહેવાયું હોય તેને બ્રાહ્મણગ્રંથ વધુ વિસ્તારથી સમજાવવાનો પ્રયત્ન કરે છે એમ કહેવાશે. દુર્ગ વધુમાં જણાવે છે કે એક જ પ્રકરણમાં (યજ્ઞમાં) खलं कपोतवत न्याये સમાનલિંગવાળા અનેક મન્ત્રોના પ્રયોગ કરવાનું પ્રાપ્ત થાય છે ત્યારે ત્યાં પ્રાપ્ત થતા બધાય મન્ત્રો વાપરવા કે વિકલ્પે કોઈ એકાદ મન્ત્રને વાપરવો - એનો નિર્ણય નહીં થઈ શકતો હોવાથી બ્રાહ્મણગ્રન્થ કયા અભિમત એક મન્ત્રને વાપરવો એનું વિધાન કરે છે. આ રીતે વેદમન્ત્રો અને બ્રાહ્મણો એ બન્ને સાર્થક બની રહે છે. અન્યથા 'બ્રાહ્મણગ્રન્થો રૂપસંપન્ન વિધાન કરે છે, તેથી મન્ત્રો અનર્થક છે' અથવા 'મન્ત્રો જો સાર્થક હોય તો બ્રાહ્મણગ્રન્થો અનર્થક છે' એ બેમાંથી એક સ્થિતિ તો માનવી જ પડશે. આ આપત્તિને દૂર કરવા માટે ''મન્ત્રોમાં જે કહ્યું છે તેનો જ બ્રાહ્મણગ્રન્થો અનુવાદ કરે છે'' એમ કહેવું એ જ ઉચિત છે. ૩. યજ્ઞાદિ કાર્ય માટે જે વૃક્ષને કાપવામાં આવે છે તેની ઉપર દર્ભની સળી મૂકીને કહેવામાં આવે છે : 'હે ઔષધિ ! તું આનું રક્ષણ કરજે. પરંતુ કૌત્સ કહે છે - આ મન્ત્ર અનુપપન્ન અર્થવાળો છે. કેમ કે જે દર્ભની સળી (ઔષધિ) પોતાનું જ રક્ષણ કરવા શક્તિમાન નથી તે વૃક્ષનું રક્ષણ કેવી રીતે કરવાની છે ? વળી, વૃક્ષની હિંસા કરવા છતાંય કુહાડીને કહેવામાં આવે છે કે તું વૃક્ષની હિંસા ન કરીશ ! આ દલીલનું ખંડન કરતાં યાસ્ક કહે છે, કે અહીં વૃક્ષ કપાય છે છતાંય વેદવચનના સામર્થ્યથી તે અહિંસા જ ગણાય છે. દુર્ગ આ દલીલને વિશદ કરતાં કહે છે : અહીં ઔષધિ શબ્દથી અધિદેવતા સમજવાની છે ! (વાસ્તવિક રીતે જે બધી વનસ્પતિઓ છે તે દરેકની એક અધિષ્ઠાત્રી દેવતા છે*) આ દેવતા વૃક્ષનું રક્ષણ કરવા શક્તિમાન છે અને એને સંબોધીને જ ઉપર્યુક્ત મન્ત્ર રજૂ થયો છે. આમ માનવાથી મન્ત્ર અનુપપન્ન

(* अपि वा पुरुषविधानामेव सतां कर्मात्मान एते स्युः । (नि. ७/८) અથવા शब्दरूपाः खलु देवताः । એ પક્ષમાં, આપણી આંખે દેખાતા જે સૂર્ય, ચન્દ્ર, અગ્નિ વગેરે પદાર્થો છે તે તો વેદમાં જેની સ્તુતિ કરવામાં આવી છે તે સૂર્ય, ચન્દ્ર, અગ્નિ વગેરે દેવતાઓનાં કાર્ય કરનારાં- કાર્યાત્મક- શરીર છે. એટલે કે આપણી આંખે જે સૂર્ય કે ચન્દ્રમા દેખાય છે, તેનો એક અધિદેવતા છે, જે પુરુષવિધ દેહવાળો છે-અથવા શબ્દરૂપ દેહવાળો છે. આ દેવતાની જ સ્તુતિ થાય છે અને તે જ આપણું રક્ષણ કરે છે. આવી વૈદિક માન્યતા છે. આ માન્યતા રસપ્રદ છે. આધુનિક યુગમાં માનવી ચન્દ્ર ઉપર જઈ આવ્યો છતાંય આ વૈદિક માન્યતા મુજબ તે 'દેવતા' મટી જતો નથી. કેમ કે મૂળ ચન્દ્ર નામની અધિદેવતા તો હજી અનાક્રાન્ત જ છે !)

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

અર્થવાળો થઈ જતો નથી. વળી, આ જે વૃક્ષનું છેદન થવાનું છે તે કપાયા પછી યજ્ઞમાં વપરાવાનું છે અને જે પદાર્થ યજ્ઞમાં વપરાય તેનો અતિવિશિષ્ટ એવો ઉત્કર્ષ થાય છે, તે આ જગત્‌માંથી સ્વર્ગમાં જાય છે. આમ, ભૌતિક દૃષ્ટિએ વૃક્ષની હિંસા થતી હોવા છતાંય આધ્યાત્મિક દૃષ્ટિએ તે અહિંસા જ છે. એને ધ્યાનમાં લઈને કહેવાયું છે કે हे ओषधे । त्रायस्वैनम् । (જુઓ : મન્ત્રબ્રાહ્મણ ૧-૬-૫-૬.) આમ, મન્ત્રો અનુપપન્ન અર્થવાળા છે' એમ ન કહી શકાય.

46. ४. यथो एतद् विप्रतिषिद्धार्थाः भवन्तीति । लौकिकेषु अपि एतत् । यथा असपत्नोऽयं ब्राह्मणः, अनमित्रो राजेति । ५. यथो एतज् जानन्तं संप्रेष्यतीति । जानन्तमभिवादयते । जानते मधुपर्कं प्राह ॥ ६. यथो एतद् अदितिः सर्वमिति । लौकिकेषु अपि एतत् । यथा सर्वरसाः अनुप्राप्ताः पानीयमिति ॥ ७. यथो एतद् अविस्पष्टार्थाः भवन्तीति । नैष स्थाणोरपराधो यदेनमन्धो न पश्यति । पुरुषापराधः स भवति ॥ यथा जानपदीषु विद्यातः पुरुषविशेषो भवति । पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥१६॥

"यथो एतत्" यत् पुनरेतदुक्तम्, – "विप्रतिषिद्धार्था भवन्तीति" । अत्र ब्रूमः – नैष विप्रतिषिद्धोऽर्थः, – "एक एव रुद्रोऽवतस्थे" "असंख्याता सहस्राणि" – इति. – देवता हि महाभाग्ययोगादेकापि सत्यनेकधा भवति, अनेकापि चैकधा, तदुपरिष्टाद् व्याख्यास्यामः "माहाभाग्याद्देवतायाः (दै.का. ७,१, ४)" इत्यत्र ॥

यत् पुनरेतदुक्तम्, – "अशत्रुरिन्द्र जज्ञिषे" "शतं सेना अजयत् साकमिन्द्रः" – इति । अत्र ब्रूमः, – "लौकिकेष्वपि" अर्थवत्सु शब्देषु "एतत्" एवमेवोच्यमानं दृष्टम् । तद् यथा, – असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति" । न हि कश्चिदसपत्नोऽस्ति लोके । उक्तं हि, – 'मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः । उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः' – इति । तथापि स्वल्पसपत्नं दृष्ट्वा केचिदेवं वक्तारो भवन्ति, – 'असपत्नोऽयं ब्राह्मणः' इति । एवमेव कस्मिंश्चिदतिप्रवृद्धे भृशं पातिते मेघेऽन्येषामसारतामभिप्रेत्येदमुक्तं स्यात्, – अशत्रुरिन्द्र जज्ञिषे यस्त्वामेतमेवमतिप्रवृद्धमहन्नहिम् – इति । यत् पुनरेतदुक्तम् – 'शतं सेना अजयत्' – इति । अत्र ब्रूमः, – कुतो हि सेनाः, या इन्द्रो जेष्यति ? – न हि देवानां शत्रवः सन्ति, ये जेतव्या इति । किं कारणम् ? विभवो देवा वशिनः अधिकरणधर्माश्च परेण महिम्ना युक्ताः । आह, – कथन्तर्हि 'शतं सेना अजयत्' इत्येतदुक्तम् ? उच्यते, – रूपकल्पनयैवैषा युद्धप्रवादात् स्तुतिः, वक्ष्यति च "अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (नैग.का. २,५,२.)" – इति तदेतद् भवता न सम्यग् दृश्यते, सम्यगन्विष्यतां देवतातत्त्वं नैरुक्तेभ्यः, ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यते । नैवमवाक्यतत्त्वज्ञेन मन्त्रार्थो विगाहितुं शक्यः । गम्भीरपदार्थो हि वेदः, कथमवभोत्स्यते ? वेदार्थविबाधविभ्रान्ता एव हि प्रवादिनः स्वबुद्धिलाघवमाविर्भावयन्तो, ब्राह्मणाः सन्तः सर्ववर्णसाधारणानि दर्शनान्तराणि प्रतिपेदिरे । यदुक्तं, विप्रतिषिद्धार्थत्वादनर्थका मन्त्रा इति । एतदयुक्तम् । न हीमे विप्रतिषिद्धार्थाः, – भवत एव मतिविभ्रमो मन्दशिक्षितत्वात् । तस्मादर्थवन्त एव मन्त्रा इति ॥

"यथो एतत्" यत् पुनरुक्तम्, – जानन्तं सम्प्रेष्यतीति" । अत्र ब्रूमः, – लौकिकेष्वर्थवत्सु शब्देषु एतदेव स्वाभाव्यं दृष्टम् । "जानन्तम्" गुरुम् "अभिवादयते" स्वगोत्रमभिवदन् । तथा च "जानते मधुपर्कं प्राह" त्रिर्मधुपर्को मधुपर्क इति । तदेतदर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थशब्दसामान्यादर्थवन्तो मन्त्रा इति ।

"यथो एतत्" यत् पुनरेतदुक्तम्, – अथाप्याह "अदितिः सर्वमितिः" । अत्र ब्रूमः, – द्विविधा हि शब्दप्रवृत्तिः, मुख्यार्था गौणी च । तत्रैवं सति यत्र मुख्यासम्भवस्तत्र गौण्याश्रीयते । स एष भक्तिवादोऽदितिः, यथा कश्चिद् ब्रूयात् कश्चिदनेकोपकारे प्रवृत्तम् – 'त्वमेव मे माता, त्वं मे पिता' एवमेतदपि द्रष्टव्यम् । "लौकिकेष्वपि" चार्थवत्सु शब्देषु "एतत्" उच्यमानं दृष्टम्. "यथा, – सर्वरसा अनुप्राप्ताः पानीयमिति" । ततो हि तेषां प्रभव इत्यनया गुणवृत्त्या एवमुच्यते, एवमिहापि गुणवृत्त्या कयाचिददितेः सर्वत्वमुच्यते । यदुक्तमितरेतरविरुद्धं किमपि बह्वत्रेति, एतदयुक्तम् । सर्वमेतदुपपद्यत एव गुणवृत्त्या । तस्मादर्थवन्त एव सर्वमन्त्रा इति ॥

"यथो एतत्" यत् पुनरेतदुक्तम्, – अथापि "अविस्पष्टार्था भवन्तीति" । अत्र ब्रूमः, – "नैष स्थाणोरपराधः" इति । न ह्यत्र स्थाणुरपराध्यति "यदेनं" स्थाणुम् "अन्धो न पश्यति" यदत्रासावभिहन्यते । किन्तर्हि ? "पुरुषापराधः स भवति" पुरुष एवापराधी तत्र, यदसावचक्षुष्मान् । एवमिहापि नैव मन्त्राणामपराधो यदशिक्षितेन भवता न विज्ञायन्ते, भवत एवापराधोऽस्ति, भो भवान् सर्वमात्मीयमपराधं मन्त्रेष्वस्मासु वा संयोजयितुमिच्छति, न तव प्रज्ञास्ति किञ्चित् ॥

"यथा – जानपदीषु" कासुचित् प्रवृत्तिषु इतिकर्तव्यतासु कौशलशिक्षाकृतः "विद्यातः पुरुषविशेषो भवति" । पुरुषाणां

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

विशेषः । एवमिहापि मन्त्रार्थशिक्षाकौशलकृतपुरुषाणां विशेषो भवत्येव । तत्रैवं सति, केचित् पुरुषा येषु विस्पष्टानपि मन्त्रान न शक्नुवन्ति निर्वृक्तुम्, अपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्त्तुम् । तदुक्तम् "उत त्वः (ऋ.सं.८.२.२३.४ । नैघ.का. १,६,३,)" – इत्यत्र ॥

तत्रैवं सति, "पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति" । – इति । य एते पारोवर्य्यविदो ब्राह्मणाः, पारोवर्य्येण विजानन्ति आचार्य्यपरम्परया, ते पारोवर्य्यविदः, न साक्षात्कृतधर्माण इत्यभिप्रायः । तेषां किम् ? तेषां य एव भूयोविद्यो भवति बहुश्रुतः क्वचित् स एव प्रशस्यते । य एव मन्त्रार्थविज्ञाता प्रशस्यो भवति, नेतरो मन्दबुद्धिरशिक्षितः स हि बहुश्रुतो बहुदृष्टत्वादनेकविषये मन्त्रार्थे न क्वचित् प्रतिबध्यते, न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति । तस्माद्धेतोः स त्वं बहु शृणु, ततः सम्यगवभोत्स्यसे मन्त्रार्थान् । तत्र यदवोचः 'अविस्पष्टार्था मन्त्राः' न हि ते अविस्पष्टार्थाः, तांश्चोपरिष्टात् स्पष्टीकृत्य व्याख्यास्यामहे । तवैष मतिं भ्रमयति सम्मोहः । तस्मादर्थवन्त एव मन्त्रा इति सिद्धम् । तस्माच्चेदपि शास्त्रं मन्त्रार्थप्रत्ययायारभ्यमाणमर्थवदेव भवतीति सिद्धः शास्त्रारम्भः । तत्र, यदुक्तं 'यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति' एतदयुक्तम् । इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुत्थिते च कारणे अवस्थिता मन्त्रगणस्य सार्थता, तदर्थमितत् खलु शास्त्रमर्थवदिति ॥२॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य पञ्चमः पादः ॥५॥

---

46. (અનુ૦) ૪. અગાઉ જે કહ્યું હતું કે 'મન્ત્રો પરસ્પર વિરુદ્ધ અર્થવાળા છે, તે પણ યોગ્ય નથી. કેમ કે લોકમાં પણ એવું જોવા મળે છે. દા.ત. 'આ બ્રાહ્મણ પ્રતિસ્પર્ધી વિનાનો છે' અથવા 'આ રાજાનો કોઈ શત્રુ નથી'. (પરંતુ વાસ્તવમાં આવું શક્ય નથી. (કારણ કે मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः । उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः ॥ दुर्गः) (પણ લોકમાં આવાં વાક્યો સાંભળવા મળે જ છે.) ૫. અગાઉ કહ્યું હતું કે 'જે જાણતો હોય છે તેને જ પ્રેરણા આપવામાં આવે છે' તે પણ અયોગ્ય છે. કેમ કે લોકમાં પણ, જે (ગુરુ) જાણતો (ઓળખતો) હોય છે તેને જ (અભિવાદન કરતી વખતે શિષ્ય "હું અમુક પ્રણામ કરું છું" એવું) કહે છે. અથવા તો "આ મધુપર્ક છે" એમ જે જાણતો હોય છે તેને જ ("આ મધુપર્ક છે, તેનો સ્વીકાર કરો" એમ) કહેવામાં આવે છે. ૬. (પરસ્પર અસંબદ્ધ હોય એવા જે મન્ત્રો લાગે છે:) "અદિતિ બધું જ છે" એવા જે (પરસ્પર અસંબદ્ધ લાગતા) મન્ત્રો તરફ ધ્યાન દોર્યું છે, તેના સન્દર્ભમાં જણાવવાનું કે લોકમાં પણ આવાં (પરસ્પર અસંબદ્ધ અર્થવાળાં) વાક્યો જોવા મળે છે. જેમ કે, "આ પીવાના જળમાં બધા જ રસો આવી મળ્યા છે." ૭. છેલ્લે, (કૌત્સે) જે કહ્યું હતું કે (વેદના) કેટલાક શબ્દોના અર્થો સ્પષ્ટ નથી' તેના જવાબમાં (યાસ્ક) કહે છે કે અંધપુરુષને થાંભલો ન દેખાય તો તેમાં થાંભલાનો કશો અપરાધ નથી. એ અંધપુરુષનો જ અપરાધ છે. (અર્થાત્ વેદના જે શબ્દોના અર્થો સ્પષ્ટ ન લાગતા હોય તેમાં તે વ્યક્તિના અજ્ઞાનનો દોષ છે, વેદનો નહીં.) (અહીં કૌત્સના મતનું ખંડન પૂરું થાય છે.) જનપદના અનેક વ્યક્તિઓમાંથી કોઈ એક વ્યક્તિ (થોડીક) વિદ્યાને કારણે જ અલગ પડી જાય છે (મહનીય બને છે.) તેવી રીતે પરંપરાગત રીતે વેદનો અભ્યાસ કરનારાઓમાં વિશાળ જ્ઞાનવાળો (= અર્થ સહિત મન્ત્રોને જાણનાર) જે પુરુષ હોય છે તે પ્રશંસનીય બની રહે છે.)

46. (વિમર્શ) આ રીતે કૌત્સની સાતેય દલીલોનું ખંડન કરીને યાસ્કે 'મન્ત્રો અર્થવાન છે' એ મતનું પ્રસ્થાપન કર્યું છે. [મન્ત્રો સાર્થક છે કે અનર્થક ? એ અંગે કૌત્સની અને બીજા નાસ્તિકોની દલીલો પૂર્વમીમાંસા ૧/૨/૩૧-૫૩માં પણ સંગ્રહવામાં આવી છે. શબરે તેના ભાષ્યમાં આ બધી દલીલો સમજાવી છે અને લખ્યું છે: विद्यमानोऽप्यर्थः प्रमादालस्यादिभिः नोपलभ्यते । निगमनिरुक्तव्याकरणवशेन धातुतः अर्थः कल्पयितव्यः ॥ અહીં નિરુક્તની ઉપર્યુક્ત ચર્ચાનો સ્પષ્ટ ઉલ્લેખ જોવા મળે છે.] આમ જો મન્ત્રો અર્થવાન હોય તો નિરુક્તાધ્યયનનું પ્રથમ પ્રયોજન પણ આપોઆપ સિદ્ધ થઈ જાય છે. 'નિરુક્તના જ્ઞાન સિવાય મન્ત્રોનો અર્થ જાણી શકાતો નથી' એવા પ્રથમ પ્રયોજનને અગાઉ રજૂ કરવામાં આવ્યું હતું, પરંતુ ત્યાં પ્રાસંગિક રૂપે કૌત્સનો મત ઉદ્ધૃત કરીને યાસ્કે પહેલાં તેનું ખંડન કર્યું અને હવે નિરુક્તાધ્યયનના દ્વિતીય પ્રયોજનની ચર્ચા હાથ ધરે છે.

षष्ठः पादः

47. अथापीदमन्तरेण पदविभागो न विद्यते । १. 'अवसाय पद्वते रुद्र मृळ' (ऋ.सं. १०/१६९/१) इति । पद्वदवसम् । गावः पथ्यदनम् अवतेर्गत्यर्थस्य । असो नामकरणः तस्मान्नावगृह्णन्ति । 'अवसायाश्वान्' (ऋ.सं. १/१०४/१) इति । स्यतिः उपसृष्टो विमोचने । तस्मादवगृह्णन्ति ॥ २. 'दूतो निर्ऋत्या इदमा जगाम' (ऋ.सं. १०/१६५/१) इति । पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वा । आःकारान्तम् । 'परो निर्ऋत्या आ चक्ष्व' (ऋ.सं. १०/१६४/१) इति । चतुर्थ्यर्थप्रेक्षा, ऐकारान्तम् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अथापीदमन्तरेण पदविभागो न विद्यते" । शास्त्रारम्भप्रयोजनाधिकारे वर्त्तमाने अपीदमन्तरेण मन्त्रेष्वर्थावधारणं नास्तीत्युक्ते यदि मन्त्रेत्यादिनानर्थक्यहेतुभिर्बहुभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य कौत्सेन, मन्त्राणावर्थवत्तां स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः । तेषु स्थितमर्थवत्त्वं मन्त्राणाम् । तेषामर्थ-निर्वचनायेदमारभ्यमाणमर्थवदित्युपपन्नमर्थवत्त्वं निरुक्तशास्त्रस्य । तदेतत सर्वमपि चोदकशास्त्रकारव्याजेन प्रसक्तानुप्रसक्तमुक्तं प्रज्ञाया विवृद्ध्यै शिष्यस्य । कथन्नामा सा विवृद्धप्रज्ञा ? शब्दार्थन्यायसङ्करेषु हेतुसमयानभिज्ञः परैः प्रतिबध्यमानोऽपि पदार्थान वाक्यार्थांश्चासम्मोहेन निर्ब्रूयादिति । एवन्तावत्, एतदन्तरेण मन्त्रार्थप्रत्ययो नास्ति । अथेदमपरमारम्भप्रयोजनमित्येवं विशेषाधिकारार्थोऽयमथशब्द । अपि मन्त्रार्थप्रत्यय इदमन्तरेण नास्ति, नाप्यस्ति यदिदं वक्ष्यमाणम्, इत्यपिशब्दः एवं सम्भावने ।

आह, – किम्पुनस्तद् वक्ष्यमाणम ? इति, उच्यते, – 'पदविभागः' । 'एवं पदानि वक्तव्यानि' – इत्येतद् विभागपरिज्ञानं नास्तीत्यर्थः । किं कारणम् ? अर्थवशेन हि पदान्यवतिष्ठन्ते, न चेदमन्तरेणार्थपरिज्ञानमस्ति । तस्मादत एव पदविभागप्रसिद्धिरिति । इदमर्थवत्त्वं मन्त्राणामन्तरेण पदविभागोऽप्यकिञ्चित्करः । प्रसिद्धश्चैष सर्वशाखासु । तस्मात् पदविभागार्थवत्त्वाय चार्थवन्तो मन्त्रा इति केचिद् वर्णयन्ति ॥

एवं प्रतिज्ञाय समानसंहितेषु ग्रन्थेष्वर्थहेतुकं पदविभागविशेषं दर्शयति, तद्यथा – "अवसाय पद्वते रुद्रमृलेति" । "पद्वत" पादवत् पादसंयुक्तम् । "अवसं गाव पथ्यदनम्" इति निगमप्रसक्तस्य पर्य्यायवचनम् । "अवतेर्गत्यर्थस्यासौ नामकरणः" प्रत्ययः । "तस्मात्" असमासत्वादस्य "नावगृह्णन्ति" एतत्पदकारा इति शेषः । "मयोभूर्वातो अभिवातूस्रा ऊर्जस्वतीरोषधीरारिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृल ॥ (ऋ.सं.८.८,२७,१) ॥ सुचरो नाम गौतमः स मयोभूरित्यस्यास्त्रिष्टुभः पूर्वैस्त्रिभिः पादैः गवामाशिषमाशास्योत्तमेन तासामेव च रुद्रात् सुखमयाचत । गवामुपस्थाने विनियुक्ता । 'मयोभूः' मयोभावयिता पाश्चात्यः 'वातः', एताः 'उस्राः' 'अभिवातु' आभिमुख्येन वातु । किञ्च, तेन सुखभुवा वातेनानुद्वेजनीयेन स्पृश्यमानाः 'ऊर्जस्वतीः' प्रभूतरसाः 'ओषधीः' 'आरिशन्ताम्' आस्वादयन्तु । आस्वाद्यास्वाद्य च सलवणस्वादमात्माभिप्रेते काले उदकं 'पिबन्तु' । तच्च पीतमोषधिसहितमासां तथा कोष्ठे विपच्यतां रसशोणितमांसमेदोमज्जाऽस्थिक्रमेण यथैताः पीवस्वत्यो भवेयुः । 'पीवस्वतीः' पीवगुणयुक्ताः स्थूला बलवत्यो बहुपयस्काः सति च बहुपयस्त्वे 'जीवधन्याः' जीवधनिन्यो रोगदुष्टमातृकाः । हे 'रुद्र !' वयम् एतासां गवाम् एताम आशिषम आशास्महे । त्वमप्यस्मै गोलक्षणाय 'पद्वते' 'अवसाय' पथ्यदनाय 'मृल' सुखीभव । मैनां हिंसीस्त्वमासामीश्वर इत्यभिप्रायः ॥

"अवसायाश्वानिति" । इदमपरमुदाहरणम । अस्मिन् पूर्वेण रूपेण सरूपमेव पदमर्थकृताद् विशेषादवगृह्णाति । द्वयोः पदयोः बहूनां वा पदविच्छेदेनोच्चारणं स समासः । तयोरेवार्थविभागोपदर्शनार्थमवच्छेदेन ग्रहणमवग्रहः । तदेतदवगृह्यते पदम – "स्यतिः" दातुः "विमोचने" अर्थे वर्त्तते, स पुनः "उपसृष्टः" उपसर्गेणावेत्यनेनोपसृष्टः संयुक्त इत्यर्थः । यतो धातूपसर्गविभागोपप्रदर्शनार्थमेव तत पदमवगृह्यते अवसायेत्येतत् । "योनिष्ट इन्द्र निषदे अकारि तमा निषीद स्वानो नार्वा । विमुच्या वयोऽवसायाश्वान् दोषा वस्तोर्वहीयसः प्रपित्वे ॥ (ऋ.सं.१,७,१८,१) ! एतया त्रिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टाव । "योनिस्ते" । हे 'इन्द्र' ! 'योनिः' स्थानं 'ते' तव यदिदं 'निषदे' निषदनाय, मया 'अकारि' कृतम्, 'तं' योनिं तत स्थानम् 'आ निषीद' एत्य निश्चयेन सीद । कथं पुनर्निषीद ? 'स्वानो न' स्वन्यमान इव 'अर्वा' अश्वः । संशब्द्यमान इवाश्वबन्धेनाश्वः स यथा स्वे स्थाने निषीदेदेवं मया त्वमपि शब्द्यमानस्तुतिभिरेतस्मिन् मया संस्कृते स्वास्तीर्णे बर्हिर्षि स्थाने निषीद । कथम्पुनर्निषीद ? 'विमुच्य' एतान 'वयः अश्वान' । कुतः ? रथात् । पुनरपि च एतान् 'अवसाय' वियोज्य रश्मिभ्योऽश्वान् लब्धोदकयवसान् कृत्वा 'दोषावस्तोर्वहीयसः' अहनि च रात्रौ च ये केचिद् वहन्ति, तेभ्योऽपि वहीयसः शीघ्रतमेन जवेन वोढृतमान्, ततस्त्वं स्वस्थो भूत्वा निषीद । एतस्मिन् योनौ एतस्मिन् संस्कृते वर्हिषि 'प्रपित्वे' प्राप्ते अस्माकं त्वद्यजनकाले मा नो विघ्नं कार्षीरित्यभिप्रायः ॥ एवन्तावदिदमवगृह्यमिदमनवगृह्यमित्यर्थपरिज्ञानद्वारेण "तस्मात्" एतन्निरुक्तशास्त्रात् विज्ञायते ॥

यान्यपि च खल्वनवगृह्याणि पदानि समानसंहितानि, तेषामप्यर्थकृतमेव विभागवैशेष्यं भवति । तद्यथा, – "दूता निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा" अस्मिन् पदे पञ्चम्यर्थदर्शनं वेत्यर्थः, पञ्चम्यर्थोऽत्र दृश्यते ? "षष्ठ्यर्थप्रेक्षा वा" षष्ठ्यर्थदर्शनं वेत्यर्थः, षष्ठ्यर्थोऽत्र दृश्यते ? अत एतत "आःकारान्तम्" पदं निर्ऋत्या इति । "देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम । तस्मा अर्च्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥" (ऋ.सं. ८,८,२३,१) । प्रचेता नामाङ्गिरसः तेनेयं कपोतसूक्तं दृष्टा । कपोतनिलयनशान्त्यै कपोतपदहरण एतत सूक्तम् । त्रिष्टुवेषा । हे 'देवाः ।' 'कपोतः' 'इषितः' प्रेषितः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

'निर्ऋत्याः स्वभूतः तयैवानुप्रेपित इत्येवं षष्ठ्यर्थः । अथवा निर्ऋत्याः सकाशादित्येवं पञ्चम्यर्थः । 'यत्' कर्तुम् 'इच्छन्' 'इदम्' अस्मद्गृहम् 'आजगाम' । यस्य नः पापस्य च पापकर्मणो जन्मान्तरकृतस्य एतत् कपोतगृहनिलयनं यत्पददर्शनं च कुड्यादिषु विपाकलिङ्गम् । 'तस्मै' कर्मणे तदर्थं युष्मानेव 'अर्च्चाम' । समर्था यूयमेतत् पापकर्म विपच्यमानमस्माकमपहर्त्तुमृजु विपाकं वा कर्त्तुं वयमपि च तस्मै पापकर्मणे 'कृणवाम' 'निष्कृतिम्' निष्क्रमणं निर्णेजनम्, तपसा एतद्भूतानुरूपेण । यतो ब्रूमः, – 'शं नः' सुखं नः 'अस्तु' 'द्विपदे चतुष्पदे' युष्मत्प्रसादेन च स्वेन तपसेत्यभिप्रायः ॥

"परो निर्ऋत्या आचक्ष्वेति" । एतस्मिन् पदे "चतुर्थ्यर्थप्रेक्षा" चतुर्थ्यर्थदर्शनम् । अत एतत् पदम् "ऐकारान्तम्" । "अपेहि मनसस्पतेऽपक्राम परश्चर । परो निर्ऋत्या आचक्ष्व बहुधा जीवतो मनः ॥" (ऋ.सं. ८.८.२२.१) । प्रचेता नाम आङ्गिरस एतामनुष्टुभमपश्यत् । दुःस्वप्नदर्शने विनियुक्ता । मन इति विज्ञानमुच्यते, बुद्ध्यादिः, तस्य पतिः मनसस्पतिरात्मा, इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः । उभावपि स्वकृतकर्मापेक्षया प्राणिनां बुद्ध्यादिविज्ञानोपसंहारस्येशाते । तयोरन्यतरः सम्बोध्यते, – हे 'मनसस्पते ।' 'अपेहि' अपगच्छ । अस्मत्तो गत्वा च त्वमीपदपगम्य अस्मत्तः, समीप एव मा स्था अस्माकम् । किन्तर्हि ? 'अपक्राम' दूरमपेत्य क्राम, अपक्रम्य च 'परः' परतः, अन्यत्रास्मत्तः 'चर' अपुनरावर्त्तमानोऽस्मान् प्रति । किञ्च 'परः' परागत्य यस्याः त्वं दूतः निर्ऋत्याः, तस्यै 'निर्ऋत्यै' 'आचक्ष्व' । किमिति ? 'बहुधा जीवतो मनः' । अथवा 'परः' प्रकृष्टम् आप्तस्त्वं तस्याः निर्ऋत्याः' दूतो मां प्राप्तः । अविज्ञातमरणकाल एवाति सम्मोहितो ब्रवीमि । तस्यै 'निर्ऋत्यै गत्वा 'बहुधा' अनेकप्रकारम् 'आचक्ष्व' कथय । 'जीवतः' यादृशं मनः भवति, तादृशं मम 'मनः' बुद्ध्यादिकरणज्ञानदिनकरकिरणस्पष्टवृत्तित्वेन तावत् स मुमूर्षुरित्येतदाचक्ष्व । मुमूर्षोर्हि उपक्षीणकर्मणा नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति, न च मम तथेत्यभिप्रायः ॥ एवं समानसंहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यम् । स चार्थ इदमन्तरेण न विज्ञायते । अत इदमुक्तम्, – 'अथापीदमन्तरेण पदविभागो न विद्यते' इति ॥

---

47. (અનુ૦) (ख) (પહેલા વાક્યનો અનુવાદ બે રીતે થઈ શકે છે:) આના (નિરુક્તના અધ્યયન) વિના મન્ત્રોનો પદ વિભાગ પણ જાણી શકાતો નથી. અથવા આના (મન્ત્રોના સાર્થક હોયા) વિના પદવિભાગ પણ નિરર્થક છે. દા.ત., ૧. "હે રુદ્ર ! પગવાળા ભોજનનું કલ્યાણ કરો." આ મન્ત્રમાં અવસાય અને પદ્વતે એ બે ચતુર્થ્યન્ત પદોમાં મૂળ શબ્દ) પદ્વત્ અને અવસમ છે. 'પગવાળું ભોજન' એટલે ગાયો. કેમ કે તે (ગાયોનાં પગલાં) માર્ગનું ભોજન છે. અહીં અવસાય > અવસમ શબ્દમાં ગત્યર્થક √अव ધાતુને अस એવો પ્રત્યય (નામકરણ = પ્રત્યય) લગાડવામાં આવ્યો છે. માટે (મન્ત્રોનો પદપાઠ તૈયાર કરનારા) તે (અવસાય) શબ્દને અવગ્રહથી છૂટો પાડતા નથી. પરંતુ "(રથની સાથે જોડેલા) ઘોડાઓને છોડી નાખીને.." એ મન્ત્રમાં છોડી નાખવું એ અર્થવાળા √सो ધાતુને अव એવો ઉપસર્ગ લગાડવામાં આવ્યો છે માટે (પદકારો) તે શબ્દને (अवऽसाय એવી રીતે) અવગ્રહથી છૂટો પાડે છે. ૨. "નિર્ઋતિથી (નરકમાંથી) અથવા નિર્ઋતિનો (મૃત્યુનો) દૂત આ આવી પહોંચ્યો." અહીં પંચમ્યન્ત કે ષષ્ઠયન્ત પદની નિશાની રૂપે આઃકારાન્ત પદ (પદપાઠમાં) દર્શાવવું પડે છે. (નિર્ઋતિ) શબ્દનું પંચમી એકવચનમાં અને ષષ્ઠી એકવચનમાં निर्ऋत्याः એવું એકસરખું રૂપ થાય છે. મન્ત્રમાં निर्ऋत्याःની પાછળ इदम्નો इकार આવેલો હોઈ વિસર્ગનો લોપ થયો છે, પણ પદપાઠમાં આ રૂપ પંચમીનું છે કે ષષ્ઠીનું એ સ્પષ્ટ કરવા માટે તેને આઃકારાન્ત રૂપે અર્થાત્ વિસર્ગ સાથે નોંધવું પડે છે.) એ જ પ્રમાણે, "પાછું જાય" એમ 'નિર્ઋતિને કહો' આ મન્ત્રમાં (સન્ધિના નિયમોને કારણે ઐકારનો લોપ થયો છે, પણ પદપાઠમાં તે) ચતુર્થી એકવચનનું રૂપ છે એમ દર્શાવવા માટે निर्ऋत्यै એવું ઐકારાન્ત રૂપ નોંધવું પડે છે. (આમ, નિરુક્તના અધ્યયન વિના અને/અથવા મન્ત્રોના અર્થ જાણ્યા વિના મન્ત્રોના પદવિભાગને જાણી શકાતો નથી.)

47: (વિમર્શ) હવે પછીની ચર્ચામાં નિરુક્તાધ્યયનના નવા પ્રયોજનનો પ્રારંભ થાય છે એવું સૂચવવા માટે अथापीदमन्तरेण पदविभागो न विद्यते । આ વાક્યમાં अथ શબ્દનો પ્રયોગ કરવામાં આવ્યો છે. આ દષ્ટિએ આ વાક્યનો એક અર્થ એવો થાય છે કે આ નિરુક્તના અધ્યયન વિના મન્ત્રોનો પદવિભાગ જાણી શકાતો નથી. આ અર્થ સુવિદિત છે, પરંતુ દુર્ગ નોંધે છે એ મુજબ અર્થને આધારે જ પદોને છૂટા પાડી શકાય છે. માટે મન્ત્રોના અર્થ જાણ્યા વિના પદવિભાગ પણ અનર્થક બની જાય છે, અશક્ય બની જાય છે. આવો એક બીજો અર્થ પણ કરવામાં આવ્યો છે.

સંહિતા એટલે સન્ધિ. મન્ત્રોમાં આવેલા શબ્દો (વિભક્ત્યન્ત પદો) સન્ધિના નિયમોથી જોડીને મૂકવામાં આવ્યા છે. આથી મન્ત્રોને 'સંહિતા' કહેવામાં આવે છે તથા પદવિભાગ કરવો એટલે સંહિતામાંથી પદોને છૂટા પાડવા. મન્ત્રોમાં વપરાયેલા શબ્દોને પરસ્પરથી છૂટા પાડવામાં નિરુક્ત આપણને મદદ કરે છે.

જેવી રીતે નિરુક્તાધ્યયનના પહેલા પ્રયોજનની ચર્ચા કરતી વખતે યાસ્કે પ્રાસંગિક રૂપે કૌત્સના મતની સમીક્ષા કરી છે તેવી રીતે, હવે પછીની ચર્ચામાં મન્ત્રોના પદવિભાગની સાથે 'સંહિતા' એટલે શું ? એવો પ્રશ્ન સંકળાયેલો હોઈ પ્રાસંગિક રૂપે સંહિતાની પણ વ્યાખ્યા કરવામાં આવે છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

48. परः संनिकर्षः संहिता । पदप्रकृतिः संहिता (ऋक्प्राति. २/१) । पदप्रकृतीनि सर्वचरणानां पार्षदानि ॥

पदविभागप्रसक्तमधुना संहितालक्षणमाह, – "परः सन्निकर्षः संहिता (पा. १,४,१०९)" – इति । परः प्रकृष्टो यः सन्निकर्षः संश्लेषः, परस्परेण स्वराणां स्वराधिरूढाणाश्च व्यञ्जनानां सा संहितेत्युच्यते । सा च पुनरियं "पदप्रकृतिः संहिता (ऋ. प्राति, २,१)" । अत्र द्विविधा वर्णयन्ति । पदानां या प्रकृतिः, सेयं पदप्रकृतिः संहिता । किं कारणम् ? संहितातो हि पदानि प्रक्रियन्ते, तस्मात् संहितैव प्रकृतिः, विकारः पदानीत्येवमेके मन्यन्ते । अपरे पुनः पदप्रकृतिः संहितेति पदानि प्रकृतिर्यस्याः सेयं पदप्रकृतिरिति । किं कारणम् ? पदान्येव हि संहत्यमानानि संहिता भवति, तस्मात् पदान्येव प्रकृतिः, विकारः संहितेति ॥

एवञ्च कृत्वा "पदप्रकृतीनि सर्वचरणानां पार्षदानि" । सर्वेषां चरणानां सर्वशाखान्तराणामित्यर्थः । किम् ? पार्षदानि, स्वचरणपर्षदैव यैः प्रतिशाखानियतमेव पदावग्रहप्रगृह्यक्रमसंहितास्वरलक्षणमुच्यते । तानीमानि "पार्षदानि" प्रातिशाख्यानीत्यर्थः । आह, – किं तेषाम् ? इति । उच्यते, – तानि पदप्रकृतीनि । पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते, तानीमानि पदप्रकृतीनि । तेषामपि स एव समय इत्यभिप्रायः ।

आह, – किम्पुनरत्र साधीयः, – पदानां प्रकृतित्वम्, संहिताया विकारत्वम् ? उत वा विकारत्वं पदानाम्, प्रकृतित्वं संहितायाः ? इति । उच्यते, संहितायाः प्रकृतित्वं ज्यायः । आह, – किं कारणम् ? उच्यते, – मन्त्रोऽह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते, न पदैः, अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणाः, अधीयते चाध्येतारः, पदैरेव विन्ययोक्ष्यन्त मन्त्राः कर्मसु । न त्वेतत् सर्वमस्ति । तस्मादेतैर्विशेषहेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः समयमात्रमितरत् स्वशास्त्रनियतमेव । यदुक्तं पदप्रकृतीनि सर्वचरणानां पार्षदानि, तेष्वेव हि व्याख्यायमानेषु पदानां प्रकृतित्वं भवति, न सर्वत्रैव । तस्मात् संहितैव प्रकृतिरित्येतदसाधीय इति ।

48. (અનુ૦) (વર્ણોના) અતિશય સાંનિધ્યને 'સંહિતા' કહે છે. આવી સંહિતા "પદોની પ્રકૃતિ છે" (ષષ્ઠી તત્પુરુષ) અથવા "પદો છે પ્રકૃતિ જેની" એવી સંહિતા છે (બહુવ્રીહિ). વેદની બધી જ શાખાઓનાં પાર્ષદો–પ્રાતિશાખ્યો પદપ્રકૃતિવાળાં છે.

48. (વિમર્શ) परः सन्निकर्षः संहिता । એવી સંહિતાની વ્યાખ્યા છે. પાણિનિએ પણ તેને સૂત્ર રૂપે રજૂ કરેલ છે : અષ્ટાધ્યાયી (૧/૪/૧૦૯). સંહિતા એટલે સન્ધિ. આ વ્યાખ્યાને સમજાવતાં દુર્ગ કહે છે કે परः सन्निकर्षः = उत्कृष्टः संश्लेषः ॥ અર્થાત્ સ્વરો અને સ્વરાધિરૂઢ વ્યંજનોનો પરસ્પર અતિશય સંશ્લેષ (સાંનિધ્ય) તેને સંહિતા કહે છે. આ સંહિતા બે પ્રકારે વર્ણવવામાં આવી છે : पदानां प्रकृतिः संहिता (षष्ठी तत्पुरुष), अथ वा पदानि प्रकृतिः यस्याः सा संहिता (बहुव्रीहिः) । પહેલી રીતે જોઈએ તો સંહિતામાંથી પદોને પૃથક્ કરવામાં આવે છે, માટે સંહિતા જ પ્રકૃતિ (મૂળ) છે અને પદો એ વિકાર છે. આ અર્થ કરવા માટે પદપ્રકૃતિ શબ્દને ષષ્ઠી તત્પુરુષ સમાસ સમજવામાં આવે છે. બીજી રીતે જોઈએ તો 'પદો જેની પ્રકૃતિ છે એવી સંહિતા' છે અર્થાત્ પદો જ પ્રકૃતિ (મૂળ) છે અને સંહિતા વિકાર છે, (કેમ કે પદોને ભેગાં કરવાથી જ સંહિતા બને છે.) આ અર્થ કરવા માટે પદપ્રકૃતિ શબ્દને બહુવ્રીહિ સમાસ માનવામાં આવે છે. વેદની બધી શાખાઓનાં પાર્ષદો પણ (બહુવ્રીહિ સમાસની દૃષ્ટિએ) પદને જ સંહિતાની પ્રકૃતિ (મૂળ) માનીને ચાલે છે.. પાર્ષદ શબ્દને સમજાવતાં દુર્ગ લખે છે : स्वचरण–परिषदि एव यैः प्रतिशाखानियतम् एव पद-अवग्रह-प्रगृह्य-अवगृह्य-क्रम-संहिता-स्वरलक्षणम् उच्यते तानि इमानि पार्षदानि । प्रातिशाख्यानि इत्यर्थः ॥ પ્રા. રાજવાડે પ્રશ્ન કરે છે : શું પારિષદનું વિકૃત રૂપ પાર્ષદ હશે ? ઋગ્વેદના મન્ત્રોનો અર્થ કરતાં પહેલાં કોઈ પણ વ્યક્તિએ જે તે મન્ત્રના અંશોને–પદોને જાણવા પડે છે અને પદોનું જ્ઞાન નિરુક્ત વિના થતું નથી.

ઉપર જોયું તેમ पदप्रकृतिः संहिता । એવી વ્યાખ્યામાંનો पदप्रकृतिः શબ્દ સામાસિક છે; અને તેનું વ્યાકરણની દૃષ્ટિએ બન્ને રીતે અર્થઘટન કરવું શક્ય છે, તેથી "વેદમન્ત્રોના દ્વિવિધ પાઠો- સંહિતાપાઠ અને પદપાઠમાંથી કયો પાઠ આદ્ય હશે ?" – એ મુદ્દો વિવાદાસ્પદ રહ્યો છે. ભર્તૃહરિએ પણ 'વાક્યપદીય'માં લખ્યું છે કે पदानां संहिता योनिः, संहिता वा पदाश्रया ॥ ભારતીય માન્યતા મુજબ સંભવતઃ સંહિતાપાઠ જ પહેલવહેલો ઋષિમુનિઓને ઉપલબ્ધ થયો હશે અને તેમણે વેદમન્ત્રોનું રક્ષણ કરવાના અને/અથવા વેદમન્ત્રોનું અર્થઘટન કરવાના આશયથી તે વેદમન્ત્રોનો પદપાઠ ઊભો કર્યો હશે. બીજી તરફ, કેટલાક આધુનિક વિદ્વાનો એવું પણ માને છે કે ઋષિમુનિઓએ સૌથી પહેલાં મન્ત્રોનો પદપાઠ જ તૈયાર કર્યો હશે. (એટલે કે સન્ધિ સિવાયનાં સ્વતન્ત્ર પદો રૂપે જ મંત્રો લખ્યા હશે, કેમ કે મન્ત્રોના પદપાઠમાં જ છંદોબંધારણ જળવાયેલું હોય એમ જણાય છે.*

* જુઓ: Summaries of Papers of the AIOC, XVIII, p.6 XX. pp.3-10; XXI. pp.1-2માં ફાધર એસ્ટ્રેલરનાં મંતવ્યો. અલબત્ત, પ્રોફે. કે. વી. અભ્યંકરે તેમનો પ્રતિવાદ પણ કર્યો છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

49. अथापि याज्ञे दैवतेन बहवः प्रदेशाः भवन्ति । तदेतेनोपेक्षितव्यम् । ते चेद् ब्रूयुः लिङ्गज्ञाः अत्र स्मः इति । 'इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति' (ऋ.सं. ६/४/७) इति । वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे । 'अग्निरिव मन्यो त्विषितः सहस्व (ऋ.सं. १०/८४/२) इति । तथाग्निर्मान्यवे मन्त्रे । त्विषितः ज्वलितः । त्विषिरित्यप्यस्य दीप्तिनाम भवति ॥

"अथापि याज्ञे दैवते न बहवः प्रदेशा भवन्ति" । अथेदमपरमारम्भप्रयोजनमस्य शास्त्रस्येत्येवं विशेषाधिकारार्थोऽयमथशब्दः । अपीदं वक्ष्यमाणमपि यान्युक्तानीत्येवमपिशब्दः सम्भावने । आह, – किम्पुनस्तत् ? इति । उच्यते, – यज्ञे कर्मणि प्रवर्त्तमाने दैवतेन बहवः प्रदेशा भवन्ति, दैवतेन लिङ्गेन बहवो विधिषु देशा भवन्ति । तद्यथा, – उपतिष्ठते व्युच्छन्त्यान्मैन्द्र्यासदः, आग्नेय्याग्नीध्रैष्णव्या हविर्द्धानमित्येवमादि । न्यायविदः खल्वपि याज्ञिकाः पठन्ति, – लिङ्गतो मन्त्राणां शेषभावमधिकृत्य, लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानमित्यधिकारे, – एवञ्च मन्त्रविधेरेतदाख्येयेषु शिष्टत्वादिति चैवमादि ।

तत्रैवं सति "ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति" । ते यद्यप्यत्र ब्रूयुः, किमिति ? लिङ्गज्ञाः, लिङ्गज्ञातारो वयमत्र एतस्मिन्नाम्नाये लिङ्गतो वयमत्र यद्यस्मिन् देवतायां तत्र विजानीमः । विज्ञाय च तद्दैवत एव कर्मणि विनियुज्महे तं मन्त्रम् । एवञ्च सति न नो निरुक्तशास्त्रेण प्रयोजनमस्तीति लिङ्गमस्माकं ज्ञापकमिति केचिद् वर्णयन्ति ।

एवं ब्रुवतो वक्तव्याः, – यदि यूयं लिङ्गतो मन्त्रदेवतां विजानीध्वे, "इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति (ऋ.सं.४,५,६,२)" – इत्येतस्मिन् मन्त्रे का देवता ? इति ।

आह, – केन पुनरभिप्रायेणास्मिन् मन्त्रे देवता पृच्छ्यते ? इति । उच्यते, – "वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे" । अथ तावदयमाग्नेयो मन्त्रः, अथ च तावदेतस्मिन् मन्त्रे इन्द्रवायू अपि श्रूयेते, तदेतद् दुःपरिज्ञानं लिङ्गमात्रेण, कतमदत्र प्रधानं देवताभिधानम् ? कतमदत्र नैघण्टुकम् ? इति । ते चेत् याज्ञिका लिङ्गमात्रान्निरुक्तमुपेक्ष्य मन्त्रान् कर्मसु विनियुञ्जाना गुणप्रधानभावमजानन्तो देवताभिधानानामेकमन्त्रगतानामन्यदेवतमन्त्रमन्यदेवते कर्मणि विनियुञ्जीरन्, ततश्चायथाकरणात् कर्मासमृद्धिः स्यात् । न च केवलं कर्मासमृद्धिरेव । किन्तर्हि ? अपध्वंसोऽपि स्यादेव दुरिष्टहेतुकः । तस्मात् परिज्ञेयं निरुक्तम् । तेन हि गुणप्रधानभावः शक्यते विज्ञातुमेकमन्त्रगतानां देवताभिधानानामिति । तदेतदेवं देवतापरिज्ञानद्वारेण पुरुषस्य प्रति विशिष्टोपकारकारि । तस्माद् युज्यते प्रारब्धुमिति ॥

"त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने । इन्द्रं न त्वा शवसा देवता वायुम्पृणन्ति राधसा नृतमाः ॥" (ऋ.सं.४,५,६,२) । भरद्वाजस्यार्षम् । आग्नेयी । प्रातरनुवाकाश्विनयोर्विनियोगः । हे 'अग्ने !' 'त्वां हि' त्वामेव 'मन्द्रतमं मृदुतमं सुखाराध्यतमम्, त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतः, अतस्त्वामेव 'ववृमहे' सम्भजामहे । केन ? अर्कशोकैः । एकपदमेतत् । अर्च्चनैर्मन्त्रैः शोकैर्दीप्तिः यथोक्तब्रह्मचर्य्यजनितवीर्य्यैः । स 'नः' त्वं भज्यमानः तैः मन्त्रैः संसेव्यमानः 'महि' महत् स्तोत्रं तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसन्तानगर्भैरुपग्रथितं 'श्रोषि' शृणु । किञ्च, एवं त्वं महती देवता, येन 'त्वा' त्वामेवैकं 'देवताः' अपि सर्वा 'इन्द्रं न' इन्द्रमिव च 'वायुम्' इव च 'शवसा' बलेन बलाकृतिभिः अभ्यर्च्चन्ति । किम्पुनः स्वैः कर्मभिः ? येऽपि च केचिदन्ये त्रिलोके नृणां मध्ये बलधनश्रुतैः 'नृतमा' तेऽपि च त्वामेव 'पृणन्ति' पालयन्ति पूरयन्ति वा । 'राधसा' हविर्लक्षणेन धनेन । एवं सदेव मनुष्यस्य जगतः पूज्यस्त्वं न केवलमस्माकमिति ।

एवमयमाग्नेयो मन्त्रः, स एष लिङ्गमात्रदर्शनिनाविज्ञातप्रधानदेवतो विनियुज्यमान ऐन्द्र्ये वायव्ये वा कर्मणि कर्त्तुरभिप्रेतफलसिद्धे नालं स्यात्, कर्मवैगुण्याच्च कर्त्तुरपध्वंसाय स्यात् । तस्माद् विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिति ॥

"अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि । हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो विमृधो नदस्वेति" ॥ (ऋ.सं. ८,३,१९,२) । यथा पूर्वस्मिन्नाग्नेये वायुलिङ्गमिन्द्रलिङ्गं च, "तथा" एतस्मिन्नपि "मान्यवे मन्त्रे" । "अग्निः" अग्निलिङ्गं नैघण्टुकम् । एवमनेकदेवतालिङ्गसङ्कटेषु दुरवधारं देवतातत्त्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमयेन ।

यदुक्तं लिङ्गज्ञातारो वयमत्र लिङ्गत एव मन्त्रान् कर्मसु विनियोक्ष्यामहे, न नो निरुक्तेन प्रयोजनमस्तीत्येतदयुक्तमिति । "त्विषिरित्यप्यस्य दीप्तिर्नाम भवति" अपठितमपि दीप्तिनामसु न केवलं यान्येव पठितानि, अन्यान्यपीति ॥

49. (અનુ૦) (ગ) (અહીંથી નિરુક્તાધ્યયનના ત્રીજા પ્રયોજનની ચર્ચા શરૂ થાય છે :) યજ્ઞવિષયક કાર્યોમાં દેવતાસંબંધી લિંગ (નામો)ને આધારે ઘણા વિધિપ્રદેશો હોય છે. તેથી (અમુક મન્ત્રનો પ્રધાન દેવતા કોણ છે અને ગૌણ દેવતા કોણ છે ?)

Vasant Bhatt Collection, Gujarat

તેની પરીક્ષા આના (નિરુક્તના) વડે કરવી જોઈએ. "અમે (મન્ત્રોમાં આવેલ) લિંગોને જાણનારા છીએ." એમ જો કોઈ કહે તો (આવું કહેનારાઓ 'અમે લિંગજ્ઞો છીએ' કહીને નિરુક્તાધ્યયનની આવશ્યકતા સ્વીકારતા નથી.) તેમને જણાવવાનું કે "તમને (અગ્નિને) બીજા દેવતાઓ ઇન્દ્રની અને વાયુની જેમ બલવતી સ્તુતિઓ વડે પૂજે છે." આ અગ્નિદેવતાના મન્ત્રમાં લિંગ રૂપે વાયુ અને ઇન્દ્રનાં નામો વપરાયાં છે, એ જ પ્રમાણે, "હે મન્યુ ! પ્રજ્વલિત અગ્નિની જેમ વિજય પામો." આ મન્યુદેવતાના મન્ત્રમાં લિંગ રૂપે અગ્નિનું નામ છે. અહીં (મન્ત્રમાં) 'ત્વિષિત એટલે પ્રજ્વલિત' એવો અર્થ લેવાનો છે. કેમ કે 'ત્વિષિર્' એ પણ દીપ્તિનું જ એક નામ છે.

49. **(વિમર્શ)** અમુક મન્ત્રમાં કયા પ્રધાનદેવતા છે અને કયા ગૌણ દેવતા છે ? એનો નિર્ણય કરવા માટે પણ યાસ્કના મતે નિરુક્તાધ્યનની જરૂર છે. પરંતુ કેટલાક પૂર્વપક્ષીઓનું કહેવું છે કે અમે મન્ત્રમાં વપરાયેલાં નામો (લિંગો)ને આધારે જે તે મન્ત્રમાં કયો દેવતા છે એ જાણી લઈશું. માટે મન્ત્રોના દેવતા જાણવા માટે જો નિરુક્તશાસ્ત્રનો પ્રારંભ કરવામાં આવ્યો હોય તો તે અનર્થક છે. આ દલીલનો પરિહાર કરવા માટે યાસ્કે ઉપર બે ઉદાહરણો રજૂ કર્યાં છે, જેમાં મન્ત્ર કોઈ જુદા દેવતાનો હોય છે અને જુદા જ દેવતાઓનાં નામો તેમાં વપરાયાં હોય છે. આ મન્ત્રમાં વપરાયેલાં નામોને આધારે જ પ્રધાન દેવતા શોધવાનો કોઈ પ્રયત્ન કરે તો તે ઉપર્યુક્ત ઉદાહરણમાં અનિષ્ટજનક પુરવાર થાય છે. આ દેવતાપરિજ્ઞાન નિરુક્તાધ્યયનનું ત્રીજું પ્રયોજન છે.

---

50. अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥१७॥ स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥ यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥ स्थाणुस्तिष्ठतेः । अर्थोऽर्तेः । अरणस्थो वा ॥१८॥

"अथापि" इदमपरमारम्भप्रयोजनमस्याः । आह, – किम् ? इति । उच्यते, – "ज्ञानप्रशंसामवत्यज्ञाननिन्दा च" ज्ञानञ्च प्रशस्यते, अज्ञानञ्च निन्द्यते । तत्रैवं सति वयमनिन्द्याः स्यामः प्रशस्याश्चेति ज्ञेयं निरुक्तम् । अतो हि आध्यात्माधिदेवताधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते, ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति । तदेवमखिलपुरुषार्थोपकारसमर्थशास्त्रमिति न्याय्यमारब्धुम् ॥१॥

क्व पुनर्ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यते ? इति । उच्यते, – लोके, शास्त्रे च । लोके तावद् यः कश्चिद् विद्वान् भवति, स पूज्यते पुण्यफलैषिभिर्जनैः, तदेतत् प्रत्यक्षत एव दृष्टम् । शास्त्रेऽपि "स्थाणुरयं भारहारः" – इत्यादि । स्थाणुर्वृक्षः, स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव सम्बध्यते, – न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः । एवञ्च "किलासावधीत्य वेदं न विजानाति योऽर्थम्" तस्य वेदस्याध्ययनभारमात्रमेव ह्यसौ बिभर्ति । "योऽर्थज्ञ इत् सकलं भद्रमश्नुते" य एवार्थज्ञो भवति, न ग्रन्थमात्राध्येता, स एव सकलमनवखण्डितं भद्रम् अश्नुते, अर्थपरिज्ञानफलमश्नुते प्राप्नोति । किम्पुनस्तत्व ? इह लोके पूज्यतामुपेत्य शिष्टानाम्, इतो लोकादन्तकाले "नाकमेति" यत्रासुखं किञ्चिदपि नास्ति, आध्यात्मिकमाधिदैविकमाधिभौतिकं वा, "कमिति सुखनाम, तत् प्रतिषिद्धम् । प्रतिषिध्येत 'न वा अमुं लोकं जग्नुषे किञ्च नाकम् । न वा अमुं लोकं गतवते किञ्च नासुखम् । पुण्यकृतो ह्येव तत्र गच्छन्ति" – इति नैग. का. २.४.२ । तत् स्थानमेति निरतिशयम् । कस्मात् पुनरसावीदृशं स्थानमेति ? इति । उच्यते, – इतः । यस्मादसौ "ज्ञानविधूतपाप्मा" । ये हि नाकगमनप्रतिबन्धिनः पाप्मानः, ते तस्य ज्ञानेन विधूताः, अतोऽसावेति नाकम् । युक्तश्चान्यत्रापि, – न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति ।

अथवा स्थाणुर्गर्दभः । स यथा चन्दनभारं वहत्येव, तदुपभोगैर्नाभिसम्बध्यते, एवं किलासौ या ग्रन्थमात्राध्येता, नार्थज्ञः । एवं तावदस्मिन् ज्ञानं प्रशस्तम् ॥

अथैतस्मिन् अज्ञानं निन्द्यते, – "यद् गृहीतमविज्ञातम्" – इति । यद् गृहीतं गुरुमुखात्, अविज्ञातं चार्थतः । किञ्च "निगदेनैव शब्द्यते" निगदमात्रेणैव नित्यकालं शब्द्यते उच्चार्यते, न पुनरर्थतो विचार्यते । आह, – किं तस्य ? उच्यते, – अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" । शुष्कं काष्ठमनग्नौ प्रदेशे नालं ज्वलनाय प्रकाशाय । एवं यो वेदार्थस्यानभिज्ञोऽध्येता स वेदाध्ययनभारमात्रेणैव सम्बध्यते, न तु तदीयेन फलेन, परिज्ञानन्तु श्रेयसा चाभ्युदयेन च युनक्तीति । तस्मादेतत्परिज्ञानाय अवश्यं निरुक्तशास्त्रमारब्धव्यमिति ॥

स्थाणुशब्दमर्थशब्दञ्च उदाहरणप्रसक्तौ निर्वक्ति, – "स्थाणुस्तिष्ठतेः" । स्थितो ह्यसौ नित्यकालमेव भवति, न

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कदाचिदप्यासीदिति । "अर्थोऽर्तेः" गतिकर्मणः, अर्य्यते ह्यसावर्थिभिः । "अरणस्थो वा" यदास्य स्वामी अरति गच्छति इतो लोकादमुं लोकं तदायमिहैव तिष्ठति, नानेनैव सहामुं लोकं गच्छति दीनारादिरर्थः, तत्सामान्यादितरोऽपि शब्दार्थोऽर्थ उच्यते ।

एवं तावत् शिष्टानुगमस्मृतौ ज्ञानं प्रशस्यते, अज्ञानञ्च निन्द्यते ॥२॥

50. (અનુ૦) (ઘ) વળી (જે નિરુક્તનું અધ્યયન કરે છે) તેના ૧. જ્ઞાનની પ્રશંસા થાય છે અને ૨. અજ્ઞાનની નિંદા થાય છે. જેમ કે, ૧. 'જે પુરુષ વેદનું અધ્યયન કરવા છતાંય તેના અર્થને જાણતો નથી તે (ચંદનકાષ્ઠના) ભારનું વહન કરનારો (પણ તેની સુગંધિને નહીં જાણનારો) સ્થાણુ (ગર્દભ) છે. (જે વેદને કંઠસ્થ કરવાની સાથે સાથે) તેના અર્થને પણ જાણે છે, તેને બધાં કલ્યાણોની પ્રાપ્તિ થાય છે તથા જ્ઞાનથી તેનાં બધાં પાપ ધોવાઈ જાય છે અને તે સ્વર્ગમાં જાય છે." ૨. "જે પુરુષ વેદના અર્થને જાણ્યા વિના તેને ગ્રહણ (કંઠસ્થ) કરે છે તે માત્ર વેદના શબ્દોનો જ ઉચ્ચાર કરે છે (શુકપાઠ કરે છે એમ કહેવાશે). જેવી રીતે સૂકું લાકડું હોવા છતાંય અગ્નિ વિનાના સ્થળમાં કયારેય બળતું નથી. (તેવી રીતે વેદાર્થને જાણ્યા વિના તેનું અધ્યયન કરનારા પુરુષને કોઈ ફાયદો થતો નથી.) અહીં "સ્થાણુ" (= હંમેશાં ઊભો રહેનારો, કયારેય બેસનારો નહિ– ગર્દભ અથવા વૃક્ષ –) શબ્દ √स्था >तिष्ठ (ઊભા રહેવું) ધાતુ ઉપરથી બન્યો છે અને "અર્થ" (= ધનસમ્પત્તિ) શબ્દ √ऋ (જવું) >ऋच्छति ધાતુ ઉપરથી બન્યો છે. (ऋ + थः = अर्थः). આ 'અર્થ'ને અરણસ્થ (अरणे गमने कृतेऽपि यः तिष्ठति ।) સ્વામીના મૃત્યુ પછી પણ ધનસમ્પત્તિ તેની પાછળ સ્વર્ગમાં જતી નથી, અહીં જ રહી જાય છે. તેથી અરણસ્થ = અર્થ = ધનસમ્પત્તિ) પણ કહે છે. (આ 'અર્થ'ની સાથે શબ્દના અર્થ – meaning–નું પણ સામ્ય હોઈ તેને પણ અર્થ કહે છે. ધ્વન્યાત્મક શબ્દનો નાશ થવા છતાંય અર્થ યથાવત્ રહે છે.)

50. (વિમર્શ) ઉપરના બે શ્લોકમાંથી અનુક્રમે પહેલામાં જ્ઞાનની પ્રશંસા કરી છે અને બીજામાં અજ્ઞાનની નિંદા કરી છે. સુશ્રૂતે પણ આ મતલબનો શ્લોક લખ્યો છે : यथा खरश्चन्दनभारवाही भारस्य वेत्ता न तु चन्दनस्य । एवं हि शास्त्राणि बहून्यधीत्य चार्थेषु मूढाः खरवद्वहन्ति ॥

'अर्थ' શબ્દનું વિવેચનઃ

યાસ્કે अर्थ શબ્દનું બે રીતે નિર્વચન આપ્યું છે : अर्थोऽर्तेः ॥ અને ૨. अरणस्थो वा ॥ અર્થાત્ ૧. ऋ (ऋच्छति) 'to go' અથવા अरण (= દૂર) + √स्था 'to remain in a distant or foreign place' – ધાતુઓ ઉપરથી તે શબ્દ સાધી શકાય.

ટીકાકાર સ્કન્દ-મહેશ્વર કહે છે કે अक्षरवर्णसामान्यात् निर्ब्रूयात् । નો અપવાદ સૂચવવા यथार्थं विभक्तीः सन्नमयेत् । વાક્ય મૂકવામાં આવ્યું છે. જેમ કે સ્કન્દ – મહેશ્વરના મતે "અર્થાનુસારી વિભક્તિ-વિપરિણામ કરી લેવું જોઈએ; પરંતુ અક્ષર કે વર્ણના સામ્યથી નિર્વચન ન કરવું. કારણ કે કોઈ પણ (એક ચોકકસ) વિભક્તિ (પ્રત્યય) કારકવિશેષ રૂપ અર્થનો બોધ કરાવનાર હોય છે. તેના થકી (પહેલાં તો) કારક સામાન્યનો અર્થબોધ થઈ શકશે અને તે કારકસામાન્ય કોઈક (ત્રીજા જ) કારકવિશેષાન્તરનો (પણ) બોધ કરાવવા શક્તિમાન બનશે. આમ, લક્ષણાની પરંપરાથી સમગ્રપણે અવિકૃત એવી કોઈ એક વિભક્તિથી જ વિભક્ત્યન્તરના અર્થની પ્રતીતિ થવી શકય હોઈને વિભક્તિ-વિપરિણામ કરવું ઉચિત છે, પણ કોઈ એકાદ અક્ષર કે વર્ણના સામાન્યને આધારે નિર્વચન કરવું ઠીક નથી." [सन्नामो विपरिणामः । यथार्थं विभक्तिविपरिणामं कुर्यात्, न तु अक्षरवर्णसामान्येन निर्वचनम् । किम् कारणम् । विभक्तेर्हि कारकविशेषोऽर्थः । स शक्नोति कारकसामान्यं लक्षयितुम् । तदपि योग्यं कारकविशेषान्तरम् । एवम् लक्षणापरम्परया समस्ताया अबकृतायाश्च (अविकृतायाश्च ?) तत एव विभक्तेर्विभक्त्यन्तरार्थ प्रतीतिसम्भवाच्छक्यत एव विभक्तिविपरिणामः कर्तुम्, न तु योग्येनाक्षरवर्णसामान्येन निर्वचनम् ॥

પરંતુ પ્રો.મેહેન્દળેને મતે આ રીતનું અર્થઘટન પણ ભાગ્યે જ સંતોષકારી જણાય છે. આથી તેમણે 'વિભક્તિ' એટલે case termination (= પ્રથમાદિવિભક્તિઓના પ્રત્યયો) એવો અર્થ નહીં લેતાં, (= 'division' વિભાજન) એવો અર્થ લીધો છે. હવે यथार्थं विभक्तीः सन्नमयेत् । નો, તેમના મતે અર્થ આમ થશે : જે શબ્દનું નિર્વચન કરવાનું હોય તેના અર્થવાળો કોઈ ધાતુ ન મળતો હોય ત્યારે તે (શબ્દ)ને અક્ષરોમાં, વર્ણોમાં વિભાજિત કરવો એવું અગાઉના સિદ્ધાન્ત (૩)માં કહ્યું છે. પરંતુ શબ્દનો આવો અક્ષર કે વર્ણમાં માત્ર વિભાગ કરવાથી કશો અર્થ નીકળતો નથી, આથી તે વિભાજિત કરેલા અક્ષર-વર્ણનું એવી રીતે અર્થઘટન (सन्नमयेत्) કરવું જોઈએ કે જે, જે શબ્દનું નિર્વચન કરવું હોય તેના (यथार्थम्) અર્થને અનુસરનારું હોય. દા.ત., अग्नि (નિરુક્ત ૭/૧૪) શબ્દનું યાસ્કે જે નિર્વચન આપ્યું છે તે જોઈએ. જેમાં અક્ષર કે વર્ણના સામ્યને આધારે તે શબ્દના અનેક પ્રકારે વિભાગ કરવામાં આવ્યા છે; અને પછી તે વિભાગોને (यथार्थम् =) અભીષ્ટ અર્થ અનુસાર (सन्नमयेत् =) ઘટાડવામાં આવે છે. જેમ કે,

(૧) अग् + नि = अग्र + √नी (જે/જેને આગળ લઈ જાય/જવાય છે.)

(૨) अङ्गं + √नी (અંગ બનાવી લે છે)

(૩) अ + ग्नि = अ+√क्नु (જે ભીંજવતો નથી)

(૪) अ + ग् + नि [इ = જવું + √अञ्ज અથવા √दाह + नी વગેરે] .

પ્રોફે. મેહેન્દળેના પોતાના શબ્દો જોઈએ તો – The confusion has arisen because the word विभक्ति in the Nirukta text has been misunderstood. In the context it does not mean 'case termination,' but

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

simply division'. Yaska has already laid down that in difficult case where no clear meaning similarity is to be seen between the word to be derived and a verb, the word should be split up and derived on the basis of similarity of syllable or a letter. The divisions of a word in to syllables or letters by themselves may not mean anything. They (विभक्तीः), therefore, should be interpreted (सन्नमयेत्) according to the sense (यथार्थम्) of the word to be derived. A few examples of derivations of this type will make this point clear. The word अग्नि is derived in more than one way (7.14). The various divisions (विभक्तीः) of the word अग्नि are made to yield (सम् + नम्य) the intended sense यथार्थम् on the basis of the similarity of अक्षर or वर्ण e.g. (1) अग्–नि = अग्र 'front' + √नी 'to carry', or (2) अंग limb + √नी, (3) अ + ग्नि = अ = not + √क्नु 'to make wet', (4) अ+ग्+नि+√इ to go + √अञ to smear or √दाहं to burn + √नी ॥.. These instances, and there are many more of this type in the Nirukta, exemplify the principle अपि अक्षरवर्ण सामान्यान् निर्ब्रूयात्.. यथार्थं विभक्तीः सन्नमयेत् ॥ (Nirukta Notes II, pp.7-11)

2. प्रत्तम् अवत्तम् इति धात्वादी एव शिष्येते ॥ अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति । स्तः सन्तीति ॥ अथाप्यन्तलोपो भवति । गत्वा गतमिति ॥ अथाप्युपधालोपो भवति जग्मतुः जग्मुः इति ॥ अथाप्युपधाविकारो भवति । राजा दण्डी इति ॥ अथापि वर्णलोपो भवति । तत्वा यामि (ऋ.सं.१/२४/११) इति ॥ अथापि द्विवर्णलोपः । तृचः इति । अथाप्यादिविपर्ययो भवति । ज्योतिः घनः बिन्दुः वाट्यः इति ॥ अथाप्यन्तव्यापत्तिर्भवति ॥१॥ ओघः मेघः नाधः गाधः वधूः मधु इति ॥ अथापि वर्णोपजनः । आस्थत् द्वारः भरूजा इति ॥

अधुनैवमुक्त्वा विषयवत्यो भवन्तीति, अर्थवशेन व्याकरणेऽपि शब्दविपरिणामो भवतीत्येवं दर्शयति, – "प्रत्तमवत्तमिति धात्वादी एव शिष्येते" इत्येवमादि । 'डु दाञ् दाने (जु.उ.)' तस्य प्रपूर्वस्य प्रत्तमिति । अत्र दकार आकारश्च धातुः, परो निष्ठाप्रत्ययस्तकारः, तत्रैवं सति 'दो दद् घोः (पा.७,४,४६)' – इति वर्त्तमाने 'अच उपसर्गात् तः (पा. ७,४,४७)' – इति आकारस्य तकारो भवति, 'झरो झरि सवर्णे (पा.८,४,६५) – इति धात्वन्तस्य तकारस्य लोपे कृते, 'खरि च (पा.८,४,५५)" – इति तकारस्य चर्त्वे कृते 'परः सन्निकर्षः संहिता (पा.१,४,१९)' – इति धातुतकारः प्रत्ययतकारेण संयोगतामपैति 'हलोऽनन्तराः संयोगः (पा. १,१,७)' – इति, ततः प्रादिसमासे कृते 'प्रतम्' – इति भवति । एवमेव 'दो अवखण्डने (दि.प.) – इत्यस्यावपूर्वस्य 'अवत्तम्' – इति । अत्रापि दकार ओकारश्च धातुः, परो निष्ठातकारः । अत्र 'आदे च उपदेशेऽशिति (पा.६, १,४५) – इत्योकारस्याकारे कृते तभावलोपचर्त्वपरगमनप्रादिसमासाः पूर्ववदेव । एवमनयोर्द्धात्वोरादी एव शिष्येते । यथानयोरेवमन्येषामपि दृष्ट्वा यथासम्भवमनुविधेयम् ॥१॥

"अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति, स्तः सन्तीति" । 'अस् भुवि (अदा.प.)' – इत्यस्य निवृत्तिस्थानेषु गुणवृद्धिनिवृत्तिस्थानेषु क्ङिति वर्त्तमाने 'श्नसोरल्लोपः (पा.६,४,१११)' – इत्यादिलोपो भवति । योऽयं धात्वादावकार एवं लुप्यते, तस्मिन् लुप्ते प्रयोगः स्तः सन्तीति । एवमन्येषामपि दृष्ट्वानुविधेयं यथासम्भवम् ॥

"अथाप्यन्तलोपो भवति, गत्वा गतमिति" । अत्र, गमेः (भू.प.) क्त्वाप्रत्यये, निष्ठाप्रत्यये च परतोऽनुनासिकलोपो भवति, अनुदात्तोपदेशेत्यधिकृत्य क्ङितीति । एवमन्येष्वपि दृष्टव्यमनुविधेयं च यथासम्भवम् ॥

"अथाप्युपधालोपो भवति, जग्मतुर्जग्मुरिति" । अत्र, गमेः (भू.प.) अलोपः । 'अलोन्त्यात् पूर्व उपधा (पा.१,१,६५) – इत्युपधा सञ्ज्ञा, तस्य 'गमहनजनखनघसां (पा.६,४,६८) – इत्युपधालोपः । एवमन्येषामपि द्रष्टव्यमनुविधेयं यथासम्भवम् ॥

"अथाप्युपधाविकारो भवति, राजा दण्डीति" । राजन्, दण्डिन् इति स्थिते 'नोपधायाः (पा.६,४,७), – 'सर्वनामस्थाने चासम्बुद्धौ (पा.६,४,८)' – इति दीर्घत्वम्, – दण्डिन्नित्यत्रापि 'इन्हन्पूषार्य्यम्णां शौ (पा.६,४,१२)' – सौ च (पा.६,४,१३)' – इति दीर्घत्वम्, 'नलोपः प्रातिपदिकान्तस्य (पा.८,२,७) – इत्युभयोरपि नकारलोपे कृते राजा दण्डीति । एवमुपधाविकारो भवति ॥

"अथापि वर्णलोपो भवति, तत्त्वा यामीति" । अत्र चकारलोपः याचामीत्येवमेतद् द्रष्टव्यम् । अयञ्च छान्दस एव । अत एव च छान्दसत्वादेवमेव याच्ञाकर्मस्वयं पठितः "यामि" (३५४ पृ.) "मन्महे" (३५४ पृ.) इति । भाषायां याचे इति भवति ॥

तत्त्वां यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेलमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(ऋ.सं. १,२,१५,१) । किञ्च "तत्त्वा यामि सुवीर्य्यं तद् ब्रह्म पूर्वचित्तये । येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वु माविथ ॥" (ऋ.सं.५,७,२६,४) । – इत्यनया त्रिष्टुभा उपाकृतः शुनःशेपो वरुणं तुष्टाव । आज्याहुतिरनया साग्निकेषु क्रतुषु समिष्टियजुष उत्तरकालं हूयते । चतुर्मास्येषु च वरुणप्रघासेषु वारुणस्य हविषो याज्यैषा । हे 'वरुण !' 'तत्' अहं 'त्वा' वरुणं 'यामि' याचे इत्यर्थः । किम् ? यत् ममाभिप्रेतम् । कथं पुनर्याचे ? 'ब्रह्मणा ऋग्यजुःसामाख्येन 'वन्दमानः' स्तुवन् । किञ्च यदेव त्वं मया याच्यसे, 'तत्' एव अयमपि 'यजमानः' 'हविर्भिः' संस्कृतैः सान्नाय्यादिभिः 'आशास्ते' । तावावां भवन्तमेकमेवार्थं याचावहे, स्तुतिर्भिर्हविर्भिश्च । स त्वम् 'अहेलमानः' अक्रुध्यन् । सर्वो हि याच्यमानः क्रुध्यतीत्यत एवमुच्यते ॥ हे 'वरुण ।' 'बोधि' बुध्यस्य । बुद्ध्वा चैतमावयोरभिप्रेतार्थं कुरु । उरुशंसेत्येकं पदं सम्बोधनश्च । हे 'उरुशंस' बहुस्तुत्य ! वरुण । 'मा' 'नः' अस्माकं याचमानानाम् 'आयुः' 'प्रमोषीः' । कुरु नोऽभिप्रायसिद्धिमित्यभिप्रायः ॥

"अथापि द्विवर्णलोपस्तृच इति" अत्र ऋवर्णरेफयोर्लोपः । स लुप्यते ऋवर्णेन साकम् ॥

"अथाप्यादिविपर्य्ययो भवति, ज्योतिर्घनो बिन्दुर्वाट्य इति" । 'द्युत दीप्तौ (भू.आ.)' तस्यादिव्यापत्त्या ज्योतिः । 'हन हिंसा – गत्योः (अदा. प.) तस्य घन इति । 'भिदिर् विदारणे (रु.उ.)' तस्य बिन्दुः । 'भट भृतौ (भू.प.) । तस्य वाट्यः ॥

"अथाप्याद्यन्तविपर्य्ययो भवति, स्तोका रज्जुः सिकतास्तर्क्विति" । 'श्चुतिर् क्षरणे (भू.प.)' तस्याद्यन्तविपर्य्येण स्तोकाः । 'सृज विसर्गे (दि.आ.तु.प.)' तस्य रज्जुः । 'कस विकसने (भू.प.)' तस्य सिकता । 'कृती छेदने (तु.प.) तस्य तर्कु ॥

"अथाप्यन्तव्यापत्तिर्भवति" ॥२॥

"ओघो मेघो नाघो गाधो वधूर्मध्विति" । 'वह प्रापणे (भू.प.)' तस्यान्तव्यापत्त्या ओघः । 'मिह सेचने (भू.प.)' तस्य मेघः । 'णह बन्धने (दि.उ.)' तस्य नाधः । 'गाहू विलोडने (भू.आ.)' तस्य गाधः । 'वह प्रापणे (भू.उ.)' तस्य वधूः । 'मद तृप्तौ (चु.आ.)' तस्य मधु ॥

"अथापि वर्णोपजनः, आस्थद्द्वारो भरूजेति" । 'अस क्षेपणे (दि.प.)' तस्य आस्थत् । 'वृङ् सम्भक्तौ (क्र्या. आ.)' तस्य वारः । 'भ्रस्ज पाके (तु.उ.) तस्य भरूजः ॥

एवं व्याकरणेऽपि लक्षणप्रधाने सति अर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः, किमुत निरुक्ते यदर्थप्रधानमेव । तस्मात् साधूक्तम्, – "अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्" "विभक्तीः" अपि "यथार्थं" "संनमयेत्" इति ॥ एवमयमादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विवर्णलोप आदिविपर्य्यय आद्यन्तविपर्य्ययो वर्णोपजनश्छन्दसि भाषायाश्च द्रष्टव्याः, दृष्ट्वा च यथासम्भवमनुविधेयम् ॥

---

2. *(અનુ.)* ૧. प्रत्तम् । અને अवत्तम् – આ બે શબ્દોમાં ધાતુનો આદિઅંશ જ બાકી રહ્યો છે. ૨. (ગુણ અને વૃદ્ધિનાં) નિવૃત્તિસ્થાનો = નિષેધસ્થાનોમાં √अस् ધાતુના આદિનો લોપ થાય છે. જેમ કે, स्तः । सन्ति । ૩. ક્યારેક ધાતુનો અન્તભાગ લુપ્ત થાય છે. જેમ કે, (√गम्लृ > गच्छ गतौ ધાતુના म्નો લોપ થઈને) गत्वा । गतम् । ૪. વળી, ઉપધા લોપ પણ જોવા મળે છે. જેમ કે, जग्मतुः । जग्मुः । (અહીં √गम्लृ गतौ ધાતુના ग् કારોત્તરવર્તી અકારનો = ઉપધાનો લોપ થયો છે.) ૫. ઉપધામાં વિકાર પણ થાય છે. જેમ કે, राजा । दण्डी । (અહીં राजन् અને दण्डिन् શબ્દોની ઉપધા – અનુક્રમે ज् કારોત્તરવર્તી અકાર અને ડ્કારોત્તરવર્તી इकारને–દીર્ઘ થયો છે.) ૬. ક્યારેક કોઈક વર્ણનો લોપ પણ થયેલો જોવા મળે છે. જેમ કે, तत्त्वा यामि । (અહીં याचामिમાંના चકારનો લોપ થઈને यामि રૂપ બન્યું છે.) ૭. વળી, બે વર્ણોનો લોપ પણ જોવા મળે છે. જેમ કે, तृचः । ૮. એ જ પ્રમાણે, ક્યારેક (ધાતુના) આદિમાં વિપર્યય થયેલો પણ જોવા મળે છે. જેમ કે, ज्योतिः । घनः । बिन्दुः । वाट्यः । ૯. (ધાતુના) આદિ અને અન્તભાગમાં વિપર્યય થતો જોવા મળે છે. જેમ કે, स्तोका । रज्जुः । सिकताः । तर्कुः । ૧૦. ક્યારેક અન્તિમ વર્ણની વ્યાપત્તિ (પરિવર્તન) પણ થાય છે. જેમ કે, ओघः । मेघः । नाधः । गाधः । वधूः । मधु । ૧૧. વળી, વર્ણોનો ઉપજન (આગમ) પણ જોવા મળે છે. જેમ કે, आस्थत् । द्वारः । भरूजा ।

2. *(વિમર્શ)* નિર્વચનના સિદ્ધાન્તો દર્શાવતી વખતે ઉપર કહ્યું હતું કે વ્યાકરણશાસ્ત્રમાં બતાવેલી પ્રક્રિયાનો આદર ન કરવો, કારણ કે તે પ્રક્રિયાઓ પણ સંશયવતી છે. આને સોદાહરણ સમજાવવાનો અહીં ઉપક્રમ સ્વીકાર્યો છે : પહેલા ઉદાહરણમાં प्र+√दा (डुदाञ् दाने) + क्त > √त > √आ કારનો त કાર અને તેનો લોપ, તથા दकारનો तकार કરીને प्रत्तम अवत्तम् । રૂપ સાધવામાં આવે છે. અહીં √दा ધાતુનો આદ્યંશ જ અવશિષ્ટ રહ્યો છે. બીજા ઉદાહરણમાં √अस् भुवि ધાતુના આદ્યંશનો લોપ થયો છે. અહીં પાણિનિએ क्ङिति च । (पा.सू. १/१/५) સૂત્રથી ङित् અને कित् નિમિત્તક ગુણ અને વૃદ્ધિનો નિષેધ કર્યો છે. તેને યાસ્કે 'નિવૃત્તિસ્થાન' તરીકે ઓળખાવ્યો છે. ચોથા ઉદાહરણમાં ઉપધા લોપ થયો છે. પાણિનિએ अलोऽन्त्यात्पूर्व उपधा । (पा.सू. १/१/६५) સૂત્રથી શબ્દના અન્ત્યવર્ણની પૂર્વે આવેલા (ઉપાન્ત્ય) વર્ણની 'ઉપધા' સંજ્ઞા કરી છે. યાસ્કે એક વર્ણલોપનું છઠ્ઠું

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ઉદાહરણ આપ્યું છે તે વિવાદાસ્પદ છે. याचामिમાં ચકારનો લોપ થવાથી यामि રૂપ બન્યું છે એવું દુર્ગે સમજાવ્યું છે. પરંતુ સ્કન્દસ્વામી કહે છે કે આમ માનશો તો વાસ્તવમાં च् અને आ બન્નેનો લોપ થયો હોવાથી તે દ્વિવર્ણલોપનું ઉદાહરણ બની જશે. માટે तत्त्वा રૂપમાં એક વર્ણનો લોપ થયો છે એ માનીને તેને ઉદાહરણ ગણવું જોઈએ. तनित्वा यामि । અહીં √तनु विस्तारे + क्त्वा, नકાર લોપ, इट्નો વૈકલ્પિક નિષેધ થતાં तत्त्वा રૂપ બને છે. અહીં नકાર લોપ તો "ધાતુના અન્તલોપ"નું ઉદાહરણ ગણાશે અને જે इट्નો વિકલ્પે લોપ થયો છે તે 'એક વર્ણલોપ'નું ઉદાહરણ બનશે. બે વર્ણના લોપનું ઉદાહરણ तृचः આપ્યું છે. અહીં त्रि + ऋचः । (त् र इ)માં સમ્પ્રસારણ થવાથી અર્થાત્ રેફમાંથી ऋ થવાથી त् ऋ इ થશે, તેની પાછળ ऋचः જોડાશે. પછી इકારનો પૂર્વરૂપ એકાદેશ (અર્થાત્ પૂર્વ) ऋકારમાં તે इકાર ભળી જશે, લુપ્ત થશે-) અને ऋचःના ऋકારનો લોપ થતાં त् + ऋ + चः > तृचः બને છે. અહીં પૂર્વમાં લુપ્ત થયેલો इકાર અને ऋचः નો લુપ્ત થયેલ ऋકાર- એમ બે વર્ણોનો લોપ થયો કહેવાશે. આઠમા ઉદાહરણમાં ધાતુનો આદ્યંશ વિપર્યય પામ્યો છે. દા.ત. √द्युत दीप्तौમાંથી ज्योतिः । √हन् हिंसागत्योःમાંથી घनः । √भिदिर् विदारणेમાંથી बिन्दुः । √भट भृतौમાંથી वाट्यः બન્યું છે. નવમા ઉદાહરણમાં √श्च्युतिर् क्षरणे ધાતુમાંના य કારનો લોપ થઈને स्कोता, પછી क અને त ઊલટ-સૂલટ થઈ જવાથી स्तोका બન્યું છે. √सृज विसर्गेમાંથી सर्जु रसजु √रज्जुः । √कस् विकसनेમાંથી कसिता >सिकता । √कृती छेदनेમાંથી कर्तु થયા પછી આદ્યન્તવિપર્યય થઈને तर्कुः (ત્રાક) બને છે. દશમા ઉદાહરણમાં √वह प्रापणे, √मिह् सेचने, √वह बन्धने, √गाह् विलोड़ने ધાતુઓમાં ह्નો घ અને ध થતાં ओघः, गाधः વગેરે રૂપો બન્યાં છે. અગિયારમા ઉદાહરણમાં आस्थत् શબ્દ √असु क्षेपणे ધાતુમાંથી બન્યો છે, તેમાં થુક્ (थ)નો આગમ થયો છે. वारयति इति द्वारः । અહીં वारःના વકારની પૂર્વે દ્કારનો આગમ થયો છે, તથા √भ्रस्ज् पाकेમાં भ् પછી अ અને રેફમાં ऊકારનો આગમ થયો છે.

આ બધાં ઉદાહરણો દ્વારા યાસ્ક એ બતાવવા માગે છે કે જેવી રીતે વ્યાકરણશાસ્ત્રમાં કોઈ શબ્દ (રૂપ)ની સિદ્ધિ કરવા માટે ધાત્વાદિ લોપ વગેરે વર્ણવવામાં આવે છે તેવી જ રીતે આ નિરુકતમાં પણ શબ્દોનું નિર્વચન કરવા માટે તેનો આશ્રય લેવામાં આવ્યો છે. માટે નિરુકતની નિર્વચન પદ્ધતિ અશાસ્ત્રીય છે એમ કહેવામાં કશું પ્રમાણ નથી. દુર્ગાચાર્યે પણ જણાવ્યું કે લક્ષણ (=સૂત્ર) – પ્રધાન વ્યાકરણમાં પણ અર્થવશાત્ વર્ણોના લોપાગમ અને વિપરિણામ થતાં હોય તો જે અર્થપ્રધાન જ છે તે નિરુકતમાં આ લોપાગમ શા માટે ન થઈ શકે ? (બીજું, યાસ્કે વર્ણવેલા આ ધાત્વાદિ લોપ વગેરે આધુનિક ભાષાશાસ્ત્રે પણ સ્વીકાર્ય ગણ્યા છે. વિશેષ માટે જુઓ પ્રસ્તાવના.)

---

3. तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद् द्विप्रकृतीनां स्थानमिति प्रदिशन्ति । तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत् । तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति । तद्यथैतत् ऊतिः मृदुः पृथुः पृषतः कुणारुम् इति ॥ अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते । दमूनाः क्षेत्रसाधाः इति । अथापि नैगमेभ्यो भाषिकाः । उष्णं घृतमिति ॥ अथापि प्रकृतय एवैकेषु भाष्यन्ते । विकृतय एकेषु । शवतिः गतिकर्मा कम्बोजेष्वेव भाष्यते । कम्बोजाः कम्बलभोजाः । कमनीयभोजा वा । कम्बलः कमनीयो भवति । विकारमस्यार्येषु भाषन्ते । शवः इति । दातिर्लवनार्थे प्राच्येषु । दात्रम् उदीच्येषु । एवमेकपदानि निर्ब्रूयात् ॥

अतः परं सम्प्रसारणचिन्ता वर्त्तिष्यते, तदर्थमिदमारभ्यते – "तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति, तद्विप्रकृतीनां स्थानमिति प्रदिशन्ति" । सम्प्रसार्य्यप्रकृतयश्चासम्प्रसार्य्यप्रकृतयश्चोभयप्रकृतयश्च धातवः । तत्रैवं सत्युभयप्रकृतिषु शास्त्राविषयगतं यद्वक्तव्यं 'तत्' इदमुच्यत इति पर्य्युपयुक्तस्तच्छब्दः ।

आह, – इदमेव तावदुच्यतामुभयप्रकृतीनां किंलक्षणम् ? इति । उच्यते, – 'यत्र' यस्मिन् धातौ 'स्वरात्' अकारादेः 'अनन्तरा' अनन्तर्हिता अन्येन व्यञ्जनेन परा वा पूर्वा वा 'अन्तस्था' यरलवानामन्यतमो वर्णः 'अन्तर्धातु' धातुमध्ये भवति । किं तत्र ? 'तत्' एतदेव लक्षणं धातुरूपं हि 'द्विप्रकृतीनां' द्विस्वभावानां शब्दानां 'स्थानम्' आश्रयः 'इति' एचमाचार्य्याः 'प्रदिशन्ति' प्रविभागेनोपदिशन्ति ।

तद्यथा, – 'यज देवपूजासङ्गतिकरणदानेपु (भू.उ.)' – इति । अत्र द्वे शब्दप्रकृती भवतः । सम्प्रसारणपक्षे तावत, – इष्टवान्, इष्टः, इष्ट्वा, एताः शब्दप्रकृतयो भवन्ति । असम्प्रसारणपक्षे पुनः, – यष्ट्वा, यष्टुं, यष्टव्यमित्येताः ॥

"तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्" । 'तत्र' एवं सति एकप्रकारेण 'सिद्धायाम्' अर्थसिद्धौ 'अनुपपद्यमानायाम्', 'इतरथा' 'उपपिपादयिषेत्' उपपादयितुमिच्छेत् । अर्थे द्वयोः सम्प्रसारणासम्प्रसारणप्रकृत्योर्यथैवोपपद्यतेऽर्थतस्तथैवोपपादयेत् । अथवोभयथाप्यनुपपद्यमानेऽर्थे स्वयमुत्पाद्य निर्द्धार्य्य यथा यथोपपद्येतार्थः तथा तथोपपादयेत्, अपि तल्लक्षण-शास्त्रविहितेनार्थसाधनोपायेन, अर्थस्य प्रधानत्वात् ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति" । 'तत्रापि' एतस्मिन्नपि सम्प्रसारणलक्षणे सति "एके" धातवः 'अल्पनिष्पत्तयो भवन्ति' अल्पेषु शब्दरूपेषु सम्प्रसारणप्रकृतिरभिनिष्पद्यते तदप्युपेक्षितव्यम् ॥

"तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमिति" । 'तद्यथा' एतदुदाहरणजातम्, – ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति । अवतेर्गत्यर्थस्य (भू.प.) क्तिप्रत्यये परतः 'च्छ्वोः शूडनुनासिके च (६,४,२०,१९)" – इति वर्त्तमाने 'ज्वरत्वरश्रिव्यविमवामुपधायाश्च (६,४,२०,)" – इत्यूड्भावः क्रियते, तत ऊतिरिति भवति । 'म्रद मर्दने (भू.आ.)', तस्य मृदुः, रेफः सम्प्रसार्यमाण ऋकारो भवति ? एवमेव 'प्रथ प्रख्याने (भू.आ.)', तस्य पृथुः । 'पुष दाहे (भू.प.), तस्य पृषतः । 'क्वण: शब्दार्थः (भू.प.), कुणारुः ॥

एवमपि सम्प्रसार्यासम्प्रसार्य्य विशेषपरिज्ञेयशब्दान् निर्बुवता पुंसा "अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते" । 'अथापि' इदमपरमुपेक्षितव्यमागमशब्दान् निर्बुवता । आह, - किम् ? इति । उच्यते, - 'भाषिकेभ्यो धातुभ्यः' भाषायां ये प्रायेण प्रसिद्धप्रयोगास्ते भाषिकास्तेभ्यः । 'नैगमाः' छन्दोविषयाः । 'कृतः' कृत्प्रत्ययान्ताः शब्दाः । भाष्यन्ते विक्रियन्ते निरुच्यन्त इत्यर्थः ॥

तद्यथा, - "दमूनाः क्षेत्रसाधा इति" । 'दम उपशमे (दि.प.) "तस्य, भाषायां दाम्यति अनड्वान्, दमयति अनड्वाहम् दान्तः अनड्वान् इत्येवमादयः प्रयोगा भवन्ति, छन्दसि पुनः दमूना अग्निरुच्यते स भाषासामान्ये न केनचिन्निर्वक्तव्यं दममना इत्येवमादिना । एवमेव साध्यतेर्भाषाप्रायोवृत्तेः साधा इति । "मित्रं न क्षेत्रसाधसम् (ऋ.सं.३,२,४)" - इत्येवमादयो मित्रमिव क्षेत्रसाधसमित्येवमादिना प्रकारेण निर्वक्तव्याः ॥

"अथापि नैगमेभ्यो भाषिकाः" । निगमे छन्दसि ये प्रायोवृत्या प्रसिद्धाः, तेभ्यः सामान्यं गृहीत्वा 'भाषिकाः, कृत्प्रत्ययान्ता भाष्यन्ते विक्रियन्ते ।

तद्यथा, - "उष्णं घृतमिति" । 'उष दाहे (भू.प.)' एष प्रायेण छन्दसि प्रसिद्धः, - "प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः (य.वा.सं.१,७)" - इत्येवमादि । भाषायां पुनरुष्णमिति श्रूयते । स एषो नैगमशब्दसामान्येन निर्वक्तव्यः । एवमेव 'घृक्षरणदीप्त्योः (भू.प.)' तस्य, छन्दसि "आ त्वा जिघर्मि (य.वा.सं. ११,२३)" - इत्यादिषु सिद्धः प्रयोगः, भाषायां पुनर्घृतमिति श्रूयते । स एवं जिघर्तेरिव छान्दसस्य सामान्ये निर्वक्तव्यः । एवं भाषाविषमेभ्यश्छन्दोविषया निर्वक्तव्याः, छन्दोविषयेभ्यश्च भाषाविषयाः ॥

अथापीदमपरमुपेक्षितव्यमनेन शब्दान् निर्बुवता । आह, - किम् ? इति । उच्यते, - "अथापि प्रकृतय एवैकेषु भाष्यन्ते. विकृतय एकेषु" । एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते, विकृतय एकेषु । धातोराख्यातपदभावेन यः प्रयोगः, सा प्रकृतिः । नामीभूतस्य तस्यैव यः प्रयोगः, सा विकृतिः ॥३॥

"शवतिर्गतिकर्मा" गत्यर्थो धातुः "कम्बोजेष्वेव भाष्यते" म्लेच्छेषु प्रकृत्या प्रयुज्यते, आख्यातपदभावेन, शवति गच्छतीत्यर्थः । उदाहरणविशेषप्रसक्तः कम्बोजशब्दो निरुच्यते, - "कम्बोजाः कम्बलभोजाः" ते हि प्रायेण कम्बलानुपभुजन्ते, हिमप्रायत्वात्तस्य देशस्य । "कमनीयभोजा वा" कमनीयानि प्रार्थनीयानि चैते हि द्रव्याणि उपभुजन्ते प्रचुररत्नो हि स देश इति । कम्बलशब्दं विग्रहप्रसक्तं निर्ब्रवीति, - "कम्बलः कमनीयो भवति" प्रार्थनीयो हि स शीतार्त्तैर्भवति । "विकारमस्यार्य्येषु भाषन्ते शव इति" आर्य्येषु जनपदेषु अस्यैव शवतेर्विकारं भाषन्ते, मृतकनामधेयभूतमेवं प्रयुञ्जते, कथम् ? शव इति । एवमेकेष्वाख्यातस्थ एव प्रयुज्यते, नामी, - इत्येतत् प्रकृतित्वं विकारत्वं च । अथवा चेतनावत्स्वेकेषु गमनक्रियायोगिनि द्रव्ये प्रयुज्यते, एकेषु पुनश्चेतनारहित एव, - इत्येतत् प्रकृतित्वं विकरत्वञ्च ॥

द्वितीयमुदाहरणम् । "दातिर्लवनार्थे प्राच्येषु" । दातिर्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते । तद्यथा, - व्रीहीन् दाति, यवान् दाति । अयमेव नामीभूतः "उदीच्येषु" जनपदेषु प्रयुज्यते "दात्रम्" इति । दीयते अनेनेति दात्रम्, लूयत इत्यर्थः ॥

"एवमेकपदानि निर्ब्रूयात्" अनेन प्रकारेण एकपदानि निर्ब्रूयात्, - भाषानिगमव्यवस्थया, देशभाषाप्रसिद्धिविभागेन च ॥

---

3. (અનુ) (૧૨) જ્યાં કોઈ ધાતુની મધ્યમાં સ્વરની અવ્યવહિત (પૂર્વમાં કે પરમાં) અન્તઃસ્થ [(य व र ल)] વર્ણો આવેલા હોય તે (ધાતુ)ને 'દ્વિપ્રકૃતિક સ્થાન' કહેવામાં આવે છે. ત્યાં એક રીતે સિદ્ધિ ન થઈ શકતી હોય તો બીજી રીતે (અર્થને) ઉપપન્ન કરવાની ઇચ્છા રાખવી, (અથવા 'વાસ્તવિક ધાતુથી જે તે રૂપની ઉપપત્તિ ન થઈ શકતી હોય તો બીજા કોઈ વૈકલ્પિક ધાતુથી તેની ઉપપત્તિ કરવાનો પ્રયત્ન કરવો.)' આવા દ્વિપ્રકૃતિક સ્થાનવાળા ધાતુઓમાંથી (સિદ્ધ થનારાં) કેટલાંક રૂપો તો અલ્પ પ્રચલિત છે. દા.ત., ऊतिः । मृदुः । पृथुः । पृषतः । कुणारुः । (૧૩) ક્યારેક લૌકિક (ભાષિક) ધાતુઓને વૈદિક કૃત્ પ્રત્યયો લાગીને શબ્દો બન્યા હોય છે. દા.ત. दमूनाः । क्षेत्रसाधाः । (૧૪) અથવા તો, વૈદિક ધાતુઓને લૌકિક પ્રત્યયો લાગતા હોય છે. દા.ત. उष्णम् । घृतम् । (૧૫) ક્યારેક, કોઈક પ્રદેશમાં (નામોની) પ્રકૃતિ (અર્થાત્ ધાતુ >તિઙન્ત રૂપ)નો જ પ્રયોગ થાય છે અથવા તો કોઈક

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પ્રદેશમાં (પ્રકૃતિભૂત આખ્યાત-ધાતુ-ની) વિકૃતિ (એટલે કે નામ > સુબન્ત રૂપ)નો જ પ્રયોગ થાય છે. ઉદાહરણ તરીકે, (क) કમ્બોજમાં ગત્યર્થક શવતિને જ (= પ્રકૃતિ રૂપ તિઙન્તને) બોલવામાં આવે છે. અહીં 'કમ્બોજ' શબ્દનો અર્થ 'કમ્બલભોજ' (કમ્બલોનો ભોગ કરનાર) અર્થાત્ 'કમનીયભોજ' (કમનીય પદાર્થોનો ભોગ કરનાર) થાય છે. વળી, જે કમનીય હોય તે કમ્બલ કહેવાય છે. આર્ય જનપદોમાં વિકૃતિ (= આખ્યાતમાંથી તૈયાર થયેલું નામ) શવઃનો પ્રયોગ થાય છે. (ख) પૂર્વના દેશોમાં 'કાપવું' અર્થમાં दाति (તિઙન્ત રૂપ)નો પ્રયોગ થાય છે અને ઉત્તરના દેશોમાં दात्रम् (નામ)નો પ્રયોગ થાય છે. આ પ્રમાણે, એકપદવાળા શબ્દોનું નિર્વચન કરવું જોઈએ.

3. ***(વિમર્શ)*** અગાઉ અગિયાર રીતે સંશયવંતી વ્યાકરણપ્રક્રિયાઓનું નિરૂપણ કર્યું હતું. તેના અનુસંધાનમાં બીજી ચાર રીતોનું પણ વર્ણન કરવામાં આવે છે તેના આધારે પણ શબ્દોનું નિર્વચન થઈ શકે છે. જે ધાતુની મધ્યમાં સ્વરની અવ્યવહિત પૂર્વમાં કે પરમાં અન્તઃસ્થ વર્ણો આવેલા હોય તેવા ધાતુઓને 'દ્વિપ્રકૃતિક સ્થાન' કહે છે. અર્થાત્ આવા ધાતુઓમાં સમ્પ્રસારણ થાય છે પણ ખરું અને નથી પણ થતું. ('દ્વિપ્રકૃતિક સ્થાન'ને માટે પાણિનિએ 'સમ્પ્રસારણ' એવી પારિભાષિક સંજ્ઞા વાપરી છે. य् व् र् ल् વ્યંજન વર્ણોનું અનુક્રમે इ उ ऋ लृ સ્વર વર્ણોમાં પરિવર્તન થાય તેને સમ્પ્રસારણ કહે છે. इग्यणः सम्प्रसारणम् । १/१/४५). √यज् देवपूजासंगतिकरणदानेषु ધાતુ આ પ્રકારનો છે. તેમાં સમ્પ્રસારણ થશે તો इष्टवान् । इष्टिः । इष्ट्वा । જેવાં રૂપો બનશે અને જો સમ્પ્રસારણ નહીં થાય તો यष्ट्वा । यष्टुम् । यष्टव्यम् । રૂપો બનશે. અહીં ऊतिः । मृदुः । વગેરે શબ્દો અલ્પ પ્રચલિત છે. જેમ કે, ગત્યર્થક √अव् ધાતુની પરમાં क्ति પ્રત્યય રહેતાં √અવ્‌ને ऊठ् આદેશ થઈને ऊति શબ્દ બન્યો છે. √म्रद मर्दने ધાતુમાંના રેફનું સમ્પ્રસારણ થતાં मृदुः શબ્દ બને છે. એ જ પ્રમાણે, √प्रथ प्रख्याने, √पृष दाहे, √क्वण शब्दे ધાતુઓમાં સમ્પ્રસારણ થતાં અનુક્રમે पृथुः । पृशतः । कुणारुः । રૂપો સિદ્ધ થાય છે. તદુપરાંત યાસ્ક નોંધે છે કે ક્યારેક લૌકિક ધાતુઓને વૈદિક કૃત્ પ્રત્યયો લાગે છે. જેમ કે, √दम उपशमे ધાતુ ઉપરથી લોકમાં दाम्यति अनड्वान् । दमयति अनड्वाहम् । दान्तः अनड्वान् । પ્રયોગો થાય છે. પણ વેદમાં दमूनाः । अग्निः । એવો પ્રયોગ પણ થાય છે. અહીં લૌકિક √दम् ધાતુને ऊनसि પ્રત્યય લાગીને दमूनाः શબ્દ બન્યો છે. તથા વૈદિક ધાતુઓને લૌકિક પ્રત્યયો લાગે છે. દા.ત., √उष दाहे એ ધાતુ પ્રાયઃ વેદમાં પ્રસિદ્ધ છે, તેને લૌકિક नक् પ્રત્યય લાગીને उष्णम् બને છે. વળી, 'અમુક પ્રકારના શબ્દવ્યવહારમાં ભૌગોલિક પરિબળ પણ કામ કરે છે' એવા આધુનિક ભાષાશાસ્ત્રીય સિદ્ધાન્તનું સમર્થન કરતાં યાસ્ક જણાવે છે કે કોઈક દેશમાં શબ્દોની મૂળ પ્રકૃતિ એટલે કે આખ્યાતનો જ પ્રયોગ થાય છે અથવા કેવળ પ્રકૃતિનો વિકાર એટલે કે નામનો જ પ્રયોગ થાય છે. જેમ કે, शवति । शवः ॥ दाति । दात्रम् ॥ અહીં, 'શવતિનો કમ્બોજ પ્રદેશમાં પ્રયોગ થાય છે' એમ કહ્યું છે. આથી પ્રસંગતઃ એ વિચારવાનું પ્રાપ્ત થાય છે કે કમ્બોજ શબ્દનું શું નિર્વચન છે ? તો – કમ્બલભોજ કે કમનીયભોજનું નામ કમ્બોજ છે. બરફવાળા પ્રદેશમાં લોકો વડે જ્યાં કમ્બલનો ભોગ થાય છે તે કમ્બોજ. અહીં વિગ્રહપ્રસક્ત કમ્બલની વ્યુત્પત્તિ 'કમનીય' કરવામાં આવે છે. 'એટલે કે શીતાર્ત લોકો વડે જેની કામના કરવામાં આવે તે કમનીય-કમ્બલ. આ પ્રમાણે અર્થાત્ લૌકિક વૈદિક વ્યવસ્થાથી અને જે દેશની ભાષાપ્રસિદ્ધિ મુજબ એક પદવાળા શબ્દોનું નિર્વચન કરવું જોઈએ.

---

4. अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् । दण्ड्यः पुरुषः । दण्डमर्हतीति वा । दण्डेन संपद्यते इति वा । दण्डो ददतेः धारयतिकर्मणः । 'अक्रूरो ददते मणिम्' इत्यभिभाषन्ते । दमनादित्यौपमन्यवः । दण्डमस्याकर्षतेति गर्हायाम् । कक्ष्या रज्जुरश्वस्य । कक्षं सेवते । कक्षो गाहतेः । क्सः इति नामकरणः । ख्यातेर्वा अनर्थकोऽभ्यासः । किमस्मिन् ख्यानमिति । कषतेर्वा । तत्सामान्यान्मनुष्यकक्षः । बाहुमूलसामान्यादश्वस्य ॥२॥

राज्ञः पुरुषो राजपुरुषः । राजा राजतेः । पुरुषः पुरि षादः । पुरि शयः । पूरयतेर्वा । पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य । 'यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥' (श्वेता. उप. ३/९) इत्यपि निगमो भवति ॥

आह, - एवं तावदतद्धितयुक्तेषु पदेषु असमासयुक्तेषु च निर्वचनम् । अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि तानि कथं निर्वक्तव्यानि ? - तानि किं तद्धितयुक्तेषु पदेषु पूर्वपदार्थो निर्वक्तव्यः उत तद्धितार्थसमासयुक्तेष्वपि ?. किं पदार्थः पूर्वम् उत समासार्थो वा पूर्वम् ? इति । उच्यते, - "अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्" । अथशब्दो विशेषाधिकारार्थः । 'तद्धिताः (पा.४,१,७६)' - इत्यधिकृत्य ये प्रत्यया विहिताः, ते तद्धिताः, 'समर्थः पदविधिः (पा.२,१,१)' - इत्यधिकृत्य ये विहिताः, ते समासाः । तेषूभयेष्वपि तद्धितसमासेषु अविशेषेण एकपर्वसु चानेकपर्वसु

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

च एकपदेषु चानेकपदेषु च । तद्यथा, - दण्ड्यः इत्येकपदस्तद्धितः, वार्ष्यायणिरित्यनेकपदः । अनेकानि ह्येष पदानि स्वात्मन्यन्तर्णीय प्रवर्त्तते । तद्यथा, - वृषस्यापत्यं वार्ष्यः, वार्ष्यस्यापत्यं वार्ष्यायणः तस्यापि वार्ष्यायणिरिति । एवं समासेष्वप्येकपदेषु चैवं निर्ब्रूयात् । यथा वक्ष्यामः, - एकशेषः एकपदः समासः । 'सरूपाणामेकशेष एकविभक्तौ (पा.१,२,६४)' - इति । तद्यथा, - पुरुषश्च पुरुषश्च पुरुषौ, पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः इत्येवम् ।

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ॥"

एतेऽनेकपदाः समासाः । पाणिनेः सूत्रम्, — 'सङ्ख्यापूर्वो द्विगुः (पा.२,१,५२) । पञ्चमूली, पञ्चरथी, दशरथी इत्येवमादि । सूत्रम्, – 'चार्थे द्वन्द्वः (पा. २,१,२९)' । स च पुनर्विभाषयैकवद् भवति । तद्यथा, – प्लक्षन्यग्रोधौ, अहिनकुलम्, भीमार्जुनवासुदेवाः इत्यादि । उपसर्गनिपातपूर्वकोऽव्ययीभावः । तद्यथा, – उपमणिकम्, अनुसमुद्रम्, व्यभ्रम्, इत्येवमादि । तुल्यविभक्तिलिङ्गयोरुभयोः पदयोः समानाधिकरणः कर्मधारयः । तद्यथा, – कृष्णमृगः, रक्तोऽश्वः, श्वेतपताका इत्येवमादि । एतेष्वेकपर्वसु चानेकपर्वसु च तद्धितसमासेषु पूर्वं पूर्वमिव निर्ब्रूयादपरमपरमेव प्रविभज्य विगृह्णीयेत्यर्थः । पूर्वं तद्धितार्थं निर्ब्रूयात्, पश्चात् पदार्थम् । समासेष्वपि, - पूर्वं समासार्थम्, पश्चात् पदार्थम् ॥

तदेतत् उदाहरणैरेव दर्शयति, तद्यथा, – "दण्ड्यः पुरुषो दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा" । दण्ड्य इत्येष तद्धितः, पुरुषशब्दविशेषणम् । पूर्वं तावत् तद्धितार्थं निर्वक्षति, – कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः दण्डेन वा कार्षापणादिना यः सम्पद्यते संयुज्यते स दण्ड्यः ।

अधुना पदार्थनिर्वचनम्, – "दण्डो ददतेर्धारयतिकर्मणः" । ददतेः धारयत्यर्थे वर्त्तमानस्य, धार्य्यते ह्येषोऽपराधेषु राजभिः ।

आह, - दृष्टः पुनः क्वचित् ददतेः धारयत्यर्थे ? इति । उच्यते, – दृष्टो वेदे लोके च । वेदे तावत्, - विश्वेदेवाः पुष्करे त्वा ददन्त (ऋ.सं. ५,३,२४,१)" – इति । "अक्रूरो ददते मणिमित्यभिभाषन्ते" । तथा लोके, – 'अक्रूरो ददते मणिम्' ! अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः, स ददते मणिं स्यमन्तकनामानं शिरसा । लोकेऽप्येवं ददतिर्धारणार्थे भाष्यते ।

"दमनादित्यौपमन्यवः" आचार्य्यो मन्यते । तेन हि अदान्तो दम्यते राजभिः, तेनादान्तान् दमयेदित्युक्तम्, लोके हि प्रसिद्धो यः कश्चिददान्तो भवति तमधिकृत्य वक्तारो भवन्ति । – "दण्डमस्याकर्षत हे सभासदः ! तेन सम्पद्यतामयं ततो दान्तो भविष्यति, – इत्येवमयं गर्हायां दृष्टः । एवं दमनाद् दण्डः, इत्यौपमन्यव आचार्य्यो मन्यते ॥४॥

तद्धितस्यैव द्वितीयमुदाहरणम्, – "कक्ष्या रज्जुरश्वस्य" इति । कक्ष्या इत्येष तद्धितः । आह, – कः पुनरियं कक्ष्या ? इति । उच्यते, – या अश्वस्य सन्नाह रज्जुः सा कक्ष्येत्युच्यते ।

एवं कक्ष्याशब्दस्य तत्त्वमुक्त्वाधुना तद्धितार्थं ब्रवीति, – "कक्षं सेवते" । सा हि कक्षं सेवते, कक्षसंयुक्ता भवति । कक्षे भवा वा कक्ष्या ।

अधुना पदार्थं निर्वक्ति, – "कक्षो गाहतेः" विलोडनार्थस्य (भू.आ.) । कक्षयोरेव हि विलोडयति, द्रष्टव्यम् । अत्र पुनः, – "क्स इति नामकरणः । सर्वमन्यदाद्यन्तविपर्य्ययादि यथोपदर्शितं यथासम्भवं योज्यं तत्र तत्र । "ख्यातेर्वानर्थकोऽभ्यासः" ककारः, कख्यः सन् कक्ष इत्युच्यते । "अर्थवानेव वा ककारः । कख्यः सन् कक्ष इत्युच्यते । अर्थवानेव वा ककारः । कथम् ? "किमस्मिन् ख्यानमिति" । एवं किमस्मिन् ख्यापनीयमस्ति ? न किञ्चिदपि, अदर्शनीयत्वात्, गूहनीयोऽयमित्यर्थः । स एष एवं कृत्वा किं ख्यः सन् कक्ष इत्युच्यते ? "कषतेर्वा (भू.प.)" नित्यकालं ह्यसौ खेदशीलत्वात् कण्डूं ददाति, ततो नखैः कष्यते यतः, तस्मात् कषणक्रियायोगात् कक्ष इत्युच्यते । "तत्सामान्यान्मनुष्यकक्षः" । स्त्रीकक्षस्य सामान्यात् मनुष्यकक्षोऽपि कक्ष इत्युच्यते ? "बाहुमूलसामान्यादश्वस्य" अश्वस्यापि यो बाहुमूलप्रदेशः, स कक्ष इत्युच्यते । तं सेवत इति कक्ष्या ।

अन्ये तु ब्रुवते, – "पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्" पूर्वं पद पूर्वमिव प्रविभज्य निर्ब्रूयात्, अपरं पदमपरमेवेति । एतस्मिन् अर्थे कल्प्यमाने पदानामेव पौर्वापर्य्ये निर्वचने तद्धितसमासयोस्त्वनियमः पूर्वं पश्चाद्वेति । पूर्व एव त्वर्थः साधीयान् ॥ उक्तं तद्धितनिर्वचनलक्षणं सोदाहरणम् ॥

अधुना समासोदाहरणमुच्यते, – "राज्ञः पुरुषो राजपुरुषः" । राज्ञ इत्युक्ते सर्वं स्वं गम्यते, षष्ठीसामर्थ्यात् । तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते, निर्देशसामर्थ्यात् । अथेदानीं राजपुरुष इत्युक्ते, राजा पुरुषमन्येभ्यः स्वामिभ्यो विनिवर्त्त्य स्वात्मनि संयुनक्ति, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यो विनिवर्त्त्य स्वात्मना संयुनक्ति । ता उभावप्यन्योन्यविमिश्रपदार्थकौ मिथः संसृष्टपदार्थौ समस्येते । अथेदानीं राजपुरुष आनीयतामित्युक्त न राजानमानयन्ति, नापि पुरुषमात्रम्, नाप्युभयम्, किन्तु राजस्वामिकं पुरुषमानयन्ति । एवं समासार्थः । कुतः पुनरेतत् राजस्वामिकमिति ? प्रधानोपसर्जने हि सहभूते विवक्षितमेकमर्थं ब्रूतः ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"राजा राजते:" । राजतेर्दीप्त्यर्थस्य (भू.उ.) । दीप्यते ह्यसौ पश्चानां लोकपालानां वपुषा "पुरुषः पुरिषादः" । पूः शरीरं बुद्धिर्वा, तयोरसौ विषयोपलब्ध्यर्थं सीदतीति पुरिषादः, पुरुषः । "पुरिशयः" अथवा तयोरसौ शेते विशेषेणास्ते इति पुरिशयः सन् पुरुष इत्युच्यते । "पूरयतेर्वा" पूर्णमनेन पुरुषेण सर्वगतत्वात् जगदिति पुरुषः । "पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य" । अन्तरित्यन्तरपुरुषाभिप्रायेणैवमुच्यते प्रासङ्गिकम् ।

निगमश्च भवति – "यस्मा॒त् प॒रं नाप॑रम॒स्ति किञ्चि॒द्यस्मा॒न्नाणी॑यो॒ न ज्यायो॑ऽस्ति॒ किञ्चि॑त् । वृक्ष इ॑व स्त॒ब्धो दि॒वि ति॑ष्ठ॒त्येक॒स्तेने॒दं पू॒र्णं पुरु॑षेण॒ सर्व॑म्" । यस्मात् परमपरं वा न किञ्चदस्ति, यस्माच्च न किञ्चिदप्यणीयो नापि ज्यायोऽन्यदस्ति, स एव सर्वमित्यभिप्रायः । वृक्ष इव स्तब्धो नित्यसङ्कोचविकाशधर्मादिविद्योतनवति स्वात्मनि सर्वविभागेन तिष्ठति यः तेन पुरुषेणेदं पूर्णं सर्वं जगदिति ॥५॥

4. (અનુ.) હવે એક જોડવાળા કે અનેક જોડવાળા તદ્ધિતાન્ત શબ્દો અને સામાસિક શબ્દોમાં પહેલા પ્રથમનો (એટલે કે તદ્ધિતાન્ત શબ્દમાં તદ્ધિતપ્રત્યયાર્થ અને સામાસિક શબ્દનો સમાસાર્થ) અને ત્યારબાદ દ્વિતીયનો (એટલે કે તદ્ધિત પ્રત્યયની પ્રકૃતિનો અર્થ અને સમાસાન્તર્ગત પદોનો પૃથક્ પૃથક્ અર્થ) વિચારવો જોઈએ, અર્થાત્ વિભાગ કરીને તેમનું નિર્વચન કરવું જોઈએ. દા.ત. (क) दण्ड्यः पुरुषः । (અહીં दण्ड + य > दण्ड्यः એવા તદ્ધિતાન્ત શબ્દનો પહેલાં અર્થ વિચારવામાં આવે છે:) दण्डमर्हति इति दण्ड्यः । दण्डेन सम्पद्यते इति । દંડ (તાડન) કરવાને યોગ્ય પુરુષ અથવા દંડ (કાર્ષાપણાદિ) ભરવા યોગ્ય પુરુષ. (અહીં य એવા તદ્ધિત પ્રત્યયનો અર્થ – 'ને યોગ્ય' કે '–થી યુક્ત' થાય છે). (હવે दण्ड्यः > दण्ड + य શબ્દમાંના दण्ड શબ્દની વ્યુત્પત્તિ તપાસવામાં આવે છે:) ૧. દંડ શબ્દ ધારણાર્થક √दद् ઉપરથી બન્યો છે. अक्रूरो ददते मणिम् । એમ કહેવામાં આવે છે. (એટલે કે અહીં ધારણાર્થક √दद् ધાતુનો પ્રયોગ છે.) ૨. ઔપમન્યવના મતે 'દમન કરતો હોવાને કારણે દંડ કહેવાય છે.' અહીં √दम उपशमे ધાતુ ઉપરથી દંડની સિદ્ધિ કરવાનો પ્રયત્ન છે.) કારણ કે "આને દંડ કરો" એવું વાક્ય નિંદા અર્થમાં પ્રયોજાય છે. (ख) कक्ष्या । ઘોડાની દોરડીને કક્ષ્યા કહે છે, કારણ કે તે કક્ષભાગ (બગલ)નું સેવન કરે છે. (અર્થાત્ અહીં 'कक्ष' શબ્દને સેવનાર્થક यत् પ્રત્યય લાગીને कक्ष्या શબ્દ બન્યો છે.) (હવે कक्ष શબ્દ કેવી રીતે બન્યો હશે ? તેની વિચારણા:) ૧. कक्ष શબ્દ √गाह विलोडने ધાતુને क्स એવો પ્રત્યય લાગીને બન્યો હશે. ૨. અથવા તો √ख्या ધાતુને અનર્થક (= સ્વાર્થમાં) અભ્યાસ (= દ્વિત્વ) કરતાં (ख्या > ख्याख्या > कख्य) कक्षः બન્યો હશે. ૩. અથવા તો 'આમાં શું બતાવવા જેવું છે ?' એ અર્થમાં किंख्यःમાંથી कक्ष બન્યો હશે. ૪. અથવા √कष् (ખંજવાળવું) ધાતુ ઉપરથી બન્યો હશે. (બગલ હંમેશાં પ્રસ્વેદવાળી રહેવાથી ખણ આવે છે અને પછી નખથી ખણવામાં આવે છે, માટે કષણક્રિયાના યોગથી તે 'कक्ष' કહેવાય છે. આમ, कक्ष એટલે ખંજવાળવાનું સ્થાન.) આના (સ્ત્રીકક્ષના) સામ્યથી મનુષ્ય (પુરુષ) कक्ष પણ 'कक्ष' કહેવાય છે અને અશ્વનો જે બાહુમૂલ પ્રદેશ છે તેને પણ 'कक्ष' કહે છે. (ग) (હવે સામાસિક પદનું કયા ક્રમે નિર્વચન કરવું તેનું ઉદા. આપે છે :) राजपुरुषः એટલે राज्ञः पुरुषः । અહીં राजन् શબ્દ √राजृ दीप्तौ ધાતુ ઉપરથી બન્યો છે. पुरुषः એટલે (पूः सीदति) બુદ્ધિમાં કે શરીરમાં બેસનાર, અથવા બુદ્ધિમાં કે શરીરમાં શયન કરનાર. અથવા જગત્‌માં બધે ગયેલો હોવાને કારણે 'પુરુષ' કહેવાય છે અથવા 'અન્તઃકરણને ભરી દે છે' માટે અન્તર્યામી પુરુષને અનુલક્ષીને 'પુરુષ' કહેવાયો હશે. (વેદમાં કહ્યું છે કે–) "જેનાથી પર કે અપર કશુંય નથી, જેનાથી નાનું કે મોટું કશુંય નથી, જે દ્યુલોકમાં વૃક્ષની જેમ સ્તબ્ધ ઊભો છે તે એક પુરુષ વડે આ બધું (જગત્) પુરાયેલું –વ્યાપ્ત – છે" – એવો વેદમન્ત્ર પણ છે (માટે पूरयति ઉપરથી पुरुष શબ્દ બન્યો હશે એમ પણ કહી શકાય.)

4. (વિમર્શ) અગાઉ વ્યાકરણની જુદી જુદી પ્રક્રિયાઓથી એક પદવાળા શબ્દોનું નિર્વચન કેવી રીતે કરવું તે દર્શાવ્યું હતું. હવે જ્યાં એક નામ ઉપરથી બીજું નામ બન્યું હોય એટલે કે કોઈ નામને તદ્ધિત પ્રત્યય લાગીને તદ્ધિતાન્ત શબ્દ બન્યો હોય તથા બે કે વધારે પદો ભેગાં મળીને કોઈ સામાસિક શબ્દ બન્યો હોય તેમનું નિર્વચન કેવી રીતે કરવું તેનો ઉપાય દર્શાવે છે. તદ્ધિતપ્રત્યયયુક્ત પદોમાં પહેલા પદાર્થનું નિર્વચન કરવું કે તદ્ધિતપ્રત્યયાર્થનું ? તથા સમાસયુક્ત પદોમાં પહેલાં પદાર્થ બતાવવો કે સમાસાર્થ ? – એવો પ્રશ્ન ઊભો થાય છે. તેનો યાસ્ક જવાબ આપે છે કે એક જોડવાળા કે અનેક જોડવાળા તદ્ધિતાન્ત શબ્દો અને સામાસિક શબ્દોમાં પહેલાં તદ્ધિતપ્રત્યયાર્થ અને સમાસાર્થનું નિરૂપણ કરી દેવું. ત્યારબાદ તદન્તર્ગત જોડાયેલાં પૃથક્ પૃથક્ પદોના અર્થોનું (વ્યુત્પત્તિનું) નિરૂપણ કરવું. યાસ્કે ઉપર (क) અને (ख)માં એક પર્વવાળા તદ્ધિતનું અને (ग)માં એકપર્વવાળા સમાસનું ઉદાહરણ આપ્યું છે.

પ્રા. રાજવાડે कक्ष्या શબ્દનું નિર્વચન પ્રક્ષિપ્ત ગણે છે, કારણ કે 'એકપર્વ તદ્ધિત'ના ઉદાહરણ તરીકે दण्ड्यः પદ પર્યાપ્ત હતું અને 'એકપર્વસમાસ'ના ઉદાહરણ તરીકે પણ યાસ્કે राजपुरुषः એવું એક જ ઉદાહરણ આપ્યું છે. માટે કોઈ અજ્ઞે નિરુક્તની નિર્વચન પદ્ધતિની હાંસી ઉડાવવા कक्ष्याः ઉદાહરણ વધારાનું ઉમેરી દીધું હશે. राज्ञः पुरुषःમાં ૧. राजन् શબ્દ √राजृ दीप्तौ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ઉપરથી સિદ્ધ થાય છે. દુર્ગ કહે છે: राजते दीप्यते हि असौ पञ्चानां लोकपालानां वपुषा । પરંતુ કાલિદાસે એ શબ્દને √रञ्ज્ to please ઉપરથી નિષ્પન્ન થયેલો માન્યો છે : राजा प्रकृतिरञ्जनात् । (रघु. ४/१२). પ્રા.રાજવાડે કહે છે કે એક વખત રાજ્નો 'શાસન કરવું' એવો અર્થ થતો હતો. જેમ કે, વેદમાં विश्वस्य राजथः । (ऋ.सं. ૫/૭૧/૨) વગેરે છે. લેટિનમાં પણ rex (= a king) શબ્દ regere (= to rule) ઉપરથી આવ્યો છે. पुरुषः શબ્દના યાસ્કે બે અર્થો દર્શાવ્યા છે : पुरिशयः । पुरिषादः । આમાંથી દુર્ગે પહેલાનો અર્થ 'ભોગાયતન શરીરમાં બેઠેલો આત્મા કે બુદ્ધિ' કર્યો છે કે જે ઉચિત જ છે, પરંતુ પ્રા. રાજવાડે કહે છે કે બીજાનો અર્થ 'પુરિ–નગરીમાં રાજકારભાર કરવા વસતો મંત્રી' એવો કરવો જોઈએ. કારણ કે અહીં આ શબ્દ राजन्ની સાથે આવેલો છે ! पुरुषः ।ની વ્યુત્પત્તિને સમજાવતાં સ્કન્દસ્વામી લખે છે – पुरुषः, पूः शरीरं 'शद्लृ शातने' इत्यस्य शात्यत इति कर्मणि घञ्, शादः । पुरि शादो मलसंचयः, पुरि शादोऽस्यासौ पुरिशादः सन्, अन्तलोपोपधाविकारशकारषकारोकाराणां व्यापत्त्यादिना पुरुषः ॥.. अथवा शदिर्गत्यर्थः । तस्मात् पुर्शब्दोपपदे डप्रत्ययः । पुरं शरीरं भोक्तृत्वेन गच्छतीति पुरिशः सन् शकारषकारव्यापत्त्योकारस्योपजनेन पुरुषः । अस्मिन् पक्षे पुरि शदो गमनमस्येति व्युत्पत्तिवचनम् पुरि शाद इति तु पाठान्तरम् । बदुः पापसंचयः शादोऽस्मिन्निति व्युत्पत्तिवचनम् । पुरिशयः, अथवा पुरि पूरयितव्येऽन्नादिना शरीरे शेते तिष्ठति उपलभ्य इत्यर्थः ॥ (भाग-२, पृ. ३१,३२).

દુર્ગાચાર્યે 'એકપર્વ' અને 'અનેકપર્વ'નો અર્થ અનુક્રમે એકપદ અને અનેકપદ કર્યો છે. તેના ઉદાહરણ તરીકે (क) दण्डचः એકપદ તદ્ધિત અને वार्ष्यायणिः અનેકપદ તદ્ધિત છે એમ કહે છે. (ख) पुरुषश्च पुरुषश्च पुरुषश्च इति पुरुषाः । એવો સરૂપ એકશેષ 'એકપર્વ સમાસ' છે અને દ્વિગુ, દ્વન્દ્વ, બહુવ્રીહિ, તત્પુરુષ વગેરે વિરૂપ સમાસોનાં બધાં ઉદાહરણ 'અનેકપર્વ સમાસ' છે. અહીં એકપર્વ અને અનેકપર્વ તદ્ધિતનાં ઉદાહરણ તો ઉચિત છે પરંતુ એકપર્વ અને અનેકપર્વ સમાસનાં ઉદાહરણ ચિન્ત્ય છે. કેમ કે, યાસ્કે राजपुरुषःને એકપર્વસમાસ તરીકે રજૂ કર્યો છે (જે દુર્ગની સમજૂતી મુજબ અનેકપર્વસમાસ કહેવાશે.) અને कल्याणवर्णरूपः એ અનેકપર્વ સમાસ છે. પ્રા. રાજવાડે કહે છે કે શાકટાયન જેવા કોઈક વૈયાકરણનું વ્યાકરણ આજે ઉપલબ્ધ હોય તો જ આ વિશે કાંઈક અસંદિગ્ધ કહી શકાય..

---

5. विश्वकद्राकर्षः । वि इति । चकद्र इति श्वगतौ भाष्यते । द्रातीति गतिकुत्सना । कद्रातीति द्रातिकुत्सना । चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः तदस्मिन्नस्तीति विश्वकद्रः । कल्याणवर्णरूपः । कल्याणवर्णस्येवास्य रूपम् । कल्याणं कमनीयं भवति । वर्णो वृणोतेः । रूपं रोचतेः । एवं तद्धितसमासान्निर्ब्रूयात् । नैकपदानि निर्ब्रूयात् ॥

समासस्यैव द्वितीयमुदाहरणम्, — "विश्वकद्राकर्षः" इति । विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः ।

आह, — कः पुनरयं विश्वकद्र इति ? "वीति चकद्र इति श्वगतौ भाष्यते" । वीति चकद्र इति शब्दद्वयं श्वगतौ भाष्यते श्वभिः साकं यो गच्छति मनुष्यः, तस्मिन् भाष्यते । "द्रातीति गतिकुत्सना" । अत्र पुनः द्रातीति गतिकुत्सना । 'द्रा कुत्सायाम् (अदा. प.)' — इत्युक्तम्, इदं हि तस्य कुत्सितगतित्वम्, यदस्य श्वभिः सह राति । "कद्रातीति द्रातिकुत्सना" । इदानीं कद्रातीति द्रातिकुत्सना कुत्सितकुत्सनेत्यर्थः । इदमपरं कुत्सिततरम्, यद् गत्वा श्वभिः सह निहन्ति, तस्मात् कद्रातीति कुत्सित-कुत्सनेत्युपपद्यते । "चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः" । अथेदानीं च इत्येष कद्रातीति एवमेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः । यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति । "तदस्मिन्नस्तीति विश्वकद्रः" । तदस्मिन् द्वितयमप्यस्ति, — कुगतित्वं, कुत्सिततरगतित्वञ्च, नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः । तमपराधे कस्मिंश्चित् वर्त्तमानमन्योन्य आकर्षति, स विश्वकद्राकर्षः ॥

अन्ये तु ब्रुवते, – श्वैव विश्वकद्रः, अस्यैव हि स्वभावत एव हिंस्रत्वाद् गतिः कुत्सिता, स च पुनः पादविकलः, अतस्तस्य कुत्सितकुत्सितत्वम् । वीत्युभयोरर्थयोर्मत्वर्थः, तमाकर्षति यः पुरुषः, स विश्वकद्राकर्षः ॥

अधुना रूपसमासं दर्शयति, — "कल्याणवर्णरूपः, कल्याणवर्णस्येवास्य रूपम्" । कल्याणवर्णं सुवर्णम्, तस्येव यस्य रूपं स कल्याणवर्णरूपः । अग्निरन्यो वा कश्चित् ।

कल्याणादिशब्दान् विग्रहप्रसक्तान् निर्ब्रवीति, — "कल्याणं कमनीयं भवति" । प्रार्थ्यते तत् सर्वेणैव । "वर्णो वृणोतेः" । आवृणोति हि स आश्रयम् । "रूपं रोचतेः" । तद्धि रोचते, तद्धि रोचिष्णुः भवति ।

"एवं तद्धितसमासान्निर्ब्रूयात्" — इत्युपसंहारवचनम् ॥

"नैकपदानि निर्ब्रूयात्" प्रकरणोपपदविहितानि सन्ति तानि, केवलान्येव परेणाभिद्रोहबुद्ध्या पृच्छमानानि न निर्ब्रूयात्, न

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

निर्वक्तव्यानीति । किङ्कारणम् ? तेषां प्रकरणादुपपदाद्वा अर्थः शक्यतेऽवधारयितुम्, सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात्, ततश्च प्रत्यवायेन योगादपहारश्च स्यात् । तद्यथा, — 'जह्वा' — इत्येकं पदं प्रकरणोपपदरहितम्, न विज्ञायते, किं हन्तेः (अदा. प.) उत "ओ हाक् त्यागे (जु.प.)' — इत्यस्य धातोः स्यात् ? इति । तत् पुनरेतत् – "मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ॥ (ऋ.सं. ६,३,४८,४)" – इत्येतस्यामृचि यदेतन्मा वधीरिति पदम्, एतस्माद् गम्यते हन्तेः स्यादिति । किङ्कारणम् ? विज्ञातप्रकरणोपपदस्य हि समअसं ह्यर्थकरणं न्याय्यमित्येवमनगतसंस्कारणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा शक्यते कर्तुम् । अत इदमुक्तम्, — "नैकपदानि निर्ब्रूयात्" – इति ॥

5. *(અનુ.)* विश्वकद्राकर्षः । (विश्वकद्र आकर्षतीति અર્થાત્ કૂતરાના જેવી અતિશય નિંદનીય ગતિવાળા પુરુષને ખેંચનારો.) અહીં (विश्वकद्र + आकर्षમાં वि + चकद्र શબ્દ કૂતરાની (નિંદિત) ગતિને માટે વપરાય છે. द्राति (√द्रा कुत्सायां गतौ) એ ગતિની નિંદા છે અને (कुत्सितं द्राति इति =) कद्राति એટલે 'નિંદિત ગતિની નિંદા' એવો અર્થ થાય છે તથા 'कद्राति' રૂપનું અનર્થક-સ્વાર્થમાં द्वित्व (અભ્યાસ) કરવાથી चकद्राति એવું ઘટક બને છે. ત્યાર પછી तस्मिन्नस्तीति એવા મતુપ્ અર્થમાં तद्धितनो अच् પ્રત્યય થતાં) 'અતિશય નિંદિત શ્વગતિથી યુક્ત (પુરુષ)' અર્થવાળો विश्वकद्रः શબ્દ બને છે. (અહીં वि + चकद्र એવી સ્થિતિમાં સુટ્ આગમ થતાં विश्वकद्र શબ્દ બન્યો છે), ત્યાર પછી તેનો आकर्षः ની સાથે સમાસ થતાં विश्वकद्राकर्षः શબ્દ બન્યો છે. (આ સામાસિક શબ્દનો અર્થ 'અતિશય નિંદિત શ્વગતિથી યુક્ત પુરુષને ખેંચનારો કોઈ શિકારી' થાય છે.

કલ્યાણવર્ણ (સુવર્ણ)ના જેવું રૂપ છે જેનું તે કલ્યાણવર્ણરૂપ (= અગ્નિ). અહીં કલ્યાણ એટલે જે કમનીય (બધા વડે પ્રાર્થિત) હોય છે તે. 'વર્ણ' શબ્દ (આચ્છાદનાર્થક) √वृ ધાતુ ઉપરથી બન્યો હશે અને 'રૂપ શબ્દ (દીપ્ત્યર્થક) √रुच् ધાતુ ઉપરથી બન્યો હશે. આ પ્રમાણે, તદ્ધિતાન્ત અને સામાસિક શબ્દોનું નિર્વચન કરવું જોઈએ. **પરંતુ એકલાં (પ્રકરણહીન) પદોનું નિર્વચન ન કરવું.**

5. *(વિમર્શ)* : યાસ્કે विश्वकद्राकर्षः । એવું અનેકપર્વવાળા તદ્ધિતસમાસનું મિશ્રોદાહરણ આપ્યું છે. અહીં वि + चकद्राति સ્થિતિમાં तदस्मिन्नस्तीति એવો મતુબર્થક अच् પ્રત્યય તદ્ધિતપ્રત્યય કહેવાય છે. અને विश्वकद्रःનો विश्वकद्रम् आकर्षति કે विश्वकद्रस्य आकर्ष(क): એવો સમાસ થયો છે. દુર્ગે આને સમજાવતાં લખ્યું છે કે द्राति એ ગતિકુત્સના કેવી રીતે છે ? — તો इदं हि तस्य कुत्सितगतित्वं यदस्य श्वभिः सह गमनम् । इदानीं कद्राति इति द्रातिकुत्सना । कुत्सितकुत्सना इत्यर्थः । इदमेव तावत्तस्य कुत्सितत्वं यदसौ श्वभिः सह गच्छति । इदमपरं कुत्सिततरं यद्गत्वा श्वभिः सत्त्वानि हन्ति । तस्मात्कद्राति इति कुत्सितकुत्सना इति उपपद्यते ॥... कुगतित्वं कुत्सिततरगतित्वं च नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः । तमपराधे कस्मिंश्चित् वर्तमानमन्यः यः आकर्षति सः विश्वकद्राकर्षः ॥.. યાસ્કે આપેલી આ શબ્દની વ્યુત્પત્તિ વિદ્વાનોને વિચિત્ર લાગી છે. પાણિનિનાં સૂત્રોની સંગતિ પણ અહીં બેસાડી શકાતી નથી. (જેમ કે, કુત્સિત અર્થમાં क પ્રત્યય મહદંશે શબ્દની પરમાં લાગે છે : कुत्सितः अश्वः अश्वकः । એ સ્થિતિમાં યાસ્કે कुत्सितं द्राति इति कद्राति કેવી રીતે કહ્યું હશે ?), પરંતુ આ શબ્દ પાણિનિની પણ પૂર્વે ઘણા સમયથી અતિપરોક્ષવૃત્તિવાળો બન્યો હશે. (યાસ્કે √द्रा ધાતુનો 'શ્વગતિ' અર્થ દર્શાવ્યો છે, પરંતુ નિઘંટુમાં તે કેવળ ગત્યર્થક ધાતુ તરીકે નોંધાયો છે. પ્રાચીન સાહિત્યમાં પણ ધાતુ કોઈ ચોક્કસ પ્રાણી કે પક્ષીની ગતિ માટે સીમિત થયેલ નથી. ઋગ્વેદ અને અથર્વવેદમાં શત્રુઓની, અંધકાર વગેરેની ગતિ માટે તે વપરાયો છે. પ્રા.મેહેન્દળેએ विश्वकद्राकर्षः શબ્દ ઉપર સુદીર્ઘ ચર્ચા કરીને, યાસ્કથી પણ જુદા પડીને, વિસ્નો અર્થ 'પક્ષી' કર્યો છે. આ રીતે જોતાં જો विश्वकद्रને વિશેષણ ગણવામાં આવે તો તેનો અર્થ "પક્ષીની જેમ ખૂબ ઝડપથી દોડનાર" એવો થાય. તથા યાસ્કની જેમ કેવળ चकद्रનો નામ તરીકે અર્થ કરીએ તો "પક્ષીના જેવી ઝડપી ગતિવાળો કૂતરો, ઝડપી કૂતરો" થાય. વિશેષ માટે જુઓ: Nirukta Notes - I, pp. 50-71), શ્રી ડોલરરાય માંકડે 'ધિક્કારપાત્ર કૂતરાની પેઠે ખેંચે છે – તે' (આ. આનંદશંકર ધ્રુવ સ્મારક ગ્રંથ, ૧૯૪૪, અમદાવાદ, પૃ. ૨૧૮) એવો અનુવાદ કર્યો છે. कल्याणवर्णरूपः એવું ઉદાહરણ અનેકપર્વવાળા સમાસનું કેવળ ઉદાહરણ છે. આ રીતે યાસ્કે તદ્ધિતાન્ત શબ્દો અને સામાસિક શબ્દોનું કયા ક્રમે નિર્વચન કરવું તેનું દિગ્દર્શન કરાવ્યું. ત્યાર પછી તેણે એક મહત્ત્વની નોંધ મૂકી છે : नैकपदानि निर्ब्रूयात् । 'એકલાં = પ્રકરણહીન પદોનું નિર્વચન કયારેય ન કરવું.' દુર્ગ કહે છે કે કોઈ અભિદ્રોહ બુદ્ધિથી પ્રકરણ અને ઉપપદ રહિતનાં કેવળ પદોનું નિર્વચન પૂછે તો તે ન કરવું. કારણ કે પ્રકરણથી અનભિજ્ઞ હોવાને કારણે અન્યથા નિર્વચન થઈ જતાં પ્રત્યવાય લાગે છે અને લોકમાં ઉપહાસ પણ થાય છે, માટે એકલા અટૂલા પદોનું નિર્વચન ન કરવું.

6. नावैयाकरणाय । नानुपसन्नाय । अनिदंविदे वा । नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया ॥ उपसन्नाय तु निर्ब्रूयात् । यो वा अलं विज्ञातुं स्यात् । मेधाविने । तपस्विने वा ॥३॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।

असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् ॥ (१) य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।

तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह ॥ (२) अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।

यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ (३)

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।

यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥ (४)

इति ॥ निधिः शेवधिरिति ॥४॥

नावैयाकरणायेति । उक्तं निर्वचनलक्षणम्, अधुना यस्मै निर्वक्तव्योऽयमुक्तनिर्वचनलक्षणः समाम्नायः, तस्य लक्षणं वक्तव्यमिति तदर्थमिदमारभ्यते, – "नावैयाकरणाय" । यस्तावदवैयाकरणः, तस्मै न निर्वक्तव्योऽयं समाम्नायो न ह्यसावलक्षणज्ञत्वात् व्युत्पाद्य निरुच्यमानमेतद् बुध्येत, ततो व्यर्थ एव श्रमः स्यादिति ।

किञ्च "नानुपसन्नाय" । किमिति महददद्भुतमनेन कृतं यत् व्याकरणमधीतमिति, — एतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात्, धर्मो हि सर्वथैवापरित्याज्यः, तस्माद् वैयाकरणायापि सम्यगुपसन्नाय परां शिष्यवृत्तिमास्थितायैव निर्ब्रूयात् ।

नैवमेव, किञ्च "अनिदंविदे वा" । अवैयाकरणोऽपि जडः कश्चिदसमर्थ एव वेदितुं स्यात्, बहु वेदितव्यमत्रास्ति, देवतादि किञ्चित् तस्मै वैयाकरणायापि इदं वेदितुमसमर्थाय अनिदंविदे नैव निर्ब्रूयात् । अथवा । इदमित्यात्मपर्य्यायवाचि । इदंविदे आत्मविदे, योगिने । स ह्यात्मज्ञानविधूतकल्मषोऽल्पेनैव यत्नेन बोद्धुं सूक्ष्मानर्थान् शक्त इति इदंविदे निर्ब्रूयात् । अथवा । यत्किञ्चिच्छास्त्रमिदमिति निर्दिश्यते । येन ह्यन्यत् किञ्चिदश्रुतं पूर्वशास्त्रम्, तस्मै न निर्ब्रूयादिदं निरुक्तशास्त्रमनास्फालित-हृदयकुड्मलाय ॥

किङ्कारणम् ? "नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया" । यो हि न विजानाति नावबुध्यते, तस्याविज्ञातुर्नित्यकालमेव विज्ञाने असूया, स ह्यनवबुध्यमान आत्मीयं दोषमाचार्य्य एवावसृजति, – स्वयमेव तावदयं न बुध्यते किमस्मान् बोधयिष्यतीति । एतस्मात् कारणादश्रुतपूर्वान्यशास्त्राय अखिन्नमनसे नेदं निर्ब्रूयात् ॥

"उपसन्नाय तु निर्ब्रूयात्, यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा" । य एव तु मेधावी स्यात्, – अन्यजन्मान्तरानुभावितया प्रज्ञया युक्तः, यो वा तपस्वी, कामं ताभ्यामवैयाकरणाभ्यामपि निर्ब्रूयादेव, — न हि तयोरसाध्यं किञ्चिदस्ति, — तपसा हि स्वयमपि वेदार्थः प्रादुर्भवेदेव । पूर्वेषामृषीणां मेधाव्यपि च स्वयमुत्प्रेक्षितुं शक्नुयात्, किमुतोच्यमानमवबोद्धुम् । यो वान्यः कश्चिदलं पर्य्याप्तो विज्ञातुमेतच्छास्त्रं भवेत्, दृढग्राही स्थिरबुद्धिः, तस्मै निर्ब्रूयादेव सर्वथा । अनुपसन्नाय नैव निर्ब्रूयात्, यद्यपि तपस्वी, मेधावी, दृढग्राही वा ।

उक्तं हि, — "यश्चान्यायेन निर्ब्रूयाद्यश्चान्यायेन पृच्छति । तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति" ॥६॥

अथाप्येतमर्थमधिकृत्योदाहरन्ति, – "विद्या ह वै ब्राह्मणमाजगाम" – इति । विद्या किल कामरूपिणी भूत्वा विद्याधिदेवता संयतात्मानं विदितवेदाङ्गवेदार्थं ब्राह्मणं प्रति कश्चिदाजगाम । तमेत्य प्रह्वीभूतोवाच, — किम् ? इति । "गोपाय मा" रक्ष माम् । ततः "ते" "अहं" गुप्ता सती "शेवधि" भविष्यामि, सुखनिधानमित्यर्थः । आह, — कुतः पुनस्त्वां रक्षामि ? "असूयकायानृज-वेऽयताय" । असूयकः परापवादशीलः । अनृजुः, यस्य मनोवाग्देहेषु असमाः प्रवृत्तयः । अयतः, विप्रकीर्णेन्द्रियः, – यत्किञ्चन कायाशुचिः । एवंलक्षणाय "न मा ब्रूयाः" त्वम् । किन्तथा भविष्यति ? "वीर्य्यवती तथा" अहं तव "स्यां" भवेयमित्यर्थः ॥

"य आतृणत्त्यवितथेन कर्णौ" । अधुना शिष्योपदेशमाह, — य आतृणत्ति, आभिनत्ति, अपिहिताविव सन्तौ कर्णौ विवृणोति । अवितथेन, सत्येन ब्रह्मणा । कथम्पुनरातृणत्ति ? "अदुःखं कुर्वन्नमृतं सम्प्रयच्छन्" । यो हि किञ्चिदातृणत्ति, स दुःखयति, अयं पुनः सुखमातृणत्ति । किञ्च अमृतत्वप्राप्तिहेतुज्ञानं सम्प्रयच्छन् । य आतृणत्ति तस्मै किम् ? इति । उच्यते, – "तं मन्येत पितरं मातरञ्च, नेतरौ मातापितरावित्यभिप्रायः । उक्तञ्च, – "उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता । ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् (म.सं. २, १४६)" । "तस्मै" मातापितृभूताय गुरवे "न द्रुह्येत्" । "कतमच्चनाह" – कदाचिदपि आपद्यपि कष्टायामित्यभिप्रायः ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अधुना इतरान् दुष्टशिष्यान् अभिशपन्ती विद्या इदमाह, —

"अध्यापिता ये गुरुं नाद्रियन्ते" इत्यादि । अध्यापिताः सन्तो ये गुरुं प्रति नाद्रियन्ते, नादरं कुर्वन्ति । के पुनस्ते ? इति । उच्यते, – "विप्राः" मेधाविनः सन्तो गृहीतविद्याः । कथम्पुनर्नाद्रियन्ते ? "वाचा मनसा कर्मणा वा" । आह, – किं तेषाम् ? इति । उच्यते, – "यथैव" "ते" तस्य "गुरोः" "न" "भोजनीया" न भोज्याः, न भोजनार्हाः, "तथैवः" "तान्" "तत्" "श्रुतम्" अपि "न भुनक्ति" न पालयन्ति, श्रुतफलेन न संयुनक्तीत्यर्थः ॥

अधुना यस्मै वक्तव्या, तस्य लक्षणं ब्रवीति, – "यमेव" "विद्याः" जानीयाः तम् । "शुचिमप्रमत्तम्" यमनियमेषु । "मेधाविनं" च "ब्रह्मचर्य्येणोपपन्नम्" । किञ्च, यः ते न "द्रुह्येत्" न द्रोहमुपगच्छेत् । "कतमच्चनाह" कदाचिदपि सर्वास्वप्यापत्सु "तस्मै मा ब्रूयाः" "त्वम्" "निधिपाय" गोप्त्रे "ब्रह्मन् !" ॥

आह, – "निधिः" कः ? इति । उच्यते, – "शेवधिः" इति । शेव इति सुखनाम, सुखनिधानमित्यर्थः । ब्रह्मलोको हि निधिः सुखानां कृत्स्नस्य जगतो यज्ञद्वारेण, अत इदमुक्तं "निधिः शेवधिरिति" ॥७॥

इति जम्बुमार्गाश्रमवासिन आचार्य्यभगवद्दुर्गस्य कृतौ
निरुक्तव्याख्यायां [द्वितीयाध्यायस्य] सप्तमस्याध्यायस्य
प्रथमः पादः ॥१॥

---

6. (અનુ.) : જે વૈયાકરણ ન હોય, જે (શિષ્યભાવે) નજીક ન આવ્યો હોય અને જે આને (= નિરુકતને) જાણનારો ન હોય તેને આ નિરુકત ન ભણાવવું, કારણ કે અજ્ઞાનીને હંમેશા જ્ઞાનને વિશે અસૂયા હોય છે. માટે જે (શિષ્યભાવે) નજીક આવ્યો હોય તેને આ નિરુકત ભણાવવું. અથવા તો જે આ (નિરુકત)ને ભણવા સમર્થ હોય, મેધાવી હોય કે તપસ્વી હોય (તેને આ ભણાવવું).

વિદ્યા એકવાર (વેદાર્થને જાણનાર) બ્રાહ્મણની પાસે આવી અને કહ્યું : "મારું રક્ષણ કર, હું તારો નિધિ છું. ઈર્ષ્યા કરનાર, કુટિલ અને અપવિત્ર/નિરુદ્યમી વ્યક્તિને મારો ઉપદેશ ન કરીશ. આ કરવાથી હું વીર્યવતી બનીશ." (૧)

દુ:ખ દૂર કરનાર અને અમૃત આપનાર જે (ગુરુ) સત્યથી (अवितथेन) (શિષ્યના) બે કાનને ખોલી નાખે છે, તેવા (ગુરુ)ને માતા અને પિતા માનવા જોઈએ. તથા તેમનો કયારેય દ્રોહ ન કરવો જોઈએ. (૨)

જેમને ભણાવવામાં આવ્યા છે તે વિપ્રો (શિષ્યો) વાણી, મન અને કર્મથી ગુરુનો આદરસત્કાર ન કરે તો, જેવી રીતે ગુરુ તેઓની કાળજી રાખતા નથી તેવી રીતે આ વિદ્યા (શ્રુત-અધીત) પણ તે શિષ્યોની પ્રત્યે ધ્યાન આપતી નથી. (અર્થાત્ તેમનું રક્ષણ કરતી નથી.) (૩)

"હે બ્રહ્મન્ । જેને તું પવિત્ર, અપ્રમાદી, મેધાવી અને બ્રહ્મચર્યનું પાલન કરનાર ગણતો હોય, તથા જે તારો કયારેય દ્રોહ ન કરે તેવાને અર્થાત્ (વિદ્યારૂપી) નિધિનું રક્ષણ કરનાર શિષ્યને મારો ઉપદેશ કરજે." (૪)

અહીં (પ્રથમ મન્ત્રમાં) 'શેવધિ' શબ્દ આવ્યો છે, તેનો અર્થ 'નિધિ' (= સુખનિધાન) થાય છે. અહીં દ્વિતીયાધ્યાયનો પ્રથમ પાદ પૂરો થાય છે.

6. (વિમર્શ) ઉપરની ચર્ચામાં યાસ્કે નિરુકતના અધિકારીની ચર્ચા કરી છે. એમાં સૌથી પહેલાં વર્જ્યશિષ્યનું નિરૂપણ કર્યું છે : ૧. 'જે વૈયાકરણ ન હોય તેને આ નિરુકત ન ભણાવવું'. પ્રા. રાજવાડે કહે છે કે આ ખૂબ સૂચક છે. વ્યાકરણશાસ્ત્રનાં સૂત્રોને અધીન રહીને નિરુકતમાં વ્યુત્પત્તિઓ આપવામાં આવી છે, તે વ્યુત્પત્તિકારોની કલ્પનાઓ નથી. વ્યાકરણશાસ્ત્રને આધારે જ નિરુકતકારો વ્યુત્પત્તિઓ આપે છે અને જ્યાં વ્યાકરણશાસ્ત્ર મદદ કરતું નથી ત્યાં જ એ વ્યાકરણશાસ્ત્રનું પૂરક બને છે. માટે નિરુકતના અભ્યાસની પૂર્વે વ્યાકરણાધ્યયન અનિવાર્ય ગણાયું છે. ૨. વિનીતવેશે શિષ્યભાવે જે ગુરુની પાસે જતો નથી તેવાને પણ નિરુકત ન ભણાવવું. છાન્દોગ્ય અને મુંડકોપનિષત્માં 'વિધિવત્ સમિત્પાણિ' થઈને શિષ્ય ગુરુની પાસે જાય (उपससाद, उपसन्नः) એવા ઉલ્લેખો છે. વિદ્યોપાર્જનની આ દૃઢમૂલ પ્રણાલિનો અહીં નિરુકતમાં પણ પડઘો પડ્યો છે. આથી દુર્ગ કહે છે કે કોઈ વૈયાકરણ હોય તો પણ જો વિધિવત્ શિષ્યભાવે ગુરુની પાસે ન જાય તો તેને નિરુકત ન ભણાવવું. ૩. જે 'આને' ન જાણતો હોય તેને પણ નિરુકત ન ભણાવવું. અહીં अनिदंवित् એટલે વેદનું અર્થઘટન કરનાર એક શાસ્ત્ર તરીકે નિરુકતનું જે સકલ મહત્ત્વ જાણતો નથી તેવાને આ ન ભણાવવું. દુર્ગ જણાવે છે કે કોઈ જડ વૈયાકરણ હોય તો પણ આને જાણી શકતો નથી. કેમ કે અહીં (નિરુકતમાં) દેવતાદિ વિષયક ઘણું જાણવાનું હોય છે. માટે એ જાણવા માટે અસમર્થ હોય તેવાને આ ન ભણાવવું. દુર્ગ કહે છે કે અહીં इदम् પદ આત્મપર્ય્યાયવાચિ પણ હોઈ શકે. આમ જે इदंवित् = आत्मविद् (योगिन्) ન હોય તેવાને પણ આ ન ભણાવવું. આત્મજ્ઞાનથી જેનાં પાપો નષ્ટ થયાં હોય તેવો પુરુષ જ સૂક્ષ્મ અર્થોને સમજવા શક્તિમાન બને છે. અથવા તો, દુર્ગ ત્રીજો વિકલ્પ દર્શાવે છે: જેણે એકાદ શાસ્ત્રનો પણ અભ્યાસ ન કર્યો હોય તેવાને अनिदंवित् કહે છે. કોઈપણ એકાદ શાસ્ત્રના અભ્યાસથી

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri..

મનુષ્યની બુદ્ધિ જાગૃત થાય છે. આ અનિદંવિત્‌ને નિરુક્ત નહીં ભણાવવાનું કારણ એ છે કે જે અજ્ઞાની હોય છે તે જ્ઞાનની અને જ્ઞાનીની અસૂયા કરે છે. આમ, વર્જ્યશિષ્યનું નિરૂપણ કર્યા પછી યાસ્કે ગ્રાહ્યશિષ્યનું નિરૂપણ પણ કર્યું છે : શિષ્યભાવે વિધિવત્ સમિત્પાણિ થઈને ગુરુની નજીક જે આવે તેને આ શાસ્ત્ર ભણાવવું, તથા જે આને ભણવા સમર્થ હોય, મેધાવી હોય અને જે તપસ્વી હોય તેને પણ આ ભણાવવું. આ રીતે યાસ્કે નિરુક્તના અધિકારી-અનધિકારીઓનું નિરૂપણ કર્યું છે. આના સમર્થનમાં તેમણે એક 'વિદ્યાસૂક્ત' પણ રજૂ કર્યું છે. (જે અનુવાદથી સ્પષ્ટ છે.) આ મન્ત્રો યાસ્કના સમયમાં પ્રચલિત હશે, વેદની મૂળ સંહિતામાં તે આજે ઉપલબ્ધ થતા નથી, પણ સંહિતોપનિષદ્ બ્રાહ્મણમાં તે મળે છે. આ રીતે શાસ્ત્રારંભે અનુબંધચતુષ્ટયમાંથી અધિકારીરૂપ અનુબંધનું ઉપર વર્ણન કર્યું છે. અહીં દ્વિતીય અધ્યાયનો પ્રથમપાદ પૂરો થાય છે. નિરુક્તનો આખો પ્રથમ અધ્યાય અને દ્વિતીય અધ્યાયનો પ્રથમપાદ સમગ્ર નિરુક્તની પ્રસ્તાવના (ભૂમિકા) રૂપે લખાયા હોય એમ લાગે છે.

द्वितीयः पादः

7. अथातोऽनुक्रमिष्यामः । गौः इति पृथिव्या नामधेयम् (निघण्टुः १/१/१) । यद् दूरंगता भवति । यच्चास्यां भूतानि गच्छन्ति । गातेर्वा । ओकारो नामकरणः । अथापि पशुनाम इह भवति । एतस्मादेव । अथाप्यस्यां ताद्धितेन कृत्स्नवन् निगमाः भवन्ति । 'गोभिः श्रीणीत मत्सरम्' (ऋ.सं.९/४६/४) इति पयसः । मत्सरः सोमः । मन्दतेः तृप्तिकर्मणः । मत्सरः इति लोभनाम । अभिमत्तः एनेन धनं भवति । पयः पिबतेर्वा । प्यायतेर्वा । क्षीरं क्षरतेः । घसेर्वा । ईरो नामकरणः । उशीरमिति यथा । 'अंशुं दुहन्तो अध्यासते गवि' (ऋ.सं. १०/९४/९) इत्यधिषवणचर्मणः । अंशुः शम् अष्टमात्रो भवति । अननाय शं भवतीति वा । चर्म चरतेर्वा । उच्चृतं भवतीति वा । अथापि चर्म च श्लेष्मा च । गोभिः सन्नद्धो असि वीळयस्व । इति रथस्तुतौ । अथापि स्नाव च श्लेष्मा च । गोभिः संनद्धा पतति प्रसूता' (ऋ.सं. ६/७५/११) इतीषुस्तुतौ । ज्यापि गौरुच्यते । गव्या चेत् ताद्धितम् । अथ चेन्न गव्या गमयतीषूनिति ॥५॥

वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः (ऋ.सं. १०/२७/२२) । वृक्षे वृक्षे धनुषि धनुषि । वृक्षो व्रश्चनात् । नियता मीमयत् गौः । शब्दं करोति । मीमयतिः शब्दकर्मा । ततो वयः प्रपतन्ति पुरुषान् अदनाय । विः इति शकुनिनाम । वेतेर्गतिकर्मणः । अथापीषुनामेह भवति । एतस्मादेव ॥

"समाम्नायः समाम्नातः, स व्याख्यातव्यः" – इति प्रतिज्ञातम् (२ पृ.) । सा च पुनरियं व्याख्या सामान्या वैशेषिकी च । तत्र सामान्या, — सर्वेषां नाम्नामिदं सामान्यलक्षणम्, इदमाख्यातानाम्, इदमुपसर्गाणाम् इदं निपातानाम् इति । सोऽयमनयैव प्रकारया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः, तदनुषक्तान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि, आगमश्च परिशोधितः, वेदो वेदाङ्गव्यूहश्च सप्रयोजन उक्तः, निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयविभागेन, निर्वचनलक्षणञ्चानेकप्रपञ्चमुक्तम् ।

अथेदानीं विशेषव्याख्यया प्रतिपदमयं समाम्नायो व्याख्यातव्यः, तदधिकारार्थोऽयम् "अथ" शब्दः । "अतः" शब्दः क्रमे हेतौ वा । सामान्यव्याख्यानादनन्तरं विशेषव्याख्यानमेवावसरप्राप्तमित्येवं क्रमे । अथवा हेतौ । यस्मात् सामान्यतः समाम्नायो व्याख्यातः अत इदानीं विशेषतः "अनुक्रमिष्यामः" आनुपूर्व्येण क्रमिष्यामो वर्णयिष्यामः, व्याख्यास्येति शेषः ।

आह, — किंलक्षणा पुनरसौ व्याख्या ? इति । उच्यते, — तत्त्वपर्य्यायभेदसङ्ख्यासन्दिग्धसन्दिग्धोदाहरणतन्निर्वचनविभागेन यदाख्यानं सा व्याख्या निघण्टुप्रकरणे । तद्यथा । तत्त्वम्, — "गौरिति पृथिव्या नामधेयम्" — इत्येवमादि । पर्य्यायवचनम्, प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनम्, तद्यथा, — पृथिव्या नामधेयं गौरिति । भेदो व्युत्पत्तिरिति समानार्थः, तद्यथा,–"यद् दूरं गता भवति" — इत्येवमादि । सङ्ख्या, तद्यथा, — "पृथिवीनामधेयान्येकविंशतिः" । सन्दिग्धम्, — "तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते" इत्येवमादि । सन्दिग्धोदाहरणम्, — "य ईं चकार" – इत्येवमादि । तन्निर्वचनम्, — "बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः" — इत्येवमादि । एवम्प्रकारया व्याख्यया इदं नैघण्टुकप्रकरणं व्याख्यास्यते ॥

"गौरिति पृथिव्या नामधेयम्" । आह, — यस्मात् कारणात् द्रव्ये शब्दोनिवेशो नैरुक्तानां, तदुच्यतां कारणं, केन कारणेन गोशब्दः पृथिव्यां सन्निविष्टः ? इति । उच्यते, — "यत्" तस्मात् इयं "दूरम्" अध्वानं प्रति "गता भवति" न ह्रस्या अन्त उपलभ्यते, "यत्" यस्मात् "च" "अस्यां भूतानि गच्छन्ति" आधारभूतायाम् । एवं कर्तृकारकमधिकरणं वा योज्यम् । "गातेर्वा" 'गाङ्गतौ (भू. आ.)' इत्यस्य धातोः "ओकारो नामकरणः" प्रत्ययः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अथापि" गौरित्येतत् "पशुनाम" "भवति" "इह" एव कारकद्वये, "एतस्मादेव" धातुद्वयाद् गमेगतिर्वा । "अथाप्यस्याम्" एव पशुगवि "ताद्धितेन" प्रयोगेनाकृत्स्नायां सत्यां "कृत्स्नवन्निगमा भवन्ति" । तद्यथा, — "गोभिः श्रीणीत मत्सरमिति" गोरेकदेशस्य "पयसः" कृत्स्नवत् प्रयोगः । तदेतच्छिष्यबुद्धिव्युत्पादनार्थमनेकप्रकारं शब्दवृत्तिविषयोपप्रदर्शिनं क्रियते, कथन्नामोपप्रदर्शितशब्दवृत्तिविषयोऽसंमुह्य न मन्त्रार्थान् निर्ब्रूयादिति ॥

आधावत, सुहस्त्यः शुक्रा गृभ्णीत मन्थिना । गोभिः श्रीणीत मत्सरम् ॥" (ऋ.सं.७,१,३,४) । इमां गायत्रीमयास्य आङ्गिरसोऽपश्यन् । ग्रावस्तुतौ विनियुक्ता । हे अध्वर्य्यवः ! एभिः ग्रावभिः संस्कृत एष सोमः । ते यूयं हे 'सुहस्त्यः' सुवर्णेनालङ्कृतहस्ताः किम् ? 'आधावत' । 'गृभ्णीत' गृह्णीत, एतौ शुक्रा मन्थिना ग्रहावनतिक्रान्तकालम् । किञ्च, 'गोभिः' गोभ्योऽभिनिष्पन्नेन रसेन 'श्रीणीत' एनम् 'मत्सरं' मादयितारं सोमं मैत्रावरुणग्रहाणामुपगतम् । "शृतशीतेन तृतीयसवने वा पूतभृत्याशिरेण ततोऽनतिक्रान्तकालं जुह्वत" एवं मन्त्रविधानादशक्यत्वाच्च गोभिः श्रपणस्य गव्येन पयसेति गम्यते ।

"मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः" तृप्यन्ति हि अनेन देवताः ॥

शब्दसामान्यप्रसङ्गप्रसक्तमुच्यते, – "मत्सर इति लोभनामाभिमत्त एनेन् धनं भवति" । तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति ॥

पर्य्यायाख्यानप्रसक्तं निरुच्यते, — "पयः पिबतेर्वा पानार्थस्य (अदा. प.) पीयते हि तत् । "प्यायतेर्वा" वृद्ध्यर्थस्य (भू.आ.), तेन हि वर्द्धन्ते प्राणिनः ॥

प्रसक्तानुप्रसक्तं निरुच्यते, — "क्षीरं क्षरतेः" श्च्योतनार्थस्य (भू.आ.) श्च्योतते हि तदूधसः । "घसेर्वेरो नामकरणः" अदेर्घस आदेशः क्रियते, अतस्तेनैव सिद्धरूपेण निर्दिश्यते । धात्वन्तरमिति वा केचित् । ज्ञापकञ्च ददाति, – "उशीरमिति यथा" । 'वश कान्तौ (अदा. प.)' तस्य कृतसम्प्रसारणस्य ईरप्रत्ययेनोशीरमिति भवति । तद्धि सौगन्ध्याक्रान्तं भवति ॥

"अंशु दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः" । कृत्स्नवदभिधायकः । "ते सोमादो हरी इन्द्रस्य निंसतेऽशुं दुहन्तो अध्यासते गवि ॥ तेभिर्दुग्धं पपिवान् सोम्यं मध्विन्द्रो वर्द्धते प्रथते वृषायते ॥" (ऋ.सं. ८,४,३०,४) । एषा जगती । अर्बुदो नाम काद्रवेय ऋषिः तस्यार्षम् । ग्रावस्तुतौ विनियुक्ता । 'ते' एते ग्रावाणः 'सोमादः' सोमभक्षयितारः यदाभिषवकर्मणि प्रवर्त्तन्ते, अथ तदा 'हरी इन्द्रस्य' अश्वौ, यज्ञागमनार्थमितेषां शब्दमुपश्रुत्य संस्कृतं सोमं मन्वानौ, रथे योगमिच्छन्तौ, आत्मना ऋजीषं भक्षयिष्यन्तौ, इन्द्रञ्च सोमं पाययिष्यन्तौ, स्वयमेव 'निंसते, नीयेनमिते युक्तौ आवाहे, — इन्द्र ! गच्छ यज्ञायतनं संस्कृतः सोमः' इति । तदैव च ऋत्विजोऽपि त्वरमाणा इन्द्रौ — स्थानकालमभ्यर्णमन्वानाः 'अंशुं' सोमांशम् अभिषुत्य 'दुहन्तः' प्रपूरयन्तः । 'गवि अधि' गोरुपरि गोरवयवे अधिषवणचर्मणि । एतत् कर्मकुर्वाणा इदं प्रतीक्षमाणा 'आसते' । अथ स 'इन्द्रः' एत्य 'तेभिः दुग्धम्' ऋत्विग्भिः प्रचारितं 'पपिवान्' पीतवान् 'सोम्यं मधु' सोममयं तेन तृप्तः । ततोऽनन्तरं 'वर्द्धते' वीर्य्येण । अथ तेन च शरीरेण 'प्रथते' विस्तीर्य्यते, विस्तीर्णश्च स्वेन वीर्य्येण मेघं विदार्य्य 'वृषायते' वर्षं प्रवर्त्तयते । तदिदं सर्वमपि वर्षादि जगदनुग्राहकमैन्द्रं कर्म । अभिषवद्वारेण, सोमाभिषवो ग्रावाधीनमित्येवं ग्रावस्तुतिः ॥

निगमप्रसक्तं निरुच्यते, — "अंशुः शमष्टमात्रो भवति" । व्याप्तमात्रो हि यजमानेन तस्यैव शं भवति, सुखी भवति । इष्टसोमो ह्यनृणोऽहमिति विगतमनोदुःखो भवति "अननाय शं भवतीति वा" । अननाय जीवनाय शं सर्वेषां भूतानां भवति, सुखो भवतीति वा । यज्ञो हि वर्षे प्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुखं जीवन्ति ॥

व्याख्यानप्रसक्तं निरुच्यते, — चर्म चरतेर्वा" चरितं हि तत्सर्वस्मिन् शरीरे गतमित्यर्थः । "उच्चृतं भवतीति वा" उच्चृतम् उत्कर्त्तितं शरीरादिति ।

"अथापि चर्म च श्लेष्मा च" गोशब्देनोच्यत इति शेषः । "गोभिः सन्नद्धो असि वीलयस्वेति रथस्तुतौ" "वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः । गोभिः सन्नद्धो असि वीलयस्वास्थाता ते जयतु जेत्वानि ॥" (ऋ.सं. ४,७,३५,१) । (य.वा.सं. २९,५२) । (अथ.सं. ६,१२५,१) । स हि चर्मणावनद्धो भवति, श्लेष्मणा च तस्यारादयः संश्लेषिता भवति ॥

"अथापि स्नाव च श्लेष्मा च" गोशब्देनोच्यत इति शेषः । "गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ' सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता । यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥ (ऋ.सं.५,१,२१,१) ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(य.वा.सं. २९,४७) सा हि स्नाव्ना वेष्टिता भवति, श्लेष्मणा च संश्लेषिता ॥

"ज्यापि गौरुच्यते"। सा पुनः "चेत्" यदि "गव्या ताद्धितम्" अभिधानम्, "अथ" पुनः "न चेत् गव्या, गमयतीषूनिति" गौरन्यद्रव्यमपि, — ॥१॥

"वृक्षे वृक्षे नियतामीमयद् गौस्ततो वयः प्रपतान् पूरुषादः। अयेदं विश्वं भुवनं भयात् इन्द्राय सुन्वदृषये च शिक्षत् ॥ (ऋ.सं. ७,७,१९,२) । वसुक्रस्येन्द्रपुत्रस्येदमार्षम् । त्रिष्टुबन्द्री । महाव्रते मरुत्वतीये शस्यते । इन्द्रो भगवानैश्वर्य्ययोगात् संग्रामेष्वनेकबाहुर्भूत्वानेकानि धनूंष्यादत्ते, तानि मन्त्रकृद्दृष्ट्वैवमाह — "वृक्षे वृक्षे" वृक्षावयवे "धनुषि धनुषि" यावन्तीन्द्रेण गृहीतानि धनूंषि, तेषु सर्वेषु, प्रत्येकं "नियता" निबद्धा, "गौः" गव्या, गमयित्री वा शराणाम्, इन्द्रबाह्वाकृष्टा "अमीमयत्" मीमयति "शब्दं करोति"। जात्यभिप्रायेणैकवचनम्। "ततः" शब्दकरणानन्तरमेव "प्रपतान्" "प्रपतन्ति" "वयः" अथवा 'ततः' ततो धनुषः 'वयः' पक्ष्यवयवपत्रसम्बन्धात् इषवोऽपि 'वयः' पक्षिणः। अथवा 'वेतेर्गतिकर्मणः। साक्षादेव इषवः 'वयः' न गुणवृत्या। ते 'प्रपतान्' प्रपतन्ति 'पुरुषानदनाय' भक्षणाय, ते हि शत्रूणां प्राणान् भक्षयन्ति। अथ अयमेवमतिप्रभाव इन्द्र इति ज्ञात्वा 'विश्वं' सर्वं 'भुवनं' भूतजातं यावत् किञ्चिदविकृतं कर्मणि 'भयाते' बिभेति। अथं बिभ्यत् किं करोति ? 'इन्द्राय' इन्द्रार्थं 'सुन्वत्' अभिषवम् उचिते काले कुर्वत् 'ऋषये च' ऋत्विजे 'शिक्षत्' दक्षिणां ददते। इन्द्रोन्मुखमादरवंदास्ते। सर्वमन्यत् परिहाय य एवम्प्रभाव इन्द्रः, तं वयमभिप्रेतार्थसिद्धये स्तुमः ॥

निगमप्रसक्तं निराह, — "वृक्षो व्रश्चनात्" इति। स हि वृश्च्यते छिद्यते इन्धनार्थम्।

अत्र व्याख्याने गतार्थत्वात् न शेषो विव्रियते। एवं तावदेकदेशे कृत्स्नवदभिधानं भवतीति प्रदर्शितम् ॥

---

7. *(અનુ.)* હવે અમે (નિઘંટુના શબ્દોનું) ક્રમશઃ નિર્વચન કરીશું : गौः। ૧. એ પૃથિવીનું નામ છે જે દૂર સુધી ગયેલી છે. (√गम्लृ > गच्छ गतौ) અથવા તો આમાં (પૃથિવીમાં) બધાં ભૂતો જાય છે. √गाङ् गतौ ધાતુને औ પ્રત્યય લાગીને (गौः એવું નામ બન્યું છે.) ૨. गौः એ પશુવિશેષનું નામ પણ છે. એ નામ પણ ઉકત ધાતુ(ઓ)માંથી બન્યું છે. ૩. વળી, વેદમાં આ જ શબ્દના તદ્ધિતાન્ત પ્રયોગો પણ મળે છે : (क) [ગાયનો વિકાર (દૂધ) એ અર્થમાં વૈદિક પ્રયોગ છેઃ] "દૂધની સાથે સોમને મિશ્રિત કરો." અહીં गौः શબ્દ 'દૂધ' અર્થમાં વપરાયો છે અને 'મત્સર' શબ્દ 'સોમ' અર્થમાં વપરાયો છે. 'तृप्ति' અર્થવાળા √मन्द ધાતુમાંથી 'મત્સર' શબ્દ બન્યો છે. 'મત્સર' એ લોભનું પણ નામ છે. કેમ કે તેનાથી (લોભથી) માણસ ધનની પાછળ ગાંડો બને છે. 'પયસ્' શબ્દ √पा>पिब् (પાન કરવું) અથવા √प्याय् ધાતુ ઉપરથી બન્યો છે. (દૂધને માટે વપરાતો) 'क्षीर' શબ્દ 'વહેવું' અર્થવાળા √क्षर् અથવા 'ક્ષીણ થવું' અર્થવાળા √घस् ધાતુને ईर પ્રત્યય લાગીને બન્યો છે, જેવી રીતે उशीरम् શબ્દ બન્યો છે. (ख) [ગાયનો વિકાર (ચર્મ) એ અર્થમાં બીજો વૈદિક પ્રયોગઃ-] "સોમને નીચોવતી વખતે ગો-ચર્મ ઉપર બેસે છે." (અહીં गौः >गवि શબ્દ 'ચામડું' અર્થમાં વપરાયો છે.) (સોમને 'અંશુ' કહેવાય છે. કારણ કે) તે તરત વ્યાપ્ત થઈ જનાર -अष्टमात्र (अश्नोति=व्याप्नोति) હોય છે, તે સુખપ્રદ (शं भवति) હોય છે; અથવા તે જીવનને માટે સુખપ્રદ થાય છે. 'ચર્મ' શબ્દ √चर् (ચાલવું) અથવા √चृत् (ઉખાડવું) ધાતુ ઉપરથી બન્યો છે, કેમ કે ચર્મ શરીર ઉપરથી ઉખાડવામાં આવેલ હોય છે. (ग) [ગાયનો વિકાર (ચર્મ અને કફ-ચરબી - ?) એ અર્થમાં ત્રીજો વૈદિક પ્રયોગઃ-] "ચર્મ અને શ્લેષ્મથી તું બંધાયેલો છે, માટે દૃઢ બન." આવું રથની સ્તુતિમાં કહેવામાં આવ્યું છે. (घ) [ગાયનો વિકાર (સ્નાયુ-તંતુ-અને ચરબી) એ અર્થમાં ચોથો વૈદિક પ્રયોગઃ-] 'તંતુ અને ચરબીથી બંધાયેલ, તે (બાણ) છોડવામાં આવતાં દૂર જાય છે." બાણની સ્તુતિ કરતા મન્ત્રમાં આ રીતે (गौःનો ચોથા અર્થમાં) પ્રયોગ છે. ૪. પણછ (જ્યા) અર્થમાં પણ गौः જોવા મળે છે. જો गव्या એવું તદ્ધિતાન્ત નામ વપરાયું હોય તો પણ જો गव्या એવું નામ તદ્ધિતાન્ત ન હોય (અને પ્રેરક હોય) તો તે (ધનુષ્ય અર્થમાં છે એમ સમજવું, કેમ કે) "બાણને મોકલે છે", (હવે પછીના મન્ત્રમાં गौः શબ્દ 'પણછ' અર્થમાં વપરાયો છેઃ-) "પ્રત્યેક ધનુષ્યમાં બાંધેલી પણછ અવાજ કરે છે, ત્યારે મનુષ્યોને ખાનાર પક્ષીઓ ઊડે છે." અહીં वृक्षे वृक्षे એટલે પ્રત્યેક ધનુષ્યમાં. √व्रश्च (કાપવું) ધાતુ ઉપરથી 'वृक्ष' શબ્દ બન્યો છે. બાંધેલી પણછ मीमयत् એટલે કે અવાજ કરે છે. 'અવાજ કરવો' એ અર્થમાં √मीम् > मीमयति ધાતુ વપરાય છે. ત્યારે પુરુષોને ખાવા માટે પક્ષીઓ ઊડે છે. विः એ પક્ષીનું નામ છે; તે શબ્દ ગત્યર્થક √वी ધાતુ ઉપરથી બન્યો છે. આ (પણછ) સિવાય, બાણના નામ તરીકે गौः શબ્દનો જે પ્રયોગ છે ત્યારે તે પણ આ જ ધાતુ ઉપરથી સિદ્ધ થાય છે.

---

8. आदित्योऽपि गौरुच्यते। 'उताद: परुषे गवि' (ऋ.सं. ६/५६/३) । पर्ववति। भास्वति इत्यौपमन्यवः। अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते। तदेतेनोपेक्षितव्यम्। आदित्यतोऽस्य

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

दीप्तिर्भवतीति । 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः' (य.वा.सं. १८/४०) इत्यपि निगमो भवति । सोऽपि गौरुच्यते । 'अत्राह गोरमन्वत' (ऋ.सं.१/८४/१५) इति । तदुपरिष्टाद्व्याख्यास्यामः (निरु. ४/२५) । सर्वेऽपि रश्मयो गाव उच्यन्ते ॥६॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।

अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥ (ऋ.सं. १/१५४/६) ॥ तानि वां वास्तूनि कामयामहे गमनाय । यत्र गावो भूरिशृङ्गा बहुशृङ्गाः । भूरि इति बहुनो नामधेयम् । प्रभवतीति सतः । शृङ्गं श्रयतेर्वा । शृणातेर्वा शम्नातेर्वा । शरणायोद्गतमिति वा । शिरसो निर्गतमिति वा । अयासः अयनाः । तत्र तदुरुगायस्व विष्णोर्महागतेः परमं पदं परार्घ्यस्थमवभाति भूरि । पादः पद्यतेः । तन्निधानात्पदम् । पशुपादप्रकृतिः प्रभागपादः । प्रभागपादसामान्यादितराणि पदानि । एवमन्येषामपि सत्त्वानां संदेहाः विद्यन्ते । तानि चेत्समानकर्माणि समाननिर्वचनानि । नानाकर्माणि चेन्नानानिर्वचनानि । यथार्थं निर्वक्तव्यानि ॥

अथेदानीमन्येष्वर्थान्तरेषु गोशब्दोऽभिप्रसृतो बहुष्वित्येतत् प्रसङ्गतो दर्शयति । एतद्ध्यैकपदिके वक्तव्यमिह तु गोशब्दप्रसक्तमुच्यते, — "आदित्योऽपि गौरुच्यते" एतस्मिन् मन्त्रे । —

उतादः परुषे गवि सूरश्चक्रं हिरण्ययम् । न्यैरयद्रथीतमः" (ऋ.सं. ४,८,२२,३) । भरद्वाजस्येयमार्षम् । गायत्री । पौष्णी । पूषा पुनरादित्यो नैरुक्तानां दृष्ट्या, अन्यत्र इयं वै पूषेति भूमिरुच्यते । "उतादः" 'उत' अपि, अथ इति छन्दसि समानार्थाः । अपि त्वक्रमीरपः, अपि रसानादत्ते, अपि तमांस्यपहन्ति । 'अदः' अमुष्मिन् आदित्यमण्डले 'परुषि' पर्वभिस्तद्वति । अथवा भास्वति, भासा तद्वतीति । अहोरात्रादि पर्व तद्वतीत्यौपमन्यवः । 'गवि' गमनशीले मुहूर्त्तमप्यनवस्थायिनि 'सूरः' सूर्य्यः अवस्थितः । पूषा आदित्यमण्डलान्तः पुरुषः, तदेव पर्ववत् भास्वद् वा । 'चक्रं' चकनं क्रमणं वा गमनशीलं मण्डलं 'हिरण्ययं' तेजोमयं चक्रं चक्राकृतिः । 'न्यैरयत्' नियतगमनवृत्तिना मार्गेण नित्यकालमीरयति । उदयास्तमयमध्यन्दिनकालोपलक्षणार्थम् । अथवा अमुष्मिन् मण्डलेऽवस्थितः, पर्ववति मण्डलान्तःपुरुषः सूर्य्यो भगवान् । 'चक्रं' लवक्षणनिमेषत्रुटिमुहूर्त्ताहोरात्रार्द्धमासमासर्त्त्वयनसंवत्सरलक्षणं कालं चक्रं सर्वभूतहारि 'हिरण्ययं' हिरण्मयं सर्वभूतविनाशस्थितहेतुं 'न्यैरयत्' नित्यमीरयति । कीदृशः पुनः स सूर्य्याय ईरयति ? रथीतमः अन्येऽपि रथिनः सन्ति, अयन्तु मुहूर्त्तमप्यनवस्थितरथ इत्यतो रथीतमः । स एवङ्गुणयुक्तः पूषा, तं वयमभिप्रेतार्थसिद्ध्येस्तुमः ॥

"अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते" । एको रश्मिरादित्यस्य सुषुम्णो नाम, चन्द्रमसं प्रत्यवस्थितो दीप्यते । "तदेतेन" मन्त्रार्थविदा मन्त्रानुपेत्य "ईक्षितव्यम्" द्रष्टव्यम् । सेयमस्य चन्द्रमसो "दीप्तिः" ज्योत्स्ना इत्ययम् "आदित्यतः" आदित्यस्य अनुग्रहादेव "अस्य भवतीति" । अस्मदुपरि यच्चन्द्रमसो मण्डलं तत्तेजः सम्बन्धाद् दीप्तिमद् भवति, ततः सर्वा दिशः प्रकाशयति ।

यथा चैतदेवं तथा "सूषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति" राष्ट्रभृत्सु । "सुषुम्णः सूर्य्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम । स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥" (य.वा.सं. १८,४०) । अप्ययमप्यन्ये बहव इत्यपिशब्दः । 'सुषुम्णः' सुष्ठुसुख इत्यर्थः । सर्वाणि भूतानि नित्यमसौ ह्लादयति । कोऽसौ ? इति । 'सूर्य्यरश्मिः' सूर्य्यान्निःसृत्य चन्द्रमसं प्रति गतः 'चन्द्रमाः' । 'गन्धर्वः' सति सुषुम्णगमने गोशब्दवाच्यता । 'तस्य' गन्धर्वस्य सतः चन्द्रो धारयिता गन्धर्वसहितस्य प्रतिष्ठा । 'स न इदं' सोऽस्माकमिदं 'ब्रह्म क्षत्रं च' 'पातु' रक्षतु । किञ्च 'तस्मै' सुषुम्णाय सूर्य्यरश्मये 'स्वाहा' सु शोभनमिदमाभिमुख्येनाह, हविराज्यलक्षणमस्तु । स चेदं 'वाट्' वेतु पिबत्वित्यर्थः ॥

"सोऽपि सुषुम्णो रश्मिरेक एव "गौः" — इति "उच्यते" यथासौ गौस्तथेदमुदाहरणम्, — "अत्राह गोरमन्वतेति" । "तत्" पुनरेतत् "उपरिष्टात्" ऐकपदिके "व्याख्यास्यामः" ।

"सर्वेऽपि रश्मयो गाव उच्यन्ते" । यथैतदेव तथेयमृगुदाहरणम्, ॥२॥

"ता वां वास्तूनि" — इति । दीर्घतमस आर्षम् । वैष्णवी । त्रिष्टुप् । यूपावधाने विनियुक्ता, सोमातिरेकशस्त्रे च । वामिति दम्पतीत्यभिप्रेत्य द्विवचनम् । 'ता' "तानि" "वां" युवाभ्यामर्थाय "वास्तूनि" निवासस्थानानि 'उश्मसि' "कामयामहे" । 'गमध्यै'

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"गमनाय" "यत्र" येषु स्थानेषु । किम् ? "गावः" रश्मयः । 'भूरिशृङ्गाः' "बहुशृङ्गा" बहुदीप्तयः 'अयासः' अयनाः मुहूर्त्तमप्यनवस्थायिनः । किञ्च, 'अत्राह' तेषु स्थानेषु 'तत्' पदम् 'उरुगायस्य' उरुगमनस्य महागतेः भगवतो 'वृष्णः' "विष्णोः" 'परमं पदम्' आदित्यमण्डलं स्थानम् । स्थाने हि पदसञ्ज्ञा, पदस्थ इति लोकेऽपि वक्तारो भवन्ति । 'अवभाति' अर्वागिदं सर्वं कृत्वा भाति दीप्यते भूरि बह्वित्यर्थः । इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । - "भूरीति" एतत् 'बहुनो नामधेयम्' । "प्रभवति" हि तद् बहुधापि दीयमानम् । "शृङ्गं श्रयतेः" तद्ध्याश्रितं भवति शिरसि । "शृणातेर्वा" हिंसार्थस्य । तेन हि हिनस्ति । "शिरसो निर्गतमिति वा" शृङ्गं परमेऽर्द्धे स्थितं परार्द्ध्यस्थम् । अथवा परमर्द्ध्या युक्ते स्थाने स्थितं परार्द्ध्यस्थम् । "पादः पद्यतेः" गत्यर्थस्य । पद्यते हि तेन । "तन्निधानात् पदम्" यदुत्पद्यते, तत् सरूपमेव पांसौ अन्यत्र वा तत् पदमित्युच्यते पशोर्मनुष्यस्य वा । "पशुपादप्रकृतिः" चतुर्भागसामान्यात् । "प्रभागपादः" दीनारादिपादः । "प्रभागपादसामान्यादितराणि पदानि" ग्रन्थपदानि क्षेत्रपदानि वा । विभागो हि तेष्वपि समान एव ॥ प्रसक्तानुप्रसक्तमिदमुक्तम् ॥

अधुनोपसंहरति' —. "एवमन्येषामपि सत्त्वानां सन्देहा विद्यन्ते" न केवलं गोशब्दे पदशब्दे वा । तेषु हि त्वेतदौत्सर्गिकं निर्वचनं लक्षणं द्रष्टव्यम्, — "तानि" "चेत् समानकर्माणि" यदि सामान्यक्रियया युक्तानि, ततः "समाननिर्वचनानि" एव कर्त्तव्यानि । अथ पुनः 'नानाकर्माणि' ततो "नानानिर्वचनानि" । एवं "यथार्थं निर्वक्तव्यानीति" ।

अधुनैवमुक्त्वोदाहरणैरेव तत्र सन्देहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शयन्नाह, — "इमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि" । "तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा" । लोके हीदं सर्वभूतजातमन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते, तेषाञ्च पृथिवी प्रथमा, तस्मात् तत आरम्भः । एकविंशतिरिति संख्या (२१) । पृथिवीनामधेयानि, स्वार्थे धेयप्रत्ययः नामैव नामधेयम् । अनुक्रान्तानि, आनुपूर्व्येण पठितानीत्यर्थः । एकविंशतिर्यान्यनुक्रान्तानि, एभ्योऽन्यान्यपि यानि कानिचित् स्युः, तान्युपलभ्य निर्वक्तव्यानि । तद्यथा, - कु इत्येतदसमाम्नातम् पृथिव्या नामधेयम् । उक्तं हि, — "नाग्निचिन्नरकं याति न सत्पुत्रो न कुप्रदः' - इति ।

---

8. (અનુ.) ५. (क) આદિત્યને પણ गौः કહેવામાં આવે છે : "પર્વયુકત અથવા ચમકતા સૂર્યમાં," અહીં પરુષે એટલે સાંધાવાળા. ઔપમન્યવના મતે તેનો અર્થ 'પ્રકાશિત' થાય છે. આ (સૂર્ય)નું એક કિરણ ચન્દ્રમાને પ્રકાશિત કરે છે. આનાથી તેની પરીક્ષા કરવી જોઈએ. ચન્દ્રમાનો પ્રકાશ સૂર્યને કારણે છે, કેમ કે "સુષુમ્ણ એ સૂર્યનું કિરણ છે અને ચન્દ્રમા ગન્ધર્વ છે." - એવો મન્ત્ર છે. (સુષુમ્ણ નામનાં કિરણો ચન્દ્રમાને પ્રકાશિત કરે છે અને ચન્દ્રમા તે કિરણોને ધારણ કરે છે તેથી, गां धरतीति गन्धर्वः । વ્યુત્પતિ મુજબ ગંધર્વ કહેવાયો છે.) (ख) સૂર્યનું આ 'સુષુમ્ણ' નામનું કિરણ પણ गौः કહેવાય છે. જેમકે, "અહીં તેમણે સૂર્યના કિરણનો વિચાર કર્યો." આ મન્ત્રની વ્યાખ્યા આગળ ઉપર કરવામાં આવશે. (ग) અથવા (સૂર્યના એક સુષુમ્ણ કિરણને જ માત્ર નહીં, પણ) બધાં જ કિરણોને गौः કહે છે : ('હે દમ્પતી !') જ્યાં ઘણાં શૃંગોવાળાં અને ગતિયુકત (अयासः) કિરણો પડે છે એવાં ઘરોમાં તમે બે જઈને રહો એમ અમે ઇચ્છીએ છીએ. ત્યાં મહાગતિવાળા વિષ્ણુનું પરમ પદ (સ્થાન) અત્યંત શોભે છે." તમે બે એવાં ઘરોમાં જઈ રહો એમ અમે ઇચ્છીએ છીએ, કે જ્યાં ભૂરિશૃંગ (ઘણાં શીંગડાવાળાં અર્થાત્ શીંગડાં જેવાં તીક્ષ્ણ કે વિવિધ રંગનાં) કિરણો હોય. 'ભૂરિ' શબ્દ 'ઘણા બધા' માટે વપરાય છે. भू = प्र + भू > प्रभवति ઉપરથી 'ભૂરિ' શબ્દ બન્યો છે. 'શૃંગ' શબ્દ √श्रिञ् सेवायाम् કે √शृ हिंसायाम् ધાતુ ઉપરથી સાધવામાં આવે છે. 'શરણ (રક્ષણ)ને માટે ઊંચુ આવેલ (અંગ)' અથવા 'બહાર આવેલું (અંગ)' તેને શૃંગ કહે છે. अयासः = अयनाः એટલે કે ગતિશીલ. ત્યાં ઉરુગાય અર્થાત્ મહાગતિવાળા (વૃષ્ણનું =) વિષ્ણુનું પરમ પદ = પરાર્ધ્યસ્થાન (બધાથી ઊંચું સ્થાન) ખૂબ પ્રકાશે છે, 'પાદ' શબ્દ √પદ્ (જવું) ધાતુ ઉપરથી સિદ્ધ થાય છે. આ પાદ અર્થાત્ પગલું જ્યાં મૂકવામાં આવે છે તે 'પદ' (સ્થાન). 'પશુનું પગલું' એ અર્થવાળા 'પાદ' શબ્દના આધારે જ 'ભાગ' (અંશ-ટુકડો) અર્થમાં પણ 'પાદ' શબ્દ વપરાય છે. પ્રભાગ (ચતુર્થાંશ) માટે વપરાતા 'પાદ'ને આધારે બીજા 'પદ' એવા શબ્દો પણ પ્રચલિત થયા છે. આ રીતે બીજા પદાર્થો વિશે પણ સંદેહો રહેલા છે. પરંતુ જો તે 'સમાનાર્થક હોય તો તેમનાં નિર્વચનો (વ્યુત્પત્તિઓ) પણ એકસરખી જ રીતે થાય છે અને જો તે જુદા જુદા અર્થોમાં પ્રચલિત હોય તો તેમનાં નિર્વચનો પણ જુદાં જુદાં થશે. ટૂંકમાં, અર્થાનુસારી નિર્વચન કરવું.

8. (વિમર્શ) યાસ્કે નિરુકત- બીજા અધ્યાયના બીજા પાદથી નિઘંટુના શબ્દોનું નિર્વચન આપવાની શરૂઆત કરી છે. સૌથી પ્રથમ નિઘંટુનો गौः શબ્દ લીધો છે. આ શબ્દ પૃથિવીના પર્યાયવાચક એકવીસ શબ્દોમાંનો એક છે, તથાપિ યાસ્કે વૈદિક

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પ્રયોગોને આધારે તેના વિવિધ અર્થો વર્ણવ્યા છે : ૧. પૃથિવી ૨. પશુનામ (ગાય) ૩. ગાયનો વિકાર (क) દૂધ, (ख) ચર્મ, (ग) ચર્મ અને કફ (અથવા ચરબી ?) (घ) સ્નાયુ-તંતુ અને ચરબી. ૪. જ્યા (પણછ) અને ૫. (क) સૂર્ય (ख) સૂર્યનું એક સુષુમ્ણ નામનું કિરણ, અથવા (ग) સૂર્યનાં તમામ કિરણો. આમાંથી 'ગાયનો વિકાર' અર્થમાં જે વિકલ્પો વર્ણવ્યા છે તે गौः શબ્દને તદ્ધિતાન્ત નામ માનીને વર્ણવ્યા છે. ચોથો અર્થ પણ 'ગાયનો વિકાર' જ છે. તથાપિ તે નામ તરીકે કૃદન્ત નામ છે.

અહીં પ્રા. રાજવાડે જણાવે છે કે જે પ્રક્રિયાથી એક શબ્દના અનેક અર્થો પ્રચલિત થયા છે તે 'લક્ષણા' કહેવાય છે. પાદ અને પદ શબ્દ વિશે યાસ્કે જે ટીકા કરી છે તેથી જણાય છે કે યાસ્ક આ લક્ષણાવ્યાપારથી અભિજ્ઞ હતા. ભાષાવિકાસના મૂળમાં આ લક્ષણાવ્યાપાર રહેલો છે અને દરેક નૈરુક્તને તેની જાણકારી હોવી જોઈએ, અન્યથા તે કાલ્પનિક-વૃથા વ્યુત્પત્તિઓની શોધમાં પડશે. "પૃથિવીના પર્યાયવાચક એકવીસ શબ્દોમાંથી પહેલા गौः શબ્દની વ્યુત્પત્તિ દર્શાવ્યા પછી યાસ્ક निर्ऋतिः શબ્દની વ્યુત્પત્તિ રજૂ કરે છે.

---

9. इतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि । तत्र निर्ऋतिर्निरमणात् । ऋच्छतेः कृच्छ्रापत्तिरितरा । सा पृथिव्या संदिह्यते । तयोर्विभागः । तस्या एषा भवति ॥७॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् । स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश (ऋ.सं. १/१६४/३२) ॥ बहुप्रजाः कृच्छ्रमापद्यते इति परिव्राजकाः । वर्षकर्मेति नैरुक्ताः । य ईं चकारेति । करोतिकिरती संदिग्धौ वर्षकर्मणा । न सोऽस्य वेद मध्यमः । स एवास्य वेद मध्यमो यो ददर्शादित्योपहितम् । स मातुर्योनौ । मातान्तरिक्षम् । निर्मीयन्तेऽस्मिन् भूतानि । योनिरन्तरिक्षम् । महानवयवः परिवीतो वायुना । अयमपीतरो योनिरेतस्मादेव । परियुतो भवति । बहुप्रजा भूमिमापद्यते वर्षकर्मणा ॥

तत्रैतस्मिन्नेकविंशके गणे "निर्ऋतिः" इत्येतदभिधानम् । "निरमणात्" निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी । रमेर्धातोः (भू.आ.) । "ऋच्छतेः (तु.प.)" "इतरा" "कृच्छ्रापत्तिः" दुःखसञ्ज्ञका, निर्ऋतिः पाप्मा । "सा" पुनरियं समाननामधेयत्वात् समानश्रुतित्वात् "पृथिव्या सन्दिह्यते" । "तयोः" समाननामधेयत्वेऽपि सति एष कर्मकृतो "विभागः" — एका निविष्टानां भूतानां रमयित्री, एका पुनः कृच्छ्रमापादयित्री । एवं नानाकर्माण्यभिधानानि निर्वक्तव्यानि ॥

"तस्याः" कृच्छ्रापत्तेः पृथिव्या अपि "एषा" निर्वाचिका ऋग् "भवति" — ॥३॥

"य ईं चकार" — इति । दीर्घतमस आर्षम् । त्रिष्टुब् । महाव्रते वैश्वदेवे शस्त्रे शस्यते । "अयं स शिङ्क्ते" — इतीयमपि तथैव समानार्षविनियोगा । जगती । द्वे अप्येते अस्यवामीये । कश्चित् "बहुप्रजाः" बह्वपत्यो दरिद्रः पुरुषः स दुष्पोषत्वादपत्यानां व्यापन्नत्वात् "कृच्छ्र" दुःखम् "आपद्यते" । सा या तस्य कृच्छ्रापत्तिः, सैवैतस्यामृचि निर्ऋतिशब्देनोच्यते "इति" एव "परिव्राजकाः" परिव्राजकानामस्यामृचि सञ्ज्ञेयोऽर्थः ॥

स एष विस्तरेण प्रदर्श्यते । — 'यः' 'चकार' करोति 'ईं' गर्भं 'न सः' 'अस्य' गर्भस्य तत्त्वं 'वेद' केवलं त्वसौ कामार्त्तः पुत्रार्थी वा करोत्येव गर्भम् । 'यः ईं ददर्श' यस्त्वेनं पश्यति 'हिरुग्' अन्तर्हितमेतस्मिन् जठरे, एतस्मिन् वा शरीरे । 'इं नु' जन्तुम् । 'तस्मात्' तस्यैव एष गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या, नेतरस्य गर्भकर्त्तुः । 'सः' पुनरेष गर्भो 'मातुर्य्योनौ' गर्भाशयस्थाने 'अन्तः' उदरे पुष्यति, स मातुरशितपीतलीढभक्षितेन चर्तुर्विधाहारपरिणामे ततः 'परिवीतः' जरायुणा परिवेष्टितो यथाकालं जायते । अथैवं 'बहुप्रजाः' बहुशः प्रजायमानः स गर्भकर्त्ता गर्भतत्त्वमजानानः 'निर्ऋतिं' दुःखम् 'आविवेश' आविशतीत्यर्थः । एवं गर्भतत्त्वापरिज्ञानात् यो गर्भं करोति स दुःखमापद्यते, यस्तु अध्यात्मदृष्ट्या गर्भतत्त्वं वेद, स गर्भकर्मणो निवर्त्तते, स निर्ऋतिं नापद्यते । एवमस्यामृचि निर्ऋतिदेवतेत्येष परिव्राजकार्थः ॥

अन्ये तु ब्रुवते, — यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहुषु प्रजायमानो जन्ममरणसन्तानानुभवविद्धां निर्ऋतिमाविशति । यो रेतः सिञ्चति, तद्रूपो भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसन्तानाननुभवतीत्युक्तम् ।

"वर्षकर्मेति नैरुक्ताः" वर्षकर्मैतदुच्यते । निर्ऋतिश्चात्र भूमिरुच्यते । एवं नैरुक्ता मन्यन्ते । यः करोति वर्षं, यो वा किरति क्षिपति । कः पुनरसौ ? मेघः । स हि वर्षस्य कर्त्ता विक्षेप्ता वा । मेघाद्धि वर्षं प्रवर्त्तते । किं तस्य ? न सोऽस्य वर्षस्य तत्त्वं "वेद" यो ददर्श यः पश्यति "आदित्योपहितम्" आदित्यस्य रश्म्यन्तर्गतं वर्षमनभिव्यक्तम् । कश्चासौ अन्तर्गतः ? प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजाः बहुशः प्रजायमाना निर्ऋतिं भूमिमाविशतीति समस्तार्थः ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अथैकपदनिरुक्तम् । — "करोतिकिरती सन्दिग्धौ" धातू "वर्षकर्मणा" सम्बध्येते । उभयथा ह्युपपद्यते, — यः करोति यो वा क्षिपति । "मातान्तरिक्षम्" एतस्मिन् हि "भूतानि" "निर्मीयन्ते" । एतद्ध्यवकाशदानेन विशिष्टमुपकारं करोति । भूतानां जायमानानां "योनिरन्तरिक्षम्" आकाशस्यैव प्रदेशविशेषः कश्चित् । सं वायुसंयुतः सन् उदकयोनिभावं पुष्णाति । तदेतत् "वायुना" तस्य सङ्गवन्तं दृष्ट्वोक्तम्, — "परिवीतः" भवति । इति शब्दसारूप्यप्रसक्तमुच्यते, — "अयमपीतरः" स्त्रीयोनिः "एतस्मादेव" । असावपि "परियुतः" एव "भवति" स्नाव्ना मांसेन च ॥

एवमेतस्मिम् मन्त्रे, नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते, परिव्राजकानां कृच्छ्रापत्तिः । तदेवं मन्त्रेषु शब्दगतिविभुत्वादु-भयमप्युपपद्यत एव । तद्यथा, — "दधिक्राव्णो अकारिषम् (ऋ.सं. ३,७,१३,६) — इत्येष मन्त्रः, अग्न्युपस्थाने अग्निहोत्रे, अयमेव चाग्निष्टोमे "दधिक्राव्णोअकारिषमित्याग्नीध्रे दधि भक्षयन्ति (आ.सू. ६,१३)" — इति दधिभक्षणे, तथाचाश्वमेधे "दधिक्राव्णो अकारिषमित्युत्थितायां सर्वा जपन्ति" — इत्यश्वसन्निधावेनं पत्न्यो जपन्ति महिष्यामुत्थितायाम् । तत्रैवंसतिप्रतिविनि-योगमस्यान्येनार्थेन भवितव्यम् । त एते वक्तुरभिप्रायवशादन्यत्वमपि भजन्ते मन्त्राः, न हि एतेषु अर्थस्येयत्तावधारण. मस्ति, महार्था ह्येते दुःपरिज्ञानाश्च । यथाश्वारोहवैशिष्टचादश्वः साधुः साधुतरश्च वहति, एवमेते वक्तृवैशिष्टचात् साधून् साधुतरांश्चार्थान् स्रवन्ति ।

तत्रैवं सति लक्षणोद्देशमात्रमेवैतस्मिञ्छास्त्रे निर्वचनमेकैकस्य क्रियते । क्वचिच्च आध्यात्माधिदैवाधियज्ञोपदर्शनार्थः । तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्, — आधिदैवाध्यात्माधियज्ञाश्रयाः सर्व एव ते योज्याः नात्रापराधोऽस्ति ॥

---

9. (અનુ.) (ગૌઃ વગેરે) આટલા એકવીસ શબ્દો પૃથ્વીનાં નામો (નિઘંટુમાં) ગણાવ્યા છે. એમાં (પૃથિવીનો વાચક) 'નિર્ઋતિ' શબ્દ આવેલો છે. ૧. નિ + રમણ ઉપરથી તેને સાધવામાં આવેલો છે. ("એમાં પ્રવેશેલાં ભૂતો રમણ કરે છે" માટે પૃથિવીને 'નિર્ઋતિ' કહે છે : निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी इति दुर्गः ।) [અથવા ૨. निस् + રમણ ઉપરથી તેને સાધવામાં આવેલો છે. ('જેમાંથી આનંદ ચાલ્યો ગયો છે તે નિર્ઋતિ = કષ્ટપ્રાપ્તિ." निर्गता रमणात् ।) 'કષ્ટપ્રાપ્તિ' અર્થમાં 'નિર્ઋતિ' શબ્દ नि + ऋच्छति ઉપરથી સાધવામાં આવ્યો છે. (આમ, નિર્ઋતિ શબ્દના બે અર્થ થતા હોઈ) આ 'નિર્ઋતિ' શબ્દ પૃથિવીના નામ તરીકે વપરાયો હોય છે ત્યારે સંદેહ ઊભો થાય છે. માટે (સન્દર્ભ જોઈને) તેમનો વિષયવિભાગ કરવો જોઈએ. 'નિર્ઋતિ' શબ્દનો જેમાં પ્રયોગ હોય તેવી ઋચા આ પ્રમાણે છે : "જે આ (ગર્ભાધાનરૂપ કર્મ) કરે છે તે (ગૃહસ્થ એના, દુષ્પરિણામને) જાણતો નથી અને જે (પરિવ્રાજક) એના (દુષ્પરિણામને) જુવે છે, તે એનાથી (સંતાનોત્પત્તિ રૂપ કર્મથી) દૂર રહે છે. તે (ગૃહસ્થ), (ગર્ભની) માતાની અર્થાત્ પોતાની પત્નીની યોનિમાં જ વીંટળાયેલો રહે છે, પરિણામે અનેક સંતાનોની ઉત્પત્તિ થવાથી તેને કષ્ટની પ્રાપ્તિ થાય છે." (આ મન્ત્રનો પરિવ્રાજકોએ આધ્યાત્મિક અર્થ કર્યો છે અને તેમાં નિર્ઋતિ એટલે 'કષ્ટપ્રાપ્તિ' એવો અર્થ લેવામાં આવ્યો છે. હવે, નૈરુક્તો આ જ મન્ત્રનો આધિભૌતિક અર્થ કરે છે, જેમાં નિર્ઋતિનો અર્થ 'પૃથિવી' લેવામાં આવશે :-) "જે (મેઘ કે વિદ્યુત્) (વૃષ્ટિ રૂપ કર્મ) કરે છે. તે તેના રહસ્યને જાણતો નથી. પરંતુ જે (પરમાત્મા) એને જાણે છે તે તેનાથી જુદો રહે છે. તે (મેઘ કે વિદ્યુત્) માતા (અર્થાત્ અન્તરિક્ષ)ની યોનિ (વિશાળ ક્ષેત્ર)ની અંદર વીંટળાયેલ રહે છે; પરિણામે બહુપ્રજા અર્થાત્ અનેક જળબિન્દુઓના રૂપમાં પૃથિવી ઉપર આવે છે (વર્ષે છે)." બહુ સંતાનોવાળો ગૃહસ્થ કષ્ટ પામે છે' એવો આ મન્ત્રનો અર્થ છે એમ પરિવ્રાજકોનું કહેવું છે. બીજી તરફ, નૈરુકતોના મતે આ મન્ત્રમાં વૃષ્ટિ ક્રિયાનું વર્ણન છે (તેથી અહીં નિર્ઋતિ શબ્દ 'પૃથિવી' અર્થમાં છે.) य ईं चकार । આ ચરણમાં चकार રૂપ √कृ>करोतिનું છે કે √कृ (ફેંકવું) >किरतिનું છે ? એવો સંદેહ થાય છે, કેમ કે એ બન્ને ધાતુઓ વૃષ્ટિક્રિયા સાથે સંકળાઈ શકે છે; તે (વૃષ્ટિ) કરનારો મધ્યમ (મેઘ) તેને (વૃષ્ટિના રહસ્યને) જાણતો નથી. જે મધ્યમ (પરમાત્મા) એને વૃષ્ટિના રહસ્યને જાણે છે તે સૂર્યનાં કિરણોની અન્તર્ગત રહેલી વૃષ્ટિને જુવે છે. તે માતાની યોનિમાં. અહીં માતા એટલે અન્તરિક્ષ. કેમ કે આમાં બધાં ભૂતોનું નિર્માણ થાય છે. યોનિ એટલે અન્તરિક્ષનો મોટો અવયવ. કેમકે તે (અન્તરિક્ષનો મોટો ભાગ) વાયુથી વીંટળાયેલો છે. (√यु मिश्रणामिश्रणयोः + नि नित् ઉણાદિપ્રત્યય > योनिः ।) (લોકમાં પ્રચલિત) 'યોનિ' શબ્દ પણ આ જ ધાતુમાંથી સિદ્ધ થાય છે. કેમ કે તે (લૌકિક સ્ત્રીયોનિ) પણ (સ્નાયુમાંસાદિથી) વીંટળાયેલ છે. ઘણાં પ્રજા-જળબિંદુઓ-વૃષ્ટિક્રિયાથી પૃથિવી ઉપર આવી પડે છે.

9. (વિમર્શ) યાસ્કે 'નિર્ઋતિ' શબ્દના બે અર્થો દર્શાવ્યા છે. તેમાંથી 'પૃથિવી' અર્થમાં તેની જે (नि+√रमु) વ્યુત્પત્તિ દર્શાવી છે તે ચિન્ત્ય છે, કારણ કે ડો. સિદ્ધેશ્વર વર્મા કહે છે કે પ્રાચીન ઈન્ડો-આર્યનમાં √रमु क्रीडायाम् ધાતુના રેફ (રકાર)ને ऋ સાથે કોઈ સંબંધ નથી.

'નિર્ઋતિ' શબ્દના બે અર્થો થાય છે, કારણ કે પૂર્વોક્ત મન્ત્રનાં અતિપ્રાચીન સમયમાં દ્વિવિધ અર્થઘટન પ્રચલિત થયા છે. યાસ્કના નિરુકતમાં વેદમન્ત્રનો અર્થ કરનાર અનેક સંપ્રદાયો નોંધાયા છે. જેવા કે, ઐતિહાસિકો, યાજ્ઞિકો, પૂર્વેના યાજ્ઞિકો,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain:Digitized by eGangotri.

પરિવ્રાજકો, નૈરુકતો, વૈયાકરણો વગેરે. ('વેદમન્ત્રનો કોઈ અર્થ નથી.' એવો કૌત્સનો મત પણ નિરુકતમાં મળે છે તે નોંધપાત્ર છે.) આમાંથી ઐતિહાસિકો વેદને અનિત્ય માનનારા છે, પરિવ્રાજકો વેદમન્ત્રમાં આધ્યાત્મિક-દાર્શનિક-અર્થ શોધે છે અને નૈરુકતો આધિભૌતિકતા (સૃષ્ટિનું વર્ણન) શોધે છે.

10. शाकपूणिः संकल्पयांचक्रे सर्वा देवता जानामीति । तस्मै देवतोभयलिङ्गा प्रादुर्बभूव । तां न जज्ञे । तां पप्रच्छ । विविदिषाणि त्वेति । सास्मा एतामृचमादिदेश । एषा मद्देवतेति ॥८॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता । सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत (ऋ.सं. १/१६४/२९) ॥ अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति मायुम् । शब्दं करोति । मायुमिवादित्यमिति वा । वागेषा माध्यमिका । ध्वंसने मेघे अधिश्रिता । सा चित्तिभिः कर्मभिः नीचैर्निकरोति मर्त्यम् । विद्युद्भवन्ती प्रत्यूहते वव्रिम् । वव्रिः इति रूपनाम । वृणोतीति सतः । वर्षेण प्रच्छाद्य पृथिवीं पुनरादत्ते ॥९॥

'एवमेव सन्देहाधिकारमुपजीवन्नाद' — "शाकपूणिः सङ्कल्पयाञ्चक्रे, — सर्वा देवता जानामीति" । शाकानि यः पृणयति संहन्ति, स शाकपूणः, तस्यापत्यं शाकपूणिः आचार्य्यः । स सङ्कल्पयाञ्चक्रे, सङ्कल्पं कृतवान् । किम् ? इति । सर्वा देवता जानामीति । "तस्मै" सङ्कल्पमेवं कृतवते "देवतोभयलिङ्गा" स्त्रीपुंलिङ्गा, अथवा मध्यस्थानलिङ्गा द्युस्थानलिङ्गा च "प्रादुर्बभूव" । "तां" पुरतोऽवस्थितां सतीं "न जज्ञे" न ज्ञातवान्, — किमियं स्त्री स्यादथवा पुरुष इति, अथवा किमियं मध्यस्थाना अथवा द्युस्थानेति । "ताम्" अजानन् "पप्रच्छ" "विविदिषाणि त्वा" । वेदितुमिच्छामि त्वाम्, — किमसि पुरुषः अथवा स्त्री ? इति, अथवा किमस्यन्तरिक्षस्थानाथवा द्युस्थांना ? इति । "सा" एवं पृष्टा सती "अस्मै" शाकपूणये "एतामृचम्" 'आदिदेश' आदिष्टवती । किम् ? इति । "एषा मद्देवतेति" अस्यामृचि अहं देवतेति, त्वञ्च नैरुक्तः मामेतस्या ऋचः सकाशादर्थावगत्यावधारयेति ॥४॥

कतमा पुनरसावृग् ? इति । उच्यते, — "अयं स शिङ्क्ते" — इति । "अयं स शब्दायते" स एव मेघः शब्दं करोति । येन मेघेन किं कृतम् ? इति । 'येन गौरभीवृता' येन माध्यमिका वागभिप्रच्छादिता सती "मिमाति मायुं" निर्मिमीते निर्वर्त्तयति मायुम्, "शब्दं करोति" इत्यर्थः । "मायुः काकुत्" – इति च वाङ्नामसु पठितम् । अथवा मायुरादित्यो भवति, सर्वभूतनिर्माता । तमिवात्मानं निर्मिमीते । क्वावस्थितः ? "ध्वंसने" उदकध्वंसने उदकस्रंसने मेघे "अधिश्रिता" । अयं तावदर्द्धर्चो मेघान्तर्वर्त्तिन्या वाचो व्यक्तविद्युद्रूपाया अभिधायकः, मेघरूपत्वात् पुरुषत्वाभिप्रायः । अथवायमुत्तरस्त्रीत्वाभिप्रायः । यैवंलक्षणा वा कर्मस्वरूपा, मेघशरीरा वा । 'सा चित्तिभिः' चटचटाशब्दकर्मभिः 'नि हि चकार' नीचैः करोति 'मर्त्यं' मनुष्यम् । सर्वो हि बिभ्यत्तस्या आसीदति अवनमति च । कदा पुनर्निकरोति मर्त्त्यम् ? इति, उच्यते, — "विद्युद् भवन्ती" इति, विद्युदात्मना स्त्र्याख्येनाभिनिर्वर्त्तमाना, तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयङ्करम्, न तथा विद्युद्रहितः । सैवमात्मानमाविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीम् । ततो वर्षव्युपरमे "प्रति" 'औहत' "ऊहते" "वव्रिम्" प्रत्युपसंहरति रूपमात्मीयमदृश्यं करोतीत्यर्थः । 'वव्रिरिति रूपनाम' तद्व्यावृत्या स्वमाश्रयं वर्त्तते । यस्मिंस्तु पक्षे मध्यस्थानलिङ्गा द्युस्थानलिङ्गा वेति तस्मिन् पक्षे मेघरूपत्वमविवक्षितम्, मेघवाचो विद्युद्रूपत्वञ्च । किन्तु एतावद्विवक्षितम्, — मेघाश्रया शब्दवती भूत्वा माध्यमिका वाक् विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्यश्चादित्यात्मना स्थित्वा पुनरादत्ते, विद्युदात्मना मध्यस्थाने स्थित्वा वर्षति, आदित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः । वक्ष्यति हि, — "त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवि (दै. १२,२,८)" — इति ॥

[illegible] ना मध्यस्थाना विद्युद्रूपा, मध्यस्थाना वाऽऽदित्यरूपा, इत्ययमेवंलक्षणो देवतातत्त्वसन्देह उपेक्षितव्यो मन्त्रदर्शनाच्च [illegible] मन्त्रसङ्क्षेपार्थः ॥ सा पृथिव्या सन्दिह्यत इत्यनेन सन्देहसामान्येनोदाहृतमिदमत्र मतं शाकपूणेरित्येवमादि ॥

अनुक्रमणं त्वधिकृतम् । तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थम्, इतराण्यभ्यूह्य निर्वक्तव्यानि । तद्यथा, — 'ग्मा' गमनात्, अस्यां गच्छन्ति भूतानि, 'ज्मा' जमनात्, जमन्ति गच्छन्ति अस्यां भूतानि, — इत्येवमादि ॥

नैघण्टुकांस्तु याञ्छब्दान् प्रत्यर्थगणसंस्थितान् ।

छन्दोभ्योऽन्विष्य तत्त्वार्थान् निर्ब्रूयाद् योगतस्तु तान् ॥ इति निरुक्तवृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥२॥

10. (અનુ.) શાકપૂણિએ સંકલ્પ કર્યો કે હું બધા દેવતા જાણું છું. તેની સમક્ષ ઉભયલિંગવાળી દેવતા ઉપસ્થિત થઈ. પરંતુ તેને તે (શાકપૂણિ) ઓળખી ન શક્યો. તેણે તે (ઉભયલિંગવાળી) દેવતાને કહ્યું : હું તને જાણીશ (તને જાણવાની મારી ઇચ્છા

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

છે.) તે દેવતાએ શાકપૂણિને આ (નિમ્નોક્ત) ઋચા આગળ ધરી અને કહ્યું : "આ ઋચાની હું દેવતા છું." "તે (अयं सः) મેઘ અવાજ કરે (शिङ्क्ते) છે, જેનાથી (મેઘથી) વીંટળાયેલ અને મેઘ (ध्वंसने)માં આશ્રિત એવી મધ્યમ (अन्तरिक्ष) સ્થાનની વાણી (गौः) મોટો અવાજ કરે છે (मायुं मिमाति). તેણે (વાણીએ) (ભયંકર) કર્મોથી (चितिभिः) મનુષ્યોને નમાવી દીધા છે અને વિદ્યુત્ બનીને પોતાના રૂપને પાછું ખેંચી લીધું (અદશ્ય કરી દીધું)." આ તે (મેઘ) અવાજ કરે છે. તેનાથી પ્રવૃત્ત થયેલી મધ્યમ-સ્થાનની गौः = વાણી પણ અવાજ કરે છે. (मायुं मिमाति). અથવા मायुम् એટલે આદિત્ય. આ વાણી તે માધ્યમિકા છે (મધ્યસ્થાનની છે.) ध्वंसने (उदकध्वंसने = જળ વર્ષાવનાર) મેઘમાં (તે વાણી) અધિશ્રિત છે, તે (વાણી) કર્મોથી (= ચટ ચટ એવા અવાજથી) મનુષ્યોને નીચે નમાવે છે. વિદ્યુત્ બનતી પોતાના રૂપને (वव्रिम्) પાછું ખેંચી લે છે. (प्रति औहत = प्रत्यूहते = प्रत्युपसंहरति). "वव्रि"એ રૂપનું નામ છે. 'वव्रि' શબ્દ √वृ >वृणोति (ઢાંકવું) ઉપરથી બન્યો છે. વર્ષોથી પૃથિવીને આચ્છાદિત કરીને પછી પોતાના રૂપને પાછું ખેંચી લે છે.

10. (વિમર્શ) યાસ્કે નિરુકતાધ્યયનના ત્રીજા પ્રયોજનની ચર્ચા કરતી વખતે લખ્યું છે : ते चेद् ब्रूयुः 'लिङ्गज्ञा अत्र स्म' इति । = કોઈ એમ કહે કે અમે લિંગજ્ઞ છીએ, એટલે કે મન્ત્રમાં આવેલા લિંગ ઉપરથી જે તે મન્ત્રની દેવતા કોણ છે તે જાણી લઈશું. આમ, દેવતાજ્ઞાન માટે નિરુક્ત ભણવાનું હોય તો તે નિરર્થક છે. આનું ખંડન કરવા માટે યાસ્કે એવો મન્ત્ર ઉદ્ધૃત કર્યો હતો કે જેમાં મન્ત્ર અગ્નિદેવતાનો હોય, પણ તેમાં વાયુ અને ઇન્દ્રનાં નામો લિંગ રૂપે વપરાયાં હોય. આથી જો લિંગ ઉપરથી દેવતા શોધવાની હોય તો તે ભ્રામક છે એ નક્કી થાય છે. નિરુક્તના પહેલા અધ્યાયના અંતભાગમાં આવેલી આ ચર્ચાની સાથે જોડી શકાય એવી એક ચર્ચા અહીં બીજા અધ્યાયના બીજા પાદમાં આવેલી છે : –ते चेद् ब्रूयुः 'लिङ्गज्ञा अत्र स्म' इति । એમ કહેનાર પૂર્વપક્ષીનું યાસ્કે અગાઉ ખંડન કર્યું છે, તેવી રીતે અહીં શાકપૂણિ બડાઈ હાંકે છે કે હું બધા દેવતાને જાણું છું ! (सर्वाः देवताः जानामि । એવો પાઠ નિરુક્તની તમામ મુદ્રિત આવૃત્તિઓમાં જોવા મળે છે. પરંતુ પ્રા. રાજવાડે નોંધે છે એ મુજબ નિરુક્તની એક હસ્તપ્રતમાં અને દુર્ગની ટીકાની એક હસ્તપ્રતમાં जानानि = આજ્ઞાર્થ ઉત્તમ પુરુષ એકવચન-એવો પાઠ પણ મળે છે. આ સ્વીકારીએ તો 'શાકપૂણિ બડાઈ હાંકે છે' (boasting) એવો અર્થ થાય. આ અર્થ પ્રસંગને અનુરૂપ છે; તથા આ જ ચર્ચામાં આગળ ઉપર આવતા विविदिषाणि त्वा । વાક્યથી આ પાઠ હોવાની સંભાવના વિચારણીય બને છે.) આવા શાકપૂણિનું અભિમાન ઉતારવા માટે એક મન્ત્ર ઉપસ્થિત થાય છે, જે મન્ત્ર ઉભયલિંગવાળો છે. (અમુક મન્ત્ર કયા દેવતાનો છે એ નક્કી કરવા માટે તે મન્ત્રના લિંગને અર્થાત્ વર્ણ્યવિષય અને તેમાં વપરાયેલા દેવતાનું નામ – તેને તપાસવામાં આવે છે. દુર્ગ મુજબ 'ઉભયલિંગ' એટલે મન્ત્રમાં વપરાયેલ સ્ત્રીલિંગ અને પુંલિંગનાં રૂપો અથવા મધ્યમસ્થાનના દેવતાનું વર્ણન અને દ્યુસ્થાનના દેવતાનું વર્ણન.) આવા ઉભયલિંગવાળા મન્ત્રની મુખ્ય દેવતા કોણ છે તે જાણવું કઠિન છે. યાસ્કે જે મન્ત્ર રજૂ કર્યો છે તેમાં अयं सः એવાં પુંલિંગનાં રૂપો પણ વપરાયાં છે અને गौः, अभिवृत्ता, अधिश्रिता, भवन्ती એવાં સ્ત્રીલિંગનાં રૂપો પણ વપરાયાં છે. અર્થની દૃષ્ટિએ જોઈએ તો મેઘનું અને વાણી કે વિદ્યુત્નું વર્ણન છે; પણ તેની મુખ્ય દેવતા વિશ્વેદેવો દેવતા છે. આથી શાકપૂણિ આ મન્ત્રની મુખ્ય દેવતા કોણ છે તે જાણી શકતો નથી.

ઉપર જણાવ્યું છે તેમ शाकपूणिः संकल्पयाञ्चक्रे – આ ચર્ચા, દેખીતી રીતે પહેલા અધ્યાયના અન્તે (નિરુકતાધ્યયનના ત્રીજા પ્રયોજનની ચર્ચાની સાથે) આવવી જોઈતી હતી. અહીં (૨/૨માં) આ ચર્ચા અસંગત લાગે છે. પરંતુ પ્રા. રાજવાડે અને આચાર્ય વિશ્વેશ્વરે જણાવ્યું છે એ મુજબ આ ચર્ચા અહીં આવી છે તે એક રીતે ઉચિત છે. જેમ કે, અગાઉ પૃથિવીનાં નામોની વ્યુત્પત્તિ આપતાં 'निर्ऋति'ની ચર્ચા આરંભી છે. આ શબ્દની વ્યુત્પત્તિ સ્પષ્ટ કરવા य ईं चकार० । મન્ત્ર ઉદ્ધૃત કર્યો છે, તથા પરિવ્રાજક અને નૈરુકતોની દૃષ્ટિએ તેનાં દ્વિવિધ અર્થઘટનો આપ્યાં છે. આ મન્ત્ર ઋગ્વેદના अस्य वामस्य સૂક્ત (૧-૧૬૪-૨૯) માંથી લીધો છે. હવે એ જ સૂક્તમાં આ अयं स शिङ्क्ते० । (૧/૧૬૪/૩૨) મન્ત્ર છે અને તેનું અર્થઘટન પણ વિવાદાસ્પદ છે. તેથી યાસ્કે પ્રાસંગિક રૂપે તેની પણ વ્યાખ્યા કરવા માટે આ ચર્ચા અહીં મૂકી હોય એવું શકય છે.

तृतीयः पादः

11. हिरण्यनामान्युत्तराणि पञ्चदश (निघ. १/२) । हिरण्यं (निघ. १/२/५) कस्मात् । ह्रियते आयम्यमानमिति वा । ह्रियते जनाज्जनमिति वा । हितरमणं भवतीति वा । हृदयरमणं भवतीति वा । हर्यतेर्वा स्यात्प्रेप्साकर्मणः ॥

"हिरण्यनामान्युत्तराणि पञ्चदश" । हिरण्यस्य नामान्युत्तराणि । कुतः ? प्रकृतेभ्यः पृथिवीनामभ्यः, पृथिव्यामेव हिरण्यमुत्पद्यत इत्यतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि । कियन्ति पुनस्तानि ? पञ्चदश, पञ्च च दश च पञ्चदश । यानि समाम्नातानि । असमाम्नातान्यपि सन्ति, — हाटकसुवर्णचामीकरणशातकुम्भादीनि । कतमानि पुनस्तानि समाम्नातानि ? इति । उच्यते, — 'हेम, चन्द्रं, रुक्मम्' — इत्येवमादीनि । हितं ममेदमिति सर्व एवैतन्मन्यते, तस्माद्धेम । चन्द्रम्, चदनेः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कान्तिकर्मणः, सर्व एव ह्येतत् कामयते । रुक्मम्, रोचतेर्ज्वलनार्थस्य, तद्धि रोचिष्णुर्भवतीति । एवमूहितव्यं सर्वत्र निर्वचनम् ॥

आह, — "हिरण्यं कस्मात्" ? उच्यते, — "ह्रियते आयम्यमानमिति वा" । आयम्यमानं ह्रियत एव शिल्पिभिः, कटकरुच कस्वस्तिकादिभावेन विस्तीर्य्यमाणम् । "ह्रियते जनाज्जनमिति वा" । तेन हि व्यवहारः क्रियते । ततस्तत्रैकत्रावतिष्ठते, ह्रियत एव सर्वदा । "हितरमणं भवतीति, वा" । यस्य हि तद् भवति, तस्य हितश्च दुर्भिक्षादिषु, तद् भवति रमणश्चेति । तेन गृहीतेन मूषिकोऽपि रमते, किमुत मनुष्यः । "हर्य्यतिर्वा स्यात् प्रेप्साकर्मणः" तद्धि सर्वैरेव प्रार्थ्यते लोकानुक्रमेणैव ॥

11. (અનુ.) આ પછી (નિઘંટુમાં) 'હિરણ્ય'નાં પંદર નામો છે. 'હિરણ્ય' શબ્દ કયા ધાતુ ઉપરથી સાધવામાં આવે છે ? ૧. (સોની વડે કવચ, કુંડળાદિરૂપે) વિસ્તારવામાં આવતાં (તૈયાર કરવામાં આવતાં) (લોકો વડે) ખેંચવામાં આવે છે (= પોતાના ઘેર લઈ જવામાં આવે છે.) અથવા એક માણસ પાસેથી બીજો માણસ ખેંચી જાય છે. અથવા ૨. (દુર્ભિક્ષાદિમાં) જે હિતકારક અને રમણીય હોય છે અથવા હૃદયને જે ગમે છે તે 'હિરણ્ય' કહેવાય છે અથવા તો, ૩. ઇચ્છાર્થક √हर्य् ધાતુ પરથી તે શબ્દ બન્યો હશે. (એટલે કે જે બધા મનુષ્યો વડે પ્રાર્થવામાં આવે છે તે હિરણ્ય.)

11. (વિમર્શ) ડો. સિદ્ધેશ્વર વર્મા જણાવે છે કે યાસ્કે √हृ हरति (– ह्रियते) ઉપરથી હિરણ્ય શબ્દનાં જે બે નિર્વચનો આપ્યાં છે તે ભાગ્યે જ 'હિરણ્ય' શબ્દનો સાચો અર્થ રજૂ કરે છે. કેમ કે ઈન્ડો-યુરોપિયનમાં *g^hel*-ghel=yellow, લેટિનમાં *helvus* = yellow થાય છે. આમ, ઇન્ડો-યુરોપિયન શાખાની ભાષાઓમાં આ 'હિરણ્ય' શબ્દ પીળા રંગનો વાચક હતો.

12. अन्तरिक्षनामान्युत्तराणि षोळश (निघ. १/३) । अन्तरिक्षं कस्मात् । अन्तरा क्षान्तं भवति । अन्तरा इमे इति वा । शरीरेष्वन्तरक्षयमिति वा ॥ तत्र समुद्रः (निघ. १/३/९५) इत्येतत्पार्थिवेन समुद्रेण संदिह्यते । समुद्रः कस्मात् । समुद्द्रवन्त्यस्मादापः । समभिद्रवन्त्येनमापः । संमोदन्तेऽस्मिन् भूतानि । समुदको भवति । समुनत्तीति वा ॥

तयोर्विभागः । तत्रेतिहासमाचक्षते । देवापिश्चार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शंतनुः कनीयानभिषेचयांचक्रे । देवापिस्तपः प्रतिपेदे । ततः शंतनोः राज्ये द्वादश वर्षाणि देवो न ववर्ष । तमूचुर्ब्राह्मणाः । अधर्मस्त्वयाऽऽचरितः । ज्येष्ठं भ्रातरमन्तरित्याभिषेचितम् । तस्मात्ते देवो न वर्षतीति । स शंतनुर्देवापिं शिशिक्ष राज्येन । तमुवाच देवापिः । पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्यैतद्वर्ष-कामसूक्तम् । तस्यैषा भवति ॥१०॥

"अन्तरिक्षनामान्युत्तराणि षोड़श" । षट् च दश च षोड़श कतमानि पुनस्तानि ? "अम्बरं, वियद्, व्योम" इत्येवमादीनि । अम्बरमम्बुमद्भवति । नानाभावेन सर्वतो वियतमिति वियत् । नानाप्रकारमेतद्भवति भूतानीति व्योम । एवमाद्यभ्यूहितव्यम् ॥

आह, "अन्तरिक्षम्" एव तावत् "कस्मात्" ? उच्यते, "अन्तरा" हीदं द्यावापृथिव्योरवस्थितम्, "क्षान्तं" च "भवति" पृथिव्यन्तमित्यर्थः । अथ "वा" "अन्तरा" "इमे" द्यावापृथिव्यौ क्षियति निवसति "इति" अन्तरिक्षम् । अथ "वा" "शरीरेषु" एतदेव "अन्तर्" मध्येऽवस्थितम् "अक्षयम्" । इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम् ॥

"तत्र" तस्मिन् षोड़शके अन्तरिक्षनामसमुदाये "समुद्रः इत्येतत्" अभिधानमुभयाभिधानम् । उभयाभिधायित्वात् "पार्थिवेन समुद्रेण" एतेन जलाशयेन "सन्दिह्यते" एतदत्र सन्देहपदम् ।

आह, — "समुद्रः कस्मात्" ? इति । उच्यते, — "समुद्द्रवन्त्यस्मादापः" वीचितरङ्गशीकरादिभावेन । "समभिद्रवन्त्येनमापः" सर्वा एव ह्यापो निम्नानुसारित्वात् समुद्रमेवाभिमुख्येन द्रवन्ति, स हि निम्नो भवति । "सम्मोदन्तेऽस्मिन् भूतानि" संहृष्यन्ति जलचराणि सत्त्वानि, बहूदकत्वात् । "समुदको भवति" । उद्र इत्युदकनाम, तदस्मिन् संहतमिति समुद्रः । "समुनत्तीति वा" सङ्क्लेदयतीत्यर्थः । अतो हि प्रसृतैरम्भोभिः सर्वमिदं सङ्क्लिद्यते । "यतोर्विभागः" ॥

यस्मिन्नुदाहरणो लक्ष्यते, "तत्र" "इतिहासमाचक्षते" आचार्य्याः । निदानभूतः 'इति हैवमासीत्' — इति य उच्यते स इतिहासः । कतमः पुनरसौ ? इति । उच्यते, — "देवापिश्चार्ष्टिषेणः" इत्येवमादीनि । देवापिश्चार्ष्टिषेणः, "शन्तनुश्च" आर्ष्टिषेण एव "कौरव्यौ" कुरुवंशप्रभवौ "भ्रातरौ बभूवतुः" । तयोरेको यः "कनीयान्" "शन्तनुः" नाम, "स" आत्मानम् "अभिषेचयाञ्चक्रे" अभिषेचितवानित्यर्थः । सोऽभिषिक्तः सन् राजा बभूव, इतरः पुनर्ज्येष्ठः "देवापिस्तपः प्रतिपेदे" । स किल तीव्रेण तपसा ब्राह्मण्यमापेदे, विश्वामित्रवत् । "ततः" तेनापचारेण ज्येष्ठातिक्रमजेन "शन्तनोः" "राज्ये" राष्ट्रे "द्वादश वर्षाणि देवो न ववर्ष" । अवर्षति देवे "तं" शन्तनुम् "ऊचुः" उक्तवन्तः "ब्राह्मणाः" — "अधर्मस्त्वया चरितः" – "ज्येष्ठं भ्रातरम्"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अन्तरित्य" अतिक्रम्य "अभिषेचितम्" अभिषेक आत्मनः कारितो यतस्त्वया, "तस्मात्" तेन मर्य्यादातिक्रमेण "ते" त राज्ये 'देवो न वर्षति" प्राप्तकालं प्रतिपद्यस्व — "इति"। "सः" एवमुक्तः "शन्तनुः" "देवापिं" "शिशिक्ष" पुनः पुनः शशा अभिगमितवानित्यर्थः । कथम् ? "राज्येन" अभ्युद्यतेन। अर्य्यमानः "देवापिरुवाच" काममहं "पुरोहितस्ते" "असानि" भवान् "याजयानि च" "त्वां" त्वां वार्षिकेण कर्मणा । न च राजा भविष्यामि, भवानेवास्तु राजेत्यभिप्रायः ॥

"तस्य" देवापेः "एतद् वर्षकामसूक्तम्" आविरभूत् । तत्र "तस्य" समुद्राभिधानसन्दिग्धस्य प्रविभागोपदर्शनाय "एषा" निर्वाचिका ऋग् "भवति" ॥१॥

12. (અનુ.) (હિરણ્યનાં પંદર નામોની) પછી 'अन्तरिक्ष'નાં સોળ નામો આપ્યાં છે. આમાંથી 'अन्तरिक्ष' શબ્દ કેવી રીતે બન્યો છે ? તો ૧. જે વચ્ચે અને क्षा = પૃથિવીની નજીક હોય છે, અથવા ૨. આ બેની (સ્વર્ગ અને પૃથિવીની) વચ્ચે જે હોય, અથવા ૩. શરીરની અંદર અને ક્ષય વિનાનું જે હોય છે તે 'अन्तरिक्ष' કહેવાય છે. (१. अन्तरा + क्षा + अन्त, २. अन्तरा इमे ३. (शरीरेषु) अन्तः + अक्षयम्) આ (अन्तरिक्ष)ના પર્ય્યાયવાચક સોળ શબ્દોમાં એક 'समुद्र' એવો શબ્દ પણ છે. તે 'अन्तरिक्ष' વાચક 'समुद्र' શબ્દની સાથે પાર્થિવ સમુદ્રનો સંદેહ ઊભો થાય છે. (એટલે કે 'समुद्र' શબ્દથી અન્તરિક્ષ સમજવું કે 'સાગર' સમજવું ? એવી શંકા થાય છે.) આ 'समुद्र' શબ્દ કેવી રીતે બન્યો છે ? તો ૧. આમાંથી (મોજાંઓ રૂપે) પાણી દ્રવે છે; અથવા ૨. પાણી (નિમ્નાનુસારે હોવાથી) આની તરફ જાય છે; અથવા ૩. (ઘણા પાણીને કારણે) આમાં બધાં (જળચર) પ્રાણીઓ આનંદ પામે છે. અથવા ૪. આમાં પાણી (ઉદક) ભેગું થયું હોય છે, અથવા ૫. જે ભીંજવી દે છે તે 'समुद्र' (१. सम् + उद् + √द्रव, २. सम् + अभि + √ द्रव, ३. सम् + √मुद्, ४. सम् + उद(क), ५. सम् + √उन्द् = ભીંજવવું).

અન્તરિક્ષ અને પાર્થિવ સાગર માટે વપરાતા 'समुद्र' શબ્દનો વિષયવિભાગ કરવો જોઈએ. આ સન્દર્ભમાં કેટલાક આચાર્યો ઇતિહાસ કહે છે : કુરુવંશના આર્ષ્ટિષેણને દેવાપિ અને શંતનુ નામે બે પુત્રો હતા. આમાંથી શંતનુ નામના નાના ભાઈએ (મોટાભાઈની ઉપેક્ષા કરીને) પહેલાં પોતાનો અભિષેક કરાવી લીધો અને (મોટો ભાઈ) દેવાપિ તપ કરવા લાગ્યો. ત્યાર પછી શંતનુના રાજ્યમાં બાર વર્ષ સુધી વરસાદ ન વર્ષ્યો. આથી બ્રાહ્મણોએ તે (શંતનુ)ને કહ્યું : "તેં અધર્મ આચર્યો છે. કેમ કે મોટાભાઈને ઉલ્લંઘીને (પોતાનો) અભિષેક કરાવી લીધો છે. માટે (ઇન્દ્ર) દેવ તારા રાજ્યમાં વર્ષતા નથી." આ પછી શંતનુએ દેવાપિને રાજ્ય (પાછું) લઈ લેવા કહ્યું. પરંતુ દેવાપિએ તે (શંતનુ)ને કહ્યું : "હું તારો પુરોહિત થાઉં અને તને યજ્ઞ કરાવું (જેથી તારા રાજ્યમાં વર્ષા થશે.)" આ સન્દર્ભમાં આ વર્ષકામસૂક્ત છે. તેની એક ઋચા નીચે મુજબ છે :

13. आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान् ।

स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥ (ऋ.सं. १०/९८/५) आर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः । इषितसेनस्य इति वा । सेना सेश्वरा । समानगतिः वा । पुत्रः पुरु त्रायते । निपरणाद्वा । 'पुत्' नरकम् । ततः त्रायते इति वा । होत्रम् ऋषिः निषीदन् । ऋषिः दर्शनात् । 'स्तोमान् ददर्श' इति औपमन्यवः । "तद् यद् एनान् तपस्यमानान् ब्रह्म स्वयंभु अभ्यानर्षत्, तद् ऋषीणाम् ऋषित्वम्" इति विज्ञायते (तै.आ. २/९) । देवापिः देवानाम् आप्त्या, स्तुत्या च प्रदानेन च । देवसुमतिं = देवानां कल्याणीं मतिम् । चिकित्वान् = चेतनावान् । स उत्तरस्मादधरं समुद्रम् । उत्तरः उद्धततरो भवति । अधरः अधः अरः । अधः = न धावति । इति ऊर्ध्वगतिः प्रतिषिद्धा । तस्योत्तरा भूयसे निर्वचनाय ॥११॥

यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।

देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ॥

(ऋ.सं. १०/९८/७) ॥ शन्तनुः । शन्तनो । अस्तु इति वा शमस्मै तन्वाः अस्तु इति वा । पुरोहितः । पुरः एनं दधति । होत्राय वृतः । कृपायमाणः । अन्वध्यायत् । देवश्रुतम् – देवा एनं शृण्वन्ति । वृष्टिवनिं = वृष्टियाचिनम् । रराणः रातिः अभ्यस्तः । बृहस्पतिः ब्रह्मा आसीत् । सोऽस्मै वाचमयच्छत् । 'बृहत्' उपव्याख्यातम् (निरु. १/७) ॥१२॥

"आर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः, इषितसेनस्येति वा" । अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शन्तनोर्वर्षार्थियि कर्मणि

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

होतृत्वे वृतः 'होत्रं' कर्म प्रति 'निषीदन्' उपविष्टवान् । ततोऽपि "देवापिः" नाम नाम्ना "देवसुमतिं" देवानां कल्याणीं मतिमुदकसम्प्रदानाभिमुखीं कर्तुं "चिकित्वान्" जानानः । स हि तथाऽस्तौत्, यथा देवानामुदकसम्प्रदानाभिमुखी मतिरभूत् । ततः परितुष्टेषु देवेषु 'सः' देवापिः 'उत्तरस्मात्' अन्तरिक्षात् समुद्रात् 'अधरं' समुद्रं पार्थिवं प्रति । एष विभागः समुद्रयोः । 'अपो दिव्याः' प्रशस्ताः शस्यसम्पत्करीः 'असृजत्' अक्षारयत् । किंलक्षणाः ? 'वर्ष्याः' वर्षभूताः 'अभि' सर्वभूतानामुपरि । स देवाप्यधिकारे वर्त्तमान एतदकरोत् । अन्यस्मिन् कल्पेऽपि देवापिर्मन्माप्येतद्देवास्त्वित्येवं वर्त्तमानेनाभिसम्बध्यत इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । — ऋष्टिरायुधविशेषः, तद्बहुला सेना यस्य, सोऽयमृष्टिषेणः । इषितसेनो वा नित्यमेव प्रेषितसेनः शत्रून्प्रति । "सेना, सेश्वरा" । इनेतीश्वरनाम, तेन हि सा नित्यमेव संयुक्ता भवति । "समानगतिर्वा" समानमेकमर्थमुद्दिश्य जयाख्यमेतीति सेना । "पुत्रः, पुरु त्रायते" बह्वपि यत् पित्रा पापं कृतं भवति, ततोऽयं त्रायति पुत्रः । "निपरणाद्वा" निपृणाति निददाति ह्यसौ पिण्डान् पितृभ्यः इति पुत्रः । अथवा "पुम्" इति "नरकं" नरकस्थानमुच्यते, "ततस्त्रायत इति वा" पुत्रः । "ऋषिर्दर्शनात्" पश्यति ह्यसौ सूक्ष्मानर्थान् । "स्तोमान् ददर्शेत्यौपमन्यवः" । मन्त्राः स्तोमाः, तानसौ तारकेण ज्ञानेन पश्यतीति "औपमन्यवः" आचार्यो मन्यते । ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति, — "तद्यदेनांस्तपस्यमानान् ब्रह्म०" इत्यादि । 'तत्' एतत् । उच्यते, — यत्कृतमृषीणामृषित्वम् । 'यत्' यस्मात् 'एनान्' तपस्यमानान् तप्यमानान् 'ब्रह्म' ऋग्यजुःसामाख्यं 'स्वयम्भु' अकृतकम् अभ्यागच्छत्, अनधीतमेव तत्त्वतो ददृशुः तपोविशेषेण । 'तदृषीणामृषित्वम्' — इत्येवं ब्राह्मणोऽपि "वि" विचार्य्यमाणं "ज्ञायते" । "देवापिः, देवानामाप्त्या" स हि स्तुतिभिर्देवानाप्नोति, हविःसम्प्रदानेन च । "उत्तरः, उद्धततरः उद्गततरो भवति" उपरिष्टादवस्थानात् । "अधरः" अधोरः" । किमुक्तं भवति ? अध एवासौ चरति । "अधः" पुनः "न धावति" । तस्य ह्यधोगतित्वादेव "ऊर्ध्वगतिः प्रतिषिद्धा" ।

"तस्योत्तरा भूयसे निर्वचनाय" । किमुक्तं भवति ? 'तस्य' एवार्थस्य प्रकृतस्य यथोत्तरस्मात् समुद्राद् वृष्टिमयाचत देवेभ्यो देवापिः, यथा च पौरोहित्यमकरोत्, यथा वा अयाजयच्छन्तनुः वर्षार्थी, येन कर्मणा । 'भूयसे' बहुतराय 'निर्वचनाय' 'उत्तरा' एषा — ॥२॥

यद्देवापिरिति । 'यत्' यस्मात् 'देवापिः' 'शन्तनवे' राज्ञे "पुरोहितः" पुरोहितो ह्येवाग्निकर्मणि व्याप्रियते, स पुरोहितः सन् देवापिः "होत्राय" होतृकर्मणे वर्षार्थीये कर्मणि "वृतः" सन् 'कृपयन्' "कृपायमाणः" राज्ञः 'अदीधेत्' "अन्वध्यायत्" वृष्टिर्मे वेदिति । तं "देवश्रुतं" देवापिमेनं 'वृष्टिवनिं' "वृष्टियाचिनं" "रराणः" अददत् । "बृहस्पतिः" तस्मिन्नेव कर्मणि "ब्रह्मा आसीत्" ब्रह्मत्वेऽवस्थितः । "सः" "अस्मै" वर्षसाधिकां "वाचम्" "अयच्छत्" अददादित्यर्थः । तया वाचा तदनुगृहीतया देवान् स्तुत्वा तेभ्यो वर्षमलभतेति समस्तार्थः ॥

अथैकपदनिरुक्तम् । — "शन्तनुः" कस्मात् ? इति । उच्यते — स हि कञ्चिद्रोगार्त्तं दृष्ट्वा ब्रवीति हि "तनोः शं" तव "अस्तु इति" तनोऽसावगदो भवति । अथ "वा" "शमस्मै तन्वा अस्त्विति" एवमसावाशास्ते । शमिति सुखनाम । तनुः शरीरं तदसौ नित्यं शरीरायाशास्ते । "पुरोहितः" शान्तिकपौष्टिकाभिचारिकेषु कर्मसु "पुर एनं दधति" राजानः पुरस्कुर्वन्तीत्यर्थः । "देवश्रुतं" "देवा" हि "एनं" स्तुतीरुच्चारयन्तं "शृण्वन्ति" इति देवश्रुत्, तं देवश्रुतम् । "रराणः" इति "रातिः" दानार्थः "अभ्यस्तः" । "बृहदुपव्याख्यातम्" । "बृहदिति महतो नामधेयम्, परिवृढं भवति" इति । मन्त्रनिदानद्वारेण धर्मोऽयमत्र दर्शितः । ज्येष्ठे तिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमः । धर्मातिक्रमे च देवो न वर्षतीति । निरुक्तपक्षे, – ऋष्टिषेणो मध्यमः, तदपत्यमयमग्निः पार्थिव आर्ष्टिषेणो देवापिः. स शन्तनवे सर्वस्मै यजमानायेति योज्यम् । बृहस्पतिरिति मध्यमः । स्तनयित्नुलक्षणां वाचमित्यर्थः ॥३॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य तृतीयः पादः ॥३॥

---

13. (અનુ.) "દેવતાઓની (જળ મોકલનારી) સુમતિને જાણનાર આર્ષ્ટિષેણ દેવાપિ નામના ઋષિ હોતાના સ્થાને વિરાજ્યા. તેમણે ઉપરના (સમુદ્ર)માંથી નીચેના સમુદ્ર તરફ દિવ્ય જળવાળી વર્ષા વરસાવી.". અહીં આર્ષ્ટિષેણ એટલે ઋષ્ટિષેણ અથવા ઈષિતસેનના પુત્ર, (ઈષિતસેન = સેના મોકલનાર). જે સેશ્વર હોય કે જે સમાનગતિવાળી હોય તેને 'સેના' કહે છે. (પિતાએ) ઘણાં પાપો કર્યાં હોય તો પણ જે બચાવે છે તે પુત્ર, અથવા જે (પિતૃઓને) પિંડદાન કરે છે તે પુત્ર (निपरण = पिण्डदान । निपृणाति = निददाति). અથવા પુત્ નામના નરકમાંથી જે બચાવે છે માટે 'પુત્ર' કહેવાય છે. હોતા રૂપે ઋષિ (દેવાપિ) બેઠા. "દર્શન કરે છે" માટે ઋષિ કહેવાય છે. ઔપમન્યવના મતે જે ઋષિ હોય છે તે સ્તોમોને જુવે છે. "તપ કરી રહેલા એમની પાસે સ્વયંભુ બ્રહ્મ (વેદ) ઉપસ્થિત થયું, આથી તેઓ 'ઋષિઓ' (દર્શન કરનારા) થયા – આ જ ઋષિઓનું ઋષિત્વ છે' એમ બ્રાહ્મણ ગ્રન્થોમાં કહ્યું છે. જે સ્તુતિ કે હવિપ્રદાન કરીને દેવતાઓને મેળવે છે તે 'દેવાપિ' કહેવાય છે. દેવોની કલ્યાણકારિણી બુદ્ધિને 'દેવસુમતિ' કહે છે. ચેતનાવાન્ (જાણનારો) જે હોય તેને 'ચિકિત્વાન્' કહે છે. ઉત્તર=ઉદ્ધતતર= સૌથી ઊંચેના સમુદ્રમાંથી (એટલે કે અન્તરિક્ષ સ્થાનમાંથી) નીચેના (પાર્થિવ) સમુદ્ર તરફ (જળની વર્ષા કરે છે). અધર = અધો અર (=નીચે જનાર) અધ = જે

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

દોડતું નથી તે. એટલે કે (અધોગતિને કારણે) જેની ઊર્ધ્વગતિ નથી તે. આના પછીની ઋચા આનું વધુ સ્પષ્ટ રૂપે નિરૂપણ કરે છે :

"જ્યારે પુરોહિત દેવાપિ હોતા તરીકે પસંદ કરવામાં આવ્યો ત્યારે કૃપા કરતાં તેણે શંતનુને માટે ધ્યાન ધર્યું. (આ સમયે) દાન આપનાર બૃહસ્પતિએ તે (દેવાપિ)ને દેવતાઓ જેને સાંભળે છે તેવી સ્તુતિ અને વૃષ્ટિ કરનારી વાણી આપી." શંતનુ એટલે "હે શરીર ! કલ્યાણ થાવ." અથવા "આના શરીરનું કલ્યાણ થાવ." પુરોહિત એટલે 'જેને આગળ ધરવામાં આવે છે.' હોતૃકર્મ માટે પસંદ કરવામાં આવેલ. કૃપા કરતો ધ્યાન ધરે છે. દેવશ્રુત એટલે "દેવો એને સાંભળે છે." વૃષ્ટિવનિ એટલે 'વૃષ્ટિની યાચના કરનાર', 'રરાણ' શબ્દ √રા દાને (રાતિ)નું દ્વિત્વ (અભ્યસ્ત) કરવાથી સિદ્ધ થાય છે. (રરાણઃ = દાન આપનાર). બૃહસ્પતિ બ્રહ્મા હતા, તેમણે આને (દેવાપિને) વાણી આપી. બૃહસ્પતિ શબ્દમાંના 'બૃહત્' અંશની વ્યાખ્યા કરી નાખી છે.

चतुर्थः पादः

14. साधारणानि उत्तराणि षट् दिवश्च आदित्यस्य च (निघ. १/४)। यानि त्वस्य प्राधान्येन, उपरिष्टात् तानि व्याख्यास्यामः। (निरु. १२/१२/१८)। आदित्यः कस्मात् ? आदत्ते रसान्। आदत्ते भासं ज्योतिषाम्। आदीप्तो भासा इति वा। अदितेः पुत्र इति वा। अल्पप्रयोगं तु अस्य एतद् आर्चाभ्याम्नाये। सूक्तभाक्। सूर्यमादितेयम् (ऋ.सं. १०/८८/११)॥

एवमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति। तद् एतत्। मित्रस्य, वरुणस्य, अर्यम्णो, दक्षस्य, भगस्य, अंशस्य इति। अथापि मित्रावरुणयोः। "आदित्या दानुनस्पती" (ऋ.सं. २/४१/६)। दानुपती। अथापि मित्रस्य एकस्य। "प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन" (ऋ.सं.३/५९/२) इत्यपि निगमो भवति। अथापि वरुणस्य एकस्य। — "अथा वयमादित्य व्रते तव" (ऋ.सं. १/२४/१५)। व्रतमिति कर्मनाम। निवृत्तिकर्म वारयति इति सतः। इदमपि इतरद् व्रतमेतस्मादेव। वृणोति इति सतः। अन्नमपि व्रतमुच्यते — यद् आवृणोति शरीरम् ॥१३॥

लोकाभिधानाधिकारेणेदमुच्यते, — "साधारणान्युत्तराणि षट्, दिवश्चादित्यस्य च" इति। समानं ध्रियन्ते इति 'साधारणानि' नामानीत्यकारो वर्त्तते। अतएव 'उत्तराणि' प्रकृतमपेक्ष्य। किञ्चात्र प्रकृतम् ? अन्तरिक्षनामानि। तेभ्य इमान्युत्तराणि। कियन्ति पुनस्तानि ? 'षट्' (६)। कयोः पुनः साधारणानि ? 'दिवश्चादित्यस्य च'। कतमानि पुनस्तानि ? "खः, पृश्निः, नाकः" — इत्येवमादीनि। "यानि त्वस्य" आदित्यस्य "प्राधान्येन" वर्त्तन्ते प्रधानस्तुतिभाञ्जि नामानि, — "सविता" भगः, सूर्य्यः, पूषा" — इत्येवमादीनि (४८३ पृ.), "तानि उपरिष्टात् (दै.का. ६,२,१ – ३,६,) व्याख्यास्यामः" सप्तदशेऽध्याये। इमानि तु नैघण्टुकानि संसृष्टरूपाणि च द्युनामभिः साकमित्यत इह नैघण्टुकप्रकरणे निरुच्यन्ते ॥

आह, — "आदित्य" एव तावत् "कस्मात्" इति। उच्यते, — शृणु। "आदत्ते" ह्यसौ "रसान्" रश्मिभिरित्यादित्यः। "आदत्ते भासं ज्योतिषाम्" तदुदये हि चन्द्रादीनां प्रभानाशो भवत्येव, ग्रहापेक्षमेतत्। "आदीप्तो भासेति वा" सर्वतो ह्येष भासा आदीप्त आवृतो भवति। "अदितेः पुत्र इति वा" अदितिर्देवमाता, तस्याः पुत्रः, सोऽयमादितेयः सन्नादित्य इत्युच्यते।

"अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य्यमादितेयम्" इति। 'अल्पप्रयोगम्' अल्पविषयम्। 'तु' शब्दो विशेषणार्थः, एतदेवाल्पप्रयोगविषयम्, इतराणि सवितृभगपूषादीनि बहुप्रयोगविषयाणि 'अस्य' आदित्यस्य। क्वाल्पप्रयोगविषयम् ? 'आर्चाभ्याम्नाये' ऋचो यस्मिन्नभ्युपर्य्युपर्य्याम्नाताः, सोऽयमार्चाभ्याम्नायो दाशतयः, तस्मिन्नल्पप्रयोगविषयम्। एतददितेः पुत्रत्वाभिप्रायमभिधानम्। आदितेय इति 'सूक्तभाक्' एव चैतदभिधानम्, न हविर्भाक्, न ह्यादितेय इत्यनेन नाम्ना हविराध्वर्य्यवे चोदितपूर्वमस्ति। यथा त्वेतत् सूक्तमेव नैघण्टुकवृत्त्या भजते, तथेदमुदाहरणम्, — सूर्य्यमादितेयम्' इति "यदेदेनं मदधुर्यज्ञियासः (ऋ.सं. ८,४,१२,१)" — इत्यस्यामृचि। अन्ये तु मन्यन्ते, — आदित्य इत्येतदेवाल्पप्रयोगमिति। तत्र त्वेतद् विरुद्ध्यते, — सूक्तभागिति। हविरपि ह्यनेनाभिधानेन चोद्यते, — "आदित्यं बहुरूपमालभत" — इति। "तस्य च पशोरेतत् षलर्वमादित्यो देव उदगात् पुरस्तात्" — इति। अथ चैवमन्यथा वाक्यद्वयविभागेन स्यात् — 'अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये आदित्य इति हविर्भाक्, न सूक्तभाक्, अल्पं हविः सूक्तभाग्विषयमित्यर्थः। इदन्त्वन्यत्, — सूक्तमेव नैघण्टुकवृत्त्या भजते, कदाचिदपि हविः। तद्यथा — "सूर्य्यमादितेयम् (ऋ.सं. ८,४,१२,१)" — इति ॥

आदित्यशब्दप्रसक्तमाह, — एवम् "अन्यासामपि देवतानाम्" इति। देवता यज्ञमपेक्ष्येदमुच्यते, — "आदित्याभिधानप्रवादाः स्तुतयो भवन्ति"। "तद्यथा एतत्" उदाहरणजातम्, — "मित्रस्य वरुणस्यार्य्यम्णो दक्षस्य भगस्यांशस्य इति"। "इमा गिर

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

आदित्येभ्यो घृतस्नूः मनाद्राजभ्यो जुह्वा जुहोमि । शृणोतु मित्रो अर्य्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः" ॥ (ऋ.सं. २.७.६.१) । इत्यस्यामृचि सर्व एवादित्यप्रवादाः स्तुत्या स्तूयन्ते ।

"अथापि मित्रावरुणयोः" आदित्यप्रवादाः स्तुतयो भवन्ति । तद्यथा. — "आदित्या दानुनस्पती । दानपती" । "ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ॥" (ऋ.सं. २,८,८.१) । गायत्रीयं गृत्समदेन दृष्टा । अभिप्लवस्य षड्हस्य द्वितीयेऽहनि प्रउगं नाम शस्त्रम्. तत्र "अयं वां मित्रावरुणा सुतः सोमः (ऋ.सं. २,८,७,४)" — इत्येष तृचः शस्यते, तस्योत्तमा एषा । 'ता सम्राजा' तौ सन्दीप्तौ "घृतासुती" तौ हि घृतमुदकमासुवाते, वर्षकर्मणा जनयतः । 'आदित्या' अदितेः पुत्रौ 'दानुनस्पती' दानानामीशाते तौ यजमानैः सम्यक् स्तुतिभिर्हविर्भिश्च संसेवितौ सन्तौ 'सचेते' प्रतिसंसेवेते यजमानमभिमतैर्दानैः । 'अनवह्वरम्' अनवरुध्यमानावित्यर्थः । यजमानविशेषणं वा युक्तम् । न कृतघ्नौ, शक्तौ च दातुमित्येवं मित्रावरुणावत्र स्तूयेते ॥

"अथापि मित्रस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति । तद्यथा. — "प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ॥" (ऋ.सं. ३,४,५,२) । अयमप्यन्ये बह्वो निगमा इत्यपिशब्दः । प्र स मित्रेति विश्वामित्रेण दृष्टा, त्रिष्टुप् । मैत्रस्य चरोः पुरोऽनुवाक्या । 'प्र अस्तु' प्रकर्षेणास्तु भवतु । हे 'मित्र !' 'आदित्य' अदितेः पुत्र । 'स मर्त्तः' स मनुष्यः 'प्रयस्वान्' अन्नवान् । यः किं करोति ? 'यः' 'ते' तुभ्यं 'शिक्षति' ददाति 'व्रतेन' कर्मणा, निर्वपणप्रोक्षणादिना सस्कृत्येदं हविश्चरुलक्षणम् । किञ्च, एवमतिप्रभावस्त्वं येन स मर्त्तो यस्तव यष्टा 'त्वोतः' त्वत्परिग्रहे वर्त्तमानः, त्वया रक्षितः 'न' केनचित् प्रत्यनीकभृतेनातिबलेनापि शत्रुणा 'हन्यते' हिंस्यते । 'न' चाहूतोऽपि स च 'जीयते' वशीक्रियते केनचित् । न च केवलं शत्रूणामनाधृष्यः ? 'न' 'एनं' त्वोतं सन्तम् 'अंहः' अपि पापमपि 'अश्नोति' व्याप्नोति यत् 'अन्तितः' 'अन्तिकात् समीपात्, यत् स्वशरीरादेव वाङ्मनश्चेष्टानिमित्तमुत्पद्यते पापम्, तदुत्पत्तिसमकालमेव त्वदनुग्रहादपध्वस्यते, ततस्त्वैनं न व्याप्नोति । न च केवलं यदन्तिके उत्पद्यते, तदेवैनं न व्याप्नोति, किन्तर्हि ? यद्यपि 'दूरात्' पुत्रभ्रातृजायादिद्वारेणैवमास्कन्दति, तदपि 'न' एनम् अभिव्याप्तुं शक्नोति त्वोतं सन्तम् । एवं महानुभावस्त्वम्, ततस्त्वां स्तुमः इत्यभिप्रायः ॥

"अथापि वरुणस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति । तद्यथा — "अथा वयमादित्य व्रते तव" इति । "उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो, अदितये स्याम ॥" (ऋ.सं. १,२,१५,५) । अनया त्रिष्टुभोपाकृतः शुनःशेपो वरुणं स्तुतवान्, आत्मानं मोचयिष्यन् । वरुणप्रघासेष्ववभृथेष्टौ वारुण्यामिष्ट्यां हविषः पुरोऽनुवाक्येयम् । हे 'वरुण !' त्रिषु स्थानेषु — अधो मध्ये उपरिष्टाच्च, 'वयम् आबद्धाः स्वैः पाशैर्यतोऽतो ब्रूमः । — स्तुत्या हविषा चोपसृप्तस्त्वमस्माभिरतस्तावत् 'उत्तमं' 'पाशम्' उपरिष्टादवस्थितम् 'अस्मत्' अस्मत्तः 'उत् श्रथाय' ऊर्ध्वं शलथय । उच्छ्रत्य च विमुञ्चास्मानपीड़यन् । योऽपि चायं 'अधमः' ते पाशः अस्मासु वर्त्तते. एनम् अर्वाञ्चम् 'अव' श्रथय अवमुञ्च । तथाच योऽप्ययं 'मध्यमः' ते पाशोऽस्मन्मध्ये वर्त्तते, एनमपि तथैवावस्थितस्तमभिसर्जयन् ऊर्ध्वमधो वा अदुःखयन्नस्मान् 'वि' श्रथय विमुञ्च । अथैवं त्वया 'वयं' सर्वविमुक्तपाशाः सन्तो हे 'आदित्य' ! अदितेः पुत्र ! वरुण ! 'अनागसः' अपापाः संशुद्धसर्वकिल्बिषाः । एतदेव हि यौष्माकीणं पाशत्रयमागः, तेनावमुक्ताः सन्तः 'तव' एव 'व्रते' तवैव परिचरणकर्मणि 'अदितये' चात्मनोऽदीनत्वाय अनुपक्षयाय आदरवन्तः स्थिताः 'स्याम' इत्याशीः ॥

निगमप्रसक्तमुच्यते । — "व्रतमिति कर्मनाम (१८१ पृ.) "वृणोतीति" । एवं कर्त्तरि कारके "सतः" वृणोतः, तद्धि कर्म शुभञ्च कृतं सदावृणोति कर्त्तारम् । "इदमपीतरद् व्रतमेतस्मादेव" "निवृत्तिकर्म" यमनियमाख्यं बहिर्वेदिकमान्तर्वेदिकं वा. यदग्निसन्निधावुपेयते, तत् पुनः "वारयतीति" एवं "सतः" तद्विषयेषु प्रवर्त्तमानं पुरुषं स्त्र्यादिषु वारयति, तदनुसृत्य स पुरुषो निवर्त्ततेऽवकीर्णी, भविष्यामीत्येतस्माद् भयात् । "अन्नमपि व्रतमुच्यते, यदावृणोति शरीरम्" । रसशोणितमांसमेदोमज्जास्थिभावेन विपरिणममानम् ॥ आदित्यशब्दप्रसक्तानुप्रसक्तमिदमुक्तम् ॥१॥

---

14. (અનુ.) હવે પછીનાં છ નામો 'दिव' અને 'आदित्य' એ બન્ને માટેનાં સામાન્ય નામો છે. જે નામો આ (આદિત્ય)ને માટે પ્રધાનપણે વપરાય છે તેની આગળ ઉપર વ્યાખ્યા કરવામાં આવશે. અહીં 'આદિત્ય' શબ્દ કેવી રીતે બન્યો છે ? (તેની વિચારણા કરવામાં આવશે :) ૧. પોતાનાં કિરણો વડે રસોનું જે ગ્રહણ કરે છે તે. અથવા ૨. (ચન્દ્રાદિ) જ્યોતિષોનો પ્રકાશ જે લઈ લે છે તે. અથવા ૩. પોતાના પ્રકાશથી જે (ચારે બાજુએ) પ્રકાશે છે તે આદિત્ય. (૧.૨. आ + √दा, ૩. आ + √दीप) અથવા ૪. અદિતિના પુત્રને "આદિત્ય" કહે છે (તદ્ધિત નામ.) આ ઋચાઓના પૂર્ણ સંગ્રહ (અર્ચાભ્યામ્નાય = ઋગ્વેદ)માં (— તદ્ધિત નામ રૂપે) આનો (આદિત્ય શબ્દનો) બહુ ઓછો પ્રયોગ થયો છે. જેમ કે, (सूर्यमादितेयम्, ૦। એ કેવળ સૂક્તભાક્ છે, (હવિર્ભાક્ નહીં).

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

આવી રીતે અન્ય દેવતાઓની સ્તુતિઓ પણ 'આદિત્ય' શબ્દથી થાય છે. દા.ત., મિત્ર, વરુણ, અર્યમા, દક્ષ, ભગ અને અંશની (સ્તુતિઓ 'આદિત્ય' નામથી થઈ છે.) એ જ પ્રમાણે, મિત્રાવરુણની પણ ('આદિત્ય' શબ્દથી સ્તુતિ કરવામાં આવે છે. જેમ કે) "બન્ને આદિત્યો દાનના પતિ છે" તથા એકલા મિત્રની પણ (આદિત્ય શબ્દથી સ્તુતિ કરવામાં આવે છે) : "હે મિત્ર ! તે મનુષ્ય અન્નવાન્ (પયસ્વાન્) બની જાય. હે આદિત્ય ! જે તેને વ્રત દ્વારા (યજ્ઞાદિ કર્મો દ્વારા) દાન આપે છે" એવો મન્ત્ર પણ છે. એ જ રીતે એકલા વરુણની પણ ('આદિત્ય' શબ્દથી સ્તુતિ કરવામાં આવે છે :) "હે આદિત્ય ! તારા વ્રતમાં અમે.." અહીં 'વ્રત' એ કર્મનું નામ છે. (યમનિયમાદિ નિવૃત્તિપરક કર્મોને માટે તે ('વ્રત' શબ્દ) વપરાય છે, કેમ કે તે (નિષિદ્ધ કર્મોમાંથી) નિવારણ કરે છે. બીજા અર્થવાળો 'વ્રત' શબ્દ પણ આમાંથી જ બન્યો છે; કેમ કે તે (वृणोति) ઢાંકે છે. અન્નને પણ 'વ્રત' કહેવામાં આવે છે, કારણ કે તે શરીરને ઢાંકે છે.

14. (વિમર્શ) સ્વ:, પૃશ્નિ, નાક, ગો, વિષ્ટપ્ અને નભસ્ (નિઘંટુ ૧/૪) એ છ નામો દિવ્ (સ્વર્ગ) અને સૂર્યને માટે સામાન્ય રીતે વપરાય છે. પ્રધાન રૂપે કેવળ સૂર્યની સ્તુતિ કરવી હોય ત્યાં સવિતૃ, ભગ, સૂર્ય, પૂષન્ વગેરે નામોનો પ્રયોગ થાય છે. તથા આ નામોની વ્યાખ્યા નિરુકતના ૧૨મા અધ્યાયમાં કરવામાં આવી છે. अदितेः पुत्रः आदितेयः । (આદિતેયનું વિકૃત રૂપ તે આદિત્ય) આ સ્વાભાવિક વ્યુત્પત્તિ સ્વીકારવાને બદલે યાસ્કે आदित्यः = आ + दित्य. दित्यः दत्त्यः < दत्त < दत्त (आ + दत्त) એવી વ્યુત્પત્તિ દર્શાવી છે. કારણ કે આ વ્યુત્પત્તિને આધારે જ સૂર્યની સાથે સંકળાયેલા વિચારોની ઉપપત્તિ થઈ શકે છે, દુર્ગ કહે છે કે સવિતૃ, ભગ, પૂષન્ વગેરે નામો ઋગ્વેદમાં અનેકવાર વપરાયા છે, પરંતુ 'અદિતિના પુત્ર' (આદિતેય) તરીકે 'આદિત્ય' નામનો બહુ ઓછો પ્રયોગ થયો છે. ઋગ્વેદમાં (सूर्यमादितेयम्०।) 'અદિતિના પુત્ર' રૂપે સૂર્યની અગિયાર વખત સ્તુતિ કરવામાં આવે છે. પરંતુ અહીં 'આદિતેય' નામથી સૂર્યની પ્રધાન રૂપે સ્તુતિ નથી. આથી આ સૂકતનો હવિપ્રદાન કરવામાં વિનિયોગ થતો નથી. આમ દુર્ગે सूक्तभाक् અને सूर्यमादितेयम् વચ્ચે સંગતિ વિચારી છે. પરંતુ પ્રા. રાજવાડે सूर्यमादितेयम् શબ્દો પ્રક્ષિપ્ત માને છે. તેમના મતે 'આદિત્ય' એવું નામ ઋગ્વેદમાં પ્રમાણમાં ઓછું વપરાયું છે એટલું જ યાસ્કનું કહેવું છે.

---

15. स्वर् आदित्यो भवति । सु अरणः । सु ईरणः । स्वृतो रसान् । स्वृतो भासं ज्योतिषाम् । स्वृतो भासेति वा । एतेन द्यौर्व्याख्याता । पृश्निः आदित्यो भवति । प्राश्नुते एनं वर्णः इति नैरुक्ताः । संस्प्रष्टा रसान् । संस्प्रष्टा भासं ज्योतिषाम् । संस्पृष्टो भासेति वा । अथ द्यौः । संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च । नाकः आदित्यो भवति । नेता भासाम् । ज्योतिषां प्रणयः । अथ द्यौः । कम् इति सुखनाम । तत् प्रतिषिद्धं प्रतिषिध्येत । न वा अमुं लोकं जग्मुषे किंचनाकम् (काठक सं. २१/२) । न वा अमुं लोकं गतवते किंचन असुखम् । पुण्यकृतो ह्येव तत्र गच्छन्ति ॥

गौः आदित्यो भवति । गमयति रसान् । गच्छत्यन्तरिक्षे । अथ द्यौः । यत् पृथिव्या अधि दूरंगता भवति । यच्चास्यां ज्योतींषि गच्छन्ति । विष्टप् आदित्यो भवति । आविष्टो रसान् । आविष्टो भासं ज्योतिषाम् । आविष्टो भासेति वा । अथ द्यौः । आविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च । नभः आदित्यो भवति । नेता भासाम् । ज्योतिष प्रणयः । अपि वा । मनः एव स्याद्विपरीतः । न न भातीति वा । एतेन द्यौर्व्याख्याता ॥१४॥

अधुना प्रकृतमेवोच्यते, — "स्वरादित्यो भवति" । "सु अरणः" सुगमन इत्यर्थः । अथवा सुष्ठु तमांसि ईरयतीत्यर्थः । अथवा विशेषणविशेष्यभावेन एते वाक्ये स्याताम् । किमुक्तं भवति – सु अरणः ? इति । उच्यते, "सु ईरणः" इत्येव । "स्वृतो रसान्" सुष्ठु रसानादातुमृतो भौमान् आन्तरिक्षांश्च । "स्वृतो भासं ज्योतिषाम्" सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भासमादातुमृतो गतः । "स्वृतो भासेति वा" सुष्ठु परिगतो भासेति वा, सर्वतो ह्येष परिगतो दीप्त्या भवति ॥

"एतेन द्यौर्व्याख्याता" । उक्तं हि 'तानि चेत् समानकर्माणि समाननिर्वचनानि' — इति । सापि हि सु अरणा शोभनगमना भवति, शोभनं वा अस्यामर्य्यत इत्येवमादि यथासम्भवं योज्यम् ॥

"पृश्निरादित्यो भवति" । आह, — कस्मात् ? उच्यते, — "प्राश्नुत एनं वर्ण इति नैरुक्ताः" । 'प्राश्नुते' प्रकर्षेण व्याप्नोति 'एनम्' आदित्यं 'वर्णः' प्रोज्ज्वलः 'इति' 'नैरुक्ताः' मन्यन्ते । "संस्प्रष्टा रसान्" स हि नित्यकालमेव रसानां संस्प्रष्टा भवति । तस्य तदेव कर्म, वक्ष्यति, — "अथास्य कर्म रसादानम् (दि.का. ७,३,४)" — इति । "संस्प्रष्टा भासं ज्योतिषाम्" । आदित्य-संस्पर्शा देव ग्रहनक्षत्रचन्द्रमसां भासो नश्यन्ति । "संस्पृष्टो भासेति वा दीप्त्या ह्येष सर्वतः संस्पृष्टो भवति ॥

आह, — "द्यौः" कस्मात् पृश्निः ? उच्यते, — सापि हि "संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च" ॥

"नाक आदित्यो भवति" । आह, — कस्मात् ? उच्यते, — "नेता भासां" सर्वासु दिक्षु । "ज्योतिषां" च "प्रणयः" अस्यैव हि भगवतो रश्मिजालप्रान्तोपलग्नं ज्योतिश्चक्रं बम्भ्रमीति ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अथ द्यौः" कस्मान्नाकः ? इति । उच्यते, — "कमिति सुखनाम (३२४ पृ.)" । आह, ततः किम् ? इति । शृणु. — "तत्प्रतिषिद्धं सत् पुनरपि "प्रतिषिध्येत" । किम् ? इति । उच्यते, — तत्प्रतिषिध्यमानम् 'अकम्' भवति, असुखमित्यर्थः. पुनरपि च प्रतिषिध्यमानं 'नाकम्' भवति । ततो हिः प्रतिषेधः प्रकृतमापादयति, नाकमित्युक्ते सुखमिति प्रतीयते । ब्राह्मणमपि चैतस्मिन्नर्थे भवति — "न वा अमुं लोकं जग्मुषे किञ्च नाकम्" — इति । आह, — किमुक्तं भवति ? "अमुम्" एव "लोकं" द्युलोकं "जग्मुषे" गतवते "न" "किञ्च" किञ्चित्" नाकं "नासुखम्" इत्यर्थः । किङ्कारणम् ? य एव हि "पुण्यकृतः" भवन्ति. ते "एव हि" "तत्र गच्छन्ति" न च पुण्यकृतां दुःखेन भवितुं न्याय्यम् ॥

"गौरादित्यो भवति" । आह, — कस्मात् ? उच्यते. — "गमयति" ह्यसौ "रसान्" आत्मानं प्रति, उपक्षयं वा गमयति । किञ्च "गच्छत्यन्तरिक्षे" स एवात्मना ॥

"अथ द्यौः, कस्माद् गौः ? इति । उच्यते, — "यत्" यस्मादियं गौः "पृथिव्याः" "अधि" उपरि "दूरम्" अध्वानं "गता भवति" । किञ्च, "यत्" यस्मात् "च" "अस्यां" "ज्योतींषि" ग्रहनक्षत्रतारकादीनि "गच्छन्ति" तस्माद् गौः ॥

"विष्टबादित्यो भवति" । आह, — कस्मात् ? उच्यते, — आभिमुख्येन हि एषः "रसान्" भौमानान्तरिक्षांश्च "आविष्टः" प्रविष्टो रश्मिभिरादातुम् । किञ्च, आभिमुख्येन "आविष्टो भासं" "ज्योतिषां" ग्रहादीनाम् । अथवा अयमेवाभिमुख्येन "आविष्टो भासेति वा" सर्वतो ह्येष सन्दीप्तो भवति ॥

"अथ द्यौः" कस्मात् विष्टप् ? इति । उच्यते, — इयमपि हि "आविष्टा" "ज्योतिर्भिः" ग्रहनक्षत्रादिभिः ये चान्ये पुण्यकृतस्तैश्च तस्माद् विष्टबिति ।

"नभ आदित्यो भवति" । आह, — कस्मात् ? उच्यते, — "नेता" ह्येष "भासां" सर्वासु दिक्षु. "ज्योतिषां" च "प्रणयः" व्याख्यातमेतत् । "अपि वा भन एव स्याद्विपरीतः" भासनः सन् नभ इत्युक्तो विपर्य्ययेण । "न भातीति वा" न न भाति भात्येवेति नभः ॥

'एतेन द्यौर्व्याख्याता" सापि ह्यादित्यवन्नेत्री भासामित्यादि योज्यम् ॥२॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य] चतुर्थः पादः ॥२, ४॥

---

15. (અનુ.) (આદિત્યના પર્યાયવાચક છ શબ્દો स्वः पृश्निः नाकः गौः विष्टप् नभःનું હવે અનુક્રમે નિર્વચન આપવામાં આવે છે :)

૧. આદિત્યને स्वर् (स्वः) કહે છે. स्वः એટલે (क) સુઅરણ (સુગમન). (ख) સુઈરણ (સારી રીતે જે અંધકારનો નાશ કરે છે.) (ग) સારી રીતે (ભૂમિ ઉપરના અને અન્તરિક્ષના) રસોનું ગ્રહણ કરવા માટે જે ગયો છે, (घ) ગ્રહનક્ષત્રાદિ જ્યોતિષોના તેજનું ગ્રહણ કરવા માટે જે ગયો છે. અથવા (ङ) પોતાના પ્રકાશથી જે બધી બાજુએ ગયો છે (તે સ્વઃ = આદિત્ય). [(क) सु + √अर् (ख) सु + ईर् (ग) सु + ऋतः = गतः. रसान् आदातुम् (घ) सु + ऋतः, भासम् आदातुम्(ङ) सु + ऋतः भासा] આ (નિર્વચનો)થી દ્યૌનું પણ વ્યાખ્યાન થઈ જાય છે. (કેમ કે અગાઉ કહ્યું હતું કે तानि चेत् समानकर्माणि समाननिर्वचनानि इति ।)

૨. આદિત્યને 'પૃશ્નિ' કહે છે, કારણ કે (क) આદિત્યને વર્ણ (રંગ) વ્યાપી વળે છે, એવું નૈરુકતોનું માનવું છે. (ख) રસોને જે સારી રીતે અડકનારો છે. (ग) (ગ્રહનક્ષત્રાદિ) જ્યોતિષોના તેજને અડકનારો છે. (घ) પોતાની દીપ્તિથી બધાને અડકનારો છે. [(क) प्र + √अश (ख)–(घ) सम् + √स्पृश् + तृ]. હવે દ્યૌને માટે પૃશ્નિ શબ્દ વપરાયો હોય ત્યારે તેનું નિર્વચન આ પ્રમાણે થશે :— (क) (સૂર્ય અને બીજા ગ્રહનક્ષત્રાદિ) જ્યોતિઓ જેને અડકે છે (ख) પુણ્યશાળીઓ વડે જેને અડવામાં આવે છે (તે દ્યૌ).

૩. આદિત્યને 'નાક' કહે છે. (क) રસોને લઈ જનારો (ख) તેજને લઈ જનારો (ग) જ્યોતિઓનો પ્રણય (નેતા). હવે દ્યૌને માટે 'નાક' શબ્દ વપરાયો હોય ત્યારે તેનું નિર્વચન આ પ્રમાણે થશે : कम् એ સુખનું નામ છે. સુખનો જ્યાં પ્રતિષેધ થયો છે તે अकम् (દુઃખ) કહેવાય છે, આ अकम्નો પણ જ્યાં પ્રતિષેધ થાય તે नाकम् અર્થાત્ ખુબ સુખ। (બ્રાહ્મણ ગ્રન્થમાં પણ કહ્યું છે:) "આ લોકમાં જનારને કાંઈ જ અસુખ હોતું નથી." આ દ્યુલોકમાં જનારને અસુખ હોતું નથી, ત્યાં પુણ્ય કરનારાઓ જ જાય છે (અને પુણ્ય કરનારાઓને દુઃખનો અનુભવ થવો ન્યાય્ય નથી.)

૪. આદિત્યને 'ગૌઃ કહે છે. (क) રસોને જે મોકલે છે. (ख) જે અન્તરિક્ષમાં જાય છે [(क) √गम्लृ गतौ > गच्छ, प्रेरक णिच् > गमयति (ख) √गम्लृ गतौ गच्छति.] હવે દ્યૌને માટે ગૌઃ શબ્દ વપરાયો હોય ત્યારે તેનું નિર્વચન આ પ્રમાણે થશે: (क) પૃથિવીથી જે ઘણે દૂર ગયેલ છે. (ख) જેમાં ગ્રહનક્ષત્રાદિ જ્યોતિષો જાય છે (તે ગૌઃ = દ્યૌ).

૫. આદિત્યને 'વિષ્ટપ્' કહે છે. (क) (ભૂમિના અને અન્તરિક્ષના) રસોનું ગ્રહણ કરવા માટે (કિરણો વડે) જે પ્રવેશ્યો છે. (ख) ગ્રહનક્ષત્રાદિ જ્યોતિષોના તેજનું ગ્રહણ કરવા માટે જે પ્રવેશ્યો છે. (ग) પોતાની દીપ્તિથી જે બધે પ્રવેશ્યો છે (તે વિષ્ટપ્-આદિત્ય). (आ + √विश + तृ). હવે દ્યૌને માટે 'વિષ્ટપ્' શબ્દ વપરાયો હોય ત્યારે તેનું નિર્વચન આ પ્રમાણે થશે :

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(क) જ્યોતિઓ વડે સ્પર્શાયેલ (ख) પુણ્યશાળીઓ વડે સ્પર્શાયેલ (જે હોય તે વિષ્ટપ્-દ્યૌ).

૬. આદિત્યને 'નભ' કહે છે. (क) બધી દિશાઓમાં તેજને લઈ જનારો (ख) જ્યોતિષોનો પ્રણય (નેતા). અથવા (ग) भन = ભાસન (પ્રકાશવું) એ શબ્દમાં વર્ણોનો વિપર્ય્યય થવાથી 'નભ' શબ્દ બન્યો હશે. અથવા (घ) પ્રકાશતું નથી એમ નહીં અર્થાત્ જે અવશ્ય પ્રકાશે છે (તે નભ). આ નિર્વચનોથી જ દ્યૌની પણ વ્યાખ્યા થઈ જાય છે.

पञ्चमः पादः

16. रश्मिनामान्युत्तराणि पञ्चदश (निघ. १/५) रश्मिः यमनात् ? तेषामादितः साधारणानि पञ्चाश्वरश्मिभिः ॥

दिङ्नामान्युत्तराण्यष्टौ (निघ. १/६) । दिशः कस्मात् । दिशतेः । आसदनात् । अपि वा । अभ्यशनात् । तत्र काष्ठाः (निघ. १/६/५) इत्येतदनेकस्यापि सत्त्वस्य नाम भवति ।

काष्ठाः दिशो भवन्ति । क्रान्त्वा स्थिता भवन्ति । काष्ठाः उपदिशो भवन्ति । इतरेतरं क्रान्त्वा स्थिता भवन्ति । आदित्योऽपि काष्ठोच्यते । क्रान्त्वा स्थितो भवति । आज्यन्तोऽपि काष्ठोच्यते । क्रान्त्वा स्थितो भवति । आपोऽपि काष्ठा उच्यन्ते । क्रान्त्वा स्थिता भवन्ति । इति स्थावराणाम् ॥१५॥

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥

(ऋ.सं. १/३२/१०) अतिष्ठन्तीनामनिविशमानानाम् इत्यस्थावरणाम् । काष्ठानां मध्ये निहितं शरीरम् । मेघः शरीरम् । शरीरं शृणातेः । शम्नातेर्वा । वृत्रस्य । निण्यं निर्माणम् । विचरन्ति विजानन्ति आप इति । दीर्घं द्राघतेः । तमः तनोतेः । आशयत् आशेतेः । इन्द्रशत्रुः । इन्द्रोऽस्य शमयिता वा । शातयिता वा । तस्मात् इन्द्रशत्रुः ॥

आदित्यसम्बन्धेनैव "रश्मिनामान्युत्तराणि पञ्चदश" । "रश्मिर्यमनात्" उदकस्य अश्वानां वा । "तेषां" "पञ्च" यानि "आदितः" तानि "साधारणानि" "अश्वरश्मिभिः" । कतमानि पुनस्तानि ? "खेदयः, किरणाः" — इत्येवमादीनि । खं दयन्ते खे गच्छन्ति इति खेदयः, किरणा विक्षिप्ता भवन्ति ।

"दिङ्नामान्युत्तराण्यष्टौ" । आदित्योपलक्षणा एते हि दिश इत्यादित्यनामभ्यः उत्तराणि दिङ्नामानि । कियन्ति पुनस्तानि ? अष्टौ । कानि पुनस्तानि ? "आताः, आशाः, उपराः" — इत्येवमादीनि । आताः, आगता ह्येतास्तं तमर्थं प्रति भवन्ति । आशाः, अभ्यश्नुवते ह्येताः सर्वमेव यदस्ति किञ्चित । उपराः, सर्वमेव ह्येता उपरम्य रता भवन्तीत्युपराः ॥

आह, — "दिशः कस्मात्" ? "दिशतेः" अतिसर्जनार्थस्य (तु.उ.), अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम । अथवा "आसदनात्" तं तमर्थं प्रत्येता आसन्ना भवन्ति । "अपि वाभ्यशनात्" अभ्यश्नुवते ह्येतास्तं तमर्थम् ॥

"तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति" । तद्यथा, — "काष्ठा दिशो भवन्ति" । आह, — किङ्कारणम् ? इति । उच्यते, "क्रान्त्वा स्थिता भवन्ति" । क्रान्त्वा ह्येतास्तं तमर्थं प्रति गत्वा स्थिता भवन्ति, न हि तदस्ति, यत्रेमा न सन्ति । "काष्ठा उपदिशो भवन्ति" । "इतरेतरं क्रान्त्वा स्थिता भवन्ति" ता अपि हीतरेतरं क्रान्त्वा दिग्भिः साकं स्थिता भवन्ति । "आदित्योऽपि काष्ठोच्यते" । "क्रान्त्वा स्थितो भवति" असावपि स्वस्थानं क्रान्त्वा गत्वा स्थितो भवति । "आज्यन्तोऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति । "आज्यन्तोऽपि शरपथान्तः काष्ठोच्यते, असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति । "आपोऽपि काष्ठा उच्यन्ते" । ता पुनर्द्वय्यः, स्थावराश्चास्थावराश्च । तत्र, "क्रान्त्वा" गत्वा जलाशयमेताः "स्थिता भवन्तीति स्थावराणाम्" काष्ठात्वम् । अस्थावराणां पुनः क्रामन्ते चैताः, न क्वचित् तिष्ठन्तीति काष्ठा मेध्या आपः ॥१॥

मन्त्रोऽपि चैतस्मिन्नेवार्थे भवति, —

अतिष्ठन्तीनामिति । हिरण्यस्तूपस्येयमार्षम्, दासपत्नीरिति च । त्रिष्टुभावेते । अग्निष्टोमे निष्केवल्यं नाम शस्त्रम, तत्र निविद्धानीयमेतत् सूक्तम्, तत्र द्वे अपि शस्येते । न तिष्ठन्तीत्यतिष्ठन्त्यः, तासाम् "अतिष्ठन्तीनाम्" मेघोदरान्तर्गतानामपाम, ता हि मेघे गच्छन्त्येव तदाधारत्वात् । 'अनिवेशनानाम्' "अनिविशमानानाम्" न हि ताः क्वचिन्निविशन्ते, यावज्जलाशयं नाप्नुवन्ति । तासामेवंविधानां "काष्ठानां मध्ये" अवस्थितानां बाह्यतो मेघाख्यं "निहितम्" अवस्थापितं धात्रा "शरीरम्" आवृत्य अपः, तासामेव गुप्तये । ताः पुनः 'आपः' तस्य "वृत्रस्य" मेघस्य "निण्यं निर्णामं" येनासौ नीचैर्नमति तं प्रदेशं "विजानन्ति" इव ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain. Digitized by eGangotri.

यतस्तेन प्रदेशेन "विचरन्ति" प्रचरन्ति निम्नानुसारिण्यो हि ताः । असावपि वृत्रस्तासु प्रचरन्तीषु तत्प्रचरणनिरोधं चिकीर्षुः स्वशरीरविवृद्ध्या दीर्घं तमः स हि तमः स्वत एव, धूमादिप्रभवत्वात् । यावन्तं प्रदेशं निम्नमनुसरन्त्यो मेघस्य ताः स्तुता भवन्ति, निपितस्यन्त्यस्ततो बहुतरमसौ वर्द्धते । तदवरुरुत्सया एवं दीर्घं तम आवृत्य 'आशयत' आशेत इत्यर्थः । कः पुनरेवमाशयत ? 'इन्द्रशत्रुः' इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । — "शरीरं शृणातेः (२८३ पृ.)" हिंसार्थस्य, हिंस्यते हि तत् । "शम्नातेर्वा (२८३ पृ.)" हिंसार्थस्य "दीर्घं द्राघतेः (भ्.अ.)" वृद्ध्यर्थस्य, वृद्धं तद् भवति । "तमः तनोतेः (तना. उ.) तेन हि सर्वमिव ततं भवति । "आ शयत" "आङ्" पूर्वस्य "शेतेः" । 'इन्द्रशत्रुः, इन्द्रोऽस्य शमयिता वा" हन्तेत्यर्थः "शातयिता वा" हन्ता वा, धात्वन्यत्वमर्थैकत्वम् ॥

16. (અનુ.) નિઘંટુમાં ત્યાર પછી રશ્મિ (કિરણ)નાં પંદર નામો છે. રશ્મિ શબ્દ √यम् ઉપરથી સાધવામાં આવ્યો છે. કેમ કે રશ્મિ પાણીનું કે ઘોડાઓનું નિયમન કરે છે. રશ્મિનાં આ પંદર નામોમાંથી પહેલાં પાંચ નામો (खेदयः । किरणाः । गावः । रश्मयः । अभीशवः ।) અશ્વરશ્મિ (– લગામ)ને માટે પણ વપરાય છે.

પછીનાં આઠ નામો 'દિશા' માટે વપરાય છે. दिक् > दिशः શબ્દ કેવી રીતે બન્યો છે ? (क) √दिश् બતાવવું, નિર્દેશવું ધાતુ ઉપરથી બન્યો હશે. (અર્થાત્ પ્રવાસીને જે માર્ગ બતાવે છે તે દિશાઓ.) અથવા दिश् अतिसर्जने (સમર્પણ કરવું) ધાતુ ઉપરથી બન્યો હશે. (અમુક દેવતાને ઉદ્દેશીને આપવામાં આવતો હવિ અમુક ચોકક્સ દિશામાં મૂકવામાં આવે છે, માટે જેમાં હવિ ઇત્યાદિ સમર્પવામાં આવે છે તે દિશાઓ–દુર્ગ.) (ख) आ + √सद् 'નજીક બેસવું', 'નજીક હોવું' ધાતુ ઉપરથી 'દિશા' શબ્દ બન્યો હશે. (કેમ કે જગતના તમામ પદાર્થો દિશાઓની મર્યાદામાં રહેલા હોય છે.) અથવા (ग) अभि + √अश् 'વ્યાપ્ત થવું' ઉપરથી બન્યો હશે.

દિશાવાચક આઠ નામોમાં काष्ठा એવો એક શબ્દ છે જે 'દિશા' ઉપરાંત બીજા ઘણા પદાર્થોનું પણ નામ બને છે. (અર્થાત્ 'काष्ठा શબ્દ અનેકાર્થક છે, માત્ર દિશાનો પર્યાયવાચક શબ્દ નથી.) જેમ કે, ૧. દિશાને માટે 'काष्ठा' શબ્દ વપરાય છે. કેમ કે તે પ્રત્યેક પદાર્થની પ્રત્યે જઈને રહેલી છે (એટલે કે એવું કશુંય નથી જ્યાં આ દિશા ન હોય.) ૨. (ઈશાન વગેરે) ઉપદિશાઓ માટે 'काष्ठा' શબ્દ વપરાય છે. કેમ કે તે ઈતરેતરને અડકીને રહેલી હોય છે. ૩. આદિત્યને માટે પણ 'काष्ठा' શબ્દ વપરાય છે. કેમ કે આ પણ (પોતાના પૂર્વસ્થાનમાંથી) ચાલીને (પશ્ચિમમાં) જાય છે. ૪. આજ્યન્ત (બાણના માર્ગનો અંત–લક્ષ્ય)ને માટે પણ 'काष्ठा' શબ્દ વપરાય છે. કેમ કે (બાણ પોતાના માર્ગને) અતિક્રમીને લક્ષ્યમાં સ્થિર રહે છે. ૫. (સ્થાવર અને જંગમ) જળને માટે પણ 'काष्ठा' શબ્દ વપરાય છે. (જગત્‌ના પદાર્થોને) અતિક્રમીને જે (જળ જળાશયમાં) સ્થિર રહે છે (તેને સ્થાવર જળ કહે છે.) (√क्रमु पादविक्षेपे + √स्था गतिनिवृत्तौ).

(નીચેના મન્ત્રમાં 'જંગમ = અસ્થાવર જળ' અર્થમાં 'काष्ठा'નો પ્રયોગ બતાવે છે.) "ઊભા નહીં રહેનારા અને (જળાશયોમાં) નહીં પ્રવેશનારા જળની મધ્યમાં શરીર રહેલું હતું. વૃત્રના નીચેના સ્થાન તરફ પાણી ચાલ્યાં, જ્યાં 'જેનો ઇન્દ્ર શત્રુ છે' તેવો વૃત્ર ગાઢ અંધકારમાં સૂતો હતો.' ઊભા નહીં રહેનારા અને (જળાશયમાં) નહીં પ્રવેશનારા – એવા અસ્થાવર જળની મધ્યમાં શરીર રહેલું હતું. અહીં શરીર એટલે મેઘ, શરીર શબ્દ હિંસાર્થક √शॄ અથવા √शम् ધાતુ ઉપરથી બન્યો હશે. વૃત્રનું નિણ્ય એટલે નીચેનું સ્થાન કે જેને જળ ઓળખે છે, જાણે છે. દીર્ઘ શબ્દ વૃદ્ધ્યર્થક √द्राघ् ઉપરથી બન્યો હશે. તમસ્ શબ્દ √तनु विस्तारे ઉપરથી બન્યો હશે. आशयत = आङ् + √शीङ् शयने ઉપરથી બન્યો હશે. इन्द्रशत्रुः એટલે ઇન્દ્ર જેનો શમયિતા કે શાતયિતા (હન્તા) છે તે (અર્થાત્ વૃત્ર). (અહીં इन्द्रशत्रुः । શબ્દમાં આદ્યુદાત્ત છે, તેથી બહુવ્રીહિ સમાસ ગણવાનો છે. જો તે इन्द्रशत्रुः એવો અન્તોદાત્ત હોત તો 'ઇન્દ્રનો હન્તા' એવો તત્પુરુષ સમાસ લેવો પડત.)

16. (વિમર્શ) વૃત્રનું શરીર તે જ મેઘ છે. આ વાદળમાં રહેલું પાણી સ્થિર પણ રહી શકતું નથી અને બેસી પણ શકતું નથી. વાદળ વરસે નહીં ત્યાં સુધી તે પાણી તેની સાથે ગતિ કર્યા કરે છે. આથી તેને 'અસ્થાવર જળ' કહ્યું છે.

17. तत्को वृत्रः । (त्वाष्ट्रोऽसुर इति ऐतिहासिकाः ।) मेघः इति नैरुक्ताः । अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते । तत्रोपमार्थेन युद्धवर्णा भवन्ति । अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च । विवृद्ध्या शरीरस्य स्रोतांसि निवारयांचकार । तस्मिन् हते प्रसस्यन्दिरे आपः । तदभिवादिनी एषा ऋग्भवति ॥१६॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥

(ऋ.सं. १/३२/११) दासपत्नीः दासाधिपत्न्यः । दासो दस्यतेः । उपदासयति कर्माणि । अहिगोपा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अतिष्ठन् । अहिना गुप्ताः । अहिः अयनात् । एति अन्तरिक्षे । अयमपीतरोऽहिः एतस्मादेव । निर्ह्रसितोपसर्गः आहन्तीति । निरुद्धा आपः पणिनेव गावः । पणिः वणिग् भवति । पणिः पणनात् । वणिक् पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति । बिभर्तेः । वृत्रं जघ्निवान् अपववार तत् । वृत्रो वृणोतेर्वा । वर्ततेर्वा । वर्धतेर्वा । यद्वृणोत्तद् वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते ॥१७॥

इह मन्त्रे वृत्र इत्येतच्छ्रुतं तदेतत् नैगमानुप्रसक्तं विचार्य्यते इत्युपयुक्तस्तच्छब्दः । आह, — "को वृत्रः ?" उच्यते, — "मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः" । निरुक्तमधीयते नैरुक्ताः । आह, — यदि मेघो वृत्रो य एष मन्त्रेषु यत्र सङ्ग्रामे श्रूयते तत्र कः समाधिः ? इति । उच्यते, — "अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति" । 'अपाश्च' मेघोदरान्तर्गतानां 'ज्योतिषश्च' वैद्युतस्य उद्भुतवृत्तेः 'मिश्रीभावकर्मणो वर्षकर्म जायते' तेन हि वैद्युतेन ज्योतिषा वाय्वा वेष्टितेन इन्द्राख्येनोपताड्यमाना आपः प्रस्यन्दते—वर्षभावाय कल्प्यन्ते । 'तत्र' एवं सत्युदक तेजसोरितरेतरप्रतिद्वन्द्वभूतयोः 'उपमार्थेन' रूपकल्पनया 'युद्धवर्णा भवन्ति' — इति युद्धे रूपकाणीत्यर्थः । न ह्यत्र यथाभूतं युद्धमस्ति, न हीन्द्रस्य शत्रवः केचन सन्ति । मन्त्रोऽपि चैतस्मिन्नर्थे अस्ति नेन्द्रस्य शत्रवः "यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु । मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा विवित्से ॥" (ऋ.सं. ८,१,१५,२) । वामदेवपुत्रस्य बृहदुक्थस्यार्षम् । त्रिष्टुप् । व्यूढस्याष्टमेऽहनि निष्केवल्ये शस्यते । 'यत्' 'अचरः' त्वं नानाप्रकारं 'तन्वा वावृधानः' शरीरेण विग्रहवान् भूत्वा वावृधानः पुनः पुनः वर्द्धमानः । कथं पुनरचरः ? "बलानीन्द्र प्रब्रुवाणो जनेषु" । 'बलानि' आत्मीयानि वीर्य्याणि, हे 'इन्द्र !' 'प्रब्रुवाणः' इव । क्व ? 'जनेषु' । किं त्वं तथैव ? न । "मायेत्सा ते यानि युद्धान्याहुः" । 'यानि युद्धान्याहुः' ऐतिहासिकाः, नानारूपाण्युपप्रदर्शयन्तः, 'सा' अपि च 'ते' तव 'माया इत्' मायैव । किं कारणम् ? 'नाद्य' शत्रुः तवास्ति प्रत्यनीकभूतः, 'न नु पुरा' नापि पुरा कश्चिदासीत्, यावद् वीर्य्यं किञ्चित् क्वचिदस्ति सर्वं तत् त्वमेव । "वीर्य्यं वै प्रावीर्य्यमिन्द्र इति ह विज्ञायते" । क्व ते शत्रुः ? येन साकं युयोधिथ । एतत् त्वमपि 'विवित्से' वेत्स्येव, न केवलमहमेवेत्यभिप्रायः । एवमेतन्मन्त्रे मायात्वमेन्त्रे युद्धमिति श्रूयते । विज्ञायते च "तदाहुर्नैतदस्ति यद्देवासुरमिति" । तस्मात् साधूक्तम्, – अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति" ॥

आह, — किं वृत्रवदेव रूपाणि भवन्ति ? नेत्युच्यते, — "अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च" । च समुच्चयार्थो द्रष्टव्यः । वृत्रवच्चाहिवच्चेति मन्त्रवर्णा भवन्ति, ब्राह्मणवादाश्च शाखान्ते भवन्ति, तदप्युपेक्षितव्यम् । "तस्मिन् हते" वृत्राख्ये मेघे हते "प्रसस्यन्दिर आपः" ॥

"तदभिवादिनी एषा" — ॥२॥

दासपत्नीति । 'अपां' 'यत्' 'बिलं' निर्गमद्वारम् 'अपिहितम्' 'आसीत्' तेन मेघेन, 'तत्' यदा इन्द्रः तं 'वृत्रं' मेघं 'जघन्वान्' निजघ्निवान् अहत, हत्वा च 'अपववार' अपावृतवान् । अथ तदा तस्मिन् निहते अपावृते च द्वारे ताः आपः प्रस्यन्दिरे वर्षभावेनेति समस्तार्थः ॥

अथैकपदनिरुक्तम् । — "दासपत्नीः दासाधिपत्न्यः" दासः कर्मकरः, तं हि ता अधिष्ठाय पान्ति रक्षन्ति । स हि कर्मणा श्रान्तः, तासु पीतासु विश्रान्त आप्यायितो भवति । विग्रहप्रसक्तं निरुच्यते, — "दासो दस्यतेः (दि.प.)" स हि "उपदासयति" उपक्षयति कृष्यादीनि "कर्माणि" । "अहिगोपाः" "अहिना गुप्ताः" । "अहिः" कस्मात् ? उच्यते, – "अयनात्", "एति" हि असौ "अन्तरिक्षे" । शब्दसामान्यान्निरुच्यते, — "अयमपीतरोऽहिः" सर्पः "एतस्मादेव" असावपि हि एति । अथवा "निर्ह्रसितोपसर्गः" स्यात् । कथम् ? "आहन्ति" असौ भोगेनेत्यादिः । आङ्पूर्वस्य हन्तेः (अदा. प.), सु पुनरयमुपसर्गं निह्रस्य ह्रस्वं कृत्वा अहिरुच्यते । "पणिर्वणिग् भवति" — इति पर्य्यायेण तत्त्ववचनम् । "पणिः पणनात्" पणिति ह्यसौ व्यवहारं करोति । पर्य्यायप्रसक्तं निरुच्यते, — "वणिक् पण्यं" वणिजो यत् द्रव्यं तत् पण्यम्, तदसौ "नेनेक्ति" नित्यकालं शुचीकरोति मूल्यार्हं स्यादिति । "बिलं भरं भवति" "बिभर्त्तेः (जु.प.)" धातोः, भृतं हि तदुदकादिभिः । "वृत्रो वृणोतेर्वा (स्वा.उ.) वर्त्ततेर्वा (भृ.आ.) वर्द्धतेर्वा (भृ.आ.)" — इत्येषां धातूनामन्यतमस्य । ब्राह्मणमपि चैतस्मिन्नर्थे भवति, – "यदवृणोत्", अन्तरिक्षमुदकं वा, महत्त्वात् "तद् वृत्रस्य वृत्रत्वम्" — "इति" एवं ब्राह्मणोऽपि "विज्ञायते" विचार्य्यमाणो ज्ञायते । अथवा "यदवर्त्तत" इन्द्रेण हतो वृत्रो मेघः अपां बिले अपावृते अपः वृष्टिभावेन अवर्त्तयत् प्रावर्त्तयत्, "तद् वृत्रस्य वृत्रत्वम्" । अथवा "यत् अवर्द्धत"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

असावतिमात्रप्रमाणम्, "तद् वृत्रस्य वृत्रत्वं" स्यादिति ॥३॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य] पञ्चमः पादः ॥२, ५॥

17. (અનુ.) આ 'વૃત્ર' કોણ છે ? 'તે મેઘ છે' એમ નૈરુક્તોનું કહેવું છે. પાણી અને પ્રકાશ એ બે ભેગાં મળીને વૃષ્ટિક્રિયા થાય છે. અહીં સાદૃશ્યને આધારે (રૂપકાત્મક રીતે) યુદ્ધનું વર્ણન કરવામાં આવે છે. (માત્ર 'વૃત્ર'નું યુદ્ધવર્ણન થાય છે એમ નહીં). તેને માટે 'અહિ' એવું નામ વાપરીને પણ મન્ત્રોમાં અને બ્રાહ્મણગ્રન્થોમાં વર્ણન થયેલાં જોવા મળે છે. (વૃત્રે પોતાનું) શરીર વધારીને જળને રોકી રાખ્યાં. (ઇન્દ્રે) તેને માર્યો ત્યારે જળ વહ્યાં. એ અર્થનું વર્ણન કરતી ઋચા નીચે મુજબ છે : "જેવી રીતે કોઈ વણિક્ (વેચવા માટે વાડામાં) ગાયોને સંતાડી રાખે તેવી રીતે અહિ (મેઘ) વડે દાસપત્નીઓના રૂપમાં સંતાડવામાં આવેલાં જળ ઊભાં હતાં. વૃત્રને મારનારે (ઇન્દ્રે), જે જળનું નિર્ગમન દ્વાર બંધ કરી દેવામાં આવ્યું હતું તેને ખોલી નાખ્યું (અને દ્વાર ખોલી નાખવામાં આવતાં વૃષ્ટિ રૂપે જળ વહ્યાં.)" દાસપત્ની = દાસોનું રક્ષણ કરનાર. દાસ (= કર્મ કરનારો) શબ્દ √दस् (પૂરું કરવું) ધાતુ ઉપરથી બન્યો છે. દાસ (તેને સોંપવામાં આવેલાં) કર્મો પૂરાં કરે છે. અહીં ગોપા એટલે અહિ વડે સંતાડવામાં આવેલ. 'અહિ' શબ્દ √इ (જવું) > અયન ઉપરથી બન્યો છે. તે અન્તરિક્ષમાં જાય છે. બીજો (સર્પવાચક) 'અહિ' શબ્દ પણ આ જ ધાતુમાંથી સિદ્ધ થાય છે, અથવા આહન્તિ (आ + √हन्) માં આવેલ ઉપસર્ગ (आङ्)માં હ્રસ્વ કરીને 'અહિ' શબ્દ સિદ્ધ કરવામાં આવે છે. વણિક્ જેવી રીતે ગાયોને રોકી રાખે છે, તેવી રીતે અહિ જળને રોકી રાખે છે. પણિ એટલે વણિક્. √पण व्यवहारे (વસ્તુઓનું વેચાણ કરવું) ઉપરથી 'પણિ' શબ્દ બન્યો છે. જે વણિક્ હોય છે તે વેચવાની વસ્તુને સ્વચ્છ કરીને રાખે છે. જળનું (નિર્ગમન) દ્વાર જે બંધ કરવામાં આવ્યું હતું. બિલ એટલે ભર. √बिभर्ति (ભરે છે) તેની ઉપરથી ભર. (= કાણું-દ્વાર-જે જળથી ભરાઈ ગયું હોય છે.) વૃત્રને મારનારે તે દ્વાર ખોલી નાખ્યું. वृणोति, वर्तते, वर्धते । આ ત્રણમાંથી ગમે તે એક ધાતુ વડે 'વૃત્ર' શબ્દ સાધવામાં આવે છે. (તૈત્તિરીય સંહિતા ૨-૪-૧૨-૨માં) કહ્યું છે : "(જળનું નિર્ગમન દ્વાર) ઢાંકી દીધું છે તે જ વૃત્રનું વૃત્રત્વ છે." અથવા "જે હાજર હતો તે વૃત્રનું વૃત્રત્વ છે."

17. (વિમર્શ) યાસ્ક પ્રસંગપ્રાપ્ત વૃત્રનું નિર્વચન કરે છે. નૈરુક્તોના મતે 'વૃત્ર' એ મેઘ હોય તો મન્ત્રોમાં સંગ્રામનાં જે વર્ણનો જોવા મળે છે તેનું શું સમાધાન ? તો મેઘના ઉદરમાં રહેલ પાણી અને વિદ્યુત્ રૂપ જ્યોતિનું મિશ્રણ થયા પછી વાયુ રૂપ ઇન્દ્રથી તાડન કરવામાં આવતાં પાણી વરસે છે. અહીં પરસ્પર વિરુદ્ધ એવા પાણી અને વૈદ્યુતાગ્નિના મિશ્રણને રૂપકાત્મક રીતે યુદ્ધ રૂપે વર્ણવવામાં આવ્યા છે. વાસ્તવમાં યુદ્ધ હોતું જ નથી, કેમ કે ઇન્દ્રનો કોઈ શત્રુ જ નથી. કાલિદાસે મેઘની સમજૂતી આપી છે : धूमज्योतिःसलिलमरुतां संनिपातः क्व मेघः । (મેઘદૂત-૫). વેદમાં વર્ણવેલ ઇન્દ્ર તે વાદળને વીંટળાઈ વળતો વાયુ અને વિદ્યુત્ જ છે, જે વાદળમાંથી વરસાદ પાડે છે.

मेघ इति नैरुक्ताः । એ વાક્ય પછી त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । એવું એક વાક્ય નિરુક્તની કેટલીક હસ્તપ્રતમાં જોવા મળે છે. તથા દુર્ગે પણ આ વાક્ય ઉદ્ધૃત કર્યું છે, પરંતુ તેની ઉપર ટીકા લખી નથી. આથી પ્રા. રાજવાડે તેને પ્રક્ષિપ્ત માને છે.

षष्ठः पादः

18. रात्रिनामान्युत्तराणि त्रयोविंशतिः (निघ. १/७) । रात्रिः कस्मात् । प्ररमयति भूतानि नक्तंचारीणि । उपरमयतीतराणि ध्रुवीकरोति । रातेर्वा स्यात् दानकर्मणः । प्रदीयन्तेऽस्यामवश्यायाः ॥ उषोनामान्युत्तराणि षोळश (निघ. १/८) । उषाः कस्मात् । उच्छतीति सत्याः । रात्रेरपरः कालः । तस्या एषा भवति ॥१८॥

इ॒दं श्रेष्ठं॒ ज्योति॑षां॒ ज्योति॒राग॑ाच्चि॒त्रः प्र॑के॒तो अ॑जनिष्ट॒ विभ्वा॑ ।

यथा॒ प्रसू॑ता स॒वि॒तुः स॒वायँ॑ ए॒वा रात्र्यु॒षसे॒ योनि॑मारैक् (ऋ.सं. १/११३/१) ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमत् । चित्रम् । प्रकेतनं प्रज्ञाततमम् । अजनिष्ट । विभूततमम् । यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्य । एवं रात्र्युषसे योनिमरिचत् स्थानम् । स्त्रीयोनिः अभियुतः एनां गर्भः । तस्या एषापरा भवति ॥१९॥

"काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति" — इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्तमुक्तम्, प्रकृतमिदानीमुच्यते. — "रात्रिनामान्युत्तराणि त्रयोविंशतिः" । रात्रेर्नामानि 'रात्रिनामानि' । 'उत्तराणि' इति प्रकृतेभ्यो दिङ्नामभ्यः तमःसतन्त्रा ह्रि रात्रिः. तस्य च तमसो दिक्ष्वेवात्मलाभो भवति, अतो दिङ्नामभ्य उत्तराणि रात्रिनामानि । कियन्ति पुनस्तानि ? 'त्रयोविंशतिः' त्रीणि च

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

विंशतिश्च त्रयोविंशतिः (२३)। कतमानि पुनस्तानि ? "श्यावी, क्षपा, शर्वरी" — इत्येवमादीनि । श्याववर्णा हि रात्रिरिति श्यावी । स्वैः स्वैः कर्मभिः अहनि क्षीणान् प्राणिनः इयं स्वापेन पातीति क्षपा, अस्यां हि सुप्ताः पुनर्नवा इव प्राणिनः प्रातरुत्तिष्ठन्ति । शरणमस्यां स्वापार्थं व्रियत इति शर्वरी । इत्येवमादि सर्वत्र योज्यम् ॥

आह, — "रात्रिः कस्मात् ?" इति । उच्यते, — इयं ह्यागच्छन्ती प्रकर्षेण रमयति । कानि ? "भूतानि नक्तञ्चारीणि" पिशाचादीनि, तानि हि विगतेऽहनि रात्र्यामुपस्थितायां प्राप्तोऽयं विहारसमयः इति प्रकर्षेण रमन्ते । "उपरमयतीतराणि ध्रुवीकरोति" इतराण्यपि दिवाचारीणि सैवोपरमयति, तस्यां ह्युपस्थितायां दिवाचराणि भूतानि मनुष्यादीनि इतिकर्तव्यताभ्यः उपरमन्ति, उपरम्य च स्थिरीभवन्ति निवासाय । 'रातेर्वा स्यात् दानकर्मणः' दानार्थस्य । आह, — किमस्यां प्रदीयते ? उच्यते, — "प्रदीयन्तेऽस्यामवश्यायाः" अवश्यमायन्तीत्यवश्यायाः, तुषारा इत्यर्थः, ते हि रात्रौ निपतन्ति ॥

"उषोनामान्युत्तराणि षोडश" उषसो नामानि । रात्रेरेव ह्यपरः कालः उष आख्यो भवतीति रात्रिनामभ्य 'उत्तराणि उषोनामानि' । कियन्ति पुनस्तानि ? 'षोडश' (१६) षट् च दश च षोडश । कतमानि पुनस्तानि ? "विभावरी, सूनरी" — इत्येवमादीनि । विविधां भियं भासं वृणोतीति विभावरी । शोभनं नराणामस्यामुत्थानं भवतीति सूनरी । इत्येवमादि निर्वचनं योज्यम् ॥

आह, — "उषाः कस्मात् ?" इति । उच्यते, — "उच्छतीति सत्याः" । 'उछी विवासे (भृ.प.)' विवासयति हीयं तमांसि तस्मादुच्छतीत्येवमस्या एतस्मिन् कर्मणि सत्याः कर्त्तरि कारके भास उषा इत्येतदभिधानं भवति । आह, — का पुनश्चियमुषाः ? इति । उच्यते, — "रात्रेरपरः कालः" स उषा इत्युच्यते । आह, — कथमेतदुच्यते रात्रेरपरः काल उषाः ? इति । उच्यते, "तस्याः" उषसः रात्र्यपरकालत्वम् । "एषा" निर्वाचिका ऋग् "भवति" — ॥१॥

इदं श्रेष्ठमिति । आङ्गिरसस्य कुत्सस्येयमार्षम्, उत्तरा च । उभे अपि त्रिष्टुभावेते, प्रातरनुवाकाश्विनयोः शस्येते । "इदम्" उषोलक्षणं "ज्योतिः" "श्रेष्ठम्" आदित्यादीनां "ज्योतिषाम्" इति निर्द्धारणे षष्ठी । आदित्यो हि तापकः प्रकाशकः, चन्द्रमा अथ निशीतः प्रकाशकश्च, इदं पुनर्नात्युष्णं नातिशीतं प्रकाशकश्च । इत्येवमादित्यादीनामिदमेव श्रेष्ठम् । 'आगात्' "आगमत्", आगच्छतीत्यर्थः । "चित्रं चायनीयं पूजनीयं वा श्रेष्ठत्वादेव, 'प्रकेतः' "प्रकेतनं प्रज्ञाततमम्" "अजनिष्ट" जातमित्यर्थः । जातं सदागच्छति सर्वासु दिक्षु । 'विभ्वा, "विभूततमम्" इदमतिमहत्त्वाद् विभूततमं विस्तीर्णतमम्, इतराणि परिच्छिन्नतराणि ज्योतींषि अपेक्ष्य । किञ्च, "यथा प्रसूता" प्रकर्षेण सूता प्रसवमनुप्राप्ता । सूतिशब्दः प्रसवार्थः । "रात्रिः", "सवितुः" "आदित्यस्य" "सवाय" "प्रसवाय" आदित्योत्सृष्टे देशे जायते । "एवम्" 'एव' "रात्री" रात्रिः उषसो जन्मार्थं "योनिं" "स्थानम्" अवकाशम् "उषसे" आत्मलाभाय 'आरैक्' "अरिचत्" आरेचयति, ददातीत्यर्थः । यथोषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वात्, एवं रात्रिरुषसो जन्मनो हेतुः, इत्येवमस्यामृचि रात्रेरेव वापरः कालः उषःसञ्ज्ञित इति गम्यते । स्थानं योनिशब्देनोच्यते । यद्धि यस्मिन् विधीयते, तत् तेन साकं युतं भवति मिश्रीभूतमित्यर्थः । इयमपीतरा — "स्त्रीयोनिः" एतस्मादेव । किङ्कारणम् ? "अभियुतः" हि "गर्भः" "एनाम्" भवति, आमिश्रीभूत इत्यर्थः । पूर्वत्र, — "अयमपीतरो योनिः, एतस्मादेव । (किम् ?) परियुतो भवति" इति परियवनक्रियासामान्येन निरुक्तो योनिशब्दः, इह पुनः 'अभियुत एनां गर्भः' इति मिश्रीभावसामान्येन उभयलिङ्गत्वं चास्योपदर्शितम्, — इह स्त्रीलिङ्गम्, तत्र पुंलिङ्गम् इति । "तस्याः" उषसः "एषा" "अपरा" ऋग् "भवति" — (अस्यैवार्थस्य दृढतायै रात्रेरपरः काल उषा उच्यत इति) ॥२॥

---

18. **(અનુ.)** (દિશાઓનાં નામ) પછી રાત્રિના ત્રેવીસ નામો આવે છે. 'रात्रि' શબ્દ કેવી રીતે બન્યો છે ? ૧. રાત્રે ફરનારાં પ્રાણીઓને જે ખુશ કરે છે. ૨. બીજા (દિવસે ફરનારાં) પ્રાણીઓનો જ ઉપરામ કરે છે, શાંત (સ્થિર) કરે છે તે રાત્રિ (√रमु પ્રેરક > रमयति). અથવા ૩. દાનાર્થક रा > राति ઉપરથી 'रात्रि શબ્દ બન્યો હશે. કેમ કે તેમાં (રાત્રે) (આકાશમાંથી) ઝાકળ પડે છે = આપવામાં આવે છે. (अवश्यमायन्तीत्वश्यायाः = तुषारा इत्यर्थः).

આ પછી ઉષાનાં સોળ નામો આવે છે. 'ઉષા' શબ્દ કેવી રીતે બન્યો છે ? √उच्छी विवासे ઉપરથી 'ઉષા' શબ્દ સાધવામાં આવે છે. (उच्छति तमः विवासयति = निवारयति सा उषाः इति अभिधीयते ।) રાત્રિના પાછળના ભાગને ઉષા કહે છે. ઉષાનું વર્ણન કરતી ઋચા આ પ્રમાણે છે: 'આ શ્રેષ્ઠ, જ્યોતિઓનું પણ જ્યોતિ આવ્યું. દર્શનીય ખૂબ પ્રકાશવાળું અને અતિમહાન (અતિવિસ્તૃત) (જ્યોતિ) જન્મ્યું (અથવા ચિત્ર = પૂજનીય, પ્રકેત = ધ્વજવાળો વિભ્વન્ = અગ્નિ જન્મ્યો). જેવી રીતે સવિતાના જન્મ માટે (ઉષા) જન્મી; રાત્રિએ ઉષાના જન્મ માટે જગ્યા ખાલી કરી." આ શ્રેષ્ઠ, જ્યોતિઓનું પણ જ્યોતિ આવ્યું. ચિત્ર (ચાયનીય = પૂજનીય = દર્શનીય). પ્રકેતન = પ્રજ્ઞાતતમ અને વિભૂતતમ (અતિવિસ્તૃત) (જ્યોતિ) જન્મ્યું. જેવી રીતે સવિતાએ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(જગ્યા ખાલી કરીને) (રાત્રિ) જન્માવી તેવી રીતે આદિત્યના જન્મ માટે રાત્રિએ (પણ જગ્યા ખાલી કરી.) એવી રીતે રાત્રિએ પહેલાં ઉષાને માટે જગ્યા ખાલી કરી. અહીં સ્થાનને માટે 'યોનિ' શબ્દ વપરાયો છે. योनिमारैक् = योनिमरिचत = સ્થાન ખાલી કર્યું. આમાં ગર્ભ અભિમિશ્રિત થાય છે માટે સ્ત્રીયોનિને પણ 'યોનિ' કહે છે. (રાત્રિ એ સ્ત્રીયોનિ જેવી છે, જેમાંથી ઉષા જન્મે છે.) ઉષાનું વર્ણન કરતી બીજી ઋચા નીચે મુજબ છે.

---

19. रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।

समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ (ऋ.सं. १/११३/२) रुशद्वत्सा सूर्यवत्सा । रुशत् इति वर्णनाम । रोचतेर्ज्वलतिकर्मणः । सूर्यमस्या वत्समाह । साहचर्यात् । रसहरणाद्वा । रुशती श्वेत्यागात् । श्वेत्या श्वेततेः । अरिचत् कृष्णा सदनानि अस्याः । कृष्णवर्णा रात्रिः । कृष्णं कृष्यतेः । निकृष्टो वर्णः । अथ एने संस्तौति । समानबन्धू समानबन्धने । अमृते अमरणधर्माणौ । अनूची अनूच्यौ इतरेतरमभिप्रेत्य । द्यावा वर्णं चरतः । ते एव द्यावौ । द्योतनात् । अपि वा । द्यावा चरतः । तया सह चरत इति स्यात् । आमिनाने अन्योन्यस्याध्यात्मं कुर्वाणे ॥

रुशद्वत्सेति । "रुशद्वत्सा" रोचिष्णुवत्सा, सूर्य्यो हि रोचिष्णुः, तं "सूर्य्यम् अस्या वत्समाह" मन्त्रदृक् । "साहचर्य्यात्" । मातृसहचरो हि वत्सो भवति, अयमपि चानयोषसा सह चरतीत्येतस्मात् सामान्याद् वत्स उच्यते । "रसहरणाद्वा" । यथा हि मातुरूधसः क्षीराख्यस्य रसस्याहर्त्ता भवति वत्सः, एवमेषोऽप्यौषसिकानामवश्यायाख्यानां रसानामाहर्त्ता भवति रश्मिभिः, — इत्येतस्मात् सामान्याद् वत्सत्वम् । "रुशती" रोचनशीला आत्मनापि । "श्वेत्या" "श्वेततेः" धातोः (भृ.आ.) । श्वेतो वर्ण एत्यस्याम्, श्वेतवर्णत्यर्थः । या चैवंलक्षणा उषाः, सा "आगात्" आगच्छति । आगतायाश्च तस्याः 'आरैक्' 'अरिचित्' आरेचयति । "कृष्णा" "कृष्णवर्णा रात्रिः" । किमारेचयति ? "सदनानि" स्थानानि । "अस्याः" उषसः । येष्वियमुषा स्थानेषु आगता सती आसीदति, तान्यारेचयति रात्रिः । एवं तावदयमर्द्धर्च्चो रात्र्युषसोर्विभक्तस्तुतिः, "अथ" अनेनोत्तरार्द्धर्च्चेन "एने" रात्र्युषसौ "संस्तौति" । — "समानबन्धू" एते रात्र्युषसी, "समानबन्धने" समानमनयोर्बन्धनम् । आदित्यस्येयं ह्यस्तमयं प्रति रात्रिर्बद्धा संश्लिष्टा, उदयं प्रत्युषाः, एवं समानबन्धू । "अमृते, अमरणधर्माणौ" न हि रात्र्युषसी म्रियेते । "अनूची इतीतरेतरमभिप्रेत्य" इतरेतरं संश्लिष्टे ह्येते । "द्यावा वर्णं चरतः" । "ते एव" रात्र्युषसी । "द्यावौ द्योतनात्" उषा हि स्वेन प्रकाशेन द्योतते, रात्रिरपि स्वेन तमोवीर्य्येण नक्षत्रगणेन वा स्वमधिकारं प्रति द्योतते । एवं हि द्यावेति द्विवचनम् "अपि वा" तृतीयान्तमेकवचनमेतत् स्यात्, — द्यौः, तया "द्यावा" 'सहयुक्ते (पा. २,३,१९)' । "तया" सह स्पर्द्धमाने "चरतः" गच्छतः । कथम्पुनश्चरतः ? "आमिनाने" । आङ् अध्यर्थे 'तोदस्येव शरण आ महस्य' । तुदस्येव शरणेऽधि महतः" — इति (नैग. का. ५,२,५) । उषा अपि रात्रेरधि आत्मानं निर्मिमीते, रात्रिरप्युषसः, इतरेतरसंश्लिष्टे ह्येमे रात्र्युषसी । तस्मादेवमुच्यते, — "अन्योऽन्यस्याध्यात्मं कुर्वाणे" इति ॥

---

19. (અનુ) "પ્રકાશતો (સૂર્ય) જેનો પુત્ર છે તેવી પ્રકાશતી અને સફેદ વર્ણવાળી (ઉષા) આવી તથા કૃષ્ણા (રાત્રિ)એ એનાં (ઉષાનાં) સ્થાનો ખાલી કર્યાં. સમાન બંધન (અથવા સ્વજનો)વાળી, અમૃતાઓ અને પરસ્પર સંશ્લિષ્ટ (અનૂચી) એવી આ બે ઉષા અને રાત્રિ (द्यावा = द्यावौ) રંગને બદલતી (वर्णमामिनाने) ફરે છે (અથવા ઉષા અને રાત્રિ એ બે ઘૌ (द्यौः > द्यावा તૃતીયા એકવચન)ની સાથે સ્પર્ધા કરતી ફરે છે.)" અહીં રુશદ્વત્સા એટલે સૂર્યવત્સા. રુશત્ એ વર્ણનું નામ છે અને સળગવું અર્થવાળા √रुच् ધાતુ ઉપરથી તે નામ બન્યું છે. સૂર્યને આ (ઉષા)નો પુત્ર કહ્યો છે, કારણ કે તે ઉષાની સાથે જ ફરે છે અથવા રસનું હરણ કરે છે. (અર્થાત્ જેવી રીતે ગાયનું વાછરડું આંચળમાંથી દૂધ પીવે છે તેવી રીતે આ ઉષાનો પુત્ર સૂર્ય ઔષસિક ઝાકળોનું હરણ કરે છે.) પ્રકાશતી શ્વેતરંગની (ઉષા) આવી. 'શ્વેત્યા' શબ્દ √श्वित् (સફેદ થવું) ધાતુ ઉપરથી બન્યો હશે. કૃષ્ણા (કાળી રાત્રિ)એ (ઉષા)નાં સ્થાનો ખાલી કર્યાં. રાત્રિ કૃષ્ણવર્ણા હોય છે. કૃષ્ણ શબ્દ √कृश् ધાતુ ઉપરથી સાધવામાં આવે છે અને નિકૃષ્ટ વર્ણ માટે વપરાય છે. (મન્ત્રના પૂર્વાર્ધમાં ઉષાની અને રાત્રિની અલગ અલગ સ્તુતિ કરી) હવે મન્ત્રના ઉત્તરાર્દ્ધમાં બન્નેની એક સાથે સ્તુતિ કરવામાં આવે છે : એ બે સમાનબન્ધુ એટલે સમાન બન્ધનવાળી. એ બે અમૃતાઓ એટલે અમરણધર્મોવાળી. અનૂચી એટલે પરસ્પરને સંશ્લિષ્ટ એ બે ઉષા અને રાત્રિ (પોતપોતાના પ્રકાશ અને અંધકારરૂપ) વર્ણથી (वर्णा > वर्णन) ફરે છે. તે બે द्यावौ = ઉષા અને રાત્રિ. ઘોતવું > પ્રકાશવું ઉપરથી (द्यावौ કહેવાય છે.) અથવા द्यावा એ તૃતીયા એકવચન ગણીએ તો द्यौની સાથે (ઉષા અને રાત્રિ) ફરે છે એવો અર્થ થશે. आमिनाने એટલે પરસ્પરના શરીર (આત્મા) ઉપર પોતપોતાનું નિર્માણ કરે છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

20. अहर्नामान्युत्तराणि द्वादश (निघ. १/९)। अहः कस्मात्। उपाहरन्ति अस्मिन् कर्माणि। तस्यैव निपातो भवति वैश्वानरीयायामृचि ॥२०॥

अहंश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः।

वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥

(ऋ.सं. ६/९/१) अहश्च कृष्णं रात्रिः। शुक्लं चाहर् अर्जुनम्। विवर्तेते रजसी। वेद्याभिः वेदितव्याभिः प्रवृत्तिभिः। वैश्वानरो जायमान इव उद्यन्नादित्यः। सर्वेषां ज्योतिषां राजा। अवाहन् अग्निः ज्योतिषा तमांसि ॥

उषःशब्दतत्त्वावधारणार्थं प्रसक्तावेतौ मन्त्रौ उपवर्णितौ, प्रकृतमिदानीमुच्यते, — "अहर्नामान्युत्तराणि द्वादश"। अह्नो नामानि, 'अहर्नामानि', 'उत्तराणि' प्रकृतेभ्य उषोनामभ्यः, उषस एवानन्तरमहर्भवति, तस्मादुषोनामभ्य उत्तराणि अहर्नामानि। कियन्ति पुनस्तानि ? 'द्वादश'। द्वे च दश च द्वादश। कानि पुनस्तानि ? "वस्तोः, द्युः, भानुः" — इत्येवमादीनि। वस्ते ज्योतिरेतदिति वस्तोरित्युच्यते। यथैव हि श्रुतं मन्त्रे तथैवेह समाम्नातम्। द्युः द्योतते ह्येतत् ज्योतिषा। भानुः, भासते ह्येतत ज्योतिषेत्येवमादि योज्यम् ॥

आह, — "अहः कस्मात्" ? उच्यते, — "उपाहरन्त्यस्मिन् कर्माणि" न हि तथा रात्रावनुतिष्ठन्ति कर्माणि कर्मकराः, यथाहनि ॥ "तस्य" अह्नः "एष निपातो भवति"। नैघण्टुकवृत्त्या। "वैश्वानरीयायाम्" वैश्वानरदेवतायाम् "ऋचि" — ॥३॥

अहःशब्दो हि रात्रिमहश्चोभयमभिधत्ते, अतः सन्देहपदम्, तस्यैष विभागोऽस्यामृचि उपपदविशेषात् प्रदर्श्यन्ते, — अहश्च कृष्णमिति। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। पृष्ठस्य पष्ठेऽहन्याग्निमारुते शस्त्रे शस्यते। "अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनम्"। अर्जुनशब्दो हि शुक्लपर्य्यायः। "विवर्त्तेते" विपर्य्ययेण वर्त्तेते। रात्रिरतीता, अह आयातम्, अहरतीतं, रात्रिरायाता, इत्येवम्। "रजसी" रञ्जके। ज्योतिषा हि भूतान्यहो रञ्जयति, तमसा रात्रिः। "वेद्याभिः" "वेदितव्याभिः प्रवृत्तिभिः" न हि तासां प्रवृत्तीनामन्तोऽस्ति, अहनि च रात्रौ च प्राणिनामन्तस्ता वेदितव्या एव भवन्ति, बहुत्वात्, न हि विदितानामन्ताः कदाचित्। किञ्च, "वैश्वानरः" अग्निः 'अवातिरत्' "अवाहन्" अपहन्ति, स्वेन "ज्योतिषा तमांसि"। कथम्पुनरपहन्ति ? 'जायमानो न न राजा' "जायमान इव", "उद्यन्" "सर्वेषां" सर्वभूतानां "राजा" "आदित्यः"। यथा ह्युद्यन्नादित्यस्तमांसि अपहन्ति दिवा, एवम् "अग्निः" अपि रात्रावपहन्तीत्यग्निरादित्येन तम उपघातं प्रत्युपमीयते ॥

20. (અનુ) (નિઘંટુમાં રાત્રિનાં અને ઉષાનાં નામો) પછી દિવસનાં બાર નામો આવે છે. अहः શબ્દ કેવી રીતે બન્યો છે ? લોકો આમાં કર્મો પૂરાં કરે છે. (अहर् = आ + हर्:, आ = उप + आ; हर् = हरन्ति). વૈશ્વાનર દેવતાની ઋચામાં આ (अहः) શબ્દ આવ્યો છે : "કૃષ્ણ દિવસ અને શુકલ દિવસ વિપર્ય્યયથી રહે છે. જ્ઞાન વડે અથવા પ્રવૃત્તિઓ વડે (દિવસ અને રાત્રિ લોકોનું) રંજન કરે છે. (સવારે) જન્મતા રાજા (આદિત્ય)ની જેમ (न = इव) વૈશ્વાનર અગ્નિ (પોતાના) પ્રકાશથી (રાત્રે) અંધકારનો નાશ કરે છે." અહીં કાળો દિવસ એટલે રાત્રિ અને અર્જુન એટલે શુકલ દિવસ. દિવસ અને રાત્રિ વિપર્ય્યયથી રહે છે. (અર્થાત્ રાત્રિ જાય છે અને દિવસ આવે છે, તથા રાત્રિ આવે છે અને દિવસ જાય છે). वेद्याभिः એટલે જાણવા યોગ્ય પ્રવૃત્તિઓ વડે, જન્મતા વૈશ્વાનરે ઉદય પામતા આદિત્યની જેમ, બધાં (જ્યોતિઓ)ના રાજા (આદિત્ય). (વૈશ્વાનર) અગ્નિએ પોતાના પ્રકાશથી અંધકારનો નાશ કર્યો. (अवातिरत् = अवाहन्).

21. मेघनामान्युत्तराणि त्रिंशत् (निघ. १/१०) मेघः (निघ. १/१०/२४) कस्मात्। मेहतीति सतः। आ उपर उपल (निघ. १/१०/१८, १९) इत्येताभ्यां साधारणानि पर्वतनामभिः। उपर उपलो मेघो भवति। उपरमन्तेऽस्मिन्नभ्राणि। उपरता आप इति वा। तेषामेषा भवति ॥२१॥

देवानां माने प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन्।

त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् ॥ (ऋ.सं. १०/२७/२३)

देवानां निर्माणे प्रथमा अतिष्ठन् माध्यमिका देवगणाः। प्रथम उति मुख्यनाम्। प्रतमो भवति। विकर्तनेन मेघानामुदकं जायते। त्रयस्तपन्ति पृथिवीमनूपाः। पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्ति। अनूपाः अनुवपन्ति लोकान् स्वेन स्वेन कर्मणा। अयमपीतरोऽनूपः एतस्मादेव। अनूप्यते उदकेन। अपि

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

वा। अन्वाप् इति स्यात्। यथा प्राक् इति। तस्य अनूपः इति स्यात्। यथा प्राचीनमिति। द्वा बृबूकं वहतः पुरीषम्। वाय्वादित्यौ उदकम्। बृबूकम् इत्युदकनाम। ब्रवीतेर्वा शब्दकर्मणः। भ्रशतेर्वा। पुरीषं पृणातेः पूरयतेर्वा ॥२२॥

"मेघनामान्युत्तराणि त्रिंशत्"। मेघानां नामानि तानि उत्तराणि, प्रकृतेभ्योऽहर्नामभ्यः, मेघा ह्यहनि रात्रौ चाशेषेण भवन्त्यतो रात्र्यहर्नामभ्य उत्तराणि मेघनामानि। कतमानि पुनस्तानि? "अद्रिः, ग्रावा, गोत्रः" — इत्येवमादीनि। अद्रिः आदरयितव्यो भवति ह्यसावुदकार्थमित्यद्रिः। ग्रावा, गृणातेर्वा गृह्णातेर्वा, गृणात्यसौ शब्दं करोति, गृहीतश्चोदकमनेनेति। गोत्रः, गोर्वागत्र। इत्येवमाद्यभ्युहितव्यम्, पर्वतनामत्वेऽपि यथासम्भवं योज्यम् ॥

आह, — "मेघः कस्मात्"? उच्यते, — "मेहतीति" सिञ्चत्यसौ। एवं कर्त्तरि कारके "सतः" अस्यैतदभिधानं भवति। तेषां मेघनाम्नाम् "आ उपर उपल इत्येताभ्यां" प्राक् उपर उपल इत्येताभ्यां यानि नामानि, तानि "साधारणानि पर्वतनामभिः" तदेषां प्रकरणोपपदाभ्यां विशेषोऽवधार्य्यः। 'आ उपर इत्येतस्मात्' — इति वक्तव्ये "आ उपर उपल इत्येताभ्यां" युक्तम्, उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन् निरुक्ते निरुक्तौ भविष्यत इति, रलोश्चाविशेषख्यापनार्थम्। "उपर उपलो मेघ भवति" उपर इति च उपल इति च मेघ उक्तो भवति। उपरशब्दादारभ्य मेघनामान्येव, पर्वतनामानि ॥

आह, — उपरः कस्मात्? उच्यते, — "उप" गम्य "रमन्ते" "अस्मिन् अभ्राणि"। अथ "वा"। "उप" गम्य "रताः" "आपः" भवन्ति "इति"। उपलोऽप्येतस्मादेव रलोरविशेषेण ॥

आह, — कथं पुनर्गम्यते उपरशब्देन मेघ एवोच्यते, न पर्वतः? इति। उच्यते, — "तेषां" मेघानाम् उपरशब्दवाच्यत्वे विशेषलिङ्गवाचिका "एषा" ऋक् "भवति" ॥४॥

देवानां मान इति। वसुक्रस्येन्द्रपुत्रस्येयमार्षम्। त्रिष्टुप्। महाव्रते मरुत्वतीये शस्यते। 'देवानां' दानादिगुणयुक्तानां 'माने' विमाने निर्माणे। यदा देवाः सृष्टाः प्रजापतिना, तदैत एव माध्यमिका देवगणाः 'प्रथमाः अतिष्ठन्' एतेऽपि हि दानादियोगाद् देवा उच्यन्ते। प्रथमाः प्रकृष्टतमा मुख्या इत्यर्थः। मेघाभावे हि सर्वमेवेदं जगद् वर्षाभावान्न स्यात्। तस्मादेत एव प्रकृष्टतमाः अतिष्ठन् स्थितवन्तः। सृष्टौ हि सर्वदेवानामेत एवाग्रे सृष्टा इत्यभिप्रायः। किञ्च, 'कृन्तत्रात्' उत्कृन्तात् प्रदेशात् 'एषां' मेघानामिन्द्रेण 'उपराः' आपः 'उदायन्' आगतवत्यः, आगच्छन्ति च। किङ्कारणम्? विकर्त्तनेनैव हि मेघानामुदकं जायते। उपरशब्देनात्रोदकमुक्तम्, तात्स्थ्यात्तच्छब्दो मञ्चाः क्रोशन्त इतिवत्, उपरेषु मेघेषु या आपः, ता उपचारादुपरा इत्युच्यन्ते। किञ्च, यदा 'ताभिः' उपराभिरद्भिरोषधयः प्रोहिता भवन्त्यस्य तदा 'त्रयः तपन्ति' त्रयः पर्जन्यादयः तपन्ति। 'पृथिवीं' पृथ्वीलोकम्। 'अनूपाः' ते ह्यनुवपन्ति लोकान् स्वेन स्वेन कर्मणा यथाकालमनुगृह्णन्ति। एतदनुवपनं लोकानां यद् वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति। किञ्च, 'द्वा बृबूकं वहतः पुरीषम्' द्वौ वाय्वादित्यौ वहतः आक्षिपत इतः पृथिवीलोकात् बृबूकमुदकम्। किंलक्षणम्? पुरीषम्, प्रीणयितृ वा सतः ॥

"अयमपीतरोऽनूपः" नद्यनूपः समुद्रानूपो वा। "एतस्मादेव" वपतेर्धातोः असावपि हि "अनूप्यते" अनुप्रकीर्य्यते नित्यकालम् "उदकेन"। "अपि वा" एवमन्यथा स्यात्, — आप्नोतेः, अन्वाप्यऽसावुदकेनेति "अन्वाप"। पुरस्तादञ्चतीति "प्राक्", "तस्य" अन्वाबित्येतस्य सतः "अनूप इति" एष शब्दः "स्यात्" "यथा प्राचीनमिति", प्रागित्येवं सतः प्राचीनम्। "बृबूकमिति उदकनाम" इति। पर्य्यायवचनेन तत्त्वाभिधानम्। ब्रवीतेर्वा" शब्दार्थस्य (अदा. उ.) शब्दकारि हि तद् भवति। "भ्रंशतेर्वा" भ्रश्यति (दि.प.) हि तन्मेघादिति ॥५॥

निरुक्तव्याख्यायां सप्तमाध्यायस्य [द्वितीयाध्यायस्य] षष्ठः पादः ॥६॥

21. (અનુ.) (નિઘંટુમાં દિવસનાં બાર નામો) પછી ત્રીસ નામો મેઘ માટે વપરાય છે. 'મેઘ' શબ્દ કેવી રીતે બન્યો છે? √मिह सेचने > मेहति = सिञ्चति। જે સિંચન કરે છે તે મેઘ. (નિઘંટુમાં મેઘ માટે જે ત્રીસ નામો નોંધાયાં છે) તેમાં 'ઉપર' અને 'ઉપલ' શબ્દોની પૂર્વે આવેલાં (અદ્રિ, ગ્રાવા વગેરે સત્તર) નામો મેઘ ઉપરાંત પર્વતનાં પણ પર્યાયવાચક નામો બની રહે છે. [અને 'ઉપર' શબ્દથી આરંભીને 'કોશ' પર્યન્તનાં તેર નામો કેવળ મેઘવાચક જ છે, પર્વતવાચક નહીં.] 'ઉપર' અને 'ઉપલ' મેઘનાં નામો છે. જેમાં વાદળો રમણ કરે છે. અથવા આમાં (વાદળમાં) આવીને જળ ખુશ થઈ જાય છે. (उप + √रमु क्रीडायाम्) ('ઉપલ' શબ્દનું પણ આ જ રીતે નિર્વચન થાય છે. અર્થાત્ 'ર' અને 'લ'માં કોઈ વિશેષ નથી.) 'ઉપર' શબ્દ મેઘનો વાચક છે એ દર્શાવતી ઋચા નીચે મુજબ છે:

"દેવોના નિર્માણ પ્રસંગે સૌથી પહેલાં (પ્રજાપતિએ માધ્યમિક દેવગણોને અર્થાત્ મેઘાદિને) બનાવ્યા. આ મેઘોના ચીરી નાખવામાં આવેલા (પ્રદેશો)માંથી (અથવા મેઘોના છિદ્રમાંથી) જળ આવ્યાં. એ ત્રણેય અનૂપો (- મેઘ, સૂર્ય અને વાયુ)

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પૃથિવીને તપાવે છે. (આ ત્રણ દેવોમાંથી સૂર્ય અને વાયુ) એ બે પ્રસન્ન કરનાર (= पुरीषम्) જળ (बृबूकम्) વહાવે છે. (અર્થાત્ પૃથિવી ઉપર વરાળ રૂપે પાણી ખેંચે છે.)''

અહીં દેવોના નિર્માણ પ્રસંગે (પ્રજાપતિએ) માધ્યમિક દેવગણને પ્રથમ બનાવ્યા (કારણ કે મેઘના, વૃષ્ટિના અભાવમાં આ જગત્ ઉત્પન્ન જ ન થાય.) 'પ્રથમ' એ મુખ્યનું નામ છે. કારણ કે તે પ્રતમ-પ્રકૃષ્ટતમ-હોય છે. મેઘોને કાપવામાં (ચીરી નાખવામાં) આવતાં જળ થાય છે. ત્રણ અનૂપો પૃથિવીને તપાવે છે. ત્રણ અનૂપ એટલે પર્જન્ય, વાયુ અને આદિત્ય, આ ત્રણેય વર્ષોથી, શૈત્યથી અને ઉષ્ણતાથી વનસ્પતિઓને પકાવે છે. અનૂપ એટલે જે (કાલાનુસારી) પોતપોતાનાં કર્મોથી લોકોની ઉપર અનુગ્રહ કરે છે. अनूपम् (= जलप्रायस्थानम्) આ બીજો શબ્દ પણ ૧. આ (अनु + √वप्, संप्रसारण उप् + अ = अनूप > अनुप्यते प्रकीर्यते नित्यकालमुदकेन) ધાતુમાંથી જ બન્યો છે, કારણ કે (હંમેશાં) પાણીથી ભરાયેલું રહે છે; અનુગૃહીત રહે છે. અથવા તો, ૨. 'અન્વાપ્' શબ્દ 'પ્રાક્' જેવો છે. તેની (અન્વાપ્) ઉપરથી 'અનુપ' શબ્દ બન્યો હશે. જેવી રીતે (પ્રાક્) ઉપરથી 'પ્રાચીન' શબ્દ બન્યો છે. (अनु + √आप् > आप्नोति > अन्वाप्यतेऽसावुदकेनेति अन्वाप्) (અર્થાત્ જેવી રીતે 'પ્રાક્' ઉપરથી 'પ્રાચીન' શબ્દ બન્યો છે તેવી રીતે 'અન્વાપ્' ઉપરથી અનૂપ શબ્દ બન્યો હશે.) તે બે પ્રસન્ન કરનાર બૃબૂકને વહાવે છે. તે બે એટલે વાયુ અને આદિત્ય જળને (વહાવે છે.) બૃબૂક એ જળનું નામ છે, 'અવાજ કરવો' અર્થવાળા (√ब्रू) અથવા 'પડવું' અર્થવાળા) √भ्रंश् ધાતુ ઉપરથી તે 'બૃબૂક' શબ્દ બન્યો હશે. પુરીષ (એટલે ખૂશ કરનાર) આ શબ્દ 'પાલન કરવું-ભરવું' એવા અર્થવાળા √पृद કે √पूरय ધાતુમાંથી બન્યો હશે.

सप्तमः पादः

22. वाङ्नामान्युत्तराणि सप्तपञ्चाशत् (निघ. १/११) । वाक् कस्मात् । वचेः । तत्र सरस्वती (निघ. १/११/२२) इत्येतस्य नदीवत् देवतावच्च निगमा भवन्ति । तद्यद्देवतावदुपरिष्टात्तद् व्याख्यास्यामः (निरु. ११/२६) । अथैतन्नदीवत् ॥२३॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः ।

वाङ्नामान्युत्तराणि सप्तपञ्चाशत् । मेघनामप्रसक्तौ "देवानां माने" – इत्येष मन्त्रो व्याख्यातः । प्रकृतमिदानीमुच्यते, – वाङ्नामानीति । वाचो नामानि 'वाङ्नामानि', 'उत्तराणि' प्रकृतेभ्यो मेघनामभ्यः । मेघेष्वेव हि भूयसी वाग् भवति इति ततो वाङ्नामानि भवन्ति । कियन्ति पुनस्तानि "सप्तपञ्चाशत्" सप्त च पञ्चाशच्च सप्तपञ्चाशत् (५७) । कतमानि पुनस्तानि ? "श्लोकः, धारा, इला" – इत्येवमादीनि । श्रूयते इति श्लोकः । ध्रियते तं तमर्थमवधारयितुमिति धारा । तं तमर्थं प्रति ईट्टे गच्छतीति इडा । इत्येवमाद्यभ्यूहितव्यम् ॥

आह, – "वाक् कस्मात्" ? उच्यते, – "वचेः" धातोः (अदा.प.) । उच्यतेऽनयेति वाक् । "तत्र, सरस्वतीत्येतस्य" तत्र तस्मिन्, सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम "नदीवद् देवतावच्च निगमा भवन्ति" नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः । "तत" तत्रैवं सति, "यत्" अभिधानं "देवतावत्", "तत्" अधिकृत्य "उपरिष्टाद् व्याख्यास्यामः' षोडशेऽध्याये "पावका नः सरस्वती (ऋ.सं. १.१,६,३)" – इत्येतस्मिन् मन्त्रे । "अथ" पुनः यत् "एतत्" "नदीवत्", तद् व्याख्यायते -॥१॥

इयं शुष्मेभिरिति । भरद्वाजस्यार्षम्, जगती । 'इयं' सरस्वती नदी 'शुष्मेभिः' बलैः । किङ्करोति ? "बिसखा इवारुजत्" यथा बिसखानको बिसमनादरेणैव मृदुत्वात् खनति, एवमियमनादरेणैव यदपि 'सानु' भवति समुच्छ्रितं वज्रसङ्घातकल्प 'गिरीणां' 'सानु' शिखरं तदपि 'तविषेभिः' बिसखानक इवानादरेणैव 'रुजति' भनक्तीत्यर्थः । येयमेवंगुणविशिष्टा तामेतां वयं 'पारावतघ्नीं' पारावारघातिनीं, सा हि 'ऊर्मिभिः' पारं चावारं च उभे अपि हन्ति । 'अवसे, अवनाय रक्षणाय । आत्मनः कथन्नाम रक्षेदसावस्मानित्येवमर्थं पुरस्कृत्य 'सुवृक्तिभिः' सुप्रवृत्ताभिः स्तुतिभिः स्वरसौष्ठवादियुक्ताभिः । किम् ? 'सरस्वतीम् आविवासेम धीतिभिः' सरस्वतीमाभिमुख्येनावस्थिताः परिचरेम, 'धीतिभिः' 'कर्मभिः' स्तुतिभिश्चानेकप्रकाराभिश्चेत्यर्थः । एष समस्तार्थः ॥

अथैकपदनिरुक्तम् । – "शुष्ममिति बलनाम" तद्धि "शोषयतीति सतः" सत इति कारकावधारणम् । विपर्ययेणापि ह्यभिधानानामर्थो भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि सदेतदभिधानमेवमाह शुष्ममिति बलनामेति । "बिसं. बिस्यतेर्भेदनकर्मणः तद्धि भिद्यते "वृद्धिकर्मणो वा" । वर्द्धते हि तत् । "सानु" समस्तं हि तत् "उच्छ्रितं भवति, समुन्नुन्नमिति वा" अथवा अध्र्वं नुन्नं प्रेरितं भवति । "पारं परं भवति" अवरस्मात् कूलात्, "आवारम् अवरम्" भवति परस्मात् कूलात् ॥

अस्यामृचि तविषेभिः, उर्मिभिः, पारावतघ्नीम् – इत्येतद् विशेष्यलिङ्गं नदीसत्त्वं पश्यता भाष्यकारेण "अथैतन्नदीवत्" –

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

इत्युक्ता इयमृगुपात्ता । सरस्वतीशब्दस्य नद्यभिधायकत्वे इयं पुनर्मैत्रायणीयके "उतस्यान: सरस्वती" – इत्यस्य षडर्चस्योत्तमा । एतच्च पुनः षडर्चानुक्रमेण न "सारस्वतीं धेनुष्टरीमालभेत यः क्षेत्रे पशुषु वा विवदेत" – इत्येतस्य पशोः सम्पद्यते । सेयमनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति । एवञ्च सति इयमपि देवतावदित्येव समुपपद्यते, न त्वदेवता इज्यते । तदेवं कृत्वा भाष्यकारेण यदुक्तं "तद्यद्देवतावदुपरिष्टात् तद्व्याख्यास्यामोऽथैतन्नदीवत्" – इति तद्विरुध्यते ? तत्रोक्तः समाधिः. – विभवो ह्यनुपक्षीणशक्तयो मन्त्रशब्दाः । प्रदर्शनमात्रमेतत् क्रियते । सर्वथैतन्मन्त्रशब्दानां योऽर्थ उपपद्यते स योज्यो यथासम्भवमिति । देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक्, सा गिरीणां मेघानां सानूनि भञ्जयत्यूर्मिभिः पारावारे द्यावापृथिव्यौ हन्तीति योज्यम् । तविषेभिरूर्मिभिः महद्भिरित्येवमादि च योज्यम् । "सुप्रवृत्ताभि स्तुतिभिः सरस्वतीं कर्मभिः परिचरेम" गतार्थम् ॥

---

22. (અનુ.) (મેઘનાં ત્રીસ નામો) પછી વાક્ (પાણી)નાં સત્તાવન નામો છે. તેમાંથી 'વાક્' શબ્દ કેવી રીતે બન્યો હશે ? √वच् परिभाषणे ધાતુ ઉપરથી (उच्यतेऽनया इति) 'વાક્' શબ્દ બન્યો છે. વાક્‌નાં સત્તાવન નામોમાંથી 'સરસ્વતી' એવું પણ એક નામ છે. તેની નદી રૂપે અને દેવતારૂપે વેદમાં સ્તુતિ થઈ છે. પરંતુ સરસ્વતીની દેવતા રૂપે જે મન્ત્રમાં સ્તુતિ થઈ છે, તેની આગળ ઉપર વ્યાખ્યા કરવામાં આવશે. અહીં નદી રૂપે તેની સ્તુતિ રજૂ કરવામાં આવે છે.

"બિસતંતુઓને તોડનારની જેમ (અર્થાત્ જેવી રીતે બિસતંતુઓ મૃદુ હોવાને કારણે તેને તોડવા માટે કોઈ યત્ન જ કરવો પડતો નથી તેવી રીતે) આ – સરસ્વતી નદી–બળથી અને (પોતાનાં) મોટાં વહેણોથી– જલપ્રવાહોથી–પર્વતોનાં શિખરોને તોડી પાડે છે. (અમારા) રક્ષણને માટે સારી રીતે (સ્વરસૌષ્ઠવાદિથી યુક્ત) પ્રવૃત્ત કરવામાં આવેલી સ્તુતિઓ વડે પારાવતઘ્ની (બન્ને કિનારાઓને તોડી નાખનારી) સરસ્વતી નદીની અમે પરિચર્યા (પૂજા) કરીએ. (आ विवासेम = परिचरेम).

આ નદી (પોતાના) શુષ્મ = શોષણ = બલ વડે. શુષ્મ એ બળનું નામ છે. કેમ કે તે (શત્રુઓને) શોષી લે છે ! બિસ શબ્દ તોડવું કે તૂટવું અથવા વધવું એવા અર્થવાળા √बिस् ધાતુમાંથી બન્યો હશે. સાનુ એટલે શિખર, કેમ કે તે ઊંચું આવેલું હોય છે. (सम् + उत् + श्रित) અથવા તો તે ઊંચું કરવામાં આવેલું હોય છે. (सम् + उत् + √नुद् + क्त > उत् + नुन्नम्). तविषेभिः = महद्भिः મોટાં વહેણો વડે. પારાવતઘ્ની એટલે પારાવારનો – બન્ને કિનારાઓનો – ઘાત કરનારી, પાર એ જ પર (સામો કિનારો) છે અને અવાર એ જ અવર (આ તરફનો કિનારો). अवसे = अवनाय એટલે રક્ષણને માટે सुवृक्तिभिः = સારી રીતે પ્રવૃત્ત થયેલી સ્તુતિઓ વડે, કર્મો વડે સરસ્વતી નદીની અમે પરિચર્યા કરીએ. सुवृक्तिभिः = सुप्रवृत्ताभिः शोभनाभिः स्तुतिभिः, धीतिभिः = कर्मभिः અથવા सुवृक्तिभिः = सुप्रवृत्ताभिः, धीतिभिः = स्तुतिभिः ॥)

---

23. उदकनामान्युत्तराण्येकशतम् (निघ. १/१२) । उदकं कस्मात् । उनत्तीति सतः । नदीनामान्युत्तराणि सप्तत्रिंशत् (निघ. १/१३) । नद्यः कस्मात् । नदना: भवन्ति । शब्दवत्यः । बहुलमासां नैघण्टुकं वृत्तम् । आश्चर्यमिव प्राधान्येन । तत्रेतिहासमाचक्षते । विश्वामित्रः ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव । विश्वामित्रः सर्वमित्रः । सर्वं संसृतम् । सुदाः कल्याणदानः । पैजवनः । पिजवनस्य पुत्रः । पिजवनः पुनः स्पर्धनीयजवो वा । आमिश्रीभावगतिर्वा । स वित्तं गृहीत्वा विपाट्छुतुद्र्योः संभेदमाययौ । अनुययुरितरे । स विश्वामित्रो नदीस्तुष्टाव । गाधा भवतेति । अपि द्विवत् । अपि बहुवत् । तद्यद् द्विवद् उपरिष्टात् (निरु. ९/३९) । तद् व्याख्यास्यामः । अथैतद्बहुवत् ॥२४॥

"उदकनामान्युत्तराणि एकशतम्" । उदकस्य नामानि 'उदकनामानि', 'उत्तराणि' प्रकृतेभ्यो वाङ्नामभ्यः । मेघाश्रया हि वाक्. मेघोत्थं चोदकम्, – स्तनयित्नुशब्दपूर्वकञ्चेति वाङ्नामभ्य उत्तराण्युदकनामानि । कियन्ति पुनस्तानि ? 'एकशतम्' एकञ्च शतञ्च एकशतम् (१०१) । कतमानि पुनस्तानि ? "अर्णः, क्षोदः, क्षद्म" – इत्येवमादीनि । अरणशीलमर्णः । क्षिप्रमुनत्तीति क्षोदः । क्षीरिणमन्नं करोतीति क्षद्म । इत्येवमाद्यभ्यूहितव्यम् ॥

आह, – "उदकं कस्मात्" ? उच्यते, – "उनत्तीति सतः" तद्धि यत्र गच्छति तत्र उनत्ति क्लेदयति । 'उन्दी क्लेदने (रुधा. प.)' । सत इति कारकावधारणं पूर्ववत् ॥

"नदीनामान्युत्तराणि सप्तत्रिंशत्" । नदीनां नामानि 'नदीनामानि', 'उत्तराणि' इति प्रकृतेभ्य उदकनामभ्य उत्तराणि. नदीनामानि । कियन्ति पुनस्तानि ? 'सप्तत्रिंशत्' (३७) । कानि पुनस्तानि ? "अवनयः, यह्व्यः, खाः, सीराः" – इत्येवमादीनि । अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः । ह्वयन्त्यो यान्तीति यह्व्यः । ख्यातव्या भवन्तीति खाः । सरन्तीति सीराः । एवमादि योज्यम् ॥

Vasant Bhatt Collection, Gujarat

 CC-0. In Public Domain.Digitized by eGangotri.

आह, – "नद्यः कस्मात्" ? उच्यते, – "नदनाः" ह्येताः "भवन्ति" "शब्दवत्यः" शब्दसंयुक्ताः । किञ्च, "बहुलम्" "आसां" नदीनाम्, अन्यदेवतेषु मन्त्रेषु "नैघण्टुकं वृत्तम्" अप्रधानम् । "आश्चर्य्यमिव प्राधान्येन" क्वचिदेव नदीदेवतो मन्त्रः स्यात् । "तत्रेतिहासमाचक्षते" । यस्मिन् सूक्ते प्रधाना नद्य एव, तत्रेमं निदानभूतमितिहासमाचक्षते इति आचार्य्याः ॥

"विश्वामित्रः" नाम "ऋषिः" । "सुदासः पैजवनस्य" राज्ञः "पुरोहितो बभूव" । "विश्वामित्रः सर्वमित्रः" सर्वस्यैव हि स मित्रं, सर्वमेव वा तस्य मित्रमिति विश्वामित्रः । "सर्वम्" – इति किमुक्तं भवति ? उच्यते, – तद्धि "संसृतं" भवति, – सङ्गतं भवत्येकस्मिन् । "सुदाः कल्याणदानः" तस्य हि नित्यमेव प्रशस्तं दानं भवति । "पैजवनः पिजवनस्य पुत्रः" । "पिजवनः पुनः स्पर्द्धनीयजवः" तस्य हि स्पर्द्धार्हो जवो वेगः । अथ "वा" "अमिश्रीभावगतिर्वा" न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिः, अतिशैघ्र्यात् । तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव । "सः" पौरोहित्योपार्जितं "वित्तं" धनं "गृहीत्वा" "विपाट्छुतुद्रयोः" नद्योः "सम्भेदं" सङ्गमम् "आययौ" आगतवान्, यत्र विपाट्छुतुद्र्यौ इतराभिः सिन्ध्वादिभिर्नदीभिः सम्भिन्ने एकीभूते इत्यर्थः । 'अनुययुः' 'इतरे' तदनुयायिनस्तस्करा वा । "स विश्वामित्रः" तास्तितीर्षुः "नदीः तुष्टाव" – "गाधाः" स्वल्पोदकाः यूयं "भवतेति" । एतमर्थं पुरस्कृत्य कथं पुनस्तुष्टाव ? "अपि द्विवत्" द्विवचनसंयुक्तैर्मन्त्रैः, "अपि बहुवत्" बहुवचनसंयुक्तैर्मन्त्रैः । "तत्" तत्र, एवं सति "यद् द्विवत्" द्विवचनवत्, "तत्" "उपरिष्टात्" चतुर्दशाध्याये "प्रपवर्तनाम् (ऋ.सं. ३.२.१२.१)". – इत्येतस्यामृचि "व्याख्यास्यामः" । "अथ" पुनः "एतद् बहुवत्" व्याख्यायते– ॥२॥

---

23. (અનુ.) આ પછી 'ઉદક' (જળ)નાં સો નામો નોંધાયાં છે. 'ઉદક' શબ્દ કેવી રીતે બન્યો હશે ? જે ભીંજવે છે તે 'ઉદક' (√उन्द क्लेदने = उनत्ति > उन्द + अकम् > उद् + अकम् = उदकम्.)

આ પછી સાડત્રીસ નામો 'નદી' માટે નોંધાયાં છે. 'નદી' શબ્દ કેવી રીતે બન્યો હશે ? ('નદીઓ' શા માટે કહેવાતી હશે ?) નાદ કરતી હોય છે અર્થાત્ અવાજ કરનારી હોય છે માટે નદીઓ કહેવાય છે. નદીઓનાં નામ મોટાભાગે અન્ય દેવતાઓના મન્ત્રોમાં નૈઘંટુક વૃત્તિથી = ગૌણ રૂપે વપરાયાં છે. આશ્ચર્યની જેમ અર્થાત્ કવચિત્ જ પ્રધાનપણે નદી જેમાં દેવતા હોય તેવા મન્ત્રો મળે છે. આ સન્દર્ભમાં ઇતિહાસ કહેવામાં આવે છે : 'ઋષિ વિશ્વામિત્ર સુદાસ પૈજવનના પુરોહિત થયા.'' વિશ્વામિત્ર એટલે સર્વમિત્ર = બધાના મિત્ર. સર્વ એટલે સંસૃત = બધે ફેલાયેલ. સુદાસ્ = જેનું દાન કલ્યાણકારી હોય છે. પૈજવન એ પિજવનનો પુત્ર છે. પિજવન એટલે જેનો વેગ સ્પર્ધા કરવા જેવો છે. અથવા (અન્ય ગતિવાળાઓની) ગતિ જેમાં મિશ્ર નથી થઈ તે (ઇતિહાસ) : ''આવો વિશ્વામિત્ર (યજ્ઞની દક્ષિણાનું) ધન લઈને વિપાશ્ અને શુતુદ્રી નદીઓના સંગમ ઉપર આવી પહોંચ્યો. તે (વિશ્વામિત્ર)ને બીજા અનુસર્યા. તે વિશ્વામિત્રે નદીઓની સ્તુતિ કરી. જેમ કે 'તમે બે નીચી જાવ' (અહીં, વિશ્વામિત્ર અને નદીઓના સંવાદમાં નદીઓને માટે) ક્યારેક દ્વિવચનનો પ્રયોગ થયો હોય છે તો ક્યારેક બહુવચનનો. આમાંથી જે મન્ત્રમાં દ્વિવચનનો પ્રયોગ થયો છે તેની આગળ ઉપર વ્યાખ્યા કરવામાં આવશે. નીચે તો બહુવચનમાં જે મન્ત્રો છે તેની વ્યાખ્યા કરવામાં આવે છે :-

---

24. रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।

प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥ (ऋ.सं. ३/३३/५) उपरमध्वं मे वचसे । सोम्याय सोमसंपादिने । ऋतावरीः ऋतवत्यः । ऋतम् इत्युदकनाम । प्रत्यृतं भवति । मुहूर्तम् । एवैः अयनैः । अवनैर्वा मुहूर्तः मुहुः ऋतुः । ऋतुः अर्तेर्गतिकर्मणः । मुहुः मूढ इव कालो यावदभीक्ष्णं चेति अभीक्ष्णम् अभिक्षणं भवति । क्षणः क्षणोतेः । प्रक्ष्णुतः कालः । कालः कालयतेर्गतिकर्मणः । प्राभिह्वयामि सिन्धुम् । बृहत्या महत्या । मनीषया मनसः ईषया । स्तुत्या । प्रज्ञया वा । अवनाय । कुशिकस्य सूनुः । कुशिको राजा बभूव । क्रोशतेः शब्दकर्मणः । क्रंशतेर्वा स्यात्प्रकाशयतिकर्मणः । साधु विक्रोशयितार्थानामिति वा । नद्यः प्रत्यूचुः ॥२५॥

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।

देवोऽनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥

(ऋ.सं.३/३३/५) इन्द्रो अस्मानरदद्वज्रबाहुः । रदतिः खनतिकर्मा । अपाहन् वृत्रं परिधिं नदीनामिति व्याख्यातम् । देवोऽनयत् सविता । सुपाणिः कल्याणपाणिः । पाणिः पणायतेः पूजाकर्मणः । प्रगृह्य पाणी देवान् पूजयन्ति । तस्य वयं प्रसवे याम उर्वीः । उर्व्यः ऊर्णोतेः । वृणोतेरित्यौर्णवाभः । प्रत्याख्यायान्ततः आशुश्रुवुः ॥२६॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

रमध्वं मे वचस इति । त्रिष्टुभ एताः । "उपरमध्वं मे" उपेत्ययमुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्वमित्यनेन क्रियापदेन योजितः । उपरमध्वं मम "वचसे" "सोम्याय सोमसम्पादिने" सोमा हि अनेनास्माद्वचसा देवतानामन्नभृता बहवः सम्पादिताः. ता यूयमस्मै प्रतिविशिष्टाय वचसे सत्यतार्थम् – कथन्नाम सत्यमिदं स्यादित्येवमर्थमुपरमध्वम् मन्दवेगा गाधाश्च भवतेत्यभिप्रायः । हे 'ऋतावरीः' उदकवत्यः । कियन्तं पुनः कालमुपरमध्वम् ? "मुहूर्त्तम्" न च नित्यमेव मन्दवेगतां गाधोदकतां वा प्रार्थये. किन्तर्हि ? यावदुत्तरेयमहं तावदेवेत्यभिप्रायः । "एवैः" एभिरुदकैरतिप्रवृद्धैरुपरमध्वम् । "अवनैर्वा" कामैर-तैरस्मत्प्रार्थनाविशेषैः – उत्तरेम, गृहान् गच्छेम, वित्तं प्रापयेम, इत्येवमादिभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम् । अथ वा "अयनैः" चित्रैर्गमनैर्वेगवद्भिर्यूयमभिप्रवृत्तास्तैरुपरमध्वम् मुहूर्त्तम् । यदैवमविशेषेणोच्यमाना न शुश्रुवुः, तदैकामुद्दिश्य प्रववृत्ते वक्तुम्, – 'सिन्धुमच्छ अच्छ' । अभेः स्थाने । 'अह्वे' – इत्येतत् पद्ममाकृष्य "प्र अभि ह्वयामि" इत्येवं योजितं भाष्यकारेण । किं प्राभिह्वयामि ? "सिन्धुम्" । कया ? "बृहती मनीषा" बृहत्या मनीषया "मनस ईषया" मनःपूर्विकया "स्तुत्या" इत्यर्थः । अथ "वा" "प्रज्ञया" । कमर्थमिच्छन् अभिह्वयामि ? 'अवस्यु' अवनमिच्छन्, गमनमित्यर्थः । "कुशिकस्य सूनुः" अहमिति । पितुरपि गौरवान्मम गौरवमेताः कुर्य्युः इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । – "ऋतमित्युदकनाम" । तद्धि देशं देशं "प्रत्यृतं भवति" गतमित्यर्थः । "मुहूर्त्तो मुहुर्ऋतुः" एवं विगृह्य ऋतुशब्दं तावन्निर्ब्रवीति, – ऋतुरर्त्तेः, "गतिकर्मणः" गत्यर्थे वर्त्तमानस्य । स हि गच्छत्येव । अधुना मुहुःशब्दं निर्ब्रवीति. – "मुहुर्मूल्ह इव कालः" अल्पत्वात । मूढ इव यः काल ऋतुः, स मुहूर्त्त इत्युच्यते । किञ्च "यावत्" एव "च अभीक्ष्णं" तावन्मुहूर्तः, यावांश्च मुहूर्तस्तावदभीक्ष्णमित्यर्थः । सारूप्यप्रसक्तं निरुच्यते, – "अभीक्ष्णमभिक्षणं भवति" तद्धि क्षणमाभिमुख्येन स्थितं भवति । "क्षणं क्षणोतेः" हिंसार्थस्य (तना. उ.) । स हि "प्रक्ष्णुतः" प्रकर्षेण हिंसितः "कालः" अल्पत्वात् । "कालः कालयतेर्गतिकर्मणः" । स हि सर्वाण्येव भूतानि कालयति क्षयं नयतीत्यर्थः । "कुशिको राजा" – इति तत्त्ववचनम् । "क्रोशतेः" वा शब्दार्थस्य (भू.प.)' स हि साध्वेव क्रियतामिति नित्यकालमेव क्रोशति । "क्रंशतेर्वा स्यात्" प्रकाशयत्यर्थस्य, स हि प्रकाशयिता साधूनां धर्माणामात्मनैव प्रकाशकः । अथ "वा" "साधुविक्रोशयितार्थानामिति" साधुषु ब्राह्मणेषु विक्रोशयिता अर्थानां दातेत्यर्थः ॥

एवमुक्तवन्तं "नद्यः प्रत्यूचुः" – ॥३॥

इन्द्रो अस्माँ अरददिति । "अरदत्" अखनदित्यर्थः । "रदतिः खनतिकर्मा" । कथम्पुनरखनत् ? "अपाहन् वृत्रम्" अपावधीत् मेघम् । "परिधिं नदीनाम्" नदनानामपाम् । स हि नियतं तीरयोर्निरुणद्धि, तमिन्द्रो वज्रेण हन्ति, तस्मिन् हते पृथिवीं प्राप्यापो यथा निम्नानुसारिण्यः खातानि कुर्वन्त्यो वहन्ति, तैः खातैर्वयं गच्छामः । एवं कृत्वा 'अस्मान् इन्द्रः अरदत्' । एवञ्च कृत्वा स एव इन्द्रः 'देवः' 'सविता' सर्वार्थप्रसविता वर्षद्वारेणास्मान् 'अनयत्' समुद्रम् । 'सुपाणिः' प्रशस्तपाणिरित्यर्थः । यत एव सोऽस्माकं खनिता नेता च, अतः 'तस्य' इन्द्रस्य 'प्रसवे' अनुज्ञायामादेशे वर्त्तमाना वयं 'यामः' गच्छामः 'उर्वी' ऊर्णुवत्यः सम्भजमाना वा । तानि तानि देशान्तराणि अम्भोभिः । सोऽस्माकमीश्वरः । स एवास्मानाज्ञापयितुमर्हति, न त्वमित्यभिप्रायः ॥

"पाणिः पणायतेः" पूजार्थस्य । "प्रगृह्यपाणी" संयतौ कृत्वा ततः "देवान् पूजयन्ति" इति ॥

"प्रत्याख्याय" एवं तमृषिं तत्सूक्तस्य "अन्ततः" अन्ते अनयर्चा "आशुश्रुवुः" ता नद्यः श्रुतवत्य इत्यर्थः – ॥४॥

---

24. (અનુ.) "હે જળવાળી (અથવા ઋતુનું પાલન કરનારી) નદીઓ ! મારી સોમનું સંપાદન કરનારી વાણીને ખાતર (તમારા) ગમનથી ઘડીભર તમે અટકી જાવ. (જળપ્રવાહને ઘડીભર અટકાવી દો). મોટી સ્તુતિથી (અવનમન રૂપ) મદદની ઇચ્છાવાળો (अवस्युः), હું કુશિકનો પુત્ર (શુતુદ્રી) નદીને મોટી સ્તુતિથી બોલાવું છું.'

મારા વચન-વાણી-ને ખાતર અટકી જાવ. सोम्याय = સોમનું સંપાદન કરનારી, ऋतावरी = ऋतवती. ऋत એ જળનું નામ છે. કેમ કે (જળપ્રદેશો)ની તરફ જાય છે. मुहूर्तमेवैः > एवैः अयनैः > √इ गतौ > અયન (ગમન)થી અથવા अवनैः = कामैः અમારી પ્રાર્થનાઓથી (= પ્રાર્થનાઓ સાંભળીને અટકી જાવ.) મુહૂર્ત એટલે જે જલ્દી પસાર થાય છે. ગત્યર્થક √ऋ ધાતુમાંથી ऋतु શબ્દ બન્યો છે. મુહુર્ શબ્દ √मुह (ગભરાયેલા હોવું) ઉપરથી બન્યો છે. કારણ કે (થોડા હોવાને કારણે તે) કાળ ગભરાયેલો (मूढ) હોય તેવો લાગે છે. આમ મુહૂર્ત એટલે અભીક્ષ્ણ (અથવા મુહુર્ એટલે અભીક્ષ્ણ). અભીક્ષ્ણ એટલે અભિક્ષણ (એક નિમેષમાં પસાર થતો સમય). क्षण શબ્દ √क्षणु हिंसायाम् ઉપરથી બન્યો હશે. કેમ કે તે કાળ (અલ્પ હોવાને કારણે જાણે) તીક્ષ્ણ-ધારદાર-હોય છે. काल શબ્દ ગત્યર્થક √कालय् ઉપરથી બન્યો હશે. (√ कालय् ધાતુ काल શબ્દ ઉપરથી બનાવવામાં આવ્યો છે: कलयति आयुः इति कालः । √कल् संख्याने (ગણવું) ઉપરથી 'काल'. મન્ત્રમાં अह्वे = प्राभिह्वयामि, સિન્ધુ શુતુદ્રી નદી તરફ અભિમુખ થઈને બોલાવું છું. અવનમન માટે મોટી મનીષાથી અર્થાત્ સ્તુતિ કે પ્રજ્ઞાથી. 'કુશિકનો પુત્ર' – અહીં કુશિક નામનો રાજા થઈ ગયો તેનો ઉલ્લેખ છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

'કુશિક' શબ્દ 'અવાજ કરવો' અર્થવાળા √क्रुश् ધાતુ ઉપરથી બન્યો હશે અથવા 'પ્રકાશિત કરે છે' અર્થવાળા √क्रंश् ધાતુ ઉપરથી બન્યો હશે. (સજ્જનોના ધર્મોનો) પ્રકાશક અથવા સાધુ પુરુષોમાં વિક્રોશયિતા અર્થાત્ દાતા (તે કુશિક.)

કુશિકની ઉપર્યુક્ત વિનંતી સાંભળીને નદીઓએ નીચેના મન્ત્રમાં જવાબ આપ્યો: "જેના હાથમાં વજ્ર છે તેવા ઇન્દ્રે અમને ખોદી કાઢી છે (અર્થાત્ અમારા જલપ્રવાહને વહેવા માટે માર્ગ કરી આપ્યો છે.) નદીઓને ઘેરી લેનાર (રોકી રાખનાર) વૃત્રને (ઇન્દ્રે) મારી નાખ્યો. શુભ હાથવાળો, સવિતાદેવ અમને દોરી ગયો. અમે તેની (પ્રસવે =) અનુજ્ઞામાં (આદેશમાં) રહીને (उर्वीः =) વિસ્તરતી જઈએ છીએ. (માટે ઇન્દ્ર જ અમને આજ્ઞા આપે તે ઉચિત છે, તું નહીં)."

વજ્રબાહુ ઇન્દ્રે અમને ખોદી. 'ખોદવું' અર્થમાં √रद् ધાતુ છે. 'નદીઓને ઘેરી લેનાર વૃત્રને મારી નાખ્યો.' આનું વ્યાખ્યાન થઈ ગયું છે. સવિતાદેવ (અમને) દોરી ગયો. સુપાણિ એટલે કલ્યાણકારી હાથવાળો. પાણિ (= હાથ) શબ્દ પૂજાર્થક √पण व्यवहारे स्तुतौ च ધાતુમાંથી સાધવામાં આવે છે. બે હાથ ભેગા કરીને દેવોની પૂજા કરે છે. અમે તેની આજ્ઞા મુજબ વિસ્તરતી જઈએ છીએ, વહીએ છીએ. ઉર્વી શબ્દ √ऊर्णु आच्छादने ધાતુ ઉપરથી બન્યો હશે. ઔર્ણવાભના મતે √वृ (वृणोति) ઉપરથી તે બન્યો છે. આમ (કુશિકપુત્ર ઋષિ વિશ્વામિત્રની) વિનંતીનો અસ્વીકાર કરીને (ફરીથી વિનંતી કરાતા) છેલ્લે વચન આપ્યું:-

---

25. आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन ।

नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते ॥ (ऋ.सं. ३/३३/१०) आशृणवाम ते कारो वचनानि । याहि दूरादनसा च रथेन च । निनमाम ते पाययमानेव योषा पुत्रम् । मर्यायेव कन्या परिष्वजनाय । निनमै इति वा ॥

आ ते कारो इति । तदा श्रुतं भवति, यदा तद्वचः क्रियते, श्रूयमाणमपि हि तत्रैव श्रुतं भवति, यत्र क्रियते । 'आ ते कारो शृणवाम' आभिमुख्येनावस्थिताः 'सत्यः शृणवाम हे 'कारो' स्तोमानां कर्त्तः ! किमाशृणवाम ? 'वचांसि' । अतो ब्रूमः, – "ययाथ" याहि त्वम् । 'अनसा' शकटेन सह 'रथेन' च । कस्मात् पुनरेवमादरवत्यो ब्रूमः याहीति ? इतः, – यस्मात् 'दूरात्' आयातस्त्वं परिश्रान्तः, तस्मात्कारुण्यं नस्त्वयि । तेन वयमेता 'नि ते नंसै' "निनमाम ते" । नीचैर्नमाम गाधोदका भवामेत्यर्थः । कथम्पुनर्निनमाम ? 'पीप्यानेव योषा' "पाययमानेव योषा पुत्रं" यथा निनमेदेवं वयं तव निनमाम । एवमुक्त्वा पुत्रोपमया कदाचिदयं क्रोधमियादिति मन्वानाः सत्यः पतिकन्यासम्बद्धामन्यामुपमामुपाददिरे, – "मर्य्यायेव कन्या शश्वचै ते" 'मर्य्याय' मनुष्याय 'कन्या' नवोढा 'शश्वचै ते' "परिष्वजनाय" कथं नाम परिष्वजेत मामयमित्यभिप्रायेण यथा सा निनमेदेवं वयं तव निनमाम । "निनमा इति या" "यदि वा" निनमा इत्येवं परिणामः निनंसै इति एतस्य पदस्य अथवा निनमै इति ।

---

25. (અનુ.) (બે નદીઓ બોલે છે:) "હે કવિ (વિશ્વામિત્ર) ! અમે તારાં વચનો સાંભળીએ (અર્થાત્) તારી વિનંતીનો સ્વીકાર કરીએ) કેમ કે તું ગાડા અને રથની સાથે દૂરથી આવ્યો છે. (એક નદીએ કહ્યું :) 'પુત્રને સ્તનપાન કરાવતી સ્ત્રીની જેમ હું નીચે નમું (છું).' (બીજી નદીએ કહ્યું:) 'મનુષ્યની (પતિની) પ્રત્યે જેમ કન્યા (આલિંગન માટે) નમે તેમ હું તારે માટે નમું (છું.)

હે કવિ ! અમે તારાં વચનો પૂરાં કરીશું. (आ + √श्रु = વચન આપવું). તું (અમને ઓળંગીને) જા. (કારણ કે) તું ગાડાં અને રથની સાથે દૂરથી (આવ્યો છે.) પુત્રને સ્તનપાન કરાવતી સ્ત્રી જેમ નમે તેમ અમે તારે માટે નમીએ તથા પતિને આલિંગન આપવા માટે (शश्वचैः); જેવી રીતે કન્યા નમે તેમ અમે (તારે માટે નમીએ). અથવા (એક નદી બોલે છે એમ માનીએ તો –) હું નમું છું" એવો પણ અર્થ થાય.

---

26. अश्वनामान्युत्तराणि षड्विंशतिः (निघ. १/१४) । तेषामष्टा उत्तराणि (निघ. १/१४/१९–२६) बहुवत् । अश्वः कस्मात् । अश्नुतेऽध्वानम् । महाशनो भवतीति वा । तत्र दधिक्राः (निघ. १/१४/७) इत्येतत् । दधत् क्रामतीति वा । दधत् क्रन्दतीति वा । दधत् आकारी भवतीति वा । तस्याश्वद्देवतावच्च निगमाः भवन्ति । तद्यद्देवतावदुपरिष्टात्तद् व्याख्यास्यामः (निरु. १०/३१) । अथैतदश्ववत् ॥२७॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।

क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ॥ (ऋ.सं. ४/४०/४) अपि स वाजी वेजनवान् क्षेपणमनु तूर्णमश्नुतेऽध्वानम् । ग्रीवायां बद्धः । ग्रीवा गिरतेर्वा । गृणातेर्वा । अपिकक्ष आसनीति व्याख्यातम् । क्रतुं दधिक्राः । कर्म वा प्रज्ञां वा । अनु संतवीत्वम् । तेनोतेः पूर्वया प्रकृत्या निगमः । पथामङ्कासि पथां

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कुटिलानि । पन्थाः पततेर्वा । पद्यतेर्वा । पन्थतेर्वा । अङ्क अञ्चतेः । आपनीफणत् इति फणतेः चर्करीतवृत्तम् ॥

दशोत्तराणि (निघ. १/१५) आदिष्टोपयोजनानीत्याचक्षते साहचर्यज्ञानाय ॥ ज्वलतिकर्माणः उत्तरे धातवः एकादश (निघ. १/१६) । तावन्त्येवोत्तराणि (निघ. १/१७) ज्वलतो नामधेयानि नामधेयानि ॥२८॥

॥ इति द्वितीयोऽध्यायः ॥

अश्वनामान्युत्तराणि षड्विंशतिः । अश्वस्य नामानि 'अश्वनामानि' 'उत्तराणि' प्रकृतेभ्यो नदीनामभ्यः अब्जा एव ह्यश्वाः । एवं ह्युक्तम्, – "अप्सु जाता अश्वाः स्वादेवैतान् योनेर्जनयन्ति" इति । तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि । कियन्ति पुनस्तानि ? 'षड्विंशतिः' षडधिका विंशतिः (२६) । कतमानि पुनस्तानि ? "अत्यः, हयः, अर्वा" – इत्येवमादीनि । अतति गच्छतीत्यत्यः । हयति गच्छतीति, हन्ति वाध्वानमिति हयः । ईरणवानर्वा, गमनवानित्यर्थः । एवमादि ॥

"तेषाम्" अश्वनाम्नाम् "अष्टौ" यानि "उत्तराणि" अन्यथय इत्येवमादीनि, तानि "बहुवत्" बहुवचनसंयुक्तानीत्यर्थः ॥

आह, – "अश्वः कस्मात्" ? उच्यते, – "अश्नुतेऽध्वानं" व्याप्नोतीत्यर्थः । "महाशनो वा भवति इति" स हि बहु भुङ्क्ते । "तत्र" तस्मिन् षड्विंशके अश्वाभिधानगणे "दधिक्रा इत्येतत्" पदं सन्दिग्धम् । तत् पुनरेतत् – "दधत् क्रामतीति" धारयन्नयमश्वारोहं क्रामतीति दधिक्राः ? अथ "वा" "दधत्" धारयन्नयमश्वारोहं "क्रन्दति" शब्दं करोति "इति" दधिक्राः ? अथ "वा" "दधत्" धारयन् अयमश्वारोहम् "आकारी" आकारवान् "भवतीति" दधिक्राः ? स हि अधिरूढेऽश्वारोहे आकुञ्चितग्रीवो विपुष्पितसर्वगात्र आकृतिमान् भवति ॥

"तस्य" दधिक्राशब्दस्य "अश्ववत्" अश्वसंयुक्ताः, "देवतावत्" देवतासंयुक्ताः "च" "निगमा भवन्ति" । "तत्" एतदुच्यते, – "यद् देवतावत्" अस्य दधिक्राशब्दस्य, "तत्" "उपरिष्टात्" पञ्चदशेऽध्याये "आ दधिक्राः शवसा (ऋ.सं. १०,६,१६,१)" – इत्यस्यामृचि "व्याख्यास्यामः" । "अथ" पुनर्यत् "अश्ववत्" अस्य, तत् "एतत्" व्याख्यायते – ॥५॥

उत स्य वाजीति । गोतमपुत्रस्य वामदेवस्येयमार्षम् । जगती । वाजपेये वाजियुक्तं रथमधिरुह्य यजमानोऽनुवाकं जपति, तत्रैषा । "उत स्यः" "अपि सः" इत्यर्थः । "वाजी वेजनवान्" । 'ओ विजी भयचलनयोः (रु.प.)' । भयवान् परेभ्यो भयदाता, परेषां हि तं दृष्ट्वा भयमुत्पद्यते । चलनवान् वा, स हि नित्यं चलनशीलः । 'क्षिपणिं' "क्षेपणम् अनु" कशाघातमनु "तूर्णमश्नुतेऽध्वानम्" व्याप्नोतीत्यर्थः । अपि कशाप्रहारमनु 'तुरण्यति' अप्यनाहत एवेत्यऽपिशब्दः । किञ्च "ग्रीवायाम्" उरसि बध्रेण "बद्धः" । "अपि कक्षे" कक्ष्यया । अथ "आसनि" मुखे खलीनेन बद्धः । एवमनेकेषु स्थानेषु बद्धः । तथापि तुरण्यत्येव । अन्यो हि एकस्मिन्नपि प्रदेशे बद्धः चलितुमपि न शक्नोति, किमुत त्वरितुम् । किञ्च, "क्रतुम्" आत्मीयं गमनं "कर्म वा प्रज्ञां वा" अश्वारोहस्य सन्तनोति काममभिप्रेतार्थेन शीघ्रगामित्वात् "दधिक्राः" अश्वः अनुसन्तनोतीत्यर्थः । किञ्च यान्यपि च कानिचित् "पथां" मार्गाणाम् "अङ्कांसि" अञ्चितानि कुटिलानि सन्ति, तान्यपि अनुलोमानीव कुर्वन् आशुगामित्वात् । आभिमुख्येन पुनः पुनर्भृशं वा फणति गच्छतीत्यर्थः ॥ एष समस्तार्थः ॥

अथैकपदनिरुक्तम् । – "ग्रीवा, गिरतेर्वा गिलनार्थस्य (तु.प.), तया हि गिलत्यन्नम् । "गृणातेर्वा" शब्दार्थस्य (क्र्या.प.) तया हि शब्दो गीर्य्यते । "गृह्णातेर्वा" (क्र्या. उ.) तया ह्युदकादिं गृह्यते, यः शृङ्खलीक्रियते । "अनुसन्तवीत्वत्" इति, "तनोतेः धातोः (त.प.) "पूर्वया प्रकृत्या निगमः । षड्विधो हि धातुः । "प्रकृत्यन्तः, सनन्तश्च, यङन्तो, यङ्लुगेव च । ण्यन्तो, ण्यन्तसनन्तश्च, षड्विधो धातुरुच्यते ॥" आसां षण्णां धातुप्रकृतीनां या पूर्वा प्रकृतिस्तयैष निगमः, न सन् प्रकृतीत्यादीनामन्यतमया । "पन्थाः पततेर्वा पद्यतेर्वा पन्थतेर्वा" त्रयोऽपि ह्येते गत्यर्थाः एषामन्यतमस्य । "अङ्कः सञ्चतेः" गत्यर्थस्य । "आपनीफणदिति" "फणतेः" गत्यर्थस्य चर्करीतान्तत्वेन वृत्तम् ॥

"दश" यानि "उत्तराणि" नामानि, तान्यश्वनामसम्बन्धेनैवोच्यन्ते तान्यपि ह्यश्वानामेवेति । तानि पुनः "आदिष्टोपयोजनानि" – "इति" एवम् "आचक्षते" आचार्य्याः । इदमिन्द्रस्याश्वानां नाम, इदमग्नेः, इदमादित्यस्य, – इत्येवमादिष्टोपयोजनानि । कतमानि पुनस्तानि ? "हरी इन्द्रस्य" – इत्येवमादीनि । हरी हरितवर्णौ इन्द्रस्याश्वौ । "रोहितोऽग्नेः" रोहितवर्णौ । इत्येवमादि ॥

"ज्वलतिकर्माण उत्तरे धातव एकादश" । य एव ह्यश्ववन्तो भवन्ति, त एव ज्वलन्तीव तेजसा, ततोऽश्वनामभ्य उत्तरे ज्वलत्यर्था धातवः । कतमे पुनस्ते ? इति । "भ्राजते, भ्राशते, भ्राश्यति" – इत्येवमादयः ॥ "तावन्त्येवोत्तराणि" "जमत्", कल्मलीकिनम्, जञ्जणा भवन्" – इत्येवमादीनि "ज्वलतो नामधेयानि" । जमति गच्छतीति "जमत्" । कमहं मलिनं शोधयामीति "कल्मलीकिनम्" । जनं भावयतीति "जञ्जणाभवन्" । इत्येवमादि ॥ अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः ॥६॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य सप्तमः पादः ॥७॥

इति जम्बुमार्गनिवासनः आचार्य्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ सप्तमोऽध्यायः (द्वितीयोऽध्यायः) समाप्तः ॥२॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

26. **(અનુ.)** (નદીનાં સાડત્રીસ નામો) પછી અશ્વનાં છવ્વીસ નામો છે. તે છવ્વીસ નામોમાંથી છેલ્લાં આઠ (अत्यथयः । श्यनासः । सुपर्णाः । पतङ्गाः । नरः । ह्वार्याणाम् । हंसासः । अश्वाः ।) નામો બહુવચનમાં વપરાય છે. અશ્વ શબ્દ કેવી રીતે બન્યો હશે ? ૧. જે માર્ગને વ્યાપી વળે છે. અથવા ૨. જે ઘણું ખાય છે. (√अश् व्याप्तौ, અથવા √अश भोजने > अश् + व = अश्वः ।)

અશ્વનાં છવ્વીસ નામોમાંથી જે 'દધિક્રા' એવો શબ્દ છે તે दधि > दधत् √क्रा > क्रामतिः, અથવા दधि > दधत् + क्रा > √क्र > क्रन्दति — આવી રીતે બન્યો હશે. અર્થાત્ ૧. (સ્વાર પીઠ ઉપર બેસી ગયા પછી) તેને ધારણ કરીને જે ચાલે છે અથવા ૨. તેને (સ્વારને) ધારણ કર્યા પછી જે અવાજ કરે (હણહણે) છે અથવા ૩. સ્વારને ધારણ કર્યા પછી જે આકારી (આકારવાન્) લાગે છે (તે દધિક્રા). વેદમન્ત્રોમાં આ 'દધિક્રા' નામનો પ્રયોગ અશ્વ (સામાન્ય ઘોડા)ના વર્ણનમાં અને દેવતાની સ્તુતિમાં એમ બન્ને રૂપે જોવા મળે છે, દેવતા રૂપે જ્યાં દધિક્રાની સ્તુતિ થઈ છે તેની આગળ ઉપર વ્યાખ્યા કરવામાં આવશે. અહીં નીચે જે મન્ત્ર રજૂ કરવામાં આવે છે તેમાં દધિક્રા શબ્દ 'સામાન્ય ઘોડા'ના અર્થમાં વપરાયો છે.

"ગરદન, કાંખ અને મોઢેથી બંધાયેલો આ ઘોડો ચાબુક મારવામાં આવતાં ઝડપથી દોડે છે. આ દધિક્રા (ઘોડો) પોતાના ગમનરૂપ કર્મનો વિસ્તાર કરતો (અથવા ઘોડેસ્વારની ઇચ્છા મુજબના પ્રદેશોમાં લઈ જતો) (क्रतुं अनु सन्तवीत्वत्), કુટિલ માર્ગો ઝડપથી પાર કરી જાય છે."

તે વાજી = વેગવાળો (ઘોડો) ચાબુક (क्षिपणिं > क्षेपणम्) મારવામાં અથવા ઉગામવામાં આવતાં જલ્દીથી માર્ગને વ્યાપી વળે છે. ગ્રીવામાંથી બાંધવામાં આવેલો. ગ્રીવા શબ્દ √गृ निगरणे (ગળી જવું), √गृ शब्दे (અવાજ કરવો); અથવા √ग्रह ग्रहणे (ગ્રહણ કરવું) ધાતુમાંથી બન્યો હશે. अपिकक्षे । आसनि । આ શબ્દોની વ્યાખ્યા થઈ ગઈ છે. क्रतुं दधिक्राः । અહીં ક્રતુ શબ્દ 'કર્મ' અથવા 'પ્રજ્ઞા' અર્થમાં વપરાયો છે. अनुसन्तवीत्वत् આ શબ્દ अनु + सम् + √तनु विस्तारे (तनोति) ધાતુની પૂર્વ પ્રકૃતિમાંથી (અર્થાત્ કેવળ તમાંથી ?) સાધવામાં આવ્યો છે. (दुर्गः अनुसन्तवीत्वत् = अनुसन्तनोति ।) पथामङ्कांसि એટલે કુટિલ (ખાડા-ટેકરાવાળા અને વાંકાચૂકા) માર્ગો. पन्थाः શબ્દ √पत् गतौ, √पद् गतौ અથવા √पथि गतौ ધાતુ ઉપરથી બન્યો હશે. अङ्कांसि > अङ्क શબ્દ √अञ्च (વાળવું) ઉપરથી બન્યો હશે. आपनीफणत् એવું રૂપ √फण गतौ (फणति = गच्छति)નું ચર્કરીત-વૃત્ત = ચર્કરીતાન્ત = યઙન્ત = પૌનઃપુન્યાર્થક છે.

(નિઘંટુમાં અશ્વનાં નામો) પછી જે દશ નામો આવ્યાં છે 'તે નામો आदिष्ट = निर्दिष्ट દેવતાઓની સાથે જ વાપરવામાં આવે છે' એમ કેટલાકનું કહેવું છે. કેમ કે એમ કરવાથી તે તે નામવાળા અશ્વની સાથે આવનાર દેવતાવિશેષનું પણ જ્ઞાન થાય છે. (દા.ત., हरी इन्द्रस्य । रोहितोऽग्नेः । हरित आदित्यस्य इति ।).

આ પછી, સળગવું-પ્રકાશવું એવા અર્થવાળા અગિયાર ધાતુઓ આવેલા છે અને તે પછીનાં એટલાં જ અર્થાત્ અગિયાર નામો દીપ્તિનાં છે.

26. **(વિમર્શ) :** અહીં નિરુક્તનો બીજો અધ્યાય પૂરો થાય છે. યાસ્કે આ અધ્યાયના પ્રથમ પાદમાં ૧. નિર્વચનના સિદ્ધાન્તો અને ૨. નિરુક્તના અધિકારીની ચર્ચા કરી છે. ત્યાર પછી બીજા પાદથી આરંભીને છેલ્લા સાતમા પાદ સુધી નિઘંટુના પ્રથમ (નૈઘંટુક) કાંડમાં આવેલા ગૌ વગેરે સમાનાર્થક શબ્દોનાં નિર્વચનો રજૂ કર્યાં છે. (નિરુક્તના ત્રીજા અધ્યાયમાં પણ આ સમાનાર્થક શબ્દોનાં નિર્વચનો આપવાનાં ચાલુ છે.)

નિઘંટુના પ્રથમ ત્રણ અધ્યાયોમાં = નૈઘંટુક કાણ્ડમાં કુલ ૧૩૪૧ શબ્દો છે. પરંતુ યાસ્કે તે દરેકનાં નિર્વચનો આપ્યાં નથી. તેમણે તો કેવળ ૨૩૦ શબ્દોનાં જ નિર્વચનો નિરુક્તના બીજા અને ત્રીજા અધ્યાયમાં આપ્યાં છે. દા.ત., નિઘંટુના પ્રથમ કાણ્ડમાં પૃથિવીના એકવીસ પર્યાયવાચક શબ્દો છે. તેમાંથી યાસ્કે કેવળ બે જ શબ્દો (गौः અને निर्ऋतिः)નાં નિર્વચનો આપ્યાં છે. એ જ પ્રમાણે અન્તરિક્ષના પર્યાયવાચક શબ્દો સોળ છે. તેમાંથી કેવળ એક (समुद्रः) શબ્દનાં નિર્વચનો આપવામાં આવ્યાં છે. આમ, યાસ્ક નિઘંટુમાં આવેલા તમામ શબ્દોનાં નિર્વચનો આપતા નથી; પસંદગીના અમુક શબ્દોનાં જ નિર્વચનો આપે છે. જો કે આવા પસંદગીના શબ્દોનાં નિર્વચનો આપતી વખતે તે શબ્દોનો જેમાં પ્રયોગ થયો હોય તેવો મન્ત્ર પણ ઉદ્ધૃત કરે છે. દા.ત. બીજા અધ્યાયમાં જોઈએ તો તેમણે લગભગ સોળ મન્ત્રો રજૂ કર્યા છે અને પ્રાસંગિક રૂપે તે મન્ત્રોમાં આવેલા બીજા શબ્દોનાં પણ નિર્વચનો રજૂ કર્યાં છે. આમ, ડો. સિદ્ધેશ્વર વર્માની ગણતરી મુજબ નિરુક્તમાં યાસ્કે કુલ ૧૨૯૮ શબ્દોનાં નિર્વચનો આપ્યાં છે.

હવે પછી નિરુક્તના ચોથા અધ્યાયમાં અનેકાર્થક શબ્દોનાં નિર્વચનો આપવામાં આવશે. આ અનેકાર્થક શબ્દો નિઘંટુના દ્વિતીય (નૈગમ) કાણ્ડમાંથી લીધા છે.

દ્વિતીય અધ્યાય સમાપ્ત

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

॥ चतुर्थोऽध्याय : ॥

નૈગમકાણ્ડની પ્રસ્તાવના : નિઘંટુમાં પાંચ અધ્યાય છે. એમાંથી પહેલા ત્રણ અધ્યાયને 'નૈઘંટુક કાણ્ડ', ચોથા અધ્યાયને 'નૈગમકાણ્ડ' (અને પાંચમા અધ્યાયને 'દૈવત કાણ્ડ' કહે છે. નિઘંટુના આ ચોથા અધ્યાયમાં ત્રણ પાદ છે. યાસ્કે આ ત્રણેય પાદોનું વ્યાખ્યાન એક એક સ્વતન્ત્ર અધ્યાયમાં, એટલે કે નિરુક્તના અનુક્રમે ચોથા, પાંચમા અને છઠ્ઠા અધ્યાયમાં કર્યું છે. નૈગમકાણ્ડના પહેલા પાદના કુલ ૬૨ શબ્દોને યાસ્કે ચોથા અધ્યાયમાં સમજાવ્યા છે. આમ, નિરુક્તનો ચોથો અધ્યાય 'નૈગમ કાણ્ડ' (અનેકાર્થક શબ્દોનું) પ્રતિનિધિત્વ કરતો હોઈ આપણા પ્રસ્તુત અધ્યયનનો વિષય બન્યો છે.

યાસ્કે પહેલો અધ્યાય આખો અને બીજા અધ્યાયનો પહેલો પાદ નિરુક્તની પ્રસ્તાવના રૂપે લખ્યા છે. પરંતુ બીજા અધ્યાયના બીજા પાદથી શરૂ કરીને આખા ત્રીજા અધ્યાયમાં નૈઘંટુક કાણ્ડના (એકાર્થક અનેક શબ્દો, દા.ત.,... આટલા ૨૧ શબ્દો પૃથ્વીના વાચક છે' અર્થાત્ પર્યાયવાચક) શબ્દોનું વ્યાખ્યાન કર્યું છે. ત્યાર પછી ચોથા અધ્યાયમાં નૈગમ કાણ્ડના (અનેકાર્થક એક) શબ્દોનું વ્યાખ્યાન કરવામાં આવ્યું છે. આ અધ્યાયમાં શબ્દો પરસ્પરના પર્યાય નથી, પણ દરેક શબ્દ સ્વતન્ત્ર છે. આથી તેને 'ઐકપદિક કાણ્ડ' પણ કહે છે. વળી, ટીકાકાર સ્કન્દ સ્વામી કહે છે કે 'ઐકપદિક' એવી સંજ્ઞા પૂર્વાચાર્યોએ પ્રસિદ્ધ કરી છે. (કારણ કે) આ કાણ્ડના પ્રત્યેક શબ્દનું વ્યાખ્યાન કરવામાં આવે છે. **पूर्वाचार्य प्रसिद्धेयमस्य संज्ञा इत्यभिप्रायः । एकपदानां व्याख्यानम् ऐकपदिकम् इति । अत्र हि एकैकमेव जहादि पदं व्याख्यायते ।**

યાસ્કે નિઘંટુના શબ્દોને 'સમાસ' (સંક્ષેપ) અને 'વ્યાસ' (વિસ્તાર)થી સમજાવ્યા છે. નૈઘંટુક કાણ્ડના પર્યાયવાચક (એકાર્થક અનેક) શબ્દોને સંક્ષેપથી સમજાવ્યા છે. એટલે કે એ કાણ્ડના પ્રત્યેક શબ્દને સમજાવ્યો નથી, પણ તેમાંના કેટલાકને જ સમજાવ્યા છે. પરંતુ આ નૈગમ કાણ્ડના શબ્દોને યાસ્કે વ્યાસ (વિસ્તાર)થી એટલે કે પ્રત્યેક શબ્દને સમજાવ્યા છે :

विस्तीर्य हि महज्ज्ञानमृषिः संक्षेपतोऽब्रवीत् ।
इष्टं हि विदुषां लोके समासव्यासधारणम् ॥ (દુર્ગ:)

નૈગમકાણ્ડના પ્રત્યેક શબ્દને સમજાવવાનાં બે કારણો છે : ૧. નૈગમ કાણ્ડના શબ્દો સ્વતન્ત્ર છે. જ્યારે નૈઘંટુક કાણ્ડમાં તો બધા શબ્દો પર્યાવાચક હોવાથી 'અમુક નામો પૃથિવીવાચક છે' એમ કહી દેવાથી તેમનો અર્થ સ્પષ્ટ થઈ જાય છે. એથી તેવા દરેક શબ્દને સમજાવવાની જરૂર રહેતી નથી, કદાચ વ્યુત્પત્તિ અજ્ઞાત રહે એવું બને. પરંતુ નૈગમકાણ્ડના શબ્દો દરેક પૃથક્-પૃથક્ હોય છે અને તે દરેકના અનેક અર્થો હોય છે. માટે એક પણ શબ્દને સમજાવ્યા વિના છોડી દે તો નિરુક્તની રચના જ અપ્રસ્તુત બની રહે. ૨. વળી, યાસ્ક જણાવે છે કે આ કાણ્ડમાં અનેકાર્થ શબ્દો હોવા ઉપરાંત અનવગત સંસ્કારવાળા શબ્દો પણ છે. અર્થાત્ કેટલાક શબ્દો એવા પણ છે કે જેના પ્રકૃતિ-પ્રત્યયાદિનું કોઈને (અસંદિગ્ધ) જ્ઞાન નથી. આવા શબ્દોમાંથી એક પણને છોડી દેવાય એમ નથી. માટે અહીં વ્યાસ (વિસ્તાર)થી-અશેષપણે-શબ્દોને સમજાવવામાં આવ્યા છે.

'નૈગમકાણ્ડના શબ્દોને વ્યાસથી સમજાવ્યા છે' એનો એક અર્થ 'પ્રત્યેક શબ્દોને સમજાવ્યા છે' એમ થાય. પરંતુ દુર્ગ જણાવે છે કે નૈગમકાણ્ડના શબ્દનો ૧. પહેલાં પર્યાય આપવો, ૨. ત્યાર પછી તે શબ્દ અને પર્યાયનાં નિર્વચનો દર્શાવવાં, ૩. શબ્દનો જે અર્થ દર્શાવ્યો હોય તેના સમર્થનમાં કોઈ મન્ત્રનું ઉદાહરણ અને ૪. છેલ્લે શબ્દાર્થનો નિર્ણય આપવો-એને વ્યાસ (વિસ્તાર)થી સમજાવ્યો કહેવાય :

तत्त्वं पर्य्यायशब्देन व्युत्पत्तिश्च द्वयोरपि ।
निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे ॥ (દુર્ગ:)

આપણે ઉપર નોંધ્યું કે નૈગમકાણ્ડમાં બે પ્રકારના શબ્દો છે : (क) અનેકાર્થક એક શબ્દ અને (ख) અનવગત સંસ્કારવાળા શબ્દો. આમાંથી અનવગત સંસ્કારવાળા શબ્દો કોને કોને કહ્યા છે એ વિચારણીય છે. કેમ કે અહીં 'અનવગતસંસ્કાર' એવા શબ્દમાં 'સંસ્કાર' શબ્દ પદજાતિ વગેરેનું ઉપલક્ષણ છે. દુર્ગે પદજાતિ વગેરે દશ પ્રકારની અનવગતિઓ વર્ણવી છે : ૧. પદજાતિની અનવગતિ. અર્થાત્ અમુક શબ્દ નામ, આખ્યાત, ઉપસર્ગ અને નિપાત-એમાંથી કયા પ્રકારનો છે તેની જાણકારીનો અભાવ. દા.ત., त्व શબ્દ નામ છે કે નિપાત એ સંદેહનો વિષય છે. ૨. અભિધેય (અર્થ)ની બાબતમાં અનવગતિ. દા.ત., शिताम શબ્દનો અર્થ શો હશે ? એટલે કે હાથ, યોનિ, યકૃત્ અને માંસ એમાંથી કયો અર્થ હશે ? ૩. સ્વરની અનવગતિ. દા.ત., वने न वा यो । આ શબ્દોના કયા સ્વર હશે તે પ્રશ્ન છે. ૪. સંસ્કારની અનવગતિ. દા.ત., ईर्मान्तासः । આ શબ્દના પ્રકૃતિ-પ્રત્યયનું જ્ઞાન નથી. ૫. ગુણ(માત્રા)ની અનવગતિ. દા.ત., करूलतिन् । આ શબ્દમાં કોણ હ્રસ્વ કે દીર્ઘ હશે તે સંદેહનો વિષય છે. ૬. વિભાગની અનવગતિ દા.ત., मेहना । આમાં ઋગ્વેદના પદપાઠ મુજબ मेहना એવો એક જ શબ્દ હશે કે સામવેદના પદપાઠ મુજબ मा इह न

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

હશે ? તે સ્પષ્ટ નથી. ૭. ક્રમની અનવગતિ. દા.ત., उपरमध्वं मे वचसे । માં उपरमध्वं वचसे मे । એવો ક્રમ હશે કે બીજો કોઈ ? તે પ્રશ્ન છે. ૮. વિક્ષેપની અનવગતિ. દા.ત., द्यावा नः पृथिवी । અહીં द्यावापृथिवी એવા એક જ શબ્દમાં વિક્ષેપ શા કારણે થયો હશે તે સંદેહનો વિષય છે. ૯. અધ્યાહારની અનવગતિ. દા.ત., दानमनसो न मनुष्यानाम् । એ ઉદાહરણમાં કયા પદનો અધ્યાહાર લેવાનો છે તે સંદેહનો વિષય છે. ૧૦. વ્યવધાનની અનવગતિ. દા.ત., वायुश्च नियुत्वान् । એ ઉદાહરણમાં કયા પદનું વ્યવધાન હશે તે પ્રશ્ન છે. (આમાંથી ૫, ૭, ૮ અને ૧૦માં કહેલી અનવગતિઓ દુર્ગે આપેલાં ઉદાહરણોમાં સ્પષ્ટ થતી નથી.) ટીકાકાર સ્કન્દ સ્વામીએ 'અનવગત સંસ્કાર 'શબ્દને સમજાવતાં લખ્યું છે કે-व्याकरणेन प्रत्यक्षेणं भाषितेन विशेषलक्षणेनानवगतः, अनवबुद्धः प्रकृत्यादिविभागलक्षणः संस्कारो येषाम् । અર્થાત્ જે શબ્દોના પ્રકૃતિ+પ્રત્યય વગેરેના વિભાગ રૂપ સંસ્કાર ૧. વ્યાકરણ શાસ્ત્ર દ્વારા ૨. કે પ્રત્યક્ષપણે ભાષાના વપરાશ વડે, અથવા તો ૩. उणादयो बहुलम् । पा. सू. ३-३-१, पृषोदरादीनि यथोपदिष्टम् । पा.सू. ६-३-१०९, કે बहुलं छन्दसि । ६-१-३४ (વગેરે) જેવા કોઈ વિશેષસૂત્રથી પણ જાણી શકાયાં નથી. તેવા શબ્દોને અનવગત સંસ્કારવાળાં શબ્દો કહ્યા છે.

प्रथमः पादः

1. ॐ एकार्थमनेकशब्दमित्येतदुक्तम् (निरु० १/२०) । अथ यान्यनेकार्थानि एकशब्दानि तान्यतोऽनुक्रमिष्यामः । अनवगतसंस्कारांश्च निगमान् । तद् ऐकपदिकम् इत्याचक्षते ॥

"एकार्थमनेकशब्दमित्येतदुक्तम्" । किमर्थमिदमुच्यते ? न हि यद्यद् वृत्तं तत्तद् वक्तव्यम्, इदं वृत्तमिदं वर्त्तिष्यत इति । यद्यद् वृत्तं तत्तदनुक्तमपि प्रतीयते, यच्च वक्ष्यमाणमिति । आह,— सङ्क्षेपतो निगमनाय यदुक्तं यद्धा वक्तव्यं प्रतिजानीथ, समासविस्तराभ्यां हि सुखमाधस्त्यं प्रकरणमवधारयिष्यामहे, गृहीतार्थं सङ्क्षेपाच्च विस्तरेणोत्तरग्रन्थमुच्यमानं सुखमवभोत्स्यामहे । अपिचोक्तमन्यत्रापि,

"विस्तीर्य्य हि तमज्ञानमृषिः सङ्क्षेपतोऽब्रवीत् ।
इत्थं हि विदुषां लोके समासव्यासधारणम् ॥

शृणु,—समासतो यदुक्तं यच्च वक्तव्यम् "एकार्थमनेकशब्दमिति"—एतत् पुरस्तात् सूचितम्, एतावन्तः समानकर्माणो धातवः, एतावन्त्यस्य सत्त्वस्य नामधेयानि,—इत्यनेन वाक्येन । यदेतत् "गौरिति पृथिव्यां नामधेयम्"— इत्यत आरभ्य नामाख्यातोपसर्गनिपातानां प्रपञ्चनञ्च, तत्त्वभेदपर्य्यायसङ्ख्यासन्दिग्धोदाहरणतन्निर्वचनव्याख्याप्रविभागेनोक्तम् । स एव नैघण्टुकस्य प्रकरणस्य निगमव्याजेन सर्वथाऽप्यर्थः सङ्क्षेपत उक्तः, शास्त्रसम्बन्धश्चैवमनुसृतो भविष्यति । प्रकरणद्वयस्य चास्यैवमपुनरुक्तता प्रदर्शिता भविष्यतीत्यनेनाभिप्रायेण एकार्थमनेकशब्दमित्युक्तम् । एकोऽर्थः पृथिव्यादिः, अनेकेषां गवादिशब्दानाम्, यत्र तत्त्वभूतः कथ्यते, अनेके च गवादिशब्दाः पृथिव्यादेरेकस्यार्थस्य यत्राभिधायिनः कथ्यन्ते, तदिदमेकार्थमनेकशब्दं प्रकरणम् । अत्रैकेनार्थेनानेके शब्दा लक्ष्यन्ते, अनेकैः शब्दैरेकोऽर्थः । ततो लक्षितलक्षणया वृत्त्या प्रकरणं लक्ष्यते । अत्र यद्यपि गतिकर्मणां द्वाविंशतिशतसङ्ख्यानामविशिष्टं गमनमेकोऽर्थ उक्तः, तथापि प्रसिद्ध्यानुरोधाय "कसति" "लोठते", "श्चोतते"—इत्येवमादयः प्रतिनियतसत्त्वगमनविषया एव द्रष्टव्याः । तद्यथा,—य एवोत्कटिक उरसा वा गच्छति, स एव कसतीत्युच्यते, नेतरो य ऊर्द्ध्वो गच्छति । तथा च,—य एव निम्नेन प्रदेशेन कश्चिदचेतनो लोष्ठादिरन्यो वा चेतनः पुरुषादिः अकामकारेण गच्छति, स एव लोटत इत्युच्यते, नान्यः । तथा च,— यदेव द्रवद्रव्यं किञ्चित् स्रवति, तदेव श्चोतत इत्युच्यते, नान्यत् । एवं गच्छतिकर्मणामेकार्थत्वेऽपि सति प्रसिद्धे सामर्थ्याद् गमनविशेषेषु यथार्थं विनिवेशो द्रष्टव्यः । देशान्तरप्राप्तिस्तु चलनपूर्विका, सर्वेषां समानं कार्य्यम्, इत्यत एकार्थत्वमेषामुक्तम् । सामान्य शब्दाश्च क्वचिद् विशेषवाचिनो भवन्ति, विशेषशब्दाश्च क्वचित् सामान्यवाचिनः, तदप्युपेक्षितव्यम् ॥

एकार्थमनेन समासतो नैघण्टुकं प्रकरणमनुसृतम्, "अथ" इदानीं यद्व्याख्यातव्यं, तत् समासतः प्रतिज्ञायतेः ।— "यानि अनेकार्थानि एकशब्दानि" पुरस्तात् समासतः सूचितानि, एतावतामर्थानामिदमभिधानमित्येवम्, "तानि" "अतः" परम् "अनुक्रमिष्यामः" व्याख्ययेत्यभिसम्बन्धः । किं लक्षणा पुनरिह व्याख्या ? इति । तदुच्यते,—

"तत्त्वं पर्य्यायशब्देन व्युत्पत्तिश्च द्वयोरपि ।
निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे ॥"

यान्येतानि दयत्यकूपारादीनि पदानि अनेकैरर्थैरुपदयादानदहनहिंसाभिरर्थवन्ति, यानि चैतान्यर्थजातान्युपदयादानदहनहिंसादीनि, एकाशब्दवाच्यानि, तान्येवमितरेतरविशेषण विशेष्यभावलक्षणोपलक्षितानि, एकप्रकरणतामुपगतानि, एवम्प्रकारया ऐकपदिकप्रकरणव्याख्या 'अनुक्रमिष्यामः' वर्णयिष्यामः । अत्रार्थस्याप्रतीयमानस्य पर्य्यायाभिधानेन विभज्य प्रतिपादनं व्याख्या, शब्दस्यापि व्युत्पादनं व्याख्या । एवमेते द्वे व्याख्ये । तयोरर्थपरिज्ञानमेकस्याः कार्य्यम्, शब्दपरिज्ञानमेकस्याः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

तदेतदुभयकप्येकैकस्मिन् नैगमे पदे यथासम्भवं व्याख्यास्यते ॥

आह,—किमनेकार्थान्येव केवलानि अस्मिन् प्रकरणे व्याख्यायन्ते ?' नेत्युच्यते,— "अनवगतसंस्कारांश्च निगमान्" । 'अनवगतसंस्कारान्' अविज्ञातसंस्कारानित्यर्थः । येषां प्रकृतिप्रत्ययादिसंस्कारो न साकल्येन ज्ञायते, तांश्च निगमान् अत्रेव व्याख्यास्यामः । पूर्वाणि चानेकार्थानि अनवगतसंस्कारांश्चेति च शब्दः ॥

तदेतदेवम्प्रकारं प्रकरणं यत्रेतदुभयं व्याख्यायते, "तत्" "ऐकपदिकम्" "इति" अनेन नाम्ना अन्येऽप्याचार्य्याः "आचक्षते" निरूढा हीयमस्मिन् प्रकरणे सञ्ज्ञेत्यभिप्रायः । पूर्वस्मिन् प्रकरणे गणशः पदानां विरचनापेक्ष्यैतदैकपदिकमुच्यते, अत्र त्वेकैकमेव पदं समाम्नातम् । तद्यथा,—"जहा, निधा"— इत्येवमादीनि । यत्र पुनः क्वचिदनेकान्यपि समाम्नातानि, तद्यथा,—"देवो देवाच्या कृपा" "सोमो अक्षाः"— इत्येवमादीनि तत्रेव तत्प्रयोजनं वक्ष्यामः ॥

एवं प्रकरणार्थं सङ्क्षेपतः प्रतिज्ञाय क्रमेण वर्णवृत्तित्वाच्च प्रथमं यत् पदं, तदुपादीयते,—"जहा(१)"—इति । आह,—किमेतदनवगतसंस्कारमुतानेकार्थम् ? उच्यते,—स च जहीत्यनेनानुपपन्नसंस्कारेणोक्तो भवति । अत्र हन्तेर्जहातेश्च सन्देह इति भाष्यकारेणावधृतं "जघानेत्यर्थः"— इति । आह,—कुतः पुनर्विशेषावधारणं हन्तेरेवात्र रूपम्, न पुनर्जहातेः ? इति । उच्यते,—निगमात् ॥ १ ॥

---

1. (અનુ૦) એકાર્થક અનેક શબ્દો કહી દેવામાં આવ્યા. હવે જે અનેકાર્થક એક-એક શબ્દો છે અને જેનો સંસ્કાર (પ્રકૃતિ-પ્રત્યયનો વિભાગ) ખબર નથી તેવા શબ્દોને અમે (યાસ્ક) સમજાવીશું. આવા શબ્દોને કેટલાક આચાર્યો 'ઐકપદિક' કહે છે.

1. (વિમર્શ) : નિઘંટુના પહેલા ત્રણ અધ્યાયો (નૈઘંટુકકાણ્ડ)ની સમજૂતી નિરુક્તના બીજા અને ત્રીજા અધ્યાયમાં રજૂ કરવામાં આવી. આ નૈઘંટુકકાણ્ડમાં પર્ય્યાયવાચક શબ્દોનો સંગ્રહ કરવામાં આવ્યો હતો. જેમકે, આટલાં ૨૧ પૃથિવીનાં નામો છે. અર્થાત્ ત્યાં એકાર્થક અનેક શબ્દોની વ્યાખ્યા કરવામાં આવી. નિઘંટુનો ચોથો અધ્યાય 'નૈગમકાણ્ડ' કહેવાય છે, તેમાં ત્રણ પાદો છે. એ ત્રણેય પાદો ઉપર યાસ્કે નિરુક્તમાં એક એક અધ્યાય એટલે કે ચોથો, પાંચમો અને છઠ્ઠો અધ્યાય લખ્યો છે. આ નૈગમકાણ્ડમાં બે પ્રકારના શબ્દોનો સંગ્રહ કરવામાં આવ્યો છે : ૧. અનેકાર્થક એક શબ્દ અને ૨. અનવગતસંસ્કારવાળા શબ્દો. યાસ્કે ચોથા અધ્યાયની આ ભૂમિકામાં જ જણાવ્યું છે કે એકાર્થક અનેક શબ્દો (નૈઘંટુક કાણ્ડ)ની સમજૂતી રજૂ કરી દીધી. હવે અનેકાર્થક એક શબ્દ અને અનવગત સંસ્કારવાળા શબ્દો (નૈગમકાણ્ડ)ની સમજૂતી રજૂ કરીશું. કેટલાક આચાર્યો આને 'ઐકપદિક કાણ્ડ' કહે છે, કારણ કે નૈઘંટુક કાણ્ડમાં ગણશઃ (અમુક પૃથિવીનાં નામો, અમુક દ્યૌનાં નામો એમ જૂથો બનાવીને) શબ્દોને સમજાવ્યા છે. પરંતુ અહીં નૈગમકાણ્ડમાં તો પ્રત્યેક શબ્દ સ્વતન્ત્ર હોઈ તેને 'ઐકપદિક કાણ્ડ' (એક એક સ્વતન્ત્ર પદોનો જેમાં સંગ્રહ છે તે) કહે છે. નૈઘંટુકકાણ્ડના શબ્દો પર્ય્યાયવાચક હોઈ 'આટલાં પૃથિવીનાં નામો' એમ કહી દીધા પછી કોઈ શબ્દનું નિર્વચન રજૂ ન કરવામાં આવે તો પણ તેનો અર્થ સ્પષ્ટ થઈ જાય છે. પરંતુ અહીં નૈગમકાણ્ડમાં બધા શબ્દ સ્વતન્ત્ર હોઈ તે દરેકનું વ્યાખ્યાન કરવું અનિવાર્ય બન્યું છે.

---

2. जहा (निघ० ४/१/१) जघानेत्यर्थः (१) ॥ को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ॥ (ऋ. सं. ८/४५/३७) ॥ मर्याः इति मनुष्यनाम । मर्यादाभिधानं वा स्यात् । मर्यादा मर्यैरादीयते । मर्यादा मर्यादिनोर्विभागः । मेथतिः आक्रोशकर्मा । अपापकं जघानं कमहं जातु । कोऽस्मद्भीतः पलायते ॥

कतमः पुनरसौ निगमः ? इत्याह,—"को नु मर्य्याः (ऋ० सं० ६, ३, ४९, २)"—इति । त्रिशोकस्येयमार्षम् । गायत्री । महाव्रते महदुक्थे तृचाशीतिषु शस्यते । अस्यामृचि जहेत्यस्य शब्दस्य पूर्वोत्तरपदाविरोधप्रकरणशब्दसारूप्यार्थोपपत्तिभिः संस्कारानवगमेऽपि सति हन्तेरेव विशेषेणार्थोऽवतिष्ठते, न जहातेः । कथम् ? इति, शृणु,—"मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ॥" (ऋ० सं० ६, ३, ४८, ४) । 'मा' 'नः' 'एकस्मिन् आगसि' 'वधीः' हे 'शूर !' 'मा' 'द्वयोः' आगसोः वधीः । 'उत' अपि च 'त्रिषु' अपि आगस्सु मा वधीः । 'भूरिषु' अपि अपराधेषु 'मा वधीः' इति । एतस्मिन् प्रकरणे ब्रवीति "को नु मर्य्याः"—इति । हे 'मर्य्याः' मनुष्याः ! युष्मानेव तावत् पृच्छामि,—'अमिथितः' अनाकृष्टः, परुषमपि वा किञ्चिदनुक्तः, अपि च 'सखा' समानख्यानः, 'सखायम्' एव समानख्यानमेव सन्तम् (यथा भवतामहं यज्ञे समानख्यानः, एवं सन्तम्) 'अब्रवीत्' । को न्वेवमाह ? 'अमिथितः' अनाकृष्टो ब्रूयाद् यः कश्चित्,— यथा यूयमनाहूताः सन्तो मां ब्रूत मा वधीरिति । "जहा को अस्मदीषते" । अपापकशब्दोऽत्र भाष्यकारेणाध्याहृतः प्राक् जहाशब्दस्य अर्थोपद्योतनार्थम्,— "अपापकं"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

सन्तं "कमहं" "जघान" हतवान् "जातु" कदाचिदित्यर्थः । "अपापकं" "कम्" "अहम्" "जातु"— इति सर्वमितत् अध्याहृतं भाष्यकारेण, 'जहा' शब्दस्य निराकांक्षीकरणार्थमधस्ताच्चोपरिष्टाच्च, एवं हि जहाशब्दः परिसमाप्तार्थो भवति । न कदाचिदपि कश्चिदपापको मया हतपूर्व इति, पापकारिणन्तु हन्मीत्यभिप्रायः । ते यूयमपापा एवाजस्रं भूयास्थ, न वो हनिष्यामि । यत् पुनरेतदुक्तं भवद्भिः 'भूरिष्वप्यागस्सु, मास्मान् वधीः'—इति, कथमागस्कारी न हन्यते ? श्वा पुरोडाशमवलिह्यात्, न च कस्यचित् कस्मिंश्चिदपि श्वता स्यात् सर्वं वा असमञ्जसमेव स्यात्, यदि पापकारिणो न हन्येरन्, अथ मनुष्यानपापानपि त्वं हंस्येवेति । अत्र ब्रूमः,— "कः" "अस्मत्" अस्मत्तः अपापकारी सन् "भीतः" "ईषते" "पलायते" इत्यर्थः, न कश्चिदप्यपापकारी मत्तः उद्विजमानः पलायते, स हि शुद्धेन चेतसा अभिमुख एव मामभ्येति, य एव तु पापकारी भवति, स एवात्मापराधशङ्कितया बुद्ध्या अस्मत्तो भीतः पलायते इत्यभिप्रायः । अत्रापि कोऽस्मदित्येतस्मात् पञ्चमीयोगात् ईषतेर्गमनमात्रसामान्यवाचिनः सतो गमनविशेषे पलायनेऽवस्थानम् । यो हि यस्मादु बिभेति, स तस्मात् पलायते । भीतशब्दश्चाध्याहृतः ? न ह्यभीतः कश्चित् पलायते । इत्येष समस्तार्थः ॥

अथैकपदनिरुक्तम् । —"मर्य्या इति" मनुष्यनामसु पठितम् । इहापि चैतत् "मनुष्यनाम" एव । तस्योक्ता व्युत्पत्तिः,— "मर्य्यो मनुष्यो मरणधर्मा" इति । अथ "वा" "मर्य्यादाभिधानम्" एव अत्र "स्यात्" न मनुष्यनाम । यदा मर्य्यादाभिधानमेतदभिप्रेतं भवति, तदेवमर्थवत्तास्य योजयितव्या,— "मर्य्यादा, मर्य्यैरादीयते" । का नु एषा मर्य्यादा,—यतो धर्मज्ञाः सन्तो यूयमनाहता अनाकृष्टाश्च असदभियोगं सखायः सन्तो मम सख्युर्दत्तं मा वधीः ? इति, नैतन्न्याय्यमित्यभिप्रायः । "मर्य्यादा, मर्य्यादिनोर्विभागः" । संश्रिता या भूमिरुपक्षीणा, सा मर्य्येत्युच्यते (विषयान्त इत्यर्थः), आदिन्यस्य विषयस्योपक्रमश्चोच्यते । संश्रितायाश्च भूमेरादेश्च विभागकारिणी या भूमिः, सा मर्य्यादित्युच्यते । "मेथतिराक्रोशकर्मा" । चतस्रः पत्न्योऽश्वमभिमेथतीति प्रसिद्धमश्वमेधे मेथतेराक्रोशकर्मत्वम् । लोकेऽपि च शालो मेथनक इत्युच्यते, स ह्यभीक्ष्णमाक्रुश्यते, आक्रोशति च सः ॥

"अपापकम्"—इत्यस्य भाष्यपदस्यापरो व्याख्यामार्गः,—को न्वेवं ब्रूयादपापकं सन्तं मा वधीरिति ? जघान कमहं जातु पापकमपापकं वा ? कोऽस्मद्भीतः पलायते ? न कश्चिदपि, सौम्योऽहमित्यभिप्रायः । बलकृति सम्बन्धादिन्द्र एवायम् ॥

एवमेतस्मिन् मन्त्रे प्रकरणपूर्वोत्तरपदाविरोधशब्दसारूप्यार्थोपपत्तिभिर्हन्तेरेव विशेषणार्थोऽवतिष्ठते, न जहातेः, जहातौ ह्येतस्मिन् कल्प्यमाने प्रकरणं पूर्वोत्तराणि च पदानि विरुध्यन्ते शब्दसारूप्येऽपि सति । तस्मान्नात्र जहातेरवकाशोऽस्ति, पारिशेष्यात् हन्तेरेतद्रूपमित्युपपन्नं भवति ॥

एवमेव सर्वेष्वेवानवगतसंस्कारेषु योज्यम् ॥

---

2. *(અનુ.)* जहा શબ્દનો અર્થ जघान (માર્યો) થાય છે. "હે મનુષ્યો ! કયા મિત્રે કહ્યું કે (મેં) ઉદ્વિગ્ન થયા વિના (અપાપી) મિત્રને મારી નાખ્યો ? કોણ (અપાપી) અમારાથી (ડરીને) નાસી જાય છે ?" આ મન્ત્રમાં (क) 'મર્યા' શબ્દ મનુષ્યનું નામ છે. અથવા તો 'મર્યાદા'ને 'મર્યા' કહે છે. મર્યાદા એટલે જેને મનુષ્ય નિશ્ચિત કરે તે. બે સીમિત સ્થાનોનો વિભાગ કરનારી (ભૂમિ કે રેખા)ને મર્યાદા કહે છે અને (ख) √मिथ् ધાતુ 'આક્રોશ કરવો' અર્થમાં છે. (આથી મન્ત્રાર્થ આમ થશેઃ-) "કયા અપાપીને મેં મારી નાખ્યો ? અમારાથી ડરીને કોણ પલાયન કરી જાય છે ?"

2. *(વિમર્શ)* : નૈગમકાણ્ડમાં ત્રણ પાદ છે. તેમાંથી પહેલા પાદમાં કુલ ૬૨ શબ્દો છે. આ ૬૨ શબ્દોને નિરુક્તના ચોથા અધ્યાયમાં સમજાવવામાં આવ્યા છે. તેમાંથી પહેલો શબ્દ जहा છે. આ શબ્દ અનેકાર્થક નથી, પણ અનવગતસંસ્કાર છે. અહીં સંદેહ થાય છે કે √हन् हिंसायाम् (हन्ति)નું આ રૂપ છે કે √ओहाङ् त्यागे (जहाति)નું રૂપ છે ? યાસ્ક કહે છે કે हन्तिનું આ રૂપ છે. એટલે जहा નો અર્થ जघान (મારી નાખ્યો) કરવાનો છે. અર્થના સમર્થન માટે તેમણે ઉપર્યુક્ત મન્ત્રમાં अपापकं, कम्, अहम्, जातु એટલાં પદોનો અધ્યાહાર ગણ્યો છે. દુર્ગ કહે છે કે जहा ને जहातिનું રૂપ માનીશું તો મન્ત્રમાંનાં પૂર્વોત્તર પદો પરસ્પર વિરુદ્ધ બની જશે. પ્રસંગતઃ યાસ્કે આ મન્ત્રમાંના मर्या શબ્દને પણ સમજાવ્યો છે, (જે અનુવાદમાં સ્પષ્ટ છે.) મનુષ્ય કે મર્યાદા એવા અર્થવાળો 'મર્યા' શબ્દ અનેકાર્થક છે.

---

3. निधा (२) पाश्या भवति । यन्निधीयते । पाश्यां पाशसमूहः । पाशः पाशयतेः । विपाशनात् (२) ॥ वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य स्मान्निधयेव बद्धान् (ऋ. सं. १०/७३/११) ॥ वयः वेः बहुवचनम् । सुपर्णाः सुपतनाः । आदित्यरश्मयः । उपसेदुः इन्द्रं याचमानाः । अपोर्णुहि आध्वस्तं चक्षुः । चक्षुः ख्यातेर्वा । चष्टेर्वा । पूर्धि पूरय । देहि इति वा । मुञ्च अस्मान् पाशैरिव बद्धान् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"निधा (२)"—इति एतत् पदमनवगतसंस्कारावसरप्राप्तं व्याख्यानीयमैकपदिकव्याख्याधर्मेण प्रकृतानुवृत्त्या स व्याख्यातव्य इति तदभिधानाभिधेयनिगमनिर्वचनानुक्रमप्रवृत्त्या ब्रूमः,—"निधा पाश्या भवति"—इति । पर्य्यायेण तत्त्ववचनम् । यो बालमयः नायुमयो वा पाशसमूहः, पक्षिग्रहणार्थः, स पाश्येत्युच्यते । अधुना द्वावप्येतौ शब्दौ निर्वक्ति, निधाशब्दं पाश्याशब्दञ्च । —"यत्' यस्मात् इयं "निधीयते" नीचैर्धार्य्यति पक्षिग्रहणार्थम् । तस्मात् निधिरिति प्राप्ता, निधानीति वा । सेयमेवं प्राप्ता सती निधेत्यनवगतसंस्कारेणोच्यते । पाश्याशब्द पर्य्यायाभिधानप्रसक्तं निर्ब्रवीति प्रत्ययोत्पादनार्थम्, —"पाश्या पाशसमूहः" इति । पदान्निष्कृष्य तद्धितार्थो निरुक्तः, अधुना पदार्थं निर्ब्रवीति, —"पाशः पाशयतेर्विपाशनात्" तेन हि विविधमतिशयेन वा पाश्यते बध्यत इत्यर्थः ॥ २ ॥

अधुना यस्मिन् मन्त्रे निधाशब्दः पाशसमूहवाची, तमानीय ब्रवीति, निधाशब्दनिगमार्थम् । कतमः पुनरसौ मन्त्रः ? इत्याह,— "वयः सुपर्णा" इति । शाक्त्यस्य गौरिवीतेरियमार्षम् । त्रिष्टुप् । अग्निष्टोमे मरुत्वतीयशस्त्रस्य परिधानीयैषा निविद्धानीये सूक्ते । 'वयः' "आदित्यरश्मयः" । "वेतेः" गत्यर्थस्य (अदा० प०) नामीभूतस्य "बहुवचनम्" विः, वी, वयः इति । सुपर्णाः' "सुपतनाः" एत एव "उपसेदुः" । उपसीदन्ति व्युष्टायां रात्रावहन्यहनि । कमुपसेदुः ? 'इन्द्रम्' आदित्यम् । 'प्रियमेधाः' प्रिययज्ञाः । त एव यज्ञसहचारित्वात्, उद्गतपूदितेषु हि तेषु यज्ञास्तायन्ते । 'ऋषयः' त एव, अर्षणात्, प्रकाशकत्वात् । 'नाधमानाः' त आदित्यमुपसेदुः । कमर्थं "याचमानाः" ? इति । "अपोर्णुहि" अपावृणु जनानामेतत् 'ध्वान्तम्' "आध्वस्तम्" आच्छादितं तमसा । 'चक्षुः' "पूरय" युष्मदननुगृहीतमसफलमिवैतेषां जनानामेतच्चक्षुः, तत् पूर्द्धि, सफलं कुर्वित्यर्थः । अथवा 'पूर्द्धि' "देहि" इति । यदुक्तं स्यात् अस्तं हि गच्छता त्वया एतेषां जनानामाप्तमिव यच्चक्षुः, तत् पुनरुर्यस्त्वमेतेभ्यो जनेभ्यो देहि । कथञ्च पुनर्देहि ? 'मुमुग्धि अस्मान्' "मुञ्चास्मान्" 'निधया' "पाशैः" पाशसमूहेन पक्षिणः "इव" एतस्मिन् "बद्धान्" । यावेदतत्तावदशेषं तमो नाशयित्वा एतेषां जनानामेतच्चक्षुयुग्मं, सफलं वा कुर्मः । एवं ह्येतत् त्वयैव दत्तं भविष्यतीत्यभिप्रायः । एतमर्थं याचमाना उपसेदुः ॥

"चक्षुः "ख्यातेर्वा" दर्शनार्थस्य, "चष्टेर्वा" दर्शनार्थस्यैव । एवमेतस्मिन् मन्त्रे 'मुमुग्ध्यस्मान्निधये च बद्धान्—इत्येतेषां पदानां मध्ये वर्त्तमानस्य तृतीयान्तस्य निधाशब्दस्य पाशसमूहादन्यः कोऽर्थः स्यात् ?—'मुमुग्धि' 'बद्धान्'—इत्येतौ शब्दो येन बद्धाः, यस्माच्च मुच्यन्ते, तदर्थाभिधायिनं शब्दमाकाङ्क्षतः । तत्रैवं सति वरमविद्यमानस्याध्याहारद् विद्यमानस्य, निधाशब्दस्य, अनयोः शब्दयोर्मध्ये वर्त्तमानस्य, आकाङ्क्षितार्थाभिधायकत्वकल्पना इति निधाशब्दः पाशसमूहाभिधायित्वेऽवतिष्ठते, इतरथा ह्ययमितरैः पदैरसम्बन्ध्यमानोऽनर्थक एव स्यात् । तस्मादेवं सर्वत्रानवगतसंस्काराणामसिद्धार्थानां पदानां सामर्थ्यादाकाङ्क्षितरूप एवार्थेऽवस्थानं भवति, तदुपपाद्यं सर्वत्र, ग्रन्थातिगौरवभयात् तु सङ्क्षेपतोऽत्र दर्शयिष्यामः ॥

---

3. (અનુ૦) निधा શબ્દનો અર્થ पाश्या (પાશ) થાય છે. જેને (નીચે જમીન ઉપર) પાથરવામાં આવે છે તે નિધા. પાશ્યા એટલે પાશસમૂહ. √पश् (पाशयति) ઉપરથી 'पाश' શબ્દ બન્યો છે. તેનાથી બાંધવામાં આવે છે માટે તેને 'पाश' કહે છે. "સુન્દર પાંખોવાળાં પક્ષીઓની જેમ યજ્ઞપ્રિય ઋષિઓ યાચના કરતાં કરતાં ઇન્દ્રની પાસે ગયા. (તેમણે પ્રાર્થના કરી કે) ઢંકાઈ રહેલા સ્થાનને ખોલી કાઢો, આંખોને ભરી દો અને જાણે પાશોથી બંધાયેલા હોઈએ એવા અમને મુકત કરો." આ મન્ત્રમાં वयः શબ્દ वि નું (પ્રથમા) બહુવચન છે. सुपर्णाः એટલે સારી રીતે પડનારાં સૂર્યનાં કિરણો. (તે કિરણો) યાચના કરતાં કરતાં ઇન્દ્રની પાસે ગયાં. (અને પ્રાર્થના કરી કે) ઢંકાઈ ગયેલી આંખોને ખોલો. અહીં चक्षुः શબ્દ દર્શનાર્થક √ख्याम् કે √चष्ट ઉપરથી બન્યો છે અને "पूर्धि"નો અર્થ 'પૂરો' કે 'આપો' એવો થાય છે. જાણે પાશોથી બંધાયેલા હોઈએ એવા અમને મુકત કરો.

3. (વિમર્શ) : અહીં निधा એવા અનવગત સંસ્કારવાળા શબ્દને સમજાવવામાં આવ્યો છે. આ સમજૂતીમાં પ્રારંભે पाश्या એવો પર્યાયવાચક શબ્દ દર્શાવી તે બન્નેની यन्निधीयते અને विपाशनात् એવી વ્યુત્પત્તિઓ આપી છે. ત્યાર પછી નિગમ (મન્ત્ર) દ્વારા તે અર્થનું સમર્થન કરવામાં આવ્યું છે. આમ નિધા એટલે પાશ. (અહીં पाशादिभ्यो यः । ૪–૨–૪૯ સૂત્રથી पाश શબ્દને સમૂહ અર્થમાં તદ્ધિતનો य પ્રત્યય લાગીને पाश्या શબ્દ બન્યો છે અને પાશ બંધનનું સાધન હોવાથી ચુરાદિ (૧૦મા) ગણના √पश् ધાતુને घञ् પ્રત્યય લાગીને पाश શબ્દની સિદ્ધિ કરવામાં આવે છે.) અહીં ટીકાકાર સ્કન્દસ્વામી લખે છે કે-निधेति... पाश्या भवतीति पर्य्यायेणाभिधेयकथनम् । यद् यस्मिन्निधीयते स्थाप्यते मृगपक्षिग्रहणाय इति निर्वचनम् । अभिधेयप्रसक्तं निराह—पाश्या पाशसमूहः, समूहार्थे पाशादिभ्यः इति यः । पाश्या जालम्, पाश्यानुप्रसंगाद् पाशं निराह पाशः पाश्यतेः बन्धनार्थाद् विपाशनात् । तेन विविधं मृगः पक्षी वा बध्यते ।

---

4. पार्श्वतः श्रोणितः शितामतः (मैत्रा. सं. ४/१३/७) । पार्श्वं पर्शुमयम् अङ्गं भवति । पर्शुः स्पृशतेः । संस्पृष्टा पृष्ठदेशम् । पृष्ठं स्पृशतेः । संस्पृष्टम् अङ्गैः । अङ्गम् अङ्गनात् अञ्चनाद्वा । श्रोणिः श्रोणतेः गतिच-

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

लाकर्मणः । श्रोणिः चलतीव गच्छतः ॥ दोः शिताम (३) भवति । दोः द्रवतेः । योनिः शिताम इति शाकपूणिः । विषितो भवति । श्यामतः यकृत्तः इति तैटीकिः । श्यामं श्यायतेः । यकृत् यथाकथा च कृत्यते । शितिमांसतः मेदस्तः इति गालवः । शितिः श्यतेः । मांस माननं वा । मानसं वा । मनः अस्मिन् सीदतीति वा । मेदः मेद्यतेः (३) ॥

---

(४) "शिताम (३)" —इति । एतदनवगतम् । अनुपन्यस्यैव पदम्, अभिधेयं चानुक्त्वैव निगममेव प्रथमं पठत्याचार्य्यः । विप्रतिपत्त्यानेकार्थत्वमस्येति । "पार्श्वतः श्रोणितः शितामतः"— इति निगमः (य० मा० सं० २१, ४३) । पशुहविषः प्रैषेऽयं मन्त्रशेषः । कतमः पुनरसौ प्रैष ? "होता यक्षदिन्द्राग्नीछागस्य हविष आत्तामद्य मध्यतो मेद उद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाश्विना जुषेतां हविर्होतर्यज ॥" (य० मा० सं० २१, ४३) —इति । सर्व एव गद्यः । वामदेवस्यार्षम् । मैत्रावरुणो ब्रवीति । 'होता यक्षत्' होता यजत्वित्यर्थः । तेन चेज्यमानौ 'इन्द्राग्नी' अस्मात् 'हविषः' पश्वाख्यात् 'मध्यतः' यदेतत् मेदः' 'उद्भृतम्' अस्यां स्रुच्यां हितम् । तस्मान्मेदः पर्य्यस्यति, श्रपयति, त्रेधा भेदः करोतीति ह्युक्तम् । एतन्मेदः 'अद्य' एतस्मिन्नहनि सद्यः उद्भृतम् 'आत्ताम्' भक्षयेताम् । 'पुरा द्वेषोभ्यः' हविर्मथिभ्यः पिशाचादिभ्यः । 'पुरा पौरुषेय्या गृभः' अर्वागिडावदानात्, इडा हि पुरुषार्थं गृह्यते, प्राक् तस्माद् ग्रहणात् । 'इन्द्राग्नी' 'घस्तां' भक्षयेतां, 'नूनं' निश्चयेन । एतस्मिन् 'घासे' घसनकाले, भक्षणकाले प्राप्ते 'अज्राणाम्' अनभिभूतानां रक्षोभिः आदरेण प्रतिविशिष्टैर्मन्त्रैः संस्कृतानाम् । अथवा 'घासेअज्राणाम्' इत्येकं पदम् । तदायमर्थः,—घासे हि सति पशवो न जीर्य्यन्त इति 'घासेअज्राः' । 'यवसप्रथमानां' यवसः अशनम्, तस्य अनेकप्रकारस्य श्रेष्ठत्वादेतान्येव देवतृप्तये प्रथमानि, तेषां यवसप्रथमानाम् । 'सुमत्क्षराणाम्' स्वयमेवैतानि भक्ष्यमाणानि खादुत्वादुदरं प्रति क्षरन्तीति सुमत्क्षराणाम् । 'शतरुद्रियाणाम्' । बहुस्तुतीनाम् । अथवा 'शतरुद्रियाणां' बहुशो रुग्णानाम् । 'अग्निष्वात्तानाम्' अग्निष्वात्तादीनाम्, अग्निपाकेन मृदुत्वात् स्वादूकृतानाम् । 'पीवोपवसनानाम्' पीवना छागेन उपवस्तानाम् अथवा पीवानं छागमुपगम्योपितानाम् । 'पार्श्वतः' अङ्गात् 'अवत्तानाम्' 'श्रोणितः' अवत्तानाम् । 'शितामतः' अवत्तानाम् । 'उत्सादतः' च उच्छेदनस्थानात् 'अङ्गादङ्गात्' अवत्तानाम् । 'करतः' कुरुताम् इन्द्राग्नी । तृप्तिम् एतेषाम् एवंलक्षणानामवदानानाम् । हे 'होतः' । यथैताविन्द्राग्नी 'जुषेताम्' आसेवेताम्, एतत् 'हविः । तथा त्वमपि 'यज' ॥

निगमप्रसक्तमुच्यते,—"पार्श्वं पर्शुमयमङ्गं भवति" । पर्शवो वङ्क्रय उच्यन्ते, तन्मयं हि तद् भवति पार्श्वपदलक्षणम् । आह, —पर्शुः कस्मात् ? उच्यन्ते, —"पर्शुः, स्पृशतेः" । आह,—किमनया स्पृष्टम् ? इति । उच्यते,—"संपृष्टा पृष्ठदेशम्" प्रति भवति । आह,—"पृष्ठं" कस्मात् ? उच्यते—"स्पृशतेः" (तु० प०) एव, तद्धि "संस्पृष्टमङ्गैः" । आह,— "अङ्गम्" कस्मात् ? उच्यते,—"अङ्गनात्" अङ्गितं हि तत् कालेन भवति, गतमित्यर्थः (भू० प०) । "अञ्चनाद्वा" । अञ्चतिरपि गत्यर्थ एव (भू० प०) । धात्वन्यत्वमर्थैकत्वम् । पार्श्वशब्दप्रसक्तानुप्रसक्तमुक्तम् । अधुना श्रोणिशब्दं निगमप्रसक्तं निर्ब्रवीति,—"श्रोणिः श्रोणतेः" धातोः "गतिचलाकर्मणः" (भू० प०) । गतिनिमित्तं चलनं यस्य कर्म. सोऽयं गतिचलाकर्म, तस्य गतिचलाकर्मणः । किं कारणम् ? "श्रोणिश्चलतीव" स्थानात् पशोः "गच्छतः" ।

शितामशब्दस्य तत्त्वमाचष्टे, —"दोः शिताम भवति" बाहुरित्यर्थः आह,—दोः कस्मात् ? उच्यते, —दोः" "द्रवतेः" (भू० प०) तस्य हि प्राणेन पशु र्द्रवति । श्रितमंसभावेन एतत्कार्य्यं भवतीति शिताम । यदा दोर्विषये शितामशब्दः, तदैवं निर्वक्तव्यः । आह,—कयोपपत्त्या दोः शितामशब्देनोच्यते ? शृणु,—पशोर्हि बाह्यानि चावदानानि, आभ्यन्तराणि च भवन्तीति । तत्र, पशोः पार्श्वे श्रोण्यावंसाविति बाह्यानि, जिह्वाहृदयकृतादीनि आभ्यन्तराणि । तत्रैवं सति पार्श्वतः श्रोणितः इत्येतयोरन्तरा वर्त्तमानः शितामशब्दः किमन्यद् दोष्णोऽभिदध्यात् । प्रायो हि नियामको भवति । एवं बाह्यावदानप्राये च शितामशब्दो वर्त्तते इति दोर्विषयः कल्प्यते । "योनिः" शितामः"—"इति" शाकपूणिः" आचार्य्यो मन्यते । तत्र योनिः अनवदानीया एव । योनिसमानदेशस्तु गुदो नामावदानमस्ति, स योनिशब्देनोच्यते । स च गुदः "विषितो भवति" । 'विष्लृ व्याप्तौ (जु० उ०), व्याप्तः स पुरीषेण भवति । अथवा विषितमांसो विपुषितमांसः, विस्रस्तमांसः, स भवति । आह,— कयोपपत्त्या शाकपूणेमते योनिः शिताम शब्देनोच्यते ? इति । शृणु, —स हि श्रोण्यनन्तरो भवति, श्रोण्यनन्तरश्च शितामशब्द उच्यते,—श्रोणितः शितामत इति । शब्दसारूप्यमपि च किञ्चिदस्ति,— विषितो भवति, शितामेति । अनयोपपत्त्या अनेन च शब्दसारूप्येण योनिः शिताम इति शाकपूणिर्मन्यते ।

"श्यामतो यकृत्तः"—"इति" "तैटिकिः" आचार्य्यो मन्यते । यदुक्तं भवति श्यामत इति, तदुक्तं भवति शितामत इति । एवं हि बहुतरं शब्दसारूप्यं लक्ष्यते । एवञ्च सति यकृत्त एतदवदानं चोदितं स्यादिति गम्यते । किङ्कारणम् ? तद्धि "श्यामं" श्यायतेः"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(भू० आ०) धातोः, तद्धि सम्पर्कादुपपद्यते। आह,—'यकृत्' कस्मात्? उच्यते,—यदि मृदुत्वात् "यथा कथा च" अयत्नेनैव "कृत्येत" छिद्यत इत्यर्थः। "शितिमांसतो मेदस्तः"—"इति" "गालवः" आचार्यो मन्यते। श्वेतान्मांसात् 'शितिमांसतः'। कतमत् पुनस्तत् श्वेतं मांसमिति? उच्यते—'मेदस्तः'। तस्मात् यदुक्तं भवति शितिमांसत इति, तदेवोक्तं भवति शितामत इति। एवमपि बहुतरं शब्दसारूप्यमस्ति। "शितिः" "श्यतेः" तनूकरणार्थस्य (दि० प०), परो हि विवेकस्तेजसो मेदस्येवावतिष्ठते। "मांस" "माननं वा" य एव हि मान्यो भवति, तदर्थमितत् संस्क्रियते। "मानसं वा" सुमनसा हि तदुपादीयते। अथ वा य एव हि मनस्विनो भवन्ति, तैरुपादीयते। "मनोऽस्मिन् सीदतीति वा सर्वस्यैव हि मांसे मनः सीदति। "मेदः" "मेद्यतेः" स्नेहनार्थस्य॥

एवमेष शितामशब्दोऽनवगताभिधेयोऽनवगतसंस्कारोऽपि। एवमेतस्मिन् प्रकरणे अन्यान्यनवगतसंस्काराणि उपेक्षितव्यानि। उक्तं हि,—

"शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः।
सर्वमेतदनेकार्थे दशानवगमे गुणाः॥ —इति।

कतमे पुनस्ते? इति। पदजात्यभिधेयस्वरसंस्कारगुणविभागक्रमविक्षेपाध्याहारव्यवधानानि। तेषु चाभिधेयमपेक्ष्य निर्वचनं कर्त्तव्यम्। उक्तं हि,—

"धातूपसर्गावयवगुणसत्त्वं हि धातुजम्।
बह्वेकधातुजं वापि पदं निर्वाच्यलक्षणम्॥
धातुजं धातुजाज्जातं समर्थार्थजमेव च।
वाक्यजं व्यतिकीर्णञ्च; निर्वाच्यं पञ्चधा पदम्॥"—इति।

(१) पदजात्यनवगतम्,—"त्व" इति यथा, नाम, निपातो वा?
(२) अभिधेयानवगतम्,—"शिताम" इति॥ यथा।
(३) स्वरानवगतम्, —"वनेन वायो" इति यथा।
(४) संस्कारानवगतम्,—"ईर्मान्तासः" इति यथा।
(५) गुणानवगतम्,—"करूलती" इति यथा।
(६) विभागानवगतम्,—"मेहना" इति यथा।
(७) क्रमानवगतम्—"उपरमध्वं मे वचसे" इति यथा।
(८) विक्षेपानवगतम्, —"द्यावा नः पृथिवी" इति यथा।
(९) अध्याहारनवगतम्, —"दानमनसो नो मनुष्यान्" इति यथा।
(१०) व्यवधानानवगतम्, "वायुश्च नियुत्त्वान्" इति यथा।

एकमपि पदं पदद्वितयं क्रियते—"पुरुषादः, पुरुषानदनाय" इति यथा।
पदद्वितयमपि चैकं पदं क्रियते,—"गर्भनिधानीं सनितुः" इति यथा।
आख्यातमपि च नाम क्रियते,—"सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः" इति यथा।
एवमेव शब्दार्थसङ्करोऽनेकप्रकार उपेक्ष्यः, वृद्धानुविधानात् छन्दसि यथासम्भवमनुविधेयः॥ ३॥

---

4. (અનુ.) "...પાંસળીઓ પાસેથી, નિતમ્બ પાસેથી ને (બાહુ) પાસેથી." (क) पार्श्वतः। पार्श्व એટલે પડખું. પાંસળીઓનું અંગ (પડખું) બનેલું હોય છે. પર્શુ શબ્દ √સ્પૃશ્ ધાતુ ઉપરથી બન્યો છે. કેમ કે આ પર્શુ પૃષ્ઠભાગને અડકે છે. પૃષ્ઠ શબ્દ પણ √સ્પૃશ્ ધાતુ ઉપરથી બન્યો છે. કેમ કે બધાં અંગોથી પીઠનો ભાગ સ્પર્શાયેલો છે. અંગ શબ્દ ગત્યર્થક √अकि અથવા √अञ्चु ધાતુ ઉપરથી બન્યો છે. (ख) श्रोणितः। શ્રોણિ એટલે નિતમ્બનો ભાગ. શ્રોણિ શબ્દ √श्रोण् ધાતુ ઉપરથી બન્યો છે. આ ધાતુનો અર્થ 'એકના ચાલવાથી બીજામાં ગતિ આવવી' (गतिनिमित्तं चलनं यस्य) એવો થાય છે. ચાલનારા વ્યક્તિના નિતમ્બનો ભાગ જાણે ચાલે છે એવું લાગે છે, માટે નિતમ્બને શ્રોણિ કહે છે. (ग) शितामतः। શિતામ એટલે બાહુ. दोस् શબ્દ (ગત્યર્થક) √द्रु ધાતુ ઉપરથી બન્યો છે. શાકપૂણિના મતે શિતામનો અર્થ યોનિ થાય છે. કેમ કે તે (મળથી) વ્યાપ્ત હોય છે. તૈટીકિ નામના આચાર્યના મતે श्यामतः શબ્દ ઉપરથી शितामतः શબ્દ બન્યો છે અને એનો અર્થ यकृत्तः (યકૃત પાસેથી) થાય છે. અહીં श्याम

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

શબ્દ (ગત્યર્થક) [√શ્યૈ ધાતુ ઉપરથી બન્યો છે અને યકૃત્ શબ્દ (यथा कथा च कृत्यते >छिद्यते=મૃદુ હોવાને કારણે સહેલાઈથી કપાઈ જનારું હોય છે માટે) √कृती छेदने ધાતુ ઉપરથી બન્યો છે. ગાલવના મતે 'શ્વેત માંસ' અર્થવાળા શિતિમાંસ શબ્દ ઉપરથી શિતામ શબ્દ બન્યો છે. शितिमांसतः એટલે मेदस्तः –એટલે 'ચરબી (માંસ) પાસેથી' એવો અર્થ થાય. અહીં 'શિત' શબ્દ √शो तनूकरणे ધાતુ ઉપરથી બન્યો છે અને માંસ શબ્દનો અર્થ માનનમ્ કે માનસમ્ થાય છે. એટલે કે જે માન્ય (માનનીય) પુરુષો છે તેમને માટે જે (માંસ)ને તૈયાર કરવામાં આવે છે (तेन हि मान्यतेऽतिथ्यादि । इति स्कन्दस्वामी) અથવા જે મનસ્વી પુરુષો હોય છે તેઓ તે (માંસ)ને ગ્રહણ કરે છે; 'માંસ' શબ્દની વ્યુત્પત્તિ 'બધાનાં મન એ (માંસ)માં નાશ પામે છે' એવી થાય છે. મેદ (ચરબી) શબ્દ √ञिमिदा स्नेहने ધાતુ ઉપરથી બન્યો છે.

4. (વિમર્શ) : યાસ્કે નૈગમકાણ્ડના શિતામ શબ્દની સાથે સાથે બીજા બે શબ્દોને પણ સમજાવી દીધા છે, કારણ કે યજુર્વેદની મૈત્રાયણી સંહિતાના ઉપર્યુક્ત મન્ત્રમાં તે ત્રણેય શબ્દો એક સાથે આવેલા છે. (યાસ્કે એ સમગ્ર મન્ત્રને અહીં ઉદ્ધૃત કર્યો નથી). અહીં શિતામ શબ્દ અનવગત સંસ્કારવાળો હોવા ઉપરાંત અનેકાર્થક છે. યાસ્કે તેનો 'બાહુ' એવો અર્થ આપ્યો છે. તે ઉપરાંત યોનિ, યકૃત, શ્વેતમાંસ- એવા અર્થો અનુક્રમે શાકપૂણિ, તૈટીકિ અને ગાલવે આપ્યા છે.

યાસ્કે 'માંસ' શબ્દના માનનમ્ કે માનસમ્ એવા અર્થો આપ્યા છે. તેની દુર્ગે આપેલી સમજૂતી, ઉપર અનુવાદમાં મૂકી છે. પરંતુ આચાર્ય વિશ્વેશ્વરે માનનમ્=મા અનનમ્ અર્થાત્ જીવનને ઓછું કરનાર અને માનસમ્=માનસિક પાપોને ઉત્પન્ન કરનાર અથવા જેમાં મન લાગે છે તે માંસ એવા અર્થો કર્યા છે.

---

5. मेहना ॥४॥ यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः ।

राधस्तन्नो विदद्वस उभयाहस्त्या भर (ऋ. सं. ५/३९/१) ॥

यदिन्द्र चायनीयं मंहनीयं धनमस्ति । यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि । त्वया नस्तद्दातव्यम् । अद्रिवन् । अद्रिः आदृणात्येनेन । अपि वा । अत्तेः स्यात् । ते सोमादः (ऋ.सं. १०/९४/९) इति ह विज्ञायते । राधः इति धननाम । राध्नुवन्त्येनेन । तन्नस्त्वं वित्तधन उभाभ्यां हस्ताभ्याम् आहर । उभौ सम्बद्धौ भवतः ॥

---

(५) "मेहना (४)—इति । एतदवगतम् । "मंहनीयम्" इति अवगमः । "यदिन्द्र चित्र मेहना"—इति निगमः । अत्रेर्भौमस्यार्षम् । अनुष्टुप् । ऐन्द्री । स्वरपृष्ठानां स्वरसाम्नां प्रथमे स्वरसाम्नि "यज्जायथा अपूर्व्य" इति स्तोत्रियः, स्वरपृष्ठानां "यदिन्द्र चित्र मेहना" इति द्वे "या इन्द्र मुज आभर" इति तृतीयानुरूपस्येति विनियोगः । हे "इन्द्र" । 'चित्रम्' "चायनीयम्" पूजार्हम्, "यत्" 'मेहना' "मंहनीयं" पूजार्हम्, तव 'राधः' "धनम्" "अस्ति" किञ्चित्, 'त्वादातं' "त्वया" च "दातव्यम्" एवावश्यं सुचिरंमपि स्थित्वा "नः" अस्मभ्यम् "तत्" यतः, अतो ब्रूमः—हे 'अद्रिवः' वज्रिन् ! "तत्" "नः" राधः हे 'विदद्वसो' आप्तधन ! साम्प्रतमेव "उभाभ्यां हस्ताभ्याम्" अकृपणम् 'आभर' "आहर" मा चिराय इत्यभिप्रायः । अथ "वा" "यन्म इह नास्तीति" एतस्मिन् वाक्यैकदेशे "त्रीणि" "पदानि" "मध्यमानि" मध्ये भवन्तीत्यर्थः । कथं मेहना इत्येषा संहिता,—'मे-इह-न' इति ? एतान्यस्याः संहितायाः पदानि । एवमेष वाक्यावयवः पञ्चपदो भवति । अत्र 'यत्'—इति प्रथमं पदम्, अतः परं 'मे' 'इह' 'न'—इत्येतानि त्रीणि मध्यमानि पदानि, 'अस्ति'—इति पञ्चमं पदम् । एवमभिप्रेत्य "इन्द्र चित्र"—शब्दादपकृष्योक्तं "त्रीणि मध्यमानि पदानि" इति । आह,—यदैवम् पदविभागः, तदा कोऽर्थः ? इति । उच्यते,— यत् मे मम गृहे नास्ति धनम्, तव च तत् अस्ति धनम्, दातव्यञ्च त्वया तावत् स्तोतृभ्यः, तद्धस्ताभ्यामस्मभ्यमाभरेति । बह्वृचानां 'मेहना'—इत्येकं पदम् । छन्दोगानां त्रीण्येतानि पदानि 'म, इह, न'—इति । तदुभयं पश्यता भाष्यकारेणोभयोः शाकल्यगार्ग्ययोरभिप्रायावत्रानुविहितौ, एवञ्जातीयनिर्वचनोपप्रदर्शनार्थमुभयोश्च प्रामाण्यख्यापनार्थम् ॥

आह,—पदकारयोः पदविकल्पे कोऽभिप्रायः ? इति । उच्यते,—'विद्यावान्' विद्यमानधनो वा प्रतिविशिष्टतरं वा प्रार्थयते, —यच्च यस्य गृहे नास्ति, स तद्विशिष्टमविशिष्टं वा प्रार्थयित, न चानयोरुभयोरपि विशेषलिङ्गमस्ति, तस्मान्मंहनीयमित्येतयार्थमत्या मेहनेत्येवमेकं पदमभिप्रेतं शाकल्यस्य । गार्ग्यस्य पुनर्यन्म इह गृहे नास्ति तदाहरेत्यभिप्रायः । एवमत्र विशेषलिङ्गाभावाद्विप्रतिपत्तिः एवमन्येष्वपि शाखान्तरपदविकल्पेषु अनुविधानमर्थाविरोधेन कर्त्तव्यम् । एवमयं मेहनाशब्दो राधःशब्दसामानाकरण्ये वर्त्तमानो यन्मंहनीयं राधः, यद्वा मद्गृहे नास्तीति धनविशेषणत्वात् कमन्यमर्थं ब्रूयात् ? तस्मान्मेहनेति सामर्थ्याद्धविशेषणमेतदित्युपपत्तिः ॥

अधुना निगमप्रसक्तानि निरुच्यन्ते ।—"अद्रिरादृणात्येतेन" अद्रिसारमयमेव ह्यायुधं भवतीति । अद्रिर्वज्र उच्यते । आह,—

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अद्रिः कस्मात् ? उच्यते,—आदृणाति आदारयतीत्यर्थः । अथवा सोमाभिषवग्रावभिस्तद्वान् अद्रिवान् स्यात् । तैरपि हि सोम आदार्य्यति "अपि वा" 'अत्तेः स्यात्" अद्रिः । कुतः ? एतन्निगमात् । कतमोऽसौ निगम इति "ते सोमाद इति ह विज्ञायते" "ते सोमादो हरी इन्द्रस्य निंसते (ऋ० सं० ८, ४, ३०, ४)"—इत्येतस्मिन्मन्त्रे विचार्य्यमाणे ज्ञायतेऽत्तेरद्रिः स्यादिदितिः । व्याख्यात एव शेषः । "राधः" "इति" एतत् "धननाम" स्मारयति । व्यभिचारित्वाद्वा शब्दानां धननामसु पठितमपि संदेतदवधारयति,—इहाप्येतद्धननामैव, नात्र व्यभिचारोऽस्तीति । पठिताभिधाननिरूपणेषु सर्वेष्वेतौ समाधी योज्यौ । "वित्तधन" इति प्राप्तधन ! उभौ समुन्धौ भवतः, संपूर्णावित्यर्थः ॥

---

5. **(અનુ.)** "હે વજ્રધારિન્ ઇન્દ્ર ! વિવિધ પ્રકારનું અને જે પ્રશંસનીય ધન છે તે તમારે આપવું જોઈએ. હે ધનને જાણનાર ! બન્ને હાથો વડે તે ધન અમને આપો." હે ઇન્દ્ર ! જે કાંઈ પણ સુન્દર, અને (મેહના>महनीयं=) પ્રશંસાપાત્ર ધન છે અથવા (मे इह नास्ति > એવા ત્રણ મધ્યમ પદવાળો મેહના શબ્દ હોય તો) 'જે ધન મારી પાસે નથી'-તે તમારે અમને આપવું જોઈએ. અદ્રિવન્ એટલે હે વજ્રધારિન્ ! અદ્રિ (વજ્ર) શબ્દ आ + दृ हिंसायाम् ઉપરથી બન્યો છે. અર્થાત્ જેના વડે કાપવામાં આવે તે અદ્રિ=વજ્ર. અથવા તો √अद् (अत्ति) ઉપરથી 'અદ્રિ' શબ્દ બન્યો હશે. કેમ કે તે सोमादो हरी इन्द्रस्य निंसते । એવું બ્રાહ્મણવચન છે. રાધ એ ધનનું નામ છે. આના (ધન) વડે કાર્યસિદ્ધિ થાય છે. અમને એવું એ (ધન), હે ધનને જાણનાર ! બન્ને હાથ વડે આપ. ઉભય (બન્ને) હાથ જે ભરેલા હોય/ભેગા કરેલા હોય.

5. **(વિમર્શ) :** મેહના શબ્દ અનવગત સંસ્કારવાળા શબ્દનું ઉદાહરણ છે. ઉપર્યુક્ત મન્ત્રમાં મેહના શબ્દને પદપાઠમાં કેવી રીતે વિભક્ત કરવો એ વિશે વિપ્રતિપત્તિ છે. ઋગ્વેદમાં શાકલ્યના મતે મેહનાનો અર્થ મહનીય/મંહનીય થાય છે, માટે તેને એક પદ રૂપે પાદપાઠમાં દર્શાવે છે. પરંતુ સામવેદમાં ગાર્ગ્યના મતે यन्मे इह (गृहे) नास्ति तदाहर એવો મન્ત્રાર્થ છે, માટે તેમણે પદપાઠમાં मे इह ना એવો વિભાગ કર્યો છે. સ્કંદસ્વામી લખે છે કે- मेहना इति आचार्यविप्रतिपत्तेः । मिहोऽनवगतम् । एकमिति शाकल्यः । त्रीणि इति गार्ग्यः । तां च विप्रतिपत्तिम् उदाहरणेनैव दर्शयति ॥ દુર્ગ જણાવે છે કે અહીં મેહના શબ્દ राधः શબ્દની સાથે સામાનાધિકરણ્ય (સમાન લિંગ, વચનાદિ)માં હોવાથી महनीयं राधः એવો અર્થ થશે. અથવા यद् मद्गृहे नास्तीति એવા પાદપાઠ મુજબ પણ (મેહના શબ્દ) ધનનું વિશેષણ બની રહેશે. આમ મેહના એટલે (૧) પ્રશંસનીય ધન અથવા (૨) મારા ઘરમાં નથી તે ધન.

---

6. दमूनाः (४) । दममनाः वा । दानमनाः वा । दान्तमनाः वा । अपि वा । दमः इति गृहनाम । तन्मनाः स्यात् । मनः मनोतेः (४) ॥

जुष्टो दमूना अतिथिर्दुरोणं इमं नो यज्ञमुप याहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि ॥ (ऋ.सं. ५-४-५)

अतिथिः । अभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा । गृहाणीति वा । दुरोण इति गृहनाम । दुरवाः भवन्ति । दुस्तर्पाः । इमं नो यज्ञमुपयाहि विद्वान् । सर्वाः अग्ने अभियुजः विहत्य शत्रूयताम् आहर भोजनानि । विहत्य अन्येषां बलानि शत्रूणां भवतामाहर भोजनानीति वा । धनानीति वा ॥

---

(६) "दमूनाः (५)"—इति । एतदनवगतम् । 'दममनाः" दमूनाः स्यात्, दमे हि नित्यमस्य मनः, अक्रूरमना इत्यर्थः । "दानमना वा" दातव्यं मयेति यस्य मनसि स वा दमूनाः । "दान्तमना वा" दमेषु दान्तेषु यमनियमवत्सु पुरुषेषु यस्य मनः, स वा दमूनाः । अथवा "दम इति" एतद् गृहनाम" एतद् यस्य मनसि ममेदमिति, स दमूनाः "स्यात्" गृहपतिरग्निः ॥ ४ ॥

निगमः,—"जुष्टो दमूनाः"—इति । वसुश्रुतस्यात्रेयस्येयमार्षम् ! त्रिष्टुप् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते स्विष्टकृत्पुरोनुवाक्या चेयं चातुर्मास्येषु साकमेधे । हे भगवन्नग्ने । 'जुष्टः' आसेवितस्त्वमस्माभिः स्तुतिभिः 'दमूनाः' दममनाः, अक्रूरमनाः भूत्वा ततः 'उपयाहि' । अथवा गृहं ममेदमिति चेतोऽवस्थाप्य, तत् उपयाहि । अथवा दानमना भूत्वा, दातव्यमेभ्यो मयेत्येवं चेतोऽवस्थाप्य, तत उपयाहि । अथवा दान्तेष्वेव हि तव मनो वयश्च दान्ताः, 'अतिथिः' च त्वमग्निहोत्रिणां दान्तमनसां प्रातः सायश्च उद्बोध्यमानो भवसि स्वभाव एवैष तवाग्निहोत्रिणामतिथित्वेनोपस्थातव्यमिति, अतो ब्रूमः वयमपि दान्तमनसोऽग्निहोत्रिणश्च, अस्माकमपि य एषः 'दुरोणे' यज्ञगृहे यज्ञस्तन्यतें, तं त्वमुपयाहि तमागच्छ, 'विद्वान्' जानानः स्वमधिकारं भक्तताश्चास्माकम् । किञ्च, 'विश्वाः' सर्वाः 'अभियुजः' अभितः सर्वतो युजः, अभियोक्त्र्यः, शत्रुसेना त्वदागमनप्रतिबन्धेन वर्त्तमानाः, 'विहत्य' नानाप्रकारं हत्वा, तत उपयाहि । किञ्च, एवमागच्छंस्त्वं शृणु यत्कुरुष्व,—'शत्रूयतां' येऽस्माकं शत्रुत्वं

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कामयन्ते कर्त्तुम्, तान् विहत्य, तेषां बलानि, ततो यानि तेषां भोजनानि अन्नानि, धनानि वा, तानि अस्मभ्यम्, 'आभर, आहरेति समस्तार्थः ॥

निगमप्रसक्तोऽतिथिशब्दो दुरोणशब्दश्च । आह,—"अतिथिः" कस्मात् ? उच्यते,—'गृहान्' 'अभि" आभिमुख्येनासौ "अतितो भवति" गत इत्यर्थः । "अतति—-पतति' इति गतिकर्मसु पठितम्, अथवैवमन्यथा स्यात्, "अभ्येति" अभ्यागच्छति "तिथिषु" पौर्णमास्याद्यासु "परकुलानि" यजमानकुलानीत्यतिथिः । "अयमपीतरोऽतिथिरेतस्मादेव" । "दुरोण इति" एतत् "गृहनाम" । आह,—किङ्कारणम् ? उच्यते—ते हि गृहाः "दुरवा भवन्ति, अवतिस्तर्पणार्थः, "दुस्तर्पाः" इत्यर्थः । उक्तञ्च,—'कुटुम्बतन्त्राणि हि दुर्भराणि'—इतिं । एवमेतस्मिन्मन्त्रे, जुष्टः, दमूनाः, अतिथिः, विद्वान्, हे अग्ने ! यज्ञमुपयाहि ! इत्येतस्मिन्नधिकारे वर्त्तमानः 'दमूनाः' शब्दः कमन्यमग्निविशेषणादर्थं ब्रूयात् ? न कञ्चिदपि, परिशेषाद्दमूना इत्येतदग्निविशेषणमेवेति सिद्धम् ॥

---

6. (અનુ.) 'દમૂના' એટલે 'અક્રૂર' મનવાળો અર્થાત્ દયાબુદ્ધિવાળો, અથવા 'મારે આપવું જોઈએ' એવું જેના મનમાં છે તે, અથવા દાન્ત (યમનિયમવાળા) પુરુષોમાં જેનું મન છે તે, અથવા 'દમ' શબ્દ ગૃહનું નામ છે-એની ઉપરથી 'આ મારું ઘર છે' એવું જેના મનમાં છે તે. (અર્થાત્ ગૃહપતિ અગ્નિને દમૂનાઃ કહે છે.) મન શબ્દ √મન્ (વિચારવું) ધાતુ ઉપરથી બન્યો છે. "હે અગ્નિ ! અતિથિ, વિદ્વાન્, દમૂના (અક્રૂર મનવાળા), (ભક્તો વડે) સેવાયેલા (એવા તમે) અમારા આ દુરોણ (યજ્ઞગૃહ)માં (થઈ રહેલા) યજ્ઞમાં આવો. બધી જ શત્રુસેનાઓ (અભિયુજ)ને હણી કાઢીને, અમારી સાથે દુશ્મનાવટ કરી રહેલા (શત્રુ)ઓનાં અન્ન વગેરેને છીનવી લો." આ મન્ત્રમાં 'અતિથિ' શબ્દનો અર્થ 'ઘરોમાં જે જાય છે' એવો થાય છે અથવા તો 'જે (પૂર્ણિમા વગેરે) તિથિઓએ બીજાં કુળોમાં કે ઘરોમાં જાય છે તે' એવો થાય છે. દુરોણ શબ્દ ઘરનો વાચક છે. કેમ કે ઘર (હંમેશા) દુરવા' એટલે દુસ્તર્પ હોય છે. (અર્થાત્ હંમેશાં કોઈ પણ ઘરનું ભરણપોષણ દુષ્કર હોય છે એથી તેને 'દુરોણ' કહે છે.) વિદ્વાન્ એવો તું અમારા આ યજ્ઞમાં આવ. હે અગ્નિ ! શત્રુઓની બધી સેનાઓને મારી નાખીને દુશ્મનાવટ કરી રહેલા શત્રુઓનાં અન્નાદિ હરી લો. અર્થાત્ પારકાઓનાં બળ (સૈન્ય)ને મારી નાખીને શત્રુઓનાં અન્નને અથવા તો ધનને હરી લો.

6. વિમર્શ) : દમૂના શબ્દ અનવગતાર્થ છે. દુર્ગ જણાવે છે કે આ મન્ત્રમાં जुष्टः, दमूनाः, अतिथिः, विद्वान् अग्निः यज्ञमुपयाहि । એવો સંદર્ભ છે ત્યારે અગ્નિના વિશેષણ સિવાયનો બીજો કયો અર્થ 'દમૂના' શબ્દ આપશે ? એકેય નહીં. અર્થાત્ દમૂના दम्+ऊनस शબ્દ અગ્નિનું વિશેષણ જ છે. આ પ્રમાણે, દમૂના શબ્દ અગ્નિનું વિશેષણ નક્કી થયા પછી તેના ચાર અર્થો થઈ શકે છે : ૧. અક્રૂર મનવાળો. १. दमे मनो यस्य स दमूनाः = अक्रूरः । ૨. દાન કરવું જોઈએ એવા મનવાળો. २. अथवा दाने मनो यस्य सः । ૩. દાન્ત પુરુષોમાં મનવાળો ३. दान्तेषु शीलवत्सु पुरुषेषु । दान्तं वा मनो यस्य सः (જેનું મન સંયમિત છે) અને ૪. આ ઘર મારું છે એવો મનવાળો. ४. दमे=(यजमान)गृहे (ममेदं इति) मनो यस्य सः ।

---

7. मूषः (६) । मूषिकाः इत्यर्थः । मूषिकाः पुनः मुष्णातेः । मूषाऽप्येतस्मादेव ॥ सं मा तपन्त्यभितः सपत्नीरिव पर्शवः । मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी (ऋ.सं. १/१०५/८) ॥ संतपन्ति माम् अभितः सपत्न्यः इव इमाः पर्शवः कूपपर्शवः । मूषिका इव अस्नातानि सूत्राणि व्यदन्ति । स्वाङ्गाभिधानं वा स्यात् । शिश्नानि व्यदन्तीति । संतपन्ति मा आध्यः कामाः स्तोतारं ते शतक्रतो । वित्तं मे अस्य रोदसी । जानीतं मेऽस्य द्यावापृथिव्यौ इति । त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिबभौ । तत्र ब्रह्म इतिहासमिश्रम् ऋङ्मिश्रं गाथामिश्रं भवति । त्रितः तीर्णतमो मेधया बभूव । अपि वा । संख्यानामैवाभिप्रेतं स्यात् । एकतो द्वितस्त्रित इति त्रयो बभूवुः ॥६॥

"मूषः (६)—इति । एतदनवगतम् । बहुवचनञ्चैतत् मूट्, मूषौ, मूषः इत्येवम् । आह,—कुत एतत् ? उच्यते,—"व्यदन्ति" इत्येतस्मिन्नाख्याते बहुवचननिर्देशात्, मूषो व्यदन्ति'—इत्येतत् सम्बध्यते । "मूषिकाः—इति" अनेनावगतसंस्कारेण यः "अर्थः" उक्तः स्यात्, स एव मूष इत्युक्तः प्रसिद्धार्थेन अभिधानेन । 'मूषः'—शब्दस्य तत्त्वमाख्यातम्, अधुनाऽऽख्यातप्रसक्तस्य मूषिकाशब्दस्य निर्वचनं करोति,—"मूषिकाः पुनर्मुष्णातेः" । "मुष स्तेये (क्र्या० प०)" इति । अस्य "मूषः अपि" च "एतस्मात् एव" ते हि हरन्ति धान्यादीनि ॥ ५ ॥

"सं मा तपन्ति"—इति निगमः,—"सं मा तप ०—० रोदसी"—इति । आप्त्यस्य त्रितस्य, कुत्सस्य, वेयमार्षम् । पङ्क्तिः । ऐन्द्रचेषा । "संतपन्ति" "माम्" "अभितः" सर्वतोऽवस्थिताः, कूपे पतितस्य एताः, "कूपपर्शवः" कूपेष्टकाः,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

सङ्कटेऽवस्थितम् । कथं पुनः संतपन्ति मामभितः ? 'सपत्नीरिव' यथा समानभर्तृका योषितः (परस्परं वा पीड्यन्ते) एकं भर्तारमभि सन्तपेयुः दुर्वचोभिः, इदमस्याः त्वया कृतम्, इदं मम न कृतमिति, एवं मामेताः कूपपर्शवः सन्तपन्ति, ताभिः कूपेष्टकादिभिः अहं पीड्ये । किञ्च, 'मुषो न' "मुषिकाः इव" 'शिश्नाः' "शिश्नानि" "व्यदन्ति" अदन्ति तानि । अन्नवेष्टितानि, अन्नमिश्राणि, अन्नमिश्रोदकपायितानि "सूत्राणि" "व्यदन्ति" । सूत्रशब्दोऽध्याहृतः उपपत्तिं दृष्ट्वा भाष्यकारेण । विविधमदन्ति भक्षयन्ति । अथ "वा" "स्वाङ्गाभिधानम्" एतत् "स्यात्" । स्वाङ्गाभिधानमिति शेषोऽभिप्रेतः, भवति हि तिरश्चामेषः स्वभावः,—यच्छेपं भक्षयन्ति । अथवा लाङ्गूलमपि सादृश्यात् शिश्नमुच्यते, भवति हि मूषिकाणामेष स्वभावः,—स्नेहभाण्डे स्वलाङ्गूलं मुक्त्वा उद्धृत्य व्यदन्ति आस्वादयति । उपपद्यत उपमार्थ एवायमपीति शिश्नशब्दो विकल्प्यते । एवमेते मदुक्तः "सन्तपन्ति मा आध्यः" । आधयः "कामाः" सोमेन यक्ष्ये, दास्ये, भोक्ष्ये इत्येवमादयः । मां भक्षयंन्ति, पीड़यन्ति, असम्पूर्य्यमाणाः । 'आधिः'—इति मानसं दुःखमुच्यते । "स्तोतारं ते शतक्रतो" हे 'शतक्रतो !' तव नाम स्तोतारं' सन्तम् एते कामाः, एताश्च कूपपर्शवः, मा उभयपार्श्वीकृतं सकद्यान्तरं सन्तापयन्ति । न च नाम त्वमस्मानेतस्या आपदः त्रायसे, समर्थः सन् ? अहो न युक्तम् ? भक्तपरित्यागो हि सतां सर्वेभ्यः पापेभ्यः पापिष्ठ इत्यभिप्रायः । यदा एवमर्थ्यमानो न शुश्राव इन्द्रः, तदा द्यावापृथिव्यौ आह,—यदि नायमिन्द्रः शृणोति मन्दभागधेयत्वादस्माकम् । युवामपि तावत् हे 'रोदसी !' 'वित्तम्' "जानीतम्" "अस्य" वचसः स्तुत्याख्यस्य यत् प्रयोजनम्, यदर्थमहं रोरवीमि, युवामपि चैतस्मात् अतिभयाकारात् कूपात् उद्धरतम् । यदि नायमिन्द्रोऽभ्युद्धरति युवयोरपि स्तोतैवाहमित्यभिप्रायः ॥

आह,—पर्शवः इति एतावति श्रूयमाणे कुत एतत् कूपपर्शव एताः ? इति । उच्यते,—"त्रितः कूपेऽवहितः"—इत्येतस्मिन् सूक्ते विशेषलिङ्गात् तदेव भाष्यकारेण ख्यापितम्, अतएव सूक्तगताद्विशेषलिङ्गात् उपलभ्य "त्रितं कूपेऽवहितमेतत् सूक्तं प्रति बभौ" यत्रेयमृक् । तस्मात् कूपपर्शवः एता इति ॥

सूत्राणि व्यदन्तीति सूत्रशब्दो भाष्यकारेणाध्याहृतः शिश्न इत्यस्य शब्दस्य शेषभूतो मूषकसम्बन्धेन, ते ह्यन्नगन्धेन सूत्राणि व्यदन्तीति । स्वाङ्गाभिधानपक्षे तु अध्याहारो नास्त्येवेति ॥

"तत्र ब्रह्मेतिहासमिश्रम्" । तत्र तस्मिन् सूक्ते ब्रह्म, इतिहासमिश्रम्, इतिहासयुक्तमित्यर्थः । तत् यथा,—"त्रितः कूपेऽवहितो देवान् हवत ऊतये"— इत्येवमादि (ऋ० सं०- १, १०, ५, १७) । "ऋग्मिश्रं" "गाथामिश्रं" च "भवति" । स पुनरितिहासः ऋग्बद्धो गाथाबद्धश्च । ऋक्प्रकार एव कश्चित् गाथेत्युच्यते, गाथाः शंसति, नाराशंसीः शंसतीति ह्युक्तं गाथानां कुर्वतिति । स एष सूक्ताना स्वभावः प्रदर्शितः,—इतिहाससम्बन्धान्यपि सूक्तानि भवन्ति । तेषु प्रकरणादपि सन्दिग्धस्य पदस्यार्थोऽध्यवसेयः, यथेह पर्शुशब्दो भाष्यकारेणाध्यवसित इति ॥

भाष्यप्रसक्तं त्रितशब्दं निर्ब्रवीति,— "त्रितः तीर्णतमो मेधया" एकतद्वितयोः सकाशात् "बभूव" । "अपि वा" सङ्ख्यानिमित्तमेष एतत् "नाम" "अभिप्रेतं स्यात्" । कथम् ? "एकतः, द्वितः, त्रितः इति त्रयः" हि ते भ्रातरः "बभूवुः" तस्मात् सङ्ख्यानिमित्तमप्युपपद्यत एव । उक्तञ्च,—"मार्य्याङ्गरेणाभ्युपादयत् तत एकतोऽजायत, द्वितीयं ततो द्वितः, तृतीयं ततस्त्रित इति ॥ ६ ॥

---

7. (અનુ.) મૂષઃ એટલે મૂષિકા (ઉંદર). મૂષિકા શબ્દ √મુષ સ્તેયે ધાતુ ઉપરથી બન્યો છે અને મૂષ શબ્દ પણ એ જ ધાતુમાંથી બન્યો છે. (કૂવામાં પડેલો ત્રિત કહે છે કે-) "હે શતક્રતુ ઇન્દ્ર ! સપત્નીઓની જેમ આ (કૂવાની) ઈંટો મને ચારે બાજુએથી પીડા આપી રહી છે, જેવી રીતે ઉંદર શિશ્ન અર્થાત્/અથવા પૂંછડીને (અથવા તેલમિશ્રિત સૂત્રો-દોરીઓ-ને) ચાટે છે તેવી રીતે મને આધિઓ ખાઈ રહી છે (માનસિક ત્રાસ આપી રહી છે). "હે દ્યાવાપૃથિવી ! તમારી સ્તુતિ કરનાર એવા મારી આ સ્થિતિને જાણો" મને પર્શુઓ અર્થાત્ કૂવાની ઇંટો સપત્નીઓની જેમ ચારે બાજુએથી સંતાપ આપી રહી છે. (અથવા તો) ઉંદર જેવી રીતે તેલ વગેરે સ્નિગ્ધ પદાર્થોમાં ડૂબાડેલી દોરીઓને ખાય છે (તેવી રીતે કૂવાની ઇંટો મને સંતાપ આપી રહી છે.) અથવા (મન્ત્રમાંનો શિશ્ન શબ્દ) સ્વાંગનો વાચક છે, અર્થાત્ મૂષક પોતાની પૂંછડીને જ ખાય છે અથવા પોતાના શિશ્નને જ ચાટે છે. હે શતક્રતુ ! તારા સ્તુતિ કરનારને (=મને) આધિઓ અર્થાત્ કામનાઓ સંતાપ આપી રહી છે. મન્ત્રમાં वित्तं मे अस्य रोदसीનો અર્થ : 'દ્યાવાપૃથિવી મારી આ અવસ્થાને જાણો.' એવો થાય છે. કૂવામાં પડેલા ત્રિતને આ સૂક્તનું દર્શન થયું હતું. આ સૂક્તમાં વેદ, ઇતિહાસ, સ્તુતિ (ઋક્) અને ગાથા મિશ્રિત થયેલા છે. અહીં 'ત્રિત' શબ્દનો અર્થ 'જે મેધામાં ખૂબ આગળ વધેલો છે' અથવા 'ત્રીજા નંબરનો' એવો સંખ્યાવાચક અર્થ છે. પૂર્વે એકત, દ્વિત અને ત્રિત એવા ત્રણ ભાઈઓ થઈ ગયા (તેમાંથી એક ભાઈ 'ત્રિત'નો આ મન્ત્રમાં ઉલ્લેખ છે).

7. (વિમર્શ) : અહીં મૂષઃ શબ્દ √મુષ્ સ્તેયે ઉપરથી બન્યો છે. મૃદ્, મૂષૌ, મૂષઃ । એવાં તેનાં રૂપો બને છે. અહીં મૂષ એવા

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

અનવગત સંસ્કારવાળા શબ્દને અવગત સંસ્કારવાળા 'મૂષિકા' શબ્દથી સમજાવવામાં આવ્યો છે. આચાર્ય વિશ્વેશ્વર જણાવે છે કે મૂષ શબ્દનો અર્થ પ્રસિદ્ધ હોવા છતાંય તેને અનવગત સંસ્કારવાળા શબ્દસમૂહમાં મૂક્યો છે તે થોડુંક વિચિત્ર છે. તેઓ સૂચવે છે કે આ શબ્દનો જ્યાં પ્રયોગ થયો છે તે મન્ત્ર ત્રિતના ઉપાખ્યાનમાંથી લીધો છે, માટે સંભવ છે કે તે ઉપાખ્યાનનો વિશષ રૂપે વિચાર કરવા માટે આ શબ્દને અહીં મૂક્યો હશે.

ઋગ્વેદમાં (૧–૧૦૫ સૂક્ત) ત્રિતનું ઉપાખ્યાન આ પ્રમાણે મળે છે : એકત, દ્વિત અને ત્રિત એવા ત્રણ ઋષિઓ એક સ્થળેથી બીજે સ્થળે જતી વખતે તરસ્યા થયા. ત્રિતે કૂવામાંથી પાણી કાઢી એકત અને દ્વિતને પહેલાં પાયું. પરંતુ તે બન્નેએ પાણી પી લીધા પછી ત્રિતને કૂવામાં પાડી નાખ્યો અને તેનું ધન વગેરે લઈ જતા રહ્યા. ત્યાર પછી કૂવામાં પડેલો ત્રિત પોતાની દયનીય પરિસ્થિતિનું વર્ણન કરતાં ઇન્દ્ર વગેરે દેવોને પ્રાર્થના કરે છે, જે આ સૂક્તમાં નોંધાયેલ છે. આ સૂક્તમાંથી सं मा तपन्ति... पर्शवः० । એવો મન્ત્ર લેવામાં આવ્યો છે, કારણ કે તેમાં મૂષઃ શબ્દનો પ્રયોગ થયો છે.

तत्र ब्रह्म इतिहासमिश्रम् ऋङ्मिश्रं गाथामिश्रं भवति । (આ સૂક્તમાં વેદ, ઇતિહાસ, સ્તુતિ અને ગાથા મિશ્રિત થયેલાં છે) એ વાક્યમાંના 'ગાથામિશ્ર'નો અર્થ, પ્રા. રાજવાડેએ 'કિંવદન્તીથી યુક્ત' કર્યો છે અને જણાવ્યું છે કે આ પદ બંધબેસતું નથી થતું માટે પ્રક્ષિપ્ત હશે. આ વાક્યને બીજી રીતે સમજાવતાં આચાર્ય વિશ્વેશ્વર જણાવે છે કે ऋक् શબ્દ સામાન્ય રીતે ઋગ્વેદના તમામ મન્ત્રોનો વાચક છે. પરંતુ અહીં ને શબ્દ પરિદેવનાપરક મન્ત્રોનો ગ્રાહક છે. ગાથા શબ્દ गायन्ति स्तुवन्ति आभिः इति गाथाः । એ વ્યુત્પત્તિ અનુસાર ગાન અર્થાત્ સ્તુતિ કરનાર મન્ત્રોને માટે પ્રયોજાયો છે. માટે ૧–૧૦૫ સૂક્તના આ મન્ત્રમાં ઇતિહાસ, પરિદેવન અને સ્તુતિ મળે છે એમ કહેવાય. અહીં त्रित कूपेऽवहितमेतत्सूक्तं प्रतिबभौ । तत्र ब्रह्म इतिहासमिश्रं ऋङ्मिश्रम् गाथामिश्रं भवति ॥ એ વાક્યમાંના ब्रह्मन् શબ્દનો શો અર્થ કરવો ? એની ચર્ચા કરતાં પ્રોફે. મેહેન્દળેસાહેબે કહ્યું છે કે–રૉથના મતે અહીં ब्रह्मन्નો અર્થ invocation (ઈશ્વરને ઉદ્દેશીને કરેલું ઉદ્બોધન) થાય છે. વળી, તેમના મતે આ આખું વાક્ય પ્રક્ષેપ પણ હોઈ શકે છે. પ્રોફે. રાજવાડે પણ આવું માને છે. કેમ કે તેમના મતે અહીં ब्रह्मन्નો અર્થ સૂક્ત-વેદ-એવો થાય છે અને વેદમાં કદાપિ 'ગાથા' (=અવૈદિક શ્લોક) તો મિશ્રિત હોઈ જ ના શકે (નિરુક્તઃ મરાઠી આવૃત્તિ પૃ. ૨૪૮). દુર્ગ કે સ્કન્દસ્વામી-મહેશ્વર જેવા ટીકાકારો પણ આ શબ્દ વિશે કશું કહેતા નથી.

પ્રોફે. પોલ થિમેએ ब्रह्मन्નો અર્થ Wahrheit Sformulierung એવો કર્યો છે, તેને આધારે પ્રોફે. મેહેન્દળે કહે છે કે અહીં ब्रह्मन्નો અર્થ આખ્યાન (=ભૂતકાળની ઘટનાનું વર્ણન) કરવો જોઈએ. ઐતરેય બ્રાહ્મણના શુનઃશેપાખ્યાનમાં એક વાક્ય આવે છે : तदेतत्परऋक्शतगाथं शौनःशेपम् आख्यानम् । (તે આ સો ઋચાઓ અને વધારે ગાથાઓવાળું શુનઃશેપનું આખ્યાન છે.) અહીં, ઉપર્યુક્ત નિરુક્તના વાક્યમાં અને આ બ્રાહ્મણગ્રન્થના વાક્યમાં ઘણું સામ્ય રહેલું છે. ફેર એટલો જ છે કે યાસ્કે ब्रह्मन् શબ્દ વાપર્યો છે, જ્યારે ઐતરેય બ્રાહ્મણગ્રન્થે आख्यान શબ્દ વાપર્યો છે, આમ જો ब्रह्मन्નો અર્થ 'આખ્યાન' કરી શકાય તો, ઉપર્યુક્ત નિરુક્તના વાક્યનો અનુવાદ આમ કરવો જોઈએ: With reference to that (*tatra* i.e. Trita's "Seeing" the *sūkta* when fallen into the well), there is a narrative, (*brahma*) which is mixed with *itihāsa*, ṛc verses, and *gāthās*. જોકે ब्रह्म શબ્દ 'આખ્યાન' અર્થમાં અન્યત્ર ક્યાંય પણ જો વપરાયો હોય તો એના અન્ય સંદર્ભો ગવેષણીય છે.

(આ સૂક્તમાં ત્રિત નામની ઐતિહાસિક વ્યક્તિનો ઉલ્લેખ માનવાથી 'વેદો અનિત્ય છે' એવું સાબિત થશે. માટે સ્કન્દસ્વામીએ 'વેદો નિત્ય છે' એ પક્ષમાં પણ આ મન્ત્રની વ્યાખ્યા કરી બતાવી છે. नित्यपक्षे त्रितो नाम शुक्लशब्दलक्षणः कर्मपाशैस्त्रिः स्वर्गनरकमर्त्येषु बद्धः कश्चित् क्षेत्रज्ञः । कर्मज्ञानसमुच्चयाभावादपवर्गमवाप्नुवन् घटीयन्त्रवत् घटिते संसारे बम्भ्रम्यमाणः परिदेवयांचक्रे । सन्तापयन्ति मां मातुरुदरे मग्नमशुचिप्रस्तरके पुरीषतन्तुजालके यकृल्लोमावष्टदेर्विभक्तोच्छ्वासो बीभत्समानं असृक्पङ्कमध्यशायिन तमसि निरालोके संवर्तमानम् अभितः मातुः पर्शव इव तत्रस्थस्य च मूषो न शिश्ना व्यदन्ति माध्यः सम्यग्दर्शनविषयाः कामा असम्पद्यमानाः । परं समानयोजनम् ॥)

---

8. इषिरः ॥७॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोमं राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥ (ऋ.सं. ८/४७/७) ॥

ईषणेन वा । एषणेन वा । ऋषणेन वा । ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव धनस्य । प्रवर्धय च नः आयूंषि सोम राजन् । अहानीव सूर्यो वासराणि । वासराणि वेसराणि । विवासनानि । गमनानीति वा ॥

---

(८) "इषिरः (७)"—इति । एतदनवगतम् । "ईषणेन वा एषणेन वा ऋषणेन वा" इति । एतैः शब्दसमाधयः । "इषिरेण

Vasant Bhatt Collection, Gujarat

ते मनसा'' इति समानविभक्त्यन्तत्वात् इषिरशब्दस्य प्रतीयत एवमतो विशेषणत्वमित्यभिधेयमनुक्त्वा निगममेव पठति,—''इषिरेण ते मनसा ०—० वासराणि—इति (ऋ० सं० ६, ४, १२, २)। प्रगाथस्येयमार्षम्। त्रिष्टुप्। सौमी। हे भगवन्! 'सोम!' 'इषिरेण मनसा' त्वां प्रति सर्वात्मना गतेनेत्यर्थः। ''ईषति, फणति''—इति गतिकर्मसु पठितम्। ''एषणेनेति वा'' स्यात्, इच्छावता फलप्रार्थनावतेत्यर्थः। ''ऋषणेनेति वा'' दर्शनवता। ईदृशेन मनसा किं कुर्मः? 'ते' तव योऽस्माकं स्वांशः, तं भक्षीमहि तं भक्षयेमहि। कथं पुनः भक्षयेमहि? 'पित्र्यस्येव रायः' यथा पित्र्यो धनांशः अविघ्नेन भक्ष्यते, भक्षितश्च सुखपरिणामो भवति, एवं तव वयं स्वमंशमविघ्नेन भक्षयेमहि, भक्षितश्च सुखपरिणामो मे अस्तु, मातीव भिद्येमहीत्यभिप्रायः। किञ्च, हे 'सोमराजन्!' 'प्र' 'न' 'आयूंषि' 'तारीः' तारय च प्रवर्द्धय च नः आयूंषि। कथं पुनः प्रवर्द्धय? ''अहानि इव सूर्य्यः वासराणि''। यथा सूर्य्यः वासराणि वासन्तिकान्यहानि। ''वासराणि'' इति ''वेसराणि''। शीतोष्णाभ्यां हि द्वाभ्यां तानि सरन्ति, तेषु हि शीतोष्णं भवति, रात्रौ शीतम्, दिवा उष्णम्। अथवा ''विवासनानि'' स्युः, तानि हि तत् शीतं विवासयन्ति नाशयन्तीत्यर्थः। ''गमनानीति वा'' विसृतानि विस्तीर्णानि सन्ति वासराणीति उच्यन्ते। यथा तानि सूर्य्यः वर्द्धयति मन्दगतित्वात्, एवमस्माकं त्वमायुः प्रवर्द्धयेत्याशीः॥

8. *(અનુ.)* ''ગતિશીલ મન વડે, નીચોવેલા તમારું (સોમરસનું) અમે પિતાના ધનની જેમ ભક્ષણ (પાન) કરીએ. હે સોમ રાજન્! સૂર્ય (ગ્રીષ્મઋતુના) દિવસોને જેમ દીર્ઘ બનાવે છે તેમ તમે અમારાં આયુષ્યને દીર્ઘ કરો.'' અહીં મન્ત્રમાં इषिरेण એટલે ईषणेन वा एषणेन वा ऋषणेन वा। અર્થાત્ ગતિશીલ મન વડે, ફળપ્રાપ્તિની ઇચ્છાવાળા મન વડે અથવા તમારું દર્શન કરતા મન વડે નીચોવવામાં આવેલા તમારું (સોમરસનું) અમે પિતાના ધનની જેમ ભક્ષણ કરીએ છીએ. હે સોમ રાજન્! અમારાં આયુષ્યોને વધારો. 'સૂર્ય' જેવી રીતે દિવસોને લંબાવે છે.' અહીં वासराणि શબ્દનો અર્થ (૧) वेसराणि=રાત્રે શીત અને દિવસે ઉષ્ણ-એમ બે રીતે જે સરકે છે તે (દિવસ); અથવા (૨) विवासनानि = શીતનો જે નાશ કરે છે તે, અથવા (૩) गमनानि = જે વિસ્તીર્ણ હોય છે તે વાસર (દિવસ).

8. *(વિમર્શ)* : અહીં इषिर શબ્દ અનવગતસંસ્કારવાળો અને અનેકાર્થક છે. (૧) इषिर શબ્દ इषति (પ્રાપ્ત કરવું-ગતિ કરવી) ઉપરથી બન્યો હશે. અથવા (૨) √इष् (ઇચ્છા કરવી) ધાતુ ઉપરથી બન્યો હશે અથવા (૩) √ऋषि (જોવું) એવા દર્શનાર્થક ધાતુ ઉપરથી બન્યો હશે. પ્રાસંગિક યાસ્કે 'વાસર' શબ્દને પણ ત્રણ રીતે સમજાવ્યો છે.

9. कुरुतन ॥८॥ अनर्थकाः उपजनाः भवन्ति। कर्तन हन्तन यातन इति।

(९) ''कुरुतन (८)''—इति। ''अनर्थका उपजना भवन्ति'' य एवार्थः कुरुतेत्युक्ते भवति, स एव कुरुतनेति, नात्र नकारस्यार्थोऽधिकोऽस्ति। अधुना एवमुक्त्वा अन्यान्यपि दर्शयति,—कर्त्तनहन्तनयातनेति''।

''शुनं सुफाला वितुदन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः। शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्त्तनास्मे''—इति (य० वा० सं० १२, ३९)।

अग्निचयने क्षेत्रकर्षणे विनियुक्ता। त्रिष्टुप्। 'शुनं' सुफालाः' सुखं शोभनाः फाला, 'वितुदन्तु' विकृषन्तु 'भूमिम्'। सुखं 'कीनाशाः' भूमिं कीणनाशाः, खिलोत्कर्त्तारः, कर्षुकाः, 'अभियन्तु' 'वाहैः' अनडुद्भिः। अयं तावदेवं कृषीवलः कृषिं करोतु, युवामपि हे 'शुनासीरौ!' 'हविषा' उदकेन 'तोशमानौ' निघ्नन्तौ भूमिं 'सुपिप्पलाः' सुफलाः, एताः 'ओषधीः' 'कर्त्तन' कुरुत, 'अस्मे' अस्मभ्यमित्यर्थः॥

''यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति॥ द्रुहः पाशान् प्रति संमुचीष्ट तपिष्ठेन हन्मना हन्तना तम्''— इति (ऋ० सं० ५, ४, ३०, २)॥

वसिष्ठस्येयमार्षम्। सान्तपनस्य चरोः याज्यैषा। 'यः' 'नः' अस्माकं हे 'मरुतः!' 'दुर्हृणायुः' पापक्रोधः, 'तिरश्चित्तानि' अन्तर्हितानि चित्तानि कृत्वा सम्मोह्य ततो हन्तुमस्मानिच्छति। हे 'वसवः' सर्वभूतवासयितारः! तस्येदंलक्षणस्य 'द्रुहः' अस्मद्द्रोग्धुः उपरि 'पाशान्' 'प्रति संमुचीष्ट' प्रतिसम्मोचयत। पाशैः एवं बद्ध्वा 'तपिष्ठेन' तापयितृतमेन 'हन्मना' हननेन, वधेन 'हन्तना' हन्तेत्यर्थः॥

''कोऽन्वत्र मरुतो मामहे वः प्रयातन सखींरच्छा सखायः। मन्मानि चित्रा अपि वातयन्त एषां भूत नवेदा म ऋतानाम्॥'' —इति (ऋ० सं० २, ३, २६, ३)। इन्द्रागस्त्यमरुतां सम्वादः। कयाशुभीयं सूक्तम्। तत्रेयमगस्त्यस्यार्षम्। महाव्रते व्यूढस्य च दशरात्रस्य सप्तमेऽहनि सूक्तं शस्यते। हे 'मरुत!' कोऽन्यः युष्मानेवमेतस्मिन् जगति 'मामहे' पुनः पुनः महयति, पूजयति? यथा अहं, तथा न कश्चिदित्यभिप्रायः यत एवमतो ब्रवीमि,—अस्मान् एव 'सखीन्' आभिमुख्येन 'प्रयातन, प्रयाव; हे 'सखायः!'।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

किञ्च, 'मन्मानि' मननानि स्वानि चेतांसि 'चित्राः' चित्राणि, अस्मान् प्रति 'अपि वातयन्तः' निगमयन्तः 'एषाम्' 'ऋतानां' यज्ञानां प्रापयितारः 'भूत' भवत, हे 'नवेदाः' मेधाविनः ! इत्यर्थः ॥

9. *(અનુ.)* कुरुतन શબ્દમાં न કાર અનર્થક ઉપજન (આગમ) તરીકે જોડાયો છે. એ જ પ્રમાણે, कर्तन । हन्तन । यातन । વગેરે શબ્દોમાં પણ અંતિમ न કાર અનર્થક છે. (कुरुतन= कुरुत=કરો.)

9. *(વિમર્શ)* कुरुत શબ્દથી જે અર્થ કહેવાય છે તે જ અર્થ कुरुतनથી કહેવાય છે. અહીં નકારનો પોતાનો કોઈ અધિક અર્થ નથી. कर्तन વગેરે શબ્દો પણ આ જ પ્રકારનાં ઉદાહરણો છે.

10. जठरम् (९) उदरं भवति । जग्धमस्मिन् ध्रियते धीयते वा ॥

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय ।

आ सिञ्चस्व जठरे मध्वं ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् ॥ (ऋ. सं. ३/४७/१)

मरुत्वान् इन्द्रः । मरुद्भिः तद्वान् । वृषभो वर्षिता अपाम् । रणाय रमणीयाय संग्रामाय । पिब सोमम् । अनुष्वधम् अन्वन्नम् । मदाय मदनीयाय जैत्राय । आसिञ्चस्व जठरे मधुनः ऊर्मिम् । मधु सोमम् इत्यौपमिकम् । माद्यतेः । इदमपीतरत् मधु एतस्मादेव । त्वं राजासि पूर्वेष्वपि अहःसु सुतानाम् ॥

द्वितीयः पादः

तितउ (१०) परिपवनं भवति । ततवत् वा । तुन्नवत् वा । तिलमात्रतुन्नम् इति वा ॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।

(१०) "जठरम् (९)"—इति । एतदनवगतम् । "उदरं भवति"—इति अभिधेयवचनम् ॥ 'जग्धम्' भुक्तमन्नम् "अस्मिन्" अवस्थितं "ध्रियते" इति जठरम् । अन्नं "वा" जग्धमस्मिन् "धीयते" जग्धधानं वा स्यात् । एते शब्दसमाधी ॥ ७ ॥

"मरुत्वाँ इन्द्र"—इति निगमः । "मरुत्वाँ इन्द्र वृषभः ०—० सुतानाम्"—इति (ऋ० सं० ३, ३, ११, १) । विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । महाव्रते पृष्ठ्यस्य चतुर्थेऽहनि शस्यते । मरुत्संयुक्तो भूत्वा पिब । हे 'इन्द्र !' यः त्वं 'वृषभः' वर्षिता, 'अपाम्' इत्यध्याहृतं भाष्यकारेण वृषभसम्बन्धात् । यः त्वामेवं कर्मकारी तं त्वां ब्रवीमि,—'रणाय' "रमणीयाय संग्रामाय" रमणीयं संग्रामं करिष्यामीति एतमर्थमुद्दिश्य "पिब" एतं "सोमम्" अस्मत्प्रदत्तम् । 'अनुष्वधं स्वधेति अन्ननाम, सवनीयपुरोडाशाद्यभिप्रायेण । 'अनुष्वधम्' "अन्वन्नम्" । 'मदाय' "मदनीयाय" पानाय, युष्मदर्थमस्माभिः संस्कृतम् । 'जैत्राय'—इत्यध्याहृतं भाष्यकारेण, द्विविधो हि मदः,—सम्मोहकरो जैत्रश्च, तयोः जैत्र इष्टः संग्रामे । कथं च पुनः पिब ?—किमीषत् ? नेत्युच्यते,—'आसिञ्च स्वजठरे' ये 'मध्वः' "मधुनः" । "मधुसोममिति, औपमिकम्"— इत्येतदुक्तं सोमस्य मधुत्वम् । "माद्यतेः" धातोः । तृप्तिर्हि समाना, सोमेन मध्वा चेत्यौपमिकत्वम् । "इदमपीतरत् मधु" माक्षिकम् "एतस्मादेव" माद्यतेः । यत्तु सोमस्योपचारत्वेन, तस्मात् माध्वीकम् । 'ऊर्मिः' सङ्घातः । तावत् तं सोममासिञ्च स्वजठरे, यावता जैत्रो मद उपजायते । कस्मात् पुनरेवं ब्रवीमि ? इतः,—यस्मात् 'त्वं राजासि प्रदिवः सुतानाम्' त्वमेव 'राजा' ईश्वरः "पूर्वेष्वपि अहःसु सुतानाम्" अभिषुतानाम्, न केवलमाधुनिकानाम्, एवं ते समुचितं सोमपानमित्यभिप्रायः ॥ ८ ॥

इति निरुक्तवृत्तौ नवमाध्यायस्य (चतुर्थाध्यायस्य)

प्रथमः पादः ॥ ४, १ ॥

"तितउ (१०)" इति । एतदनवगतम् । "परिपवनं भवति"— इति अभिधेयवचनम् । सक्तवः परिपूयन्ते येन द्रव्येण, तत् परिपवनमुच्यते । ततेन चर्मणा नद्धं 'तितउ' । तुन्नैर्वा छिद्रैः तद्वत् 'तितउ' । तिलमात्राणि वा तुन्नानि तस्मिन्निति 'तितउ' यथासम्भवमेताः शब्दसमाधयः ॥ १ (९) ॥

निगमः,—"सक्तुमिव तितउना"—इति । विद्यासूक्ते बृहस्पतेरार्षम् । "सक्तुः सचतेः" स हि सूक्ष्मत्वात् सचति । संश्लिष्यति अङ्गे । ततः "दुर्धावो भवति"—इति उपपत्तिः । दुःखं धाव्यते प्रक्षाल्यत इत्यर्थः । "कसतेः वा स्यात् विपरीतस्य" स "विकसितः" विपुष्पितः "भवति" । यथा सक्तुं कश्चित् परिपवनेन पुनाति, एवं "मनसा" परिपवनस्थानीयेन परिपूय विनिश्चित्य शब्दार्थं न्याययुक्तां "वाचं" "यत्र" यस्मिन् समाजे यज्ञे वा "धीराः" धीमन्तः, मेधाविनः 'अक्रत' "अकृषत" कुर्वन्तीत्यर्थः । अत्र केचित् अकृषत प्रज्ञानमित्यभिधीयते, प्रज्ञानार्थत्वात् वाचः । तत्र किम् ? इति "तत्र सखायः" समानख्यानाः । समानख्यानानामेव

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

समानेषु शास्त्रेषु कृतश्रमाणाम्, तद्यथा,—वैयाकरणानां वैयाकरणा एव, नैरुक्तानां नैरुक्ता एव "सख्यानि" सखिभावान् "सञ्जानते" विज्ञानानि सञ्जानते, इतरेतरस्य यो विज्ञानप्रकर्षः, तं जानते । किङ्कारणम् ? यस्मात् "भद्रा" भन्दनीया "एषां" "लक्ष्मीः" विज्ञानाख्या "निहिताधिवाचि" वाचः 'अधि' उपरि, 'निहिता' अवस्थापिता । तया लक्ष्म्या इतरेतरस्य विज्ञानश्रमं जानते, इतरो ह्यविद्वान् किं विज्ञानस्यत इत्यभिप्रायः ॥

"भद्रम्" । "भगेन व्याख्यातम्" स्त्रीभगः तथा स्यात्, भजतेः इति । "भजनीयम्" इति । "भूतानाम्" "अभिद्रवणीयम्" अभिगमनीयमित्यर्थः । ""भवद्रमयतीति वा" यस्य हि तद् भवति, स रमते । "भाजनवद्वा" सन्ति हि कल्याणरूपाः पुरुषाः, ये यस्य भाजनम्, तैः तद्वत् ॥

"लक्ष्मीः" । "लाभाद्वा" लक्ष्मीवन्त एव लभन्ते, नेतरे । "आ लक्षणाद्वा" आलक्षित एव हि लक्ष्मीवान् ॥ "लञ्छनाद्वा" तया हि लञ्छित इव भवति । "लषतेः (भू० उ०) वा स्यात्, प्रेप्साकर्मणः" सर्व एव हि तामभिलषन्ति ॥ "लग्यतेः (भू० प०) वा स्यात्, आश्लेषकर्मणः" आश्लिष्य इव हि सा वर्त्तते पुरुषम् ॥ "लज्जतेः (तु० आ०) वा स्यात्, अश्लाघाकर्मणः" ये हि लक्ष्मीवन्तो भवन्ति, ते स्वयमात्मानं न श्लाघन्ते ॥

---

10. (અનુ.) 'જઠર' શબ્દનો અર્થ 'ઉદર' થાય છે. કેમ કે ખાધેલું તે (ઉદર)માં સંગ્રહવામાં, મૂકવામાં આવે છે. "મરુત્વાન્, વૃષભ એવા હે ઇન્દ્ર ! તમે રણભૂમિને માટે છો. તમે ભોજન કર્યા પછી મદ ચઢે એ માટે સોમનું પાન કરો. તમે જઠરમાં મધુની ધારાઓ સીંચો. પૂર્વેના દિવસોએ નીચોવવામાં આવેલા સોમરસના તમે રાજા છો." મરુત્વાન્ એટલે ઇન્દ્ર. મરુતોથી યુક્ત જે હોય તેને મરુત્વાન્ કહે છે. પાણીની વર્ષા કરનારને વૃષભ કહે છે. रणाय એટલે રમણીય સંગ્રામને માટે. (अनुष्वधम् એટલે અનુ-અન્નમ્ અર્થાત્) ભોજન કર્યા પછી સોમ પીઓ. मदाय એટલે આનંદદાયક વિજયને માટે જઠરમાં મધુઓની ધારાઓ સીંચો. મધુની સાથે મધુને સરખાવવામાં આવે છે (કેમ કે એ બન્નેથી આનંદ મળે છે, મદમસ્ત થવાય છે). મધુ શબ્દ √मद् ધાતુ ઉપરથી બન્યો છે. ઇતર (મદિરા) અર્થવાળો 'મધુ' શબ્દ પણ આ જ ધાતુમાંથી બન્યો છે. પૂર્વેના દિવસોએ નીચોવેલા સોમરસના તમે રાજા છો.

तितउ એટલે પવિત્ર કરનારી ચાળણી. તે ચામડાથી બંધાયેલી હોય છે. અથવા છિદ્રવાળી હોય છે અથવા તલ જેટલાં જ છિદ્રવાળી હોય છે. "જેવી રીતે ચાળણી સક્તુ (સાથવો-લોટ)ને પવિત્ર (સાફ) કરે છે તેવી રીતે ધીર પુરુષો મન વડે વાણીને (પવિત્ર) કરે છે.

---

10. अत्रा संखायः सुख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥ (ऋ. सं. १०/७१/२) ॥ सक्तुमिव परिपवनेन पुनन्तः । सक्तुः सचतेः । दुर्धावो भवति । कसतेर्वा स्याद्विपरीतस्य । विकसितो भवति । यत्र धीरा मनसा वाचमकृषत प्रज्ञानम् । धीराः प्रज्ञानवंन्तः ध्यानवन्तः । तत्र सखायः सख्यानि संजानते । भद्रैषा लक्ष्मीर्निहिताधि वाचि । भद्रं भगेन व्याख्यातम् (निरु. ३/१६) । भजनीयम् । भूतानाम् अभिद्रवणीयम् । भवत् रमयतीति वा भाजनवद्वा । लक्ष्मीः लाभाद्वा । लक्षणाद्वा । लप्स्यनाद्वा । लञ्छनाद्वा । लषतेर्वा स्यात् प्रेप्साकर्मणः । लग्यतेर्वा स्यादाश्लेषकर्मणः । लज्जतेर्वा स्यादश्लाघाकर्मणः ॥

---

10. અહીં સખાઓ સખ્યને જાણે છે, (માટે) આવા લોકોની વાણીમાં કલ્યાણકારિણી લક્ષ્મી નિવાસ કરે છે." જેવી રીતે પરિપવન (ચાળણી) સક્તુને પવિત્ર કરે છે. સક્તુ શબ્દ √सच (ચોંટવું) ઉપરથી બન્યો છે. કેમ કે તેનું (અંગ ઉપર ચોંટી ગયેલ સક્તુનું) પ્રક્ષાલન કરવું મુશ્કેલ હોય છે. અથવા તો તે √कस विकसने ધાતુમાં વર્ણ-વિપર્ય્યય (कस>सक) થવાથી બન્યો હશે. (આ વ્યુત્પત્તિ માનીએ તો) સક્તુનો અર્થ 'વિકસિત' થાય (કેમ કે સક્તુ ફેલાયેલ હોય છે). જ્યાં ધીરપુરુષો વાણીને અર્થાત્ પ્રજ્ઞાનને પવિત્ર કરે છે. ધીરપુરુષો પ્રજ્ઞાનવાળા હોય છે, અર્થાત્ ધ્યાનવાન હોય છે. ત્યાં સખાઓ (=સમાન શાસ્ત્રોના અધ્યેતાઓ) સખ્યને (એકબીજાના પ્રજ્ઞાનને) જાણે છે. આવા ધીરપુરુષોની વાણીમાં (જ) કલ્યાણકારિણી લક્ષ્મી નિવાસ કરતી હોય છે. અહીં ભદ્ર શબ્દને √भग ઉપરથી (અગાઉ ૩/૧૬) સમજાવી દીધો છે. ('ભગ' શબ્દનો અર્થ ભજનીય-સેવન કરવા યોગ્ય-કર્યો છે તેવી રીતે) ભદ્ર એટલે પણ ભજનીય. અથવા પ્રાણીઓને માટે અભિદ્રવણીય અર્થાત્ જે પ્રાપ્ત કરવા યોગ્ય હોય તેને પણ ભદ્ર કહે છે, અથવા જે ઉપસ્થિત થતાં રમણીય-આનંદ આપનાર-હોય તેને પણ 'ભદ્ર' કહે છે. અથવા ભાજનવાળું (સુપાત્રવાળું) જે હોય તેને પણ 'ભદ્ર' કહે છે, લક્ષ્મી' શબ્દ ૧. 'લાભ' (√लक्ष् જેવું) ઉપરથી બન્યો હશે. અર્થાત્ જેના હોવાથી બધા જુવે તે લક્ષ્મી. (લક્ષ્મીવાન પુરુષને બધા જોતા હોય છે.) ૩. 'લપ્સ્યન' (ઇચ્છવામાં આવતું) ઉપરથી બન્યો હશે. અર્થાત્ લોકો જેને મેળવવાની

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ઇચ્છા રાખે છે. ૪. 'લાંછન' (ચિહ્ન) ઉપરથી બન્યો હશે. અર્થાત્ પુરુષના વ્યક્તિત્વને વિશેષ રૂપે જે ચિહ્નિત કરે તે લક્ષ્મી. અથવા ૫. ઇચ્છાર્થક √लष् ધાતુ ઉપરથી; (જેને મેળવવાની સૌ અભિલાષા રાખે છે તે લક્ષ્મી) કે ૬. આશ્લેષાર્થક √लग् ધાતુ ઉપરથી; (પુરુષને આલિંગન આપીને જે રહેનારી હોય તે લક્ષ્મી) કે ૭. 'શ્લાઘા ન કરવી' અર્થવાળા √लज् ધાતુ ઉપરથી (જેના હોવાથી માણસ શ્લાઘા ન કરે તે લક્ષ્મી) આ શબ્દ બન્યો હશે.

10. **(વિમર્શ) :** तितउ શબ્દ અનેકાર્થક છે; [સ્કન્દસ્વામીના મતે तितउ कथम् ? तनोते र्निघायां मनुपि उपधाया इकारो वकारस्य संप्रसारणं परलोपश्च ॥ एवं तुदेस्तुत्रवत् । अत्राप्युपधेत्वं संयोगस्य च तत्त्वम् । परं पूर्ववत् ॥] યાસ્કે એના ત્રણ અર્થો આપ્યા છે. વળી, આ શબ્દને સમજાવવા જે મન્ત્રને ઉદ્ધૃત કરવામાં આવ્યો છે તેમાંનો લક્ષ્મી શબ્દ પણ અનેકાર્થક છે. અને યાસ્કે એના સાત અર્થો બતાવ્યા છે. અહીં જે મન્ત્ર ઉદ્ધૃત કરવામાં આવ્યો છે તે ઋગ્વેદના વિદ્યાસૂક્ત (૧૦-૭૧-૨)માંથી લીધો છે. પતંજલિએ મહાભાષ્યના પ્રથમ આહ્નિકમાં વ્યાકરણશાસ્ત્રનાં પ્રયોજનો વર્ણવતાં આ મન્ત્ર ઉદ્ધૃત કર્યો છે. વૈયાકરણો જ શબ્દો અને અપશબ્દો વચ્ચે વિવેક કરીને સાધુ શબ્દોનો પ્રયોગ કરે છે, માટે તેમની વાણીમાં કલ્યાણકારિણી લક્ષ્મી નિવાસ કરે છે એમ ત્યાં વર્ણવ્યું છે.

---

11. शिप्रे ॥११॥ इत्युपरिष्टात् (निरु. ६।१७) व्याख्यास्यामः ॥ मध्या ॥१२॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार ।

यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ (ऋ. सं. १।११५।५) ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत् कर्मणां क्रियमाणानां विततं संह्रियते । यदासौ अयुक्त हरणान् आदित्यरश्मीन् । हरितः अश्वान् इति वा । अथ रात्री वासस्तनुते सिमस्मै । वेसरम् (वासरम् इति सायणः) अहर अवयुवती सर्वस्मात् । अपि वा । उपमार्थे स्यात् । रात्रीव वासस्तनुते इति । तथापि निगमो भवति । पुनः संमव्यद्विततं वयन्ती (ऋ. सं. २/३८/४) । समनात्सीत् ॥

---

(११) "शिप्रे (११)"—इति । "एतत् उपरिष्टात् व्याख्यास्तामः" —"शिप्रे हनू नासिके वा"—इति, अत्र हि एतन्निगमप्रसक्तमायास्यतीति लाघवार्थमुत्कृष्टम् ॥ २ (१०) ॥

"मध्या (१२)"—इति । एतदनवगतम् । "मध्ये"—इत्यवगमः । "तत् सूर्य्यस्य देवत्वं ०—० सिमस्मै" — इति निगमः (ऋ० सं० १, ८, ७, ४) । आङ्गिरसस्य कुत्सस्येयमार्षम् ! त्रिष्टुप् । सौर्य्यस्य पशोः षडर्चे वपाया याज्या, सूत्रितश्च—"चित्रन्देवानामिति पुरोनुवाक्यास्तिस्र उत्तरा याज्याः सौर्य्यस्योपांशु (आ० ३, ८)" इति । 'तत्' अहं 'सूर्य्यस्य' भगवतः 'देवत्वं' देवताभावं, 'तन्महित्वं तच्च महत्त्वं माहाभाग्यं 'मन्ये' जाने । तत् किम् ? इति,—'मध्या' "मध्ये" "यत्" "कर्मणां क्रियमाणानाम्" अनेकेषाम् अवगणय्य सर्वान् कर्मकर्त्तॄन् 'विततं' तेषां "विततम्" एतत् प्रकाशजालम् । एवमतिमहत् । महतापि कालेन तत् दुरुपसंहारमन्यैर्यदेकेन मुहूर्त्तेनायत्नेनैव भगवता सूर्य्येण "संह्रियते" तत् अस्य देवत्वं तच्च महत्त्वमहं मन्ये । किञ्च, "यदासौ भगवान् सूर्य्यः, "अयुक्त" युनक्ति, 'हरितः' "हरणान्" रसहरणान् "आदित्यरश्मीन्" आत्मन्यस्तं गच्छन् 'सधस्थात्' पृथिवीलोकादाकृष्य । पृथिवी हि तेषां रसादानार्थं सहस्थानम् । इति तो हि ते सर्व एव रसानाददते । 'आत' अथेत्यर्थः । अथ तदैव उपसंहृतसर्वरश्मिजाले भगवति सूर्य्ये, 'रात्रिः' 'वासः' "वेसरमहरवयुवती" अवमिश्रयन्ती 'सिमस्मै' सिमस्मात्, सर्वस्मात् लोकात् अहरपकृष्य, स तमः 'तनुते' । तदेवमेतदपि सूर्य्यस्यैव माहाभाग्यं यदस्य सन्निधौ तमो नश्यति, यश्चानेनात्सृष्टो देशः स तमसा छाद्यत इत्यभिप्रायः । "हरितोऽश्वानित्ति चा" ऐतिहासिकपक्षमतेन ॥

"अपि वोपमार्थे स्यात्, रात्रीय वासस्तनुत इति" वास इव रात्री तमः तनुत इत्यर्थः । पूर्वत्र वेसरमहरवयुवती तमस्तनुत इति नास्त्युपमा, इह पुनर्वास इव तमस्तनुत इत्येवमुपमा ॥

यथा च उपमार्थोऽपि युज्यते, "तथा" च "निगमः" "अपि" अयं भवति"—"पुनः समव्यद् विततं वयन्ती मध्या कर्त्तोर्न्यधाच्छक्म धीरः । उत्संहायास्थाद् व्यृ १ तूँरदर्धररमतिः सविता देव आगत् ॥" (ऋ० सं० २, ८, २, ४) । गृत्समदस्येयमार्षम् । सावित्री । त्रिष्टुप् । पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे शस्यते तृतीयसवने । "पुनः समव्यद्विततं वयन्ती" । "समनात्सीत्"—इति निर्वचनम् । समवेष्टयदित्यर्थः । यथा योषित् काचिद् वासो वयन्ती, पुनः संवेष्टयत्यस्तमयकाले, पुनश्च वितनोत्यादित्य उदिते, एवमियं रात्रिः पुनरेव तमः संवेष्टयति, योषिदिव वासो वयन्ती । कदा पुनः संवेष्टयति ? यदा 'मध्या' मध्ये 'कर्त्तोः' कर्मणां

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

क्रियमाणानां लौकिकवैदिकानां 'विततम्'. एतद्रश्मिजालम्, 'शक्म' स्वात्मप्रसवादपत्यभूतं 'न्यधात्' न्यदधात्, नीचैर्धत्ते लोकानां प्रकाशनाय । अथवा शक्मेति कर्मनाम स्यात्, यदा स्वं प्रकाशं पुनः कर्म निधत्ते, निदधाति, उदेति 'धीरः' धीमानादित्यः, तदा अहनि अभ्युपस्थिते पुनः संवेष्टयति रात्रिस्तम इति । अस्तमयं प्रति पुनर्वास इव तनोतीति । एवमेतस्मिन्नपि मन्त्रे सामर्थ्यादसत्युपमाशब्दे वाससा तम उपमीयते । यथेह तथा पूर्वस्मिन्नपि, निगमेऽपीत्येवमेके मन्यन्ते । अपरे पुनः अपि वोपमार्थे स्यादित्यत्रैवं वर्णयन्ति,—रात्रीव वासस्तनुत इत्यत्र वासःशब्दोऽहःशब्दपर्य्यायवाची, तस्योक्ता व्युत्पत्तिः वेसरमहरिति । सा रात्रिः वासस्तनुते, अहस्तनुत इत्यर्थः । रात्रिप्रान्ते हि शुक्लमहर्लक्ष्यते, तेन ज्ञायते रात्र्यैवेदं ततमिति । एवमुपमार्थत्वमेके मन्यन्ते,—यदा वायमर्थः, तदा "पुनः समव्यद्विततं वयन्ती (ऋ० सं० २, ८, २, ४)" —इत्यत्र पुनः समवेष्टयदहो रात्रिः, विततमिव वासो वयन्ती । कदा ? यदा मध्ये कर्मणां 'न्यधात्' निदधाति । अस्तं गच्छन् आदित्यः स्वमण्डले 'शक्म' रश्मिजालं यदा च 'उदस्थात्' उत्तिष्ठति, स्वरश्मीनुपसंहृत्य 'व्यधात्' विदधाति 'ऋतून्' अहोरात्रलक्षणान् । यदा एवम् 'एषः' 'सविता देवः' 'अलमतिः' पर्य्याप्तमतिः' 'आगात्' आगच्छति । तदा 'रात्रिः तनुते' 'वासः' अहर्लक्षणम्, 'पुनः' 'संवेष्टयतीत्येवं मन्यन्ते । यदत्रार्थाविरोधि तत् प्रतिपत्तव्यम् ॥ ३ (११) ॥

---

11. (અનુ.) શિપ્રે શબ્દનું વ્યાખ્યાન આગળ ઉપર (૬-૧૭) કરીશું. (હવે મધ્યા શબ્દનું વ્યાખ્યાન કરવામાં આવે છે :) "(અનેક) કાર્યોની મધ્યમાં જ સૂર્ય પોતાનાં ચારે તરફ ફેલાયેલાં કિરણોને સમેટી લે છે એ સૂર્યનું દેવત્વ છે, મહત્ત્વ (મહિમા) છે. જ્યારે તેણે (સૂર્યે) (પોતાના) ઘોડાઓને પૃથિવીસ્થાનમાંથી (પાછા ફેરવી લઈને) અન્યત્ર જોડી દીધા ત્યારે રાત્રિએ પોતાનાં વસ્ત્રોને – બધાને માટે ફેલાવ્યાં (અર્થાત્ રાત્રિએ અંધકારને ફેલાવ્યો)" (અહીં મધ્યા શબ્દનો અર્થ મધ્યે થાય છે.) કરવામાં આવતાં (=જગત્માં થઈ રહેલાં) કાર્યોની મધ્યે જ સૂર્યે પોતાનાં ચારે બાજુએ ફેલાયેલાં કિરણોનો સંહાર કર્યો એ તેનું દેવત્વ છે, મહિમા છે. આ સૂર્યે પોતાનાં હરણોને અર્થાત્ પૃથિવીમાંથી રસનું આહરણ-શોષણ કરનારાં કિરણોને (અન્યત્ર) જોડી દીધાં. અહીં હરિતઃનો અર્થ અશ્વો પણ થઈ શકે. (અર્થાત્ સૂર્યે પોતાનાં અશ્વોને અન્યત્ર જોડી દીધા.) ત્યાર પછી રાત્રિ બધા (પ્રાણીઓ)ને માટે (પોતાનાં) વસ્ત્રોને (=અંધકારને) ફેલાવે છે. એટલે કે રાત્રિ ચમકતા દિવસને બધા પદાર્થોથી અલગ પાડી દે છે. અથવા (અહીં મન્ત્રમાં સઘસ્થાદ્ આદ્ रात्रा એવો પદચ્છેદ લેતાં) આકાર ઉપમાર્થે હશે એમ માનીએ તો 'રાત્રિની જેમ (સૂર્યે જ) વસ્ત્રોને (=અંધકારને) ફેલાવ્યાં.' એવો અર્થ થાય. આના સમર્થનમાં એક મન્ત્ર પણ છે : "જેવી રીતે સીવનારી કોઈ સ્ત્રી (वीयन्ती) ફેલાયેલા વસ્ત્રને સમેટી લે છે એવી રીતે સૂર્ય પણ પ્રાતઃકાલે અંધકાર સમેટી લે છે." અહીં સમવ્યત્નો અર્થ સમનાત્સીત્ (સમેટી લે છે) થાય છે.

11. (વિમર્શ) : મધ્યા શબ્દ અનવગતાર્થ છે તેને મધ્યે શબ્દથી અવગતાર્થ કરવામાં આવે છે. પ્રસ્તુત મન્ત્રમાંના रात्री वासस्तनुते सिमस्मै । પાદને वेसरम् अहः अवयुवती सर्वस्मात्—એવી રીતે સમજાવવામાં આવે છે. આ સ્થળે સ્કન્દસ્વામી લખે છે કે अथ रात्री वासस्तनुते सिमस्मै वासरमहरवयुवती सर्वस्मात् इति पाठः, ને वेसरमहरवयुवती सर्वस्मात् इति । પરંતુ આ નોંધ ચિન્ત્ય છે. કેમ કે આપણે इषिरेण ॥७॥ શબ્દની સમજૂતીમાં જોયું છે કે યાસ્કે वासराणि શબ્દને वेसराणि એવી રીતે સમજાવ્યો છે. એટલે वेसरम् अहः अवयुवती सर्वस्मात् એવો પાઠ મૂળમાં હોવો શક્ય છે. બીજું, ઉપર આકારને ઉપમાર્થક લીધા પછી "રાત્રિની જેમ (સૂર્યે જ) વસ્ત્રોને (=અંધકારને) ફેલાવ્યાં" એવો અર્થ કર્યો છે, તેને આ પ્રમાણે સમજાવી શકાય : સંધ્યાકાળમાં સૂર્ય પોતાનાં કિરણો સમેટી લે પછી આપોઆપ અન્ધકાર ફેલાય, એને 'સૂર્યે અંધકાર ફેલાવ્યો' એમ કહી શકાય. કેમ કે અંધકારને ફેલાવવામાં સૂર્ય નિમિત્તકારણ બન્યો છે. હવે જે સૂર્યે સંધ્યાકાળમાં અંધકાર ફેલાવ્યો હોય તે બીજે દિવસે સવારે સૂર્ય વડે જ સમેટી લેવામાં આવે છે. માટે કોઈ સીવનારી સ્ત્રી ફેલાવેલા વસ્ત્રને સમેટી લે છે તેમ સૂર્ય પણ (પ્રાતઃકાલે) અંધકારને સમેટી લે છે એમ કહેવાય.

---

12. मन्दू ॥१३॥

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।

मन्दू समानवर्चसा ॥ (ऋ. सं. १/६/७ ॥

इन्द्रेण हि संदृश्यसे संगच्छमानः अबिभ्युषा गणेन । मन्दू मदिष्णू युवां स्थः । अपि वा । मन्दुना तेन इति स्यात् । समानवर्चसा इत्येतेन व्याख्यातम् ॥

---

(१२) "मन्दू (१३)"—इति । एतदनवगतम् । "मदिष्णू, मन्दुनेति वा" शब्दसमाधी । "इन्द्रेण स हि"—इति निगमः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

मधुच्छन्दस इदमार्षम् । महाव्रते महदुक्थे तृचाशीतिषु शस्यते, सात्रिकेषु चाहःसु स्तोमातिवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे इन्द्र उच्यते । हे भगवन् ! इन्द्र ! त्वं 'इन्द्रेण' ईश्वरेण, दीप्तेन वा मरुद्गणेन, नित्यमेव "सञ्जच्छमानः" 'संदृक्षसे' "सन्दृश्यसे" । 'अबिभ्युषा' अभयवता, "गणेन"—इत्यध्याहारः । तौ च "युवां" मरुद्गणः त्वं च, एकत्र सङ्गतौ । "मदिष्णू" हर्षशीलौ, नित्यप्रमुदितावित्यर्थः । 'समानवर्चसौ' च समानदीप्ती इत्यर्थः । एवं "मन्दू समानवर्चसा"—इत्येतेन द्विवचनेन मरुद्गणेन्द्रविषयेण निगमो व्याख्यातः । "अपि वा" एवमन्यथा "स्यात्" । मन्दु इत्यस्य तृतीयैकवचनान्तत्वेन विपरिणामः, एवञ्च सति मरुद्गणविशेषणमेतद्भवति । कथम् ? "मन्दुना" मरुद्गणेन, इन्द्र ! सन्दृश्यसे सञ्जच्छमानः । "समानवर्चसा इति" एतत् पदं मन्दुनेति "एतेन" पदेन "व्याख्यातम्" यथैव हि मन्दू इत्येतत् द्विवचनमेकवचनं वा, एवमेतदपि,—समानवर्चसाविन्द्रमरुद्गणाविति द्विवचनमथवा मन्दुना समानवर्चसा च मरुद्गेण इत्येवं तृतीयैकवचनम् । अपि वा एवं मरुद्गण उच्यते,—त्वमिहेन्द्रेण सञ्जच्छमानो नित्यमेव सन्दृश्यस इति । समानमन्यत् ॥ ४ (१२) ॥

12. (અનુ.) ("હે મરુદ્ગણ !) નિર્ભય (अबिभ्युषा), આનંદદાયક (मन्दुना) અને સમાન શક્તિવાળા (समानवर्चसा) ઇન્દ્રની સાથે જતા તમે સારા દેખાવ છો." ઇન્દ્રની સાથે નિર્ભય એવા તમે સમૂહમાં જતા શોભો છો. આ મન્ત્રમાંના मन्दू શબ્દનો અર્થ ૧. मदिष्णू युवां स्थः । અર્થાત્ તમે (મરુતો અને ઇન્દ્ર) બન્ને આનન્દદાયક છો. અથવા ૨. मन्दुना तेन(इन्द्रेण) । અર્થાત્ આનન્દદાયક તે ઇન્દ્રની સાથે એવો થાય છે. આ જ પ્રમાણે समानवर्चसा શબ્દનું પણ વ્યાખ્યાન થઈ ગયું જાણવું. (એટલે કે वर्चसा શબ્દને समानवर्चसौ) એવા દ્વિવચનાન્ત સ્વરૂપમાં લેશો ત્યારે 'તમે (મરુતો અને ઇન્દ્ર) બન્ને શક્તિશાળી' એવો અર્થ થશે અને समानवर्चसा એવો તૃતીયાન્ત શબ્દ લેશો ત્યારે તે ઇન્દ્રનું વિશેષણ બનશે અર્થાત્ 'શક્તિશાળી ઇન્દ્રની સાથે' એવો અર્થ થશે.

12. (વિમર્શ) मन्दू શબ્દ √मदी हर्षे ધાતુને ઉણાદિ પ્રત્યય उ લાગીને બન્યો છે. તેનો અર્થ 'આનન્દદાયક' થાય છે. આમ આ શબ્દનો સંસ્કાર અને અર્થ બન્ને સ્પષ્ટ છે, છતાંય તેને નૈગમકાણ્ડમાં મૂકવામાં આવ્યો છે. આચાર્ય વિશ્વેશ્વર એનું કારણ જણાવતાં લખે છે કે मन्दू શબ્દ પ્રથમા દ્વિવચન છે કે તૃતીયા એકવચન એવો સંદેહ થાય છે. જો તેને मन्दू=मन्दुना એમ તૃતીયા એકવચન ગણીશું તો समानवर्चसाનું તે વિશેષણ બની શકશે. આ દૃષ્ટિએ તેનો અહીં ઉલ્લેખ થયો હશે. અહીં मन्दू=मन्दुना । ની સિદ્ધિ આ પ્રમાણે થાય છે : मन्दु+टा (તૃતીયા એકવચનનો પ્રત્યય). આ સ્થિતિમાં सुपां सुलुक्० । ७–१–३९ સૂત્રથી टाનો લોપ થઈને પૂર્વસવર્ણ દીર્ઘ થતાં मन्दू શબ્દ તૃતીયા એકવચનમાં બને છે.

13. ईर्मान्तासः ॥१४॥

ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।

हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥

(ऋ. सं. १/१६३/१०) । ईर्मान्ताः समीरिन्तान्ताः । पृथ्वन्ताः वा । सिलिकमध्यमाः संसृतमध्यमाः । शीर्षमध्यमाः वा । अपि वा । शिरः आदित्यो भवति । यद् अनुशेते सर्वाणि भूतानि । मध्ये चैषां तिष्ठति । इदमपीतरत् शिरः एतस्मादेव । समाश्रितानि एतद् इन्द्रियाणि भवन्ति । सं शूरणासो दिव्यासो अत्याः । शूरः शवतेर्गतिकर्मणः । दिव्याः दिविजाः । अत्याः अतनाः । हंसा एवं श्रेणिशो यतन्ते । हंसाः हन्तेः । घ्नन्ति अध्वानम् । श्रेणिशः इति । श्रेणिः श्रयतेः । समाश्रिताः भवन्ति । यदा अक्षिषुः । यदा आपन् । दिव्यम् अज्मम् अजनिम् आजिम् । अश्वाः । अस्त्यादित्यस्तुतिरश्वस्य । आदित्यादश्वो निस्तष्ट इति । सूरादश्वं वसवो निरतष्ट (ऋ. सं. १/१६३/२) इत्यपि निगमो भवति ॥

13. "ईर्मान्तासः (१४)"—इति । एतदनवगतम् । "समीरितान्ताः"—"पृथ्वन्ता वा" इति यथासम्भवं शब्दसमाधी । "ईर्मान्तासः"—इति निगमः । दीर्घतमस आर्षम् । "यमेन दत्तम्"—इति इयञ्च, द्वे अप्येते अश्वस्तोमीये सूक्ते, तेन चाश्वःस्तूयतेऽश्वमेधे, आदित्यस्य रथे येऽश्वा युक्तास्त उच्यन्ते ईर्मान्तासः तेषां सप्तानां येऽश्वाश्चत्वारः, ते "समीरितान्ताः" विक्षिप्तान्ताः, प्रसृतान्ताः, प्रविरला इत्यर्थः । "पृथ्वन्ता वा" तेषामेवाश्वानां पृथवोऽन्ताः, पृथूरस्काः, पृथुजघना वा इत्यर्थः । "सिलिकमध्यमाः, संसृतमध्यमाः" संश्लिष्टमध्यमा इत्यर्थः । तेषां हि सप्तानां ये मध्यमास्त्रयः इतरेतरमुत्पीडय संश्लेषेणावस्थिताः । अथवा पृथुजघनोरस्कानां सतां मध्यमाः शरीरप्रदेशाः, सप्तानामपि संश्लिष्टाः संलग्नास्तनवः, निरुदरास्तेश्वा इत्यर्थः । तथापि हि स्तुतिरुपपद्यत एव । "शीर्षमध्यमा वा" सिलिकमध्यमा वा । एवमपि हि शब्दे सारूप्यमस्ति, यो हि तेषां सप्तानां मध्यमः, सं

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

शिरोभूतः प्रधान इत्यर्थः। "अपि वा" एवमन्यथा स्यात्। "शिर आदित्यः" एव "भवति" सर्वभूत प्राधान्यात्॥ "मूर्द्धा, राजेति वा अहमेतमुपासे इति ह विज्ञायते"। यस्माच्चासावनुप्रविश्य प्राणभावेन सर्वभूतानि "शेते" आस्ते, तस्मात् सर्वभूताश्रयणात् शिर आदित्यः। स चैतेषामश्वानां "मध्ये तिष्ठति" शीर्षमध्यमास्त एते शीर्षमध्यमा इत्युक्ताः सन्तः सिलिकमध्यमा इत्युच्यन्ते। "इदमपीतरच्छिर एतस्मादेव"—इति प्रासङ्गिकम्। "समाश्रितानि" हि "एतत्" उत्तमाङ्गम् "इन्द्रियाणि" चक्षुरादीनि "भवन्ति" इति शिर उपपत्तिः। 'संशूरणासः' सङ्गताः शूरेण भगवतादित्येन संशूरणाः। "शूरः शवतेर्गतिकर्मणः" स हि परानभिमुखो गच्छत्येव, न पर्य्यावर्त्तते। 'दिव्यासः' ते हि "दिव्याः" दिविजाताः, 'अत्याः' "अतनाः" ते हि अतन्त्येव, मुहूर्त्तमपि नावतिष्ठन्ते। य एवंलक्षणा अश्वास्ते किं कुर्वन्ति? इति। उच्यते,— इंव श्रेणिशो यतन्ते' हंसा इव श्रेणीकृताः पङ्क्तीकृताः यतन्ते गच्छन्ति। "हंसा हन्तेः" ते हि "घ्नन्त्यध्वानम्"। कदा पुनरेवं यतन्ते? "यदाक्षिषुः" 'यत्' "यदा" यस्मिन् काले 'आक्षिषुः' 'आपन्' आप्नुवन्ति। किम्? 'दिव्यम्' 'अज्मम्' "अजनि"। अज्यतेऽस्यां गम्यत इति अजनिः, वाहिका, स्वर्गपथ इत्यर्थः। यदा ते आप्नुवन्ति—उदयादारभ्य यावदस्तमिति, तदैवं यतन्ते। के पुनस्ते? इत्युच्यते—'अश्वाः'। एवमेतानि ईर्मान्तास इत्येवमादीनि अश्वविशेषणानि, अश्वशब्देन समानविभक्त्यन्तत्वात्। आत्मैवैषां रथो भवत्यात्माश्वा इत्येवं प्रक्रमेण सूर्य्यदैवत एष मन्त्र उक्तः। स पुनरयमश्वस्तुतौ विनियुक्तस्तदसमञ्जसमिति मन्यमानो भाष्यकारः प्रतिसमाधित्सुराह,—"अस्त्यादित्यस्तुतिरश्वस्य" इति, अश्वोऽपि ह्यादित्यात्मना स्तूयत इत्यर्थः। आह,—कयोपपत्त्या? इति। उच्यते, "आदित्यादश्वो निस्तष्ट इति"—अनयोपपत्त्या सूर्य्यात्मना अश्वः स्तूयते। आह,—कुत एतत्सूरादश्वो निस्तष्ट? इति। उच्यते,—"सूरादश्वं वसवो निरतष्ट—इत्यपि निगमो भवति"। "यमेन दत्तं त्रि त एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्। गन्धर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निरतष्ट॥"—इति (ऋ० सं० २, ३, ११, २)। 'यमेन' 'एनम्' अस्माकं 'दत्तम्' अश्वम् 'त्रितः' त्रिस्थानो वायुः 'आयुनक्' युनक्ति। यत्रायं योक्तव्यः, तत्र वायुना युक्तस्येन्द्रणाधिष्ठितस्य 'अस्य' 'गन्धर्वः' गन्धर्वराजः 'रशनामगृभ्णात्' नियमेन रज्जुं गृह्णाति। कुतः पुनरयमश्वः? इत्युच्यते, — 'सरात्' सूर्य्यदितमेवंलक्षणम् 'अश्वं' 'वंसवः' 'निरतष्ट' निस्तष्टवन्तः। एवमेतस्मिन् मन्त्रे सूर्य्यप्रभवोऽश्व इति स्तूयते। "कारणाच्च कार्य्यमनन्यत्"—इत्युपपद्यते सौर्य्येण मन्त्रेणाश्वस्य स्तुतिरिति॥ ५ (१३)॥

13. (અનુ.) "લાંબા અથવા વિશાળ અન્તભાગ (નિતમ્બ)વાળા તથા પાતળી કમરવાળા, શૂરવીર (આદિત્ય)ની સાથે રહેલા, હંમેશા દોડનારા એવા દિવ્ય (અશ્વો) દિવ્ય માર્ગ (અન્તરિક્ષ)માં જ્યારે દોડે છે ત્યારે પંક્તિબદ્ધ હંસો જેવા લાગે છે." ईर्मन्ताः એટલે લાંબા અન્તભાગવાળા (समीरितान्ताः), અથવા પૃથુ વિશાળ (पृथ्वन्ताः) અંતભાગવાળા અને सिलिकमध्यमाः એટલે 'જેમનો મધ્યભાગ (કમર) સંકોચાયેલ છે' અથવા 'જે અશ્વોની મધ્યમાં પ્રધાન અશ્વ રહેલો છે.' અથવા તો અહીં शीर्षमध्यमाःમાં શિર શબ્દનો (પ્રધાન-મુખ્ય એવો અર્થ નથી, પણ) આદિત્ય એવો અર્થ થાય છે. (આ મુજબ शीर्षमध्यमाः એટલે 'જે અશ્વોની મધ્યમાં આદિત્ય રહેલ છે.') કારણ કે બધાં પ્રાણીઓમાં (પ્રાણભાવે) તે (શિરરૂપ આદિત્ય) નિવાસ કરે છે અને એમની (પ્રાણીઓની મધ્યમાં) તે (શિરરૂપ આદિત્ય) ઊભા રહે છે. માનવાદિનું મસ્તક પણ 'શિર' જ કહેવાય છે. કેમ કે બધી જ જ્ઞાનેન્દ્રિયો તે (શિર)ને આશ્રયે રહેલી છે. મન્ત્રના सं शूरणासो दिव्यासो अत्याः। (=શૂર-આદિત્ય-ની સાથે રહેલા, હંમેશાં દોડનારા એવા દિવ્ય અશ્વો)- આ બીજા ચરણમાં शूर શબ્દ ગત્યર્થક √शु (शवति) ઉપરથી બન્યો છે. दिव्याः (दिव्यासः) એટલે दिविज અર્થાત્ સ્વર્ગમાં જન્મેલા અને अत्याः એટલે अतनाः અર્થાત્ હંમેશાં દોડનારા.

'જાણે પંક્તિબદ્ધ હંસો જતા હોય એવું લાગે છે.' અહીં 'हंस' શબ્દ √हन् (વધ કરવો) ધાતુ ઉપરથી બન્યો છે. આથી જે માર્ગને કાપે તે હંસ કહેવાય છે. શ્રેણિ (પંક્તિ) શબ્દ √श्रिञ् सेवायाम् ઉપરથી બન્યો છે. આ મુજબ (હંસો) એને (શ્રેણિને) આશ્રયે રહેલા હોય છે.

यदाक्षिषुः એટલે यदा आपन् = (અશ્વો) જ્યારે પ્રાપ્ત કરે છે; (કોને ?-) દિવ્ય માર્ગ (અન્તરિક્ષ)ને. અહીં अज्म (માર્ગ) એટલે अजनिम् (अज्यतेऽस्यां गम्यते इति अजनिः वाहिका, स्वर्गपथः). ઉપર્યુક્ત મંત્રમાં આદિત્યની સ્તુતિ છે, કારણ કે "આદિત્યમાંથી અશ્વોનું સર્જન કર્યું" એવો વેદમાં ઉલ્લેખ છે. જેમ કે, "વસુઓએ આદિત્યમાંથી અશ્વને બનાવ્યો.

13. (વિમર્શ) યાસ્કે ईर्मान्तासः એવા અનવગત સંસ્કારવાળા શબ્દને બે રીતે સમજાવ્યો છે : (૧) समीरितान्ताः એટલે જેનો અંતિમ ભાગ (નિતંબ) લાંબો છે તેવા અશ્વો. અથવા (૨) पृथ्वन्ताः જેનો અંતિમભાગ પૃથુ છે તેવા અશ્વો. ટીકાકાર સ્કન્દસ્વામી કહે છે કે વેદમન્ત્રોની અંદર ईर्मान्तासः શબ્દ अश्व શબ્દની સાથે જ સામાનાધિકરણ્યમાં વપરાયેલો જોવા મળતો હોઈને યાસ્કે તે ईर्मान्तासः શબ્દને અશ્વના વિશેષણ તરીકે જ સમજાવ્યો છે અને સીધો વેદમન્ત્ર જ ઉદ્ધૃત કરીને તેની ચર્ચા હાથ ધરી છે. અહીં ईरणमीरः > બાહુલકથી મ થઈને ईर्मम् શબ્દ બન્યો છે. ईर्म + अन्त > વેદમાં તેનું પ્રથમા બહુવચન ईर्मान्तासः।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

થયું. આ જ પ્રમાણે, सिलिकमध्यमासः શબ્દ પણ અનવગત સંસ્કારવાળો છે અને તેને બે રીતે સમજાવ્યો છે : (૧) संसृतमध्यमाः જેનો મધ્યભાગ (કમર) સંકોચાયેલો છે અર્થાત્ જેની કમર પાતળી છે. દુર્ગાચાર્ય આને બીજી રીતે સમજાવે છે. સૂર્યના સાત અશ્વોમાંથી જે ત્રણ અશ્વો મધ્યમાં રહેલા હોય તે એકબીજાને દબાવીને પાસે પાસે રહેલા હોય છે તેને સિલિકમધ્યમા કહે છે. અથવા જઘન વગેરે પૃથુ હોવા છતાંય વચ્ચેના (મધ્યમ) શરીરપ્રદેશો જે સાતેય અશ્વોના સંશ્લિષ્ટ હોય છે તેને સિલિકમધ્યમા કહે છે. એટલે કે જે અશ્વો નિરુદરા છે તે. (૨) शीर्षमध्यमाः એટલે (क) (સૂર્યના) સાત અશ્વોમાંથી જે મધ્યમ અશ્વ શિરસ્થાનીય અર્થાત્ પ્રધાન છે. (ख) જે સાત અશ્વોની મધ્યમાં સૂર્ય રહેલ છે.

ઉપરના મન્ત્રમાં ईर्मान्तासः, सिलिकमध्यमाः વગેરે સૂર્યના અશ્વોનાં વિશેષણો છે. અર્થાત્ આ મન્ત્રમાં અશ્વોનું વર્ણન છે. છતાંય યાસ્કે લખ્યું છે કે આ મન્ત્રથી 'આદિત્યની સ્તુતિ કરવામાં આવી છે;, આનું કારણ જણાવતાં તેમણે જ સ્પષ્ટ કર્યું છે કે આ અશ્વો સૂર્યમાંથી જ જન્મ્યા છે માટે અશ્વોની સ્તુતિ એ આખરે સૂર્યની સ્તુતિ જ ગણાશે. વળી, આ મન્ત્રની દેવતા પણ સૂર્ય ગણાયો છે.

14. कायमानाः ॥१५॥

कायमानो वना त्वं यन्मातॄरजगन्नपः ।

न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः ॥

(ऋ. सं. ३/९/२) ॥ कायमानः चायमानः कामयमानः इति वा । वनानि । त्वं यत् मातृः अपः अगमः उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन् इह भवसि जायमानः ॥

14. "कायमानः (१५)"—इति । एतदनवगतम् । "चायमानः" — इत्यवगमः, "कामयमान इति वा" । "कायमानो वना त्वम्" — इति निगमः (ऋ० सं० ३, १, ५, २) । विश्वामित्रस्येयमार्षम् । बृहती । प्रातरनुवाकाश्विनयोः शस्यते । हे भगवन् ! अग्ने ! 'कायमानः' "चायमानः" पश्यन्नित्यर्थः । अथवा "कामयमानः" । किम् ? स्वां योनिम् । कतमाम् ? 'वना' "वनानि" दारूणि । दारुभ्योऽग्निर्जायते, तदेतत् प्रसिद्धमेवोक्तम्, यदा चाग्निरनुगच्छति अरणी वावगच्छति । 'मातृः' वा सर्वभूतनिर्मात्रीः 'अपः' सापि योनिरिवाग्नेः । "आपो वा अग्नेर्योनिः,—इति ह विज्ञायते" । अनयोर्योन्योरन्तरां योनिं 'यत्' यदा 'अजगन्' "अगमः" "त्वम्" । कदा पुनरगमः ? 'उपशाम्यन्'—इत्यध्याहृतं भाष्यकारेण, अनुगच्छन्नित्यर्थः । तस्य तवैवमनुगच्छतः किम् ? इति । उच्यते,—'न' 'तत्' 'ते' 'अग्ने' ! 'प्रमृषे' 'निवर्त्तनम्' । "न प्रमृष्यते" न प्रमृज्यते निवर्त्तनं', वर्त्म, मार्गो न लुप्यत इत्यर्थः । कथं गम्यते न प्रसृज्यते मार्गः ? "इति । 'दूरे' अपि 'सन्' अदृश्योऽपि भूत्वा यस्मात् "इह" पुनः "भवसि" एव । कदा ? "जायमानः" "यत्" यदा अदृश्यो जायसे वैद्युतात्मना, यदा वा अरणिभ्यां जायसे मथ्यमानः, तदा ॥

"न सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः । नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान् नयन्ति" इति (ऋ० सं० ३, ३, २३, ३) । "लोधम् (१६)"—इति । एतदनवगतम् । "लुब्धम्"—इत्यवगमः । यस्मिन् निगमे एष शब्दः सा वसिष्ठद्वेषिणी ऋक् । अहं च कापिष्ठलो वासिष्ठः । यतस्तान् निर्ब्रवीमीति ॥

14. (અનુ.) "હે અગ્નિદેવ ! વનોને અર્થાત્ કાષ્ઠને જોતાં કે ચાહતાં તમે જ્યારે માતા રૂપ જળમાં પ્રવેશ કરો છો ત્યારે તમારું એ નિવર્તન (પાછા ફરી જવું) ગમતું નથી, કારણ કે દૂર હોવા છતાંય તમે અહીં નજીકમાં જ જન્મ લો છો." कायमानः એટલે चायमानः (જોતાં) અથવા कामयमानः (ચાહતાં) અર્થાત્ વનોને (લક્ષણાથી 'કાષ્ઠને') જોતા કે ચાહતા એવા હે અગ્નિદેવ ! તમે જ્યારે માતા રૂપ જળમાં શમી જતાં પ્રવેશ કરો છો ત્યારે તમારું એ નિવર્તન (અમારાથી) સહન થતું નથી, કારણ કે દૂર હોવા છતાંય જન્મ લેતાં તમે નજીકમાં જ હો છો.

14. (વિમર્શ) (અગ્નિ કાષ્ઠ-અરણી-માંથી જન્મે છે એ પ્રસિદ્ધ હકીકતને ધ્યાનમાં રાખીને-) આ મન્ત્રમાં 'અગ્નિ કાષ્ઠને ચાહે છે' એમ કહ્યું છે. એ જ પ્રમાણે, વાદળના પાણીમાં વૈદ્યુતાગ્નિ જન્મતો હોઈ જળને અગ્નિની માતા કહી છે. બ્રાહ્મણમાં પણ કહ્યું છે : आपो वा अग्नेर्योनिः । અહીં कायमान એ અનવગત સંસ્કારવાળો શબ્દ છે. યાસ્કે તેને બે રીતે સમજાવ્યો છે.

અહીં लोधम् શબ્દને लुब्धम् (લોભી)- એ રીતે સમજાવવામાં આવ્યો છે. દુર્ગ કહે છે કે આ ऋक् वसिष्ठद्वेषिणी છે અને પોતે कापिलष्ठ वासिष्ठ છે માટે તેની ઉપર વ્યાખ્યાન કરશે નહીં.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain. Digitized by eGangotri.

15. लोधम् ॥१६॥

लोधं नयन्ति पशुं मन्यमानाः (ऋ. सं. ३/५३/२३) ।

लुब्धम् ऋषिं नयन्ति पशुं मन्यमानाः ॥

शीरम् ॥१७॥

शीरं पावकशोचिषम् (ऋ. सं. ८/१०२/११) ॥ पावकदीप्तिम् ।

अनुशायिनम् इति वा । आशिनम् इति वा ॥

विद्रधे ॥१८॥ द्रुपदे ॥१९॥

कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते

(ऋ. सं. ४/३२/२३) ॥ कनीनके कन्यके । कन्या कमनीया भवति । क्वेयं नेतव्येति वा । कनतेर्वा स्यात्कान्तिकर्मणः कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनानीति शाकपूणिः ॥

विद्धयोर्दारुपाद्धोः । दारु दृणातेर्वा । द्रूणातेर्वा । तस्मादेव द्रु । नवे नवजाते । अर्भके अवृद्धे । ते तथा तदधिष्ठानेषु शोभेते एवं बभ्रू यामेषु शोभेते । बभ्रूवोरश्वयोः संस्तवः ॥

---

15. "शीरम् (१७)"—इति । एतदनवगतम् । अग्निरभिधेयः । "अनुशायिनमिति वा"—इति, अनुप्रविश्य सर्वभूतानि शेते इत्यनुशायी, तमनुशायिनम् । अश्नोति व्याप्नोति वा सर्वभूतानीति "आशिनम्" । "शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वादीदाय दीर्घश्रुत्तमः ॥"—इति निगमः (ऋ० सं० ६, ७, ११, १) । भार्गवस्य प्रयोगस्येयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते । 'शीरम्' अनुशायिनं व्यापिनं वा अग्निं स्तौमि । "पावकशोचिषम्" पावयित्री यस्य शोचिर्दीप्तिः, तं पावकशोचिषम् । किञ्च 'ज्येष्ठः' श्रेष्ठः, 'यः' प्रधानः 'दमेषु' यज्ञगृहेषु 'आदीदाय आदीप्यते, परिचर्य्यमाणोऽग्निहोत्रिभिः । किञ्च 'दीर्घश्रुत्तमः' यः, दीर्घश्रोतृभ्यः यो दीर्घश्रुत्तमः । तमग्निं स्तौमि ॥ ६ (१४) ॥

"विद्रधे (१८), द्रुपदे (१९)"—इत्येते पदे एकनिगमे । द्वे अप्यनवगते, पक्षेण चानेकार्थे । 'विद्रधे' विद्धे, 'द्रुपदे' द्रुममये पदे इत्यवगमः । दारुपादौ वा एताभ्यां शब्दाभ्यां विशेष्येते । कन्ययोर्वा पादपाठीप्रवचने सप्तम्येकवचनान्ते एते । द्वयोरपि पदयोरेक एव निगमः,—"कनीनकेव विद्रधे०—०शोभते"— इति (ऋ० सं० २, ६, ३०, ७) । वामदेवस्यार्षम् । "कन्या कमनीया भवति" सर्व एव हि तां प्रार्थयन्त एव । अथवा "क्वेयं नेतव्येति वा" दानायेत्येवं तां प्रति पिता चिन्तयतीति कन्या । "कमनेनानीयत इति वा" । "कनतेर्वा स्यात् कान्तिकर्मणः" "कनति (१७)' कानिषत् (१८)"—इति कान्तिकर्मसु पठितम् । 'इव' इति उपमायाम् । 'विद्रधे' 'नवे' 'द्रुपदे' 'अर्भके'—इत्येतानि चत्वारि पदानि "कन्ययोरधिष्ठानप्रवचनानि" "सप्तम्या एकवचनानीति" एवं "शाकपूणिः" आचार्य्यो मन्यते । एकस्मिन् दारुमये पादपीठेऽस्मिन् समधिरूढेषु पाकाख्येषु अधिष्ठानेषु अधिरूढे 'शोभेते' यथैवं 'बभ्रू' बभ्रूवर्णे अश्वे 'यामेषु' आजिस्थानेषु यमनस्थानेषु, कन्यके, शालभञ्जिके वां । तदेतैश्चतुर्भिः पादैरुच्यत इति शाकपूणिराचार्य्यो मन्यते । यास्कस्तु "विद्धयोः" विकुषिताधोभागयोः "दारुपाद्धोः" अधिरूढयोः कन्ययोरभिधानपदान्यभिधायकान्येतानि द्विवचनानीति मन्यते । ताभ्यां ह्यश्विन्योः खुराकारत्वेन सारूप्यमस्तीत्येवमुपादानम् । दारुपाद्धोरित्येतस्मिन् व्याख्यानप्रसक्ते पदे विग्रहप्रसक्तो दारुशब्दो निरुच्यते,— "दारु दृणातेर्वा" विदारणार्थस्य (क्र्या० प०) । "दृणातेर्वा" हिंसार्थस्य तस्मादेवं धातुद्वयादन्यतरस्य "द्रु"—इत्येतदुक्तम्, द्रुम इत्यर्थः । "नवे नवजाते" । "अर्भके अवृद्धे" अल्पके इत्यर्थः । "ते" कन्यके एवम्प्रकारेषु "तदधिष्ठानेषु" तेषु पादुकाख्येषु अधिष्ठानेषु अधिरूढे "शोभेते" यथा "एवं" "बभ्रू" बभ्रूवर्णे अश्वे "यामेषु" आजिस्थानेषु यमनस्थानेषु वा बन्धनस्थानेषु मन्दुराख्येषु, वर्त्तमाने शोभेते । ते एवमेव "बभ्रूवोरश्वयोः संस्तवः" ॥

---

15. (અનુ૦) "લોભીઆને પશુ માનનારા (કેટલાક લોકો પશુની જેમ) લોભીઆને હાંકી કાઢે છે." लोधम् એટલે लुब्धम् (લોભી). (ઋષિઓ તપના લોભી હોય છે). આવા લુબ્ધ ઋષિને પશુ માનીને (મૂર્ખ લોકો) હાંકી કાઢે છે.

(અનુ૦) "(બધાં પ્રાણીઓમાં) વ્યાપીને રહેલા અને જેનો પ્રકાશ પવિત્ર કરનારો છે (એવા અગ્નિની હું સ્તુતિ કરું છું)." અહીં पावकशोचिषम् એટલે 'જેની દીપ્તિ પવિત્ર કરનારી છે.' તથા अनुशायिनम् એટલે आशिनम् (= अश्नोति व्याप्नोति वा सर्वभूतानि इति) જે બધાં પ્રાણીઓમાં વ્યાપીને રહેલો છે. (અહીં शीरम् શબ્દ અગ્નિનો વાચક છે).

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(આ મન્ત્રનો બે રીતે અનુવાદ થઈ શકે છે : (क) "નવજાત અને નાની બે કન્યકાઓ (ઢીંગલીઓ) કાણાંવાળા લાકડાના આસન ઉપર ઊભી હોય એમ બભ્રૂવર્ણના આ બે અશ્વો માર્ગ ઉપર શોભે છે." (અહીં नवे અને अर्भके પદો कनीनकानां વિશેષણ છે અને તે પ્રથમા દ્વિવચનનાં રૂપો છે. कनीनका (इव) શબ્દ પોતે પણ પ્રથમા દ્વિવચન છે. औ પ્રત્યયને સ્થાને આકાર આદેશ થઈને તે રૂપ બન્યું છે.) (ख) "નવા તથા કાણાંવાળા, નાના લાકડાના આસન ઉપર ઉભેલી કન્યાઓ (ઢીંગલીઓ) જેવા બભ્રૂવર્ણના બે અશ્વો માર્ગ ઉપર શોભે છે." (અહીં —नवे—विद्रधे— તથા अर्भके—द्रुपदे એ કન્યાઓ (ઢીંગલીઓને) ઊભા રહેવા માટેના લાકડાના આસનનાં વિશેષણ બને છે. તથા તે સપ્તમી એકવચનનાં રૂપો છે). कनीनके એટલે કે બે કન્યકાઓ. કન્યા એટલે જે કમનીય હોય તે. અથવા 'આને (દાન તરીકે આપવા માટે) કયાં લઈ જવી ?" એવી જેને માટે ચિંતા થાય છે તે કન્યા. અથવા કામના કરતા પુરુષ વડે લાવવામાં આવે છે તે કન્યા. અથવા તો ચળકવું એવા અર્થવાળા √कन (कनति) ધાતુ ઉપરથી 'કન્યા' શબ્દ બન્યો હશે. આચાર્ય શાકપૂણિનું માનવું છે કે આ મન્ત્રમાં विद्रधे અને द्रुपदे એ પદો કન્યકાને ઊભા રહેવાના સ્થાન સાથે જોડાયેલાં છે અને સપ્તમી એકવચનનાં તે રૂપો છે.

विद्रधे એટલે व्रिद्धयाः (કાણાં પાડેલાં બે) અને द्रुपदे એટલે दारुपाद्योः (લાકડાનાં બે આસનો ઉપર). અહીં दारुपाद શબ્દમાંનો दारु શબ્દ √दृ विदारणे (दृणाति) અથવા √द्रुञ् हिंसायाम् (द्रुणाति) ધાતુ ઉપરથી બન્યો હશે. (વૃક્ષવાચક) द्रु શબ્દ પણ આ (√द्रुञ् हिंसायाम्) ધાતુ ઉપરથી બન્યો હશે. (કેમ કે વૃક્ષને કાપવામાં આવે છે અર્થાત્ જેને કાપવામાં આવે તે द्रु). મન્ત્રમાં नवे એટલે 'નવી' જન્મેલી બે', अर्भके એટલે 'વૃદ્ધ નહીં થયેલી બે.' એ (લાકડાના) અધિષ્ઠાન ઉપર શોભે છે એવી જ રીતે આ બે બભ્રૂ (અશ્વો) માર્ગ ઉપર શોભે છે. આમ આ મન્ત્રથી બે બભ્રૂ અશ્વોની સ્તુતિ કરવામાં આવી.

15. (વિમર્શ) विद्रधे અને द्रुपदे એવા બે અનવગત સંસ્કારવાળા શબ્દો ઉપર્યુક્ત એક જ મન્ત્રમાં મળી આવે છે માટે તેમની એક સાથે સમજૂતી રજૂ કરવામાં આવી છે. યાસ્કે તેમને विद्धयोः અને दारुपाद्योः એ રીતે સમજાવ્યા છે. આ શબ્દોની સમજૂતી ઉપરાંત ઉપર્યુક્ત મન્ત્રમાં આવેલ કન્યા શબ્દની વ્યુત્પત્તિ ધ્યાનપાત્ર છે. યાસ્કે તેને ચાર રીતે સમજાવ્યો છે : ૧. कन्या कमनीया भवति । (√कनु + क्यक् < ઉણાદિ પ્રત્યય), ૨. क्वेयं नेतव्येति । (क्व + √णीञ् प्रापणे + यक्), ૩. कमनेन आनीयते इति । (√कम् + √नी + यक्) અને ૪. કાન્ત્યર્થક √कन् + यक् ઉપરથી कन्या શબ્દ બન્યો હશે. સ્કન્દસ્વામી લખે છે કે कन्या कमनीया प्रार्थनीया भवति सर्वस्य । क्वेयं नेतव्येति वा । प्राक् प्रदानकालात् कन्यायाः पितुरेवं चिन्ता भवति । उद्वाहलक्षणेन नयनेन क्वेयं मया नेतव्या केनोद्वाहयितव्येत्यर्थः । कनतेर्वा कान्त्यर्थस्य । कन्या हि बाल्यात् सर्वस्य कान्ता ॥

---

16. तुग्वनि ॥२०॥

इदं च मेऽदादिदं च मेऽदादित्यृषिः प्रसंख्यायाह । सुवास्त्वा अधि तुग्वनि (ऋ. सं. ८/१९/३७) । सुवास्तुः नदी । तुग्व तीर्थं भवति । तूर्णमेतदायन्ति ॥

नंसन्ते ॥२१॥

कुविन्नंसन्ते मरुतः पुनर्नः (ऋ. सं. ७/५८/५) । पुनर्नो नमन्ते मरुतः ॥

नसन्त ॥२२॥ इत्युपरिष्टात् (निरु. ७/१७) व्याख्यास्यामः ॥

आहनसः ॥२३॥

ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् (ऋ. सं. ९/७५/५) । ये ते मदाः आहननवन्तः वचनवन्तः तैरिन्द्रं चोदय दानाय मघम् ॥

---

16. "तुग्वनि (२०)"—इति एतदनवगतम् । "तूर्णमितदायन्ति"—इति शब्दसमाधिः । "तीर्थम्" अभिधेयम् । "सुवास्त्वा अधि तुग्वनि"—इति निगमः (ऋ० सं० ६, १, ३५, ७) । अस्य ऋक्पादस्य ऋक्छेषापेक्षो निर्णयः । सर्वस्या अपि च तस्या ऋचो यस्यामयं पादः, तस्या या आद्यान्या आधस्त्या ऋक्, तदपेक्षो निर्णयो यतः, अतस्तस्या ऋचः आधस्त्यायाः सङ्क्षिप्यार्थमाह भाष्यकारः,—"इदञ्च मेऽदादिदञ्च मेऽदादित्यृषः प्रसङ्ख्यायाह"—इति । इदञ्च द्रव्यजातं, मम दत्तवानसौ राजेत्येवं, प्रसङ्ख्याय' परिसङ्ख्यानं कृत्वा, ऋषिराह उक्तवानित्यर्थः । कतमा पुनरसौ आधस्त्या ऋक्, यथायमर्थः सङ्क्षिप्यते ? इति । उच्यते,—"अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । महिष्ठो अर्य्यः सत्पतिः" (ऋ० सं० ६, १, ३५, ६ . । सोभरेः काण्वस्येयमार्षम्, परा च, दानप्रशंसा । 'यः' 'अदात्' 'मे' मम, 'पौरुकुत्स्यः' बहुशत्रुकर्त्तितुः पुत्रः 'त्रसदस्यु'

CC-0. In Public Domain.Digitized by eGangotri.

दस्युत्रासनः । किमदात् ? 'पञ्चाशतं वधूनाम्' पञ्चाशतं वोढव्यानां कन्यानाम् । 'मंहिष्ठः' पूज्यतरः । 'अर्य्यः ईश्वरः । 'सत्पतिः' च सतां पालयिता च । एवंलक्षणः पौरुकुत्स्यः त्रसदस्युः मम दत्तवान् पञ्चाशतं वधूनाम् । आह किमेतदेवादात् ? नेति । उच्यते,— इदञ्च यदुक्तम् उत्तरञ्च यद् वक्ष्यते । कतरा पुनरसावुत्तरा ऋक् ? इति । उच्यते,—"उ त मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि । तिसृणां सप्ततीनां श्यावः प्रणेता भुवद् वसुर्दियानां पतिः"—(ऋ० सं० ६, १, ३५, ७) । अप्येतत्,—यदुक्तम्, अपि च यदेतत् वक्ष्यमाणमिति 'उत'—शब्द एवमुभयं सम्भावयति । 'मे' मम 'प्रयियोः' (प्रगम्यते येन, तत् प्रयियुः, धनमश्वादि, तस्य प्रयियोः) धनस्य, बह्वदात् । ताभिः कन्याभिः सह 'वयियोः' (ऊयत इति वयियुः वस्त्रादि, तस्य) च बह्वदात् । 'तिसृणां सप्ततीनां' गवाम् । 'श्यावः' श्यामवर्णः कृषः, श्यामवर्णानां 'प्रणेता' प्रकर्षेण नेता अग्रतोगामी । 'भुवद्वसुः' भावयिता वसूनाम् । 'प्रशस्तः' पूजितलक्षणः । 'दियानां' दानार्हाणाम्, देया याः तासां पतिः । ताश्च गा एतत्सङ्ख्यायुक्ताः, एतद्गुणयुक्ताश्च मह्यमदात् । क्व पुनरसावदात् ? 'सुवास्त्वा' सुष्ठ निवासाया नद्याः 'अधि तुग्वनि' तीर्थेऽधि, एतत् अदात् मह्यम् । "सुवास्तुः नदी" "तुग्वं तीर्थं भवति" 'तूर्णं" हि "एतत्" अवगाहनार्थम् "आयन्ति" । अत्र दानसम्बन्धात् सुवास्तुशब्दो नद्यभिधाने, प्रसिद्धं हि नद्यां दानम्, नदीसम्बन्धाच्च तुग्वशब्दोऽपि तीर्थाभिधायक इत्युपपत्तिः । निगमार्थप्रकाशनायैवं सूक्तगतोऽपि अन्वीक्षितव्य एवार्थ इत्येतत् प्रदर्शितमाचार्य्येण ॥

"नंसन्ते (२२)"—इति । एतदनवगतम् । "नमन्ते"— इत्यवगमः । "कुविनंसन्ते"—इति निगमः, "ताँ आ रुद्रस्य मीव्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः । यत् सस्वर्त्ता जिहीलिरे यदाविरव तदेनं ईमहे तुराणाम्" ॥ इति (ऋ० सं० ५, ४, २८, ५) । वंसिष्ठस्येयमार्षम् ॥ 'तान्' अहं 'मीव्हुषः' मरुतः वर्षस्य सेक्तॄन् धनवतः, बलवतः वा 'आविवासे' आभिमुख्येन स्थित्वा परिचरामि । किंलक्षणान् पुनः मरुतः आविवासे ? 'रुद्रस्य' इन्द्रस्य स्वभूतान्, आप्तान् वा । अथवा 'मीव्हुषः' इति रुद्रविषयं षष्ठ्येकवचनान्तं स्यात् मीव्हुषो रुद्रस्य स्वभूतानिति । कस्मात् पुनस्तानहं परिचरामि ? यस्मात् ते मरुतः 'कुयित्' बहु 'नंसन्ते' 'नमन्ते' 'पुनः' एषांद्युपकारेण अस्मान् प्रति नमन्ते, प्रह्वीभवन्ति । किञ्च, 'यत्सस्वर्त्ता' यच्छरीरगतम् 'एनः' जिहीलिरे लज्जयन्ति, यच्च 'आविः' प्रकाशम्, तदेवम्प्रकारमुभयलक्षणमपि । एनोऽस्मान् 'जिहीलिरे' लज्जयन्ति । तदेषां मरुतां 'तुराणां त्वरमाणानां प्रसादेन उभयलक्षणमपि 'अवयजेमहि' निर्णुदिमहि,—इत्येतत् 'ईमहे' 'याचामहे' अनेन परिचारेण आराध्यैतान् मरुत इति । "नसत इत्येतदुपरिष्टात्" द्वादशाध्याये "व्याख्यास्यामः"—"अभि प्रचन्त समनेव योषाः" (ऋ० सं० ३, ८, ११, ३) —इति व्याख्याने, "नसतिराप्नोतिकर्मा वा नमतिकर्मा वा"—इति ॥

"आहनसः (२३)"—इति । एतदनवगतम् । "आहननवन्तः"—इत्यवगमः । "ये ते मदा आहनसः"—इति निगमः "परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् । ये ते ०—० मघम् ॥"— इति (ऋ० सं० ७, २, ३३, ५) । पावमानी सौमी । कवेर्भार्गवस्येयमार्षम् । जगती । हे भगवन् ! 'सोम !' 'परिप्रधन्व' परिप्रक्षर, एतस्मात् दशापवित्रात् । 'स्वस्तये' स्वस्त्ययनाय अस्माकम् । 'नृभिः' एतैः ऋत्विग्भिः, 'पुनानः' पूयमानः । किञ्च, 'अभिवासय' अभिप्रच्छादय, अभिभावय । 'आशिरम्' तृतीयसवने । किञ्च, 'ये ते मदा आहनसः' ये ते मदाः तव आहननवन्तः, "वञ्चनवन्तः" सम्मोहयितारः, 'विहायसः' महान्तः, तैः 'इन्द्रं' 'चोदय' प्रेरय, 'दातवे' "दानाय" 'मघं' धनम् । यथास्माकं तैर्मदैरनभिहतचेताः सन् दद्यात् मघं धनमित्यर्थः ॥ ७ (१५) ॥

---

16. (अनु०) ऋषिએ '(અમુક રાજાએ) મને આ આપ્યું, મને તે આપ્યું' એમ ગણાવીને કહ્યું- "સુવાસ્તુ(નદી)ના ઘાટ ઉપર." અહીં 'સુવાસ્તુ' નદીનું નામ છે. તુગ્વ એટલે તીર્થ (ઘાટ). કારણ કે (લોકો) જલદીથી (સ્નાનાદિ કે દાનાદિક કાર્યો કરવા માટે) અહીં (ઘાટ ઉપર) આવે છે.

"(વર્ષા વગેરે ઉપકાર વડે) મરુદ્દગણ અમારે માટે ઘણા નમે છે." અમારા માટે મરુદ્દગુણ નમે છે.

नसन्त શબ્દની વ્યાખ્યા આગળ ઉપર કરીશું.

"(હે સોમ !) તમારો માદક રસ અવાજ કરનાર અને મહાન્ છે, તેના વડે અમને ધનાદિક આપવા માટે ઇન્દ્રને પ્રેરો." તમારો જે મદ (રસ) आहननवन्तः અર્થાત્ वचनवन्तः (= અવાજ કરનારો) છે, તેના વડે ધનાદિકનું દાન કરવા માટે ઇન્દ્રને પ્રેરો.

[દુર્ગાચાર્યે ઉપર वञ्चनवन्तः પાઠ લીધો છે, પરંતુ તે ઉચિત નથી. કારણ કે આ + √हन् ધાતુ પાઠાર્થક જ ગણાયો છે. જેમ કે, ब्राह्मणे इदमाहतम् વગેરે].

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

17. अद्मसत् ॥२४॥

उपो॑ अदर्शि शु॒न्ध्युवो॒ न वक्षो॒ नो॒धा इ॑वा॒विर॑कृत प्रि॒याणि॑ ।

अ॒द्म॒सन्न स॑सतो बो॒धय॑न्ती शश्वत्तमागा॒त् पुन॑रे॒युषी॑णाम् ।

(ऋ. सं. १/१२४/४) ॥ उपादर्शि शन्ध्युवः । शुन्ध्युः आदित्यो भवति । शोधनात् । तस्यैव वक्षः भासः । अध्यूढम् । इदमपीतरत् वक्षः एतस्मादेव । अध्यूढं काये । शकुनिरपि शुन्ध्युरुच्यते । शोधनादेव । उदकचरो भवति । आपोऽपि शुन्ध्यवः उच्यन्ते । शोधनादेव । नोधाः ऋषिर्भवति । नवनं दधाति । स यथा स्तुत्या कामानाविष्कुरुते एवमुषा रूपाण्याविष्कुरुते । अद्मसद् । अद्म अन्नं भवति । अद्मसादिनी इति वा । अद्मसानिनी इति वा । ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् । स्वपतो बोधयन्ती शाश्वतिकतमागात् पुनरागामिनीनाम् ॥

---

17. "अद्मसत् (२४)"—इति । एतदनवगतम् । "अद्मसादिनीति वा अन्नसानिनीति वा" शब्दसमाधी । "उपो अदर्शि"—इति निगमः (ऋ० सं० २, १, ७, ४) । कक्षीवत् आर्षम् । औषसी । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते, 'उपो अदर्शि' उपश्लिष्टा दृश्यत इयमुषाः । कस्य ? 'शुन्ध्युवः' शोधयितुरादित्यस्य, आदित्यो हि यदप्यशुचिर्भवति, तदपि रश्मिभिः स्पृष्ट्वा शुचीकरोति । "सूर्यः पवित्रमुच्यते"—इति वक्ष्यति । तमांसि वा शोधयतीति शुन्ध्युः, तस्य शुन्ध्युवः । कथं पुनरुपश्लिष्टा दृश्यते ? 'वक्षो न' वक्ष इव, यथा तस्य स्वभासः स्वम्प्रकाशजालं वक्षोभूतमेतस्मिन् मण्डलेऽध्यूढम्, एवमियमुषा एतस्मिन् मण्डले उपश्लिष्टा दृश्यते, सन्निकर्षात् । प्रासङ्गिकमुच्यते शब्दसामान्यात्,—"इदमपीतरत्" "वक्षः" पुरुषवक्षः, पशुवक्षो वा अङ्गम् "एतस्मादेव" वहेर्धातोः (भू० प०), इदम् "अध्यूढम्" अधिप्रवेशितमेव "काये" शरीरे भवति । "शकुनिरपि" य एष मद्गुर्नाम, अयमपि "शुन्ध्युरुच्यते" "शोधनादेव" यो हि "उदकचरो भवति" नित्यशुद्ध एवेति शुन्ध्युः । "आपोऽपि शुन्ध्युव उच्यन्ते" ता अपि ह्र शोधयन्ति । "एवं" तावदियम् "उषाः" आदित्यस्य वक्ष इवोपश्लिष्टा दृश्यते । किञ्च इयमेवोषा नोधाः इवाविष्कृतप्रियाणि "नोधा ऋषिर्भवति" स हि "नवनं" स्तोत्रं देवताः प्रति "दधाति" । "स यथा" स्वमुखोद्गीर्णया "स्तुत्या" प्रियाण्यात्मनः "कामान्" स्वानि कामाख्यानि "आविष्कुरुते" आविष्कृणोति, प्रकाशति देवताः प्रति । "एवम्" इयम् "उषाः" स्वात्मनः एवोद्गीर्णेन प्रकाशेन "रूपाणि" जनानाम् "आविष्कुरुते" प्रकाशीकुरुते । किञ्च, इयमेवोषाः 'अद्मसन्न ससतो बोधयन्ती' "अद्म अन्नम्" तत् प्रतिकर्त्तव्यतया सीदति, तद्वा सनोति, सम्भजत इति "अद्मसत्" गृहाधिकारे नियुक्ता अन्नसाधिका स्त्री । सा यथा प्रातरेव क्षीराद्युपादानार्थं 'ससतः' "स्वपतः" जनान्, दोहकादीन् "बोधयन्ती" अन्नं साधयिष्यन्ती, एवमुषा अपि जनान् बोधयन्ती तत्काले हि ते इतिकर्त्तव्यतार्थे जनाः प्रतिबुध्यन्ते, तेनैतयैव बोधिता भवन्ति । आह,—कदा पुनरेतद्भवति ? इति । उच्यते,—यदा 'शश्वत्तमागात्' "शाश्वतिकतमा" नित्यतमा "आगात्" आगच्छति, तदैव जनान् बोधयति, एवमुषा रूपाण्याविष्कुरुते । एवञ्च वक्ष इवोषा आदित्यस्य दृश्यते । आह,—का वा सा शश्वत्तमा इयमुषाः ? इति । उच्यते,—'पुनरेयुषीणाम्' "पुनरागामिनीनाम्"—इत्यर्थः । या एताः काश्चिद्गत्वा पुनरागच्छन्ति, ताः पुनरेयुष्यो गावः, अन्या वा, तासां पुनरेयुषीणामिति निर्धारयति । एषैव 'शश्वत्तमा' शाश्वतिकतमा । एवमेतस्मिन् मन्त्रे, सा यथा अद्मसदित्यन्नसाधिका स्त्री उच्यते, सा हि तत्काले जनान् दोहकादीन् बोधयति, उषा अपि च तत्काल एवागच्छतीति, एवमुपमानमुपपद्यत इत्युपपत्तिः । अन्ये तु मक्षिकामद्मसदं मन्यन्ते, सापि ह्यन्ने सीदति, सनोति वान्नं तत्काले च प्रतिबुध्यमाना अन्यान् बोधयतीति ॥

---

17. (અનુ૦) (ઉષાદેવી) શુદ્ધ કરનારા સૂર્યના વક્ષઃસ્થળ સમાન દેખાઈ; સ્તુતિ કરનારની જેમ તેણે પ્રિય વસ્તુઓ બતાવી, અન્ન તૈયાર કરનારી સ્ત્રીની જેમ ઊંઘતાને જગાડતી તે (ઉષા) ફરી ફરીને આવનારાઓમાં શાશ્વતમા (નિત્યતમ અથવા પુરાતન) છે.'' उपादर्शि એટલે ઉષા ઉપશ્લિષ્ટ થઈ હોય એવી દેખાય છે. शुन्ध्युः (આ શબ્દનું ષષ્ઠી એકવચનમાં शुन्ध्युवः રૂપ થાય છે) એટલે આદિત્ય. કારણ કે (જે કાંઈ અશુચિ હોય છે અથવા તો જે અંધકાર હોય છે તેને સૂર્ય પોતાનાં કિરણોથી અડકીને) શુદ્ધ કરે છે. તેજપુંજથી જે આગળ ઊપસી આવેલું છે તેને જ તે (સૂર્ય)નું વક્ષઃસ્થળ કહે છે. બીજા (માનવાદિના) વક્ષઃસ્થળને પણ આ જ કારણે અર્થાત્ શરીરમાં આગળ ઊપસી આવેલું હોવાને કારણે જ વક્ષસ્ કહે છે. શકુનિ (પક્ષી)ને પણ શુદ્ધ હોવાને કારણે શુન્ધ્યુ કહે છે. દા. ત., જે પાણીમાં ફરનાર પક્ષી (હંસ) હોય છે તે (નિત્ય શુદ્ધ હોવાને કારણે) શુન્ધ્યુ કહેવાય છે. એ જ પ્રમાણે શુદ્ધ કરતું હોવાને કારણે પાણીને પણ શુન્ધ્યુ કહે છે. નોધા એટલે ઋષિ; કેમ કે તે नवनं दधाति । અર્થાત્ (દેવતાઓ પ્રત્યે તે) સ્તોત્ર ધારણ કરે છે. સ્તોતા ઋષિ જેવી રીતે પોતાની ઇચ્છાઓને સ્તુતિઓ વડે પ્રકટ કરે છે; એ જ પ્રમાણે ઉષા પણ (વિવિધ)

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

રૂપો આવિષ્કૃત કરે છે. अघ्नसत् શબ્દમાં अघ्न એટલે અન્ન. આથી अघ्नसत् એટલે अघ्नसादिनी અર્થાત્ અન્ન તૈયાર કરવા બેઠેલી સ્ત્રી. આને अन्नसानिनी અર્થાત્ 'અન્ન વહેંચનારી સ્ત્રી' પણ કહેવાય છે. ससतो बोधयन्ती शश्वत्तमाऽगात् पुनरेयुषीणाम् ०। એ ચરણનો અર્થ "ઊંઘી ગયેલાને જગાડતી ફરી ફરીને આવનારાઓમાં શાશ્વતિક્તમા છે."

17. (વિમર્શ) अघ्नसत् શબ્દ અનવગત સંસ્કાર છે. યાસ્કે તેને બે રીતે સમજાવ્યો છે : ૧. अघ्नसादिनी = અન્ન તૈયાર કરનારી સ્ત્રી. દુર્ગ નોંધે છે કે કેટલાક લોકો મક્ષિકાને પણ अघ्नसत् કહે છે. ૨. अन्नसानिनी = અન્ન વહેંચનારી સ્ત્રી. સ્કન્દસ્વામી અને મહેશ્વર લખે છે કે अघ्नसत् इत्यनवगतम् । अदेरौणादिके मन्प्रत्यये अघ्न । अम्तमभिधेयम् । तत्रात्मनि सीदति तद्वा संभजते अघ्नानि उपपदे सदेः सनेर्वा 'अन्येभ्योऽपि दृश्यते' (पा. ३/२/७५, ७६) 'कबिप्र' इति क्विपि रूपम् । अन्नसानिनीति वेत्यवगमः ॥ યાસ્કે પ્રસંગતઃ શુન્ધ્યુ શબ્દના ત્રણ અર્થો બતાવ્યા છે : (ક) આદિત્ય (ખ) હંસ જેવા જળચર પક્ષીઓ અને (ગ) જળ.

---

18. इष्मिणः ॥२५॥

ते वाशीमन्तः इष्मिणः (ऋ. सं. १/८७/६) । ईषणिनः इति वा । एषणिनः इति वा । आर्षणिनः इति वा । वाशी (निघ. १/११/११) इति वाङ्नाम । वाश्यते इति सत्याः ॥ वाहः ॥२६॥

शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् (ऋ. सं. ३/५३/३) । अभिवहनस्तुतिम् । अभिषवणप्रवादां स्तुतिं मन्यन्ते । ऐन्द्री त्वेव शस्यते ॥ परितक्म्या ॥२७॥ इत्युपरिष्टाद् (निरु. ११/२५) व्याख्यास्यामः ॥

तृतीयः पादः

सुविते ॥२८॥ सु इते । सूते । सुगते । प्रजायामिति वा । सुविते मा धाः (मैत्रा. सं. १/२/७) इत्यपि निगमो भवति ॥

---

१८. "इष्मिणः (२५)"—इति । एतदनवगतम् । ईषणिन इति वा, एषणिन इति वा, आर्षणिन इति वा" शब्दसमाधयः । "श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्कभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः" ॥ इति निगमः (ऋ० सं० १, ६, १३, ६) । राहुगणस्य गोतमस्येयमार्षम् । जगती । मारुतस्य प्रैयङ्गवस्य चरोरियं ताज्या, तत्र ह्युक्तम् "प्रियवती याज्यानुवाक्ये भवतः"—इति । 'श्रियसे कम्' "श्रियोऽर्थाय यजमानाय आत्मने वा, क्रमित्यनर्थकमेव, कामये इति वा अस्यार्थः । 'भानुभिः' दीप्तिभिः सूर्य्यरश्मिभिः, येऽन्तरिक्षे मरुतः 'सम्मिमिक्षिरे' सङ्गच्छन्ते, 'ते' एव 'रश्मिभिः' सर्वलोकनियन्तृभिः 'सम्मिमिक्षिरे'—इत्येतदेवानुवर्त्तते । 'ते' एव 'ऋक्कभिः' रसहर्त्तृभिः समिमिक्षिरे । 'सुखादयः' सुखदातारः जनानाम् । शोभनानां वा हविषां खादितारः अत्तारः, 'सुखदायः' । 'ते' एव 'वाशीमन्तः' वाग्मिनः ? 'इष्मिणः' "ईषणिनः" उपगमनवन्तः, "एषणिनो वा" इच्छावन्तः, "आर्षणिनो वा" आभिमुख्येन सर्वार्थानां द्रष्टारः, 'अभीरवो विद्रे' विदारयितव्ये शत्रौ प्राप्ते विगतभयः, अथवा 'विद्रे' वेद्मि, जाने । य एवंलक्षणा मरुतः, तेषां मरुतां यत् स्थानम् अन्तरिक्षलोकः, तस्य 'प्रियस्य' इष्टस्य 'मारुतस्य' मरुतां स्वभूतस्य 'धाम्नः' स्थानस्य प्राप्तये, तानेव मरुतः स्तौमीत्यध्याहारः । एवमेतस्मिन् मन्त्रे 'वाशीमन्त इष्मिणः'—इत्येतस्मादेकवाक्यसम्बद्धात् 'इष्मिणः'—इत्येतन्मरुद्विशेषणम् । "वाशीति वाङ्नाम" । "वाशी (११), वाणी (१२)"—इति पठितं वाङ्नामसु । वास्यत इति कारकावधारणम् ॥

"वाहः (२६)—इति । एतदनवगतम् । पक्षेण चानेकार्थम् । "शंसावाध्वर्यो प्रति मे गृणीहीनद्राय वाहः कृणवाव जुष्टम् । एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम् ॥"—इति निगमः (ऋ० सं० ३, ३, १९, ३) । विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । होता ब्रवीति,—हे 'अध्वर्यो !' एहि 'प्रति गृणीहि' 'शंसाव' आवामुभावपि, न ह्यप्रतिगीर्य्यमाणं शस्यते, नाप्यशस्यमानं प्रतिगीर्य्यति, एवमितरेतरोपकारकत्वमभिप्रेत्योक्तं द्विवचनम्,—'शंसाव' इति । एवमितरेतरगुणसम्पन्नमेतत् 'वाहः' स्तोत्रं 'कृणवाव' आवाम् । स्तोम एव हि देवानां वोढा भवति । "वाहिष्ठो वां हवानां स्तोमः । (ऋ० सं० ६, २, २९, १)"—इति, "वोढृतमो ह्वानानां स्तोमः"—इति हि वक्ष्यति । एवमियमभिवहनस्तुतिः । एवमेतच्छस्त्रमाभिमुख्यगामि "इदम्" "इन्द्राय" इन्द्रार्थम्, 'जुष्टम्' प्रियम्, तस्य यथा स्यात् तथा कुर्वः । अन्ये त्वेनाम् "अधिषवणप्रवादां" सोमाभिषवणप्रवादिनीं स्तुतिं मन्यन्ते, वाहःशब्दो हि उदकवाहाभिधानसारूप्यात् तत्र युक्तरूपतर इति कृत्वा यदा पुनरेव, तदैवमर्थो योज्यः,—'इन्द्राय' 'इदं' 'वाहः'

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

सोमोदकपूर्णमधिषवणफलकाख्यं वाहः 'जुष्टं' प्रियं यथा स्यात् तथा कुर्वः । तद्धि 'सुशस्तं' सुप्रतिगीर्णश्च इन्द्रस्य प्रीतिजनकं भवति । एतदेव कर्त्तव्यमावाभ्यां यतः, अतो ब्रवीमि,—'एदं बर्हिः यजमानस्य सीद' एतद् बर्हिः, यदेतदग्रतःस्तीर्णमग्रेण होतारं बर्हिः । 'सीद' "स प्रतिगरायोपविशति"—इति ह्युक्तम्, 'यजमानस्य' अभिप्रेतकामावाप्तये आसीद् । मा अवमंस्थाश्चिरेणैतच्छंस्यत इति, उपविष्टश्चेत् त्वं ममाग्रतः । 'अथ' अनन्तरमेव 'भूत्' भवति । 'उक्थं' शस्त्रमेतत्, इन्द्रार्थं शस्तम्, नात्र मम वाङ्मृषेत्यभिप्रायः । एवमियमभिवहनस्तुतिः, अथवा अधिषवणप्रवादा स्तुतिः, उभयथापि तु इयम् "ऐन्द्री त्वेव शस्यते" इदमेवैकमभिधानमत्र व्युत्पाद्यत इत्यभिप्रायः ॥

"परितक्म्या (२७)"—"इति" । "एतदुपरिष्टाद् व्याख्यास्यामः" षोड़शाध्याये, तत्र हि एतत् "किमिच्छन्ती सरमा प्रेद मानद् (ऋ० सं० ८, ६, ५, १)"—इत्येतस्मिन् मन्त्रे प्रसक्तमायास्यतीति लाघवार्थमुत्कृष्टमिति ॥ ८ (१६) ॥

इति निरुक्तवृत्तौ नवमाध्यायस्य (चतुर्थाध्यायस्य)
द्वितीयः पादः ॥ ४, २ ॥

"सुविते (२८)"—इति । एतदनवगतम् । अनेकार्थश्च । 'सु, इते'—इति, "सूते"—इति शब्दसमाधी । अत्र यदा "सु इते" इति विपरिणामः, तदा "सुगते" इत्यर्थः । यदा "सूते" इति, तदा "प्रजायाम्" सूते देवदत्ता पुत्रमिति प्रजायत इत्यर्थः । एवं 'सुविते'—इत्यस्य "सु इते, सूते" शब्दसमाधी । तयोरेतद् यथासङ्ख्येनार्थवचनम्, "सुगते, प्रजायामिति" । "सुविते मा धाः"— इत्यपि निगमः । "अनाधृष्टमस्य नादृष्यं देवानामोजो अभि शस्तिपाः । अनभिशस्त्यञ्जसा सत्यमुपगेषां सुविते मा धाः"— इति । अनेन तानूनप्त्रं संस्पृश्यते । हे तानूनप्त्र ! 'अनाधृष्टमसि' अनाधर्षितमसि, त्वयि स्पृष्टे समयोपयन्त्रिता ह्येते नान्योऽन्यस्मिन् द्रोहमुपायस्यन्त्यृत्विजः । कुतः पुनरेतत् सामर्थ्यं तव ? इति । इतः,—यस्मात् 'अनाधृष्यं देवानामोजः' अनाधर्षणीयं त्वम् । ओजो बलमित्यर्थः । किञ्च, 'अभिशस्तिपाः' अभिशंसनान् पासि त्वम् । 'अनभिशस्ति' नाभिशंसनीयं केनचित्, अनवद्यमित्यर्थः । 'अनु मे' 'इदं व्रतं व्रतपतिः' 'मन्यताम्' अनुमन्यताम् 'इदं व्रतं' कर्म,'व्रतपतिः' अग्निः । 'मे' मयोपेयमानाम् एनां 'दीक्षाम्' 'अनुन्यताम्' 'दीक्षापतिः' सोमः । किञ्च, 'अञ्जसा' अनन्तर्हितम्, अहम् 'सत्यम्' उपगेषम्' 'उपगतवान्' । योऽहमेतदस्पृशम्, स त्वं हे तानूनप्त्र ! एवमुपगतवन्तं मा 'सुविते' सुगते स्थाने, यत्र गतानां शोभनं गतं भवति, तत्र धेहि, अथवा प्रजायां जनयितव्यायां धेहि, यथा बह्वपत्या स्याम तथा कुर्वित्यर्थः ।

---

18. (અનુ૦) "(એ મરુદ્ગણ) બોલનારા અને ગતિ કરનારા છે." (અહીં इष्मिणः શબ્દના અનેક અર્થો છે.) इष्मिणः એટલે ૧. ईषणिनः = નજીક જનારા. અથવા ૨. एषणिनः = ઇચ્છાવાળા. અથવા ૩. आर्षणिनः = સન્મુખ થઈને બધાને જોનારા. 'વાશી' એ વાણીનું નામ છે; કેમકે તેનાથી (વાણીથી) બોલવામાં આવે છે.

(હોતા કહે છે :) "હે અધ્વર્યુ ! આપણે બન્ને સ્તુતિ કરીએ; તમે મારી સામે સ્તુતિ કરો. આપણે બન્ને ભેગા મળીને ઇન્દ્રને પ્રિય એવી 'વાહ' અર્થાત્ સોમરસ કાઢતી વખતની સ્તુતિ કરીએ." કોઈક આ સ્તુતિને 'અભિવહનસ્તુતિ' અર્થાત્ ઇન્દ્રનું આહ્વાન કરવા માટેની સ્તુતિ ગણે છે. અથવા 'અભિષવણપ્રવાદા' સ્તુતિ' અર્થાત્ સોમરસ કાઢતી વખતે ગાવાની સ્તુતિ કહે છે. આ બેમાંથી ગમે તે બે પ્રકારની સ્તુતિ હોય તો પણ તે ઇન્દ્રવિષયક જ છે.

परितक्म्या શબ્દની વ્યાખ્યા આગળ ઉપર કરીશું.

सुविते એટલે सु + इते અથવા सूते. આના અનુક્રમે सुगते (સારી જગ્યાએ) અને प्रजायाम् (પ્રજામાં) એવા અર્થો થાય છે. "હે દેવ ! મને મારા સ્થાનમાં અથવા મારી પુત્રપૌત્રાદિક પ્રજામાં રાખજો."

---

19. दयते ॥२९॥

दयतिः अनेककर्मा । नवेन पूर्वं दयमानाः स्याम (मैत्रा. सं. ४/१३/७) इत्युपदयाकर्मा । य एक इद्विदयते वसु (ऋ. सं. १/८४/७) इति दानकर्मा वा विभागकर्मा वा । दुर्वर्तुर्भीमो दयते वनानि । (ऋ. सं. ६/६/५) इति दहतिकर्मा । दुर्वर्तुः दुर्वारः । विदद्वसुर्दयमानो वि शत्रून् (ऋ. सं. ३/३४/१) इति हिंसाकर्मा । इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबतमश्विना तान् । अयं हि वामूतये वन्दनाय मां वायसो दोषा दयमानो अबूबुधत् ॥ दयमान इति ॥

---

19. "दयति (२९)"—इति । एष शब्दः "अनेककर्मा" अनेकार्थः, नत्वनेकविकल्पप्रकृतिः,—यथा सुवितेशब्दस्य अन्येनाम्येन

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

धातुना विगृह्यानेकार्थत्वमुक्तम्,—इणा विगृह्य "सु इते"—इति गत्यर्थत्वम् । सूतिना विगृह्य "सूते"—इति च प्रजार्थत्वम्, नैवमिह । किन्तर्हि ? एकप्रकृतेरेवायं शब्दोऽनेकार्थो भवतीत्यस्य विशेषस्योपद्योतनार्थमुदाहरति । एवमुच्यमानेऽप्यनेकार्थत्वे दयतिरनेककर्मैवित्येवमुक्तम् । अन्ये तु ब्रूवते,—यथा "सुविते" शब्दोऽनेकार्थोऽनवगतसंस्कारश्च, नैवमयम् । किन्तर्हि ? अनेकार्थ एवायमिति ॥

एवमनेकार्थत्वं प्रतिज्ञाय उदाहरणेनैवोपपादयति,—"नवे॑न पूर्वं॒ दय॑मानाः स्या॒म"—"इति" एतस्मिन् मन्त्रे दयतीत्येष शब्दः "उपदयाकर्मा" । उपदेयति रक्षणमुच्यते । 'नवेन' धान्येन 'पूर्वं' पुराणं 'दयमानाः' रक्षन्तः 'स्याम' पुराणेन च नवम्, इष्टं हि नवेन पुराणस्य च रक्षणं, पुराणेन च नवस्य, प्रसिद्धं च लोके । तस्मादिहायमुपपद्यते उपदयाकर्मा । चतुर्दशऽध्याये इत्यस्य शेषः ॥

"य एक॒ इद् वि॒दय॑ते वसु"—"इति" एतस्मिन् मन्त्रे "दानकर्मा वा, विभागकर्मा वा" । "य एक इद् वि॒दय॑ते वसु मर्त्ताय दा॒शुषे॑ । ईशा॑नो अप्र॑तिष्कुत॒ इन्द्रो॑ अ॒ङ्ग ॥" इति (ऋ० सं० १, ६, ६, २) । राहुगणस्य गोतमस्यार्षम् । ऐन्द्री । उष्णिक् । 'यः' इन्द्रः 'एकः इद्' एक एव स्वतन्त्रः 'वि' विविधं 'वसु' धनं 'दयते' ददाति । कस्मै ? 'मर्त्ताय' मनुष्याय । किंलक्षणाय ? 'दाशुषे' दत्तवते हवींषि । अथवा विभागकर्मा । 'दाशुषे' 'वसु' 'विदयते' विभजते इत्यर्थः । किंलक्षणः पुनरिन्द्रो ददाति, विभजते वा ? इति । उच्यते,—'ईशानः' ईश्वरः, 'अप्रतिष्कुतः' अप्रतिस्खलितः संग्रामेषु । 'इन्द्रः' 'अङ्ग' क्षिप्रं धनं ददाति, विभजते वा, 'दाशुषे' यजमानाय, तमहं स्तौमि, सोऽस्माकमेतत् करोत्वित्यभिप्रायः । ईशानः, इन्द्रः, अन्यत्र दानविभागाभ्यां दाशुषे यजमानाय वस्वेकवाक्ये श्रूयमाणं किमन्यत् कुर्य्यात् ? तस्माद् वाक्यसामर्थ्यादत्र "दानकर्मा वा विभागकर्मा वा"— इत्युपपद्यते ॥

"दुर्वर्त्तुर्भीमो दय॑ते वनानि"—"इति" एतस्मिन् मन्त्रे "दहतिकर्मा" । निगमप्रसक्तं निर्ब्रवीति,—"दुर्वर्त्तुः दुर्वारः" दुर्वारणीय इत्यर्थः । "अध॑ जि॒ह्वा पा॑पतीति॒ प्र वृष्णो॑ गोषुयु॒धो नाशनिः॑ सृजा॒ना । शूर॑स्येव प्रसि॑तिः क्षा॒तिर॒ग्नेर्दु॒र्वर्तु॑र्भी॒मो दय॑ते॒ वना॑नि ॥" इति (ऋ० सं० ४, ६, ८, ५) । आग्नेयी । भरद्वाजस्यार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते । उपज्वलितस्याग्नेः 'अध' अथ, अनन्तरमेव तस्य 'जिह्वा' ज्वाला दारुषु 'पापतीति' पुनः पुनः पतति, 'प्रवृष्णः' प्रवर्षितुः इन्द्रस्य 'गोषुयुधः' गवार्थं वादे पणिभिः सह असुरैर्युध्यते, अथवा 'गोषु' अप्सु, मेघेन सह युध्यत इत्यर्थः । 'न'—इत्युपमा, इन्द्रस्य गोषु युध्यत इव । 'अशनिः' 'सृजाना' तेनैव सृज्यमानो यथा पतति अशनिर्वज्रः, तथा अग्नेर्ज्वाला दारुषु पापतीति । किञ्च, 'शूरस्येव प्रसतिः क्षातिरग्नेः' । यथा कस्यचित् 'शूरस्य' विक्रान्तस्य वा अप्रतिहतगतेः 'प्रसितिः' प्रसहनं संग्रामानुप्रवेशमार्गः छिन्नभिन्नरुग्णैः शत्रुभिः प्रकीर्णः स्यात्, एवमस्य 'अग्नेः' 'क्षातिः' दहनमार्गः, ईषत्प्लुष्टार्द्धदग्धभस्मीभूतैर्वृक्षैर्गुल्मादिभिराकीर्य्यति । कदा पुनरेतद् भवति ? 'दुर्वर्त्तुः' दुर्वारः, दावाग्नीभूतः, 'भीमः' सर्वप्राणिभयङ्करो यदायमग्निः 'दयते' दहति । किम् ? 'वनानि' । एवमयमाग्नेये मन्त्रे वनशब्दसन्निकर्षे श्रूयमाणे दयतिशब्दो दहनादन्यत् किमभिदध्यात् ? तस्मात् सामर्थ्यादिहायं "दहनकर्मा"—इत्युपपत्तिः ॥

"वि॒दद्व॑सु॒र्दय॑मानो॒ वि शत्रू॑न्"—"इति" एतस्मिन् मन्त्रे "हिंसाकर्मा" । "इन्द्रः॑ पू॒र्भिदाति॑र॒द्दास॑म॒र्कैर्वि॒दद्व॑सु॒र्दय॑मानो॒ वि शत्रू॑न् । ब्रह्म॑जूतस्त॒न्वा॑ वावृधा॒नो भूरि॑दात्र॒ आपृ॑ण॒द्रोद॑सी उ॒भे ॥" इति (ऋ० सं० ३, २, १५, १) । विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । उद्भिद्बलभिदानोर्निष्केवल्ये निविद्धानीयस्य सूक्तस्य प्रथमैवेयम् । 'इन्द्रः' 'पूर्भित्' असुरपुरां मेघानां वा भेत्ता, अद्भिः पूर्णा अपो वा पालयन्तीति मेघाः, पुरः, "पॄ पालनपूरणयोः (क्र्या० प०)"—इत्येतस्य । 'आतिरत्' आभिनत् । 'दासं' दासयितव्यं मेघम् । कैः सहायैः सह ? 'अर्कैः' वृक्षैः, देवैर्माध्यमिकैर्वा । किंलक्षणः पुनरसाविन्द्रः, य आतिरत् ? 'विदद्वसुः' प्राप्तधनः । किं कुर्वन् आतिरत् दासम् ? 'विदयमानः' विविधं हिंसन् 'शत्रून्' ये मेघवधप्रतिबन्धिनः । आह,—किं विदद्वसुत्वेनैवैकेन गुणेन युक्तो य इन्द्रः, स एतदकरोत् ? नेत्युच्यते,—'ब्रह्मजूतः' च ब्रह्मणा स्तुतिलक्षणेन 'जूतः' प्राप्तः, प्रीतो वा, ब्राह्मणतन्वा शरीरेण 'वावृधानः' वर्द्धमानः 'आपृणत्' आपूरयति । 'रोदसी' द्यावापृथिव्यौ उभे अपि 'भूरिदात्रः' बहुदानश्च इन्द्रो दासमातिरत् । एवमत्र "विदद्वसुर्दयमानो विशत्रून्"—इति शत्रुसन्निधौ दयतेः किमन्यत् सामर्थ्यमुपपद्येतान्यत्र वधात् ?

"इ॒मे सु॒ता इन्द॑वः प्रा॒तरि॑त्व॒ना स॒जोष॑सा पिबतमश्विना॒ तान् । अ॒हं हि वां॑ मू॒तये॒ वन्द॑नाय॒ मां वा॑यसो॒ दो॒षा दयमानो अबूबुधत्"—इति । "दयमान इति" । अत्र दयतिर्गत्यर्थः । दयमान उड्डीयमानः काकोऽन्तरिक्षेणाधस्तात् मां सुप्तं दोषायामबोधयत् । मृग्योऽत्र शेषः ॥

---

19. (અનુ૦) दयते । શબ્દના અનેક અર્થો છે. જેમ કે, (૧) "નવા (ધાન્ય)થી પુરાતન (ધાન્ય)નું રક્ષણ કરનારા અમે થઈએ." અહીં ઉપદયા અર્થાત્ 'રક્ષણ કરવું' અર્થ છે. (૨) "(ઇન્દ્ર) જે એકલો જ (સ્વતન્ત્ર) છે અને વિવિધ ધનને આપે છે." અહીં दयते નો અર્થ ददाति (દાન આપે છે) થાય છે. અથવા તો (विद्रयते એવો ઉપસર્ગપૂર્વકનો શબ્દ લઈશું ત્યારે "તે ધન

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

વહેંચી આપે છે'' એવો) 'વિભાગ કરવો' અર્થ પણ થાય છે. (૩) ''દુર્વારણીય, ભયંકર (અગ્નિ) વનોને બાળે છે.'' અહીં दयतेનો અર્થ 'દહન કરવું' થાય છે. दुर्वर्तुः એટલે દુર્વાર = રોકી ન શકાય એવો. (૪) પ્રામધન (ઇન્દ્ર) ''શત્રુઓની વિવિધ રીતે હિંસા કરતો.'' અહીં दयते 'હિંસા' અર્થમાં છે. (૫) ''આ નીચોવવામાં આવેલ સોમરસ છે, સવારે આવનાર અને બળયુક્ત એવા હે બે અશ્વિનો ! તમે પીઓ. આ (સોમ) તમારા બેની રક્ષા અને વંદનને માટે છે. મને ઊડતા કાગડાઓ સવારે (दोषा—दोषायाम्) જગાડી દીધો.' અહીં दयमानः એટલે उड्डीयमानः (ઊડતા).

19. (વિમર્શ) √दय (दयते) આ ધાતુ અનેકાર્થક છે. દુર્ગ સ્પષ્ટતા કરે છે કે આ ધાતુ અનેક-વિકલ્પ-પ્રકૃતિ (અમુક અર્થ હશે અથવા અમુક અર્થ હશે-એમ અનેક વૈકલ્પિક અર્થ સૂચવતો ધાતુ) નથી. જેવી રીતે सुविते શબ્દ (सु + इते અથવા सूते) જુદા જુદા ધાતુને આધારે વિગૃહીત અનેકાર્થક દર્શાવ્યો હતો, એવો આ दयते શબ્દ (ક્રિયાપદ) નથી. અર્થાત્ આ એક પ્રકૃતિવાળો જ ધાતુ છે અને તેનો અનેક અર્થોમાં પ્રયોગ થયેલો જોવા મળે છે.

20. नूचित् ॥३०॥ इति निपातः पुराणनवयोः ॥

नू च ॥३१॥ इति च ॥ अद्या चिन्नू चित्तदपो नदीनाम् (ऋ. सं. ६/३०/३) । अद्य च पुरा च तदेव कर्म नदीनाम् । नू च पुरा च सदनं रयीणाम् (ऋ. सं. १/९६/७) अद्य च पुरा च सदनं रयीणाम् । रयिः (निघ. २/१०/८)इति धननाम ! रातेर्दानकर्मणः ॥

20. ''नू चित् (३०)''—इति । एषः ''निपातः'' अनेकार्थत्वेनेह समाम्नातः । न हि निपातानां प्रकृतिप्रत्ययादिसंस्कारोऽस्ति, यस्यानवगतं स्यात् । स च पुनरयं ''पुराणनवयोः'' अर्थयोर्वर्त्तते । प्रकरणोपपदवशात् पुराणतां कस्यचिदर्थस्यावद्योतयति, नवतां च कस्यचित् ॥

''नू च (३१)''—''इति च'' । अयमपि पुराणनवयोरर्थयोर्वर्त्तते । अयन्तु नू चिदित्येतस्यैवार्थसामान्यप्रसङ्गादसमाम्नात एवोदाहृतः ॥

नू चिदित्यस्योदाहरणम्,—''अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र । निपर्वता अद्मसदो न सेदुस्त्वया दृढानि सुक्रतो रजांसि ॥''—इति (ऋ० सं० ४, ७, २, ३) । भरद्वाजस्येयमार्षम् । त्रिष्टुप् । उक्थपय्यायिष्वच्छावाकस्य शस्त्रे माध्यन्दिने सवने विनियुक्ता । 'अद्य' च पुरा च, तदेव कर्म 'नदीनां' वर्त्तते । कतमत् ? 'तत्' उद्दिश्य वहनं कर्म । कथं नाम ? अस्य लोकस्योपकारायाजस्रमेता वहेयुरिति । 'गातुं' गमनमार्गम् 'आभ्यः' नदीभ्योऽर्थाय त्वम् 'अरदः' अखनस्त्वम् । किं गमनम् ? गच्छन्त्यनेनेति गमनम् । हे 'इन्द्र !' तदेव कर्माद्यापि वर्त्तते, तासां नदीनाम्, यथा व्यादिष्टमेव 'त्वया' । ताभिरद्यापि तदनुष्ठीयत इत्यभिप्रायः । यदुक्तं पुरस्तादपि, ''इन्द्रो अस्माँ अरदत्''—इत्यत्र । एवं तावदयं त्वयैव नद्यधीनेनोपकारेणानुगृह्यते लोकः । किञ्च, 'निपर्वता अद्मसदो न सेदुः' । यः एते 'पर्वताः' पर्ववन्तो मेघाः, 'अद्मसदः' निष्पादयितव्यमन्नमस्माभिरित्येतदर्थमुद्दिश्यान्तरिक्षे लोके सीदन्ति, अवतिष्ठन्ते, गच्छन्ति वा, तेऽपि युष्मद्वीर्य्योपमृदिता एवोदकभूताः, नीचैर्भूम्यामत्र, निष्पत्त्यर्थं 'सेदुः' सीदन्तीत्यर्थः । तदेवं कृत्वा (किं बहुना) सर्वथाप्युदकप्रदानद्वारेण त्वयैवैतानि, हे 'सुकर्मन् !' 'दृढानि' दृढीकृतानि 'रजांसि' लोका इत्यर्थः । त्वञ्चेदेषामेवमन्नमुदकञ्च न व्यधास्यः, सर्व एवैते लोका नाभविष्यन्नित्यभिप्रायः । इहाद्यैतस्य सन्निधौ वर्त्तमानो नूचिदित्येष पुराणाभिधायीत्युपपद्यते । इह पुराणनवयोरित्युक्तम्, तत्र पुराणाभिधायित्वस्यैतदुदाहरणम्, नवाभिधायिनः ''नू चिन्नु वायोरमृतं विदस्येत्'' अत्र हि वक्ष्यति,—'नवश्च पुराणश्चेति'' ॥

नू चेत्यस्योदाहरणम्,—''नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् । सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन् द्रविणोदाम् ।'' इति (ऋ० सं० १, ७, ४, २) । कुत्सस्येयमार्षम् । पृष्ठ्यस्य षष्ठेऽहनि अग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते । 'नू च पुरा च सदनम्' अद्य च पुरा च सदनम् । कस्य ? 'रयीणां' धनानाम् । किञ्च, 'जातस्य' उत्पन्नस्य 'जायमानस्य' 'च' अभिनिष्पद्यमानस्य भूतजातस्य 'क्षाम्' निवासमित्यर्थः । ''तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति विज्ञायते'' । ''यत्र गां शयानां निर्जगाति मृतामेतामद्विद्वान् मन्यतेऽन्वग्नौ ह्येवैते प्रविशन्तीति च विज्ञायते'' । तस्मादुपपद्यते स्थानत्वं निवासत्वं चाग्नेः । 'सतश्च' निष्पन्नस्य भूतजातस्य 'गोपा' गोप्तारम्, 'भवतश्च' उत्पद्यमानस्य 'भूरेः' बहुनः, गोप्तारमित्यनुवर्त्तते । य एवंलक्षणोऽग्निस्तं 'द्रविणोदां' धनस्य दातारम्, 'देवाः' 'धारयन्' धृतवन्त इत्यर्थः । क्व ? हविर्वहनकर्मणि ? ''अथा देवा दधिरे हव्यवाहम्''—इति वक्ष्यति । एवमिह पुरा चेत्यस्य सन्निधौ नू चेत्येष शब्दो वर्त्तमानो नवाभिधायीत्युपपद्यते । पुराणाभिधायित्वे पर्य्येष्यमस्योदाहरणम् ॥ १ (१७) ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

20. (અનુ૦) नूचित् એ નિપાત છે અને તેના બે અર્થો છે : ૧. પુરાતન અને ૨. નવીન. આજે અને પુરાતન કાળમાં નદીઓનું એ જ કર્મ (अपः) છે, नू च એ પણ નિપાત છે (અને તેના પણ પૂર્વોક્ત બે અર્થો છે). ''ધનોનું આજનું અને પુરાતન કાળનું નિવાસસ્થાન'' 'रयि' એ ધનનું નામ છે. દાનાર્થક √ रा ધાતુ ઉપરથી શબ્દ બન્યો છે.

20. (વિમર્શ) પહેલા મન્ત્રમાં नूचित् નિપાતની સાથે अद्या નો પ્રયોગ છે. તેથી नूचित् પુરાતન અર્થમાં છે એમ નક્કી થાય છે. તથા બીજા મન્ત્રમાં नू च નિપાતની સાથે पुरा નો પ્રયોગ છે, તેથી नू च અદ્યના અર્થમાં છે એમ નક્કી થાય છે. દુર્ગ કહે છે કે नूचित्‌નો 'अद्य' અર્થમાં અને नू च નો પુરાતન અર્થમાં જ્યાં પ્રયોગ થયો હોય એવાં ઉદાહરણો શોધવાં.

21. दावने ॥३२॥ अकूपारस्य ॥३३॥

विद्याम तस्य ते वयमकूपारस्य दावने (ऋ. सं. ५/३९/२) विद्याम तस्य ते वयम् अकूपरणस्य दानस्य । आदित्योऽपि अकूपारः उच्यते । अकूपारो भवति । दूरपारः । समुद्रोऽपि अकूपारः उच्यते । अकूपारो भवति । महापारः । कच्छपोऽपि अकूपार उच्यते । अकूपारः न कूपम् ऋच्छति इति । कच्छपः कच्छं पाति । कच्छेन पातीति वा । कच्छेन पिबतीति वा । कच्छः खच्छः । खच्छदः । अयमपीतरो नदीकच्छः एतस्मादेव । कम् उदकम् । तेन छाद्यते ॥

21. ''दावने (३२)''—इति । एतदनवगतम् । ''दानस्य''—इत्यवगमः । ''अकूपारस्य (३३)''—इति । एतदनवगतम् । अनेकार्थम् । ''अकुपरणस्य''—इत्यवगमः । द्वयोरप्येतयोरेक एव निगमः, ''यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर । विद्याम तस्य ते वयमकूपारस्य दावने ॥''—इति (ऋ० सं० ४, २, १०, २) । अत्रेर्भौमस्येयमार्षम् । अच्छावाकस्य तार्तीयसवनिके आवापे नियुक्ता, ''यदिन्द्रचित्र''—इति, इयश्च । हे 'इन्द्र !' 'यत्' 'मन्यसे' जानीषे त्वं 'वरेण्यं' वरणीयम्, एतद्धनमिति, 'द्युक्षं' च, यत् द्यतिनिवासभूतम्, द्युतिमदित्यर्थः । 'तत्' अस्मभ्यम् 'आहर' । कदाचित् त्वामहृत्यापि न दद्याः ? अतो ब्रूमः,—'तस्य' त्वयाहृतस्य धनस्य 'विद्याम' लभेमहि 'ते' तव स्वभूतस्य । किंलक्षणस्य ? 'अकूपारस्य' ''अकूपरणस्य'' अकुत्सितपूरणस्येत्यर्थः । येन लब्धेन सुपूर्णमात्मानं मन्यामहे पर्य्याप्तमैहिकाय च श्रेयसे आमुष्मिकाय चेत्यर्थः । 'दावने' ''दानस्य'' इत्यर्थः ॥ ईदृशस्य भावत्कस्य धनस्य वयमेव लब्धारः स्यामेत्यभिप्रायः । एवमिह यन्मन्यसे वरेण्यं, द्युक्षञ्च; तदाभरेति इन्द्र उच्यमानो धनसन्निधानाद् दानादन्यत् किमुच्यते ? धनमेव हि प्रायेण मनुष्यैः प्रार्थ्यते, तस्मादत्राश्रूयमाणोऽपि धनशब्दोऽध्याहृतः । तच्च पुनः प्रार्थ्यमानं बहु प्रार्थ्यते । तस्मादकूपारस्येत्येष शब्दोऽतिपरोक्षवृत्तिः । ''अकुपरणस्य''—इत्येवं परोक्षवृत्तित्वेनावस्थाप्य, ततः अकुत्सितपुरणस्य...इत्येवं प्रत्यक्षवृत्तित्वेन व्याख्यायते । अत्र कुरिति कुत्सार्थः, परणं पूरणमुच्यते, कुत्सितं परणं 'कुपरणम्' न कुत्सितं परणं 'अकुपरणम्' तस्य ''अकुपरणस्य'' प्रभूतस्येत्यर्थः ॥ दानसम्बधादेव ''दावने''—इत्येष शब्दो दानार्थ इत्युपपत्तिः । एतस्मिन् मन्त्रे ''अकूपारस्य, दावने''—इत्ययमनयोः पदयोरनुक्रमः, समाम्नाये पुनः ''दावने, अकूपारस्य''—इति मन्त्रपाठव्यतिक्रमेणानुक्रमः । तेन ज्ञायतेऽन्यैरेवायमृषिभिः समाम्नायः समाम्नातः, अन्य एव चायं भाष्यकार इति, एको हि समाम्नानं भाष्यं च कुर्वन्, प्रयोजनस्याभावादेकमन्त्रगतयोः पाठानुक्रमं नाभङ्क्ष्यत् । अविवक्षितार्थाश्चैते मन्त्रे निगमाः, तेषु सम्पत्त्या काकतालीयन्यायेन कस्मिंश्चिदेकस्मिन्नेव निगमे द्वे पदे अगच्छतस्ते यथोपागते एव भाष्यकारो व्याचष्टे इत्यदोषः ॥

''आदित्योऽप्यकूपारः''—इति ''उच्यते'' । किं कारणम् ? स हि अकुत्सितस्य महतोऽध्वनः पारयिता भवति, उदयादारभ्य यावदस्तमिति । ''समुद्रोऽप्यकूपार उच्यते'' असावपि ह्यकुत्सितपारः आत्मनैव भवति । ''महापारः''—इति पर्य्यायिणार्थवचनम्, विस्तीर्णपार इत्यर्थः । ''कच्छपोऽप्यकूपार उच्यते'' स हि ''न कूपमृच्छति'' अल्पोदकत्वात्, किं तर्हि ? यत्र बहुप्रकीर्णमुदकम्, तत् स्थानं गन्तुमिच्छति, समुद्रं नदीं वा । आख्यानप्रसक्तमुच्यते,—''कच्छपः'' ''कच्छम्'' आत्मनो मुखसम्पुटं ''पाति'' रक्षति, स हि किञ्चिद् दृष्ट्वा स्वशरीरे एव मुखसम्पुटं प्रवेशयति, सम्पुटे हि कच्छशब्दः प्रसिद्धः, प्राणि वाच्यः कच्छपुट इति च । ''कच्छेन'' कटाहेन इतराण्यङ्गानि पातीति वा, स हि किञ्चिद् दृष्ट्वा सर्वाण्यङ्गानि कटाह एवानुप्रवेश्य कूर्मत्वेनेवावतिष्ठते । अथ ''वा'' 'कच्छेन'' मुखसम्पुटेन ''पिबतीति'' कच्छपः । विग्रहप्रसक्तः कच्छशब्दो निरुच्यते,—य एष कच्छो मुखसम्पुटः कटाहो वायं कच्छः, आह किमुक्तं भवति ? ''खच्छः''—इत्युच्यते, स हि ''खच्छदः'' खम् आकाशं छादयति, स हि मध्ये सुस्थिरो भवति । ''अयमपीतरो नदीकच्छ एतस्मादेव'' कसञ्ज्ञकेन उदकेन ''छाद्यते'' इति कच्छः ॥

आदित्योऽप्यकूपारः, समुद्रोऽप्यकूपारः, कच्छपोऽप्यकुपारः—इत्येतेषु निगमाः पर्य्येष्याः ॥

21. (અનુ૦) ''(હે ઇન્દ્ર)! તમારા તે પ્રભૂત-પરિપૂર્ણ-દાનને (दावने) અમે જાણીએ છીએ.'' અહીં अकूपारस्यनो અર્થ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अकूपरणस्य (= પ્રભૂત-પરિપૂર્ણ થાય છે તથા દાવને નો અર્થ દાનસ્ય (દાનને) થાય છે. ૧. આદિત્યને પણ અકૂપાર કહે છે. કેમ કે તે અકૂપાર એટલે દૂરપાર (અર્થાત્ તે ઉદયથી આરંભીને અસ્ત સુધીમાં અકુત્સિત મહાન માર્ગને પાર કરનારો) છે. ૨. સમુદ્રને પણ અકૂપાર કહે છે, કેમ કે તે અકૂપાર એટલે મહાપાર (અર્થાત્ આ સમુદ્ર પણ અકુત્સિતપાર = વિસ્તીર્ણપાર = જેનો બીજો કિનારો ઘણો દૂર છે.') હોય છે. ૩. કચ્છપ (કાચબા)ને પણ અકૂપાર કહે છે. કૂવામાં (ઓછું પાણી હોવાને કારણે) જે ચાલતો નથી તે અકૂપાર (अ + कूप + अर). અહીં અકૂપાર એટલે કચ્છપ એવો અર્થ કર્યા પછી પ્રશ્ન થાય કે કચ્છપ એટલે શું ? (તો) કચ્છપ એટલે જે કચ્છ (મુખસમ્પુટ)નું રક્ષણ કરે છે તે, અથવા કચ્છ (પીઠ)થી પોતાનું રક્ષણ કરે છે તે; અથવા તો કચ્છ (મુખ)થી જે (જળ) પીએ છે તે. અહીં કચ્છ (કે જેનો અર્થ મુખ કે પીઠ થાય છે) તેને ખચ્છ કહે છે. ખચ્છ એટલે ખચ્છદ (અર્થાત્ જે આકાશને આચ્છાદિત કરે છે તે). આને આધારે જ નદીકચ્છ શબ્દને પણ સમજાવી શકાય છે. (નદીકચ્છ એટલે નદીની નજીકનો તટપ્રદેશ.) નદીના તટપ્રદેશને જળ (कम् = उदकम्) આચ્છાદિત કરે છે, માટે તેને માટે नदीकच्छ શબ્દ વપરાય છે.

21. **(વિમર્શ)** ઉપર્યુક્ત એક જ મન્ત્રમાં દાવને અને अकूपारस्य શબ્દો આવેલા હોઈ યાસ્ક તેમની સમજૂતી એક સાથે રજૂ કરે છે. ટીકાકાર સ્કન્દસ્વામી दावने શબ્દને સમજાવતાં લખે છે કે दावने—दीयते इति दावं = देयमुच्यते ॥ વળી, એ શબ્દની રૂપસિદ્ધિ વર્ણવતાં લખે છે કે दावने इत्यनवगतम् । दवातेः । 'आतो मनिन् क्वनिब्वनिपश्च' (पा. ३—२—७४) इति कर्मणि वनिप् प्रत्ययः । ततो 'दावत्' शब्दात् चतुर्थी, सा च षष्ठ्यर्थे द्वितीयार्थे वा । दानस्य दानं वा इत्यवगमः ॥ ત્યાર પછી, નિરુક્તમાં अकूपारस्य શબ્દ અતિપરોક્ષવૃત્તિવાળો છે. તેને अकूपरणस्य એવા પરોક્ષવૃત્તિવાળા શબ્દમાં ફેરવીને अकुत्सितपूरणस्य એવા પ્રત્યક્ષવૃત્તિવાળા શબ્દથી સમજાવવામાં આવ્યો છે. દુર્ગ કહે છે अत्र कुरिति कुत्सार्थः, परणं पूरणमुच्यते, कुत्सितं परणं कुपरम्, न कुत्सितं परणम्, अकुपरणम्, तस्य अकुपरणस्य प्रभूतस्येत्यर्थः ॥ આમ, અકુત્સિતપૂરણ એટલે પરિપૂર્ણ પ્રભૂત, પુષ્કળ એવો અર્થ થાય. ઋષિએ આ મન્ત્રમાં ઇન્દ્રને કહ્યું કે તમારા એ પરિપૂર્ણ દાનને અમે જાણીએ છીએ. અહીં દાનનો સંબંધ હોવાને કારણે દાવને શબ્દને દાનાર્થક સમજવામાં આવે છે. યાસ્કે अकूपारस्य શબ્દને अकूपरणस्य એમ કહીને સમજાવ્યા પછી અકૂપાર શબ્દની અનેક વ્યુત્પત્તિઓ આપીને તેને અનેકાર્થક દર્શાવ્યો છે. જેમ કે, ૧. અકુપાર એટલે આદિત્ય अ + कु (कुत्सित) + पार = દૂરપારઃ કેમ કે ઉદયથી આરંભીને અસ્ત સુધીમાં સૂર્ય અકુત્સિત અર્થાત્ મહાન માર્ગને પાર કરે છે. ૨. સમુદ્રનો સામો કિનારો ઘણો દૂર હોય છે માટે સમુદ્રને પણ આ જ રીતે અકૂપાર કહે છે. ૩. કાચબાને પણ અકૂપાર કહેવાશે. કેમ કે न कूपं ऋच्छति (अ + कूप + अर) એ વ્યુત્પત્તિ મુજબ કૂવામાં ઓછું જળ હોવાને કારણે કાચબો તેમાં ચાલી શકતો નથી, તે વાતને ધ્યાનમાં લઈને તેને અકૂપાર કહે છે. અહીં અકૂપાર શબ્દનો કચ્છપ પર્યાય આપ્યા પછી યાસ્કે 'કચ્છપ' શબ્દની પણ વ્યુત્પત્તિ વિચારી છે. (क) कच्छं पाति । (कच्छ + √ पा रक्षणे) કચ્છ એટલે મુખસમ્પુટ. ભયને જોઈને કાચબો પોતાના મુખસમ્પુટનું રક્ષણ કરવા તેને અંદર સંકોચી લે છે. માટે જે મુખસમ્પુટનું રક્ષણ કરે છે તે કચ્છપ. (ख) कच्छेन पाति । અહીં કચ્છ એટલે પીઠનો ભાગ. કાચબાની પીઠ ઘણી મજબૂત હોય છે એ આપણે જાણીએ છીએ. કાચબો પીઠથી પોતાનું રક્ષણ કરે છે માટે તેને કચ્છ કહેવાય છે. (ग) कच्छेन पिबति । અહીં કચ્છ એટલે મુખસમ્પુટ. પરંતુ અહીં √ पा रक्षणे ધાતુ નહીં લેતાં √ पा (पिब) પાને ધાતુ લેવામાં આવે છે. આ મુજબ જે મુખથી પાણી પીએ છે તે કચ્છપ. હવે 'કચ્છપ' શબ્દમાંનો 'કચ્છ' શબ્દ કેવી રીતે બન્યો ? તો જે આકાશને આચ્છાદિત કરે છે તે ખચ્છદ. ખચ્છદને જ 'ખચ્છ' કહે છે. તેમાં ધ્વનિપરિવર્તન થતાં કચ્છ શબ્દ બન્યો હશે. આમ ખચ્છ > કચ્છ = પીઠ. નદીકચ્છ જેવા શબ્દમાંનો 'કચ્છ' શબ્દ ધ્વનિપરિવર્તન વિના સમજાવી શકાય છે. જેમ કે कम् = उदकं येन छाद्यते तत् नदीतटमपि नदीकच्छ इति शब्देनोच्यते ॥

અહીં દુર્ગાચાર્યે એક અગત્યના મુદ્દા પરત્વે ધ્યાન દોર્યું છે : ''ઉપર્યુક્ત (विद्याम तस्य ते वयमकूपारस्य दावने ॥) મન્ત્રમાં अकूपारस्य અને दावने એવો પદોનો અનુક્રમ છે, જ્યારે સમામ્નાય (નિઘંટુ)માં दावने અને अकूपारस्य એવો ઊલટો અનુક્રમ છે. એથી સૂચિત થાય છે કે યાસ્ક સિવાયના અન્ય ઋષિઓ વડે તે નિઘંટુની રચના કરવામાં આવી હશે. જો સમામ્નાય (નિઘંટુ) અને ભાષ્ય (નિરુક્ત)નો એક જ કર્તા હોય તો પ્રયોજનના અભાવમાં એક જ મન્ત્રમાં આવેલાં પદોનો જે અનુક્રમ હોય તેનો ભંગ ન કરે.'' યાસ્ક અકૂપાર શબ્દને સમજાવવા જે મન્ત્ર ઉદ્ધૃત કરે છે, તેમાં શબ્દોનો ક્રમ કેવો છે એની તો એમને ખબર જ છે. તેથી વર્તમાન નિઘંટુ (કે જેમાં આ શબ્દોનો ક્રમ જુદો છે તે)ની રચના તો યાસ્કે ના જ કરી હોય. (દુર્ગઃ— एतस्मिन्मन्त्रे 'अकूपारस्य', 'दावने' इत्ययमनयोः पदयोरनुक्रमः, समाम्नाये पुनः 'दावने', 'अकूपारस्य' इति मन्त्रपाठव्यतिक्रमेणानुक्रमः । तेन ज्ञायतेऽन्यैरेवायमृषिभिः समाम्नायः समाम्नातः, अन्य एव चायं भाष्यकार इति, एको हि समाम्नायं भाष्यं च कुर्वन् प्रयोजनस्याभावादेकमन्त्रगतयोः पाठानुक्रमं नाभङ्क्ष्यत् ॥) આપણી પાસે જે નિઘંટુ ઉપલબ્ધ છે તેનો કર્તા યાસ્કથી ભિન્ન કોઈ ઋષિ કે ઋષિઓ હશે- એ પક્ષના સમર્થન માટે આ પ્રમાણ રજૂ કરવામાં આવે છે. [દુર્ગાચાર્યે તારવેલું આ અનુમાન ૭મા અધ્યાયના ત્રીજા પાદના અન્તે આવતાં યાસ્કનાં પોતાનાં વચનોથી વિરુદ્ધ જાય છે; આ અંગેની વિશેષ ચર્ચા ૭/૩માં જોઈશું.]

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

22. शिशीते ॥३४॥

शिशीते शृङ्गे रक्षसे विनिक्षे (ऋ. सं. ५/२/९) । निश्यति शृङ्गे रक्षसो विनिक्षणनाय । रक्षः रक्षितव्यम् अस्मात् । रहसि क्षणोति इति वा । रात्रौ नक्षते इति वा ॥

सुतुकः ॥३५॥

अग्निः सुतुकः सुतुकेभिरश्वैः (ऋ. सं. १०/३/७) ॥ सुतुकनः सुतुकनैः इति वा । सुप्रजाः सुप्रजोभिः इति वा ॥

सुप्रायणाः ॥३६॥

सुप्रायणाः अस्मिन्यज्ञे विश्रयन्ताम् (प्रैषः ६) । सुप्रगमनाः ॥

अप्रायुवः ॥३७॥

देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे (ऋ. सं. १/८९/१) । देवाः न यथा सदा वर्धनाय स्युः । अप्रायुवः अप्रमाद्यन्तः रक्षितारश्च अहनि अहनि ॥

च्यवनः ॥३८॥

च्यवनः ऋषिर्भवति । च्यावयिता स्तोमानाम् । च्यवानम् इत्यप्यस्य निगमा भवन्ति । युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः (ऋ. सं. १०/३९/४) । युवां च्यवानं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय ततक्षथुः । युवा प्रयौति कर्माणि । तक्षतिः करोतिकर्मा ॥

रजः ॥३९॥

रजः रजतेः । ज्योतिः रजः उच्यते । उदकं रजः उच्यते । लोकाः रजांसि उच्यन्ते । असृगहनी रजसी उच्येते ॥

हरः ॥४०॥

हरः हरतेः । ज्योतिः हरः उच्यते । उदकं हरः उच्यते । लोकाः हरांसि उच्यन्ते ॥

जुहुरे ॥४१॥

जुहुरे वि चितयन्तः (ऋ. सं. ५/११/२) । जुह्विरे विचेतयमानाः ॥

---

22. "शिशीते (३४)—इति । एतदनवगतम् । "निश्यति"—इत्यवगमः । "वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे ॥" (ऋ० सं० ३, ८, १५, ३) ।—इति निगमः । वृषो नाम जनपुत्रस्तस्येमाषम्, ओयिस्य वा कुमारस्य, उभयोर्वा । प्रातरनुवाकाश्विनयोः शस्यते । 'वि भाति' 'अग्निः' नानाप्रकारं भाति । केन ? 'बृहता ज्योतिषा' । स एवं विभासमानः किं करोति ? 'आविर्विश्वानि कृणुते' 'आविष्करोति' प्रकाशीकरोति 'विश्वानि' सर्वाणि भूतानि । 'महित्वा' महत्त्वेनेत्यर्थः । किञ्च, "प्रादेवीर्मायाः सहते" 'प्रसहते' प्रकर्षेणाभिभवति । किम् ? 'अदेवीर्मायाः' आसुरीरित्यर्थः । 'दूरेवा' दुरवाः, दुस्तर्पा वा, न ह्यग्नेस्तृप्तिरस्ति । किञ्च, 'शिशीते शृङ्गे' यथा हि वृषभस्तटान्निघ्नन् शृङ्गे तीक्ष्णीकरोति, एवमग्निरपि दारूणि दहंस्तीक्ष्णीकरोति ज्वालाः । कमर्थं पुरस्कृत्य ? "रक्षसो विनिक्षणाय" विहिंसनायेत्यर्थः ॥ अत्र शृङ्गशब्दसन्निधानात् 'शिशीते"—इत्यस्य तीक्ष्णार्थत्वम्, तीक्ष्णीकृतैर्ह्यर्चिर्भिर्विनिक्षणनमुपपद्यत इति ॥ निगमप्रसक्तमुच्यते,—रक्षः रक्षितव्यम्" हि शरीरमस्माद्भवति, रक्षो हि मानुषान् भक्षयति । "रहसि वा" विविक्ते प्रदेशे रक्षः "क्षणोति" हिनस्तीत्यर्थः । "रात्रौ नक्षते" गच्छति—"इति वा" रक्षः ॥

"सुतुके (३५)"—इति । एतदनवगतम् । पक्षेण चानेकार्थम् । "सुतुकनः"—इत्यवगमः, "सुतुकनैरिति वा" "स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः । अग्निः सुतुकः सुतुकेभिरश्वैरभस्वद्भी रभस्वाँ एह गम्याः ॥'—इति निगमः (ऋ० सं० ७, ५, ३१, ७) । त्रितस्येयमार्षम् आप्त्यस्य । प्रातरनुवाकाश्विनयोः शस्यते यस्त्वं 'दिवस्पृथिव्योः' 'युवत्योः'

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

सम्मिश्रीभवन्त्योः यानि भूतानि अन्तरा वर्त्तन्ते, तेषां सर्वेषाम् 'अरतिः' त्वमेवालमतिः, पर्य्याप्तमतिरित्यर्थः । 'सः' एवंलक्षणस्त्वमस्माकम् 'आवक्षि' आह्वयसि देवान्, 'महि' महत इत्यर्थः । स एवम् 'आसत्सि च' आसीदसि च होतृत्वे । 'अग्निः'—इत्येतत् पदं सम्बोधनत्वेन विपरिणम्यते, 'आ वक्षि'—'आ च सत्सि'—इति मध्यमपुरुषयोगान्मन्त्रस्य । हे अग्ने ! यस्त्वमेवङ्गुणयुक्तः 'सुतुकः' "सुतुकनः" सुगमन इत्यर्थः, अथा "सुप्रजाः" । तुगित्यपत्यनामसु पठितम् हिरण्यमपत्यमभिप्रेतमग्नेः, "हिरण्यरेता अग्निः" —इति श्रूयते, "अग्नेरपत्यं प्रथमं सुवर्णम्"—इति च । 'सुतुकैरेव' सुगमनैरश्वैः, अथवा "सुप्रजोभिः" कुलजैरित्यर्थः । अथवा शोभना प्रजा येषां ते सुप्रजाः, शोभनानामेवाश्वानां शोभनाः प्रजा भवन्तीति प्रजाद्वारेण चाग्निः स्तूयते । अथवा स एवाग्निः 'सुतुकः' "सुप्रजाः" अपत्यश्चास्य सर्वाः प्रजाः, ताश्च प्रति कल्याण इति "सुप्रजाः" । 'रभस्वद्भिः' त्वरितैः 'रभस्वान्' स्वयं च त्वरितः 'एह गम्याः' आगच्छस्त्वंहि कर्मणि, नित्यं हवींषि वोढुम्, कर्मैव तवेदमित्यभिप्रायः । एवमेतदिह "सुतुकः"—इत्यग्निविशेषणम्, सुतुकनैरश्वैरित्येतस्मात् तृतीयासम्बन्धादित्युपपत्तिः ॥

"सुप्रायणाः (३६)"—इति । एतदनवगतम् । "सुप्रगमनाः" इति शब्दप्रतीतिः । यज्ञगृहद्वारोऽभिधेया यास्कमतेन, शाकपूणेस्तु अर्चिषः । "होता यक्षद्दुर ऋष्वा कवष्योऽकोषधावनीरुदाताभिर्जिहतां वि पक्षोभिः श्रयन्तां सुप्रायणा अस्मन् यज्ञे विश्रयन्तामृतावृधो व्यन्त्वाज्यस्य होतर्यज ॥"—इति निगमः (य० का० सं० वा० सं० २८, ५) । मैत्रावरुणो ब्रवीति,—'होता यक्षत्' होता यजतु । किम् ? एताः 'दुरः' यज्ञगृहद्वारः, अथवैता अग्न्यर्चिषः । 'ऋष्वाः' महत्यः, अथवा हिंस्राः, द्वार्य्येव हि यो निवारणीयः, सं हिंस्यते, अर्चिषान्तु हिंसत्वमुपपद्यत एव । 'कवष्यः' विकर्त्तिताः, कुषिता इत्यर्थः, कपाटवत्यो वा यज्ञगृहद्वारः । 'अकोषधावनीः' अकोशधावनीः, तासु हि संवृतासु द्रव्यकोशाः सुरक्षा भवन्ति, अर्चिष्वपि हविः प्रक्षिप्तं नान्यतो धावति, किं तर्हि ? देवानेव प्राप्नोति, एतदकोषधावनीत्वमर्चिषाम् । एवंलक्षणा एता द्वारः, अर्चिषो वा 'उदाताभिर्जिहताम्' 'उज्जिहताम्' उत्तिष्ठन्त 'आताभिः' दिग्भिः, 'विश्रयन्ताम्' च 'पक्षोभिः' विव्रियन्ते कवाटसंवरणैः द्वारः, अर्चिषस्तु हविषोऽनुप्रवेशार्थम् पक्षोभिः स्वैरेवावयवैर्विश्रयन्ताम् । विवृताश्च सत्यः 'सुप्रायणाः' "सुप्रगमनाः" भवन्तु ऋत्विजं प्रति द्वारः, अथ पुनरर्चिषस्ततो हविषः सुप्रगमनाः सन्तु । सामान्यमेवेदमाशास्तं यत्, पुनस्तस्मिन्नेव वर्त्तमाने कर्मण्याशास्ते,—'अस्मिन् यज्ञे, विश्रयन्तां' विव्रियन्ताम् 'ऋतावृधः' यज्ञवर्द्धयित्र्यः । या एता एवंलक्षणा द्वारः, अर्चिषो वा, ता अस्याः 'आज्यस्य व्यन्तु' य आसां स्वांशः, तं पिबन्तु । हे 'होतः !' त्वमपि मया प्रेषितः 'यज' एताः ॥ एवमेषः 'सुप्रायणाः'—इति दुरामर्चिषां वा सन्निधौ श्रूयमाणः सुप्रगमनाभिधायीत्युपपद्यते ॥ २ (१८) ॥

"अप्रायुवः (३७)"—इति । एतदनवगतम् । "अप्रमाद्यन्तः"—इत्येवमर्थप्रतीतिः । "आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सद मिद् वृधे असन्नप्रायुवो रक्षितारो दिवे-दिवे ॥"—इति निगमः (ऋ० सं० १, ६, १५, १) । गोतमस्येयमार्षम् । अग्निष्टोमे महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते । 'आ यन्तु' उपयन्तु, अस्माकं 'भद्राः' भन्दनीयाः, स्तुत्याः । 'क्रतवः' सोमक्रतवः, कामा वा । 'विश्वतः' सर्वतः, सर्वदैव यथाविहितेषु कालेषु । 'अदब्धासः' अनुपहताः, अविगुणाः, कैश्चिदपि दस्युभिः । 'अपरीतासः' अपरिप्राप्तपूर्वाः, अस्मच्छत्रुभिः । 'उद्भिदश्च' उद्भेत्तारः, एषां त्रयाणामपि लोकानाम्, येषां फलैनैतान् त्रीनपि लोकानुद्भिन्दीमहि, ते आगच्छन्तु । किञ्च, तथा च तेऽत्यर्थमविगुणा आगच्छन्तु, 'यथा' तैः परितोषिताः सन्तः 'देवाः' सदैव नित्यमेवास्माकं वर्द्धनायोद्यताः 'असन्' स्युरित्यर्थः, भाष्येऽपि "स्युः"—इत्येष पाठः । 'अप्रायुवः' अप्रमाद्यन्तः, प्रमादमकुर्वाणाः, असम्मुह्यमाना इत्यर्थः । वर्द्धयितारो 'रक्षितारः' च । 'दिवेदिवे' अहन्यहनि यथा स्युस्तथा ते सोमक्रतवः, सगुणाः कामा वा आगच्छन्तु । अत्र "अप्रायुवो रक्षितारः"—इति रक्षितृशब्देन समानार्थसन्निवेशादप्रायुवशब्दस्याप्रमादार्थत्वम्, रक्षणे हि सत्यप्रमादस्येष्टत्वात् ॥

"च्यवनः(३८)"—इति । एतदनवगतम् । "च्यावनः"—इत्येवमर्थप्रतीतिः । "ऋषिर्भवति"—इत्यभिधेयवचनम् "च्यवानम्"—"इति" एवम् "अप्यस्य" ऋषेर्भृगुपुत्रस्य छन्दसि "निगमाः" सन्ति । च्यवन इति प्रसिद्धमेवेति कृत्वा निगमं न पठति, इतरथा त्वप्रसिद्धमल्पप्रयोगश्चैतदिति कृत्वा पठति,—"युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत् ता वां सवनेषु प्रवाच्या ॥"—इति (ऋ० सं० ७, ८, १५, ४) । काक्षीवत्या घोषायाः इयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते । अश्विनावुच्येते,—हे अश्विनौ ! "युवां" 'च्यवानम्' ऋषिं च्यावयितारं स्तोमानाम् । 'सनयं' वृद्धं गमनासमर्थं सन्तम् 'यथा' चिरन्तनं 'रथं' गमनासमर्थं कश्चिच्छिल्पी गमनसमर्थं कुर्य्यात्, एवं 'पुनः युवानम्' च्यवनमृषिं 'चरथाय' गमनार्थम् 'तक्षथुः' कृतवन्तौ स्थ इत्यर्थः । किञ्च, 'निष्टौग्र्यमूहथुः' निरूहथुः, निर्वहतवन्तौ स्थः, 'तौग्र्यं' तुग्राणामपां सङ्घातं मेघानाम् । क्व पुनः निरूहथुः ? 'अद्भ्यस्परि' चिरन्तनीनामन्यासामपामुपरि, अनुपक्षीणास्वेवान्यासु वार्षिकास्वप्सु, तासामेवोपरि लोकानुग्रहार्थमन्यमुदकसङ्घातं निरूहथुः । तान्येवमादीनि कर्माणि 'विश्वा' विश्वानि, सर्वाणि । युवयोः 'सवनेषु'

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

यज्ञेषु, प्रातःसवनादिषु वा 'प्रवाच्या' प्रकर्षेण वचनीयानि स्तोतॄणाम् ॥ एवमेतस्मिन् मन्त्रे "च्यवानः"—शब्देन च्यवन एव ऋषिरुक्तः, स हि श्रूयते सौकन्ये आख्याने,—जीर्णः सन्नश्विभ्यां पुनर्युवाकृत इति । तस्मादुपपद्यते 'निगमप्रसक्तमुच्यते,—"युवा, प्रयौति कर्माणि" मिश्रयति । "तक्षतिः करोतिकर्मा" करोतीत्यर्थः ॥

"रजः (३९)"—इति । अनेकार्थम् "रजतेः"—इति व्युत्पत्तिः ॥ "ज्योती रज उच्यते" तद्धि अनुरञ्जयति द्रव्याणि स्वेन प्रकाशेन । "या ते॑ अग्ने रजःशया तनूः"—इत्येवमाद्युदाहरणं द्रष्टव्यम् । भाष्यकारस्तु प्रचुरत्वादेतेषु निगमान् न पठति ॥

"उदकं रज उच्यते" तदपि हि स्वेन स्नेहाख्येन गुणेनानुरञ्जयति । "भुवो॑ य॒ज्ञस्य॒ रज॑सश्च ने॒ता यत्रा॑ नि॒युद्भिः॒ सच॑से शि॒वाभिः॑ । दि॒वि मू॒र्धानं॑ दधिषे स्व॒र्षां जि॒ह्वाम॑ग्ने चकृषे हव्य॒वाह॑म् ॥"—इति निगमः (ऋ० सं० ७, ६, ४, ६) । हे अग्ने ! त्वमेवास्य 'यज्ञस्य' 'भुवः' पृथिवीलोकादमुं लोकं 'नेता' । रजसः उदकस्य च नेता, "अग्निर्वा इतो वृष्टिं समीरयति"—इति हि वक्ष्यति । क्व पुनर्नेता ? 'यत्र' यस्मिन् लोके 'नियुद्भिः' अश्वजातिभिः 'शिवाभिः' सुखतमाभिः सहितं 'वायुम्' अन्तरिक्षस्थानं 'सचसे' संसेवसे तोयम्, तत्र नेता, मध्यस्थानानां देवानां स्थितये । किञ्च, त्वमेव 'दिवि' अवस्थितः सर्वभूतमूर्द्धानं 'दधिषे' धारयसि । यज्ञाभिनिष्पन्नेनेतो लोकाद्धृतेन हविषा 'स्वः' स्वराख्यमादित्यम् । किञ्च, त्वमेव एतां 'जिह्वां' ज्वालाम् अत्यद्भुताम्, आत्मनः सकाशात् 'चकृषे' पुनः पुनः करोषि । यः अस्मत्प्रदत्तानि हवींषि उपक्षिपति, यस्त्वमेवङ्गुणयुक्तस्तं त्वां वयमेतस्मिन् कर्मणि 'हव्यवाहं' हविषां वोढारम्, अनेन पुरोडाशाख्येन 'हविषा' यजामः । पौर्णमासस्याग्नेयस्य हविषो याज्यैषा ॥

"लोका रजांस्युच्यन्ते" तेष्वपि हि प्राणिनो रज्यन्ते । "त्वया॑ दृ॒ळ्हानि सुक्रतो॒ रजां॑सि" (ऋ० सं० ४, ७, २, ३)—इति व्याख्यातो निगमः ॥

"असृगहनी, रजसी उच्येते" । असृग् रुधिरम्, असृक् च अहश्च असृगहनी, ते अपि रजसी उच्येते । "मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति"—इति रुधिरस्योदाहरणम् । "अह॑श्च कृ॒ष्णमह॒रर्जु॑नञ्च"—इत्यह्न उदाहरणम् ॥

"हरः (४०)"—इत्येतदनेकार्थम् । "हरतः"—इति व्युत्पत्तिः । "ज्योतिर्हर उच्यते" तद्धि ह्रियते, हरति वा स्नेहम्, विरूक्षीकरोति । हरति वा तम इति हरः । "या ते अग्ने हरःशया तनूः" "अ॒ग्ने यत्ते॒ हर॒स्तेन॒ तं प्रति॑ हर"—इत्येवमादयः प्रचुरा एव निगमा इति अत्रापि भाष्यकारो न पठति ॥

"उदकं हर उच्यते' तद्धि ह्रियते प्राणिभिः जीवनाय ॥

"लोका हरांस्युच्यन्ते" तेभ्यो हि क्षीणपुण्याः प्राणिनो ह्रियन्ते ॥

"जुहुरे (४१)"—इति । एतदनवगतम् । "जुह्विरे"—इत्यवगमः । "जु॒हु॒रे वि॒चि॒तय॑न्तोऽनिमि॒षं नृ॒म्णं पा॑न्ति । आ दृ॒ळ्हां पु॑रं विविशुः ॥"—इति (ऋ० सं० ४, १, ११, २) । वव्रेरात्रेयस्यार्षम् । जुहुरे, जुह्विरे, जुह्वति । योऽग्निं 'विचितयन्तः' "विचेतयमानाः" कर्मकर्तृसाधनानां याथार्थ्यं वेदान्तदर्शनेन जानानाः, ये च नराः 'अनिमिषम्' आदरवदवस्थानमात्मनः कृत्वा युक्तात्मानो 'नृम्णं' योगबलमात्मनः कर्मणि वर्त्तमाने 'पान्ति' रक्षन्तीत्यर्थः । आह,—ये एवं गुणयुक्ताः, किं तेषाम् ? इति । उच्यते,—'आ दृढां पुरं विविशुः' ते 'दृढां' नित्यम्, अनावृत्तये परब्रह्ममयीं 'पुरम्' इमामदृढां शरीरपुरं पापिष्ठां हित्वेत्यभिप्रायः ॥ विचेतयमाना हि वेदप्रामाणिकाः सन्तो हवनादृते किमन्यत् कुर्य्युः, येन दृढां पुरमाविशेयुः ? शब्दसारूप्यमपि च "जुहुरे"— इत्येतस्मिंच्छब्देऽस्त्येव । प्रकरणाच्चेयमाग्नेयी ऋक् । तस्मात् "जुहुरे"—इत्येष शब्दो हवनार्थ एवेत्युपपद्यते ॥

---

22. **(અનુ૦)** (૩૪) "અગ્નિદેવ રાક્ષસોનો વિનાશ કરવા માટે (પોતાના જ્વાળાઓ રૂપી) શીંગડાને તીક્ષ્ણ કરે છે." અહીં शिशीते એટલે निश्यति = તીક્ષ્ણ કરે છે અને विनिक्षे એટલે विनिक्षणनाय = વિનાશ કરવા માટે. મન્ત્રાર્થ આમ થશે : રાક્ષસોનો વિનાશ કરવા માટે બે શીંગડાને તીક્ષ્ણ કરે છે. અહીં रक्षस् એટલે रक्षितव्यमस्माद् । જેનાથી (આપણા માનવ શરીરનું) રક્ષણ કરવું જોઈએ તે रक्षस् અથવા रहसि क्षणोति । અર્થાત્ જે એકાંતમાં નાશ કરે છે તે रक्षस्. અથવા रात्रौ नक्षते । અર્થાત્ જે રાત્રિમાં જાય છે તે रक्षस्.

(૩૫) "સારા ગમનવાળો અગ્નિ સારી ગતિવાળા અશ્વો વડે (અહીં આવે)." અહીં सुतुकः એટલે सुतुकनः (सुगमनः) અને सुतुकेभिः એટલે सुतुकनैः (सुगमनैः) અથવા તો તેમનો सुप्रजाः અને सुप्रजोभिः એવા અર્થો પણ થઈ શકે. (અર્થાત્ અગ્નિ સારી પ્રજાવાળો છે અને તે ઊંચા કુળમાં જન્મેલા ઘોડાઓ વડે અહીં આવે).

(૩૬) "આ યજ્ઞમાં સારી ગતિવાળા વિશ્રામ પામો." અહીં 'सुप्रायणा'નો અર્થ 'સારી ઝડપી ગતિવાળા' એવો થાય છે. [અહીં દુર્ગ विश्रयन्ताम् નો અર્થ विव्रियन्ताम् એવો કરે છે. એ મુજબ "જેમાં સારી ગતિ થઈ શકે એવા દ્વારો' (= सुप्रायणा = સુગમના), (ઋત્વિજ્‌ને માટે) આ યજ્ઞમાં ખૂલી જાય" એવો મન્ત્રાર્થ થશે.]

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(૩૭) "જેથી (બધા) દેવો સદાય અમારી વૃદ્ધિ માટે (ઉદ્યત) બની રહે અને તે અપ્રમાદી દેવો રોજેરોજ અમારા રક્ષક બની રહે." દેવો સદાય અમારી સમૃદ્ધિ માટે (ઉદ્યત) હો. પ્રમાદ નહીં કરતા એ દેવો પ્રતિદિન અમારા રક્ષક બની રહો. અહીં अप्रायुः શબ્દનો अप्रमाद्यन्तः અર્થ થાય છે.

(૩૮) 'ચ્યવન' એ ઋષિનું નામ છે. પરંતુ એ શબ્દનો અર્થ 'સ્તોમ (સ્તુતિઓનો) ચ્યાવયિતા અર્થાત્ સંગ્રાહક' થાય છે. (ચ્યવન'ની જેમ) 'च्यवानम्' શબ્દનો વેદમાં પ્રયોગ થયેલો જોવા મળે છે : "જેવી રીતે પુરાણા રથને ફરી શકે એ માટે નવો બનાવી દીધો, એવી રીતે ચ્યવાન (અથવા જીર્ણ થઈ ગયેલા) ઋષિને ચાલી શકે એ માટે યુવાન બનાવી દીધા." તમે બન્નેએ (અશ્વિનોએ) ચ્યવાનને સનય અર્થાત્ પુરાણા રથની જેમ ફરવા માટે ફરીથી યુવાન કરી દીધા. અહીં યુવા એટલે જે કર્મોને મિશ્ર કરે છે તે. (અર્થાત્ એક પછી બીજું, બીજા પછી ત્રીજું- એમ સતત કર્મ કરનારને યુવા કહે છે). ततक्षथुःમાં तक्षति > √ तक्ष ધાતુ 'કરવું' અર્થમાં છે.

(૩૯) रजः શબ્દ (નિઘંટુમાં બતાવેલા ૨-૧૪-૪૭) √ रज ધાતુ ઉપરથી (અથવા √ रञ्ज 'રંગવું' ધાતુ ઉપરથી) બન્યો છે. (रजः શબ્દના અનેક અર્થો છે. જેમ કે,) ૧. જ્યોતિને રજસ્ કહે છે. ૨. જળને રજસ્ કહે છે. ૩. (પૃથિવ્યાદિ) લોકોને રજસ્ કહે છે. ૪. રુધિરને રજસ્ કહે છે. અથવા ૫. દિવસને રજસ્ કહે છે. "વિવિધ પ્રકારનાં જળ વિસ્તાર પામતાં ચારે તરફ ફરી રહ્યાં છે" એવો મન્ત્ર પણ મળી આવે છે.

(૪૦) હરસ્ શબ્દ √ हृ > हरति ઉપરથી બન્યો છે. જ્યોતિને (પ્રકાશને) હરસ્ કહે છે. (કારણ કે તે તેલ વગેરે સ્નિગ્ધ પદાર્થોને વિરુક્ષ કરે છે અથવા અંધકારને હરી લે છે.) જળને હરસ્ કહે છે. પૃથિવ્યાદિ લોકોને હરસ્ કહે છે. "હે અગ્નિ ! તમારા તેજથી (દુષ્ટોના) તેજનો નાશ કરો." એવો મન્ત્ર પણ મળે છે.

(૪૧) जुहुरे એટલે जुह्विरे (जुह्वति). વેદને પ્રમાણ ગણનારાઓ હવન કરે છે. અહીં विचितयन्तः નો અર્થ विचेतयमानाः (વેદ પ્રામાણિકો અથવા જાણનારાઓ-જ્ઞાનીઓ) એવો થાય છે.

22. (વિમર્શ) शिशीते શબ્દને નિશ્ચયતિથી સમજાવ્યો છે. અહીં આચાર્ય વિશ્વેશ્વર જણાવે છે કે 'તીક્ષ્ણ કરવું' અર્થમાં √ शी तनुकरणे ધાતુનો પ્રયોગ થાય છે. પરંતુ યાસ્કે નિશ્યતિ રૂપ આપ્યું છે, તેનાથી એવું લાગે છે કે જુહોત્યાદિ ગણના √ शी ધાતુથી शिशीते પદ બનાવ્યું છે. अप्रायुवः (૩૭) શબ્દને સમજાવવા જે મન્ત્ર ઉદ્ધૃત કર્યો છે તેમાં असन् પદને બદલે असनः હોવું જોઈએ. असन् એ પ્રમાદજનિતપાઠ છે એમ દુર્ગ કહે છે. 'ચ્યવન' શબ્દનો પ્રયોગ પ્રસિદ્ધ હોઈ યાસ્કે તેનું ઉદાહરણ આપ્યું નથી. આને બદલે 'ચ્યવાનમ્'નો જ્યાં પ્રયોગ છે એવા મન્ત્રને તેમણે નોંધ્યો છે. આ મન્ત્રમાંનો 'युवा' શબ્દ √ यु मिश्रणामिश्रणयोः ધાતુને ઉણાદિ પ્રત્યય कनिन् લાગીને બન્યો છે. આથી કર્મોનું મિશ્રણ કરનારને અર્થાત્ એક પછી બીજું કાર્ય કરનારને 'યુવા' કહે છે. रजः અને हरः શબ્દો અનેકાર્થક છે પણ તે દરેકના પ્રયોગ પ્રચૂરમાત્રામાં મળતા હોઈ યાસ્કે તેમનાં ઉદાહરણો આપ્યાં નથી.

---

23. व्यन्तः ॥ ४२ ॥

व्यन्तः इत्येषोऽनेककर्मा । पदं देवस्य नमसा व्यन्तः (ऋ. सं. ६/१/४) । इति पश्यतिकर्मा । वीहि शूर पूरोळांशम् (ऋ. सं. ३/४१/३) । इति खादतिकर्मा । वीतं पातं पयस उस्रियायाः (ऋ. सं. १/१५३/४) । अश्नीतं पिबतं पयसः उस्रियायाः । उस्त्रिया इति गोनाम । उस्राविण्योऽस्यां भोगाः ॥

क्राणा ॥ ४३ ॥

त्वामिन्द्र मतिभिः सुते सुनीथासो वसूयवः । गोभिः क्राणाः अनूषत ॥ गोभिः कुर्वाणाः अस्तोषत । आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः । (ऋ. सं. १०/१०१/१०) । आसिञ्च हरिं द्रोः उपस्थे । द्रुममयस्य । हरिः सोमो हरितवर्णः । अयमपीतरो हरिः एतस्मादेव ॥

वाशी ॥ ४४ ॥

वाशीभिस्तक्षताश्मन्मयीभिः । वाशीभिः अश्ममयीभिः इति वा । वाग्भिः इति वा ॥

विषुणः ॥ ४५ ॥

स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः (ऋ. सं. ७/२१/५) । स उत्सहतां यो विषुणस्य जन्तोः । विषमस्य । मा शिश्नदेवाः । अब्रह्मचर्याः । शिश्नं श्नथतेः । अपि गुर्ऋतं नः । सत्यं वा यज्ञं वा ॥

जामि ॥ ४६ ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि । उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् (ऋ. सं. १०/१०/१०) । आगमिष्यन्ति तानि उत्तराणि युगानि यत्र जामयः करिष्यन्ति अजामिकर्माणि । जामि अतिरेकनाम । बालिशस्य वा । असमानजातीयस्य वा । मिः उपजनः । उपधेहि वृषभाय बाहुम् । अन्यमिच्छस्व सुभगे पतिं मत् इति व्याख्यातम् ॥

23. "व्यन्तः (४२)"—इत्येषोऽनेककर्मा । यस्माद्धातोरयं शब्दो निष्पद्यते, स धातुरनेककर्मा, अनेकार्थः । "वी गतिप्रजननकान्त्यशनखादनेषु (अदा० प०)"—इति । तद्यथा—"पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् । नामानि चिद् दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥"—(ऋ० सं० ४, ४, ३५, ४) । इत्यत्र "पश्यतिकर्मा" । भरद्वाजस्येयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते, पशौ च विनियुक्ता । 'पदं' स्थानम्, अवस्थानं याथार्थ्यम्, 'अग्नेः' 'देवस्य' दानादिगुणयुक्तस्य 'व्यन्तः' पश्यन्तो जानानाः । केन ? 'नमसा' नमस्करेण, 'स्तुत्या' मन्त्रेणेत्यर्थः । मन्त्रार्थपरिज्ञानादेव ह्यग्नेराध्यात्माधिभूताधि- यज्ञेष्ववस्थानं याथार्थ्यतो दृश्यते । पदशब्दो हि स्थाने प्रसिद्धः, पदस्थोऽयमिति हि वक्तारो भवन्ति लोके । अथवा 'नमसा' अन्नेन, अन्नमात्मनः प्रार्थयमानाः । य एवमग्नेः स्तुतिभिर्विद्वांसो याथार्थ्यम्, अन्नैर्वा अभ्युद्यतैः श्रव इच्छमानाः पश्यन्तोऽग्निमुपासते । किन्तेषाम् ? इति । उच्यते,— 'श्रव आपन्' । किंलक्षणं पुनराप्नुवन्ति ? 'अमृक्तम्' अमृदितम्, अनुपभुक्तमन्यैः । किञ्च, 'नामानि चित्' ये चैते ग्रन्थमात्राध्येतारः, केवलच्छान्दसाः, नामान्यपि च मन्त्रभावेनावस्थितानि धारयन्ति, अनर्थज्ञाः, 'यज्ञियानि' यज्ञार्हाणि, तेऽपि "भद्रायां' भन्दनीयायाम्, अग्नेः 'सन्दृष्टौ' सन्दर्शने 'रणयन्त' रमयन्त्यात्मानम् । तानपि भद्रेव चक्षुषा पश्यत्येवाग्निरित्यभिप्रायः ॥

एवमेतस्मिन् मन्त्रे "पदं देवस्य नमसा व्यन्तः श्रवयस्वः श्रव आपन्"—इत्येतेषां पदानामेकवाक्ययोगात् "व्यन्तः"—इत्यस्य शब्दस्य पश्यत्यर्थोऽप्युपपद्यते ॥

"इमा ब्रह्म ब्रह्मवाहः क्रियन्त आ बर्हिः सीद । वीहि शूर पुरोडाशम् ॥"—इति (ऋ० सं० ३, ३, ३, ३) । इत्यत्र "खादतिकर्मा" । विश्वामित्रस्येयमार्षम् । रात्रिपर्य्यायेषु महारात्रिके पर्य्याये ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता । 'इमा' इमानि, 'ब्रह्म' ब्रह्माणि, ऋग्यजुःसामाख्यानि स्वरसौष्ठवादियुक्तानि, अस्माभिः ब्रह्मणोऽस्य हविषः वहनसमर्थानि, त्वां प्रतिक्रियन्ते, उच्यन्त इत्यर्थः । यज्ञो ब्रवीति,—हे इन्द्र ! 'आ बर्हिः सीद' आसीदेदं बर्हिः प्रति । आसीनश्चैतस्मिन् बर्हिषि, 'वीहि' भक्षय एतमस्मत्प्रदत्त हे 'शूर' ! 'पुरोडाशम्' ॥ एवमेतस्मिन् मन्त्रे "वीहि शूर पुरोडाशम्"—इत्येतस्मादेकवाक्यसंयोगात् "वीहि"— इत्येष शब्दः खादनार्थः प्रतीयति, किमयं बर्हिष्यासीन इन्द्रः पुरोडाशस्यान्यत्र भक्षणात् कुर्य्यात् ? प्रसिद्धश्च लोके कठिनद्रव्यस्य भक्षणम्, भक्षयति मोदकादीनि । तस्मात् सामर्थ्याद्भक्षणार्थोऽयमित्युपपद्यते ॥

"वीतं पातं पयसः"—इत्यत्राशनार्थः । "उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः । उ तो नो अस्य पूर्व्यः पतिर्दन् वीतं पातं पयस उस्रियायाः ॥"—इति (ऋ० सं० २, २, २३, ४) । मैत्रावरुण्येषा । त्रिष्टुप् । दीर्घतमस आर्षम् । मित्रावरुणावुच्येते,—'उत वां' अपि युवयोः, एतासु 'विक्षु मद्यासु' एतेषु मनुष्येषु मदयितृषु वर्त्तमानमेतत् 'अन्धः' हविर्लक्षणम्, यदि तस्मिन्नहनि मनुष्यैः भवद्भ्यां देयं पयस्याख्यम् आज्याख्यञ्च । तदेव 'गावः' एताः 'च आपः' 'देवीः' दानादिगुणयुक्ताः । आसां गवामुपकारं कुर्वन्त्यः, "पीपयन्त' वर्द्धयन्तीत्यर्थः । यदेतदशनपानयोग्यम्, आज्यं सान्नाय्यलक्षणम् आभिरद्भिर्गोभिश्च युवयोरन्धो वर्ध्यति । 'उतो न अस्य' अप्यस्य हविषोऽस्मत्पूर्वो यजमानः पतिः । पूर्वं हि द्रव्यस्य यजमानः पतिर्भवति, तदनन्तरं स तद् ऋत्विग्भ्यः समर्पयति—'देवतायै संस्कुरुतैतत्'—इति, ततस्ते तस्य हविषः पतयो भवन्ति । तानपेक्ष्य यजमानः 'पूर्व्यः पतिः' । तदपेक्षयैव ऋत्विज आहुः,—योऽस्मत्तः 'पूर्व्यः पतिः' अस्य हविषः, सः 'दन्' भवति, ददादित्यर्थः । तेनाप्येतद् भवन्तावेवोद्दिश्य स्यात् प्रत्युत्सृष्टम् । एवमपि सदत्र भवत्यपि वयं यथा व्यादिष्टमेव तेन पूर्वेण हविःपतिना भवद्भ्यामेतद्भ्यः । तौ युवामस्य हविषः, 'पयसः' पयस्याख्यस्य, 'उस्रियायाः' पायसा निष्पन्नस्य, नातिकठिनस्य अशनयोग्यस्य स्वं भागमस्माभिर्दीयमानं 'वीतम्' अश्नीतं युवामित्यर्थः । पिबतं च यदेतदाज्यस्य स्वं भागम् उपस्तरणाभिधारणसम्बद्धम् । एवमस्मिन् मन्त्रे 'उस्रियायाः पयसा निष्पन्नस्य'—इति श्रूयमाणे पयस्याज्ये प्रतीयेते, तयोराज्यं पेयम्, तत् 'पातम्'—इत्यनेन सम्बध्यते, पारिशेष्यात् 'वीतम्'—इत्यस्य शब्दस्य पयस्यया सह सम्बन्धः, सा च नातिकठिना, नातिद्रवा, अशनयोग्या, तस्मात् "वीतम्"—प्रत्येष शब्दोऽशनार्थ इत्युपपद्यते, लोकेऽपि हि नातिकठिने नातिद्रवे अश्नातिशब्दः प्रसिद्धः,—'अश्नाति पायसम्'—इति ॥ निगमप्रसक्तमुच्यते,—"उस्रियेति गोनाम" "उत्स्राविणः" हि तस्याः सकाशात् क्षीरादयः "भोगाः" भवन्ति ॥

"क्राणाः" (४३)—इति । एतदनवगतम् । "कुर्वाणाः"—इत्यर्थप्रतीतिः । "गोभिः क्राणा अनुषते"—इति निगमः । "गोभिः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कुर्वाणा अस्तोषत''—इति निर्वचनम्, त्वामिन्द्रेति शेषः ॥ ''त्वामिन्द्र मतिभिः सुते सुनीथासो वसूयवः । गोभिः क्राणा अनुषत ॥''—इति । हे 'इन्द्र !' त्वमस्मिन् सोमे 'मतिभिः' मतिमद्भिः 'सुते' मेधाविभिरभिषुते सोमे, य एव हि मतिमन्तः, त एव हि सोममभिषोतुं शक्नुवन्ति, नेतरे मतिहीनाः । 'सुनीथासः' सुष्ठ ये स्तोतुं शक्नुवन्ति, ते सुनीथाः । 'वसूयवः' वसुकामाः । आह,—किमेते कुर्वन्ति, मतिभिः सुते मेधाविभिरभिषुते सोमे ? उच्यते—'गोभिः' वाग्भिः, स्तुतिलक्षणाभिः । अस्मिन्नभिषुते सोमे, आभिमुख्येन ''कुर्वाणाः'' 'अनुषत'' ''अस्तोषत'' स्तुवन्तीत्यर्थः । अभिषुतेषु सोमेषु किमन्यदाभिमुख्येन करणाद् इन्द्रस्य गोभिः सुनीथाः स्तुवन्तः कुर्य्युः, तस्मात् ''क्राणाः''—इत्येष शब्दः, ''कुर्वाणाः''—इत्येवमुपपद्यते ॥

''वाशी (४४)''—इति । एतदनवगतम् । पक्षेण च अनेकार्थम् । ''वाशीभिरश्ममयीभिरिति वा, वाग्भिरिति वा'' इति शब्दसमाधी । ''वाश्यः'' एवाभिधेयाः, वाच्याः वा । ''आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः । परिष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त ॥''—इति (ऋ० सं० ८, ५, १९, ४) । बुधस्य सोमपुत्रस्यार्षम् । 'आसिञ्च' प्रक्षिप, एतं 'हरिं' हरितवर्णं सोमम् । क्व ? 'द्रोरुपस्थे' द्रुममयस्याधिषवणफलकद्वयस्योपरि । एवं तावदध्वर्य्युरुक्तः, स हि सोममुपावहरति । अधुनेतरानभिषवकर्तॄन् ब्रवीति,—यूयमपि अनेनाध्वर्य्युणोपावहृतमेनं सोममधिषवणफलकयोरुपरि 'वाशीभिः' एताभिः 'अश्मन्मयीभिः' ''अश्ममयीभिः'' 'तक्षत' संस्कुरुत, अभिषुणुतेत्यर्थः, ''ग्रावभिरभिषुण्वन्ति''—इति ह्युक्तम् । अथवाऽयमन्योऽस्यार्द्धस्यार्थः,—हे उन्नेतः ! 'आसिञ्च' प्रक्षारय, तं हरितवर्णं सोममनेन कलशेन । क्व ? 'द्रोरुपस्थे' द्रोणकलशस्योपरि । यूयमपि च हे होतारः ! आसिच्यमानम् एनं सोमं 'वाशीभिः' ''वाग्भिः'' स्तुतिलक्षणाभिः पुनीतेत्यभिप्रायः । 'अश्मन्मयीभिः' व्यापनसमर्थाभिरित्यर्थः । यूयमपि हे अध्वर्य्यवः ! पूतमेतद्धातृभिः, सोमं 'परिष्वजध्वं' ग्रहेषु, स्थालीषु च । 'कक्ष्याभिः' अङ्गुलीभिः, अङ्गुलिभिरेव हि पात्रस्थः सोमो गृह्यते । यदेव चेदं ग्रहणमेष एव तस्य परिष्वङ्गः । परिष्वज्य च गृहीत्वा एनं सोमम् 'उभे' हविर्द्धानि-'धुरौ' 'प्रति' 'वह्निम्' इव, वोढारमिव, अनड्वाहं 'युनक्त' एनं सोमं सादयतेत्यर्थः । स हि सोमो हविर्द्धानधुरोः अधस्तात् खरे साद्यते । एतस्मादेव चानुडुद्योजनदेशं प्रति सामान्याद्वह्निमिव युनक्तेति लुप्तोपममुपपद्यते । अत्र ''वाशीभिस्तक्षते''—इति लक्षणयोगात् अश्ममय्यो वाश्य एता ग्रावाख्या इति प्रथमस्यार्थस्योपपत्तिः ॥ एतस्मिन्नर्थे 'आ तू षिञ्च'—इत्यासेकशब्दो गौणः, न हि सोमांशूनाम् अनभिषुतानाम् आसेकोऽस्ति कठिनत्वात्, तस्मादेतस्मिन्नर्थे प्रक्षेपणमात्रमेव सिञ्चतेरर्थः । अथवा 'आसिञ्चत हरिं द्रोरुपस्थे'—इत्यतोऽनन्तरं वाशी शब्दः श्रूयमाणो वाङ्नामधेयत्वेनाप्युपपद्यते एव, सोमो हि द्रोणकलशस्योपरि आसिच्यमाने वाग्भिः स्तूयते । एवमर्थद्वयमभिप्रेत्य उभयथा भाष्यकारेणोक्तम्,—''वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा''—इति ॥

''अयमपीतरो हरिः'' मर्कटः, ''एतस्मादेव'' इति, हरितवर्णत्वाद्धरिरुच्यते, ''शिरीषकुसुमप्रख्याः केचित् पिङ्गलकप्रभाः, वानराः''—इति श्रूयन्ते रामायणे ॥

''विषुणस्य (४५)''—इति । एतदनवगतम् । ''विषमस्य''—इत्यवगमः । ''न यातव इन्द्र जूजुवर्नो न वन्दना शविष्ठ वेद्याभिः । स शर्द्धदर्य्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥''—इति (ऋ० सं० ५, ३, ३, ५) । वसिष्ठस्येयमार्षम् । त्रिष्टुप् । उन्नीयमानसूक्ते माध्यन्दिने सवने शस्यते । हे भगवन् ! ''इन्द्र !'' तथा, कुरु यथा 'न' इममस्मद्यज्ञं 'यातवः' यातयितारः, यज्ञविघ्नकर्त्तारः, केचिदपि 'जूजुवुः' आगच्छेयुरित्यर्थः ? किञ्च, हे 'शविष्ठ' बलिष्ठ ! य एते 'वन्दनाः' वन्दितारः, लाड(ट?)गौडादयः, जानपदीभि 'वेद्याभिः' आकृतिभिर्युक्ताः, किं ब्राह्मणाः एते स्युः, उतान्यजातीयाः केचिदिति ? अथवा आवेदितव्याभिः प्रवृत्तिभिः युक्ताः न हि तासां प्रवृत्तीनामन्तोऽस्ति, याभिस्ते प्रवर्त्तन्ते चपलत्वात् । किञ्च, येऽपि चैते श्रोत्रिया अपि सन्तः 'शिश्नदेवाः' शिश्ने नित्यमेव प्रक्रीणीभिः स्त्रीभिः साकं क्रीडन्त आसते, श्रौतानि कर्माणि उत्सृज्य, तेऽपि युष्मदनुग्रहादिदमस्माकम् 'ऋतं' यज्ञम् 'मा अपिगुः' मा आगच्छन्तु, नास्माकं तैरपि यज्ञमभिगच्छद्भिरर्थोऽस्तीत्यभिप्रायः । आह,—कीदृशास्तर्हि यज्ञमागच्छन्त्विति ? उच्यते,—'स शर्द्धत' स एवोत्सहतामिममस्मद्यज्ञमागन्तुम्, य एव 'अर्य्यः' ईश्वर आत्मीयानामिन्द्रियाणाम्, जितेन्द्रिय इत्यर्थः । यश्च 'विषुणस्य' ''विषमस्य'' यज्ञविध्वंसयितुः 'जन्तोः' मनुष्यस्य निग्रहाय समर्थः, येन परिपाल्यमाना एतं यज्ञमविघ्नेन समापयेमहीत्यभिप्रायः ॥ एवमेतस्मिन् मन्त्रे ''यातवो वन्दनाः शिश्नदेवाश्च मा आगच्छन्तु''—इति प्रतिषिद्धेष्वेतेषु अनिष्टत्वादेतेषां 'स शर्द्धदर्य्यः'—इति श्रूयमाणामर्य्यवृत्तमनुष्याभ्यागमनविषयमेतद्भवति, तस्येष्टत्वात्, स चाभ्यागतः सन्नवश्यं 'विषुणस्य' ''विषमस्य'' मनुष्यस्य निग्रहं करोति, तस्मात् ''विषुणस्य शब्दो विषमस्येत्युपपद्यते । यदा तु ऋतशब्दस्य ''सत्यं वा''—इत्येतदर्थवचनं भवति तदाऽस्माकम् 'ऋतं' सत्यम्, एवंलक्षणाः पापकर्माणः 'मा अपिगुः'—इत्येवं योज्यम् । अपिगुरिति चैष गमिस्तदा ज्ञानार्थः । एवमप्युपपद्यत इत्यतो भाष्यकारेणोक्तम्, —''सत्यं वा यज्ञं वा''—इति ॥ ३ (१९) ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"जामि (४६)"—इति । एतदनेकार्थम् । भगिनी, बालिशः, पुनरुक्तञ्चास्याभिधेयानि । प्रकरणादेवेतेषामन्यतममस्मिन्नवतिष्ठते । यथानेन तावद्भगिन्युच्यते, तथेदमुदाहरणम्,—"आ घा ता०—०मत्"—इति (ऋ० सं० ७, ६, ७, ५) । इयं यमी किल यमं प्रार्थयाञ्चकार,—एहि मैथुनाय सङ्गच्छावहा इति, तामकामयमानोऽसावनयर्चा प्रत्युवाच,—'आ घा ता गच्छान्' । 'घा'—इत्यनर्थक एव, "आगच्छान्' आगमिष्यन्तीत्यर्थः । आह, कानि ? उच्यते,— 'ताः' "तानि उत्तराणि युगानि आगमिष्यन्ति" तेऽपि काला न तावत् साम्प्रतं वर्त्तते इत्यभिप्रायः । येषु किम् ? 'यत्र' येषु 'जामयः' भगिन्यः भ्रातृणाम् "अजामि"—योग्यानि मैथुनसम्बन्धानि "कर्माणि" "करिष्यन्ति" कलियुगान्ते हि तादृशः सङ्करो भवति, न चेदं कलियुगं वर्त्तते इत्यभिप्रायः । यतो न तावदद्यापि सङ्कीर्णो वर्णसङ्करधर्मः स्वाचारा एव तावत् प्रजाः । अतो ब्रवीमि,—'उप बर्बृहि' उपधेहि । कस्मै ? 'वृषभाय' तवोपरि रेतःसेक्तुमन्यकुलजो योग्यः, तस्मै । किमुपबर्बृहि ? इति 'बाहुम्' । शयनीये सर्वथा प्रार्थ्यमानोऽप्यहं तव पतिः न भविष्यामीति । यतो ब्रवीमि,—'अन्यमिच्छस्व' अन्यमन्वेषयस्व । हे 'सुभगे !' 'पति' 'मत्' मत्त इत्यर्थः ॥ एतमेतस्मिन् मन्त्रे, सूक्ते वा संवादाधिकाराज्जामिशब्देन भगिन्युच्यते इत्युपपद्यते ॥

"जामि"—इत्येतदेव स्वरान्तशब्दरूपम् "अतिरेकनाम" भवति, पुनरुक्तनामेत्यर्थः । तदुत्तरत्र लक्षणतो भविष्यति, "तद् यत् समान्यामृचि समानाभिव्याहारं भवति, तत् जामि भवति"—इति पुनरुक्ताभिधानत्वेन । जामिशब्दस्य पर्य्येष्यो निगमः ॥

"बालिशस्य वा" बालिशस्यैतदेव नाम । बालिशो मूर्खः, स हि बाल इव शेते, प्रमादित्वाद्धर्मकार्य्येषु । एतस्यापि पर्य्येष्यो निगमः ॥

"असमानजातीयस्य वा" असमानजातीयो हि पुरुषस्य भगिन्याख्यो भ्राता, सा हि स्त्रीत्वादेवातुल्यजातीयैव पुरुषस्य भवति । जामिरित्येतस्मिन् शब्दे 'मिः'—इत्येषः "उपजनः" यदेवोक्तं भवति 'जा'—इति, तदेव जामीति । उभयथापि मन्त्रे प्रयोगो द्रष्टव्यः । "अन्यमिच्छस्व सुभगे । पतिं मत्—इति व्याख्यातम्" । निगदसिद्धमेवैतदित्यर्थः । अथवैतानि पदान्यधस्तात् तत्र तत्र व्याख्यातानि, तद् यथा,—"अन्यो नानेयः"—इत्येवमादि उपेक्षितव्यम् ॥ ४ (२०) ॥

---

23. (અનુ૦) (૪૨) व्यन्तः । એ શબ્દમાંનો √वी (गतिप्रजननकान्त्यसनखादनेषु) ધાતુ અનેકાર્થક છે : ૧. "નમસ્કાર વડે (અગ્નિ) દેવનું સ્થાન જોતાં..." આ ઉદાહરણમાં √वी ધાતુ 'જોવું' અર્થમાં છે. ૨. "હે શૂર ! પુરોડાશને તું ખા." આ ઉદાહરણમાં તે ધાતુ "ખાવું" અર્થમાં છે. ૩. ગાયના (उस्रियायाः) દૂધને ખાઓ-પીઓ." અહીં वीतं એટલે अश्नीत (युवाम्)—તમે ખાઓ, અને पातं એટલે पिबतम् (युवाम्)— તમે પીઓ એવા અર્થો થાય છે. उस्रिया શબ્દ ગાયનો વાચક છે. કેમકે તેમાં અનેક ભોગો વહે છે, ઢળે છે. उस्रा શબ્દનો અર્થ પણ 'ગાય' થાય છે.

(૪૩) "હે ઇન્દ્ર ! બુદ્ધિ વડે (અર્થાત્ બુદ્ધિશાળીઓ વડે) સોમરસ નીચોવ્યા પછી, સારી રીતે સ્તુતિ કરવા જેઓ શક્તિમાન (सुनीथासः) છે અને જેઓ ધનની કામનાવાળા (वसूयवः) છે તેમણે વાણી વડે (गोभिः) (પ્રશંસા) કરતાં તમારી સ્તુતિ કરી." અહીં क्राणा નો અર્થ कुर्वाणा થાય છે. (તેમણે) સ્તુતિઓ વડે પ્રશંસા કરતાં (તમને) ખુશ કર્યા.

(૪૪) "લાકડાની બેઠક ઉપર સોમનું સિંચન કરો, પથ્થરના દસ્તા (પરાઈ) વડે તે (સોમ)ને તૈયાર કરો." હરિને અર્થાત્ હરિતવર્ણના સોમરસને લાકડાની બેઠક ઉપર સિંચો. द्रोः એટલે દ્રુમમય. (લાકડાની બનેલી).'हरि' સોમરસનું નામ છે, કારણ કે તે હરિતવર્ણનો હોય છે. બીજો (વાનરાદિનો વાચક જે) 'हरि' શબ્દ છે તે પણ આ જ કારણે (હરિતવર્ણનો હોવાને કારણે 'हरि' કહેવાય છે). (અહીં वाशी શબ્દ અનવગત સંસ્કારવાળો અને અનેકાર્થક છે તેથી) वाशीभिः એટલે अश्ममयीभिः (પથ્થરનો દસ્તો કે પરાઈ, તેના વડે) અથવા वाग्भिः (વાણી અર્થાત્ સ્તુતિઓ વડે).

(૪૫) "જે ઈશ્વર (अर्यः) વિષમ જંતુને વિશે (= દુષ્ટ પુરુષોને દંડ આપવા માટે) સમર્થ (शर्द्धत) હોય તે જ (અમારા યજ્ઞમાં) આવવા જોઈએ; પરંતુ જે શિશ્નદેવો હોય તે અમારા ઋત (યજ્ઞ)માં ન આવે (मा अपि गुः)." તે જ (અમારા યજ્ઞમાં આવવાની) હિંમત કરે કે જે विषुणस्य जन्तोः અર્થાત્ વિષમ જન્તુને (દૂર કરવા સમર્થ હોય). શિશ્નદેવો અર્થાત્ અબ્રહ્મચારીઓ (આવી હિંમત ન કરે). 'शिश्न' શબ્દ વધાર્થક √श्नथ ધાતુ ઉપરથી બન્યો છે. अपिगुः ऋतं नः । આ ચરણમાં આવેલ ऋत શબ્દનો અર્થ સત્ય કે યજ્ઞ થાય છે.

(૪૬) (યમ યમીને કહે છે :) "હવે પછી એવા યુગો આવશે કે જેમાં સ્વજનો (जामयः) જ પારકા જનો જેવાં કાર્યો કરશે. હે સુભગે ! (અન્ય) પુરુષ (વૃષભ)ને માટે તારો બાહુ લંબાવ. મારા સિવાય બીજા કોઈ પતિની તું ઇચ્છા કર." અહીં आगच्छान् એટલે आगमिष्यति અર્થાત્ હવે પછી એવા યુગો આવશે કે જેમાં જામિઓ (સ્વજનો/બહેનો) અજામિકાર્યો (ભાઈ સાથે મૈથુનસંબંધાદિ કાર્યો) કરશે. (જામિ શબ્દ અનેકાર્થક છે. જેમકે,) જામિ એ ૧. અતિરેકનું નામ છે (અર્થાત્ મર્યાદાના અતિક્રમણને જામિ કહે છે). અથવા તો ૨. જે બાલિશ (મૂર્ખ) હોય તેને જામિ કહે છે. અથવા ૩. અસમાન જાતિની જે હોય તેને જામિ કહે

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

છે (સ્ત્રીને પુરુષની અસમાન જાતિ કહેવાય). જામિ શબ્દમાં મિ એ ઉપજન છે. વૃષભ (પુરુષ)ને માટે (તારો) બહુ લંબાવ. સુભગે ! મારા સિવાય અન્ય પુરુષની પતિ તરીકે તું ઇચ્છા કર.

23. (વિમર્શ) 'જામિ' શબ્દ અનેકાર્થક છે. યાસ્કે તેના ત્રણ અર્થો આપ્યા છે. ૧. અતિરેક. મર્યાદાના અતિક્રમણને અતિરેક કર્યો કહેવાય. જેમ કે ભાઈ-બહેન ભેગા મળી મૈથુનકાર્ય કરે તો તે મર્યાદાનું અતિક્રમણ કર્યું કહેવાય. ૨. બાલિશતા (મૂર્ખતા). ધર્મકાર્યોમાં પ્રમાદને કારણે જે બાલકની જેમ શયન કરે છે તેને (बाल इव शेते) 'બાલિશ' કહેવાય, ૩. અસમાનજાતીય અર્થમાં जा ને मि ઉપજન (આગમ) થયો છે. પુરુષની અસમાનજાતીય (વિજાતીય) સ્ત્રી કહેવાય. આમ પ્રજા અર્થવાળા जा ને અસમાનજાતીય અર્થમાં અર્થાત્ 'स्त्री' અર્થમાં मि આગમ થઈને जामि શબ્દ બન્યો છે. આથી 'જામિ' શબ્દનો ત્રીજો અર્થ 'બહેન' થશે.

યાસ્કે 'જામિ' શબ્દના વિવિધ અર્થો બતાવવા માટે ઋગ્વેદના પ્રસિદ્ધ યમ-યમી સૂક્તમાંથી ઉપર્યુક્ત મન્ત્ર (૧૦-૧૦-૧૦) આપ્યો છે. યમ-યમી સૂર્યના સંતાન હોઈ તેમને ભાઈ-બહેન ગણવામાં આવ્યાં છે. યમી પોતાના ભાઈ યમને મૈથુનસંબંધે પોતાની સાથે જોડાવા માંગણી કરે છે. પરંતુ યમ તે માંગણીનો અસ્વીકાર કરે છે અને તે સન્દર્ભમાં ઉપર્યુક્ત મન્ત્ર બોલે છે. આચાર્ય વિશ્વેશ્વરને આ મન્ત્રનો ઉપર્યુક્ત પ્રચલિત અર્થ અસંગત લાગે છે. તેમણે આ સૂક્તમાંથી આધ્યાત્મિક અર્થ કાઢી બતાવવાનો પ્રશસ્ય પ્રયત્ન કર્યો છે. તેમણે યમ-યમીને પતિ-પત્ની તરીકે સાબિત કરીને જણાવ્યું છે કે પુરુષ પ્રકૃતિનો સ્વામી (પતિ) છે અને પ્રકૃતિ તેની પત્ની છે. પુરુષ ભોક્તા છે અને પ્રકૃતિ ભોગ્ય છે. પુરુષ દ્રષ્ટા છે અને પ્રકૃતિ દૃશ્ય છે. પ્રકૃતિ પુરુષને આકર્ષિત કરે છે, ભોગ ભોગવવા આમંત્રિત કરે છે. પુરુષ તેનાથી બચવા ઇચ્છે છે અને એ રીતે મોક્ષપ્રાપ્તિનો પ્રયત્ન કરે છે. આ આધ્યાત્મિક રહસ્યને આ સૂક્તમાં યમ-યમીના સંવાદ રૂપે મૂકવામાં આવ્યું છે.

---

24. पिता ॥ ४७ ॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् । उत्तानयोश्चम्वो३र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् (ऋ. सं. १/१६४/३३) । द्यौर्मे पिता । पाता वा । पालयिता वा । जनयिता । नाभिः अत्र । बन्धुर्मे माता पृथिवी महती इयम् । बन्धुः संबन्धनात् । नाभिः संनहनात् । नाभ्या संनद्धा गर्भा जायन्ते इत्याहुः । एतस्मादेव ज्ञातीन् सनाभयः इत्याचक्षते । सबन्धवः इति च । ज्ञातिः संज्ञानात् । उत्तानयोश्चम्वोः योनिरन्तः । उतानः उत्ततानः ऊर्ध्वतानो वा । तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः ॥

---

24. "पिता (४७)"—इति । एतदनवगतम् । "पाता वा पालयिता वा"—इत्यवगमः । "द्यौर्मे पिता"—इति (ऋ० सं० २, ३, २०, ३) । इयमस्यवामीयं दीर्घतमस आर्षम् । तृतीयसवने वैश्वदेवे शस्यते । 'द्यौर्मे पिता' येयं द्यौः, उपरि स्थिता द्युलोकाख्या, एष एव मम पिता । द्यौरहमित्येवं वैवाहिके कर्मणि द्युलोकभावेन पित्रा आत्मानमभिसम्पाद्यमानं दृष्ट्वैवमाह मन्त्रदृक्'—'द्यौर्मे पिता'—इति । 'जनिता' जनयिता, उत्पादयितेत्यर्थः । आह,—कथम् ? उच्यते,—'नाभिरत्र' नहनमेव नाभिः, अत्र एतस्मिन् द्युलोकलक्षणे पितर्युदकदानेनानुग्रहीतरि सति सन्तानोत्पत्त्यनुग्रहक्रमेणैव शुक्रात्मनोत्पत्तिरुपपद्यते.—इत्येवमभिसमीक्ष्योक्तम् 'द्यौर्मे पिता, जनिता, नाभिरत्र'—इति । 'बन्धुः मे' अङ्गसम्बन्धकारणाद् बन्धुः मे 'माता पृथिवी महीयम्'—इति मातुर्मन्त्रेण पृथिवीत्वं सम्पाद्यमानं दृष्ट्वैवमाह,—'बन्धुर्मे माता पृथिवी महीयम्'—इति । उदकं हि द्युलोकात् पतितम्, पार्थिवेन धातुना सम्पृक्तम्, ओषधिभावमागम्य, शरीरभावेनावतिष्ठते.—इत्येतदपेक्ष्य सर्वभूतानां द्यावापृथिव्यौ मातापितरौ उच्येते तत्र तत्र । तद्यथा,—"द्वे सुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरञ्च ॥"—इति (ऋ० सं० ८, ४,१२, ५) । इत्येवमादि । तत्कृतस्य ह्युपकारस्याभावे सतीतरौ मातापितरावकिञ्चित्करावेव भवतः । तस्मादुपपद्यते द्यावापृथिव्योर्मातृपितृभावः । आह,—किमेते द्यावापृथिव्यौ अन्यत् किञ्चदपेक्ष्यैव सर्वभूतानां मातृपितृभावं बिभृतः, उत अन्यदपि किञ्चिदनपेक्षेते ? इति । उच्यते,—अनयोः 'चम्वोः' द्यावापृथिव्योः 'उत्तानयोः' ऊद्ध्र्वमिव ह्येनयोः अन्तरा च प्रतिधारणीयोऽन्तः प्राणः तत इति उत्ताने द्यावापृथिव्यौ, प्राणेन हीमे वायुना सूत्रभूतेन विधृते तिष्ठतः, एतयोः द्यावापृथिव्योरुत्तानयोः य एषोऽन्तरिक्षाख्यः 'अन्तः' मध्ये योनिः' 'अत्र' एतस्मिन्नवकाशदानोपकारप्रवृत्ते सति 'पिता' "पर्जन्यः" द्युलोकाख्यः, द्यौरेव हि रसान् प्रार्जयति, तस्मात् सैवात्र पर्जन्यशब्देन भाष्यकारेणोक्ता । 'दुहितुः' "पृथिव्याः" उपरि 'गर्भं' सर्वभूतगर्भोत्पत्तिहेतुभूतोदकम् 'आधात्' आदधाति, ददातीत्यर्थः । अत्र पृथिव्येव दुहितृशब्देनोक्ता सा हि द्युलोकात् 'दूरे निहिता' अथवा सा हि द्युलोकं 'दोग्धीति' दुहिता,—सा हि द्युलोकात् पतितमुदकमुपजीवत्येवादूरे निहिता, दोग्धि वा ॥ एवं द्यावापृथिवीभ्यामन्तरिक्षेण चावकाशदानेनानुगृह्यमाणान्येतान्यस्मदादीनि भूतान्युत्पद्यन्त इति एतदनेन मन्त्रेण मन्त्रदृशा ख्यापितम् । अत्र मातृपितृसम्बन्धात् पितृशब्दः पितर्य्येवेत्युपपत्तिः । पिता माता चायमेतदाशासनं मन्येत ॥

Vasant Bhatt Collection, Gujarat

 CC-0. In Public Domain.Digitized by eGangotri.

24. **(અનુ૦)** "દ્યુલોક મને જન્મ આપનાર પિતા છે, (સમાન) નાભિવાળા માણસો મારા બાંધવો છે અને મોટી પૃથિવી મારી માતા છે. ચારે તરફ ફેલાયેલ બે ચમૂઓની અર્થાત્ દ્યાવાપૃથિવીના મધ્યભાગ (અન્તરિક્ષ)ની યોનિ છે. પિતાએ (પર્જન્યે) પુત્રી (પૃથિવી)ને ગર્ભ ધારણ કરાવ્યો." 'દ્યુલોક મારા પિતા છે' અહીં પિતા એટલે રક્ષક અથવા પાલન કરનાર એવા અર્થો થાય છે અને તે પિતા જ જન્મ આપનાર (પણ) છે. (સમાન) નાભિને (અર્થાત્ સહોદરને 'બન્ધુ' કહે છે. આ મોટી પૃથિવી મારી માતા છે. અહીં 'બન્ધુ' શબ્દ 'સંબંધ'ને કારણે બન્યો છે. અર્થાત્ જે સારી રીતે બંધાયેલો હોય તે 'સં-બંધને "બન્ધુ" કહે છે) 'નાભિ' શબ્દ સન્નહનને કારણે બન્યો છે. (અર્થાત્ નાભિ શબ્દ √णह બંધને ધાતુ ઉપરથી બન્યો છે.) એવું કહેવાય છે કે નાભિની સાથે બંધાયેલો ગર્ભ (બાળક) જન્મે છે, આ કારણે જ જ્ઞાતિજનોને સનાભિઓ કે સબન્ધુ (સમાન 'સંબંધવાળા) કહેવામાં આવે છે. જ્ઞાતિ શબ્દ સારી રીતે જાણતા હોવાને કારણે બન્યો છે. (અર્થાત્ જે પરસ્પરને સારી રીતે જાણે છે તેને 'જ્ઞાતિ' કહેવાય) ઉપર્યુક્ત મન્ત્રમાં उत्तानयोश्चम्वोः योनिरन्तः । માં उत्तान એટલે उत्ततान (ચારે તરફ ફેલાયેલ) અથવા ऊर्ध्वतानः (ઉપર સુધી ફેલાયેલ) એવો અર્થ થાય છે, 'પિતા દુહિતામાં ગર્ભાધાન કરે છે' એનો અર્થ પર્જન્ય પૃથિવીમાં (જળસિંચન કરે છે).

24. **(વિમર્શ)** અહીં 'પિતા' શબ્દ અનવગતાર્થ છે. યાસ્કે તેનો √पा रक्षणे અને √पा पालने એવા ધાતુઓથી पाता કે पालयिता એવા બે અર્થો કરી બતાવ્યા છે. દુર્ગાચાર્યે આ શબ્દનો જ્યાં પ્રયોગ થયો છે તે ઉપરના મન્ત્રના સન્દર્ભમાં લખ્યું છે કે દ્યુલોકમાંથી પડેલું જળ પાર્થિવ ધાતુની સાથે સંપૃક્ત થઈને ઔષધિભાવને પામી શરીર રૂપે અવસ્થિત રહે છે. આ જોઈને બધા ભૂતોના દ્યાવાપૃથિવી માતાપિતા છે એમ કહેવામાં આવ્યું છે. બીજું અહીં, પિતા દ્યુલોકને પર્જન્ય કહેવામાં આવે છે, આ પર્જન્ય દુહિતા પૃથિવી ઉપર ગર્ભનું આધાન કરે છે એનો અર્થ એ કે બધા ભૂતોની ઉત્પત્તિમાં કારણભૂત એવા ઉદકને પર્જન્ય પૃથિવી ઉપર વર્ષાવે છે. અહીં પૃથિવીને દુહિતા કહેવામાં આવી છે. કારણ કે તે જ દ્યુલોકથી દૂર આવેલી (दूरे निहिता) છે. અથવા તો તે પૃથિવી દ્યુલોકને દોહે છે अथ वा सा हि द्युलोकं दोग्धि).

---

25. शंयोः ॥ ४८ ॥

शंयुः सुखंयुः । अथा नः शं योररपो दधात (ऋ. सं. १०/१५/४) । रपो रिप्रम् इति पापनामनी भवतः । शमनं च रोगाणां यावनं च भयानाम् । अथापि शंयुः बार्हस्पत्यः उच्यते । तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये (मैत्रा. सं. ४/१३/१०) इत्यपि निगमो भवति । गमनं यज्ञाय गमनं यज्ञपतये ॥

चतुर्थः पादः

अदितिः ॥ ४९ ॥

अदितिः अदीना । देवमाता । अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् (ऋ. सं. १/८९/१०) ॥ इत्यदितेर्विभूतिमाचष्टे । एनानि अदीनानि इति वा ।

एरिरे ॥ ५० ॥ यमेरिरे भृगवः (ऋ. सं. १/१४३/४) ॥ इति ईर्तिः उपसृष्टोऽभ्यस्तः ॥

---

25. "शंयोः (४८)"—इति । एतदनवगतम् । पञ्चम्यन्तं वा षष्ठ्यन्तं वा सत् । निगमश्चैषः,—"बर्हिषदः पितर उत्यर्वागिमा वो हव्या चकृया जुषध्वम् । त आ गतावसा शन्तमेनाथा नः शंयोररपो दधात ॥"—इति (ऋ० सं० ७, ६, १७, ४) । न चैवं यजमानोऽर्थात्तस्माद् बृहस्पतिपुत्रादर्थमपेक्षते, किं कारणम् ? स्वत एव हि ते विधातुं समर्थाः, न च बृहस्पतिपुत्रस्य शंयोः मम पितरः किञ्चिदेभिः पितृभिः विधीयेतेति । एवं पञ्चम्यर्थासम्भवं षष्ठ्यर्थासम्भवञ्च पश्यन् भाष्यकारः, 'शंयोः'—इत्येकं पदं, द्वितीयान्ते द्वे पदे चकार, 'शम्'—इति, 'योः'—इति च । शमित्यस्य "शमनम्" अर्थं निराह, योरित्यस्य "यावनम्"—इति । एवं द्वितीयान्ते परिणामं कृत्वा अर्थं निराह,— तथाहि वाक्येन सम्बध्यत इति । कस्य शमनं कस्य वा याचनम् ? इति पनः पर्य्यनुयोगे प्राप्ते "रोगानाम्" "भयानाम्" "च" इत्यध्याजहार भाष्यकारः । रोगशमनञ्च दधात, भययावनञ्च, शान्तरोगा यथा स्याम, प्रहीणसर्वभयाश्च, तथा कुरुतेत्यभिप्रायः । किमेतावदेव ? नेत्युच्यते,—यदपि चान्यत् किञ्चित् अपरः अपापम्, तदपि चास्मभ्यमेव 'दधात' दत्तेत्यर्थः ॥ एवमेतत् पदम् एकम्, अर्थासम्भवाद् द्विधा प्रविभज्य भाष्यकारेण निरुक्तम् । इत्थमप्यर्थासम्भवे सति निर्वचनप्राप्तिरस्त्येव, तद्यथा उद्गीथशब्दे,—"प्राण एवोत्प्राणेन ह्युत्तिष्ठति, वाग् गीर्वाचो ह गिर इत्याचक्षतेऽन्नमथान्नेन हीदं सर्वं स्थितम् (छा० ब्रा० ३, ३)"—इत्येवमादि, तस्मादुपपद्यते । प्रथमान्तमेव सत् कस्माद् द्वितीयान्तत्वेन विपरिणम्यते

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

शंयुमिति ? एवमपि न विरुध्यति, तथापि हि न कश्चिदर्थ उपपद्यते, तस्माद् युक्तमिति ॥ "रपो रिप्रम्"—इति, अत्र रिप्रशब्दस्य रपःशब्देनार्थसामान्यात् तत्त्वमुक्तम् । यदेवास्य 'रिप्रम्' अमेध्यम्, तच्छुध्यतीति ह विज्ञायते ॥

"अथापि शंयुर्बार्हस्पत्य उच्यते" अपि शं, योः,—इत्यनेन पदद्वयेन शमनयावने रोगमययोः उच्येते, द्वेधा प्रविभक्तेन, अपि यथावस्थितेनैवाविभक्तेन बार्हस्पत्यो बृहस्पतेः पुत्र उच्यते, तस्याप्येतदेव नामेत्यपिशब्दः । "तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये"—इति, "ओमानं शंयोर्ममकाय सूनवे (ऋ० सं० १, ३, ४, ६)" इति, "तच्छंयोः सुम्नमीमहे (ऋ० सं० १, ३, २६, ४)"—इति च निगमौ । इयं शक्वरी । शंयोरेव बृहस्पतिपुत्रस्यार्षम् । शंयोवकि विनियुक्ता । शंयोरात्मानमभिसम्पाद्य, अथवा शंयोः सकाशादिति केचिन्मन्यन्ते । अनेन कर्मणा 'शंयोः' वाकाख्येन 'तत्' तदा आभिमुख्येन 'वृणीमहे' । किं पुनस्तत् ? 'गातुं यज्ञाय' "गमनम्" अस्मै "यज्ञाय" देवान् प्रति, 'गातुं यज्ञपतये' "गमनं" चास्मै "यज्ञपतये" देवान् प्रति । किञ्च, 'देवी स्वस्तिरस्तु नः' देवानुग्रहादस्माकं स्वस्तिरस्तु, मा नो देवाः काञ्चिदापदमुत्पादयन्त्वित्यभिप्रायः । 'स्वस्ति मानुषेभ्यः' मनुष्येभ्योऽपि सकाशात् मा नः काचिदापदस्तु । 'ऊर्ध्वं जिगातु भेषजम्' गच्छत्वेतद्भेषजम् भयसादयितृ कर्म, यावज्जीवमनच्छिन्नमविगुणञ्चोर्ध्वगमनयोग्यम् अस्माकमस्त्वित्यभिप्रायः । किञ्च, 'शन्नो अस्तु' शं सुखं नोऽस्माकं भवतु, 'द्विपदे' मनुष्यादिकाय 'चतुष्पदे' गवादिकाय च ॥ 'शंयुः' बृहस्पतिपुत्रः—इति, एतस्मिन् मन्त्रे विशेषलिङ्गमस्ति, तदन्यस्मात् श्रुतिलिङ्गात् कुतश्चिदुपलभ्यमानाद्वा एतावदेव त्वेतस्मात् मन्त्रात् सिद्धम्,—एकमेवेदं पदमविभक्तम् निरुच्यते, पञ्चम्यन्तं वा षष्ठ्यन्तं वा, न यथा पूर्वस्मिन् मन्त्रार्थासम्भवाच्छुंयुशब्दो विभक्त इति ॥ ५ (२१) ॥

इति निरुक्तवृत्तौ नवमस्याध्यायस्य (चतुर्थाध्यायस्य)

तृतीयः पादः ॥ ४, ३ ॥

"अदितिः (४९)"—इति । एतदनवगतम् । "अदीना"—इत्यवगमः । "देवमाता" अभिधेया, ऐतिहासिकपक्षेण, नैरुक्तपक्षेणपुनर्यान्येतस्यामविवक्ष्यमाणायां द्यौरित्येवमादीनि पदानि श्रूयन्ते एतान्येवादितिशब्देनोच्यन्ते ॥ १ (२२) ॥

"अदितिर्द्यौः० ०मदितिर्जनित्वम्" (ऋ० सं० १, ६, १६, ५) । राहुगणस्य गोतमस्येयमार्षम् । तृतीयसवने सर्वस्तोमेष्वेव, वैश्वदेवस्य शस्त्रस्य परिधानीयैषा । 'अदितिः' एव देवमाता 'द्यौः' 'अदितिः' अदितिरेव च 'अन्तरिक्षम्' 'अदितिः' एव 'माता' सर्वभूतनिर्मात्री, 'सः' एव च 'पिता' पालकः, 'सः' एव हि 'पुत्रः' सैव हि परितुष्टा सती स्तोतारं पुरुणो बहुनः पापात् त्रायते, अथवा सैव निपृणाति, सर्वभूतानां यन्निर्वर्त्तव्यं दातव्यमित्यर्थः । येऽपि चैते 'विश्वदेवाः' सर्वे देवाः एतेऽपि 'अदितिः' एव । 'पञ्चजनाः' गन्धर्वादयः 'अदितिः' एव । सर्वथापि किं बहुना, यावदेतत् किञ्चित् 'जातं' च 'जनित्वं' च जनिष्यमाणञ्च सर्वमप्येतत् 'अदितिः' एव । एवमनेन मन्त्रेण मन्त्रदृक् "अदितेर्विभूतिमाचष्टे" देवमातुस्तत् सर्वमप्युपपद्यत एव, माहाभाग्याद्देवतायाः । तदुत्तरत्र वक्ष्यामः । एवमैतिहासिकपक्षेण, नैरुक्तपक्षेण पुनः "एतानि" द्युलोकादीनि सर्वाणि "अदीनानि" अनुपक्षीणानि इति योज्यम्, न ह्येषां क्षयोऽस्तीति ॥

"एरिरे (५०)"—इति । एतदनवगतम् । "आ ईरिरे"—इत्यवगमः । "यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति ॥"—इति (ऋ० सं० २, २, २, ४) । दीर्घतमस इयमार्षम् । जगती । प्रातरनुवाकाश्विनयोरग्निमारुते च शस्यते । 'यम्' अग्निमाभिमुख्येन ईरितवन्तः, प्रेरितवन्तः, स्थापितवन्त इति यावत्, आत्माभिप्रेतार्थसिद्धये 'भृगवः' । 'विश्ववेदसं' सर्वविदसं, सर्वस्य वेत्तारं, सर्वधनं वा । क्व पुनः 'एरिरे' ? 'नाभा' पृथिव्याः नाभौ अवस्थितम्, उत्तरवेदिमध्यगतायाः पृथिव्या वेद्या उपरि । केन पुनरेरिरे ? 'भुवनस्य' उदकस्य 'मज्मना' मननीयेन वीर्य्येणान्नेन हविर्लक्षणेन । किं तस्य ? 'तमग्निं' हे यजमान ! त्वमपि 'गीर्भिः' वाग्भिः स्तुतिलक्षणाभिः आभिमुख्येन स्थित्वा 'हिनुहि' प्रेरय । तस्मिन् तस्मिन् कर्मणि वर्त्तमानमग्निहोत्रादौ, यथा भृगवः ईरितवन्तः, तथा 'स्वे' दमे' स्व एव गृहे, मा कस्यचिदार्त्विज्येऽवस्थित इत्यभिप्रायः । किंलक्षणं पुनरग्निप्नाह्निनुहि ? 'य एको वस्वः' एक एव यो वसुनो धनस्य दाता । 'वरुणो 'न' वरुण इव, यथा वरुणः समुद्रान्तर्गतानां धनानाम् इष्टे, एवं यः सर्वस्येव धनस्य 'राजति' इष्टे इत्यर्थः । राजतिरैश्वर्य्यकर्मसु पठितः,—"क्षियति (३), ताजति (४)"—इति । "एरिरे—इति" "ईर्त्तिः" अयं धातुर्गतिकर्मा,—"ईर्त्ते (७९), त्रयति (८१)"—इति गतिकर्मसु पठितम् । स पुनरयमाङोपसर्गेण "उपसृष्टोऽभ्यस्तः" च, पुनः पुनरीरितवन्त इत्यर्थः ॥ २ (२३) ॥

---

25. (અનુ૦) (४८) शंयोः એવો પંચમી-ષષ્ઠી એકવચનના રૂપમાં મૂળ શબ્દ शंयु છે; તેનો અર્થ 'સુખની ઇચ્છાવાળો' થાય છે. "(હે સુખસ્વરૂપ પરમાત્મા !) અમને પાપરહિત શાંતિ અને સુખ આપો." અહીં रपः અને रिप्रम् શબ્દો પાપના વાચક છે. તથા शंयु શબ્દમાંના शम्નો અર્થ 'રોગોનું શમન' અને युનો અર્થ 'ભયોનું દૂર જવું' એવો થાય છે. અથવા તો 'शंयु' એ બૃહસ્પતિના પુત્રનું (વંશજનું) નામ છે. "યજ્ઞમાં જવા માટે અને યજ્ઞપતિની પાસે જવા માટે અમે શંયુને પસંદ કરીએ છીએ."

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

એવો મન્ત્ર પણ મળે છે. અહીં गातुम्‌નો અર્થ गमनं यज्ञाय (યજ્ઞમાં જવું) કે गमनं यज्ञपतये (યજ્ઞપતિની પાસે જવું) થાય છે.

(૪૯) 'અદિતિ' એટલે અદીન દેવમાતા. "દ્યૌ અદિતિ છે, અન્તરિક્ષ અદિતિ છે, એ (અદિતિ) જ માતા છે, પિતા છે અને પુત્ર પણ છે. વિશ્વદેવો અદિતિ છે, પંચજનો (ગન્ધર્વાદિ) અદિતિ છે, જે કાંઈ જન્મ્યું છે તે અદિતિ છે અને જે કાંઈ હવે જન્મશે તે પણ અદિતિ છે." આ પ્રમાણે અદિતિની વિભૂતિઓ કહેવામાં આવી, કારણ કે આ દરેક અદીન છે.

(૫૦) एरिरे । "ભૃગુઓએ જે (અગ્નિ)ને (પૃથિવીની નાભિમાં અર્થાત્ પૃથિવીની મધ્યમાં) લઈ ગયા (ત્યાં સ્થાપિત કર્યો). અહીં एरिरे એવા રૂપમાં ગત્યર્થક ईर्ति ધાતુ છે, તેને आ ઉપસર્ગ લાગ્યો છે અને દ્વિત્વવાળું આ રૂપ છે.

25. *(વિમર્શ)* शंयु શબ્દના ત્રણ અર્થો બતાવવામાં આવ્યા છે : ૧. સુખંયુ અર્થાત્ સુખની ઇચ્છાવાળો અથવા સુખને મેળવનાર ૨. शंयु શબ્દને शम् અને यु એવા બે પદોમાં વિભક્ત કરીએ તો રોગોને શમાવી દેનાર અને ભયોને દૂર કરનાર એવો અર્થ થાય. ૩. બૃહસ્પતિના કુળમાં જન્મેલાને પણ 'શંયુ' કહે છે (અર્થાત્ 'શંયુ' શબ્દને રૂઢ માનીએ તો આ ત્રીજો અર્થ મળે છે).

अदिति શબ્દ અનેકાર્થક છે અને તે દરેક અર્થો બતાવવા યાસ્કે એક મન્ત્ર જ ટાંકી દીધો છે. જોકે યાસ્કે પોતે સભાન છે કે દ્યૌ, અન્તરિક્ષ વગેરે અદિતિના શબ્દાર્થો નથી, તે તો કેવળ તેની વિભૂતિઓ છે, તેણે अदिति શબ્દનો તો એક જ અર્થ કર્યો છે : અદીન અર્થાત્ દૈન્યરહિત. સમૃદ્ધિયુક્ત જે હોય તેને અદિતિ કહે છે. બીજું, આપણે જાણીએ છીએ કે અદિતિ એ દેવોની માતા છે. વેદાર્થઘટન કરનાર (૧) નૈરુક્ત સમ્પ્રદાય મુજબ 'અદિતિ' એટલે અદીન; (૨) ઐતિહાસિકોના મતે દેવોને જન્મ આપનારી માતા; તથા (૩) આધ્યાત્મિક અર્થઘટન આપનારાના મતે મૂળ કારણ બ્રહ્મરૂપ પ્રકૃતિને અદિતિ કહેવાય છે. સ્કન્દસ્વામી અને મહેશ્વરે अदिति શબ્દને અનેકાર્થક કહેવા ઉપરાંત 'અનવગત' પણ કહ્યો છે. તેને સમજાવતાં તેઓ લખે છે કે — अदितिरित्यनवगतम् । अनेकार्थत्वञ्च दर्शनभेदेन । कथम् ? ऐतिहासिकानां (मते) देवानां माता उच्यते । नैरुक्तानामदीनादिगुणः । अध्यात्मपक्षे प्रकृतिः । यद्यपि च √द्यतेः' क्तिनि 'द्यतिस्यति' इति त्वेवं सिध्यति अदितिरिति । (દ્યતિ ધાતુને क्तिन् પ્રત્યય લગાડવાથી અદિતિ શબ્દ બને છે. तथापि द्यतेर्नित्यं विपूर्वत्वान्न त्वयाच्चि 'दीङ् क्षये' इत्यस्य छान्दसं रूपं द्रष्टव्यम् । तथाचोक्तम् 'न संस्कारमाद्रियेत अर्थनित्यः परीक्षेत' इति । अतः सर्वेषु पक्षेष्वखण्डनस्यासम्भवादनवगतत्वमुच्यते ॥ વિશેષમાં કહે છે કે अदीनपर्यायो वा नैरुक्त पक्षेऽदितिशब्दो न मातृवचनः । अत आह । एनान्यदीनानीति वा इति । अक्षीणा द्यौः । तथान्तरिक्षादीनि । अध्यात्ममपि अदितिः प्रकृतिः कारणं ब्रह्म । प्रकृतिसर्वानाम्न्याच्च तत्प्रभवत्वे सति सर्वमदितिरिति व्याख्येयम् ॥

---

26. जसुरिः ॥ ५१ ॥

उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु । नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्चं यूथम् ॥ (ऋ. सं. ४/३८/५) ॥ अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनम् । वस्त्रं वस्तेः । तायुः इति स्तेननाम । संस्त्यानम् अस्मिन् पापकम् इति नैरुक्ताः । तस्यतेर्वा स्यात् । अनुक्रोशन्ति क्षितयः संग्रामेषु । भरः इति संग्रामनाम । भरतेर्वा । हरतेर्वा नीचायमानं नीचैः अयमानम् । नीचैः निचितं भवति । उच्चैः उच्चितं भवति । जस्तमिव श्येनम् । श्येनः शंसनीयं गच्छति । श्रवश्चाच्छा पशुमच्च यूथम् । श्रवश्च अपि पशुमच्च यूथम् । प्रशंसां च यूथं च । धनं च यूथं च इति वा । यूथं यौतेः । समायुतं भवति ॥

---

26. "जसुरिः (५१)"—इति । एतदनवगतम् । "जस्तम्"—इत्यवगमः । "उत स्मैनं"—इति निगमः (ऋ० सं० ३, ७, ११, ५) । वामदेवस्यार्षम् । त्रिष्टुप् । दधिक्राव्णे सूक्ते । दधिक्रावा चेन्द्र एव, वायुर्वा मध्यस्थानत्वात् । 'उत स्मैनम्' अप्येनमिन्द्रम् 'अनुक्रोशन्ति' आभिमुख्येन क्रन्दन्ति, आह्वयन्ति । 'क्षितयः' मनुष्याः । क्व ? 'भरेषु' संग्रामेषु । कथं पुनरभिक्रन्दन्ति ? 'वस्त्रमथिं न' वस्त्रापहर्त्तारमिव 'तायुम्' यथा केचिज्जनाः कश्चिद्वस्त्रापहर्त्तारं तायुं दृष्ट्वा कश्चिदन्यमात्मनस्त्राणार्थमभिक्रन्देयुः, एवमेतमिन्द्रम् अभिक्रन्दन्ति संग्रामेषु, परैरप्यर्द्यमानास्त्राणार्थमात्मनः । किञ्च, अपि चैनं तायुं 'नीचायमानं' नीचैर्गच्छन्तं 'जसुरिं न' जसुरिमिव, "जस्तमिव" 'श्येनं' बद्धम्, स्नायुतन्तुना य एष याजिक इति प्रसिद्धो राज्ञाम्, स हि बद्धत्वादुत्पतितुमत्यर्थं न शक्नोति, नीचैरेव गच्छति, गत्वा च शशकादीनि हिनस्ति सत्त्वानि । स यथा जनैरभिक्रन्द्यते, तथा चैनमभिक्रन्दति । आह,—कमर्थमभिसन्धाय ? इति । उच्यते,—'श्रवश्च अच्छ' कीर्त्तिश्चाभिसन्धाय, कथं नाम श्रूयेमहि ? प्रशस्येमहि जितमेभिरित्येतमर्थमभिसन्धाय । 'पशुमच्च यूथम्' अनेकपशुजातिसंयुक्तं पशुयूथमभिसन्धायैतदस्माकं स्यादित्येवमभिक्रन्दतीत्येष समस्तार्थः ॥

अथैकपदनिरुक्तम् ।—"वस्त्रं वस्तेः" आच्छादनार्थस्य (अदा० आ०), तदध्याच्छाद्यते । "तायुरिति"—एतत् "स्तेननाम" "संस्त्यानं" संहतम् "अस्मिन् पापकं" भवति "इति" एवं "नैरुक्ता" मन्यन्ते । "तस्यतेः वा स्यात्" क्षयार्थस्य (दि० प०), उपक्षीणो ह्यसौ भवति, अधार्मिकत्वात, परलोकमनपेक्ष्य कल्पयति कर्माणि । क्षितयो मनुष्याः । "भर इति संग्रामनाम" भ्रियन्ते

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

तस्मिन् योद्धारः "हरतेः वा" ह्रियन्ते हि तस्मिन् जीवितानि, वसूनि च । "श्येनः शंसनीयं गच्छति" शीघ्रत्वात् । "यूथं यौतेः" तद्धि "समायुतं भवति" एकत्र मिश्रीभूतं स्त्रीपुरुषबालवृद्धैः पशुभिः ॥ एवमिह नीचायमानं श्येनमित्यनेन सम्बन्धाज्जसुरिर्बद्ध इत्युपपद्यते न ह्यबद्धः श्येनो नीचैरयते ।

26. (અનુ૦) "(જેવી રીતે લોકો) વસ્ત્રને ચોરનારને (જોઈને) બૂમો પાડે છે, એ પ્રમાણે મનુષ્યો (દધિક્રાવન્‌ને) યુદ્ધમાં (મદદ કરવા માટે) બૂમો પાડે છે. (શિકારને પકડવા) નીચે આવી રહેલા ખુલ્લા-પાંખો વિસ્તારેલા-બાજપક્ષી જેવા દધિક્રાવન્‌ને કીર્તિ અને અનેક પ્રકારના પશુઓથી યુક્ત એવા જૂથને અનુલક્ષીને (અર્થાત્ કીર્તિ અને પશુજૂથ મળે એ માટે) (દધિક્રાવન્‌ને) (લોકો બૂમ પાડે છે.)" અહીં वस्त्रमथिम् એટલે वस्त्रमथिनम् (વસ્ત્રને ચોરનાર) એવો અર્થ થાય છે. वस्त्र શબ્દ √वस (પહેરવું) ધાતુ ઉપરથી બન્યો છે. तायु એ ચોરનું નામ છે, કારણે કે "તેમાં પાપ ભેગું (સંસ્ત્યાન) થયેલું છે." એવું નૈરુક્તોનું કહેવું છે. અથવા તો तायु શબ્દ √तसु (ક્ષય કરવો) ઉપરથી બન્યો છે. સંગ્રામમાં મનુષ્યો (क्षितयः) બૂમો પાડે છે. भर એ સંગ્રામનું નામ છે. भर શબ્દ ભરણાર્થક √भृ (भ्रियन्ते तस्मिन् योद्धारः) અથવા હરણાર્થક √हृ (ह्रियन्ते हि तस्मिन् जीवितानि, वसूनि च) ધાતુ ઉપરથી બન્યો હશે. नीचायमानम् એટલે नीचैः अयमानम् (નીચે લાવવામાં આવતા). અહીં नीचैः એટલે निचितम् (નીચે જવું). उच्चैः એટલે उच्चितम् (ઉપર જવું). (મન્ત્રમાંના जसुरिम्‌નો અર્થ जस्तम् થાય છે.) जस्तम् એટલે બંધાયેલું (દુર્ગ મુજબ) કે મુક્ત (સરૂપ મુજબ). આમ બંધાયેલા બાજપક્ષીની જેમ અથવા મુક્ત બાજપક્ષીની જેમ. 'શ્યેન' (બાજ) જે પ્રશંસનીય રીતે ઊડે તેને કહે છે. श्रवश्चाच्छा पशुमच्च यूथम् । એ પાદમાં श्रवः એટલે પ્રશંસા (કીર્તિ) અથવા ધન એવા અર્થો થાય છે. માટે તે પાદનો અર્થ પ્રશંસા અને પશુયૂથને અનુલક્ષીને અથવા ધન અને પશુયૂથને અનુલક્ષીને (બૂમો પાડે છે). અહીં यूथम् શબ્દ √यु मिश्रणामिश्रणयोः ધાતુ ઉપરથી બન્યો છે. સમાયૂત (બધાં પશુઓ ભેગા મળેલાં) હોઈ 'યૂથ' કહેવાય છે.

26. (વિમર્શ) અહીં जसुरिः એવા અનવગત સંસ્કારને जस्तથી સમજાવ્યો છે અને દુર્ગાચાર્યે जस्तम्‌નો અર્થ बद्धम् કર્યો છે : एवमिह नीचायमानं श्येनमित्यनेन सम्बन्धाञ्जसुरिर्बद्ध इत्युपपद्यते, न ह्यबद्धः; श्येनो नीचैरयते ॥ પરંતુ ડો. સરૂપ जस्तम्‌નો અર્થ મુક્ત કરે છે. કેમ કે બંધાયેલો બાજ શિકારને પકડી શકતો નથી. આચાર્ય વિશ્વેશ્વરે પણ જણાવ્યું છે કે जसुरिःનો जस्तम् એવો અર્થ યાસ્કે આપ્યો છે. પરંતુ તે जस्तम् પણ અસ્પષ્ટ છે. जस्त શબ્દ દિવાદિ ગણના √जसु मोक्षणे ધાતુ ઉપરથી બને છે. આમ, जस्तम्‌નો અર્થ 'મુક્ત' (છોડી મૂકેલું) થઈ શકે.

---

27. जरते ॥ ५२ ॥

इन्धा॑न एनं जरते स्वा॒धीः (ऋ. सं. १०/४५/१) । गृणाति ॥

मन्दिने ॥ ५३ ॥

मन्दी मन्दतेः स्तुतिकर्मणः । प्र म॒न्दिने॑ पितु॒मद॑र्चता॒ वचः॑ (ऋ. सं. १/१०१/१) । प्रार्चत मन्दिने पितुमत् वचः ॥

गौः ॥ ५४ ॥ व्याख्यातः ।

अत्राह॒ गोर॑मन्वत॒ नाम॒ त्वष्टु॑रपी॒च्य॑म् । इ॒त्था च॒न्द्रम॑सो गृ॒हे (ऋ. सं. १/८४/१५) ॥ अत्र ह गोः सममंसत आदित्यरश्मयः स्वं नाम अपीच्यम् अपगतम् । अपचितम् । अपिहितम् । अन्तर्हितं वा । अमुत्र चन्द्रमसो गृहे ॥

गातुः ॥ ५५ ॥ व्याख्यातः ॥

दंसयः ॥ ५६ ॥

दंसयः कर्माणि । दंसयन्ति एनानि । कु॒त्सा॑य॒ मन्म॒न्नह्य॑श्च दं॒सयः॑ (ऋ. सं. १०/१३८/१) । इत्यपि निगमो भवति ॥

---

27. "जरते (५२)"—इति । एतदनवगतम् । धातोरस्वार्थे प्रवृत्तिरेवानवगमः । "दि॒वस्परि॑ प्रथ॒मं ज॑ज्ञे अ॒ग्निर॒स्मद् द्वि॒तीयं॒ परि॑ जा॒तवे॑दाः । तृ॒तीय॑म॒प्सु नृ॒मणा॒ अज॑स्र॒मिन्धा॑न एनं जरते स्वा॒धीः ॥"—इति (ऋ० सं० ७, ८, २८, १) । वत्सप्रिर्भालन्दनः, तस्येयमार्षम् । उक्थस्याग्नेरुपस्थाने विनियुक्ता । 'दिवस्परि' 'दिवः' द्युलोकादित्यर्थः । 'प्रथमम्' अयम् 'अग्निः' 'जज्ञे' आदित्यात्मना । 'द्वितीयम्' 'अस्मत् परि' अस्मदधि, अस्मत्तो जायते, पार्थिवात्मना । 'तृतीयम्' 'अप्सु' अन्तरिक्षलोके वैद्युतात्मना जायते । "आपः"—इति ह्यन्तरिक्षनामसु पठितम् । नृणां मनस्यवस्थितः 'नृमणाः' नृषु वा मनोऽस्य, स नृमणाः । योऽयमेक एव

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

त्रिषु स्थानेषु जायते, तमेवङ्गुणयुक्तं 'स्वाधीः' शोभनधीः 'इन्धानः' 'अजस्रं' नित्यं 'जरते' स्तौति, यः, स एव 'स्वाधीः' सुप्रज्ञ इत्यर्थः। इन्धानोहि किमन्यत् स्तुतेः कुर्य्यात् ? तस्मात् "जरते"—इत्यस्य शब्दस्य "गृणाति"—इत्यर्थ उपपद्यते ॥

"मन्दिने (५३)"—इति। एतदनवगतम्। "मन्दतेः" स्तुत्यर्थस्य। मन्दनीयः स्तुतिमान् वेत्यर्थप्रतीतिः। "मन्दति (१८), शंसति (२५)"—इति स्तुतिकर्मसु पठितम्। "प्रमन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना। अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥"—इति (ऋ० सं० १, ७, १२, १)। कुत्सस्येयमार्षम्। छन्दोमेषु तृतीयेऽहनि मरुत्वतीये शस्त्रे निविद्धानीयसूक्तस्य प्रथमैषा। हे स्तोतारः ! 'प्रार्चत' प्रकर्षेणोच्चारयत, पूजयत। 'मन्दिने' मन्दनीयाय, स्तुत्याय, स्तुतिमते वा इन्द्राय। 'पितुमत्' अन्नसंयुक्तं 'वचः'। 'यः' इन्द्रः, किं करोति ? कृष्णस्य मेघस्य गर्भभूता अपः 'निरहन्' नीचैरहन्, निरगमयदित्यर्थः। केन ? 'ऋजिश्वना' ऋजुरेवावक्षिप्तो लक्ष्ये यः स्वनति गच्छति इति ऋजिश्वा वज्रः, तेन निरगमयत्। 'अवस्यवः' अवनमात्मनो रक्षणमिच्छन्तः, तर्पणं वा। योऽयमेवम्प्रभाव इन्द्रः, तमिमं 'वृषणं' वर्षितारम्, 'वज्रदक्षिणं, वज्रबाहुम्, 'मरुत्वन्तं' मरुत्सहितम्, 'सख्याय' सखिभावाय 'हवामहे' तासु तासु क्रियासु आह्वयामहे इत्यर्थः ॥ एवमेतस्मिन् मन्त्रे "मन्दिने पितुमद्वचः प्रार्चत'— इत्येतस्माद्वाक्यसम्बन्धादिन्द्रविशेषणमेतदित्युपपद्यते ॥

"गौः (५४)"—इति। एतदनेकार्थत्वादिह समाम्नातम्। यथा चैतदनेकार्थत्वं तथा पुरस्तात् "व्याख्यातम्" ॥ ३ (२४) ॥

यत्तूक्तम्,—'अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते, ०—० सोऽपि गौरित्युच्यते,—'अत्राह गोरमन्वतेति' तदुपरिष्टाद्व्याख्यास्यामः'—इति, तदिदमुच्यते,—"अत्रा ह"—इति। गोतमस्य राहुगणस्येयमार्षम्। अग्निचयने इष्टकोपधाने विनियुक्ता। 'अत्रा ह' अत्रैव, एतस्मिंश्चन्द्रमण्डले 'गो' सुषुम्नस्यैकस्य सूर्य्यरश्मेः, इतरे सूर्य्यरश्मयः 'अमन्वत' अमन्यन्त, समनुज्ञातवन्त इत्यर्थः। किं पुनस्तत् सममन्यन्त 'नाम' नमनं प्रह्वणमवस्थानमित्यर्थः। कुतः ? 'त्वष्टुः' आदित्यस्य स्भवृता रश्मयः सममन्यन्त। कथं तस्य नमनं तत् सममन्यन्त ? इति 'अपीच्यम्' "अपगतं" तत्रैव चन्द्रमण्डलेऽन्तःप्रविष्टस्य यदवस्थानान्तरं तत् सममन्यन्त। अथवा अपीच्यमिति। "अप" एत्य सूर्य्यमण्डलात् चन्द्रमण्डले "चितम्" अपीच्यम्। अथवा अपीच्यम् "अन्तर्हितम्" इत्यर्थः, "प्रतीच्यम् (५), अपीच्यम् (६)"—इति अन्तर्हितनामसु पठितम्। क्व पुनरन्तर्हितस्यान्यत्रावस्थानम् ? इति 'इत्था चन्द्रमसो गृहे' अमुष्मिंश्चन्द्रमण्डले इत्यर्थः ॥

"गातुः (५५)"—इति। "व्याख्यातः" "गमनं यज्ञपतये"—इत्यत्र ॥

"दंसयः (५६)"—इति। एतदनेकेषां कर्मणां अभिधानम्। तानि हि दंसयन्त्युपक्षयन्ति कर्मकराः। "तव त्य इन्द्र सख्येषु वह्नय ऋतं मन्वाना व्यदर्दिरुर्बलम्। यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः ॥"—इति (ऋ० सं० ८, ७, २६, १)। अङ्गस्यौरवस्येयमार्षम्। हे 'इन्द्र' 'तव' 'त्ये' 'वह्नयः' वोढारोऽश्वाः, 'सख्येषु' समानख्यानेषु कर्मसु वर्त्तमानाः, इदमेव हि भवतः कर्म, मेघो विदारयितव्य इति, एतदेव तेषामपि समानख्यानत्वम्। 'ऋतम्' उदकमस्मिन्नस्तीति, एवमेतं 'मन्वानाः'। किमकुर्वन् ? 'व्यदर्दिरुः' विदारितवन्तः 'बलं' मेघं काले काले। 'यत्र' यस्मिन् मेघे विदारिते 'दशस्यन्' दशस्यन्ति 'उपसः' माध्यमिकाः एकस्या एव पूजनार्थे बहुवचनम्। किं दशस्यन् ? 'अपः' 'अह्यः च' अहिनिवासिन्यः मेघनिवासिनीरित्यर्थः। ताश्च दीर्य्यमाणाः 'रिणन्' आगच्छन्, पृथिवीलोकम्। तदेतत् सर्वमपि युष्मदश्वैः क्रियते ! किं पुनरर्थमुद्दिश्य त एवं कुर्वन्ति ? 'मन्मन्' मन्यमानाः, 'कुत्साय' पृथिवीं कृन्तते, कृषीवलाय, 'दंसयः' कृषिकर्माणि सफलानि कर्त्तुम्। अत्र 'दंसयः'-इत्यतेन शब्देन "कर्माणि" उक्तानि। दासैः कर्मकरैः, 'दंस्यन्ते'—इति कृत्वा कर्मकरा दासा इति। बाहुल्याद् भाष्यकारेण निगमोऽत्र नोदाहृतः ॥

---

27. (અનુ०) (૫૨) "આને (અગ્નિને) પ્રજ્વલિત કરતાં સારી બુદ્ધિવાળો (સુપ્રજ્ઞ) તે (અગ્નિ)ની સ્તુતિ કરે છે." અહીં जरते નો અર્થ गृणाति (સ્તુતિ કરે છે) થાય છે.

(૫૩) मन्दिने શબ્દમાં મૂળ मन्दी શબ્દ સ્તુત્યર્થક √मन्द ધાતુ ઉપરથી બન્યો છે. "સ્તુતિ કરવા યોગ્ય (मन्दिने) (ઇન્દ્ર)ની અન્નયુક્ત (पितुमत्) વાણીથી પ્રકર્ષપૂર્વક અર્ચના કરો."

(૫૪) गौः ની (निरु. २-५-८) વ્યાખ્યા થઈ ગઈ છે. (પરંતુ ત્યાં જણાવ્યું હતું કે अत्रा ह गोरमन्वत...મન્ત્રની આગળ ઉપર વ્યાખ્યા કરીશું-એ વ્યાખ્યા અહીં ૪થા અધ્યાયમાં મૂકી છેઃ)" સૂર્ય (त्वष्टा)માંથી (સુષુમ્ણ નામનું એક) કિરણ બહાર નીકળીને ચન્દ્રમાના ઘરમાં અન્તર્હિત થયું અને (બીજાં કિરણોએ) અનુજ્ઞા આપી." અહીં गोः=સુષુમ્ણ નામનું કિરણ (ચન્દ્રમામાં પ્રવિષ્ટ થયું). એને બીજાં સૂર્યકિરણોએ सममंसत એટલે (समनुज्ञातवन्तः) અનુજ્ઞા આપી. અહીં अपीच्यम् એટલે अपचितम् (સૂર્યમાંથી બહાર નીકળીને ચન્દ્રમામાં પ્રવેશેલું) अपगतम् (ચન્દ્રમામાં પ્રવેશેલું), अपिहितम् (ઢંકાયેલું) કે अन्तर्हितम् (અન્તર્હિત થયેલું)- એવા અર્થો થાય છે. (સૂર્યકિરણ ક્યાં પ્રવેશેલું ?-) અહીં ચન્દ્રમાના ઘરમાં.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(૫૫) गातुः ॥ ની વ્યાખ્યા અગાઉ થઈ ગઈ છે. "(લોકોના) ગમનને માટે ઉષાઓએ (પ્રકાશ) કર્યો (ફેલાવ્યો) એવો મન્ત્ર પણ છે.

(૫૬) दंसय એ કર્મોનું નામ છે. એ (કર્મો)નો (કર્મ કરનારાઓ) ઉપક્ષય કરે છે. "ખેડૂત (કુત્સ)ને માટે કૃષિકર્મોને (दंसयः) માન્યતા આપવા (અર્થાત્ ખેડૂતના કૃષિકર્મોને સફળ બનાવવા માટે) મેઘનિવાસી (अह्यः अहिनिवासिन्यः=જળ) પાણીને (મુક્ત કર્યું)" એવો મન્ત્ર છે.

---

28. तूताव ॥ ५७ ॥

स तूताव नैनमश्नोत्यंहतिः (ऋ. सं. १/९४/२) । स तुताव । नैनम् अंहतिः अश्नोति । अंहतिश्च अंहश्च अंहुश्च हन्तेः निरूढोपधाद्विपरीतात् ॥

चयसे ॥ ५८ ॥

बृहस्पते चयस इत्पियारुम् (ऋ. सं. १/१९०/५) बृहस्पते यत् चातयसि देवपीयुम् । पीयतिर्हिंसाकर्मा ॥

वियुते ॥ ५९ ॥

वियुते द्यावापृथिव्यौ । वियवनात् । समान्या वियुते दूरे अन्ते (ऋ. सं. ३/५४/७) । समानं संमानमात्रं भवति । मात्रा मानात् । दूरं व्याख्यातम् (निरु. ३/१९) । अन्तः अततेः ॥

ऋधक् ॥ ६० ॥

ऋधक् इति पृथग्भावस्य प्रवचनं भवति । अथापि ऋध्नोत्यर्थे दृश्यते । ऋधंगया ऋधंगुताशमिष्ठाः (कपि. सं. ३/१०) । ऋध्नुवन् अयाक्षीः ऋध्नुवन् अशमिष्ठाः इति च ॥

---

28. "तूताव (५७)"—इति । एतदनवगतम् । "तुताव" इत्यवगमः । "यस्मै त्व मा यजसे स साधत्यनर्वा क्षेति दधते सुवीर्य्यम् । स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥"—इति (ऋ० सं० १, ६, ३०, २) । कुत्सस्येयमार्षम् । महाव्रते आग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते । हे भगवन् ! 'अग्ने !' 'यस्मै' यजमानाय 'त्वम्' 'आ' आहूय 'यजसे' देवान्, होतृत्वेऽवस्थितः । 'सः' एव 'साधति' 'साधयत्यात्मनोऽभिप्रेतार्थम् । किञ्च, स एव 'अनर्वा' अप्रत्यृतः, अनाश्रितः कञ्चिदन्यम्, स्वेनैव महिमायुक्तः । 'क्षेति' निवसति, युष्मदनुग्रहात् । स एव 'दधते' धारयते 'सुवीर्य्यं' शोभनमात्मनो वीर्य्यम् । स एव 'तूताव' वर्द्धते, प्रजाधनयशोभिः, 'न' च 'एनम्' 'अंहतिः' अपि पापमपि सम् "अश्नोति" आप्नोति । हे भगवन्नग्ने ! यः त्वमेवमतिहानुभावः, तस्य 'तव' 'वयं' 'सख्ये' सखिभावे, परिचरणकर्मणि वर्त्तमानाः 'मा रिषाम' मा केनचिच्छिद्येमहि ॥ एवमयमत्र "तूताव"—इति शब्दः 'यस्मै त्वमा यजसे—इत्येवमादीनां पदानां मध्ये श्रूयमाणो वृद्ध्यर्थमुपपद्यते ॥ "अंहतिश्च अंहश्च अंहुश्च"—इत्येते शब्दाः "हन्तेः" "निरूढोपधात् विपरीतात्" अकारमुपधातोर्निकृष्यादौ कृत्वा, ततो हकारनाकारौ विपर्य्ययेण भवतः ॥

"चयसे (५८)"—इति । एतदनवगतम् । "चातयसि"—इत्यर्थप्रतीतिः । "ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः । न दूढ्ये अनुददासि वामं बृहस्पते चयस इत् पियारुम् ॥"— इति (ऋ० सं० २, ५, १२, ५) । अगस्त्यस्य मैत्रावरुणस्येयमार्षम् । हे 'बृहस्पते !' 'देव' दानादिगुणयुक्त ! 'ये' यजमानाः त्वाम् 'उस्रिकम्' उत्स्राविणं भोगानां 'मन्यमानाः' दातैव केवलं भोगानाम्, अयमाजविन न प्रत्युपकारार्थीत्येवं मन्यमानाः, 'पापाः' अप्रत्युपचिकीर्षवः 'उपजीवन्ति' एव केवलं, न क्रियया प्रत्युपकारं कुर्वन्ति, 'भद्रं' भन्दनीयं स्तुत्यम्, अपि च 'प्रजाः' प्रार्जितधनाः सन्तः, न दरिद्राः । किं तेभ्यः ? इति 'न दूढ्ये' न तेभ्य एवंलक्षणेभ्यः, दुर्धीभ्यः, पापबुद्धिभ्यः, स्वार्थप्रधानेभ्यः त्वम् 'अनुददासि' 'वामं' वननीयं धनम् । किं तर्हि ? यस्तादृशो जनः 'पियारुः' देवपीयुः, देवहिंसिता, स्वभोगप्रधानः, न यष्टा देवानाम्, तं 'चयसे' "चातयसि" नाशयसि । य एव श्रद्दधानो यष्टा, तस्मै देवान् यजंते अनुददासि वामम्, यस्मात् त्वमेवं करोषि, तस्मात् ते पापबुद्धयः त्वां सम्यक् न पश्यन्तीत्यभिप्रायः । यो हि दुर्बुद्धिः देवपियारुः तस्य किमन्यत् चातनादृते स्यात् ? चात्य एवासौ । तस्मात् 'चयसे'—इत्येष शब्दः, "चतयतिः" नाशने इत्येवमस्थापिते नाशनार्थो भवतीत्युपपद्यते, "चातयतिर्नाशने"—इति हि वक्ष्यसि । लोकेऽपि च प्रसिद्धं देशादुच्चातित इति । तस्मादुपपद्यते ॥

"वियुते (५९)"—इत्येतदेकमेव समस्तयोर्द्वयोरपि द्यावापृथिव्योरभिधानम् । "वियवनात्"—इति निर्वचनम् । यौतिर्मिश्रणार्थः

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

(अदा० प०) तस्योपसर्गसामर्थ्याद्विपर्य्ययेणार्थो भवति, विमिश्रीभूते इत्यर्थः । "इमे वै सहास्तां ते शम्यामात्रं न्यैतामिति ह विज्ञायते" । "समान्या वियुते दूरे अन्ते ध्रुवे पदे तस्थतुर्जागरूके । उत स्वसारा युवती भवन्ती आदु ब्रूवाते मिथुनानि नाम ॥"—इति (ऋ० सं० ३, ३, २५, २) । विश्वामित्रस्येयमार्षम् । वैश्वदेवे सूक्ते । 'समान्या' समान्यावेते द्यावापृथिव्यौ, समानपरिमाणे । 'वियुते' च विमिश्रीभूते । 'दूरे अन्ते' च, न हि द्यावापृथिव्योरन्तोपलब्धिरस्ति । 'ध्रुवे पदे' सप्तम्येकवचनम्, अन्तरिक्षविषयम्, ध्रुवं शाश्वतम्, एतस्मिन् पदे आधारभूते, अन्तरिक्षस्य क्षयो नास्ति, प्रतिद्वन्द्वाभावात्, तच्चैतयोर्द्यावापृथिव्योः प्रतिष्ठा, तस्मिन्नेते 'तस्थतुः' स्थितवत्यौ । सर्गादारभ्य 'जागरूके' जागरणशीले, स्वं स्वमधिकारं प्रति । 'उत' अपि चैते 'स्वसारौ' भगिन्यौ, सहोत्पत्तित्वात् । 'युवतीभवन्ती' सम्मिश्रीभवन्त्यौ, परस्परसम्भोगेन । 'आद् उ ब्रुवाते मिथुनानि नाम' इति । अथैवमेते 'वियुते' च सम्मिश्रीभूते च सत्यौ, द्यावापृथिव्यौ, ब्रुवाते इव, स्तोस्तॄणां 'नाम' नामानि, आत्मनः 'मिथुनानि' द्विवचनसम्बद्धानि स्तुतिनामभिः,—स्वधे (१), पुरन्धी (२)"—'इत्येवमादिभिरिति ॥ एवमेतस्मिन् मन्त्रे 'वियुते"—इत्यस्य पदस्य द्यावापृथिवीविशेषणत्वम्, द्यावापृथिवीशब्दश्चात्राध्याहार्य्यः, 'दूरे अन्ते'—इत्येवमादीनां तथोपपत्तिदर्शनात् ॥

"ऋधक् (६०)"—इति । अनेकार्थम् । "ऋधगिति पृथग् भावस्य प्रवचनं भवति" पृथक्त्वमेव पृथग्भावः, तस्येदं प्रवचनं भवति, सोऽनेन प्रोच्यते इत्यर्थः । "यदिन्द्र दिवि पार्य्ये यदृधग् यद्वा स्वे सदने यत्र वासि । अतो नो यज्ञमवसे नियुत्वान् सजोषाः पाहि गिर्वणो मरुद्भिः ॥"—(ऋ० सं० ४, ७, १२, ५) । भरद्वाजस्येयमार्षम् । पृष्ठ्यस्य पञ्चमेऽहनि मरुत्वतीये निविद्धानीये सूक्ते शस्यते । हे भगवन् ! 'इन्द्र !' 'यत्' यदि त्वं 'दिवि' द्युलोके 'पार्य्ये' पारणीये स्थानेऽवस्थितः, 'यदृधक्' यदि ऋधक् पृथगिव इत्यर्थः । 'यद्वा' यदि वा 'स्वे सदने' अन्तरिक्षलोकेऽवस्थितः । 'यत्र वासि' क्वचिदन्यत्रैव स्थानेऽवस्थितः, को हि तत्त्वतो वेद, तव स्थानं यत्रासीति । किं बहुना, यत्र यत्रासि अवस्थितः, 'अतः' आगत्य 'यज्ञम्' 'अवसे' रक्षसि । 'नियुत्वान्' वायुर्भूत्वा । यस्त्वमेवम्प्रभावः, त्वां तु ब्रवीमि,—हे 'गिर्वणः' गीर्भिः सम्भजित ! स हि स्तुतीः सम्भजति, स्तुतिभिर्वा सम्भज्यते, 'सजोषाः' सहजोषणः सप्रीतिः, 'मरुद्भिः' पिबैतं सोममस्मत्प्रत्तम् । एवमेके पृथग्भावोदाहरणमेतमृचं व्याचक्षते ॥

अपरे पुनर्य एवैष भाष्यकारेण निगमः पठितः,—"ऋधगयाः"—इति, अत्रैवेतौ द्वावप्यर्थाविति मन्यन्ते, तथापि दर्शयिष्यामस्तस्यामेवर्चि "अथापि" अथमेवमृधगिति शब्दः कदाचित् "ऋध्नोत्यर्थे" अपि "दृश्यते"—"ऋधगया ऋधगुताशमिष्ठाः" इत्यस्मिन् मन्त्र । "वयं हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन् यज्ञमुपयाहि विद्वान् स्वाहा ॥"—इति (य० वा० सं० ८, २०) । समिष्टयजुःषु सौमिकेषु विनियुक्ता । तत्र चोक्तम्,—"एतौ विश्वामित्रो यज्ञस्यारणी अपश्यत्"—इति । हे भगवन् ! 'अग्ने !' 'यत्' प्रयोजनमुद्दिश्य 'अद्य' 'प्रयति' प्रोत्सर्पति एतस्मिन् 'यज्ञे' 'वयम्' 'अवृणीमहि' वृतवन्तः 'होतारं' त्वाम् । "अग्निर्देवो दैव्यो होता"—इति श्रूयते । किं पुनस्तत् प्रयोजनम् ? इति । कथं नामाल्पमप्यवदानमात्रं हुतं देवतातृप्तिसमर्थं बहु कुर्य्यादशान्तमपि च यद् विगुणं यज्ञस्य किञ्चित् तच्छमयित्वा समृद्धमेव कुर्य्यात् ? इति, तच्चोभयमपि यथाशास्त्रमेवास्माकं त्वया कृतम्, अत इदानीं परिसमाप्ते एतस्मिन् यज्ञे प्रत्यभाष्यसे अस्माभिः,—'ऋधगयाः' त्वम्, अल्पमपि हुतम् अस्माभिः हविः, 'अधक्' एव ऋद्धमेव, देवतातृप्तिसमर्थं बहुं कुर्वन् 'अयाः' त्वं यागमकार्षीरित्यर्थः । किञ्च, 'ऋधगुताशमिष्ठाः' अपि च यदपि किञ्चिद्विगुणम् अकार्ष्म, वयमेतस्मिन् यज्ञे, तदपि सर्वमेव समृद्धं सगुणमेव कुर्वन्, पापमस्य यज्ञस्य अशमिष्ठाः स्विष्टकृद्रूपेण शमितवानसि । यस्त्वमेतदकर्षीरस्माकमेतस्मिन्, यज्ञे, तं, त्वां ब्रवीमि,—एतदेव मयैतेषां कर्त्तव्यमित्येतत् 'विद्वान्' 'प्रजानन्' प्रकर्षेण जानन् अस्माकमात्मन उपरि भक्तिं पुनः पुनः 'उपयाहि' उपागच्छ 'यज्ञम्' ॥ एवं तावदेकेषाम् "ऋधगयाः, ऋधगुताशमिष्ठाः"—इत्येतौ द्वावपि "ऋधक्" शब्दौ ऋध्नोत्यथविव । एतमिस्मन्नर्थे, ऋधक्छब्दस्य पृथग्भावार्थत्वे "यदिन्द्र दिवि पार्य्ये यदृधक्"—इत्येतदुदाहरणम् । अन्ये पुनर्मन्यन्ते,—"ऋधगयाः, ऋधगुताशमिष्ठाः"—इत्येतयोरेव ऋधक्छब्दयोः पूर्वः पृथग्भावार्थः, उत्तर ऋध्नोत्यर्थ इति । तदेतदुपपद्यते, मिश्राण्यपि हवींषि हुतानि सन्ति, त्वमग्ने ऋधक् पृथगेव कृत्वा ततो देवानयाक्षीर्न ते सम्मोहोऽस्तीत्यभिप्रायः । 'ऋधगुताशमिष्ठाः'—इत्येष यथाव्याख्यात एव । पूर्वस्त्वर्थः साधीयान्, यत्र द्वावप्येतावृध्नोत्यथविव,—"ऋधगयाः" "ऋधगुताशमिष्ठाः"—इति । किं कारणम् ? "अथाप्यृध्नोत्यर्थे दृश्यते"—इति एवमुपन्यस्य भाष्यकारेण ततोऽयमुपात्तो निगमः,—"ऋधगया ऋधगुताशमिष्ठाः"—इति, एवञ्च निरुक्तम्—"ऋध्नुवन्नयाक्षीर्ऋध्नुवन्नशमिष्ठाः"—इति । तस्मात् द्वावप्येतावृध्नोत्यर्थावित्येतदेव साधीयः ॥

---

28. (અનુ૦) (૫૭) "તે વૃદ્ધિ પામે છે, એને પાપ (अंहति) મળતું નથી." અહીં तूतावनो અર્થ तुताव (वर्द्धति प्रजाधनयशोभिः) થાય છે. વળી, अंहति, अंहः અને अंहुः એ ત્રણેય શબ્દો (પાપવાચક છે અને) √हन् ધાતુમાં ઉપધા-ઉપાન્ત્યવર્ણ (ह् अन्>अ કાર)ને આગળ મૂકીને (अहन्), પછી हन्‌નો વિપર્યય (= नृह) કરવાથી अनृह>अंह् (+ अति ઉણાદિ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रत्यय)-अंहति । એવો શબ્દ સિદ્ધ થાય છે.

(૫૮) "હે બૃહસ્પતિ ! દેવોની હિંસા કરનારનો આપ નાશ કરો છો." અહીં चयसे નો અર્થ चातयसि (नाशयसि) થાય છે અને पियारुम् એટલે देवपीयुम् અર્થાત્ 'દેવોની હિંસા કરનારને.' पीयुम् શબ્દમાં √पीय ધાતુ હિંસા અર્થમાં છે.

(૫૯) वियुते શબ્દનો અર્થ 'દ્યાવાપૃથિવી' થાય છે. વિયવન (વિમિશ્રીભૂત)ને કારણે તે બન્ને વિયુત કહેવાયા છે. અર્થાત્ દ્યુલોક અને પૃથિવીલોક મિશ્રિત નહીં થયેલાં, અલગ અલગ ઊભાં છે માટે તેમને વિયુત' કહે છે. "સમાન પરિમાણવાળા (समान्या) દ્યાવાપૃથિવી દૂર છે અને સમીપ (અન્ત>અન્તિક) છે. समानम् એટલે सम्मानमात्र (સરખા માન-માપ-વાળા છે). 'मात्रा' શબ્દ માન (માપ) ઉપરથી બન્યો છે. दूरम् શબ્દની વ્યાખ્યા થઈ ગઈ છે. अन्त શબ્દ ગત્યર્થક √अत (अतति) ઉપરથી બન્યો છે.

(૬૦) ऋधक् । એવો શબ્દ 'પૃથગ્ભાવ' અર્થમાં વપરાય છે અને 'સમૃદ્ધ થવું' અર્થમાં પણ જોવા મળે છે. જેમ કે, "સમૃદ્ધ બનીને (તમે આ) યજ્ઞ (अयाः) કર્યો અને સમૃદ્ધ શક્તિશાળી બનીને તમે (શત્રુઓનું) શમન કર્યું." અહીં ऋधम् अयाः એટલે ऋध्नुवन् अयाक्षीः (સમૃદ્ધ થતાં તમે યજ્ઞ કર્યો) અને ऋधगताशमिष्ठाः એટલે ऋध्नुवन्नशमिष्ठाः (સમૃદ્ધ થતાં તમે-શત્રુઓનું શમન કર્યું).

29. (વિમર્શ) યાસ્કે ऋधक् શબ્દના બે અર્થો બતાવ્યા છે : ૧. પૃથગ્ભાવ અને ૨. સમૃદ્ધ થવું. ऋधक्નો પૃથગ્ભાવ અર્થમાં પ્રયોગ થયો હોય એવા મન્ત્રનું ઉદાહરણ આપ્યું નથી. તેથી દુર્ગે એનું ઉદાહરણ આ પ્રમાણે આપ્યું છે : यदिन्द्र दिवि पार्ये यदृऋधक् यद्वा त्वे सदने यत्र वासि ॥ (હે ઇન્દ્ર ! તું દ્યુલોકમાં અવસ્થિત છે કે તેનાથી પૃથક્ એ અંતરિક્ષ લોકમાં...). હવે યાસ્કે જે ઉદાહરણ આપ્યું છે-ऋधगया ऋधगताशमिष्ठाः । એમાં કેટલાંકના મતે બંને ऋधक् શબ્દમાંથી પૂર્વોક્ત બંનેય અર્થોનો બોધ થાય છે. આની વિરુદ્ધમાં બીજા કેટલાક એમ કહે છે કે યાસ્કે આપેલા ઉદાહરણમાંનો પહેલો ऋधक् શબ્દ પૃથગ્ભાવ અર્થમાં પ્રયોજાયો છે, અને બીજો ऋधक् શબ્દ સમૃદ્ધ થવું અર્થમાં વપરાયો છે.

---

29. अस्याः ॥ ६१ ॥ अस्य ॥ ६२ ॥

अस्याः इति च अस्य इति च उदात्तं प्रथमादेशेऽनुदात्तम् अन्वादेशे । तीव्रार्थतरम् उदात्तम् । अल्पीयोऽर्थतरम् अनुदात्तम् । अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व (ऋ. सं. १/१३८/४) । अस्यै नः सातये उपभव । अहेळमानः अक्रुध्यन् । ररिवान् । रातिः अभ्यस्तः । अजाश्व इति पूषणमाह अजाश्व । अजाः अजनाः ॥

---

29. "अस्याः (६१)"—इति, "अस्य (६२)"—इति च । पदद्वयं स्त्रीपुंसविषयम्, स्वरकृतात् विशेषात् प्रधानाभिधायि वा भवति । आह,—कथम् ? इति उच्यते,—"उदात्तं प्रथमादेशे" । प्रथम इति मुख्यनाम, मुख्यं प्रधान उच्यते, प्रधानं कञ्चिदर्थमभिदधत् एतद् द्वयमुदात्तं भवति । "अनुदात्तमन्वादेशे" । प्रधानमर्थमनु यो वर्त्तते गुणभावेन तस्यैतत् पदद्वयमन्वादेशे वर्त्तमानमनुदात्तं भवति । आह,—कस्मादेतत् पुनरुदात्तं प्रधाने वर्त्तमानमनुदात्तमप्रधाने ? इति । उच्यते,— लोकेऽपि हि यत् "तीव्रार्थतरम्" उत्कृष्टार्थप्रधानतरं तत् "उदात्तम्"—इति प्रसिद्धम्, तद्यथा, —उदात्तमेतत् कुलमिति । "अल्पीयोऽर्थतरमनुदात्तम्" । अल्पीयसार्थेन यद्युक्तं भवति तदनुदात्तमुच्यते, अप्रधानमित्यर्थः । उदाहरणैरेवानयोर्विभागं दर्शयति,—"अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व श्रवस्यतामजाश्व । ओषु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः न हि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥"—इति (ऋ० सं० २, २, २, ४) । परुच्छेपस्यार्षम् । अतिच्छन्दाः । 'ऊ'—इति, 'षु'—इति, 'ण'—इति पदानि । 'अस्याः' "अस्यै" 'सातये' लब्धये । कथं नाम वयमर्थमभिप्रेतं लभेमहि ? इत्येवमर्थमुद्दिश्य, हे 'पूषन् !' अस्माकं सुष्ठु 'उप' समीपे 'भुवः' भव । त्वयि सन्निकृष्टे त्वदनुग्रहादेतमर्थं लभेमहीत्यभिप्रायः । कथं पुनरुपभव ? अहेलमानः' अक्रुध्यन्, सर्वो ह्यभ्यर्थ्यमानः क्रुध्यतीत्यभिप्रायः । 'ररिवान्' दानवान्, दानाभिप्रायसंयुक्तेन चेतसा उपभव । 'अजाश्व' "अजनाश्व" गमनाश्व, छागाश्व वा 'श्रवस्यताम्' अस्माकं धनमिच्छतां भव, "अजनाश्व" छागाश्वेत्यर्थः । किञ्च, 'ओषु त्वा ववृतीमहि' । 'आ' 'उ' 'षु'—इति पदानि । 'आ ववृतीमहि' त्वां सुष्ठु आभिमुख्येन आत्मनो वर्त्तयामहे । केन ? 'स्तोमभिः' स्तोत्रैः । 'स्तोत्रैः' । 'दस्म' हे दस्म ! दर्शनीय ! अथवा दान्त ! साधुभिः शोभनैरित्यर्थः । किञ्च, 'न हि त्वा' नैव त्वां दर्शनीयम् अतीत्य साधुतरां कञ्चिदप्यन्यामहं देवतां मन्ये, हे 'आघृणे' आगतदीप्ते ! त्वद्भक्त एवाहमस्मीत्यभिप्रायः किञ्च, 'न ते' न चाहं तव 'सख्यं' सखिभावं कदाचिदपि 'अपह्नवे' कृतज्ञो ह्यहमित्यभिप्रायः । एवमत्र सातिः प्रधानेति कृत्वा "अस्याः"—इत्येतत् पदमन्तोदात्तम् । अन्तोदात्तमपि च सदुदात्तमित्युक्तं भाष्यकारेण, एकादेशस्योदात्तत्वात् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

29. (અનુ૦) अस्याः અને अस्य એવાં પદો પ્રથમાદેશમાં ઉદાત્ત સ્વરવાળા અને અન્વાદેશમાં અનુદાત્ત સ્વરવાળા થાય છે. આમાંથી જે તીવ્રાર્થતર હોય તેને ઉદાત્તસ્વર થાય છે અને જે અલ્પીયાર્થતર હોય તેને અનુદાત્તસ્વર થાય છે. ''હે અજાશ્વ (પૂષન્) ! એની પ્રાપ્તિને માટે, ક્રોધ નહીં કરતાં અને ધન આપનાર એવા તમે અમારી પાસે આવો. (હે અજાશ્વ ! કીર્તિમાન્ બનો).'' આ મન્ત્રમાં अस्याः એવું ષષ્ઠયન્ત પદ ચતુર્થીના અર્થમાં છે માટે अस्यै नः सातये उपभव । (એને મેળવવા માટે તું અમારી પાસે આવ) એવો મન્ત્ર થશે. અહીં अहेळमानः એટલે ક્રોધ નહીં કરતો. ररिवान् શબ્દ रातिનું અભ્યસ્ત રૂપ છે. અર્થાત્ √रा (આપવું) ધાતુનું દ્વિત્વ થઈને (મત્વર્થે वत् પ્રત્યય લાગીને) બન્યો છે, (તેનો અર્થ ધન આપનાર થાય છે). તથા अजाश्व શબ્દ પૂષા (સૂર્ય)નો વાચક છે. પરંતુ अजाश्वનો શબ્દાર્થ अजाः = अजनाः એટલે કે ગમનાશ્વ (ગમન માટે ઉપકારક એવા અશ્વોવાળા) અથવા છાગાશ્વ (બકરી રૂપી અશ્વોવાળા).

29. (વિમર્શ) अस्याः અને अस्य એ બે પદો इदम् શબ્દના અનુક્રમે સ્ત્રીલિંગમાં પંચમી-ષષ્ઠી એકવચન અને પુંલિંગમાં ષષ્ઠી એકવચનનાં રૂપો છે. આમ આ શબ્દોના અર્થ બાબતે કોઈ અનવગતિ નથી. પરંતુ કયા સંદર્ભમાં તેમને કયો સ્વર મળે છે ? એ વિશે સંદેહ થાય એમ છે. આથી અહીં તેની ચર્ચા પ્રસ્તુત બની છે. યાસ્ક જણાવે છે કે આ બે પદોને પ્રથમાદેશમાં ઉદાત્તસ્વર મળે છે અને અન્વાદેશમાં અનુદાત્તસ્વર મળે છે. અહીં 'પ્રથમાદેશ' અને 'અન્વાદેશ' એ શબ્દોના અર્થઘટનમાં મતમતાંતરો જોવા મળે છે : દુર્ગના મતે ''પ્રથમાદેશ'' શબ્દમાંનો 'પ્રથમ' શબ્દ મુખ્યાર્થનો એટલે કે પ્રધાનાર્થનો વાચક છે. આથી મન્ત્રમાં આ બે પદો જ્યારે કોઈ પ્રધાનાર્થને કહેનારાં હોય છે ત્યારે તેમને પ્રથમાદેશ કહે છે અને તેઓને ઉદાત્તસ્વર મળે છે. પરંતુ પ્રધાનાર્થની પાછળ પાછળ જો આ બે પદો ગુણભાવે રહેલા હોય અર્થાત્ ગૌણાર્થમાં રહેલા હોય તો (તેને અન્વાદેશ કહે છે) અને તેમને અનુદાત્તસ્વર મળે છે. દા. ત., (૧) (क) अस्या उ षु ण उप सातये ॥ આ ઉદાહરણમાં अस्याः પદ सातये સાથે જોડાયેલું છે અને પ્રધાનાર્થને કહેનારું છે માટે તેને આ મન્ત્રમાં અન્તોદાત્ત સ્વરયુક્ત દર્શાવવામાં આવેલ છે. 'તીવ્રાર્થતરને ઉદાત્તસ્વર થાય છે' એમ જે ઉપર કહ્યું છે તેનો અર્થ પણ એ જ થાય છે કે મન્ત્રમાં જે ઉત્કૃષ્ટાર્થ પ્રધાનતર अस्याः કે अस्य પદ હોય તેને ઉદાત્તસ્વર થાય છે. (ख) दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् । અહીં ભર્તા અને કન્યાનો સંયોગ થતાં ભર્તાનું જ પ્રાધાન્ય હોય છે, માટે તેના આયુષ્યની કામના કરવામાં આવે છે. આ સન્દર્ભમાં પત્ની સાથે જોડાયેલું अस्याः પદ ગૌણાર્થને કહેનારું છે; માટે તે પદ અન્વાદેશ કહેવાશે અને તેથી તેને સર્વાનુદાત્ત સ્વરથી દર્શાવવામાં આવ્યું છે. अस्य वामस्य पलितस्य... । तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं... ॥ યાસ્કે આ એક જ મન્ત્રમાં પ્રધાન અને અપ્રધાન અર્થમાં વપરાયેલા અર્થાત્ પ્રથમાદેશ અને અન્વાદેશ રૂપે વપરાયેલ अस्य પદનાં ઉદાહરણો રજૂ કર્યાં છે. (क) આ મન્ત્ર જે સૂક્તમાં આવેલો છે તેમાં સૂર્યનો અધિકાર છે, તેથી આ મન્ત્રમાં સૂર્યનું પ્રાધાન્ય છે એમ નક્કી થાય છે. अस्य वामस्य પદો સૂર્ય વિષયક છે. આથી મન્ત્રના પ્રથમ પાદમાં વપરાયેલું अस्य પદ પ્રથમાદેશ કહેવાશે અને તેથી એને અન્તોદાત્તસ્વરયુક્ત દર્શાવવામાં આવ્યું છે. (ख) ત્રીજા પાદમાં આવેલું अस्य પદ અગ્નિ માટે વપરાયું છે. અર્થાત્ તે ગૌણાર્થમાં છે અને પરિણામે તેને અન્વાદેશ કહેવાશે. આથી તેને સર્વાનુદાત્ત રૂપે દર્શાવવામાં આવ્યું છે.

દુર્ગાચાર્યે પ્રથમાદેશ અને અન્વાદેશની બીજી એક સમજૂતી પણ આપી છે. જેમ કે, પ્રથમાદેશ એટલે પ્રારંભ. અર્થાત્ મન્ત્રના પ્રારંભે, મન્ત્રના પૂર્વાર્ધમાં અથવા પાદના પ્રારંભે જો अस्याः કે अस्य પદ આવ્યું હોય તો તેને પ્રથમાદેશ કહે છે અને તેને ઉદાત્તસ્વર થાય છે. આથી ઊલટું, મન્ત્રના મધ્યમાં કે અન્તમાં, મન્ત્રના ઉત્તરાર્ધમાં અથવા પાદના મધ્યમાં કે અન્તમાં જ્યારે આ બે પદો આવેલાં હોય ત્યારે તેને અન્વાદેશ કહે છે અને તેમને અનુદાત્ત સ્વર મળે છે. આ વ્યવસ્થાથી પણ ઉપર્યુક્ત ઉદાહરણને સમજાવી શકાય છે, તેમાં કશો ફરક પડતો નથી.

પરંતુ સ્કંદસ્વામી કહે છે પૂર્વોક્ત બન્ને વ્યવસ્થાઓ સ્વીકાર્ય નથી, કેમ કે યાસ્કે આપેલા મન્ત્રોમાં તો તેની સંગતિ થઈ શકે છે. પરંતુ અન્ય મન્ત્રોમાં તેની સંગતિ થતી નથી. આથી તેમણે શબ્દાન્તરેણ आदिष्टस्य प्रथमेन य आदेश = उच्चारणं स प्रथमादेशः । એવી વ્યાખ્યા આપી છે, આ મુજબ નામના પ્રયોગની પૂર્વે જો તેની સાથે સંબંધિત સર્વનામ (अस्याः કે अस्य)નો પ્રયોગ થાય તો તેને પ્રથમાદેશ કહે છે.

પાણિનિએ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । ૨/૪/૩૨ સૂત્રથી તૃતીયાદિ વિભક્તિ પરમાં રહેતા इदम् સર્વનામનાં રૂપોને 'અન્વાદેશ'માં अश् આદેશ કરીને તેને અનુદાત્તનું વિધાન કર્યું છે. જેમ કે, अस्य छात्रस्य शोभनं शीलम् अथो अस्य प्रभूतं स्वम् । અહીં અન્વાદેશનો અર્થ અનુકથન થાય છે. આને સમજાવતાં ભટ્ટોજિ દીક્ષિતે લખ્યું છે કે किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथा–अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापयेति ॥ (૩૫૧ द्वितीयाटौस्स्वेनः । ૨/૪/૩૪ સૂત્ર ઉપરની વૃત્તિમાં)

(इदम्–एतद् જેવાં સર્વનામના દ્વિતીયાદિ વિભક્તિમાં इमम्–एनम्, इमौ–एनौ, इमान्–एनान् ॥ કે एतम्–एनम्, एतौ–एनौ,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

एतान्-एनान् જેવાં કે (બીજાં બીજાં) વૈકલ્પિક રૂપો થાય છે, તેનો પ્રયોગ કેવળ અન્વાદેશમાં થાય છે. દા.ત., ઉપરના ઉદાહરણમાં ....एनम् छन्दोऽध्यापयेति ।)

30. अथानुदात्तम् । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् (ऋ. सं. १०/८५/३९) दीर्घायुः अस्याः यः पतिः जीवतु स शरदः शतम् । शरत् शृता अस्याम् ओषधयो भवन्ति । शीर्णाः आपः इति वा । अस्य इति अस्याः इत्येतेन व्याख्यातम् ॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः । तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् (ऋ. सं. १/१६४/१) ॥ अस्य वामस्य वननीयस्य । पलितस्य पालयितुः । होतुः ह्वातव्यस्य । तस्य भ्राता मध्यमोऽस्ति अशनः । भ्राता भरतेर्हरतिकर्मणः । हरते भागम् । भर्तव्यः भवतीति वा । तृतीयो भ्राता घृतपृष्ठः अस्य अयमग्निः । तत्रापश्यं सर्वस्य पातारं वा पालयितारं वा विश्पतिम् । सप्तपुत्रं सप्तमपुत्रम् । सर्पणपुत्रमिति वा । सप्त सृता संख्या । सप्त आदित्यरश्मय इति वदन्ति ॥

30. "अथ" पुनर्यस्मिन् "अनुदात्तम्" एतत् पदं गुणभूतार्थाभिधायि भवति । तस्यैष निगमः,—"पुनः पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥"—इति (ऋ० सं० ८, ३, २७, ४) । सूर्य्याया आर्षम् । विवाहे विनियुक्ता । पित्रा पूर्वमितां दत्तां सतीं कन्यां पत्नीं पुनरग्निरदात्, 'आयुषा सह वर्चसा' तेन सह एतस्मिन् वैवाहिके कर्मणि अग्निसन्निधिसंस्काराद् भार्य्यात्वमुपजायते इत्येतदपेक्ष्य पूर्वदानात् पुनर्दातृत्वमुच्यते । तदेवमस्या दत्ताया एतदाशास्महे,—'योऽस्याः पतिः' सः 'दीर्घायुः' अस्त्वियति । यतो विशेषयन् ब्रवीमि,—"जीवतु सः शरदः शतम्"—इति । शरदि दुर्जीवाः, रोगभूयस्त्वात्, अतएव आशास्यते शरच्छतं जीवत्विति ॥ एतस्मिन् मन्त्रे भर्तृकन्यासंयोगे सति भर्त्तैव प्रधानम्, तस्य ह्यायुराशास्यते । तस्य लक्षणार्था पत्नी । तस्मात् "दीर्घायुः अस्या यः पतिः"—इति, एतदनुदात्तम् ॥

निगमप्रसक्तमुच्यते,—"शरत्" "अस्यां" हि "शृताः" पक्वाः "ओषधयो भवन्ति"—इति, "शीर्णा आप इति वा" वर्षासु हि प्रवृद्धानि स्रोतांसि शरदि विशीर्य्यन्ते । "अस्य—इति" एतत् पदं पुंविषयम् षष्ठ्यन्तं "अस्याः—इत्येतेन" स्त्रीविषयेण पदेनैव व्याख्यातम्" ॥ ४ (२५) ॥

यदेवोक्तम् "उदात्तं प्रथमादेशे, अनुदात्तम् अन्वादेशे"—इति तदेवात्रापि लक्ष्यमित्यभिप्रायः । उदाहरणमात्रं प्रदर्श्यते,—"अस्य वामस्य ०—० सप्तपुत्रम्" । अस्यवामीयमेवेदं सूक्तम् । दीर्घतमस आर्षम् । तार्त्तीयसवने महाव्रते वैश्वदेवे शस्त्रे शस्यते । 'अस्य' सूर्य्यस्य 'वामस्य' "वननीयस्य" स्तुतिभिः, 'पलितस्य' "पालयितुः" अयं हि सर्वमिवेदं जगत् पालयति । 'होतुः' "ह्वातव्यस्य" आह्वानार्हस्य । आह, तस्य किम् ? इति । उच्यते,—योऽयमेवं लक्षणः आह,—'तस्य भ्राता' "भागहर्त्ता" "भर्त्तव्यो वा" उदकेन, 'मध्यमः' मध्यमस्थानः 'अस्ति' विद्यते । कतमः ? योऽयम् 'अश्नः' "अशनः" व्यापनो वायुरित्यर्थः, स हि द्युलोकादादित्येनोदकेन भ्रियते, हरति चोदकं द्युलोकात् । 'तृतीयः' 'अस्य' वायोः 'भ्राता' हविर्भागहर्त्ता वा, ऐन्द्राग्ने हविषि संस्तुतौ वा, 'घृतपृष्ठः' घृतेन स्पृष्टः, आज्यस्पृष्टः, "अयम्" एव "अग्निः" पृथिवीस्थानः । 'सहस्रिणः' वायोः, सर्वस्माद्धि वायुः बलवान् । अथवा सहस्रमस्य नियुक्तमश्वानामस्तीति सहस्री वायुः, "आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिः"—इति (ऋ० सं० २, १, २४, ३) । श्रूयते वायव्ये मन्त्रे । वायुः, आदित्यः, अग्निः,—इत्येवं परिसंख्याय वायोस्तृतीयोऽअग्निर्भवति, वायुरपि च ज्योतिरेव, "वायुना ज्योतिषा"—इति विज्ञायते । तत्रैतस्मिन् त्रेधा विभक्ते ज्योतिषि, प्रधानत्वेनैतमेवाहमपश्यमिति । 'विश्पतिं' विश्वस्य सर्वस्य जगतः पालयितारम् । कतमम् ? य एषः 'सप्तपुत्रः' सूर्य एतमेवाहमत्र प्रधानेनापश्यमित्येवमेतस्मिन् मन्त्रे । सूर्य्यः प्रधानः, सूक्ते सूर्य्याधिकारात्, तस्मात् 'अस्य वामस्य'—इत्येषः "अस्य"—शब्द अन्तोदात्तः । वायुरत्राप्रधानम्, तस्मात् 'तृतीयो भ्राता घृतपृष्ठः अस्य,—इत्येषः "अस्य"—शब्दोऽनुदात्तः ॥ एवमेकस्मिन्नेवास्मिन् मन्त्रे उदात्तानुदात्तावेतौ "अस्य"—शब्दौ प्रधानाप्रधानविषयावित्येकमेवोदाहरणम् ॥

आह,—'तृतीयो भ्राता घृतपृष्ठो अस्य'—इत्यनेन "अस्य" शब्देन सूर्य्य एव कस्मान्न सम्बध्यते ? अपि च "तृतीय"—शब्दस्य प्रकृतानुक्रमाविरोधेनैवमेव सुखतरा योजना भविष्यति । उच्यते,—'अस्य वामस्य'—इत्येतदन्तोदात्तं पदमितरदन्यत् 'तृतीयो भ्राता घृतपृष्ठः अस्य'—इति प्रधानरूपमेव सत् पूर्वेणानुदात्तमिति स्वरकृताद्विशेषादर्थकृतेनापि विशेषेण भवितव्यमित्यप्रधानार्थाभिधायिना विशेषः प्रतीयते । आदित्यसंस्तवात् सूक्ते वायुश्चात्राप्रधानः, प्रकृतादादित्यात् तस्माद्वायुविषयमेवेदम् अस्येति द्वितीयपदमनुदात्तं सम्पद्यते । अतः सुतरामुपपन्नं भवति "उदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे"—इत्यत्र

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रथमादेशान्वादेशशब्दाभ्यां प्रधानाप्रधानावुच्येते इति । अन्ये तु मन्यन्ते,—प्रथमादेशो नाम प्रारम्भः, तत्र यद्वर्त्तते, तदुदात्तं भवति, प्रधानार्थतरमुदात्तत्वेनैव लक्षणेन । तद्यथा,—"अस्य उ षु णः (ऋ० सं० २, २, २, ४)" "अस्य वामस्य (ऋ० सं० २, ३, १४, १)"—इति । अन्वादेशो नाम, अन्यस्य पदस्य पश्चादादेशः, तत्र वर्त्तमानमनुदात्तं भवति । पदात् पदस्य निघातो भवतीति हि लक्षणविदोऽपि ब्रुवते । तच्चानुदात्तत्वेनैव लक्षणेनाल्पीयोऽर्थतरमप्रधानार्थतरं भवति । तद्यथा,—"दीर्घायुरस्या यः पतिः (ऋ० सं० ८, ३, २७, ४)" तृतीयो भ्राता घृतपृष्ठो अस्य (ऋ० सं० २, ३, १४, १)"—इति ॥

आह,—कथं सप्तमपुत्र आदित्यः ? इति । उच्यते,—"सप्तमो ह्यसावादित्यः पुत्रः"—इत्येवमैतिहासिका मन्यन्ते । ब्राह्मणेऽपि च,—"मृतपितरमण्डमवापद्यत, तस्मिन्नादित्यः सप्तम इन्द्रोऽष्टम इति ह विज्ञायते" । अथवा सप्तसंख्यांका युक्ता अस्य रश्मयः पुत्राः, तेनासौ सप्तपुत्रः । अथवा नैव संख्याभिप्रायमेतत् सप्तपुत्र इति । आह,—कथं तर्हि ? इति । उच्यते,—"सर्पणपुत्रमिति" एवम्, सर्पणा हि तस्य रश्मयो मुहूर्त्तमप्यनवस्थायिनो यस्य पुत्राः सोऽयं सप्तपुत्रः । "सप्त सृप्ता संख्या" षड्भ्यः सकाशात् । एवं सप्तसंख्योपेताः, सर्पणक्रियायोग्या वा एत एव "आदित्यरश्मयः" आदित्यस्य पुत्राः "इति" मन्त्रविदः "वदन्ति" मन्यन्ते ॥ ५ (२६) ॥

---

30. (અનુ૦) હવે અનુદાત્ત સ્વરવાળા अस्याः—अस्यनું ઉદાહરણ જોઈશું : "દીર્ઘાયુ આનો જે પતિ, તે સો શરદ્ જીવો." આ સ્ત્રીનો જે પતિ હોય તે દીર્ઘાયુ થાવ અને સો વર્ષો જીવો. અહીં જે (ઋતુ)માં બધી ઔષધિઓ (વનસ્પતિઓ) પરિપક્વ થઈ જાય છે તેથી તેને 'શરદ્' કહે છે. અથવા જે (ઋતુ)માં બધાં જળ સૂકાઈ જાય છે તેને શરદ્ કહે છે. अस्याः પદની પૂર્વે વ્યાખ્યા કરી દીધી છે, તેનાથી જ આ મન્ત્રમાંના अस्य પદની વ્યાખ્યા થઈ જાય છે. (અર્થાત્ अस्याः એ इदम् સર્વનામનું સ્ત્રીલિંગમાં પંચમી-ષષ્ઠી એકવચનનું રૂપ છે અને अस्य એવું રૂપ એ જ શબ્દનું પુંલિંગમાં ષષ્ઠી એકવચન છે.)

"આ પ્રશંસનીય, (સમગ્ર જગત્‌નું) પાલન કરનાર એવા જે હોતાનો (સૂર્યનો) મધ્યમ ભ્રાતા વાયુ છે; તથા જેનો ત્રીજો ભાઈ ઘીથી સ્પર્શાયેલો (યજ્ઞવેદીનો અગ્નિ) છે; એવા સાતમા પુત્ર (અદિતિનો સાતમો પુત્ર સૂર્ય છે, તેને) જગત્‌ના સ્વામી (સૂર્યદેવ)ને મેં જોયા." આ મન્ત્રમાં वामस्य એટલે વનનીય અર્થાત્ પ્રશંસનીય, पलितस्य એટલે પાલક તથા होतुः એટલે "બોલાવવા યોગ્ય"નો મધ્યમ ભાઈ अश्नः=अशनः (व्यापनः) અર્થાત્ વાયુ છે. અહીં भ्राता શબ્દ 'હરણ કરવું' અર્થવાળા √भृ ધાતુ ઉપરથી બન્યો છે, કારણ કે ભ્રાતા (પિતાની સમ્પત્તિનો અર્ધો) ભાગ હરી જાય છે. અથવા તો જે ભર્તવ્ય (ભરણ-પોષણ કરવા યોગ્ય) હોય છે તેને 'ભ્રાતા' કહે છે. (આ અર્થ મુજબ भ्रातृ શબ્દ પાલનાર્થક √भृ ધાતુ ઉપરથી બન્યો હશે.) એનો ત્રીજો ભાઈ ઘીથી સ્પર્શાયેલો આ (પાર્થિવ) અગ્નિ છે. બધાના રક્ષક અથવા પાલક જગત્‌ના સ્વામીને મેં જોયા. અહીં सप्तपुत्रम्‌નો અર્થ सप्तमपुत्रम् (સાતપુત્ર = સાતમા પુત્રને) એવો થાય છે. (સૂર્યનાં કિરણો સાત સંખ્યાથી યુક્ત હોય છે, અર્થાત્ સાત રંગના હોય છે, તેને અહીં સાતપુત્રો કહ્યા છે) પરંતુ યાસ્કે તેને 'સાતમો પુત્ર' તરીકે સમજાવ્યો છે અને એવું કહેવાય છે કે અદિતિનો સાતમો પુત્ર સૂર્ય છે; માટે આ અર્થ પણ ઉચિત છે.) અથવા જેના પુત્રો સર્પણશીલ છે તેને 'સપ્તપુત્ર' કહે છે. (સૂર્યનાં કિરણો એક મુહૂર્ત પણ અટક્યા વિના ફેલાય છે, માટે તે કિરણોને સર્પણશીલ કહ્યા છે.) (સપ્તપુત્ર શબ્દમાં) 'સપ્ત' શબ્દનો અર્થ 'વધેલી સંખ્યા' થાય છે. (સાત સંખ્યા છ સંખ્યાની અપેક્ષાએ અધિક છે, માટે તેને સપ્ત સંખ્યા કહે છે.) આમ, આદિત્યરશ્મિઓ 'સપ્ત' (સાત સંખ્યાથી યુક્ત અથવા સર્પણ ક્રિયાયોગી) હોય છે એમ કહે છે.

---

31. सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः (ऋ. सं. १/१६४/२) ॥ सप्त युञ्जन्ति रथम् एकचक्रम् एकचारिणम् । चक्रं चकतेर्वा । चरतेर्वा । क्रामतेर्वा । एकः अश्वः वहति सप्तनामा आदित्यः । सप्त अस्मै रश्मयो रसानभिसंनामयन्ति । सप्त एनं ऋषयः स्तुवन्तीति वा । इदमपीतरत् नाम एतस्मादेव । अभिसंमानात् ॥

---

31. यथा चायं सप्तभिः सर्पणैर्वा रश्मिभिर्युज्यते तथेयमपरा ऋगेतस्मिन्नेव सूक्ते "सप्त युञ्जन्ति ०—० अधि तस्थुः"—इति (ऋ० सं० २, ३, १४, २) । 'सप्त' सङ्ख्योपेताः सर्पणा वा 'युञ्जन्ति' योजयन्त्यात्मना रश्मयः 'रथं' रंहणमादित्यम्, उद्यन्नेव ह्यसावादित्यो रश्मिभिः युज्यते, रंहणश्चासौ मुहूर्त्तमप्यनवस्थायित्वात् । 'एकचक्रम्' एक एव ह्यसावन्तरिक्षे चरति, इतराणि ज्योतींषि नाशयत्येव स्वेन तेजसा सर्वभूतानाम् 'वहति' गच्छति 'सप्तनामा' सप्तस्तुतिः, सप्तपुत्रः—इत्येवमाद्याः सप्तसङ्ख्याकाः स्तुतयोऽस्य । अथवा "सप्तास्मै रश्मयो रसानभिसन्नामयन्ति"—एतस्मिन् मण्डले, इति सप्तनामा । अथवा "सप्तैनमृषयः (नमन्ति) स्तुवन्ति इति" सप्तनामा । "इदमपीतरत्" शब्दः "नाम" "एतस्मादेव"—"अभिसन्नामात्" तदपि स्वमर्थं प्रत्याययितुं क्रियापदस्य वा गुणभावेनाभिमुख्येन सन्नमति । स एवंलक्षणः सप्तचारी व्यापनः सप्तनामा, सर्पणैः सप्तभिर्वा रश्मिभिर्युक्तो यदा वहति.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

उदयादारभ्य यावदस्तमिति, तदैवं वहन् निर्वर्त्तयन्तीति उच्यते,—'त्रिनाभिचक्रमजरमनर्वम्' 'त्रिनाभिसंयुक्तं कालचक्रम्, चकनधर्मि, चकनं चलनमुच्यते, चरणधर्मि, क्रमणधर्मि वा । 'अजरम्' "अजरणधर्माणम्" । 'अनर्वम्" "अप्रत्यृतमन्यस्मिन्" अनाश्रितमित्यर्थः ॥ 'त्रिनाभिचक्रं' "त्र्यृतुः" हिं "संवत्सरः"—"ग्रीष्मो वर्षा हेमन्त इति" अनेन ऋतुविभागेन एतदेवास्य त्रिनाभित्वमभिप्रेतम् । ऋतुभिर्हि संवत्सरो नह्यते सन्नह्यते इत्यर्थः । "संवत्सरप्रधान उत्तरोऽर्द्धर्चः" नादित्यप्रधानः । "संवत्सरः संवसन्त्यस्मिन्"—इति प्रसक्तानुप्रसक्तम्, समस्तानि हि "भूतानि" एतस्मिन् संवसन्ति । मैथुनाभिप्रायो वा स्यात् संवासः ? "ग्रीष्मः, ग्रस्यन्तेऽस्मिन् रसाः" सूर्य्येण । "वर्षा, वर्षत्यासु पर्जन्यः" तदेतत् प्रत्यक्षमेव । "हेमन्तः, हिमवान्" तत्र हि बहु भवति हिमम् । "हिमं पुनर्हन्तेर्वा" तद्धि हन्तोयोषधिवनस्पतीन् प्रकिरति, "हिनोतेर्वा" तर्पणार्थस्य, तेन हि पुष्यन्ति यवादयः, गमनार्थस्य वा हन्तेः, तद्धि गमयति क्षयं भूतानि । 'अजरं' तत् संवत्सरचक्रम् अजरणधर्मि, न हि संवत्सरस्य जरा नाम धर्मोऽस्ति । "अनर्वं" च तत् "अप्रत्यृतम्" अप्रतिगतमनाश्रितमन्यत्र क्वचित् । आह, अत्र किम् ? इति । उच्यते,—"यत्र" यस्मिन् 'मा' "इमानि" 'विश्वा' "सर्वाणि" 'भुवना' "भूतानि" 'अधि' उपरि 'तस्थुः' "अभिसन्तिष्ठन्ते" आश्रितानि विनाशमुपयान्ति । विनाशोऽपि हि संस्थोच्यते, संस्थितः पिता ममेत्युक्ते मृत इति गम्यते । तदेवंलक्षणं 'त्रिनाभि' कालचक्रमजरम्, य आदित्योऽभिनिर्वर्त्तयति, यच्चेदमभिनिर्वर्त्त्यते कालचक्रम्, तदेतदुभयमप्यहं स्तौमीत्येवमस्य मन्त्रस्य पूर्वोऽर्द्धर्च आदित्यप्रधानः, उत्तरः संवत्सरप्रधानः ॥

---

31. (અનુ૦) "(અન્તરિક્ષમાં) એકલા ચાલનાર અથવા એક ચક્રવાળા રથને સાત (કિરણો) જોડે છે, સાત નામવાળો એક અશ્વ તેનું વહન કરે છે. (સૂર્યના રથનું) ચક્ર ત્રણ નાભિવાળું છે (અર્થાત્ તે કાલચક્ર છે), અજર (જીર્ણ નહીં થનાર) અને અનર્વ અર્થાત્ કોઈને પણ આશ્રયે ન રહેનાર છે, તેમાં આ બધાંય ભુવનો અધિષ્ઠિત થયેલાં છે." 'સાત (કિરણો) એક ચક્રવાળા રથને જોડે છે.' અહીં एकचक्रम् એટલે एकचारिणम् અર્થાત્ 'એકલા ચાલનારને.' चक्र શબ્દ ૧. √चक्र ચાલવું-દૂર કરવું), ૨. √चर (ચાલવું) અથવા ૩. √क्रमु पादविक्षेपे (ચાલવું) ધાતુ ઉપરથી બન્યો હશે. 'સાત નામવાળો એક અશ્વ તે રથનું વહન કરે છે.' અહીં સાત નામવાળો એટલે આદિત્ય. સાત કિરણો આ (આદિત્ય)ને માટે રસોનું આહરણ કરે છે; અર્થાત્ રસોને સૂર્ય તરફ નમાવે છે. અથવા તો 'સપ્તનામ'નો અર્થ સાત સ્તુતિઓ થઈ શકે, કારણ કે ઋષિઓ સાત સ્તુતિઓથી તે (આદિત્ય)ની સ્તુતિ કરે છે. બીજો 'નામ' એવો શબ્દ પણ આની ઉપરથી જ બન્યો છે. અર્થાત્ જેનાથી અભિસંનમન (આહરણ) થાય તેને નામ કહે છે.

[ઉપર સૂર્યના ચક્રને ત્રણ નાભિવાળું કહ્યું છે. અહીં 'ત્રિનાભિચક્ર'નો અર્થ ત્રણ ઋતુઓ થાય છે. ગ્રીષ્મ, વર્ષા અને હેમન્ત એવી ત્રણ ઋતુઓનો એક સંવત્સર બને છે. અગાઉ પિતા (૪૭મા) શબ્દની વ્યાખ્યામાં 'નહન-બંધન-ને જ નાભિ કહે છે' એમ જોયું છે. એ મુજબ ત્રણ ઋતુઓથી બંધાયેલાને 'સંવત્સર' કહે છે : ऋतुभिः असौ संवत्सरो नह्यते सन्नह्यते (इति दुर्गः) । આમ 'ત્રિનાભિચક્ર' એટલે ત્રણ ઋતુ=એક સંવત્સર એવો અર્થ પ્રાપ્ત થાય છે. આ સંદર્ભમાં નીચેની ચર્ચા રજૂ થાય છે :-]

---

32. संवत्सरप्रधानः उत्तरोऽर्धर्चः । त्रिनाभि चक्रम् । त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति । संवत्सरः संवसन्तेऽस्मिन् भूतानि । ग्रीष्मः ग्रस्यन्तेऽस्मिन् रसाः । वर्षाः वर्षति आसु पर्जन्यः । हेमन्तः हिमवान् । हिमं पुनः हन्तेर्वा । हिनोतेर्वा । अजरम् अजरणधर्माणम् । अनर्वम् अप्रत्यृतम् अन्यस्मिन् । यत्र इमानि सर्वाणि भूतानि अभिसंतिष्ठन्ते ॥

तं संवत्सरं सर्वमात्राभिः स्तौति । पञ्चा॑रे च॒क्रे प॑रि॒ वर्तमाने (ऋ. सं. १/१६४/१३) । इति पञ्चर्तुतया । पञ्चर्तवः संवत्सरस्य इति च ब्राह्मणम् । हेमन्तशिशिरसमासेन । षळ॑र आहु॒रर्पितम् (ऋ. सं. १/१६४/१२) इति षळृतुतया । अराः प्रत्यृताः नाभौ । षट् पुनः सहतेः ॥

द्वाद॑शारं न॒ हि तज्जरा॑य (ऋ. सं. १/१६४/११) द्वाद॑श प्र॒धय॑श्च॒क्रमेकम् (ऋ. सं. १/१६४/४८) इति मासानाम् । मासाः मानात् । प्रधिः प्रहितः भवति । तस्मि॑न्त्सा॒कं त्रि॑श॒ता न श॒ङ्कवो॑ऽर्पिता ष॒ष्टिर्न चं॑ला॒चलासः (ऋ. सं. १/१६४/४८) । षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणम् । समासेन । स॒प्त श॒तानि॑ वि॒ंशतिश्च॑ तस्थुः (ऋ. सं. १/१६४/११) सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणम् (ऐत. आर. ३/२/१) विभागेन विभागेन ॥

॥ इति निरुक्ते चतुर्थोऽध्यायः ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

32. आह—कथं गम्यते संवत्सरप्रधान उत्तरोऽर्द्धर्चः इति, नहि संवत्सरग्रहणमत्रास्ति ? उच्यते,—'त्रिनाभिचक्रम्'—इत्येतस्मादनुसम्बन्धात् । आह,—एतदपि विशेषलिङ्गमत्र नास्त्येव, त्रय ऋतवो नाभिशब्देनोच्यन्ते इति ? तस्मादेतदप्ययुक्तमेवेति । उच्यते,—य एष पूर्वस्मिन्नर्द्धर्चे प्रकृतेन सूर्य्येणाभिनिर्वर्त्त्यति संवत्सरः, अस्मिंश्च सर्वाण्येतानि भूतान्यभिसन्तिष्ठन्ते, "तम्" एतं "संवत्सरम्" उत्तरस्मिन्नर्द्धर्चे प्रकृत्य मन्त्रकृत् 'त्रिनाभिचक्रम्'—इत्येवमाद्याभिः "सर्वमात्राभिः" सर्वैः अवयवैः 'पञ्चारे चक्रे' 'षडरे' 'त्रीणि शतानि षष्टिश्च' 'सप्तशतानि विंशतिश्च'—इत्येवम्प्रकारैः "स्तौति" । तस्मात् सूक्त संवत्सरस्यावयवस्तुतिप्रायदर्शनादिहापि त्रिनाभिशब्द ऋतुविषय इत्युपपद्यते । षण्णामृतूनां द्वौ द्वौ ऋतू समानस्वभावौ इत्यनेनाभिप्रायेण त्रित्वम् । अथैवमुक्त्वा "तं संवत्सरं सर्वमात्राभिः स्तौति" अधुना यथैतं सर्वमात्राभिः स्तौति, तथोपपादयति,—"पञ्चा॑रे च॒क्रे प॑रि॒वर्त॑माने॒ तस्मि॒न्ना त॑स्थु॒र्भुव॑नानि॒ विश्वा॑ । तस्य॒ नाक्ष॑स्तप्यते॒ भूरि॑भारः स॒नादे॒व न शी॑र्य्यते॒ स नाभिः ॥"—इत (ऋ० सं० २, ३, १६, ३—१, २२, ८, १३) । "इति पञ्चर्त्तुतया" संवत्सरस्य स्तुतिः । 'पञ्चारे चक्रे' ऋतवः अत्र अरत्वेनाभिप्रेताः । 'परिवर्त्तमाने' परिगृह्णेदं ज़गद् वर्त्तमाने । आह,—किम् ? इति । उच्यते, 'तस्मिन्नातस्थुः' तस्मिन्नवस्थितानि उपरि अधिरूढानि । कानि ? 'भुवनानि' भूतानि 'विश्वा' विश्वानि, सर्वाणि, कालचक्रे हि सर्वमिवेदं जगदधिरूढं बम्भ्रमीति । अथैवमतिमहतापि सर्वभूतचक्रेणाक्रान्तस्य कालचक्रस्य 'भूरिभारः' बहुभारः सन्नेवायम् 'अक्षः' संवत्सराख्यः 'न तप्यते' न सन्तापयति नापि सन्तापं यास्यतीत्यर्थः । अपि च 'सनादेव' चिरन्तन एव सोऽक्षः, तथापि न तप्यते, न वा तप्तोऽपि सन् सहसैव 'विशीर्य्यति' नश्यति । आह,—यद्यक्षो न तप्यते शीर्य्यति वा, किमेवमतिबलीयसाक्षेण घृष्यमाणा नाभिः, तप्यते शीर्य्यति वा ? इति । नेत्युच्यते,—'स नाभिः' अक्षो न शीर्य्यति न तप्यते । नाभिरादित्य एवाभिप्रेतः । आह,—कथमेतद्गम्यते 'पञ्चारे चक्रे'—इत्यत्र अर शब्देन ऋतवोऽभिप्रेता इति, न ह्यत्र विशेषलिङ्गमृतूनामरत्वेऽस्ति, अपि च ऋतवः षट् प्रसिद्धाः, इह च पञ्चार इति श्रूयते, तस्मादनुपपन्नम् ? इति । उच्यते,— सूक्ते संवत्सरस्यावयवस्तुतिप्रायदर्शनादुपपद्यते । "पञ्चर्त्तवः संवत्सरस्येति च ब्राह्मणम्, हेमन्तशिशिरयोः समासेन" एकत्वेनेत्यर्थः । तस्मादुपपद्यते । एवं पञ्चर्त्तुतोवमृतूनाम्, अरत्वं चावयववस्तुत्यभिसम्बन्धादिति ॥

पञ्च॑पादं पि॒तरं॑ द्वाद॑शाकृतिं दि॒व आ॑हुः परे॒ अर्द्धे॒ पुरी॑षिणम् । अथे॒मे अ॒न्य उप॑रे विचक्ष॒णं स॒प्तच॑क्रे॒ षळ॑र आहु॒रर्पि॑तम्"—इति (ऋ० सं० २, ३, १६, १) । "षळर आहुरर्पितमिति षड्ऋतुतया" संवत्सरस्य स्तुतिः । 'पञ्चपादं संवत्सरम्, ऋतवो हि संवत्सरस्य पादाः, तैरस्यसौ पतति गच्छति । 'पितरं' पालकं सर्वभूतानामुत्पादयितारं वा 'द्वादशाकृतिम्' द्वादशमासप्रविभक्तविग्रहम्, "द्वादशमासाः संवत्सरस्य"—इति च ब्राह्मणम् "दिवे" द्युलोकस्य 'परे' परमे 'अर्द्धे' स्थाने योऽयमवस्थित आदित्यः, एतस्मिन् पञ्चपादं पितरं द्वादशाकृतिं 'पुरीषिणं' उदकवन्तं संवत्सरम् 'अर्पितमाहुः' अविशेषेणान्ये ब्राह्मणाः । तस्मात् सर्वऋतवो वृष्टिमन्त इति ह विज्ञायते । तस्मात् संवत्सरस्योदकत्वमुपपद्यते । 'अथ' पुनः 'इमे' 'अन्ये' य एते 'उपरे' उपर्य्यवस्थिताः, 'सप्त' ऋषयः, एते 'विचक्षणं' विविधानां सर्वभूतकर्मणा द्रष्टारमेवमादित्यं 'चक्रे षडरे' तस्मिन् संवत्सराख्ये 'अर्पितमाहुः' । अथवा सप्तचक्र आदित्यः, स हि सप्तमी रश्मिभिश्चकते दीप्यते, 'सप्तचक्रे'—इत्येकं पदं तस्मादेवमपि भवति ॥ एवमेके संवत्सरमादित्यप्रविष्टमाहुः, अपरे पुनरादित्यं संवत्सरे प्रविष्टमित्येष समस्तार्थः ॥ एवमेतस्यामृचि आदित्यसंवत्सरौ स्तूयेते । वक्ष्यति हि "चन्द्रमसा वायुना संवत्सरमेति संस्तवः" । संवत्सरस्य चक्ररूपेण नाभ्यादिभिः स्तुतिरुपपपद्यते ॥ "अराः प्रत्यृता नाभौ" प्रतिगता इत्यर्थः । "षट् पुनः सहतेः" ते हि पञ्चसङ्ख्यामभिभूय वर्त्तन्ते ॥

"द्वाद॑शारं न॒ हि तज्जरा॑य"—इति । "द्वादशप्रधयश्चक्रमेकम्"—इति । "इति मासानाम्" एतौ पादौ भवत इति वाक्यशेषः । "द्वाद॑श प्र॒धय॑श्च॒क्रमेकं॒ त्रीणि॒ नभ्या॑नि॒ क उ॒ तच्चि॑केत । तस्मि॑न् साकं त्रि॒श॒ता न श॒ङ्कवो॑ऽर्पिताः ष॒ष्टिर्न च॑लाच॒लासः॑ ॥"—इति (ऋ० सं० २, ३, २३, २) । "मासा मानात्" मीयते हि तैः संवत्सरः । "प्रधिः प्रहितः" प्रश्लिष्य चक्रे निहितः "भवति" गण्डपुच्छः प्रधिरित्युच्यते । 'द्वादशप्रधयः' मासाख्याः, संहताः सन्तः 'चक्रमेकं' भवति । तत्र च पुनः 'त्रीणि नभ्यानि' फलकानि भवन्ति,—त्रय ऋतवो ग्रीष्मो वर्षा हेमन्त इति । यदेतदेवंलक्षणं चक्रम् 'क उ तत् चिकेत' कस्तु तत् याथार्थ्यतो विजानाति ? 'तस्मिन्' चक्रे 'साकं' सह 'त्रिंशता न शङ्कवोऽर्पिताः' त्रिशतान्यहोरात्राणि शङ्कव इवार्पितानि । 'षष्टिर्न' षष्ट्यधिकानि त्रीण्यहोराशतानि शङ्कव इवार्पितानि प्रक्षिप्तानि । द्वितीयो नकारः समुच्चयार्थे । 'चलाचलासः' चलानि च अचलानि च, चलान्यनवस्थायित्वात्, अचलान्यहोरात्रात्मभावं न मुञ्चति । आह,—कथं गम्यते अहोरात्राण्येतानीति ? उच्यते,—संवत्सरस्तुतिप्रायसम्बन्धाश्च । "षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्राः इति च ब्राह्मणं समासेन" अहोरात्रयोरेकत्वेनेत्यर्थः ॥

"द्वाद॑शारं न॒ हि तज्जरा॑य॒ वर्व॑र्त्ति॒ च॒क्रं परि॒ द्याम॒तस्य॑ । आ पु॒त्रा अ॒ग्ने मिथुना॒सो अत्र स॒प्त श॒तानि विंश॒तिश्च तस्थुः ॥"

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

—इति (ऋ० सं० २, ३, १६, १)। 'न हि तज्जीर्य्यति' किं तर्हि अन्यानि भूतानि जरयत् 'वर्वर्त्ति' च पुनः पुनर्वर्त्तते। 'परि द्यां' परिगृह्य द्याञ्च पृथिवीञ्च ततो वर्वर्त्ति। 'ऋतस्य' उदकस्य पूर्णम् अथवा 'ऋतस्य' आदित्यस्य स्वभूतम्, अथवा 'ऋतस्य' यज्ञस्याङ्गभूतम् 'आतस्थु' पुत्राः। एतस्मिंश्चक्रे 'मिथुना' द्वन्द्वा इत्यर्थः। कस्य ? 'अग्ने'। अग्निशब्दोऽस्मिन् मन्त्रे सम्बोधनान्तः षष्ठ्या विपरिणम्यते, अग्नेः पुत्रा आतस्थुरिति। अग्निश्चात्रादित्य एवाभिप्रेतः, तस्याहोरात्राण्येव पुत्रत्वेनोच्यन्ते, तत्कृतत्वादहोरात्राणाम्। आह,—कियन्तस्ते पुत्राः ? इति। उच्यते,— "सप्तशतानि विंशतिश्च"। ब्राह्मणमपि चैतस्मिन्नर्थे भवति,— "सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः—इति च ब्राह्मणमहोरात्रयोर्विभागेन विभागेन"—इति॥ एवमेतस्मिन् सूक्ते संवत्सरं "सर्वमात्राभिः" सर्वैरवयवैः "स्तौति"। तस्मादुपपद्यते "सप्त युञ्जन्ति"— इत्येतस्यामृचि संवत्सरप्रधान स्त्रिनाभिचक्रमित्येषोऽर्द्धर्चः। तदेतत् सर्वमपि 'सप्तपुत्रं' सर्पणपुत्रमित्येतस्मात् पदात् प्रसक्तानुप्रसक्तमुक्तम्, प्रकृतमिदानीं वर्णयिष्यामः। किं पुनः प्रकृतम् ? ऐकपदिकं समाम्नायव्याख्यानम्। तत्र यदुक्तं तदुक्तमेव, तद्वक्तव्यमितीदमारभ्यते,—"सस्निमविन्दच्चरणे नदीनाम्"—इति॥ ६ (२७)॥

इति निरुक्तवृत्तौ नवमाध्यायस्य (चतुर्थाध्यायस्य) चतुर्थः पादः॥ ४, ४॥

ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन

आचार्य्यभगवद्दुर्गस्य कृतौ नवमोऽध्यायः

(चतुर्थोऽध्यायः) समाप्तः॥ ४॥

32. (અનુ૦) ઉપર્યુકત ઋચાનો ઉત્તરાર્ધ સંવત્સરપ્રધાન છે, (આદિત્યપ્રધાન નહીં). ત્રિનાભિચક્રનો અર્થ ત્રણ ઋતુવાળો સંવત્સર થાય છે. ત્રણ ઋતુઓ-ગ્રીષ્મ, વર્ષા અને હેમન્ત. અહીં 'સંવત્સર' એટલે જેમાં ભૂતો નિવાસ કરે તે. ગ્રીષ્મ એટલે જેમાં (સૂર્ય વડે) રસો (જળ)ને ગ્રસવામાં આવે તે. વર્ષા એટલે જેમાં પર્જન્ય વર્ષે તે. તથા હેમન્ત એટલે જે હિમવાન્ (જેમાં ઘણો બરફ/ઠંડી પડે) હોય તે. અહીં 'હિમ' શબ્દ √હન (વધ કરવો) ધાતુ ઉપરથી બન્યો હશે અથવા તર્પણાર્થક √હિનુ ધાતુ ઉપરથી બન્યો છે. (અર્થાત્ જે ઔષધિ-વનસ્પતિ વગેરેનો નાશ કરે અથવા યવાદિનું જે પોષણ કરે તે હિમ.) અજર એટલે જરાધર્મ વિનાનો અને અનર્વ એટલે અપ્રતિગત (અનાશ્રિત). આ (નાભિચક્ર)માં બધા ભૂતો અધિષ્ઠિત થાય છે.

આ સંવત્સરની બધી રીતે સ્તુતિ કરે છે. "જ્યારે પાંચ આરાવાળું ચક્ર ફરી રહ્યું છે ત્યારે-" અહીં પાંચ ઋતુઓ એક સંવત્સરમાં હોય છે; એવું બ્રાહ્મણગ્રન્થમાં કહેવામાં આવ્યું છે. (આમ તો છ ઋતુઓ છે, પરંતુ) હેમન્ત અને શિશિરને એક જ ઋતુ ગણીને ('પાંચ ઋતુઓનો એક સંવત્સર હોય છે' એમ કહ્યું છે.) અન્યત્ર "આ ચક્રમાં છ આરાઓ ખોસવામાં આવ્યા છે" એમ પણ કહ્યું છે. આ કથન મુજબ નાભિ (સંવત્સર)માં છ ઋતુઓ રૂપી છ આરાઓ આશ્રિત છે. (અર્થાત્ ગ્રીષ્મ, વર્ષા, શરદ, હેમંત, શિશિર અને વસન્ત — એ છ ઋતુઓનું એક વર્ષ બન્યું હોય છે એમ પણ અન્ય બ્રાહ્મણમાં કહેવાયું છે.) અહીં 'ષટ્' શબ્દ √સહ ધાતુ ઉપરથી બન્યો છે. (કારણ કે આ ષડ્ સંખ્યા પાંચ સંખ્યાનો અભિભવ કરીને રહેલી હોય છે.)

"બાર આરાવાળું એ (ચક્ર) કયારેય જીર્ણ થનારું નથી" અને "બાર પ્રધિ(દંડ)ઓ વાળું એક ચક્ર" એવા શ્રુતિવાક્યોથી (એક સંવત્સરના) બાર મહિનાઓનો ઉલ્લેખ થયો છે. 'માસ' શબ્દ √મી (માપવું) ધાતુ ઉપરથી બન્યો છે (કેમ કે મહિનાઓ સંવત્સરને માપે છે.) પ્રધિઃ એટલે પ્રહિતઃ અર્થાત્ (જે છૂટા કરીને) ચક્રમાં નિહિત હોય છે. તે દાંડાઓ-આરાઓ. "એ ચક્રમાં એક સાથે ત્રણસો સાઠ ચલાચલ સ્વભાવવાળા શંકુઓ અર્પવામાં આવ્યા છે." અહીં ચલાચલ સ્વભાવવાળા એટલે અટકયા વિના સતત ચાલનારા એ અર્થમાં ચલ અને અહોરાત્ર-દિવસરાત ભાવનો ત્યાગ નહીં કરનાર એ અર્થમાં અચલ.) "એક સંવત્સરના ત્રણસો અને સાઠ અહોરાત્ર હોય છે" એવું સમાસથી (દિવસ-રાતને એક ગણીને) બ્રાહ્મણમાં કહ્યું છે. અન્યત્ર "(એક સંવત્સરમાં) સાતસો અને વીસ હોય છે" તથા "એક સંવત્સરના સાત સો વીસ દિવસ અને રાત હોય છે" એમ (ત્રણસો સાઠ) દિવસો અને (ત્રણસો સાઠ) રાત્રિઓને અલગ અલગ ગણીને પણ બ્રાહ્મણમાં કહ્યું છે.

32. (વિમર્શ) अस्याः અને अस्य એવાં બે પદોને પ્રથમાદેશ અને અન્વાદેશમાં કયો સ્વર મળે છે એ અંગેની ચર્ચામાં યાસ્કે अस्य वामस्य पलितस्य મન્ત્રને ઉદ્ધૃત કર્યો હતો. આ મન્ત્ર સૂર્ય સંબંધી હોઈ વિષયાન્તર કરીને सप्त युञ्जन्ति रथम्। એવા સૂર્ય સંબંધી બીજા એક મન્ત્રને પણ રજૂ કરવામાં આવ્યો અને તેમાંથી ત્રિનાભિચક્ર > ત્રણ ઋતુઓ, પાંચ ઋતુઓ, છ ઋતુઓ, બાર મહિના, ત્રણસો સાઠ દિવસો અથવા સાતસો ને વીસ દિવસરાતનો સંવત્સર હોય છે એવી ગણતરી પણ રજૂ કરી દીધી છે ! અહીં ત્રણસો સાઠ દિવસોનું એક વર્ષ-એ ગણતરી ચાન્દ્રવર્ષ મુજબની છે. અહીં ચોથા અધ્યાયનો અંત સૂચવવા વિભાગેન વિભાગેન એમ દ્વિરુક્તિ કરવામાં આવી છે.

— — — —☆— — — —

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

॥ सप्तमोऽध्यायः ॥

(દૈવતકાણ્ડની વ્યાખ્યાનો પ્રારંભ)

ભૂમિકા : વેદની બધી શાખાઓમાં જેટલા મન્ત્રો છે તેમાં આવેલાં ગૌણ પદો 'નિઘંટુ'ના પહેલાં બે કાણ્ડ (નૈઘંટુક અને ઐકપદિક)માં સંગ્રહવામાં આવ્યાં છે. નિરુક્તના પૂર્વાર્ધમાં એટલે કે પહેલાં છ અધ્યાયમાં આ બે કાણ્ડોના શબ્દોની વ્યાખ્યા કરવામાં આવી. હવે વેદમન્ત્રોમાં પ્રધાનપણે જેમની સ્તુતિ છે તેવા અગ્નિ વગેરે દેવતાઓનાં નામોની વ્યાખ્યા કરવામાં આવશે. નિઘંટુના પાંચમા અને છેલ્લા અધ્યાયમાં અગ્નિ, ઇન્દ્રાદિ દેવતાઓનાં નામોનો સંગ્રહ કરવામાં આવ્યો છે, આને દૈવત કાણ્ડ કહે છે. આ દૈવત કાણ્ડની વ્યાખ્યા નિરુક્તના સાતમા અધ્યાયથી શરૂ થાય છે.

प्रथमः पादः

1. अथातो दैवतम् । तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतम् इत्याचक्षते । सा एषा देवतोपपरीक्षा । यत्कामः ऋषिः यस्यां देवतायाम् आर्थपत्यम् इच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति ॥

ॐनमः । समाप्तं चैकपदिकं प्रकरणमस्यानु दैवतं तद्भवति, यस्यायमादिः "अथातो दैवतम्" इति । यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि गुणपदानि लक्षणोद्देशतः, तानि सर्वाण्येव व्याख्यातानि द्वयोः प्रकरणयोः—नैघण्टुकैकपदयोः, संविज्ञातपदानि तु प्रधानस्तुतिभाग्देवताविषयाणि अग्न्यादीनि, सर्वमन्त्रेष्ववशिष्यन्ते, तानि च पुनरमूनि समाम्नातान्यस्मिञ्छास्त्रे अग्न्यादीनि देवपत्न्यन्तानि । अतस्तद्व्याचिख्यासयेदमारभ्यते ।—"अथातो दैवतम्"—इति । 'अथ' शब्दोऽधिकारार्थः । 'अतः' शब्दः क्रमे हेतौ वा । प्रकरणद्वयादनन्तरमिदमवश्यं समाम्नायानुक्रमप्राप्तं व्याख्यातव्यमित्येवं क्रमे, दैवतमन्तरेण न शक्यो देवतापदार्थः सम्यगवबोद्धुम्, देवतापरिज्ञानानुबद्धस्त्वखिलः पुरुषार्थ इत्यतः, दैवतं प्रकरणं व्याख्यास्याम इति वाक्यशेषः ॥

एवं हेतौ आह.—किं सतत्त्वं पुनस्तद्दैवतं प्रकरणम् ? इति. उच्यते,—"तद्यानि०—०मित्याचक्षते" । 'यानि नामानि प्राधान्यस्तुतीनाम्' अग्न्यादीनां देवपत्न्यन्तानां 'देवतानां' 'तत्' दैवतं प्रकरणम् 'इति' एवमाचार्य्याः 'आचक्षते' निरूढा ह्ययमेतस्मिन् प्रकरणे सञ्ज्ञेत्यभिप्रायः ॥

"सैषा देवतोपपरीक्षा" । सा, या पुरस्तात् प्रकरणमात्रयोपन्यासे नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति—"तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतमित्याचक्षते, तदुपरिष्टाद् व्याख्यास्यामः"—इति प्रतिज्ञाता, सा इदानीं प्रकरणद्वये निर्णिक्ते यथाप्रकरणोपन्यासेनैवावसरप्राप्ता, सामान्यविशेषतः स्वलक्षणसतत्त्वोपपत्तिभिः एकैकस्या देवताया उपगम्योपगम्य परीक्षा, वर्त्तिष्यत इति वाक्यशेषः । इदमिहोक्तम्,—प्राधान्यस्तुतिभाञ्जि यानि देवताभिधानानि, तत्समुदायो दैवतं प्रकरणम्, तद् व्याख्यास्यामः इति । तस्य पुनरियमेव समासतो व्याख्या यद्देवतोपपरीक्षणम्, तदभिधानव्युत्पत्ति-तत्स्तुत्युदाहरण तन्निर्वचनानि ॥

तत्पुनरेतत् सर्वमपि मन्त्राधिदैवतलक्षणमनुक्त्वा न शक्यं व्याख्यातुम्, मन्त्राधीनत्वात् सर्वस्यास्य. अतो मन्त्रदेवतालक्षणविदिधारयिषया ब्रवीति,—"यत्काम०—०भवति" । यदर्थवस्तु कामयमानः, 'ऋषिः' 'यस्यां देवतायाम्' अभिष्टुतायाम्, आर्थपत्यम्' अर्थपतिभावमात्मनः 'इच्छन्' अमुष्याः देवतायाः प्रसादेनाहममुष्यार्थस्य पतिर्भविष्यामीत्येतां बुद्धिं पुरोधाय 'स्तुतिं' प्रयुङ्क्ते, 'तद्दैवतः' एव 'स मन्त्रो भवति' । एतत् मन्त्रे देवतालक्षणम् । एतेन लक्षणेन सर्वमन्त्रेषु देवतोपलक्ष्या । अथवा देवतायामस्यार्थस्येयं देवता दातुं समर्थेति जानानः स्तुतिं प्रयुङ्क्ते येन मन्त्रेण, सा प्राधान्यस्तुतिभाग्देवता । सा पुनरियं स्तुतिः चतुर्विधा,—नाम्ना, बन्धुभिः, कर्मणा, रूपेणेति, "स्तुतिर्नामरूपकर्मबन्धुभिः"—इत्युक्तम् ॥

1. (અનુ૦) હવે દૈવતકાણ્ડની વ્યાખ્યાનો પ્રારંભ કરીશું. (વેદમન્ત્રોમાં) જેમની (અગ્ન્યાદિ દેવતાઓની) પ્રધાનપણે સ્તુતિ કરવામાં આવે છે તે દેવતાઓનાં (અગ્ન્યાદિ દેવપત્ન્યન્ત) નામોને 'દૈવત' કહેવામાં આવે છે.* (અર્થાત્ જ્યાં અગ્નિ વગેરે નામોનો સંગ્રહ કરવામાં આવ્યો છે તેને દૈવતકાણ્ડ કહે છે.) આ દેવતાઓની 'પરીક્ષા' છે. જે (અર્થની કે વસ્તુ)ની કામનાવાળો ઋષિ જે દેવતાની પાસેથી અમુક વસ્તુનું સ્વામિપણું (અર્થપતિ ભાવત્વ) ઇચ્છતો સ્તુતિ કરે તે દેવતાવાળો એ મન્ત્ર કહેવાશે.

1. (વિમર્શ) વેદમન્ત્રોમાં અગ્નિ વગેરે દેવતાઓની જ પ્રધાનપણે સ્તુતિ કરવામાં આવી છે. આવા પ્રધાનપણે સ્તુતિ પામેલા દેવતાઓનાં નામો નિઘંટુના પાંચમા અધ્યાયમાં (કે જેને 'દૈવતકાણ્ડ' કહે છે તેમાં) સંગ્રહવામાં આવ્યાં છે. अग्निः થી શરૂ કરીને देवपत्न्यः સુધીનાં આ નામોની સંખ્યા કુલ ૧૪૯ છે. નિરુક્તના સાતમા અધ્યાયના ચોથા પાદથી આ નામોનું નિર્વચન શરૂ થશે; એ

* સંસ્કૃતમાં 'દેવતા' શબ્દ સ્ત્રીલિંગમાં છે. પરંતુ ગુજરાતીમાં એ શબ્દ પુલિંગમાં હોઈ અનુવાદ અને વિમર્શમાં તેને પુંલિંગમાં મૂક્યો છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પહેલાં યાસ્કે સાતમા અધ્યાયના પહેલા ત્રણ પાદમાં દૈવતકાણ્ડની ભૂમિકા રૂપ કેટલાક અગત્યના મુદ્દાઓની ચર્ચા કરી છે. જેમકે, અમુક મન્ત્રનો દેવતા કોણ છે તે કેવી રીતે નક્કી કરવું ? મન્ત્રોના પ્રકાર કેટલા ? મન્ત્રમાં કયા કયા વિષય હોય છે ? જે મન્ત્રોમાં દેવતાઓના નામનો સ્પષ્ટ ઉલ્લેખ ન હોય તે મન્ત્ર કયા દેવતાનો ગણવો ? દેવતાઓની સંખ્યા કેટલી ? દેવતાઓનો આકાર કેવો હોય છે ? વગેરે. દેવતાવિષયક આવા વિવિધ મુદ્દાઓની આ ચર્ચાને દેવતા-વિજ્ઞાન Theology કહેવાશે.

સાતમા અધ્યાયના પ્રારંભે યાસ્ક યાદ અપાવે છે કે પ્રથમ અધ્યાયને અંતે જણાવ્યું હતું કે नैघण्टुकमिदं दैवतानाम अप्रधान्येनेदमिति । तद्यानि नामानि प्राधान्यस्तुतीनां दैवतानां तद् दैवतमित्याचक्षते, तदुपरिष्टाद् व्याख्यास्यामः ॥ નૈઘંટુક અને ઐકપદિક કાંડના (અર્થાત્ નિઘંટુના પહેલા ચાર અધ્યાયના) અપ્રધાન શબ્દોની વ્યાખ્યા નિરુક્તના પૂર્વાર્ધમાં કરી નાખી, હવે વેદમન્ત્રોમાં જેમની પ્રધાનપણે સ્તુતિ છે એવાં દેવતાઓનાં નામોની વ્યાખ્યા અહીં સાતમા અધ્યાયથી શરૂ કરવામાં આવશે. આ દૈવતકાણ્ડની વ્યાખ્યાને યાસ્ક ''દેવતાઓની પરીક્ષા'' કહે છે. અર્થાત્ દેવતાઓનાં નામોની વ્યુત્પત્તિ તપાસવી, તે નામો વડે જે મન્ત્રમાં તેમની સ્તુતિ કરવામાં આવી હોય તેનાં ઉદાહરણો આપવાં અને તેનું નિર્વચન કરવું-એનું નામ દેવતાઓની પરીક્ષા. આ દેવતાઓની પરીક્ષાનો પ્રારંભ કરે તે પહેલાં યાસ્કે 'અમુક મન્ત્રનો કયો દેવતા છે ? એ કેવી રીતે નક્કી થાય એની ચર્ચા કરી છે : મન્ત્રાધીન દેવતાઓ છે અને દેવતાઓને અધીન આ જગત્‌ની બધી વસ્તુઓ છે. તેથી જે તે મન્ત્રનો દેવતા કોણ છે એ જાણવું અનિવાર્ય છે. યાસ્ક જણાવે છે કે 'આ દેવતાના પ્રસાદથી હું આ વસ્તુનો સ્વામી બનીશ' એવી બુદ્ધિને આગળ કરીને જેની સ્તુતિ કરવામાં આવે તેને તે દેવતાવાળો મન્ત્ર કહેવાય.

---

2. ताः त्रिविधाः ऋचः । परोक्षकृताः प्रत्यक्षकृताः आध्यात्मिक्यश्च । तत्र परोक्षकृताः सर्वाभिः नामविभक्तिभिः युज्यन्ते । प्रथमपुरुषैश्च आख्यातस्य ॥

इन्द्रो दिव इन्द्र ईशे पृथिव्याः (ऋ. सं. १०/८९/१०) । इन्द्रमिद्गाथिनो बृहत् (ऋ. सं. १/७/१) । इन्द्रेणैते तृत्सवो वेविषाणाः (ऋ. सं. ७/१८/१५) । इन्द्राय साम गायत (ऋ. सं. ८/९८/१) । नेन्द्रादृते पवते धाम किंचन (ऋ. सं. ९/६९/६) । इन्द्रस्य नु वीर्याणि प्र वोचम् (ऋ. सं. १/३२/१) । इन्द्रे कामा अयंसत इति ॥ अथ प्रत्यक्षकृताः मध्यमपुरुषयोगाः । त्वम् इति च एतेन सर्वनाम्ना । त्वमिन्द्र बलादधि (ऋ. सं. १०/१५३/२) वि न इन्द्र मृधो जहि (ऋ. सं. १०/१५२/४) । इति ॥ अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति । परोक्षकृतानि स्तोतव्यानि । मा चिदन्यद्वि शंसत (ऋ. सं. ८/१/१) । कण्वा अभि प्र गायत (ऋ. सं. १/३७/१) । उप प्रेत कुशिकाश्चेतयध्वम् (ऋ. सं. ३/५३/११) । इति ॥ अथ आध्यात्मिक्यः उत्तमपुरुषयोगाः । अहम् इति च एतेन सर्वनाम्ना । यथैतत् । इन्द्रो वैकुण्ठः (ऋ. सं. १०/४८-४९) । लवसूक्तम् (ऋ. सं. १०/११२) । वागाम्भृणीयम् (ऋ. सं. १०/१२५) । इति ॥ परोक्षकृताः प्रत्यक्षकृताश्च मन्त्राः भूयिष्ठाः । अल्पशः आध्यात्मिकाः ॥

ऋच एव हि प्रायेणातितरामपि हितार्थाः, न तथा यजूंषि, तासु हि विज्ञातासु यजूंष्यपि विज्ञातान्येव भवन्ति । तस्मादृच एव पुरस्कृत्य ब्रवीति,—''तास्त्रिविधा ऋचः''—इति । याः काश्चन सर्ववेदेषु 'ऋचः' 'ताः' सर्वा अपि 'त्रिविधाः' एव भवन्ति ॥

तद्यथा,—''परोक्षकृताः, प्रत्यक्षकृताः आध्यात्मिक्यश्च''—इति ॥

तत् त्रैविध्यं सामान्यत उद्दिश्य अधुना प्रत्येकं लक्षणतो ब्रवीति, उदाहरणैश्च दर्शयति । 'तत्र' तस्मिन त्रैविध्ये परोक्षकृतानामृचामेतल्लक्षणं भवति,—''परोक्षकृताः ०—० श्चाख्यातस्य'' ॥ १ ॥

तद्यथैतान्युदाहरणानि आनुपूर्व्येणैव सप्तस्वपि विभक्तिषु इन्द्रो दिव इत्येवमादीनि—

''इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम् । इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥''—इति (ऋ० सं० ८, ४, १५, ५) । रेणोर्वैश्वामित्रस्येयमार्षम् । ऐन्द्री । त्रिष्टुप् । सूर्य्यस्तुत्येकाहनिष्केवल्ये विनियुक्ता । 'इन्द्रो दिवः' 'ईशे' ईष्टे । 'इन्द्रः' एव 'पृथिव्याः' ईष्टे । 'इन्द्रः' एव 'अपाम्' ईष्टे वर्षकर्मादिना । 'इन्द्रः' एव 'पर्वतानां' मेघानाम ईष्टे । 'इन्द्रः' एव 'वृधाम्' अतिप्रवृद्धानामपि भूतानामीष्टे । 'इन्द्रः' एव च 'मेधिराणां' यज्ञैस्तद्वतामीष्टे । 'इन्द्रः' एव हि 'योगे' अर्थसंयोगे प्राप्तव्ये, 'क्षेमे' च परिपालने कर्त्तव्ये 'हव्यः' आह्वातव्यो नान्यः कश्चित्समर्थः एतत्कर्त्तुमित्यभिप्रायः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रथमायामेतदुदाहरणम् । इन्द्र इत्येतस्मादुपपदादीश इत्येष प्रथमपुरुष इति प्रतीयते, नोत्तमपुरुष इति ॥

"इन्द्र मिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणी रनूषत ॥"—इति (ऋ० सं० १, १, १३, १) । मधुच्छन्दस आर्षम् ॥ महाव्रते महदुक्थे शिरसि शस्यते । हे 'गाथिनः' सामगाः ! 'इन्द्रमित्' इन्द्रमेव यूयं बृहता साम्ना अभिष्टुत । यूयमपि हे होतारः ! 'अर्किणः' 'अर्केभिः' अर्कैर्ऋग्भिः मन्त्रैः इन्द्रमेवाभिष्टुत । यूयमपि च हे अध्वर्य्यवः ! इन्द्रमेव 'वाणीभिः' वाग्भिर्यजुर्मयीभिः 'अनूषत' अभिष्टुत । द्वितीयायामेतदुदाहरणम् ॥

"इन्द्रेणैते०—०सुदासे" । इति तृतीयायामेतदुदाहरणम् । व्याख्यातः शेषः ॥

"इन्द्राय साम गायत विप्राय बृहते बृहत् । धर्मकृते विपश्चिते पनस्यवे ॥"—इति (ऋ० सं० ६, ७, १, १) । नृमेधस आर्षम् । सात्रिकेष्वहःसु स्तोत्रियानुरूपवर्गे तृतीयसवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता । हे उद्गातारः ! 'इन्द्राय' 'बृहत्साम' 'गायत' । 'विप्राय' मेधाविने 'बृहते' महते 'धर्मकृते' कृतधर्मणे 'विपश्चिते' विदुषे 'पनस्यवे' पण इच्छते, आत्मनः स्तुतिमिच्छते । चतुर्थ्यामेतदुदाहरणम् ॥

"सूर्य्यस्येव रश्मयो द्रावयित्नवो मत्सरासः साकमीरते । तन्तुं ततं परिसर्गास आशवो नेन्द्रादृते पवते धाम किञ्चन ॥"—इति (ऋ० सं० ७, २, २२, १) । रेणोर्वैश्वामित्रस्येयमार्षम् । पावमानी सौमी । जगती । यथा सूर्य्यस्य रश्मयस्तमसां 'द्रावयित्नवः' 'द्रावणशीलाः' एवमेते 'मत्सरासः' सोमाः, पापानां द्रावणशीलाः' । किञ्च, 'प्रसुपः' प्रसृता एतैर्ऋत्विग्भिः 'साकम्' इन्द्रं प्रति 'ईरते' यच्छन्ति इत्यर्थः । गत्वा च 'तन्तुं' ततं तन्तुमिव तन्त्ववयवाः 'परिसर्गासः' 'आशवः' परिसृताः 'यथा' व्याप्नुवन्ति, एवमेतं पातारमिन्द्रं स्वामिनं प्रत्यश्नुवन्ति व्याप्नुवन्तीत्यर्थः । कस्मात् पुनरेवं क्रमः ? इतः,—यस्मात् 'नेन्द्रादृते' सोमः प्रातःसवनादीनां सोमसवनस्थानानां 'किञ्चन' किञ्चिदपि 'धाम' 'पवते' पूयते । तस्मादेवं ब्रूमहे,—इन्द्रमेवते व्याप्नुवन्तीति । पञ्चम्यामेतदुदाहरणम् ॥

"इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री । अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम् ॥" —इति (ऋ० सं० १, २, ३६, १) । हिरण्यस्तूपस्येयमार्षम् । निष्केवल्ये शस्यते । 'इन्द्रस्य' अहं 'वीर्य्याणि' वीरकर्माणि 'प्रवोचम्' । 'यानि' 'चकार' 'प्रथमानि' अकृतपूर्वाणि अन्यैः । 'वज्री' वज्रसंयुक्तः । 'अहन् अहिम्' घ्नन् मेघम् । 'अनु ततर्द अपः' वर्षार्थं पुनः पुनश्च 'प्राभिनत्' । 'वक्षणाः' उदकवहनशिराः 'पर्वतानाम्' मेघानाम् । एवमादीनि वीर्य्याण्यहमिन्द्रस्य प्रवोचमिति । षष्ठ्यामेतदुदाहरणम् ॥

"इन्द्रे कामा अयंसत दिव्यासः पार्थिवा उत । त्य मू षु गृणतानरः ॥"—इति । हे स्तोतारः ! ये दिव्याः कामाः ये च पार्थिवाः, ते इन्द्रे एव उपनिबद्धाः, तं प्रार्थयत, स हि कामानामीष्टे । 'त्य मू षु' तं सुष्ठु कामप्राप्त्यर्थं 'गृणत' स्तुत, हे 'नरः !' । सप्तम्यामेतदुदाहरणम् ॥

उक्तं परोक्षकृतमन्त्रलक्षणं सोदाहरणम् ॥

अधुना प्रत्यक्षकृतमन्त्रलक्षणमुच्यते, तदधिकारार्थोऽयम् 'अथ' शब्दः । "अथ प्रत्यक्ष०—०सर्वनाम्ना" । 'मध्यमपुरुषयोगाः' मध्यमेन पुरुषेण संयुक्ता ये मन्त्राः, ते प्रत्यक्षकृताः । 'त्वमिति चैतेन सर्वनाम्ना' संयुक्ताः, ते च प्रत्यक्षकृताः । तत्र त्वमित्येवं श्रूयते, तत्राविद्यमानोऽपि मध्यमः पुरुषोऽध्याहार्य्यः, यत्र तु मध्यमः पुरुषः श्रूयते, तत्राविद्यमानमपि 'त्वम्'—इत्येतत सर्वनामाध्याहार्य्यम्, सम्बन्धिशब्दत्वादनयोः । "त्वमिन्द्र बलादधि" "वि न इन्द्र मृधो जहि"—"इति" चैते उदाहरणं ।—

"त्वमिन्द्र बलादधि सहसो जायस ओजसः । त्वं वृषन् वृषेदसि ॥"—इति (ऋ० सं० ८, ८, ११, २) । देवजामयः सूक्तं ददृशुः । तत्रेयं महारात्रिके पर्य्याये प्रशास्तुः स्तोत्रे विनियुक्ता । हे 'इन्द्र' 'त्वम्' बलादधि जायसे 'सहसः' अभिभवनसमर्थात्, 'ओजसः' तेजसः । किञ्च, त्वं हे 'वृषन्' वर्षितः ! 'वृषा असि' वर्षिता असीत्यर्थः ॥

"वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः । यो अस्माँ अभिदासत्यधरं गमया तमः ॥"—इति (ऋ० सं० ८, ८, १०, ४) । शासस्य भारद्वाजस्येयमार्षम् । वैमृधस्य हविषो याज्या । हे 'इन्द्र !' 'वि जहि' 'नः' एतान् 'मृधः' मृधकर्त्तन् शत्रून् । किञ्च, 'नीचा' नीचैः 'यच्छ' तान् । 'पृतन्यतः' येऽस्माभिः सह प्रतन्यन्ति, प्रतनां कर्त्तुमिच्छतीत्यर्थः । किञ्च, 'योऽस्मान' 'अभिदासति' अभ्युपक्षपयितुमिच्छतीत्यर्थः । तम् 'अधरं' 'तमः' 'गमय' नाशयेत्यर्थः ॥

"अथापि ०—० स्तोतव्यानि" । युष्मत्प्रयोगैर्हि क्वचित् स्तोतारः सम्बध्यते । तद्यथा,—"मा चिदन्यद् विशंसत" "कण्वा अभि प्रगायत" "उप प्रेत कुशिकाश्चेतयध्वम्"—"इति" चैतान्युदाहरणानि ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

मा चिदन्यद् विशंसत सखायो मा रिषण्यत । इन्द्रमित् स्तोता वृषणं सचा सुते मुहु रुक्था च शंसत ॥''—इति (ऋ० सं० ५, ७, १०, १) । प्रगाथस्येयमार्षम । बृहती । तृचाशीतीषु विनियुक्ता । हे स्तोतारः ! 'सखायः !' 'मा' 'अन्यत' किं 'चित' अपि 'विशंसत' विविधाभिः स्तुतिभिः । 'मा' च 'रिषण्यत' चेतसामागच्छत अन्यद् देवतान्तरम् । किन्तर्हि ? 'इन्द्रम इत' इन्द्रमेव 'वृषणं' वर्षितारं 'स्तोत' स्तुत । 'सचा' सहभूताः, एतस्मिन् 'सुते' सोमे । 'मुहुः' मुहुश्च हे होतारः ! 'उक्था' उक्थानि 'च' 'शंसत' ॥

"क्रीलं वः शर्धो मारुत मनर्वाणं रथेशुभम् । कण्वा अभि प्रगायत ॥" इति (ऋ० सं० १, ३, १२, १) । कण्वस्येयमार्षम् । क्रीलनस्य हविषो यार्थ्या । 'क्रीलं' शत्रूनपि दृष्ट्वा यत् क्रीडनशीलम्, 'मारुतं' 'शर्द्धः' बलम्, 'अनर्वाणम्' अनाश्रितमन्यत्र, स्वप्रभावयुक्तमेवेत्यभिप्रायः, 'रथेशुभं' रथे स्थितं शाभिष्ठम, हे 'कण्वाः' मेधाविनः ऋत्विजः ! एतत् 'अभिप्रगायत' एतत 'वः' ब्रवीमि ॥

"उपप्रेत कुशिकाश्चेतयध्वमश्वं राये प्रमुञ्चता सुदासः ।—राजा वृत्रं जङ्घनत् प्रागपागुदथा यजाते वर आ पृथिव्याः ॥" इति (ऋ० सं० ३, ३, २१, १) । विश्वामित्रस्येयमार्षम् । हे 'कुशिकाः' स्तुतिक्रोष्टार ऋत्विजः ! 'उपप्र' 'इत' गच्छन । 'चेतयध्वम' विजानीध्वमेतत्,—यथैषः 'राजा' 'वृत्रं' शत्रुं 'जङ्घनत्' हतवान्, सर्वासु दिक्षु, 'अथ' एवं सर्वहन्ता अमित्रो भूत्वा 'वरं' श्रेष्ठप्रदेशे 'पृथिव्याः' 'यजाते' यजते । ते यूयमेतद् विज्ञया उपप्रगच्छत । उपप्रगत्य चैतमाश्वमेधिकम् 'अश्वम्' 'प्रमुञ्चत' उत्सृजत विधानतः प्रोक्ष्याश्वमेधयागाय । योऽयमेतस्मिन् 'सुदासे' कल्याणदाने वर्त्तते ॥

एवमेतेषु युष्मद्गुणपदप्रयोगेषु सम्बद्धाः स्तोतारः स्तोतव्यानि तु यानि देवतान्तानि, तानि परोक्षकृताभिसम्बन्धीनि । एवंलक्षणं मन्त्रजातमुपेक्षितव्यम् ॥

"अथा ०—०योगाः" । उत्तमेन पुरुषेण या ऋचो युक्ताः, ता आध्यात्मिक्यः । "अह०—नाम्ना" या उक्ताः, ताश्च आध्यात्मिक्यः । अत्रापि यत्राहमित्येतत् सर्वनाम श्रूयते, तत्राविद्यमानपि ह्युत्तमपुरुषसम्बद्धमाख्यातपदमध्याहर्त्तव्यम्, यत्र चोत्तमपुरुषसम्बद्धमाख्यातपदं श्रूयते, तत्राविद्यमानमपि 'अहम्'—इत्येतत् सर्वनाम अध्याहार्य्यम्, सम्बन्धिशब्दत्वादनयो : ॥ २ ॥

"यथा एतत्" उदाहरणत्रयमाध्यात्मिकम्,—"इन्द्रो०—० मिति" एवमादि । एवमप्यन्येऽप्याध्यात्मिका मन्त्रा उपेक्षितव्याः ।

विकुण्ठा नाम आसुरी बभूव, तस्याः किल तपसः प्रभावेणापत्यत्वमिन्द्रः आजगाम, स वैकुण्ठो नाम बभूव । तस्यात्मस्तुतिसंयुक्तमेवमादि ब्रह्म प्रादुरभूत्,—"अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः । मां हवन्ते पितरं न जन्तवोऽहं दाशुषे विभजामि भोजनम् ॥''—इति (ऋ० सं० ८, १, ५, १) । 'अहम्' एव 'भुवम्' अभवम् 'वसुनः' धनस्य 'पूर्व्यः' प्रथमः 'पतिः' । किञ्च, साम्प्रतमप्यहमेव पतिः । 'अहम्' एव च शत्रुभ्यः सकाशात् समस्तानि 'धनानि' आह्वयन्ति 'पितरं न' पितरमिव, तासु तास्वार्त्तिपु 'जन्तवः' मनुष्याः । किञ्च, 'अहम्' एव 'दाशुषे' दत्तवते हवींषि, यजमानाय 'विभजामि' यथार्हं 'भोजनम्' धनमित्यर्थः ॥

"इति वा इति मे मनो गामश्वं सनुयामिति । कुवित् सोमस्यापामिति ॥''—इति (ऋ० सं० ८, ६, २६, १) । लवसूक्ते स एव लबो ब्रवीति,—'इति वा इति' एवञ्चैवञ्च 'मे मनः' वर्त्तते । आह,—कथम् ? इति । उच्यते,—'गामश्वम्' गां च अश्वं च 'सनुयाम' सम्भोजयेयम् एतान् यजमानानिति । अथैवमतितरां प्रत्युपकाराभिप्राये सति किमर्थं ब्रूते ? 'कुवित्' बहु अहं 'सोमस्य अपाम् इति' ॥

"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥''—इति (ऋ० सं० ८, ७, ११, १) । वागाम्भृणीये वागेव ब्रवीति । 'अहम्' एव 'रुद्रैः' 'वसुभिः' 'आदित्यैः' 'विश्वदेवैः' विश्वैश्च देवैः सह भूता 'चरामि' स्तुतिरूपेण । 'अहम्' एव 'मित्रावरुणा' मित्रावरुणौ 'उभा' उभावपि, 'इन्द्राग्नी' 'अश्विना' अश्विनौ च 'उभा' उभावपि 'बिभर्मि' हविषा, मत्पूर्वकं हविःसम्प्रदानं सर्वदेवताभ्य इत्यभिप्रायः ॥

"परोक्षकृताः०—०प्रत्यक्षकृताश्च मन्त्राः" भूयिष्ठाः शाखान्तरेषु बहवः "अल्पशः" क्वचित् "आध्यात्मिकाः" लक्ष्यन्ते । आत्मानमेव स्तोतव्यमधिकृत्य येऽभिव्यक्तास्त इह शास्त्रे आध्यात्मिका उच्यन्ते ॥

---

2. (અનુ૦) ત્રણ પ્રકારની ઋચાઓ જોવા મળે છે : (૧) પરોક્ષકૃત (૨) પ્રત્યક્ષકૃત અને (૩) આધ્યાત્મિક. એમાંથી (૧) જે (ઋચા) બધી નામવિભક્તિઓ (સુપ્) વડે જોડાતી હોય અને જેમાં આખ્યાતના પ્રથમ પુરુષ (Third person)નો પ્રયોગ હોય તેને પરોક્ષકૃત ઋચા કહે છે. દા.ત., (ક) इन्द्रो दिव, इन्द्र ईशे पृथिव्याः । ઇન્દ્ર દ્યુલોકનું શાસન કરે છે અને ઇન્દ્ર જ પૃથિવીલોકનું પણ શાસન કરે છે). અહીં इन्द्रः શબ્દનો પ્રથમા વિભક્તિમાં પ્રયોગ છે અને ईशे = ईष्टे પ્રથમ પુરુષ એકવચનનું

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

૩૫ છે. (ख) इन्द्रमिद्गाथिनो बृहत । (હે સામગાન કરનારાઓ ! તમે ઇન્દ્રની મોટેથી સ્તુતિ કરો. (અહીં ઇન્દ્ર શબ્દ દ્વિતીયા વિભક્તિમાં છે.) (ગ) इन्द्रेण एते तृत्सवा वेविपाणाः । (ઇન્દ્રની સાથે જ આ કર્મશીલ તૃત્સવો...) (અહીં ઇન્દ્ર શબ્દ તૃતીયા વિભક્તિમાં છે.) (ઘ) इन्द्राय साम गायत । (ઇન્દ્રને ઉદ્દેશીને સામ ગાઓ) (અહીં ઇન્દ્ર શબ્દ ચતુર્થી વિભક્તિમાં છે.) (ङ) नेन्द्राद् ऋते पवते धाम किञ्चन । (-સોમ-ઇન્દ્ર સિવાય બીજું કોઈ સ્થાન પવિત્ર કરતો નથી. અર્થાત્ સોમ માત્ર ઇન્દ્રને જ વ્યાપી વળે છે, બીજા કોઈને નહીં.) (અહીં ઇન્દ્ર શબ્દ પંચમી વિભક્તિમાં છે) (च) इन्द्रस्य नु वीर्याणि प्र वोचम् । (ઇન્દ્રના વીરકર્મોને હું કહું છું) (અહીં ઇન્દ્ર શબ્દ ષષ્ઠી વિભક્તિમાં છે.) (छ) इन्द्रे कामा अयंसत । (જે કામનાઓ છે તે ઇન્દ્રમાં ઉપનિબદ્ધ છે.) (અહીં ઇન્દ્ર શબ્દ સપ્તમી વિભક્તિમાં છે.) (આમ, ઇન્દ્ર શબ્દ બધી નામ વિભક્તિઓ વડે જોડાયેલો જોવા મળે છે – આથી તે દરેક ઋચાને પરોક્ષકૃત કહેવાશે.) (૨) હવે જે (ઋચા) મધ્યમ પુરુષના (Second person) યોગવાળી હોય અને त्वम् (युष्मद्) એવા સર્વનામથી જોડાયેલ હોય તેને પ્રત્યક્ષકૃત ઋચા કહે છે. દા. ત., (क) त्वमिन्द्र बलादधि । (હે ઇન્દ્ર ! તું બળથી પ્રાપ્ત થયો છે.) वि न इन्द्र मृधो जहि । (હે ઇન્દ્ર ! અમારું ખરાબ કરનાર શત્રુઓને તું મારી નાખ). (આ બે ઉદાહરણમાં યુષ્મદ્ સર્વનામનો પ્રયોગ છે અને जहि ક્રિયાપદ મધ્યમ પુરુષમાં આવેલું છે. આથી આ ઋચાઓ પ્રત્યક્ષકૃત કહેવાશે.) ક્યારેક સ્તોતાઓ પ્રત્યક્ષકૃત હોય છે અને સ્તોતવ્ય દેવતાઓ પરોક્ષકૃત હોય છે. (અર્થાત્ કોઈક ઋચામાં એવું પણ જોવા મળે છે કે સ્તુતિ કરનારને યુષ્મદ્‌નો પ્રયોગ કરી સંબોધવામાં આવ્યા હોય અને જેમની સ્તુતિ કરવાની હોય એ દેવતાને પ્રથમ પુરુષ માનવામાં આવ્યો હોય.) જેમ કે, मा चिदन्यद्विशंसत । (હે સ્તોતાઓ ! તમે (મારા)-ઇન્દ્રના-સિવાય બીજા કોઈ દેવતાની સ્તુતિ ન કરશો.) कण्वा अभि प्रगायत । (હે કણ્વો ! તમે ઘણી સ્તુતિ કરો) उप प्रेत कुशिकाश्चेतयध्वम् । (હે કુશિકો ! તમે આવો, તમે જાણો) આ ઉદાહરણમાં સ્તોતાઓને યુષ્મદ્ સર્વનામથી સંબોધવામાં આવ્યા છે અને સ્તોતવ્ય ઇન્દ્રાદિ દેવતાઓ પ્રથમ પુરુષ તરીકે ઉલ્લેખવામાં આવ્યા છે) (૩) હવે જે ઋચામાં (આખ્યાતનો) ઉત્તમ પુરુષ (First person)ની સાથે યોગ હોય અને अहम् (अस्मद्) એવા સર્વનામથી યુક્ત હોય તેને આધ્યાત્મિક-ઋચા કહે છે. દા. ત., (क) ઇન્દ્ર વૈકુંઠ-સૂક્ત (ख) લવસૂક્ત અને (ગ) વાગામ્ભૃણીય-સૂક્ત. વેદોમાં પરોક્ષકૃત અને પ્રત્યક્ષકૃત મન્ત્રોની સંખ્યા જ મોટા પ્રમાણમાં છે; પરંતુ આધ્યાત્મિક મન્ત્રો થોડા છે.

2. **(વિમર્શ)** યાસ્કે ઉપરની ચર્ચામાં વેદમન્ત્રોના પ્રકાર વર્ણવ્યા છે. મન્ત્રો ત્રણ પ્રકારના છે : (૧) જે મન્ત્રમાં સ્તોતવ્ય દેવતાને પ્રથમ પુરુષ તરીકે સંબોધવામાં આવ્યા હોય તેને પરોક્ષકૃત મન્ત્ર કહે છે. આવા મન્ત્રોમાં સ્તોતવ્ય દેવતાનું નામ સંબોધન સિવાયની સાતેય વિભક્તિઓમાં જોવા મળે છે અને ક્રિયાપદ હંમેશા પ્રથમ પુરુષમાં જોવા મળે છે. (૨) જે મન્ત્રમાં સ્તોતવ્ય દેવતાને સીધા જ युष्मद् સર્વનામથી સંબોધવામાં આવે તેને પ્રત્યક્ષકૃત મન્ત્ર કહે છે. આવા મન્ત્રમાં દેવતાનું નામ સંબુદ્ધિ (સંબોધન) વિભક્તિમાં હોય છે અને ક્રિયાપદ હંમેશાં મધ્યમ પુરુષમાં જોવા મળે છે. (૩) જે મન્ત્રમાં દેવતા પોતે જ બોલનાર હોય, જેમ કે, 'હું ઇન્દ્ર જ આકાશ છું' વગેરે અને ક્રિયાપદમાં ઉત્તમ પુરુષનો પ્રયોગ હોય તે મન્ત્રને આધ્યાત્મિક કહે છે. [First person = પહેલો પુરુષ, Second person = બીજો પુરુષ અને Third person = ત્રીજો પુરુષ-ને માટે યાસ્કે અનુક્રમે ઉત્તમ પુરુષ, મધ્યમ પુરુષ અને પ્રથમ પુરુષ શબ્દો વાપર્યા છે. પાણિનિએ પણ આ જ શબ્દો વાપર્યા છે.] આધ્યાત્મિક મન્ત્રો જેમાં આવેલા છે, તેનાં ઉદાહરણ આ પ્રમાણે છે : (क) अहं भुवं क्वसुनः । (ઇન્દ્રવૈકુંઠસૂક્ત) (ख) इति वा इति मे मनो गामश्व० । (લવસૂક્ત) અને (ગ) अहं रुद्रेभिर्वसुभिश्चरामि. । (વાગામ્ભૃણીય = વાક્સૂક્ત).

---

3. अथापि स्तुतिरेव नाशीर्वादः । इन्द्रस्य नु वीर्याणि प्र वोचम् । (ऋ. सं. १/३२/१) इति यथैतस्मिन् सूक्ते । अथापि आशीरेव न स्तुतिः । सुचक्षा अहमक्षीभ्यां भूयासम् सुवर्चा मुखेन सुश्रुत् कर्णाभ्यां भूयासम् (मानव गृ. १/९/२५) इति । तदेतत् बहुलम् आध्वर्यवे याज्ञेषु च मन्त्रेषु । अथापि शपथाभिशापौ । अद्या मुरीय यदि यातुधानो अस्मि (ऋ. सं. ७/१०४/१५) । अधा स वीरैर्दशभिर्वियूयाः (ऋ. सं. ७/१०४/१५) इति । अथापि कस्यचित् भावस्य आचिख्यासा । न मृत्युरासीदमृतं न तर्हि । (ऋ. सं. १०/१२९/२)। तम आसीत्तमसा गूळ्हमग्रे (ऋ. सं. १०/१२९/३) । अथापि परिदेवना कस्माच्चिद् भावात् । सुदेवो अद्य प्रपतेदनावृत् (ऋ. सं. १०/९५/१४) । न वि जानामि यदि वेदमस्मि (ऋ. सं. १/१६४/३७) इति । अथापि निन्दाप्रशंसे । केवलाघो भवति केवलादी (ऋ. सं. १०/११७/६) । भोजस्येदं पुष्करिणीव वेश्म (ऋ. सं. १०/१०७/१०) इति । एवम् अक्षसूक्ते (ऋ. सं. १०/३४) द्यूतनिन्दा च कृषिप्रशंसा च । एवम् उच्चावचैः अभिप्रायैः ऋषीणां मन्त्रदृष्टयः भवन्ति ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अथापि" क्वचित् "स्तुतिरेव भवति" "नाशीर्वादः" तत्र पुनराशीर्योज्या। किं कारणम्? आशिषो ह्यर्थे स्तुतिः प्रयुज्यते। आह,—किमुदाहरणम्? इति। उच्यते,—"इन्द्रस्य०—०सूक्ते" (ऋ० सं० १, ७, २, १)। अत्र हि स्तुतिरेव श्रूयते, नाशीः, सा पुनर्योज्येति प्रतिपादितम्—"अथापि" क्वचित् "आशीरेव, न स्तुतिः"। तद्यथा—"सुचक्षा०—०भूयासमिति"—"तदेतत्" एवंलक्षणं मन्त्रजातम् "आध्वर्य्यवे" वेदे "बहुलं" प्रायेण दृश्यते। "याज्ञेषु च मन्त्रेषु" कर्मकरणेष्वितरयोरपि वेदयोरिष्टाशीरेव भवति, न स्तुतिरेव केवला, यत्राप्याशीरेव केवला, तत्रापि तस्यार्थस्य या देवतेष्टा, तस्या स्तुतिर्योज्या। किं कारणम्? न ह्यनभिष्टुता देवता आशिषं समर्द्धयति॥

"अथापि शपथाभिशापौ" भवतः। "अ॒द्या मु॑रीय॒०—०इति"—इत्येकमुदाहरणं द्वयोरपि। वसिष्ठः किल राक्षसस्त्वम्—इत्यभियुक्तः, सोऽनयर्चा शपथं प्रतिपेदे, परञ्चाभिशशाप।

"अ॒द्या मु॑रीय॒ यदि॑ यातुधा॒नो अस्मि॒ यदि॒ वायु॑स्त॒तप॒ पूरु॑षस्य। अधा॒ स वी॒रैर्द॒शभि॒र्वियू॑या॒ यो मा॒ मोघं॒ यातु॑धा॒नेत्याह॑॥"—इति (ऋ० सं० ५, ७, ७, ५)। अद्यैवाहं मृये, 'यदि यातुधानः' स्याम्? यदि वा 'आयुः' 'ततप' तप्तवानहं कस्यचिदपि पुरुषस्य। अथ पुनरयातुधानमेव मां सन्तं यो मोघमनृतं यातुधानस्त्वमित्येवमाह, 'सः' वीरैः' पुत्रैः 'दशभिः' 'वियूयाः' वियूयात वियुज्यतामित्यभिप्रायः॥

"अथापि कस्यचित्" "भावस्य" अर्थस्य "आचिख्यासा" मन्त्रेषु भवति। "न मृ॒त्युरा॑सीद॒मृतं॒ न तर्हि॒ न रात्र्या॒ अह्न॑आसीत् प्रके॒तः। आनी॑ दवा॒तं स्व॒धया॒ तदेकं॒ तस्मा॑द्धा॒न्यन्न प॒रः किं च॒नास॑॥" इति (ऋ० सं० ८, ७, १७, १)। प्रजापतेः परमेष्ठिन आर्षम्। तम आसीदिर्तीयञ्च। त्रिष्टुप्। भाववृत्तम्।

'तर्हि' प्रागुत्पत्तेरस्य जगतः 'मृत्युः' इत्ययं व्यपदेशः 'नासीत्' मर्त्यस्याभावात्। 'न' 'अपि' 'अमृतम्' इत्ययं व्यपदेश आसीत्, मृत्योरभावादेव। इतरेतरापेक्षया हि मृत्युश्चामृतं च व्यपदिश्येते। 'न' एव रात्र्याः' 'प्रकेतः' प्रज्ञानम् 'आसीत्' इयं रात्रिरिति। नापि 'अह्नः'। एते अपि ह्यहोरात्रे यतो भगवतो विवस्वत उदयास्तमयाभ्यामुपलक्ष्येते, तदभावे ह्येते अपि नास्तामित्येतदुपपद्यते। आह,—अथ किमासीत्? इति। उच्यते,—अविशिष्टमप्रज्ञातम् 'एकम्' एव सर्वशक्तिमत् 'ब्रह्म' आसीत्, ततकार्य्यकारणाभावात् 'अवातम्' 'आनीत्' अनिति प्राणितीत्यर्थः, सति हि कार्य्यकारणभावे परमात्मनि या प्राणनशक्तिः सा पञ्चधा भिद्यमाना प्राणानादिभावमापद्यते, तदभावे न वातोऽस्तीति अवातमनितीत्युपपद्यते। 'स्वधया' अन्नेन आस्मन्नेव परमात्मनि या अत्र शक्ति, तथा निमित्तभूतया प्राणितीत्यशीष्यते 'तत्' ब्रह्म। आह,—किमन्यदपि ततः परस्तात् किञ्चिदासीत्? नेत्युच्यते,—'तस्मात् ह अन्यत्' 'न' 'परः' परस्तात् 'किञ्चन आस' किञ्चिदप्यासीत्। इदमेव तावदतिक्रान्तसर्वविशेषं ब्रह्म व्यपदेष्टुमशक्यमतोऽपि परस्तात् किमन्यद् भविष्यतीत्यभिप्रायः॥

द्वितीयमुदाहरणमाचिख्यासायामेव। "तम॑ आसी॒त् तम॑सा गू॒ळ्हमग्रे॑ऽप्रके॒तं स॑लि॒लं सर्व॑मा इ॒दम्,। तु॒च्छ्येना॒भ्वपि॑ हि॒तं यदासी॑त् तप॑स॒स्तन्म॑हि॒नाजा॑यतैक॑म्॥"—इति (ऋ० सं० ८, ७, १७, ३)। 'तम आसीत्' अन्धेनैव 'तमसा' 'गूळ्हम्' निगूढम् अविशिष्टम् 'अप्रकेतम्' अप्रज्ञातम् 'अग्रे' प्राक्सृष्टेरित्यर्थः, तदा हि न द्रष्टा, न दर्शनम्, नापि दृश्योऽर्थ आसीदित्यभिप्रायः। सांख्यास्तु तमःशब्देन प्रधानसाम्यापन्नं गुणत्रयमुच्यमानमिच्छन्ति, ते हि परमार्थं सूत्रमधीयते,—"तम एव खल्विदमग्र आसीत्" तस्मिंस्तमसि क्षेत्रज्ञ एव प्रथमोऽध्यवर्त्तत"—इति। 'सलिलं' सद्भावे लीनं 'सर्वमिदं' जगत्, सन्मात्रस्यैव भावस्योपरि लीनमासीत्। 'तुच्छ्येन' तुच्छेन सूक्ष्मीभूतेन पटमण्डपस्थानीयेन कर्मणा 'यत् अपि हितम्' इदमेव जगत् आसीत्' सर्गकालापेक्षितमनादित्त्वात संसारस्य। 'तपसः' तस्यैव कर्मणः 'महिना' महिम्ना महाभाग्येन कारणावस्थायाम् 'एकम्' अपि 'सत्' अनेकधा उपस्थिते सर्गकाले प्रतिनियतकर्मोपभोगार्थम् 'अजायत' इति॥

"अथापि परिदेवना, कस्माच्चित् भावात्,—'सु॒दे॒वो अद्य प्र॒पते॒दना॑वृत्' 'न विजा॑नामि॒ यदि॑ वे॒दमस्मि॑'—इति"। उदाहरणे।

"सु॒दे॒वो अ॒द्य प्र॒पते॒दना॑वृत् प॒राव॑तं पर॒मां ग॒न्तवा॒ऽउम्। अधा॒ शयी॑त॒ निर्ऋ॑ते॒रु॒पस्थे॒ऽथै॒नं वृकाः॒ रभ॒सासो॒ अ॒द्युः॥"—इति (ऋ० सं० ८, ५, ३, ४)। पुरूरवस आर्षम्। त्रिष्टुप्। परिदेवना। 'सुदेवः' स शोभनो देवः स्यात्, यो ह्यनया प्रियया उर्वश्या वियुक्तो भृगुप्रपातम् 'अनावृत्' अनावर्त्तमानः 'अद्य प्रपतेत्'। 'परावतं परमां गन्तवै ऊम्' पतितश्च दूरात् दूरतरं गच्छेत्, 'अध' अथ गत्वा 'शयीत' मृतः सन् 'निर्ऋतेः' भूमेः 'उपस्थे' उपरि। 'अधा' अथ 'एनं' तामवस्थामापन्नं 'वृकाः' विकर्त्तितारः श्वशृगालादयः 'रभसासः' रभस्वन्तो वेगवन्तः 'अद्युः' भक्षयेयुः। नाहं सुदेवः किन्तु स सुदेवो यस्तया वियुक्त एतामवस्थामाप्नुयादित्येवमेषा "परिदेवना" संशयोत्थापनम्॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"न वि॒जा॑नामि॒ यदि॑ वे॒दम॑स्मि नि॒ण्यः सन्न॑द्धो॒ मन॑सा चरामि । य॒दा माग॑न् प्रथम॒जा ऋ॒तस्यादिद् वा॒चो अ॑श्नुवे भा॒गम॒स्याः ॥"

—इति (ऋ० सं० २, ३, २१, २) । दीर्घतमस आर्षम् । अस्यवामीये । 'न' एतत् अहं 'वि' विस्पष्टं 'जानामि' 'यदि वा इदम् अस्मि कारणं परं ब्रह्माख्यम् ? अथवा इदं तत्कार्य्यं द्वैतमस्मीति । अनयोः कार्य्यकारणयोर्द्वैताद्वैतयोरन्तरा वर्त्तमानः 'निण्यः' अन्तर्हितः, अविद्यया 'सन्नद्धः' च । अनेकैः सन्देहग्रन्थिभिः 'मनसा' उभे अपि द्वैताद्वैते 'चरामि' गच्छामीत्यर्थः । एवं सति 'यदा' मा आ अगन्' माम् आगच्छेत् 'प्रथमजा' बुद्धिः, सा हि सर्वेन्द्रियेभ्यः प्रथमं जायते 'ऋतस्य' भगवत आदित्यस्य स्वभूता, तस्य हि प्रकृष्टा बुद्धिः, प्रहीणसर्वसंशया, तया सर्वमिदमसंशयं परिज्ञाय किमहं कारणसतत्व उत द्वैतसतत्वं इति । ततः 'अस्याः' कृत्स्नप्रज्ञातायाः 'वाचः' 'भागम्' अहम् 'अश्नुवे' अश्नुयाम्, यदियं कृत्स्ना वागभिवदति तत्सर्वमहमाप्नुयामित्यर्थः ॥

एवमयमात्मनिन्दापूर्वको विलापः परिदेवनेत्युच्यते, यदि नाम एवं स्यात् साधु स्यादिति ॥

"अथापि" मन्त्रेषु "निन्दाप्रशंसे" भवतः । तद्यथा,—"केव॑लाघो भवति केवलादी" "भोजस्येदं पुष्करिणीव वेश्मा"—"इति" । एते उदाहरणे ।

"मोघ॒मन्न॑ं विन्दते॒ अप्र॑चेताः स॒त्यं ब्र॑वीमि व॒ध इत्स तस्य॑ । नार्य॒मणं॒ पुष्य॑ति नो सखा॑यं॒ केव॑लाघो भवति केवला॒दी ॥"

—इति (ऋ० सं० ८, ६, २३, १) । भिक्षुर्नामाङ्गिरसस्तस्येयमार्षम् । त्रिष्टुप् । अददतो निन्दा । 'मोघं' वितथम् 'अन्नं' 'विन्दते' प्राप्नोति । आह,—कः ? इति । उच्यते,—यः 'अप्रचेताः' अप्रवृद्धज्ञानः । 'सत्यम्' अहं 'ब्रवीमि'—'बध इत् स तस्य' बध एव सोऽन्नलाभस्तस्य, वरमलब्धं तेनान्नमित्यभिप्रायः । किम्पुनः कारणं मोघमसावन्नं विन्दते ? इति । उच्यते,—'न' असौ 'अर्य्यमणम्' आदित्यं 'पुष्यति' 'नो' नापि 'सखायं' समानख्यानं मनुष्यम्, न देवान् पुष्णाति, नापि मनुष्यानित्यभिप्रायः । यत एवमतः 'केवलाघो भवति' सः 'केवलादी' आत्मनैव केवलं योऽन्नमत्ति, न देवपितृमनुष्येभ्यो ददाति, स केवलमघमेव प्राप्नोति । तदुक्तमन्यत्रापि.—"भुञ्जते तेऽह्यघं पापा ये पचन्त्यात्मकारणात्"—इति । तस्माद् वध एव स तस्यान्नलाभ इत्युपपद्यते, न ह्यसत्यन्ने प्रत्यवेयाददददन्नमित्यभिप्रायः, अन्नसंयोग एव ह्यत्र वधोऽभिप्रेतः ।—

केचित्त्वेनमनध्यात्मविदमप्रचेतसं मन्यन्ते, स ह्यस्मिन् शरीरे विवक्षितः । 'न अर्य्यमणम्' आदित्यन्तरपुरुषं भोक्तारं पश्यति, 'नो' नापि 'सखायं' प्राणवायुम्, स हि भुज्यमानेऽन्ने करणभावं पुष्णातीति सखा, केवलं, त्वसावविद्वानात्मनमेव भोक्तारमत्र पश्यति, अतः सः केवलाघो भवति' यदि स देवताः पश्येदेव ता अन्नभोक्त्रीः, स हि तत्र भुक्तेन न केवलाघः स्यादिति ॥

"भो॒जाया॒श्वं सं मृ॑जन्त्या॒शुं भो॒जाया॑स्ते क॒न्या॒ ३ शुम्भ॑माना । भो॒जस्ये॒दं पु॑ष्क॒रिणी॑ व॒ वेश्म॒ परि॑ष्कृतं देवमा॒नेव॑ चि॒त्रम् ॥"

—इति (ऋ० सं० ८, ६, ४, ५) । दक्षिणा नाम प्रजापतेर्दुहिता, तया सूक्तमात्मनः स्तुतिसम्बद्धं दृष्टम् । तत्रैषा त्रिष्टुप् । दातृप्रशंसा । 'भोजाय' राज्ञे 'अश्वम्' 'आशुं' शीघ्रं 'संमृजन्ति' सम्मार्जयन्ति स्नापयन्ति भृत्याः । किञ्च, 'भोजाय' उद्वहनार्थमन्यान् वरानपास्य 'शुम्भमाना' स्वलङ्कृता शोभमाना 'कन्या' 'आस्ते' स हि तामर्हतीत्यभिप्रायः । किञ्च 'भोजस्य' 'इदं' 'वेश्म' गृहं 'परिष्कृतं' संस्कृतं 'पुष्करिणी इव' 'देवमाना इव' पुष्करैर्दैवतं विमानमिव 'चित्रं' चायनीयमित्यर्थः । तदेतत् सर्वमप्यस्य जन्मान्तरप्रतिविशिष्टदक्षिणासहितात् कर्मणोऽन्येभ्यः कर्मभ्यः सकाशात् फलातिरिक्यमित्येवमेषा दक्षिणाप्रशंसा ॥

यथैवमिह मन्त्रद्वये निन्दा प्रशंसा च, "एवमक्षसूक्ते द्यूतनिन्दा च कृषिप्रशंसा च" भवतीति विषयोपप्रदर्शनार्थमाह ॥

"अ॒क्षैर्मा दी॑व्यः कृ॒षिमित् कृ॑षस्व वि॒त्ते र॑मस्व ब॒हु मन्य॑मानः । तत्र॒ गावः॑ कितव॒ तत्र॑ जा॒या तन्मे॒ वि च॑ष्टे सवि॒तायम॒र्य्यः ।"

—इति (ऋ० सं० ७, ८, ५, ३) । मूजवान्नामा अक्षपुत्रस्तस्येयमार्षम् । त्रिष्टुप् । 'अक्षैः मा दिव्यः' —इति अक्षदेवनप्रतिषेधः. तत्र हि बहवोऽनर्थाः सन्ति । 'कृषिमित् कृषस्व"—इति कृषिविधानम् । तस्यां हि बहवो गुणाः सन्ति । 'वित्ते रमस्व' स्वल्प एवोपाजिते 'बहु' एतदेवेति 'मन्यमानः' मा वित्तलोभेन दीव्यः, निजमपि वित्तं हारयिष्यसि, कृषिं पुनरेतस्मात् कारणात् कृषस्व । हे 'कितव !' 'तत्र' तस्यां कृषौ 'गावः' सन्ति, 'तत्र' तस्यां च 'जाया' । 'तत्' पुनरेतत् 'मे' मम 'सविता' देवः. 'अर्य्यः' ईश्वरः. 'वि' श्रुतिस्मृत्यनुशासनद्वारेण विविधमनेकप्रकारम् आ 'चष्टे' उभे अपि हीमे श्रुतिस्मृती मन्वादिद्वारेण आदित्यान्तरपुरुषप्रभवं एव, अत इदमुक्तं सवितैवैतन्मम विचष्ट इति ॥

"एवम्" अनेन प्रकारेण "उच्चावचैरभिप्रायैः" बहुभिः, अथवा प्रकृष्टाप्रकृष्टमध्यमैः मन्त्राभिव्यक्तिनिदानभूतैः "ऋषीणां" "मन्त्रदृष्टयः" मन्त्रदर्शनानि "भवन्ति" विद्यमानानामेव हि मन्त्राणामृषयो येन केनचिन्निमित्तेन निदानभूतेन निन्दाहर्षशोकप्रशंसादिना मन्त्राणां द्रष्टारो भवन्ति, न तु कर्त्तार इत्यभिप्रायः । तदप्यार्षानुक्रमण्यां निदानमार्षं च उभयमुपेक्षितव्यम्, परिज्ञातार्षनिदानो हि सुखमनेकविषयं मन्त्रार्थमवबोद्धुं शक्नोतीति । तदेतदिह लक्षणोद्देशतो भाष्यकारेण प्रदर्शितम् ॥ ३ ॥

3. (અનુ૦) વેદમન્ત્રોમાં ૧. ક્યારેક સ્તુતિ જ જોવા મળે છે, આશીર્વાદ નહીં. જેમ કે, 'ઇન્દ્રના વીરકર્મોને હું કહું છું.' એ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

સૂક્તમાં (ઇન્દ્રની સ્તુતિ જ છે, આશીર્વાદ નથી). ૨. ક્યારેક આશીર્વાદ જ હોય છે, સ્તુતિ નહીં. જેમ કે, 'હું બે આંખોથી સારી રીતે જોનારો બનું, મુખથી તેજસ્વી અને બે કાનથી સારું સાંભળનારો બનું' આવા (જેમાં આશીર્વાદ જ હોય, સ્તુતિ ન હોય તેવા) મન્ત્રો વિશેષે કરીને યજ્ઞાદિ વિષયક યજુર્વેદમાં વધારે જોવા મળે છે. ૩. ક્યારેક મન્ત્રમાં શપથ અને ૪. અભિશાપ પણ જોવા મળે છે. જેમ કે, 'જો હું માયાવી રાક્ષસ હોઉં તો આજે જ મરી જાઉં.' તથા 'આજે જ તે દશ વીરપુત્રોથી વિયુક્ત થાય.' ૫. ક્યારેક મન્ત્રમાં કોઈ ભાવ કહેવાની ઇચ્છા હોય છે. જેમ કે, 'તે સમયે મૃત્યુ પણ ન હતું અને અમૃત પણ ન હતું.... પહેલાં અંધકારથ. અંધકાર વીંટળાયેલો હતો.' (અહીં સૃષ્ટિના આદિકાળની વાત છે.) ૬. ક્યારેક કોઈ ભાવ પ્રત્યે પરિદેવના (સંશયોત્થાપના અથવા વિલાપ) પણ જોવા મળે છે. જેમ કે, 'સુદેવ આજે પાછા ન ફરે એવી રીતે અહીંથી પડે.' તથા 'હું એ જાણતો નથી કે હું આ (શરીરમાત્ર) જ છું કે એનાથી બીજું કાંઈ.' ૭. ક્યારેક મન્ત્રમાં નિન્દા પણ હોય છે અને ૮. પ્રશંસા પણ. જેમ કે, જે કેવળ એકલો ખાનારો અને દાન નહીં આપનારો છે, તે કેવળ પાપી છે.' તથા 'દાન આપનાર રાજાનું આ ઘર કમળયુક્ત સરોવર જેવું છે.' આ જ પ્રમાણે અક્ષસૂક્તમાં દ્યૂતની નિંદા અને કૃષિની પ્રશંસા કરવામાં આવી છે. આ રીતે ઋષિઓની મન્ત્રદૃષ્ટિઓ વિવિધ અભિપ્રાયોથી યુક્ત હોય છે.

3. ***(વિમર્શ)*** ઉપરની ચર્ચામાં વેદમન્ત્રોમાં કયા કયા વિષયો હોય છે તેનું દિગ્દર્શન કરાવવામાં આવ્યું છે. અહીં દુર્ગના મતે 'ઋષિઓની મન્ત્રદૃષ્ટિઓ વિવિધ અભિપ્રાયોથી યુક્ત હોય છે' એમ કહેવાનું તાત્પર્ય એ છે કે નિત્ય એવા મન્ત્રોના ઋષિઓ એક યા બીજા નિમિત્ત રૂપ નિંદાહર્ષશોકપ્રશંસાદિ વડે દ્રષ્ટાઓ છે, કર્તા નથી.

---

4. तत् ये अनादिष्टदेवताः मन्त्राः तेषु देवतोपपरीक्षा । यद्दैवतः स यज्ञो वा यज्ञाङ्गं वा तद्दैवताः भवन्ति । अथान्यत्र यज्ञात् प्राजापत्याः इति याज्ञिकाः । नाराशंसाः इति नैरुक्ताः । अपि वा । सा कामदेवता स्यात् । प्रायोदेवता वा । अस्ति हि आचारो बहुलं लोके । देवदेवत्यम् । अतिथिदेवत्यं पितृदेवत्यम् ॥ याज्ञदैवतो मन्त्रः इति ॥

"तद् ये अनादिष्टदेवता मन्त्राः" । इहैतदुक्तम्,—"यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवति"—इति । तदेतद् प्रकटदेवतालक्षणेषु मन्त्रेषु मन्त्रदेवतालक्षणमुपपद्यते, ये त्वनादिष्टदेवतालिङ्गा मन्त्राः, तेषु देवताः कथमन्वेष्याः ? इति तदेतद् विचार्य्यत इत्युपयुक्तस्तच्छब्दः । ये अनादिष्टदेवतालिङ्गा मन्त्राः, "तेषु" "देवतोपपरीक्षा" देवताया अतः परं परीक्षा उपपत्तितो वर्त्तिष्यत इति वाक्यशेषः ।

"तद्दैवतः स यज्ञो वा यज्ञाङ्गं वा, तद्दैवता भवन्ति" । यद्दैवतः स यज्ञो यस्मिन् यज्ञे ते अनाविष्कृतदेवतालिङ्गा मन्त्रा विनियुज्यन्ते, तद्दैवता एव हि ते भवन्ति । तद्यथा, "अग्नेयोऽग्निष्टोमः"—इति श्रूयते, तत्र योऽनाविष्कृतदेवतालिङ्गो मन्त्रः स्यात्, स आग्नेय एव स्यात्, प्रकरणाद्धि सन्दिग्धदेवतेषु देवतानियम इति न्यायः । "यज्ञाङ्गं वा" । प्रातःसवने यो विनियुज्यते स आग्नेयः, यो माध्यन्दिने स ऐन्द्रः, यस्तृतीयसवने स आदित्यः ।

आह,—"अथ अन्यत्र यज्ञात्" कथं मन्त्रेषु देवतापरिज्ञानमिति अथ पुनरन्यत्र यज्ञाद् ये वर्त्तन्ते, येषामुच्छन्नप्रयोगः, "उच्छन्नयज्ञो वा एषः"—इत्युच्छन्नतामपि दर्शयत्येव ब्राह्मणम् । तेषूच्छन्नप्रकरणप्रयोगेषु वाचस्तोमप्रयोगविनियोगकल्पेषु,—"किं ब्राह्मणस्य पितरं पृच्छसि किन्नु मातरम् । श्रुतविदस्मिन् वेद्यं स पितामहः ॥"—इत्येवमादिषु कथमन्वेष्या देवता ? इति । शृणु,—"प्राजापत्याः" ते मन्त्राः "इति याज्ञिकाः" मन्यन्ते । किं कारणम् ? अनिरुक्तो हि प्रजापतिः, अनिरुक्तदेवतालिङ्गाश्च मन्त्रा इत्येतस्मात्सामान्यात् ॥ "नाराशंसाः" ते "इति नैरुक्ताः" मन्यन्ते । नराशंसोऽग्निर्यज्ञो वा । वक्ष्यति हि,—यज्ञ इति कात्थक्यः अग्निरिति शाकपूणिः"—इति । यज्ञशब्देन च विष्णुरुच्यते "विष्णुर्वै यज्ञः" इति ह विज्ञायते । "अग्निर्हि भूयिष्ठभाग् देवतानाम्"—इति, अतोऽनाविष्कृतदेवतालिङ्गो मन्त्र आग्नेयः स्यात् । सर्वदेवताश्रयणाच्च "अग्निर्वै सर्वा देवताः" अत्र वै सर्वा वसति देवतेति ह विज्ञायते । यस्मिन्नपि पक्षे नाराशंसो यज्ञः, तस्मिन्नपि पक्षे यज्ञप्रभवत्वादस्य जगतो यज्ञस्य श्रैष्ठ्यम् अपरिग्रहश्च श्रेष्ठगामीति न्यायः । केचित्तु 'येन नराः प्रशस्यन्ते, स नाराशंसो मन्त्रः,—इति पश्यन्तो मनुष्यस्तुतयस्ता इत्येवं मन्यन्ते । तदुक्तम्, न हि मनुष्याणामनाविष्कृतलिङ्गैर्मन्त्रैः स्तुतिरुपपद्यते, दुर्बोध्यत्वात् तेषामल्पबुद्धित्वाच्च मनुष्याणामिति ॥

"अपि वा सा कामदेवता स्यात्" । अपि वैवमन्यथा स्यात् सा ऋक्, स मन्त्रः, योऽनाविष्कृतलिङ्गः, स कामदेवतः स्यात्, कामतो ह्यीच्छातस्तस्मिन् देवता कल्पयितव्येत्यभिप्रायः । किं कारणम् ? गुणपदमयो हि सः, न हि तत्र देवतासंविज्ञानपदम् अन्यतमदेवताविशेषप्रख्यापकमस्ति, यतो विशेषात् कस्याञ्चिदेकस्यां देवतायामन्याभ्यो व्यावृत्त्यावतिष्ठेत, गुणपदानाञ्च सर्वेषां सर्वदेवताश्रयत्वादैश्वर्य्ययोगात् सर्वासां देवतानामिति ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"प्रायोदेवता वा" तस्मिन् मन्त्रे स्यादिति वाक्यशेषः । प्राय इति ह्यधिकार उच्यते । यद्देवताधिकारे ह्यध्ययनपाठानुक्रमे योऽनाविष्कृतदेवतालिङ्गो मन्त्रो भवति. स तद्देवत एवेति बोद्धव्यम् । तद्यथा,—अग्न्यधिकारे वर्त्तमाने आग्नेय एव मन्त्रो भवति. इन्द्राधिकारे चैन्द्र एवेति । अथवा प्राय इति बाहुल्यमुच्यते । यद्यथा,—अनृतप्रायो देवदत्त इत्युक्त अनृतबहुल एवेति गम्यते । एवमिहापि प्रायोदेवतेत्युक्ते बहुलदेवतेति स्यात् । किं कारणम् ? "अस्ति ह्याचारो बहुलं लोके" अस्ति हीयं लोके बहुलस्य भूयस्त्वेन प्रसिद्धिः । निर्दिष्टेभ्यो द्रव्येभ्यो यदन्यदवशिष्यते, तत् साधारणं भवति । तद्यथा, कश्चित् निर्दिशति,—इदं मे "देवदेवत्यं" द्रव्यम्, इदं मे "अतिथिदेवत्यम्" इदं मे "पितृदेवत्यम्"—इति । तत्रैवं निर्दिष्टे ततो राशेर्यदन्यदवशिष्यते तद्देवपितृमनुष्याणां साधारणं भवति । तथा चरुनिर्वपणकर्मणि इदं देवतानामिति निरुप्तमभिमृश्येदं नः सहेति शेषमभिमृशति सर्वसाधारणत्वप्रख्यापनार्थम्, एवमिहाप्यादिष्टदेवतालिङ्गान्मन्त्रराशेर्योऽन्योऽनादिष्टदेवतालिङ्गो मन्त्रराशिः स्यात्, सर्वसाधारणत्वाद् बहुदेवतो वैश्वदेवः स्यादिति ॥

आह,—कः पुनरेतस्मिन् विचारे निश्चयः ? उच्यते,—"याज्ञदैवतो मन्त्रः" योऽनाविष्कृतदेवतालिङ्गो मन्त्रः स याज्ञो वा स्याद् दैवतो वा । "विष्णुर्वै यज्ञः"—इति ह विज्ञायते । विष्णुः पुनरादित्य एव नैरुक्तानाम्, द्युस्थाने समाम्नानात्. "यच्च किञ्चित् प्रवल्लितमादित्यकर्मैव तत्"—इति हि वक्ष्यति । तस्मादादित्यदेवतः स मन्त्रः, इति स्यात् । अथवा दैवतः स मन्त्रः. देवता अस्मिन् देवतेति दैवतः, अविशिष्टं हि देवतात्वमग्नावेवं सर्वदेवताभिवादात् "अग्निर्वै सर्वदेवताः"—इति ह विज्ञायते, "अग्निर्वै देवतानां भूयिष्ठभाक्"—इति च । 'अपरिग्रहं च प्रधानगामि'—इति न्यायः, तस्मादाग्नेयः स मन्त्रः स्यादिति ॥ तद्यदुपोद्घात उक्तम् "नाराशंसा इति नैरुक्ताः"—इति, तदेव कात्थक्यशाकपूणिमतेनावधृतं यज्ञोऽग्निर्वेति, तौ हि नैरुक्ताविति ॥

"यद्देवतः स यज्ञो वा यज्ञाङ्गं वा तद्देवता भवन्ति"—इत्येवमादीनामपरो व्याख्यामार्गः ।—"यद्देवतः स यज्ञः" यद्देवतं प्रधानं हविः, तद्यथा,—प्रकृतावैन्द्र सान्नाय्यं माहेन्द्रं वा, तत्संस्कारपरा इषेत्वादयः (य० वा० सं० १, १), तेनाविष्कृतदेवतालिङ्गा ऐन्द्रा एव भवन्ति, माहेन्द्रा वा । यद्देवते चाधिकारे चोदकेन प्रदिश्यन्ते, तद्देवता एव भवन्ति । तद्यथा,—कुविदङ्गेति प्राजापत्यग्रहणे विनियोगात् प्राजापत्य एव भवति । यज्ञाङ्गंवेत्याघाराद्यभिप्रायेण । "ऋषभोऽसि शाक्वरः"—इत्यनाविष्कृतदेवतालिङ्गः पूर्णस्रुचासादनमन्त्रः, स्रौचे विनियोगात्, तस्य च प्राजापत्यत्वात् प्राजापत्यः ॥

"अथान्यत्र यज्ञात्" । क्वान्यत्र यज्ञात् कर्मणो मन्त्राणां विनियोगः ? उपाकरणब्रह्मयज्ञजपप्रायश्चित्तेषु नैष्ठिकब्रह्मचारिणश्च । 'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति, गर्त्ते वा पतति, प्रवामीयते. यातयामान्यस्य छन्दांसि भवन्ति'—इति प्रत्यवायश्रवणात् सर्वत्रान्वेष्या देवतेत्यारब्धव्यमथान्यत्र यज्ञादिति ॥

"प्राजापत्या इति याज्ञिकाः" । प्रजापतिस्तेषूपाकरणादिकर्मसूपास्य इति याज्ञिका मन्यन्ते, स ह्यनिरुक्त इत्यनिरुक्ततासामान्यात् । "नाराशंसा इति नैरुक्ताः" सौर्य्या वा आग्नेया वेति । "अपि वा सा कामदेवता स्यात्" अनाविष्कृतदेवतालिङ्गे मन्त्रे या विचार्य्यते देवता, कास्मिन् देवता स्यात् ? इति, सा कामतः कल्प्या, इच्छात इत्यर्थः । गुणपदमयत्वात् तस्य । न मन्त्रवाक्यसामर्थ्याद् देवता नियम्यते तत्र, किन्तर्हि ? प्रयोक्तुरिच्छासामर्थ्यात् । अथवा प्रयोक्ता यत्कामस्तं प्रयुङ्क्ते, तस्य तस्य कामस्य या देवता अधिपतिः तामेव तस्मिन्नभिसन्दधीत ॥ "प्रायो देवता वा" समानमेव पूर्वेण ।

---

4. (અનુ૦) જે મન્ત્રો દેવતાઓનાં ચિહ્નોથી રહિત છે, અર્થાત્ જે મન્ત્રોમાં દેવતાઓનો સ્પષ્ટ નામોલ્લેખ નથી તે મન્ત્રોમાં 'દેવતાપરીક્ષા' કેવી રીતે કરવી તેની હવે ચર્ચા કરવામાં આવે છે : ૧. (૧) જે દેવતાના યજ્ઞમાં એ (અનાદિષ્ટ દેવતાવાળા) મન્ત્રોનો વિનિયોગ કરવામાં આવ્યો હોય અથવા તો જે યજ્ઞાંગમાં તે મન્ત્રનો વિનિયોગ કરવામાં આવ્યો હોય તે દેવતાવાળો એ મન્ત્ર જાણવો. દા. ત., અગ્નિષ્ટોમ યજ્ઞ અગ્નિ દેવતાને ઉદ્દેશીને કરવામાં આવે છે. આ યજ્ઞમાં જો કોઈ અનાદિષ્ટ દેવતાવાળા મન્ત્રનો ઉપયોગ કરવામાં આવે તો તે મન્ત્રનો દેવતા અગ્નિ ગણાશે. ૧. (૨) યજ્ઞ સિવાય અન્યત્ર પ્રાયશ્ચિત્ત કે જપાદિ કાર્યોમાં તેવા અનાદિષ્ટ દેવતાવાળા મન્ત્રનો વિનિયોગ કરવામાં આવ્યો હોય તો (क) તે મન્ત્રનો દેવતા પ્રજાપતિ ગણવો-એવો યાજ્ઞિકોનો મત છે. (ख) બીજી તરફ, નૈરુક્તોનું માનવું છે કે તેવા (યજ્ઞ સિવાય અન્યત્ર વપરાતા) અનાદિષ્ટ દેવતાવાળા મન્ત્રોનો દેવતા નરાશંસ ગણવો જોઈએ. (અહીં નરાશંસનો અર્થ અગ્નિ અથવા યજ્ઞ-અર્થાત્ વિષ્ણુ થાય છે.) (ग) અથવા તો તેવા મન્ત્રનો દેવતા ઇચ્છા મુજબ ગમે તે માની શકાય. (घ) અથવા તો તેવા મન્ત્રને 'પ્રાયોદેવતા' ગણવો. (અહીં 'પ્રાયોદેવતા'ના બે અર્થો થાય છે : અધિકાર અને ઘણા દેવતા. અનાદિષ્ટ દેવતાવાળો મન્ત્ર જે દેવતાના અધિકારમાં આવે તેને અધિકૃત દેવતાવાળો જાણવો. અથવા તેને ઘણા દેવતાવાળો-વૈશ્વદેવ-મન્ત્ર ગણવો.) કારણ કે લોકમાં મોટા ભાગે એવો નિયમ જોવા મળે છે કે "(આ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

મારું) દેવ દેવતાઓને ઉદ્દેશીને (આપેલું દ્રવ્ય છે), અતિથિ દેવતાઓને ઉદ્દેશીને (આપેલું દ્રવ્ય છે) અને પિતૃદેવતાઓને ઉદ્દેશીને (આપેલું દ્રવ્ય છે).'' ૨. અથવા તો અનાદિષ્ટ દેવતાવાળા મન્ત્રને યાજ્ઞદૈવત જાણવો. [અહીં અનાવિષ્કૃત દેવતા લિંગવાળા મન્ત્રને યાજ્ઞ (યાજ્ઞ = વિષ્ણુદેવતા) કે દૈવત (દૈવત = અગ્નિદેવતાવાળો મન્ત્ર) માનવો એવો અન્તિમ નિર્ણય જાહેર કરવામાં આવ્યો છે.]

4. ***(વિમર્શ)*** અગાઉ यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति । એમ કહીને પ્રકટ દેવતા લક્ષણવાળા મન્ત્રોના કયા દેવતા ગણવા એવી ચર્ચા કરી છે. હવે ઉપરની ચર્ચામાં અનાદિષ્ટ દેવતાવાળા મન્ત્રોના કયા દેવતા હોઈ શકે તે અંગે બે મતો નોંધવામાં આવ્યા છે.

અહીં નરાશંસનો અર્થ અગ્નિ અથવા યજ્ઞ (વિષ્ણુ) થાય છે. કેમ કે નિરુક્તમાં અન્યત્ર (અધ્યાય - ૮માં) કહ્યું છે કે यज्ञ इति कात्थक्यः अग्निरिति शाकपूणिः । અહીં विष्णुर्वै यज्ञः । એવા બ્રાહ્મણવચનને આધારે નક્કી થાય છે કે 'યજ્ઞ' શબ્દ વિષ્ણુ માટે વપરાયો છે. બીજી તરફ, अग्निर्हि भूयिष्ठभाग देवतानाम् । એ ન્યાયે અનાવિષ્કૃત દેવતાવાળો મન્ત્ર આગ્નેય જાણવો. વળી, બધા દેવતાઓ અગ્નિને આશ્રયે રહેલા હોઈ अग्निर्वै सर्वा देवताः । એવું પણ કહેવાયું છે. દુર્ગ જણાવે છે કે કેટલાક લોકો येन नराः प्रशंस्यन्ते स नाराशंसो मन्त्रः । એવી વ્યુત્પત્તિ આપે છે; તે અયુક્ત છે. કેમ કે અનાવિષ્કૃત દેવતાવાળા મન્ત્રોથી અલ્પ બુદ્ધિવાળા મનુષ્યોની સ્તુતિ થાય છે એ અનુપપન્ન છે. આ જ પ્રમાણે પ્રાયોદેવતાના પણ ઉપર્યુક્ત બે અર્થો જોવા મળે છે. આ મુજબ અગ્નિના અધિકારમાં (અર્થાત્ અગ્નિસૂક્તમાં) કોઈ અનાદિષ્ટ દેવતાવાળો મન્ત્ર આવી જાય તો તેને આગ્નેય જ જાણવો. પ્રાયઃનો અર્થ બાહુલ્ય પણ થાય. જેમ કે, अनृतप्रायो देवदत्तः । એનો અર્થ अनृतबहुलम् જ થાય છે. આમ, પ્રાયોદેવતાનો અર્થ બહુલદેવતા થશે. આનું કારણ એ છે કે લોકમાં બહુલની ભૂયસ્ત્વ રૂપે પ્રસિદ્ધિ છે. જેમ કે, કોઈ ગૃહસ્થ નિર્દેશે છે કે આ મારું દેવદેવતા વગેરેને ઉદ્દેશીને આપેલું દ્રવ્ય છે. આવો નિર્દેશ કર્યા પછી દ્રવ્યના એ રાશિમાંથી જે બાકી રહે તે દેવ, પિતૃ અને મનુષ્યોનું સાધારણ દ્રવ્ય ગણાય. અર્થાત્ એ બાકી રહેલું દ્રવ્ય ઘણા બધાનું ગણાય છે એમ આદિષ્ટ દેવતાવાળા મન્ત્રોના રાશિમાંથી જે અનાદિષ્ટ દેવતાવાળા મન્ત્રો હશે તે સર્વસાધારણ ગણવાથી બહુદેવતા-વૈશ્વદેવતાવાળા મન્ત્રો કહેવાશે. આ ચર્ચાનો ઉપસંહાર કરતાં યાસ્કે જાહેર કર્યું છે કે અનાદિષ્ટ દેવતાવાળા મન્ત્ર યાજ્ઞ છે અથવા દૈવત છે. અહીં યાજ્ઞ એટલે વિષ્ણુ. કેમ કે विष्णुर्वै यज्ञः । એમ કહેવાયું છે અને નિરુક્તકારોના મતે વિષ્ણુનો અર્થ આદિત્ય થાય છે, (કેમ કે દ્યુસ્થાનીય દેવતાઓનાં નામોમાં 'વિષ્ણુ'ને ગણાવવામાં આવ્યું છે). વળી यच्च किञ्चित् प्रवह्लितमादित्यकर्मैव तत् । એવું કહેવાશે. આથી આ અનાદિષ્ટ દેવતાવાળા મન્ત્રનો દેવતા આદિત્ય ગણાશે. હવે બીજી તરફ દૈવત એટલે અગ્નિ. કેમ કે अग्निर्वै सर्वा देवताः । (શતપથ બ્રાહ્મણ : ૫-૨-૩-૬) એવું કહેવાયું છે. આથી અનાદિષ્ટ દેવતાવાળા મન્ત્રોના દેવતા અગ્નિ જાણવા. અહીં અનાદિષ્ટ દેવતાવાળા મન્ત્રોની 'દેવતા પરીક્ષા' પૂરી થઈ.

---

5. अपि हि अदेवताः देवतावत् स्तूयन्ते । यथा । अश्वप्रभृतीनि ओषधिपर्यन्तानि । अथापि अष्टौ द्वन्द्वानि (निघण्टु ५/३/२९—३६) । स न मन्येत आगन्तून् इव अर्थान् देवतानाम् । प्रत्यक्षदृश्यम् एतत् भवति । माहाभाग्यात् देवतायाः एकः आत्मा बहुधा स्तूयते ॥

एकस्य आत्मनः अन्ये देवाः प्रत्यङ्गानि भवन्ति । अपि च । सत्त्वानां प्रकृतिभूमिभिः ऋषयः स्तुवन्ति इत्याहुः । प्रकृतिसार्वनाम्याच्च इतरेतरजन्मानः भवन्ति । इतरेतरप्रकृतयः । कर्मजन्मानः । आत्मजन्मानः । आत्मैव एषां रथो भवति । आत्मा अश्वः । आत्मा आयुधम् । आत्मा इषवः । आत्मा सर्वं देवस्य देवस्य ॥

"अपि ह्यदेवता देवतावत् स्तूयन्ते" । "यत्काम ऋषिर्यस्यां देवतायामार्थत्पयमिच्छन् स्तुतिं प्रयुङ्क्ते"—इति मन्त्रदेवतालक्षणमुक्तम्, तदुपपद्यतं देवानामार्थपत्यसम्बन्धात्, अनाविष्कृतदेवतेष्वपि संविज्ञातपदाभावात् कल्प्यते देवता कामस्य अधिपतिरपि । यत्र तु स्फुटम् अदेवता देवतावत् स्तूयन्ते ननु तत्रैतल्लक्षणं व्याहन्यते ? तद्यथा,—"अश्वप्रभृतीन्योषधिपर्य्यन्तानि" । एतस्मिन् वर्गे कानिचित् तत्त्वानि, कानिचिद् द्रव्याणि, अश्वादीनि सत्त्वानि, अक्षादीनि द्रव्याणि । तानि च पुनरासन्नमर्थं चेतयन्ते, नातीतम्, नानागतम् इति, आत्मनोऽपि च हिताहितं न प्रतिपद्यन्ते । तानि कथमभिष्टुतानि;

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

स्तोतुरभिमतस्यार्थस्य पतित्वं करिष्यन्ति ? न हि तानि स्तुतिनिन्दे विशेषतो विदुः । अपिचाश्वादिषु चितिरपि काचिदस्ति, न त्वक्षादिष्वसावस्ति ॥ ४ ॥

तस्मात् "सः" शिष्यः मेधावी "न मन्येत" न जानीयात्,—सम्यगविरुद्धमेतल्लक्ष्येण लक्षणमुच्यत इति । अपि च सुतरां न मन्येत,—"आगन्तूनिवार्थान् देवतानाम्" मन्यमानः । लोके तावदेते मनुष्याणामानित्यानामश्वादयोऽर्थाः, आगन्तवः अपायिनश्चानित्याः । तद्यदि देवतानामप्येवमेव, ततस्तासां तेषां चानित्यत्वात् स्तुतिरनर्थिका । अपि च "प्रत्यक्षदृश्यमेतत् भवति" प्रत्यक्ष एवैतत दृश्यते । यथा—उपकरणमश्वादयः, उपकर्त्तव्या मनुष्याः । देवतानामपि चेन्द्राग्निसूर्य्यप्रभृतीनामुपकरणं हरिरोहिद्धरितप्रभृतयोऽश्वाः । तस्मादुभयेषामुपकरणोकर्त्तव्यतासामान्यात् मनुष्याश्ववदनित्यत्वमिति युक्तम् ।

यत् स शिष्यो न मन्यते नैतत् सम्यग् विधीयत इति, तस्मात् प्रतिसमाधातव्यमित्युपोद्धत्य उत्तरमुच्यते,—"माहाभाग्यात् देवतायाः एक आत्मा बहुधा स्तूयते" यस्मात्, तस्मात् सर्वमेतत् सम्यगिति । भज्यत इति भागः सेव्यत इत्यर्थः । तत् पुनरैश्वर्य्यं महत् । "अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमेव च । ईशित्वञ्च वशित्वञ्च यत्र कामावसायिता ॥"—इत्येवमनेन महदैश्वर्य्येण भज्यते । महदेतदैश्वर्य्यं भजत इति वा महाभागा देवता, तद्भावो महाभाग्यम्, तस्मात् महाभाग्याद्धेतोरेकोऽपि सन् देवतात्मा बहुधा स्तूयते, प्रकृतिभेदेन वा अप्रकृतिभेदेन वा वर्द्धमानः, निगमोऽपि हि भवत्यैश्वर्य्यप्रख्यापकः,—"रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं १ परिस्वाम् । त्रिर्यद्दिवः परिमुहूर्त्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा ॥"—इति (ऋ० सं० ३, ३, २०, ३) । यथा यथा च लक्ष्यं तथा लक्षणं प्रवर्त्तयितुमर्हति दृष्टानुविधानाच्छन्दसः, छन्दसि हि लक्ष्ये यावदभिधानं देवतानानात्वविधिव्यवस्था । संवादसूक्तानि च कयाशुभादीनि इन्द्रमरुदादिसंवादव्यपदेशहेतुना गमयन्ति, तदशक्यमपासितुम् । तथा त्रिस्थानानां यान्यसङ्करवर्त्तीनि हविर्वहनरसादानलक्षणान्यग्नीन्द्रसूर्य्याणां कर्माणि लिङ्गान्यर्थदर्शनहेतूपबृंहितानि त्रित्वं गमयन्ति, तदपि चाशक्यमपासितुम् । तथाचैकात्म्यमिन्द्रं मित्रं वरुणमग्निमित्यादयो गमयन्ति निगमाः,—"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥"—इति (ऋ० सं० २, ३, २२, ६) । तदप्यशक्यमपासितुम् । त्रिष्वपि चैतेषु पक्षेषु ऐश्वर्य्यमपरिहीणं देवतायाः तत्रैव सत्यैकात्म्यं तावदाश्रित्य प्रतिसमाधानम् ।—

"एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति" । माहाभाग्यादेकस्य देवतात्मनः प्रकृतिभेदेन चाप्रकृतिभेदेन चेति । चेतनाचेतनविकरणधर्मित्वादात्मानं विकुर्वतोऽस्य अन्ये देवाः प्रत्यङ्गानि भवन्ति । अग्नीन्द्रसूर्य्याणां परस्परापेक्षमन्यत्वम्, अनन्यत्वं त्वेकेन देवतात्मना महता सह । यथा घटादीनां मृदा, न ह्यङ्गिनमङ्गान्यतिरिच्यन्ते, भेदेनाग्रहणात् । न चाङ्गान्यपेक्ष्य प्रत्यङ्गानि भवन्ति, न ह्यधिष्ठानमनपेक्ष्य प्रत्यधिष्ठानं नाम भवति । तस्मादग्नीन्द्रसूर्य्यात्मकस्य देवतात्मनोऽङ्गानि,—जातवेदोवायुभगप्रभृतीनि, शकुन्यश्वप्रभृतयश्च प्रत्यङ्गानि । स एष महानात्मा अग्नीन्द्रसूर्य्याद्यङ्गप्रत्यङ्गभावेन व्यूहमनुभवन् एकोऽपिसन् बहुधा स्तूयते ॥

"अपि च" एवं कृत्वा "सत्त्वानाम्" अश्वादीनां "प्रकृतिभूमभिः ऋषयः स्तुवन्तीत्याहुः" । प्रक्रियन्ते अस्यां सर्वे विकारा इति प्रकृतिः, स सत्तालक्षणो महानात्मा हिरण्यगर्भ इति । वक्ष्यति हि,—"स एष महानात्मा सत्तालक्षणः, तत् परम्, तत् ब्रह्म०—० स भूतात्मा, सैषा भूतप्रकृतिः"—इति । तस्या भूमा बहुत्वम्, अनेकधा विपरिणामः स्थावरजङ्गमभावेन । प्रकृतेर्भूमानि बहुत्वानि यानि सत्त्वानां तैरनन्यविषयत्वं पश्यन्तः कार्यकारणयोरनन्यत्वात् कारणमहिमभिः तान्यश्वादीन्यभिष्टुवन्तीत्याहुरात्मविदः । तद्यथा,—"द्यौस्ते पृष्ठं पृथिवी शरीरमात्मान्तरीक्षम्"—इत्येवमादीनि । आत्मैव सर्वं स्थावरजङ्गममित्यवेत्य अश्वमेधे 'मूलेभ्यः स्वाहा' शाखाभ्यः स्वाहा'—इत्येवमादिभिस्तेन तेन वैशेषिकेण स्थावरजङ्गमात्मना प्रकृतेरभिन्ननावस्थानेनावस्थितो महानेवात्मेज्यते, न ह्यदेवता यागमर्हति । यावच्चान्यदपि किञ्चिदेवम्प्रकारमदेवताभिमतमिज्यते । गृह्ये च बलिप्रभृतिकर्मादौ सर्वत्र स एवेत्युपेक्ष्यम् ॥

"प्रकृतिसार्वनाम्न्याच्च" एतदुपपन्नम्, नैताः अदेवताः देवतावत् स्तूयन्ते किन्तु महानेवायमात्मा विश्वरूपः स्तूयत इति । प्रकृतिसार्वनाम्न्यादिति । नतिमात्रं नाम नामनं सञ्ज्ञा सर्वत्वेव नाम सर्वनाम, प्रकृतेः सर्वनाम प्रकृतिसर्वनाम, तद्भावः प्रकृतिसार्वनाम्न्यम्, तस्मात् प्रकृतिसार्वनाम्न्यात् हेतोः यस्मात् महाभाग्ययुक्ता देवता प्रकृतिः, यस्माच्च सर्वत्वेन नता, तस्माद्धेतोर्नैताः अदेवताः देवतावत् स्तूयन्ते ।

अपि चैतदभिहितम्,—'आगन्तूनिवार्थान् मन्यमानो हरिरोहिद्धरितादीनिन्द्रादीनां मनुष्याश्ववदनित्यत्वमवेत्य न सम्यगभिधीयत इति स न मन्येत'—इति । अत्र ब्रूमः,—मनुष्यधर्मविपरीतो हि देवताधर्मः, अनैश्वर्य्यान्मनुष्याणामैश्वर्य्याच्च देवतानाम् । तत

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कथम् ? इति । अतो भेदमाश्रित्य प्रतिसमाधीयते,—"इतरेतरजन्मानो भवन्ति" । इतरेतरप्रकृतयो देवाः, ऐश्वर्य्यात्, न मनुष्याणामियं शक्तिरस्ति, अनैश्वर्य्यात् । मनुष्याणां हि पिता, पुत्रं जनयतीति पिता प्रकृतिः, न पुनरिच्छन्नपि पुत्रः पितरं जनयति । देवानां त्वग्नेः सूर्य्योऽजायत,—"एष प्रातः प्रसुवति"—इति ह विज्ञायते, तस्मात् सूर्य्यस्याग्निः प्रकृतिः । सूर्य्याच्चाग्निः सायं जायते, तस्मादग्नेः सूर्य्यः प्रकृतिः । अदितेर्दक्षो दक्षाच्च अदितिरिति । अथाध्यात्म्येऽपि,—कोष्ठ्यादग्नेर्नाद इन्द्रः, बलादिन्द्रान्मथ्यमानः अग्निरित्येवमादि । स एष सर्वथाप्यचिन्त्यो देवताधर्मः । तासामानन्त्यान्माहाभाग्यस्य । तत्रैवं सत्यशक्यमध्यवसातुम्,—यथा मनुष्याणामागन्तवोऽश्वादयस्तथैव देवतानामपीति । तस्मात् दोषानुपपत्तिरनागन्तुत्वात् देवाश्वादीनामिति ॥

अथ किमर्थमीश्वराः सन्तो देवता जायन्ते ? इति,—"कर्मजन्मनः" कर्मफलसिद्ध्यै लोकस्य अग्निवायुसूर्य्या जायन्ते, न ह्येतेभ्य ऋते लोकस्य कर्मफलसिद्धिः स्यात्—विद्यमानमपि चैश्वर्य्यमैश्वर्य्यवति न प्रख्यातिमियात्; ईशितव्यमर्थमप्रतीत्य । तस्मादैश्वर्य्यप्रख्यापनाय जायन्ते ।

कर्मफलसिद्ध्यै लोकमनुजिघृक्षन्तः कुतः पुनर्जायन्ते ?—"आत्मजन्मानः" योऽसावेक आत्मा बहुधा स्तूयत इत्युपात्तः, सर्वमूर्तिस्थितौ उपरतसर्वमूर्त्तिः, प्रलये भावाख्यः सन्मात्रः, सर्गकाले षोढात्मनं विभज्य जगद्भावं बिभर्त्ति, तस्माज्जायन्त इत्यात्मजन्मानः । क एव तस्मान्न जायते ? इति चेत्, सत्यम् । सर्वं तस्मात् जायते न कामकारेण, देवास्तु तमात्मानं पश्यन्तो योगेन ततः कामकारतो जायन्ते । किमेषां जन्म ? यदेषामिच्छतां सङ्कल्पानुविधायिकर्मानुरूपं यथाकालमात्मनः कार्य्यकारणमुत्पद्यते, तदेतेषां जन्म, तदनीश्वराणां नास्ति ॥

यतश्चेश्वरास्ते तस्मादात्मनस्तत्सङ्कल्पानुविधायित्वात् 'आत्मैवैषां रथः भवति, आत्माऽश्वः, आत्मा आयुधम्, आत्म इषवः, आत्मा सर्वं देवस्य" । तत्र यदुक्तम्,—'अश्वादीनि सत्त्वानि, अक्षरथप्रभृतीनि च द्रव्याणि अदेवताः,—इति, एतदयुक्तम् । देवता एवेमाः, रथादिरूपेण हि देवतैवात्मानं विकृत्य प्रकृतिभेदेन रथादिसाध्यमर्थं साधयति । सा तद्रूपा सती रथादिस्तुत्या स्तूयते. सा च स्तुतिसमवेतमर्थमाशासितं स्तोतुस्तेनैव रूपेण साधयितुमलमिति ॥

तस्मात् "माहाभाग्यादेकैकस्या अपि बहूनि नामधेयानि" तासामेव तिसृणामग्न्यादीनां माहाभाग्यादैश्वर्य्ययोगादात्मानमनेकधा विकुर्वतीनामेकैकस्याः प्रतिविकारं नामधेयप्रतिलम्भात् तेनैव रूपेण धारयन्त्यात्मानमिति "यत्कामऋषिर्यस्यां देवताया-मार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते"—इत्यस्य लक्षणस्याव्याघातः, तस्मात्सम्यगेवोक्तमिति । अथवा स्तुतिसङ्क्रमन्यायेन चतुर्दशेऽध्याये "यज्ञसंयोगात् राजा स्तुतिं लभेत"—इत्यत्र पुनः प्रतिसमाधास्यामहे ॥ ५ ॥

इति निरुक्तवृत्तौ (द्वादशाध्यायस्य) सप्तमाध्यायस्य
प्रथमः पादः ॥ ७, १ ॥

---

5. (અનુ૦) વળી, અદેવતાની દેવતાની જેમ સ્તુતિ કરવામાં આવે છે. જેમ કે, અશ્વથી માંડીને ઔષધિ પર્યન્તના પદાર્થો (અદેવતા હોવા છતાંય તેમની દેવતાની જેમ સ્તુતિ કરવામાં આવે છે.) (જુઓ : નિઘંટુ ૫-૩-૧ થી ૨૨). એ જ પ્રમાણે આઠ દ્વન્દ્વોની સ્તુતિ કરવામાં આવે છે (જુઓ નિઘંટુ. ૫-૩-૨૯ થી ૩૬). પરંતુ તેણે (મેધાવી શિષ્યે દેવતાઓના એ (અશ્વાદિ) પદાર્થોને આગન્તુક (અને અપાયિન્) (અર્થાત્ અનિત્ય) ન માનવા જોઈએ. આ પ્રત્યક્ષ જોઈ શકાય એવું છે (કે અશ્વો ઉપકરણ છે અને મનુષ્યાદિ ઉપકર્તવ્ય છે. અહીં મનુષ્ય અનિત્ય છે એની સાથે સાથે જ અશ્વાદિ પણ અનિત્ય છે એમ પ્રત્યક્ષ જોઈ શકાય છે. પરંતુ અનિત્ય એવા અશ્વાદિની સ્તુતિ અનર્થક છે; એવું કોઈએ ન માનવું). કારણ કે દેવતાના મહા-ઐશ્વર્યને કારણે એક જ આત્મતત્ત્વની ઘણી રીતે સ્તુતિ થાય છે.

બીજા દેવો એક જ આત્માના પ્રત્યંગો છે. વળી, પ્રાણીઓની જે પ્રકૃતિ (મૂળ કારણ) હોય છે એના બહુત્વને કારણે અર્થાત્ કારણમહિમા વડે ઋષિઓ (અશ્વાદિ અદેવતાઓની દેવતાવત્) સ્તુતિ કરે છે એમ (આત્મવિદ્ લોકો) કહે છે. તથા (મહા-ઐશ્વર્યથી યુક્ત દેવતાત્મા બધાની) પ્રકૃતિ હોઈને અને (જગત્‌ના સર્વ પદાર્થોને માટે એ) સર્વનામ હોઈને (અદેવતાની દેવતાવત્ સ્તુતિ થાય છે એમ નહીં કહેવાય, પણ અદેવતાની સ્તુતિ દ્વારા મહાન્ વિશ્વરૂપ આત્માની જ સ્તુતિ થાય છે એમ કહેવાશે.) દેવતાઓ પરસ્પરમાંથી જન્મનારા છે અને પરસ્પરને જન્માવનારા પણ છે (આથી અશ્વાદિ આગન્તુક=અનિત્ય છે એમ નહીં કહી શકાય). (જગત્‌માં) કર્મોની સિદ્ધિને અર્થે દેવતાઓ જન્મ લે છે અને એ જન્મ પોતાનામાંથી જ લે છે. (અર્થાત્ દેવતાઓ પોતે જ પોતાનામાંથી જન્મ લે છે,) (દેવતાઓનો) આત્મા જ એમનો રથ બને છે, આત્મા જ અશ્વ બને છે, આત્મા જ આયુધ બને

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

છે, આત્મા જ બાણ બને છે અને દેવતાઓનો એ આત્મા જ બધું બને છે.

5. *(વિમર્શ)* વેદમન્ત્રોમાં ક્યારેક અશ્વ વગેરે પ્રાણીઓ અને અક્ષ, રથ વગેરે દ્રવ્યોની સ્તુતિ જોવા મળે છે. આ બધા પદાર્થોને અદેવતા કહી શકાય. આ પદાર્થો આસન્ન અર્થોને જ કહેનારા છે, એ અતીત કે અનાગતને કહેનારા નથી. એ જ પ્રમાણે તેઓ પોતાનું હિતાહિત પણ વિચારી શકતા નથી, તો પછી તેમની સ્તુતિ કરવામાં આવતાં તે (અદેવતા પદાર્થો) સ્તોતાને અભીષ્ટાર્થની કેવી રીતે પ્રાપ્તિ કરાવી આપશે ? 'અદેવતાની દેવતાવત્ સ્તુતિ થાય છે' એમ કહેતાં પૂર્વપક્ષીના મનમાં આ પ્રશ્ન રહેલો છે.

મૂળ પાઠમાં અશ્વાદિ અદેવતાઓની સાથે આઠ દ્વન્દ્વોનો પણ ઉલ્લેખ છે. નિઘંટુમાં એ આઠ દ્વન્દ્વો આ પ્રમાણે ગણાવ્યા છે : उलूखलमुसले । हविर्धाने । द्यावापृथिवी । विपाट्शुतुद्र्यौ । आर्त्नी । शुनासीरौ । देवीजोष्ट्री । देवीऊर्जाहुती ॥ પરંતુ દુર્ગાચાર્યે આ આઠ દ્વન્દ્વો ઉપર વ્યાખ્યા કરી નથી કે તેની યાદી પણ આપી નથી. આથી સંભવ છે કે એ પાઠ પ્રક્ષિપ્ત હોય.

યાસ્ક ઉપર્યુક્ત પ્રશ્નનો જવાબ આપતાં જણાવે છે કે નિરુક્તના મેધાવી શિષ્યે આ અશ્વાદિ પદાર્થોને અનિત્ય ન માનવાં જોઈએ. પૂર્વપક્ષીનું કહેવું છે કે જેવી રીતે લોકમાં અનિત્ય મનુષ્યોના અશ્વાદિ પદાર્થો આગન્તુક અને અપાયિન્ અર્થાત્ અનિત્ય છે, તેવી રીતે દેવતાઓના અશ્વાદિ પદાર્થો પણ અનિત્ય હોઈ તેમની સ્તુતિ અનર્થક છે. અહીં અશ્વાદિ ઉપકરણ છે અને મનુષ્યો ઉપકર્તવ્ય છે. એ જ પ્રમાણે ઇન્દ્ર, અગ્નિ, સૂર્યાદિ દેવતાઓના ઉપકરણ રૂપ હરિ, રોહિત્ અને હરિત વગેરે અશ્વો છે. આમ બન્ને પક્ષે ઉપકરણ-ઉપકર્તવ્ય ભાવ સમાન હોઈ દેવતાઓના અશ્વ વગેરે પણ અનિત્ય છે એમ પ્રત્યક્ષ જોઈ શકાય છે. આ અનિત્ય અદેવતાઓની સ્તુતિ અનર્થક છે. પરંતુ યાસ્ક કહે છે કે અશ્વાદિ પદાર્થો અનિત્ય નથી. કેમ કે મહાઐશ્વર્યને કારણે એક જ આત્માની અનેક રીતે અર્થાત્ અશ્વાદિ રૂપે સ્તુતિ થાય છે. વેદમાંથી પણ આનું સમર્થન મળી રહે છે : इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः । (ऋ. सं. १—१६४—४६) रूपं रूपं मघवा बोभवीति मायाः कृण्वानः... । (ऋ. सं. ३—५३—८) । અર્થાત્ માયા કરી રહેલો ઇન્દ્ર રૂપ-પ્રતિરૂપમાં પ્રકટ થઈ રહ્યો છે. બીજું, બધા દેવો એક જ આત્માના અંગ—પ્રત્યંગો છે. અર્થાત્ અગ્નિ, ઇન્દ્ર, સૂર્યાદિ દેવતાઓ પરસ્પરની અપેક્ષાએ તેમનામાં ભિન્નત્વ છે, પરંતુ એક મહાન્ દેવતાત્મા રૂપે તેમનામાં અનન્યત્વ છે, જેવી રીતે ઘડાઓ વ્યક્તિગત રીતે અલગ અલગ હોવા છતાંય માટી રૂપે એક જ છે. માટે અગ્નિ—ઇન્દ્ર—સૂર્યાત્મક દેવતાત્માના જ જાતવેદો—વાયુ—ભગ—વગેરે અંગો છે અને શકુનિ—અશ્વ વગેરે પ્રત્યંગો છે. આ એક દેવતાત્માની જ એક યા બીજી રીતે સ્તુતિ થાય છે.

વળી, વેદમાં કહ્યું છે કે स एष महानात्मा सत्तालक्षणः, स भूतात्मा, सैषा भूतप्रकृतिः । આને આધારે કહી શકાય કે એ સત્તાલક્ષણ મહાન્ આત્મા હિરણ્યગર્ભ જ બધાની પ્રકૃતિ (प्रक्रियन्ते अस्यां सर्वे विकारा इति प्रकृतिः) છે. આ પ્રકૃતિ ભૂમા છે, તેનું બહુત્વ છે. અર્થાત્ અનેક રીતે તેનું સ્થાવર—જંગમ ભાવ રૂપે વિપરિણામ થાય છે. આથી આત્મવિદ્ લોકો આ કારણના (પ્રકૃતિના) મહિમા વડે અશ્વાદિ અદેવતાઓની પણ દેવતાવત્ સ્તુતિ કરે છે. દુર્ગ કહે છે : प्रकृतेर्भूमानि बहुत्वानि यानि सत्त्वानां तैरनन्यविषयत्वं पश्यन्तः कार्य्यकारणयोरनन्यत्वात् कारणमहिमभिः (=प्रकृतिभूमभिः) तान्यश्वादीन्यभिष्टुवन्तीत्याहुरात्मविदः । આમ, અદેવતા પદાર્થો વાસ્તવમાં તો પ્રકૃતિભૂત હિરણ્યગર્ભનું જ વિપરિણામ છે તેમ સાબિત થાય છે. આથી એમની સ્તુતિ અનર્થક નથી. આનું દૃઢીકરણ કરતાં યાસ્ક બીજાં પણ કારણો નિર્દેશે છે. જેમ કે, प्रकृतिसार्वनाम्याच्च । મહા-ઐશ્વર્ય યુક્ત દેવતા બધાની પ્રકૃતિ હોઈને અને બધાં નામો એ (પ્રકૃતિ)નાં જ નામો હોઈને અદેવતાની દેવતાવત્ સ્તુતિ થાય છે એમ નહીં કહેવાય, પરંતુ અદેવતાની સ્તુતિ દ્વારા મહાન્ વિશ્વરૂપ આત્માની જ સ્તુતિ થાય છે એમ કહેવાશે. (अत्र दुर्ग — नतिमात्रं नाम नमनं सञ्ज्ञा, सर्वत्वेन नाम सर्वनाम, प्रकृतेः सर्वनाम प्रकृतिसर्वनाम, तद्भावः प्रकृतिसार्वनाम्यम्, तस्मात् प्रकृतिसार्वनाम्यादिति हेतोः । यस्मात् माहाभाग्ययुक्ता देवता प्रकृतिः यस्माच्च सर्वत्वेन नता, तस्माद्धेतोर्नैता अदेवता देवतावत् स्तूयन्ते ॥) અગાઉ કહ્યું છે કે મનુષ્યોના અશ્વાદિ પદાર્થો આગન્તુક અને અપાયિન્ અર્થાત્ અનિત્ય છે તેની જેમ ઇન્દ્રાદિ દેવતાઓનાં હરિ, રોહિત આદિ અશ્વો પણ અનિત્ય હશે, પરંતુ એમ ન માનવું, આનું કારણ દર્શાવતાં યાસ્ક કહે છે કે મનુષ્યો અનૈશ્વર્યવાળા છે, પણ દેવતાઓ ઐશ્વર્યવાળા છે. આથી મનુષ્યધર્મથી દેવતાધર્મ વિપરીત છે. જેમ કે, દેવતાઓ પરસ્પરમાંથી જન્મ લેનાર છે અને પરસ્પરને જન્માવનારા પણ છે. મનુષ્યોમાં આ શક્તિ નથી. મનુષ્યોમાં પિતા પુત્રને જન્મ આપે છે, પણ પછી ગમે તેટલી ઇચ્છા હોય છતાંય પોતાના પિતાને જન્મ આપી શકતો નથી. પરંતુ દેવતાઓમાં અગ્નિ દા.ત., સવારે સૂર્યને જન્મ આપે છે. આથી અગ્નિ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain. Digitized by eGangotri.

સૂર્યની પ્રકૃતિ ગણાશે. પછી સાયંકાલે સૂર્યમાંથી અગ્નિ જન્મે છે. હવે સૂર્ય અગ્નિની પ્રકૃતિ ગણાશે. આમ દેવતાઓનું ઐશ્વર્ય અનન્ત છે. એથી મનુષ્યોના અશ્વો અનિત્ય છે તેની જેમ દેવતાંઓના અશ્વો પણ અનિત્ય હશે એમ કદાપિ નહીં કહી શકાય. હવે કોઈને પ્રશ્ન થાય કે દેવતાઓ જો ઐશ્વર્ય સમ્પન્ન હોય તો તેમણે જન્મ લેવાની શી જરૂર છે તો એનો જવાબ છે કે દેવતાઓ પોતાના ઐશ્વર્યનું પ્રખ્યાપન કરવા માટે આ લોકમાં કર્મફળની સિદ્ધિને અર્થે જન્મ લે છે. પરંતુ આ દેવતાઓ કોનામાંથી જન્મે છે ? તો - आत्मजन्मानः । आत्मनः जन्म येषां ते) અર્થાત્ પોતાનામાંથી જ તેઓ જન્મ લે છે. તથા દેવતાઓનો આ આત્મા જ રથ બને છે, અશ્વ વગેરે બને છે. આ સન્દર્ભમાં અદેવતા લાગતાં અશ્વાદિની વેદમન્ત્રોમાં જે સ્તુતિ કરવામાં આવી છે; તેમાં કોઈ આપત્તિ આવતી નથી. આ ચર્ચાના અન્તની સાથે સાતમા અધ્યાયનો પહેલો પાદ પૂરો થાય છે.

द्वितीयः पादः

6. तिस्रः एव देवताः इति नैरुक्ताः । अग्निः पृथिवीस्थानः । वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः । सूर्यो द्युस्थानः । तासां माहाभाग्याद् एकैकस्याः अपि बहूनि नामधेयानि भवन्ति ॥

अपि वा कर्मपृथक्त्वात् । यथा । होता अध्वर्युः ब्रह्मा उद्गाता इति अपि एकस्य सतः ॥

अपि वा पृथक् एव स्युः । पृथक् हि स्तुतयो भवन्ति । तथा अभिधानानि ॥

(अथ समानार्थत्वसाधनम्)

यथो एतत् । कर्मपृथक्त्वात् इति । बहवोऽपि विभज्य कर्माणि कुर्युः । तत्र संस्थानैकत्वं संभोगैकत्वं च उपेक्षितव्यम् । यथा पृथिव्यां मनुष्याः पशवो देवाः इति स्थानैकत्वं संभोगैकत्वं च दृश्यते । यथा । पृथिव्याः पर्जन्येन च वाय्वादित्याभ्यां च संभोगः । अग्निना च इतरस्य लोकस्य । तत्र एतत् नरराष्ट्रमिव ॥

"तिस्र एव देवता इति नैरुक्ताः"—इति उपोद्घातः । "सैषा देवतोपपरीक्षा"—इत्यधिकारे वर्त्तमाने "यत्काम ऋषिर्यस्याम्—इत्येवमादि मन्त्रलक्षणदेवतामुक्तम्, तत् पुनरदेवतात्वादश्वादीनाम् "आ नो मित्रो वरुणो अर्य्यमा"—इत्येवमादिषु व्याहन्यमानमपेक्ष्य "स न मन्येत"—इत्येवमादिनाक्षिप्ते "माहाभाग्यात् देवताया एक आत्मा बहुधा स्तूयते"—इत्येवमादिना "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्"—इति (ऋ० सं० ८, ४, १७, २) । एवमादिभ्यो मन्त्रवाक्येभ्यः—"अथातो विभूतयोऽस्य पुरुषस्य"—इत्येवमादिभ्यश्च ब्राह्मणेभ्यः—"एष इन्द्र एष प्रजापतिः"—इत्येवमादिभ्यश्चैकात्म्ये सामर्थ्यमुन्नीयात्मवित्पक्षेण आत्मैवेदं सर्वम्—इत्यैकात्म्यमुक्तम् । आत्मविदां ह्यात्मन्युपजातविशिष्टभावनानामात्मशरीर-स्थानामात्ममयमेवेदं सर्वमनुपश्यतामात्मार्थः सर्वो वेदोऽन्या च सर्वा वाक् न ह्यात्मनोऽन्यद् व्यतिरिक्तमभिधेयमस्ति, स त्वशेषाद् यदभिधानमभिदध्यात् । अथ पुनरुपक्रमः पुरुषार्थस्य,—प्रथममनिश्रेणीफलकस्थानीयेन केवलेनाधियज्ञेन तत्र चावधाने अधिदेवताध्यात्मज्ञानं किञ्चिद् विदुषः पृथगात्मनो देवताः पश्यतः, परिच्छिन्नफलाभिप्रायस्याधियज्ञं प्रयुयुक्षमाणस्य पूर्वजन्माविद्यावासितान्तःकरणस्याभिधानस्तुतिभेदाभ्यां विधिमन्त्रार्थवादविचारसेन यथाग्रहं पृथगिव देवताः प्रकाशते । तदुक्तम्,—"अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद"—इति । तदाहुः,—"आत्मयाजी श्रेयान् देवयाजी वा ? इति, आत्मयाजीति ह ब्रूयात्". तदेवं ब्रह्म देवतावृक्षस्य मूलम्, ऐकात्म्यमात्मविदः प्रत्यवभासते, यावदभिधानन्तु याज्ञिकाः प्रतिविधिमन्त्रप्रधानात्, यच्चावशिष्यते, तन्नैरुक्ता प्रत्यवभासते अत इदमुच्यते,—"तिस्र एव देवता इति नैरुक्ताः" । तिस्र इति सङ्ख्या । एवेत्यवधारणमितरौ पक्षौ अपेक्ष्य ॥

कतमास्ताः ? इति,—"अग्निः पृथिवीस्थानः, वायुः वा इन्द्रः वा अन्तरिक्षस्थानः, सूर्य्यः द्युस्थानः" । कयोपपत्त्या त्रित्वं परिजगृहुः ? स्थानभेदात्, प्रत्यक्षलिङ्गादन्यार्थदर्शनाच्च, लिङ्गं त्रिधा हि भवति, "विश्वकर्मा ह्यजनिष्ट देव आदिद् गन्धर्वो अभवद् द्वितीयः । तृतीयः पिता जनितौषधीनामपां गर्भं व्यदधात् पुरुत्रा (ऋ० सं० य० वा० सं० १७, ३२ ॥"—इत्यत्र, अजस्य नाभावध्येकमर्पितम्"—इति (ऋ० सं० ८, ३, १७, ६) । अन्याथदर्शनाच्च । "प्रजापतिर्वै त्रीन् महिम्नोऽसृजताग्निं वायुं सूर्य्यम्"—इति "प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यो रसान् प्रावृह दग्निं पृथिव्या वायुमन्तरिक्षात सूर्यं दिवः"—इति

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अग्निः पृथिवीस्थानः, वायुर्वेन्द्रो वान्तरिक्षस्थानः, सूर्य्यो द्युस्थानः"—इति । "तिस्रः"—इति प्रकृते स्वरूपग्रहणात् स्थानभेदं त्रित्वे हेतुमुपसंसूचयति । कुतो नियमः । अग्न्यादीनां पृथिव्यादिषु निगमेभ्यः,—"पृथिव्यसि जन्मना वशासाग्निं गर्भमधत्थाः, अन्तरिक्षमसि जन्मना वशासा वायुं गर्भमधत्थाः, द्यौरसि जन्मना वशासाऽऽदित्यं गर्भमधत्थाः"—इत्येवमादिभ्यो निगमेभ्यः ॥

"वायुर्वेन्द्रो वा"—इति किमेकस्य पर्य्यायवचनावेतौ शब्दौ, उताभिधेयौ भिद्येते ? इति । कुतः सन्देहः ? उभयथा हि प्रसिद्धिः,—प्रत्यभिधानश्चार्थभेदो दृष्टः,—गौः अश्वः इति, यथाभिधानभेदेऽपि चैकार्थता दृष्टा,—हस्तः करः पाणिः इति यथा । अतो युक्तः संशय इति । याज्ञिकपक्षे तावददोषः । अर्थभेदेऽपि चैतेषां यावन्त्यभिधानानि तावत्यो देवताः, अस्य पुनराचार्य्यस्य स्वसिद्धान्तावलम्बिनः "तिस्र एव देवताः"—इति प्रतिज्ञावतः कुतो वाय्विन्द्रशब्दयोरर्थभेदः ? भेदे हि प्रतिज्ञाहानिः स्यात्, अपि च भेदेऽभिप्रेते नैकवचनेन निरदेक्ष्यदन्तरिक्षस्थान इति, अभिधानमात्रे भिन्नेऽप्यभिधेयस्य चाभेदे अन्तरिक्षमस्य स्थानमित्युपपत्तेः । षष्ठ्येकवचनो विशेष्योऽन्तरिक्षस्थानशब्देन विशेष्यते, इतरथा ह्यन्तरिक्षस्थानौ इत्यवक्षत् द्वयोर्विशेष्ययोः । अपि च "वायवायाहि दर्शत"—इति (ऋ० सं० १, १, ३, १) । वायोः प्राधान्यस्तुतिमुदाहृत्य तां निरुच्य तस्यां सोमपानसम्बन्धमुपलक्ष्य,—ऐन्द्रत्वं च सोमस्यावेत्य "अंशुरंशुष्टे"—इत्येतस्मिन्, "आ त्वमिन्द्राय प्यायस्व" "तुभ्यमिन्द्रः प्यायताम्"—इति नान्यत्रेन्द्रशब्दात् मुख्याभिसम्बन्धिनो मध्यमात् सोमपानं सम्भवतीति प्रतीत्य वायुशब्दस्येन्द्रशब्दस्य समानार्थता दृढमवधार्य्य अमृष्यमाणा वायुशब्दस्य मध्यमादर्थान्तरे वृत्तिमपर्य्यायशब्दवादिनमाक्षिपन्नाह "कमन्यं मध्यमादेवमवक्ष्यत्"—इति । उत्तरमपि च यमुदाजहार निगमं "तस्यैषा परा भवति"—इत्युपोद्धत्यैतदैन्द्रादेव सूक्तात् "अस्येन्द्रस्य वायोर्यथा भक्षो न विदस्यंत, तथा अन्नमेवमभिवहेयुः—इति वायुशब्दस्येन्द्रविशेषणत्वं प्रतीत्य इन्द्रप्रधानत्वात् सूक्तस्य च इन्द्र उपात्तः । तस्मादाचार्य्यस्य मध्यमपर्य्यायवचनावेतौ' शब्दाविति ॥

सत्यपि तु पर्य्यायवचनत्वे मुख्यतरः सम्बन्धो मध्यमस्येन्द्रशब्देन, तथा वायुवरुणेन्द्रादिभिः । तत् कुतः ? तथा निगमे दर्शनात्,—"सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः । स प्रथमो बृहस्पतिश्चिकित्वांस्तस्मा ३ इन्द्राय सुतमाजुहोत स्वाहा"—इति । सा प्रथमा संस्कृतिरित्येतस्मिञ्छुक्रामन्थिनोहवनमन्त्रे यो मध्यमो वरुणोऽपि मित्रोऽग्निः, तस्मै इन्द्राय सुतम् आजुहोत इति वरुणादीन्यनुक्रम्य विशेषतश्चतुर्थ्यन्तेन इन्द्रशब्देन सम्प्रदानेन सम्बध्नाति तस्मै मध्यमायेन्द्रायेति, तस्मात् सम्प्रदानेन सामानाधिकरण्यात् मन्त्रान्ते मध्यमशब्देन्द्रशब्दयोर्मुख्यतरः सम्बन्ध इति गम्यते, यथा मध्यमस्य ज्योतिषो मुख्यः सम्बन्ध इन्द्रशब्देन, तथेतरयोरपि पार्थिवोत्तमयोरग्निसूर्य्यशब्दाभ्याम्, प्रसिद्धतरत्वात् सम्बन्धस्य, न तथेतरैर्जातवेदःप्रभृतिभिः । सति च गौणमुख्यत्वे युक्तं यदग्न्यभिधानेन प्रसिद्धतरसम्बन्धेन पार्थिवस्य ज्योतिष उपदेशः क्रियते, न जातवेदः-प्रभृतिभिः, तथोत्तमस्य सूर्य्यशब्देन क्रियते, न सवितृभगप्रभृतिभिरिति ॥

कस्मात् पुनर्मध्यमस्य शब्दद्वयेनोपदेशः क्रियते, पार्थिवोत्तमयोरेकैकेन ? इति । मध्यमस्य हि द्वौ कर्मात्मानौ विद्युद्वाय्वाख्यौ । तयोरनित्यदर्शन एको विद्युदाख्यः, नित्यदर्शनस्तु वाय्वाख्यः त्वगिन्द्रियप्रत्यक्षः । तत् कथं नाम त्रिष्वपि स्थानेष्वभिमानिन्यो देवताः कर्मात्मभिरवैषम्येण प्रत्यक्षत एवोपदिष्टाः स्युः ? इत्यतः "वायुर्मध्यमस्थानः"—इति वाय्वाख्येन कर्मात्मना मध्यमस्थानमुद्दिश्यामुख्यत्वाद् वाय्वभिधानस्य, मुख्यत्वाच्चैन्द्राभिधानस्य "इन्द्रो वा"—इत्याह । एवमुभयं कृतं भविष्यति,—अनुपरतक्रियाव्यापारता च मध्यमस्य वाय्वाख्येन कर्मात्मना इतरज्योतिर्विदर्शिता भविष्यति, मुख्येन चेन्द्रशब्देन मुख्यः सम्बन्धोऽपरिहापितो भविष्यतीत्युभयमुक्तम्,-"वायुर्वेन्द्रो वान्तरिक्षस्थानः"—इति । न तु पार्थिवोत्तमयोर्द्वौ द्वौ कर्मात्मानौ स्तो यथा मध्यमस्थानस्य, तस्माददोषो मध्यमस्याभिधानद्वयोक्ताविति ॥

आह,—यदिदमभिधानबहुत्वं जातवेदो वैश्वानर इत्येमादि, त्रित्वे सत्येतत् किं कृतम् ? इति । उच्यते,—"तासां माहाभाग्यात् एकैकस्या अपि बहूनि नामधेयानि भवन्ति" । तासामेव तिसृणामग्न्यादीनां माहाभाग्यात् ऐश्वर्य्ययोगात् एकात्मानमनेकधा विकुर्वतीनाम् एकैकस्याः प्रतिविकारं जातवेदः, वैश्वानरः, वरुणः, रुद्रः, अश्विनौ, उषा इत्येवमादीनि बहूनि नामधेयानि भवन्ति, प्रतिस्थानं स्वप्नकृत्यभेदादेकात्म्यवदेवैकत्वं न जहाति सा सा देवतेति ॥

"अपि वा कर्मपृथक्त्वा" । अपि चैवं विकरणधर्मित्वादभिन्नप्रकृतीनां बहुनामता । अपि वा स्वं स्वमात्मानमविकुर्वतीनामेवानेककर्मयोगात् पृथक्कर्महेतुको नामधेयलाभः स्यात् । को दृष्टान्तः ? "यथा"—होता, अध्वर्य्युः, ब्रह्मा, उद्गाता,—इति अपि एकस्य सतः" कुण्डपायिनामयने । तत्र हि सप्त दीक्षन्ते, त एव च स्वयं कर्म कुर्वते, तेषां षट्, षोडशानां पर्य्ययेण कर्म कुर्वते, तत् कर्म कुर्वाणाः तदाख्या भवन्ति,—न किञ्चिदप्यत्र गौणमभिधानम्, संविज्ञानपदत्वे त्वग्न्यादीनां

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

संज्ञाशब्दानां तेषां कारकादिशब्दैरेष विशेषो यदग्रनयनादिगुणयोगेऽप्यसति नाग्न्यादीन् जहति, कारकादिशब्दास्तु करणादियोगसमनन्तरमेव कारकादीन् जहति । एवमेतदगौणत्वमभिधानानामपेक्ष्योक्तम्,—"अपि वा कर्मपृथक्त्वा"—इति अपि वैश्वर्य्यादुभयथापि शक्यप्रतीघात उपपद्यत एकैकस्या अपि बहुनामतेति ॥

अपि वा पृथगेव स्युः पृथग्घि स्तुतयो भवन्ति" । अपि चैवं यथोक्तमेकैकस्या महाभाग्यात् कर्मपृथक्त्वाद्वा बहुनामता । अपि वा पृथक् पृथक् अत्यन्तभिन्ना एवौत्पत्तिकेन भेदेन स्युरिति याज्ञिका आहुः,—"पृथक् हि स्तुतयो भवन्ति"—इति । कुत एतत् याज्ञिका आहुः ? इति । अधियज्ञे हि स्तुतिनियमो भवत्यभिधाननियमश्चेति । अधियज्ञमिति व्यांख्येयम्,—"पृथग्घि स्तुतयो भवन्ति"—इति । हीति हेतौ, यस्मात् पृथक् पृथक् अग्न्यादीनां स्तुतयो भवन्ति ।—पृथगग्नेः—"अ॒ग्निमी॑ळे"—इत्येवमाद्याः—इति । ऋ० सं० १, १, १, १) । पृथग् जातवेदसः—अग्निलिङ्गं सूक्तम् "प्र नू॒नं जा॒तवे॑दसम्"—इति (ऋ० सं० ८, ८, ४६, १) । पृथगिन्द्रस्य—"हरिभ्याम्" पृथग्वायोः—"नियुद्भिः" पृथक् सूर्य्यस्य—हरिद्भिः, पूष्णोऽजाभिः, अरुणाभिर्गोभिरुषसाम् । स्तुतिव्यवहारे च प्रायश्चित्तम्, तदनुपपन्नश्च पर्य्यायवचनत्वे तेषाम् । ते वयं स्तुतिनियमात् पश्यामः पृथक् पृथगग्निवैश्वानर प्रभृतय इति ॥

"तथाभिधानानि" । यथैव हि स्तुतिभेदात् स्तुत्यभेदः, एवमेवाभिधानभेदादभिधेयभेदोऽपि भवितुमर्हति । प्रसिद्धतरं चेदं लोके प्रत्यभिधानमर्थभेद इति, न तथैकस्यानेकाभिधानता । तस्मात् पृथक् पृथगग्निजातवेदोवैश्वानरादिशब्दानामभिधेया इति स्थितिः । स्तुतिष्वेव हि अभिधानभेदत इति समानार्थता हेत्वोः ? इति चेत्, न, विधावप्यभिधाननियमदर्शनात्,—"आग्नेयमष्टाकपालं निर्वपेत्" इति येनैवाभिधानेन चोद्यते, तेनैव निर्वपणादारभ्य समाप्यते, तस्मादसमानार्थतेति ॥

"यथो एतत्" यत् पुनरेतदुक्तम् "कर्मपृथक्त्वादिति" । अनैकान्तिक एष दृष्टान्तः, दृष्टो हि प्रकृतिभेदात् प्रतिकर्मभेदः, सा च पृथक्त्वादिव्यवस्था माहाभाग्यादित्याचार्येणात्र पृथक्त्वे हेतुर्न प्रयुक्तः, दृष्ट एव हि याज्ञिकपक्षे प्रत्यभिधानमर्थभेद इति । तत् किमेकत्वं नास्त्येव ? तन्नास्ति, गुणतः ॥

कथम् ? "तत्र संस्थानैकत्वं सम्भोगैकत्वं च उपेक्षितव्यम्" । तत्र तस्मिन् पृथक्त्वे सति संस्थानैकत्वं सम्भोगैकत्वं च उपपत्तित ईक्षितव्यम् । तत्र दृष्टान्तः,—"यथा पृथिव्यां मनुष्याः पशवो देवा इति स्थानैकत्वम्, सम्भोगैकत्वं दृश्यते" । सह स्थानतया एकत्वं स्थानैकत्वम्, पृथिवीत्युक्ते यावतां सह भावेन समानं स्थानम्, ते सर्वे तद्ग्रहणेन गृह्यन्ते, एवमुत्तरयोरपि स्थानयोः । एवम्प्रकारमेकत्वं सम्भोगैकत्वं चोपेक्षितव्यम् । सम्भोगहेतुकमेकत्वं सम्भोगैकत्वम् । सम्भोगो नाम इतरेतरोपकारित्वम्, समानकार्य्यतेत्यर्थः । तच्च पुनर्भिन्नस्थानानामपि भवति, किमङ्ग पुनः समानख्यानानामिति । "यथा पृथिव्याः पर्जन्येन च, वाय्वादित्याभ्यां च सम्भोगः" । कथम् ? पृथिव्योषध्युत्पत्तौ स्वकार्य्यारम्भे पर्जन्यवाय्वादित्यकृतमुपकारमपेक्षते । तदुक्तम्,—"त्रयस्तपन्ति पृथि॒वीम॑नू॒पाः"—इति । (ऋ० सं० ७, ७, १९, ३) । "अग्निना चः इतरस्य लोकस्य" । तदप्युक्तम्,—"अग्निर्वा इतो वृष्टिं समीरति, "दिवं जिन्वन्त्य॒ग्नयः॑"—इति च (ऋ० सं० २, ३, २३, ५) । तदेवम्प्रकारमेकत्वं कार्य्यैकत्वात् स्थानैकत्वाद्वा भाक्तं न प्रतिषिध्यते, लोकेऽपि समानकार्य्यता भवति येषां तेषामैक्यमित्युच्यते ॥

कः पुनरत्राविरोधी भेदाभेदे दृष्टान्तः ? इति । उभये हि प्रमाणं भेदाभेदवादिनः—आत्मविन्नैरुक्तयाज्ञिकाः, न हि ते स्वमनीषिकया भेदाभेदौ प्रकल्पयन्ति, किन्तर्हि ? मन्त्रार्थमुद्दिश्य । तस्माद् वक्तव्यः समञ्जसो दृष्टान्तः ? उच्यते,—"तत्र एतत् नरराष्ट्रम् इव" । यथा राष्ट्रमित्यभेदः, नरा इति भेदः, एवं पृथिव्यग्निरित्यभेदः, जातवेदा वैश्वानर इति भेदः । एवमुत्तरयोरपि स्थानयोः । तथा आत्मेत्यभेदः, लोकाश्च लोकिनश्चेति भेदः । सर्वत्रैव सामान्यविशेषधर्मौ द्रष्टव्यः । पुरुषबुद्ध्यपेक्षातश्च गुणप्रधानतोऽपेक्षा पुरुषानुरागविशेषतः ॥

तत्रैवं सति आत्मविद आत्मनि त्रित्वनानात्वे गुणीकृत्य तदङ्गप्रत्यङ्गभावेन कल्पयित्वैकमात्मनं पश्यन्ति । तथा नानात्वैकत्वे नैरुक्ता इति त्रित्वे, तथा त्रित्वैकत्वे याज्ञिका नानात्वे । एवमेषामविरोधः । अस्ति हि शब्दार्थयोः वक्तृप्रतिवक्तृवशेन तद्बुद्ध्यपेक्षया अन्वयव्यतिरेकाभ्यां वर्त्तितुं शक्तिः, न तु स्वाभाविकमभिधानाभिधेयसम्बन्धमकृतकमप्रच्यवमानावभिधानाभिधेयौ जहीताम्, न ह्यग्नेरवभास्यं प्रत्यवभासनशक्तिः, अवभास्यस्य चावभास्यमानता शक्तिर्व्यवधानमन्तरेण विहन्यते, न ह्यकृतकं स्वयमप्यर्धातको विकल्पते । वैदिकानां पदवाक्यप्रमाणानामात्मभावानुशयवशेनात्मविन्नैरुक्तयाज्ञिका वेदस्याविपर्य्यासिनीमप्यध्यात्माधिदैवाधियज्ञविषयनियतामर्थाभिधानशक्तिं विपर्य्यासिनीमिव मन्यमाना परस्परतो विपर्य्यस्यन्ते । तदेतत् सर्वथापि भेदाभेदवर्त्ति देवतासतत्त्वं

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

यथाग्रहं वक्तृप्रतिवक्तृवशेन प्रख्यातिमुपानयत् । स्तुतिरूपकेणात्मनोऽर्थसतत्वं तथाभूतं मन्त्रैराविष्क्रियते । तदुक्तम्,—"तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति, दर्शितश्चैतन्मन्त्रेण,—"न त्वं युयुत्से"—इति । निष्ठितरूपत्वेन स्वे स्वे विषयेऽध्यात्मादौ परमार्थतया ऐकात्म्ये निष्ठा, तदन्तत्वात् वाचः । तदुक्तम्,—"यतो वाचो निवर्त्तन्ते"—इति ॥ १ ॥

6. (અનુ.) 'ત્રણ જ દેવતા છે' એવો નૈરુકતોનો મત છે. જેમ કે, ૧. પૃથિવી સ્થાનનો દેવતા અગ્નિ છે. ૨. અન્તરિક્ષ સ્થાનનો દેવતા વાયુ કે ઇન્દ્ર છે અને ૩. દ્યુસ્થાનનો દેવતા સૂર્ય છે. આ દેવતાઓના મહા-ઐશ્વર્યને કારણે એક-એક દેવતાનાં ઘણાં નામો હોય છે, (જેમ કે, અગ્નિ દેવતાના જાતવેદસ્ વૈશ્વાનર વગેરે નામાન્તરો છે.)

અથવા તો કર્મપૃથક્ત્વને કારણે (એક) દેવતાનાં ઘણાં નામો હોય છે. જેવી રીતે એક જ ઋત્વિજ્‌ને હોતા, અધ્વર્યુ, બ્રહ્મા કે ઉદ્‌ગાતા કહેવામાં આવે છે. (અર્થાત્ એક જ આત્મા જુદા જુદા નામે બધે વિલસી રહ્યો છે.)

(યાજ્ઞિકોના મતે એક કે ત્રણ જ દેવતાઓ નથી, પરંતુ અનેક છે. આથી તેઓ કહે છે કે-) બધા દેવતાઓ પરસ્પરથી પૃથક્ જ છે એમ માનવું જોઈએ. કેમ કે ૧. પૃથક્ પૃથક્ સ્તુતિઓ જોવા મળે છે અને ૨. એ જ પ્રમાણે, તે દરેકનાં અભિધાનો (નામ) પણ પૃથક્ પૃથક્ છે.

(ત્રણ દેવતા, એક દેવતા અને અનેક દેવતા—એવા ઉપર્યુક્ત ત્રણે મતોની સમાનાર્થતાનું હવે નિરૂપણ કરવામાં આવે છે :—)

અગાઉ જે કહ્યું છે કે 'કર્મપૃથક્ત્વને કારણે તે દેવતાનાં ઘણાં નામો છે' એ સંદર્ભમાં જણાવવાનું કે ઘણી વ્યક્તિઓ પણ (ઘણાં કર્મોનું) વિભાજન કરીને (અનેક) કર્મો કરી શકે છે. (અર્થાત્ અનેક દેવતાઓ પણ હોઈ શકે અને તે દરેક જુદાં જુદાં અનેક કર્મો કરી શકે. આ જોતાં એવું માનવું પડે કે દેવતા એક નથી, પણ એકથી વધારે છે.) અહીં (એક દેવતા, ત્રણ દેવતા અને અનેક દેવતા—એ ત્રણેય પક્ષમાં) સંસ્થાનૈકત્વ અને સંભોગૈકત્વને સૂક્ષ્મ દૃષ્ટિએ જોવું જોઈએ. જેવી રીતે પૃથિવીસ્થાનમાં મનુષ્યો, પશુઓ અને (અગ્નિ જેવા) દેવોનું (સમાન સ્થાનની દૃષ્ટિએ) સ્થાનૈકત્વ છે અને સંભોગૈકત્વ (ઇતરેતરોપકારિત્વ) છે એવું જોવા મળે છે. તેવી જ રીતે (બીજા બે દ્યુલોક અને અન્તરિક્ષલોકને વિશે સંસ્થાનૈકત્વ અને સંભોગૈકત્વને જાણવું, જેમ કે) પૃથિવીસ્થાનનો પર્જન્ય અને વાયુ-આદિત્યની સાથે સંભોગ જોવા મળે છે અને બીજા લોકનો અગ્નિની સાથે (અન્ય દેવતાઓનો) સંભોગ જોવા મળે છે. આ (ભેદાભેદનું દર્શન) 'નરરાષ્ટ્ર' જેવું છે.

6. (વિમર્શ) 'અદેવતાની દેવતાવત્ સ્તુતિ થાય છે' એવા પૂર્વોક્ત-કથનની ચર્ચાને અન્તે જણાવ્યું હતું કે દેવતાના મહા-ઐશ્વર્યને કારણે એક જ આત્માની અનેક રીતે સ્તુતિ થાય છે. (आत्मैवेदं सर्वम् । अथातो विभूतयोऽस्य पुरुषस्य ।) વગેરે શ્રુતિઓથી સિદ્ધ થતા એકાત્મવાદને આધારે કહી શકાય છે કે અશ્વ-રથાદિની સ્તુતિ અનર્થક નથી. આ બ્રહ્માંડમાં જો એક આત્મા જ વિલસી રહ્યો હોય તો કોઈને અદેવતા કહી શકાશે જ નહીં. આ સંદર્ભમાં જ કહ્યું છે કે महाभाग्याद्देवताया एक आत्मा बहुधा स्तूयते । આમ વેદમાં આ આત્માની જ અશ્વ-રથાદિ રૂપે સ્તુતિ થઈ છે.) એકાત્મવાદ (અદ્વૈત-પક્ષ)નું અવલમ્બન કરીને આ સમાધાન કર્યું છે એમ કહી શકાય. હવે आत्मयाजी श्रेयान् देवयाजी वा । એવો પ્રશ્ન કરવામાં આવે તો આત્મવિદ્ લોકો આત્મયાજીને જ શ્રેષ્ઠ કહે. પરંતુ દેવયાજીને શ્રેષ્ઠ કહેનારા લોકો પણ હોઈ શકે. એ દૃષ્ટિએ અહીં વિચારવાનું પ્રાપ્ત થાય છે કે દેવતાઓ કેટલા ? દેવતા એક છે, ત્રણ છે કે અનેક છે ?

(क) નૈરુકતોના મતે ત્રણ દેવતાઓ છે. (દેવતાઓની સંખ્યા વિશે ઋગ્વેદમાં અનેક ઉલ્લેખો મળે છે. દા.ત. अ. દેવતાઓ ૩૩ છે (૩/૬/૯), આ. દેવતાઓ ૩૩૩૯ છે (૧/૪૫/૨, ૮/૩૫/૩). શતપથ બ્રાહ્મણમાં દેવતાઓ ૩૩૩૩ છે એમ કહ્યું છે. જો કે આ દેવતાઓ કયા કયા અને તેમનું સ્વરૂપ વગેરે શું છે તે દર્શાવ્યું નથી. ઐતરેય બ્રાહ્મણ મુજબ ૩૩ + ૧ દેવતાઓ છે : તેમાં ૮ વસુ, ૧૧ રુદ્ર, ૧૨ આદિત્ય, ૧ દ્યૌ અને ૧ પૃથિવી + ૧ પ્રજાપતિને ગણવામાં આવ્યાં છે.—વિશેષ જિજ્ઞાસુએ પં. શિવનારાયણ શાસ્ત્રીનું "નિરુક્ત-મીમાંસા" પુસ્તક જોવું.) પૃથિવીસ્થાનનો દેવતા અગ્નિ છે, અન્તરિક્ષસ્થાનનો દેવતા વાયુ કે ઇન્દ્ર છે અને દ્યુસ્થાનનો દેવતા ~~ઇન્દ્ર છે~~. યાસ્કે સ્થાનભેદે દેવતાઓની સંખ્યાનું નિર્ધારણ કર્યું હોય એવું લાગે છે. નિઘંટુના દૈવતકાણ્ડ (પંચમ અધ્યાય)માં દેવતાઓનાં ૧૫૧ નામોની યાદી છે. આ બધા દેવતાઓને પૃથિવી આદિ ત્રણ સ્થાનોમાં વિભક્ત કરવામાં આવ્યા છે. આ ત્રણેય સ્થાનોનો એક એક મુખ્ય દેવતા છે અને અન્ય દેવતાઓ તેમના વિવિધ રૂપો છે એમ માની શકાય. આને આધારે યાસ્કે 'દેવતાઓ ત્રણ જ છે' એવો મત રજૂ કર્યો છે.

અહીં પ્રથમ વિચારણીય મુદ્દો એ છે કે મધ્યમ (અન્તરિક્ષ) સ્થાનીય દેવતા 'વાયુ કે ઇન્દ્ર છે' એવું જે કહ્યું છે તેનો શો અર્થ

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

કરવો ? અર્થાત્ એ બે શબ્દો શું પર્યાયવાચી છે ? કે અલગ અલગ દેવતાનાં નામો છે ? (જો અલગ અલગ દેવતાનાં નામો હોય તો દેવતાની સંખ્યા ત્રણને બદલે ચાર થઈ જશે.) આવો સંદેહ થવાનું કારણ એ છે કે 'અભિધાનભેદે અર્થભેદ જોવા મળે છે. જેમ કે, ગૌ, અશ્વ વગેરે અને ક્યારેક અભિધાનભેદે એકાર્થકતા પણ જોવા મળે છે. જેમ કે, હસ્ત = કર = પાણિ વગેરે. અહીં યાજ્ઞિકોના (કે જેઓ અનેક દેવતાવાદમાં માને છે તેમના) મતે દેવતાઓની સંખ્યા ચાર ગણી લેવામાં આવે તો વાંધો ઊભો થતો નથી, પરંતુ નૈરુક્તોના મતે ત્રણને બદલે ચાર દેવતા ગણવામાં આવશે તો આપત્તિ ઊભી થશે. આથી 'અન્તરિક્ષસ્થાનનો દેવતા વાયુ કે ઇન્દ્ર છે' એ વિધાનની સંગતિ વિચારવી પડશે. વાયુ અને ઇન્દ્ર શબ્દમાં જો અર્થભેદ લઈશું તો અર્થાત્ બન્નેને અલગ અલગ દેવતા માનીશું તો યાસ્કે 'ત્રણ જ દેવતાઓ છે' એવી જે પ્રતિજ્ઞા કરી છે તે ખંડિત થશે. બીજું, ભેદ વિવક્ષિત હોત તો अन्तरिक्षस्थानः એવો એકવચન નિર્દેશ ન કર્યો હોત. (અર્થાત્ તેમનાં જુદાં જુદાં સ્થાન બતાવ્યાં હોત). ત્રીજું, નિરુ. ૧૦/૩/૧માં યાસ્કે નિર્દેશ્યું છે કે વાયુ શબ્દ ઇન્દ્રનું વિશેષણ છે. આથી વાયુ અને ઇન્દ્ર શબ્દ પરસ્પરના પર્યાય છે એવું સાબિત થાય છે. આ રીતે નૈરુક્તોના મતે ત્રણ જ દેવતા છે એ મત ઉપસ્થિત થાય છે. [અહીં કોઈને પ્રશ્ન થાય કે પૃથિવી અને ઉત્તમ સ્થાનના દેવતાઓનો એક એક શબ્દથી ઉલ્લેખ કર્યો અને મધ્યમ (અન્તરિક્ષ) સ્થાનના દેવતાનો બે શબ્દથી નિર્દેશ કેમ કર્યો છે ? તો- મધ્યમ સ્થાનના દેવતાના બે કાર્યાત્મા છે : વિદ્યુત્ અને વાયુ. આમાંથી અનિત્ય દર્શનવાળો કર્માત્મા વિદ્યુદાખ્ય છે અને (ત્વગિન્દ્રિયથી પ્રત્યક્ષ એવો) નિત્ય દર્શનવાળો કર્માત્મા વાય્વાખ્ય છે.]

(ખ) 'એક જ દેવતા છે' એવું એકાત્મવાદીઓનું માનવું છે. આ એક દેવતા કોણ એ વિશે જો કે મતમતાંતર પ્રવર્તે છે. જેમ કે, ૧. યાસ્ક અને શાકપૂણિ જેવા આચાર્યો अग्निर्वै सर्वा देवताः । બધા દેવતાઓ એક અગ્નિદેવની જ વિભૂતિઓ છે એમ માને છે. (નિ. ૭/૨૭/૨૯). ૨. બૃહદ્દેવતાના કર્તા શૌનક માને છે કે સૂર્ય જ એક પ્રધાનદેવતા છે (બૃ. દે. ૧/૬૧-૬૩.) ૩. હિરણ્યગર્ભ સૂક્ત (ઋ. સં. ૧૦/૧૨૧)ને આધારે પ્રજાપતિને જ એક પરમાત્મા રૂપે સ્વીકારવા એવો પણ કેટલાકનો મત છે.

ઉપર (ક)માં નૈરુક્તના મતે ત્રણ દેવતાઓ છે એ જોયું. તેઓના મતે આ દેવતાઓના ઐશ્વર્યને કારણે એક એક દેવતાનાં ઘણાં નામો હોઈ શકે છે. જેમ કે, અગ્નિ દેવતાના જાતવેદસ્, વૈશ્વાનર વગેરે નામાન્તરો છે. આની સામે એકાત્મવાદીઓ કહે છે કે अपि वा कर्मपृथक्त्वाद्यथा होता...एकस्य सतः । અર્થાત્ જેવી રીતે કોઈ યજ્ઞમાં એક વ્યક્તિ હોતા બને છે તો બીજા યજ્ઞમાં એ જ વ્યક્તિ બીજા પ્રકારનું કામ કરવાથી ઉદ્ગાતા પણ બની શકે છે. અહીં વ્યક્તિ એકની એક હોવા છતાંય કર્મો જુદા પ્રકારનાં કરવાથી જુદાં જુદાં નામે સંબોધાય છે તેવી રીતે દેવતા પણ એક જ હોવા છતાંય જુદાં જુદાં કર્મો કરવાને કારણે જુદાં જુદાં નામે સંબોધાય છે, પરંતુ વાસ્તવમાં તો એક જ દેવતા હોય છે.

કેટલાક વિદ્વાનોએ આ દલીલનો પૂર્વવાક્યની સાથે અન્વય કર્યો છે. એટલે કે નૈરુક્તોના મતે ત્રણ જ દેવતા છે અને તેમનાં જાતવેદસ્ વગેરે જે નામાન્તરો છે એનું એક કારણ જેમ મહા-ઐશ્વર્ય છે એમ કર્મપૃથક્ત્વ એ બીજું કારણ છે, પરંતુ ત્રણ દેવતા, એકદેવતા અને અનેક દેવતા-એવા ત્રિવિધ મતોના ઉપસ્થાપન પછી तत्र संस्थानैकत्वम् વગેરેથી એ ત્રણેય મતોની સમાનાર્થતા દર્શાવનારું સમાધાન વાક્ય આવે એવી સંગતિ વિચારવી યુક્તિયુક્ત લાગે છે. જો આવું નહીં માનીએ તો 'એક દેવતા'વાળો પક્ષ ઉપસ્થિત જ નહીં થાય.

(ગ) હવે દેવતાઓ ત્રણથી વધારે એટલે કે અનેક છે એવો યાજ્ઞિકોનો મત જોઈશું : દેવતા એક કે ત્રણ નથી, પણ અનેક છે. અર્થાત્ અગ્નિ, જાતવેદસ્, વૈશ્વાનર વગેરે પૃથક્ પૃથક્ દેવતાઓ છે. આને 'અનેક દેવતાવાદ' કહે છે. આ મતના સમર્થનમાં બે કારણો રજૂ કરવામાં આવ્યાં છે : ૧. पृथग् हि स्तुतयो भवन्ति । (અહીં हि હેતુ અર્થમાં પ્રયોજાયો છે એમ દુર્ગ કહે છે.) 'દરેક દેવતાની અલગ અલગ સ્તુતિ કરવામાં આવી છે.' એટલે કે 'અગ્નિ' શબ્દથી જે દેવતાની સ્તુતિ થાય છે તે શબ્દથી જાતવેદસ્‌ની સ્તુતિ થઈ શકતી નથી. દા. ત. अग्निमीळे વગેરેથી અગ્નિની જ સ્તુતિ થાય, જાતવેદસ્‌ની નહીં. અને प्रनूनं जातवेदसम् વગેરેથી જાતવેદસ્‌ની જ સ્તુતિ થાય, અગ્નિ કે વૈશ્વાનરની નહીં. અહીં સ્તુતિભેદે સ્તુત્યભેદ માનવામાં આવ્યો છે. ૨. એ જ પ્રમાણે, દરેક દેવતાના અભિધાનો અલગ અલગ જોવા મળે છે. અર્થાત્ અભિધાનભેદે અભિધેયભેદ માનવામાં આવ્યો છે. અર્થાત્ જાતવેદસ્ એવા નામથી જે દેવતાને સંબોધવામાં આવે છે, તે 'અગ્નિ' એવા અભિધાનથી સંબોધાતા દેવતા કરતાં જુદો છે. આમ અગ્નિ, જાતવેદસ્, વૈશ્વાનર વગેરે દેવતાઓ પૃથગ્ પૃથગ્ સાબિત થતાં અનેક દેવતાઓ છે એમ નક્કી થાય છે.

યાસ્કે આ ત્રણેય મતોની સમાનાર્થતા નિરૂપતાં જણાવ્યું છે કે કર્મપૃથક્ત્વને કારણે એક જ ઋત્વિજ્ હોતા, ઉદ્ગાતા વગેરે જુદાં જુદાં નામે સંબોધાય છે, પણ વાસ્તવમાં તે ઋત્વિજ્ એક જ છે, એમ દેવતા પણ એક જ છે (ત્રણ કે અનેક નથી)'' એવું જે અગાઉ કહ્યું છે તે અનૈકાન્તિક (unsteady) દૃષ્ટાન્ત છે. કેમ કે સામે પક્ષે એવું પણ ઉદાહરણ મળે છે કે ઘણાં કાર્યો ઘણી

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

વ્યક્તિઓ પરસ્પરમાં વહેંચીને કરે છે. (એક જ વ્યક્તિ જેમ અનેક કર્મો કરી શકે એમ જુદાં જુદાં અનેક કાર્યો અનેક વ્યક્તિઓ કરી શકે છે.) આથી એક જ નહીં, પણ એકથી વધારે દેવતાઓ છે એમ સાબિત થઈ શકે છે.

આચાર્ય યાસ્કે અગાઉ મહા-ઐશ્વર્યને એક જ દેવતાના દા.ત. અગ્નિના 'જાતવેદસ્, વૈશ્વાનર વગેરે નામો હોય છે' એમ કહ્યું છે ત્યાં અગ્નિ ઇન્દ્રથી કેવી રીતે પૃથક્ છે ? અથવા તો ઇન્દ્રથી સૂર્ય કેવી રીતે પૃથક્ છે ? એ જણાવ્યું ન હતું. એ દેવતાઓ વચ્ચેના પૃથક્ત્વનો હેતુ ઉપરની (बह्व्योऽपि विभज्य कर्माणि कुर्युः) ચર્ચામાં રજૂ કરવામાં આવ્યો છે. યાજ્ઞિકોના પક્ષે તો અભિધાનભેદે અર્થભેદ ઇષ્ટ છે જ; અર્થાત્ એકથી વધારે દેવતાઓ છે એમ તેમના મતે માનવામાં આવે જ છે. અહીં 'એકથી વધારે' એટલે નૈરુક્તોના મતે ત્રણ દેવતાઓ અને યાજ્ઞિકોના મતે અનેક (ત્રણથી વધારે) દેવતાઓ છે એમ સમજવું.

પરંતુ હવે પ્રશ્ન થશે કે તો શું દેવતા(ઓ)ની બાબતમાં એકત્વ નથી ? એકત્વ તો છે. પરંતુ એ એકત્વ ગૌણ છે. આ ગૌણત્વ કેવી રીતનું છે એને સમજાવવા યાસ્ક तत्र संस्थानैकत्वं सम्भोगैकत्वं च उपेक्षितव्यम् । ની ચર્ચા શરૂ કરે છે : દેવતાઓની બાબતમાં સ્થાનૈકત્વ અને સંભોગૈકત્વનો વિચાર કરવો જોઈએ. જેવી રીતે પૃથિવીસ્થાનમાં મનુષ્યો, પશુઓ અને અગ્નિ જેવા દેવો નિવાસ કરે છે એ જોતાં તેમનું સમાન સ્થાનત્વ ગણાય. આને જ 'સ્થાનૈકત્વ' કહે છે. હવે સંભોગૈકત્વ એટલે ઇતરેતરને ઉપકાર કરવો અથવા સમાન કાર્યો કરવાં. (सहस्थानतया एकत्वं स्थानैकत्वं, पृथिवीत्युक्ते यावतां सहभावेन समानं स्थानम् ते सर्वे तद्ग्रहणेन गृह्यन्ते, एवमुत्तरयोरपि स्थानयोः ॥....सम्भोगो नाम इतरेतरोपकारित्वं, समान कार्यतेत्यर्थः ॥ (दुर्गः) આવું સંભોગૈકત્વ જુદા જુદા સ્થાનમાં રહેતા દેવો વચ્ચે પણ હોઈ શકે. જેમકે પૃથિવીને ઔષધિની ઉત્પત્તિ કરતી વખતે પર્જન્ય, વાયુ, આદિત્ય વગેરેના ઉપકારની જરૂર રહે છે. લોકમાં પણ જેમની વચ્ચે સમાનકાર્યતા જોવા મળે છે તેમની વચ્ચે 'ઐક્ય' છે એવું કહેવાય છે. આમ બધા દેવતાઓ વ્યક્તિગત રીતે એકથી વધારે છે, પરંતુ સ્થાનૈકત્વ અને સંભોગૈકત્વની દષ્ટિએ (અર્થાત્ ગૌણ રૂપે) તેઓમાં એકત્વ છે એમ પણ કહી શકશે. અહીં કોઈને પ્રશ્ન થાય કે દેવતાઓમાં એકત્વ પણ હોય અને અનેકત્વ પણ હોય એ કેવી રીતે શક્ય છે ? તો યાસ્ક આના સમર્થનમાં એક મુદ્દો ઉમેરે છે કે દેવતાઓની બાબતમાં આ ભેદાભેદનું દર્શન (વ્યક્તિગત રીતે એકથી વધારે અને સ્થાનૈકત્વાદિની દષ્ટિએ અભેદનું દર્શન) "નરરાષ્ટ્ર" જેવું છે. 'રાષ્ટ્ર' એમ કહેવાથી અભેદની પ્રતીતિ થાય છે અને 'માણસો' એમ કહેવાથી ભેદની પ્રતીતિ થાય છે. એટલે કે માણસો એક-એક વ્યક્તિ તરીકે જુદા જુદા (અને અનેક) છે, પરંતુ રાષ્ટ્ર તરીકે એક છે. એવી રીતે 'પૃથિવી સ્થાનનો અગ્નિ' એમ કહેવાથી અભેદ સમજવાનો છે અને 'જાતવેદસ્', 'વૈશ્વાનર' એમ કહેવાથી ભેદ સમજવાનો છે. આ જ રીતે બીજા બે સ્થાનના દેવતા વિશે જાણવું. અહીં ભેદવાદીઓ (નૈરુક્તો અને યાજ્ઞિકો) તથા અભેદવાદી (આત્મવિદ્ લોકો) એ બન્ને પ્રમાણ છે. અર્થાત્ તેમના મતો એક સમાનાર્થનું જ નિરૂપણ કરનારા છે. આ સમગ્ર ચર્ચાનો સાર એટલો જ કે વ્યક્તિત્વની દષ્ટિએ દેવતાઓ અનેક છે, સ્થાનવિશેષમાં નિવાસ કરનારની દષ્ટિએ ત્રણ છે અને દેવતાત્માની દષ્ટિએ એક છે.

---

7. अथ आकारचिन्तनं देवतानाम् । पुरुषविधाः स्युः इत्येकम् । चेतनावद्वत् हि स्तुतयो भवन्ति । तथा अभिधानानि । अथापि पौरुषविधिकैः अङ्गैः संस्तूयन्ते । ऋृत्वा त इन्द्र स्थविरस्य बाहू (ऋ. सं. ६/४७/८) । यत्संगृभ्णा मघवन् काशिरित्ते (ऋ. सं. ३/३०/५) । अथापि पौरुषविधिकैः द्रव्यसंयोगैः । आ द्वाभ्यां हरिभ्यामिन्द्र याहि (ऋ. सं. २/१८/४) । कल्याणीर्जाया सुरणं गृहे ते (ऋ. सं. ३/५३/६) अथापि पौरुषविधिकैः कर्मभिः । अद्धीन्द्र पिब च प्रस्थितस्य (ऋ. सं. १०/११६/७) । आश्रुत्कर्ण श्रुधी हवम् (ऋ. सं. १/१०/९) ॥

अपुरुषविधाः स्युः इत्यपरम् । अपि तु यत् दृश्यते । अपुरुषविधं तत् । यथा । अग्निः वायुः आदित्यः पृथिवी चन्द्रमाः इति । यथो एतत् । चेतनावद्वत् हि स्तुतयो भवन्ति इति । अचेतनानि अपि एवं स्तूयन्ते । यथा अक्षप्रभृतीनि ओषधिपर्यन्तानि (निघण्टु ५/३/४—२२) । यथो एतत् । पौरुषविधिकैः अङ्गैः संस्तूयन्ते इति । अचेतनेषु अपि एतत् भवति । अभि क्रन्दन्ति हरितेभिरासभिः (ऋ. सं. १०/९४/२) इति ग्रावस्तुतिः । यथो एतत् । पौरुषविधिकैः द्रव्यसंयोगैः इति । एतदपि तादृशमेव । सुखं रथं युयुजे सिन्धुरश्विनम् (ऋ. सं.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

१०/७५/९) इति नदीस्तुतिः । यथो एतत् । पौरुषविधिकैः कर्मभिः इति । एतदपि तादृशमेव । होतुश्चित्पूर्वे हविरद्यमाशत (ऋ. सं. १०/९४/२) इति ग्रावस्तुतिः एव ॥

अपि वा । उभयविधाः स्युः ॥

अपि वा पुरुषविधानाम् एव सतां कर्मात्मानः एते स्युः । यथा यज्ञो यजमानस्य । एष च आख्यानसमयः ॥

"अथाकारचिन्तनं देवतानाम्" । आह,—माहाभाग्याद् देवताया विकरणधर्मित्वादनियम आकारे, अथ नियमः ? नन्वैश्वर्य्यव्याघातान्माहाभाग्याद्देवताया इत्येतद्धचाहन्यते, तस्मादथाकारचिन्तनं देवतानामित्येतदनारम्यम् ? उच्यते,—आरम्यमेव । प्रकृतिसत्तामनपेक्ष्य विकरणं नाम देवताधर्मो नास्ति, तस्मात् प्रकृतिश्चिन्त्यते देवतायाः । अपि च, यत एवेश्वरा देवास्तत एवोभयभावित्वात् किमाकारवत्त्वं स्वभावो देवतायाः अथवा निराकारवत्त्वम् ? इति सतत्त्वपरिज्ञानाय चिन्त्यते ॥

अस्तु तावदियं चिन्ता, किमिदमविशेषेण पक्षत्रयमस्याश्चिन्ताया विषयः, उत वा कस्मिंश्चिदेवैकस्मिन् पक्षे द्वयोर्वैतच्चिन्त्यते ? इति ॥

इह तावदात्मविदामेक आत्मा स प्राग्विकारापत्तेः सन्मात्र उदस्तसर्वाकृतिः, सर्गस्थित्योरुपात्तसर्वाकृतिः, तदेवमसावनाकृतिः, सर्वाकृतिर्वा ? इत्यनास्पदभूतोऽस्याश्चिन्ताया आत्मवित्पक्षः ।

अथ पुनर्यदासावुपात्तत्रिस्थानावस्थो नैरुक्तपक्षाभिमतमग्निवायुसूर्य्यभावं बिभर्त्ति, तदापि प्रत्यक्षत्वादविषयत्वमस्याश्चिन्तायाः । प्रत्यक्षत्वात्तेषामपौरुषेयविध्यस्य तत्पक्षेऽप्याकारचिन्ता विषयाभावादुदस्यत एव ।

अथ पुनर्याज्ञिकानां ग्ग्वदभिधानं देवतापक्षवादिनाम् अग्निवायुसूर्य्याभिधानानि प्रत्यक्षार्थाभिधानसम्बन्धीनि, जातवेदोरुद्रेन्द्रपर्जन्याश्विप्रभृतीन्यप्रत्यक्षार्थाभिसम्बन्धीनि, शब्दमात्रं प्रत्यक्षम् । अभिधानानां लोके दृष्टमाकृतिपदार्थवत्त्वम्, अनाकारार्थवत्त्वञ्च, रुद्रेन्द्रादीनां शब्दानां मन्त्रगतानां लौकिकैर्मनुष्यादिशब्दैर्वात्वात्माकाशादिभिर्वाभिधानत्वं तुल्यम् ? तत्रैतद् भवति, अप्रत्यक्षत्वाद्रुद्राद्यभिधानानामर्थस्य,—किन्नु खल्वमी रुद्रादिशब्दाः मनुष्यादिशब्दवदाकारवदर्थैर्नार्थवन्तः, उत वात्वात्माकाशादिशब्दवदनाकारेण ? इति ॥

एवमयमस्याश्चिन्ताया याज्ञिकपक्षो विषयः "अपि वा पृथगेव स्युः"—इति । अतएव याज्ञिकपक्षांदनन्तरमिदमारब्धम्,—"अथाकारचिन्तनं देवानाम्"—इति ॥

किमाकारस्य चिन्त्यते,—किमस्ति उत नास्ति ? इति । यद्यस्ति कीदृशः ? इह द्विविधा आकारिणोऽर्थाः—चेतनाश्चाचेतनाश्च । तत्र चेतना मनुष्यादयः, अचेतनाश्च पाषाणादयः । तत्रैतद् भवति किममी मनुष्यादिवच्चेतना, उत पाषाणादिवदचेतना द्रव्यमात्रम् ?—इत्युपोद्धृत्य संशयः ॥

तद्व्युदासाय पक्षः परिगृह्यते,—"पुरुषविधाः स्युः इतिः एकम्"—इति । मन्त्रप्रत्ययमस्तित्वं देवताया अभ्युपगतम्,—यत्काम इत्युपक्रम्य तद्दैवतः स मन्त्रो भवतीति, सति हि देवतास्तित्वे तद्देवतत्वं मन्त्रस्य । यदि चैवमाकारोऽपि तत्प्रत्यय एव भवितुमर्हति ? अस्ति चेदं पौरुपविध्यं मन्त्रेषु देवतासम्बन्धीनि यत उच्यते,—"पुरुषविधाः स्युः इति एकम्" । मन्त्रेषु दर्शनम् इति वाक्यशेषः । 'पुरुपविधाः' पुरुषप्रकाराः, पुरुषविग्रहा इत्यर्थः ॥

कोऽत्र हेतुः ? "चेतनावद्धद्धि स्तुतयो भवन्ति" । 'हि' शब्दो हेत्वर्थः, यस्माच्चेतनावतामिवं स्तुतयो मन्त्रा अभिधायका भवन्ति । पूर्वो वतिर्मत्वर्थे, उत्तरस्तुल्यार्थे, तस्मात् पुरुषाकारविग्रहा इति ॥

ननु चैतन्यमपुरुषाकारविग्रहाणामपि गवादीनामस्ति ? न, नास्ति । न तु ये विवेकक्षमा आसन्नचेतनाः, लोकेऽपि यस्य हिताहितविवेकलक्षणं विशिष्टं संविज्ञानं न भवति, तमधिकृत्य ब्रूवते निश्चेतनोऽयमिति । एवमेते च गवादयः सत्यपि चैतन्ये आसन्नचेतनत्वान्न विदुः श्वस्तनम्, न लोकालोकाविति ज्ञायते, तस्मादचेतना इवोपेक्ष्यन्ते । पुरुषस्तु वेद श्वस्तनम्, वेद लोकालोकौ, मर्त्त्येनामृतत्वमीप्सतीति । तस्माद्धिताहितपरिज्ञानात् पौरुषविध्यस्यैव सिषाधयिषितत्वादनपेक्ष्यसामान्यं विशिष्टचैतन्यः पुरुषो नियम्यते । यथैव चेतयमाना अर्थान् पुरुषाः श्रूयन्ते, तथैव देवता अपि । तस्मात् "पुरुषविधाः स्युः"—इत्युपपन्नम् ॥

"तथाभिधानानि" यथैव पौरुषविध्यमुपपद्यते चेतनावत् सदृशस्तुतिभिः तत् प्रति ताः कारणं भवति, तथैव संवादसूक्तेषु परस्परमभिधानानि उक्तप्रत्युक्तानि सम्बद्धार्थानि परस्परतः, कयाशुभीयादिषु कुतस्त्वमिन्द्रेत्येवमादीनि तस्मात् पौरुषविध्यं देवतानाम् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अथाप्ययमपरो हेतुः पौरुषविध्ये देवतानाम्,—"पौरुषविधिकैरङ्गैः संस्तूयन्ते"। पौरुषविध्यत्वे यान्यङ्गानि, तैः संस्तूयन्ते। तद्यथा,—ऋष्वा त इन्द्र स्थविरस्य बाहू यत् सङ्गृभ्णा मघवन् काशिरित्ते" ।—

"उरुं नो लोकमनुनेषि विद्वान् सर्वज्योतिरभयं स्वस्ति। ऋष्वा त इन्द्र स्थविरस्य बाहू उपस्थेयाम् शरणा बृहन्ता ।"—इति (ऋ० सं० ४, ७, ३१, ३)। शंयोरार्षम्। त्रिष्टुप्। ऐन्द्री एकादशिन्यामिन्द्रस्य पशोर्वपाया याज्या। 'उरुं' विस्तीर्णं 'लोकं' यः त्वम् 'नः' अस्मान् 'अनुनेषि' अनुनयसि, स्वेन सुकृतेन कर्मणा गच्छतां गमनानुग्रहे वर्त्तसे। सर्वज्योतिः' आदित्यसमानं प्रकाशेन लोकम्, 'अभयम्' स्वस्ति' स्वस्त्ययनाय। तस्य 'ते' तव वयम् 'इन्द्र !' 'ऋष्वा' ऋष्वौ एतौ रेषणौ शत्रूणाम्, 'स्थविरस्य' महतः 'बाहू' हस्तौ 'बृहन्ता' बृहन्तौ महान्तौ, 'शरणा' शरणौ आश्रयणीयौ नित्यम् 'उपस्थेयाम्' उपतिष्ठेमेत्येतदाशास्महे ॥

"यत् सङ्गृभ्णा मघवन् काशिरित्ते"—इति (ऋ० सं० ३, २, १, ५)। व्याख्यातः शेषः। एवमस्मिन् मन्त्रद्वये बाहुमुष्टिसम्बन्धदर्शनात् स्तुत्यस्यैन्द्रस्य पौरुषविध्यम्, अन्यथा हि वितथाभिधानत्वं मन्त्रयोः, तथा च सत्यानर्थक्यं मन्त्राणाम्, सर्वेषां शास्त्रस्य च तदर्थलक्षणभूतस्य। तन्मा भूदित्यवश्यमेवेष्टव्यं पौरुषविध्यं देवतानामिति ॥

"अथापि" अयमप्यपरो हेतुः पौरुषविध्ये देवतानाम्—"पौरुषविधिकैः द्रव्यसंयोगैः"। तद्यथा "आ द्वाभ्यां हरिभ्यामिन्द्र याहि" "कल्याणीर्जाया सुरणं गृहे ते" ।—

"आ द्वाभ्यां हरिभ्यामिन्द्र याह्या चतुर्भिरा षड्भिर्हूयमानः। आष्टाभिर्दशभिः सोमपेयमयं सुतः सुमख मा मृधस्कः ॥"—इति (ऋ० सं० २, ६, २१, ४)। गृत्समद ऋषिः। ऐन्द्री। त्रिष्टुप्। हे भगवन् ! 'इन्द्र !' यदि तावत् तव द्वौ हरी सन्निहितौ, ततस्तावेव रथे युक्त्वा, ताभ्याम् 'हरिभ्याम्' 'आयाहि'। अथ चत्वारः ? ततस्तैः 'चतुर्भिः' अथ षट् ? ततस्तैः 'षड्भिः' 'आ' याहि। इदं 'सोमपेयं' सोमपानकर्म प्रति। किम् ? इति। एवं ब्रूमहे,—'अयं' 'सुतः' सोमोऽभिषुतः त्वदर्थम्, स त्वं हे 'सुमख' सुधन ! 'मा' केनचित् 'मृधः' संग्रामं 'कः' कार्षीः, अविलम्बितमागच्छेत्यभिप्रायः ॥

'अपाः सोममस्तमिन्द्र प्रयाहि कल्याणीर्जायाः सुरणं गृहे ते। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत ॥" —इति (ऋ० सं० ३, ३, २०, १)। विश्वामित्रस्यार्षम्। त्रिष्टुप्। हारियोजनस्यानुवाक्या। हे भगवन् ! 'इन्द्र !' 'अपाः' पीतवानसि 'सोमम्' एतस्मिन् कर्मणि। स त्वं पुनः 'अस्तं' गृहं 'प्रयाहि'। यस्मात् तव 'कल्याणीः जायाः' 'तत्र' 'बृहतः' च 'रथस्य' 'निधानं' रथशाला, 'विमोचनं' च 'वाजिनः' जित्वा संग्राममागतस्य, 'दक्षिणावत्' अन्यदपि, 'सुरणं' यद्यद्रमणीयं तत्तत्सर्वं 'ते' तव 'गृहे' वर्त्तते। तस्मात् पुनरस्तं प्रयाहि।

—एवमेतयोर्मन्त्रयोर्हरिगृहजायारथाभिसम्बन्धात् पौरुषविध्यमिन्द्रस्य, न ह्यपौरुषविध्ये सति सम्बन्धो जायादिभिरस्ति ॥

"अथापि" अयमपरो हेतुः पौरुषविध्ये। कतमः ? "पौरुषविधिकैः कर्मभिः" संस्तूयन्ते देवताः। तद्यथा,—"अद्धीन्द्र पिब च प्रस्थितस्य" "आ श्रुत्कर्ण श्रुधी हवम्"।

'इदं हविर्मघवन् तुभ्यं रातं सम्राडहृणानो गृभाय ! तुभ्यं सुतो मघवन् तुभ्यं पक्वो३ द्धीन्द्र पिब च प्रस्थितस्य ॥"—इति (ऋ० सं० ८, ६, २१, २)। अग्नियुतो नाम स्थूरपुत्रः, तस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'मघवन्' 'इन्द्र !' 'इदं' 'हविः' आज्यादिकम्, 'तुभ्यं रातम्' मनसास्माभिः निरुक्तम्, पूर्वं निर्वपणादौ संस्कारकाले। तदिदानीं हे 'सम्राट् !' 'अहृणानः' अहृणम् प्रतिगृभाय' प्रतिगृहाण। अपि च 'तुभ्यं' त्वदर्थमेवायं 'सुतः' अभिषुतः सोमः। अपि च हे 'मघवन् ! त्वदर्थमेवैषः पुरोडाश पक्वः'। स त्वम् अस्य सोमस्य 'प्रस्थितस्य' 'अद्धि पिब च' स्वभंशमिति शेषः।

"आ श्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम् ॥"—इति (ऋ० सं० १, १, १०, ३)। मधुच्छन्दस आर्षम्। अनुष्टुप्। ऐन्द्री। श्रोतारौ यस्य कर्णौ अप्रतिहतश्रवणौ सर्वत्र, स भवति श्रुत्कर्णः, तस्य सम्बोधनम्—हे 'श्रुत्कर्ण !' 'आ' आभिमुख्येन 'श्रुधि' श्रुणु त्वम् 'हवम्' आह्वानमस्माकम्। श्रुत्वा च 'नू चित्' पुराण इव 'दधिष्व' धारयस्व, एताः अस्मद्गिरः' हवनेन। किञ्च, हे भगवन् ! इन्द्र ! 'मम' 'इमं स्तोमम्' 'युजः' त्वद्युक्तस्य त्वां प्रत्यादृतस्य नः पुनरपि द्रवतः 'कृष्व' कुरुष्व श्रोतुम् 'अन्तरम्' क्षणमित्यर्थः।

एतमनयोर्मन्त्रयोरध्याभृणुहीति आमन्त्रणपूर्वकादरश्रवणपूर्वको विनियोगः, स न सम्भवत्यपौरुषविध्ये, न हि गवा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

दयोऽध्याशृणुहीत्युक्ताः किञ्चित् प्रपद्यन्ते । तस्मात् कार्यकारणसन्निवेशो मनुष्यवद्देवतानाम्, कार्य्यकारणपेक्षं च विज्ञानम् । तदेवमेतेभ्यो मन्त्रदर्शनिभ्यः स्थितं पौरुषविध्यं मन्त्रदेवतानामिति ॥ २ (६) ॥

"अपुरुषविधाः स्युः इत्यपरम्" दर्शनमिति वाक्यशेषः । तदुक्तम् "अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति विज्ञायते । तदाहुः "नैतदस्ति यद्देवासुरम्"—इति, "न त्वं युयुत्से"—इत्यपि चैतदुक्तमेव ।

"अपि तु यत् दृश्यते" देवानां किञ्चित् "अपुरुषविधम्" अपुरुषप्रकारं तदित्यर्थः । "तद्यथा—अग्निः, वायुः आदित्यः पृथिवी, चन्द्रमाः—इति" । प्रत्यक्षत एतान्यपुरुषकाराणि इत्येतेषामतोऽन्यथाभ्युपगमे दृष्टहानिः स्यात्, न चैतदिष्टम् । तस्मादपुरुषविधा अग्न्यादयः, तत्सामान्याददृष्टा इन्द्रादयोऽपुरुषविधाः, न हि मनुष्यत्वे तुल्ये केचिदनाकारिण इति, तथैव देवतानामपि हि न्यायः । तस्मादपुरुषविधा इति ।

"यथो एतत् चेतनावद्वत् हि स्तुतयः भवन्ति इति, अचेतनान्यपि एवं स्तूयन्ते, यथा—अक्षप्रभृतीनि ओषधिपर्य्यन्तानि" । तस्मात् चेतनावत्स्तुतिमत्त्वमहेतुः पौरुषविध्ये देवतानाम् अचेतनेष्वप्यक्षादिषु चेतनावत्स्तुतेर्दृष्टत्वादिति ।

"यथो एतत् पौरुषविधिकैः अङ्गैः संस्तूयन्ते इति" अयमप्यहेतुः, व्यभिचरित्वात्, अचेतनेषु अपि एतत् भवति" तद्यथा—"ग्रावस्तुतिः" । "ए॒ते व॑दन्ति श॒तव॑त् स॒हस्र॑वद॒भिक्र॑न्दन्ति॒ हरि॑तेभिरा॒सभिः॑ । वि॒ष्ट्वी ग्रावा॑णः सु॒कृत॑ः सुकृ॒त्यया॒ होतु॑श्चित् पूर्वे॑ हवि॒रद्य॑माशत ।"—इति (ऋ० सं० ८, ४, २१, २) । अर्बुदस्यार्षम् । जगती । ग्रावस्तुतिः । 'एते' 'ग्रावाणः' अभिषवकर्म कुर्वाणाः 'वदन्ति' । कथम् ? 'शतवत्' शतमिव । 'सहस्रवत्' सहस्रमिव । शब्दबाहुल्याभिप्रायम् 'अभिक्रन्दन्ति' आह्वयन्ति सोमपातृन्—आगच्छतास्माभिरभिपुतं सोमं पातुमिति । 'हरितेभिः' सोमसंसर्गात् हरिद्वर्णैः 'आसभिः' आस्यैः । तत्र या इयं 'विष्ट्वी' व्याप्तिः ग्राव्णाम्, एतया 'सुकृत्या' शोभनया क्रियया एते 'सुकृतः' शोभनस्य कर्मणः कर्त्तारः 'होतुः चित् पूर्वं, होतुरपि अग्नेः, मानुषहोतुर्वा पूर्वं प्रथमतरम्, 'हविः' एतत् सोमाख्यम्, 'अद्यम्' अदनीयम् 'चाशत' अश्नन्ति । अभिषवं सोमसंयोगमात्रमशनमुपचर्य्यते ग्राव्णाम् । तस्मादपौरुषविध्यमिति, न हि ग्राव्णां यथाभूतान्यास्यनि सन्ति, यत्संयोगेन च स्तूयन्ते, तद्वदिन्द्रादीनाप्यथाभूतैर्बाहुमुष्ट्यादिभिः स्तुतिः स्यात् । तस्मादहेतुरयं यत् "पौरुषविधिकैरङ्गैः संस्तूयन्ते"—इति । तस्मादपुरुषविधाः ॥

"यथो एतत् पौरुषविधिकैः द्रव्यसंयोगैः इति, एतत् अपि तादृशम् एवं' औपचारिकम्, रूपकमात्रमित्यर्थः, यथैव हि आस्यादिकल्पना दृष्टव्यभिचारित्वात् ग्रावप्रभृतिषु न सम्भवति रूपकमात्रं स्तुत्यर्थं सङ्कल्पतो बाह्वादिकार्य्यसिद्धिः, एवं हरिरथजायादिस्तुतयो रूपकमात्रमिति । अपि च "सु॒खं रथं॑ युयुजे सिन्धु॑रश्विन॑म्—इति नदीस्तुतिः" न चास्यां स्तुतौ यथाभूतार्थत्वोपपत्तिरस्ति, असम्भवात् । कथमसम्भवः ? न ह्युदकात्मिकाया नद्या वहन्त्या रथेऽवस्थानं सम्भवति ।

"सु॒खं रथं॑ युयुजे सिन्धु॑रश्विनं॒ तेन॒ वाजं॑ सनिषदस्मिन्नाजौ । म॒हान् ह्य॑स्य महि॒मा प॑नस्यतेऽद॑ब्धस्य॒ स्वय॑शसो विर॒प्शिनः॑ ॥"—इति (ऋ० सं० ८, ३, ७, ४) । सिन्धुक्षिन्नाम प्रियमेधसः पुत्रः, तस्येयमार्षम् । जगती । नदीस्तुतिः । 'सुखं' सुखहेतुं लोकस्य, 'रथं' रंहणमुदकम् 'युयुजे' युक्तवती 'सिन्धुः' नदी 'अश्विनम्' अशनेन व्यापनेन तद्वन्तम् उदकरथम् । 'तेन' 'वाजम्' अन्नम् 'सनिषत्' सम्भजनवती उत्पादितवती 'अस्मिन्' 'आजौ' संग्रामे यतो यतो गच्छति, ततस्ततो व्रीह्यादि अन्नम् अभिनिष्पादयतीत्यर्थः । तस्माच्चायमुदकरथोऽन्नमभिनिष्पादयति, तस्मात् तस्य 'महान्' महिमा' माहाभाग्यं पनस्यते' स्तूयते स्तोतृभिः । 'अदब्धस्य' अनुपहिंसितस्य, 'स्वयशसः' स्वायत्तकीर्तेः, 'विरप्शिनः विरपण शीलस्य शब्दकारिण इत्यर्थः । रथमिव अश्विनम् इति केचित् ॥

तदेवमादिष्वसम्भवात् मुख्यार्थकल्पनायाः, सर्वत्र रूपकप्रवादाः स्तुतय इत्युपेक्ष्यम् ॥

"यथो एतत् पौरुषविधिकैः कर्मभिः—इति, एतत् अपि तादृशम् एव ।—'होतु॑श्चित् पूर्वे॑ हवि॒रद्य॑माशत (ऋ० सं० ८, ४, २१, २)' इति" अशनशक्तिक्रियया ग्रावणः स्तूयन्ते, न च पुनर्ग्राव्णां यथाभूतमशनमस्ति । तस्मादिदमपि रूपकमेव ॥ "एते वदन्ति"—इत्यत्र व्याख्यातम् ॥

"अपि वा उभयविधाः स्युः" । उभयहेतुप्रामाण्यात् ॥

"अपि वाऽपुरुषविधानामेव सताम्" पृथिव्यादीनां "कर्मात्मन एते स्युः" अपुरुषविधाः क्षितिजलादयः । परे तु अभिमानिनः पुरुषविग्रहाः; एवमुभयोः प्रत्यक्षागमयोरप्यनुग्रहः कृतो भविष्यति । "यथा,—यज्ञः यजमानस्य" कर्मात्मा, इदमेतेषां [illegible]

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

इदमेतेनाङ्गमुपचीयत इति संस्कृतममुष्मिन् लोके परैति इति च विज्ञायते ।

"एष च आख्यानसमयः" । भारते चाख्यानसमय एष एव सिद्धान्त इत्यर्थः ।—पृथिवी, स्त्रीरूपेण भारावतारणाय ब्रह्माणं ययाचे । अग्निश्च ब्राह्मणरूपेण वासुदेवार्जुनावुभौ खाण्डवं ययाचे । पुरुषरूपेणाग्निरूपेण च खाण्डवं ददाह ।—इत्येमादि ॥

तदेतच्चतुर्द्धा भिद्यते मन्त्रार्थदर्शनादेव ।—(१) पौरुषविध्यम्, (२) अपौरुषविध्यम्, (३) कर्मार्थात्मोभयविध्यम्, (४) नित्यमौभयविध्यमेवेति । सर्वं चैतदुपपद्यते, माहाभाग्ये सत्यैश्वर्य्यात्, कथमिव देवता न स्यात्—अमूर्त्ता, मूर्त्ता, एकधा, द्विधा, बहुधा चेति यथा तु वर्त्तमानामपश्यन् मन्त्रदृशः तथा तथा अस्तुवन्, सर्वथैवादोषः, फलदर्शनात् । नानावस्थादर्शनवदाख्यातॄणां परिदेवनानिन्दादिष्वपि चेन्द्रादीनां कामकारतस्तद्रूपमवस्थितानां सा सा स्तुतिरेव, न निन्दा । उक्तञ्च,—"हीना न निन्दा स्तुतिरेव सास्या देवान् मर्त्यः सम्यगभिष्टुयात् कः । शक्तिक्षयेऽप्यध्यवस्यन्ति शिष्टाः स्तोतुं न पश्यन्ति गतिं यतोऽन्याम् ॥"— इति ॥ ३ (७) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य) द्वितीयः पादः ॥

---

7. (અનુ૦) હવે દેવતાઓના આકાર વિશે વિચાર કરવામાં આવશે :1 એક મત પ્રમાણે દેવતાઓ પુરુષ (મનુષ્ય)ના જેવા આકારવાળા (અર્થાત્ શરીરધારીઓ) છે કારણ કે (क) ચેતનાવાળાઓની જેવી સ્તુતિ કરવામાં આવે તેવી જ તેમની પણ સ્તુતિ કરવામાં આવે છે. (ख) મનુષ્યોનાં જેવાં જ તેમનાં (દેવતાઓનાં) પણ નામો હોય છે; (ग) વળી, મનુષ્યોનાં જેવાં અંગો હોય એવાં જ દેવતાઓનાં અંગો કલ્પીને તેની સ્તુતિ કરવામાં આવે છે. દા. ત., "મહાન્ (સ્થવિરં = વૃદ્ધ) એવા તમારા બાહુઓ, કે જે શત્રુઓનો નાશ કરનાર છે તેને (શરણે અમે આવીએ છીએ)". (અહીં ઇન્દ્રના બાહુઓની સ્તુતિ કરવામાં આવી છે.) તથા 'હે મઘવન્ ઇન્દ્ર ! જેમાં (તમે અપાર દ્યાવાપૃથિવીને) પકડમાં લો છો તે તમારી મુઠ્ઠી (મહાન્) છે." અહીં ઇન્દ્રના હાથની મુઠ્ઠીની પ્રશંસા કરવામાં આવી છે. (घ) મનુષ્ય સંબંધી જે દ્રવ્યો હોય તે જ દ્રવ્યો દેવતા સંબંધી પણ છે એમ માનીને તેમની સ્તુતિ કરવામાં આવી છે. દા. ત., "હે ઇન્દ્ર ! તમે બે ઘોડાઓ ઉપર અહીં આવો." તથા " તમારા ઘરમાં કલ્યાણકારિણી સ્ત્રી છે, અને જે કાંઈ રમણીય વસ્તુઓ હોય તે બધી જ છે." (ङ) એ જ પ્રમાણે મનુષ્યો જેવાં કર્મો કરે તેવાં જ કર્મો દેવતાઓ પણ કરે છે એમ કલ્પીને તે કર્મો વડે તેમની સ્તુતિ કરવામાં આવી છે. દા. ત. "હે ઇન્દ્ર ! આ સામે મૂકેલા (સોમરસ)ને તમે પીઓ, ખાઓ" તથા "હે અપ્રતિહત શ્રવણશક્તિવાળા ઇન્દ્ર ! (અમે તમારું) આહ્‌વાન કરીએ છીએ, તેને સાંભળો."

2 બીજા મત પ્રમાણે, દેવતાઓ મનુષ્યના જેવા આકારવાળા નથી, કારણ કે એવું જ જોવા મળે છે. જેમ કે, અગ્નિ, વાયુ, આદિત્ય, પૃથિવી અને ચન્દ્રમા વગેરે. (આ દેવતાઓ મનુષ્યના જેવા શરીરવાળા નથી એ પ્રત્યક્ષ જોઈ શકાય છે.) (હવે ઉપરના મતમાં જે કારણો આગળ ધરીને માન્યું હતું કે દેવતાઓ મનુષ્યના જેવા શરીરવાળા છે તે કારણોનું ક્રમશઃ ખંડન કરવામાં આવે છેઃ-) (क) અગાઉ જે કહ્યું હતું કે "ચેતનવાળાઓ જેવી તેમની સ્તુતિ કરવામાં આવે છે" તે અસંગત છે. કેમ કે અક્ષ-જુગાર રમવાના પાસા-થી માંડીને ઔષધિ સુધીના અચેતન પદાર્થોની પણ એ જ પ્રમાણે સ્તુતિ કરવામાં આવી છે. [અગાઉ (ख)માં કહ્યું હતું કે મનુષ્યો જેવાં જ દેવતાઓનાં નામો હોય છે- એ મુદ્દાને છોડીને આગળના મુદ્દાઓનું ખંડન કરવામાં આવ્યું છે.] (ग) એ જ પ્રમાણે મનુષ્યોનાં અંગો જેવાં જ દેવતાઓને અંગો છે એમ માનીને (જે) સ્તુતિ કરવામાં આવી છે, તેવી સ્તુતિ અચેતન પદાર્થોને વિશે પણ જોવા મળે છે. દા. ત., "હરિદ્વર્ણના મુખોથી (સોમ રસ કાઢવાના પથ્થરો) અવાજ કરી રહ્યા છે." આ મન્ત્રથી ગ્રાવન્‌ની સ્તુતિ કરવામાં આવી છે. (घ) અગાઉ જે કહ્યું હતું "મનુષ્ય સંબંધી દ્રવ્યોથી દેવતાઓની સ્તુતિ કરવામાં આવે છે" એ પણ એવું જ (અર્થાત્ અચેતન પદાર્થો વિશે પણ જોવા મળે) છે. દા. ત., "સિંધુ નદી સુખદાયક અને બધે ફેલાયેલા (અશ્વિનમ્) (પાણી રૂપી) રથથી જોડાયેલી છે." આ મન્ત્રથી નદીની સ્તુતિ કરવામાં આવી છે. (અહીં અચેતન પદાર્થ નદી જે મનુષ્યદ્રવ્ય ગણાય તે રથથી જોડાયેલ છે એવું કહ્યું છે. (ङ) અગાઉ જે કહ્યું હતું કે મનુષ્ય જેવાં કર્મો કરે તેવાં કર્મોથી દેવતાઓની પણ સ્તુતિ કરવામાં આવે છે-તે પણ એવું જ છે. (અર્થાત્ અચેતન પદાર્થો પણ મનુષ્યો જેવાં જ કર્મો કરે છે એવું પણ વેદમન્ત્રોમાં જોવા મળે છે.) દા. ત. "હોતાની પૂર્વે જ (સોમરસ કાઢવાનો પથ્થર) ભક્ષણ કરવા યોગ્ય હવિને ખાઈ ગયો. આ મન્ત્રથી ગ્રાવન્‌ની સ્તુતિ કરવામાં આવી છે. (અહીં અચેતન પદાર્થ મનુષ્યો કરે છે તેવી ખાવાની ક્રિયા કરે છે એ દર્શાવવામાં આવ્યું છે.)

3. ત્રીજા એક મત મુજબ બન્ને પ્રકારના આકારવાળા દેવતાઓ છે. અર્થાત્ દેવતાઓ મનુષ્યના જેવા શરીરવાળા છે પણ ખરા અને નથી પણ. (કારણ કે ઉપર જોયું તેમ બન્ને પ્રકારનાં પ્રમાણ વેદમન્ત્રોમાંથી મળી રહે છે.)

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

૪. અથવા તો એક ચોથો મત પણ છે. એ મુજબ દેવતાઓ મનુષ્યોના જેવા જ શરીરવાળા છે અને આ જે (અગ્નિ, પૃથિવી, ચન્દ્રમા વગેરે અપુરુષવિધ દેવતાઓ) જોવા મળે છે તે (મનુષ્યોના જેવા શરીરધારી દેવતાઓના જ) કર્માત્માઓ છે, જેવી રીતે યજ્ઞ યજમાનનો કર્માત્મા છે. આવો આખ્યાન (મહાભારતાદિ)નો સિદ્ધાન્ત પણ છે.

7. (વિમર્શ) એકાત્મવાદી આત્મવિદ્ લોકોના પક્ષમાં એટલું સ્પષ્ટ હોય છે કે વિકારભાવને પામ્યા પૂર્વેનો આત્મા સન્માત્ર હોય છે અને સૃષ્ટિ-સ્થિતિકાળમાં તે જ આત્મા સર્વાકૃતિરૂપે પરિણમ્યો હોય છે. આથી આત્મવિદ્ લોકોના પક્ષમાં આ આત્મા અનાકૃતિ છે કે સર્વાકૃતિ એ પ્રશ્ન અપ્રસ્તુત છે. હવે નૈરુક્તોના પક્ષમાં ત્રણ સ્થાનોમાં રહેલો આ આત્મા અગ્નિ, વાયુ અને સૂર્યભાવને ધારણ કરનારો છે. તેથી ત્યાં પણ દેવતાઓનું સ્વરૂપ પ્રત્યક્ષ હોઈ 'દેવતાઓનો આકાર કેવો હોય છે ?' એવી ચર્ચા અપ્રસ્તુત બને છે. બાકી રહ્યો યાજ્ઞિકોનો પક્ષ. તેઓ વેદમન્ત્રોમાં જેટલાં નામો છે એટલા દેવતાઓ માને છે. (પૂર્વમીમાંસામાં વિવિધ પ્રકારના યજ્ઞો કરીને આ દેવતાઓ સાથે આપ-લેનો વ્યવહાર થઈ શકે છે એવું નિરૂપણ કરવામાં આવ્યું છે.) આથી યાજ્ઞિકોના પક્ષે એ વિચારવાનું પ્રાપ્ત થાય છે કે આ દેવતાઓનો આકાર કેવો હશે.

જગત્‌માં આકારવાળા (મૂર્ત) પદાર્થો બે પ્રકારના જોવા મળે છે : ચેતન અને અચેતન. મનુષ્ય, પશુ, પક્ષી વગેરે ચેતન છે અને પાષાણ, રથ, વગેરે અચેતન છે. હવે આ દેવતાઓ મનુષ્યાદિવત્ ચેતન છે કે પાષાણાદિવત્ અચેતન છે ? એવો પ્રશ્ન કરીને પહેલો મત રજૂ કર્યો છે કે દેવતાઓ પુરુષવિધ અર્થાત્ પુરુષવિગ્રહ છે. (અહીં 'પુરુષ' શબ્દ મનુષ્યનો વાચક છે, સ્ત્રીભિન્નનો નહીં.) આ મતના સમર્થનમાં અનેક કારણો ઉપસ્થિત કરવામાં આવ્યાં છે : "દેવતાઓની 'ચેતનાવાળાઓ જેવી' (ચેતનાવદ્વદ્) સ્તુતિ કરવામાં આવે છે." એવું પ્રથમ એક કારણ આપ્યું છે. (અહીં પહેલો વત્ પ્રત્યય મતુપ્ અર્થમાં લાગ્યો છે અને બીજો વત્ પ્રત્યય તુલ્યાર્થમાં છે.) અહીં પ્રશ્ન થાય કે 'ચેતનાવાળાઓ જેવી' નો અર્થ 'મનુષ્યોના જેવી' (દેવતાઓની સ્તુતિ કરવામાં આવે છે) એવો કેમ કરવામાં આવ્યો છે ? કારણ કે ચેતનાવાળા તો મનુષ્યો સિવાયના ગાય વગેરે પશુઓ પણ હોય છે. આથી દેવતાઓ મનુષ્યોના જેવા શરીરને ધારણ કરનારા હોય છે એમ કહેવાને બદલે પશુઓ જેવા શરીરવાળા હોય છે એમ કેમ ન કહેવું ? દુર્ગે આનું સમાધાન કરતાં જણાવ્યું છે કે લોકમાં જે માણસ હિતાહિતનો વિચાર કરી શકતો નથી તેને માટે કહેવાય છે કે 'આ માણસ નિશ્ચેતન છે.' એ જ પ્રમાણે આ ગાય વગેરે પશુપક્ષીઓ પણ ચેતનવાળા હોવા છતાંય આવતી કાલને જાણતાં નથી, હિતાહિતનો વિચાર કરી શકતા નથી માટે અચેતનની જેમ તેમની ઉપેક્ષા કરવામાં આવે છે. જ્યારે પુરુષ આવતી કાલનો અને લોકાલોકનો વિચાર કરી શકે છે તથા મર્ત્યલોકમાં રહેવા છતાંય અમૃતની ઇચ્છા રાખે છે. આથી મનુષ્ય હિતાહિતનો વિચાર કરતો હોવાથી 'ચેતનાવાળાઓ જેવી'નો અર્થ 'મનુષ્યોના જેવી' (જ દેવતાઓની સ્તુતિ થાય છે) એવો કર્યો છે. આમ, ચેતન મનુષ્યો જેવી જ દેવતાઓની સ્તુતિ કરવામાં આવે છે, તેથી નક્કી થાય છે કે દેવતાઓ મનુષ્યો જેવા શરીરને ધારણ કરનારા છે. આ મતના સમર્થનમાં આગળ ઉપર જણાવ્યું છે કે મનુષ્યોનાં નામ જેવાં જ નામો દેવતાઓના હોય છે. અહીં કેટલાક લોકો 'અભિધાન'નો અર્થ સંવાદ કરે છે અર્થાત્ મનુષ્યો જેમ પરસ્પર વાતચીત કરે છે તેમ દેવતાઓ પણ પરસ્પર સંવાદ કરે છે. દા. ત. યમ-યમી સૂક્ત. આથી પણ નક્કી થાય છે કે દેવતાઓ મનુષ્યો જેવા આકારવાળા છે. આ મતના સમર્થક અન્ય કારણો મૂળ અનુવાદમાં સ્પષ્ટ જ છે.

હવે બીજા કેટલાક યાજ્ઞિકોના મતે દેવતાઓ મનુષ્યોના જેવા આકારવાળા નથી. આ લોકોએ પોતાના મતનું સમર્થન કરવા પ્રત્યક્ષ પ્રમાણનું આશ્રયણ કર્યું છે. તેમણે જણાવ્યું કે અગ્નિ, વાયુ, સૂર્ય, પૃથિવી વગેરે દેવતાઓ સ્પષ્ટ રૂપે અપુરુષવિધ જ છે. આ દેવતાઓને આધારે જે દેવતાઓ પ્રત્યક્ષ નથી (જેવા કે, ઇન્દ્રાદિ દેવતાઓ) તેઓ પણ અપુરુષવિધ જ હશે એવું માની શકાય. વળી, એ પણ સમજવું જોઈએ કે જો દેવતાઓ મનુષ્યોના જેવા શરીરને ધારણ કરનારા હોય તો અમુક (પૃથિવી વગેરે) દેવતાઓ આકારવાળા હોય અને અમુક (ઇન્દ્રાદિ) દેવતાઓ આકાર વગરના (અમૂર્ત) હોય એવું ન બનવું જોઈએ. આથી સાબિત થાય છે કે દેવતાઓ પુરુષવિધ નથી. આ મતમાં કેવળ દેવતાઓનું નિષેધાત્મક સ્વરૂપ આપ્યું છે. એટલે કે 'દેવતાઓ પુરુષવિધ નથી' એટલું કહ્યા પછી કશું વિધેયાત્મક સ્વરૂપ દર્શાવ્યું નથી. આ મતનું પ્રદર્શન કરનારે મહદંશે પૂર્વોક્ત મતના સમર્થનમાં રજૂ થયેલાં કારણોનું ખંડન કરવા તરફ જ ધ્યાન કેન્દ્રિત કર્યું છે. પહેલા મતમાં કહ્યું હતું કે મનુષ્યોનાં જેવાં જ અંગો, દ્રવ્યસંયોગ, કર્મો વગેરે દેવતાઓમાં જોવા મળે છે માટે દેવતાઓ પુરુષવિધ છે. તો આ પહેલા મતની સામે બીજો મત કહે છે કે મનુષ્યોના જેવાં જ અંગો, દ્રવ્યસંયોગ કે કર્મો વગેરે અચેતન પદાર્થોમાં પણ હોય એવી રીતે સ્તુતિઓ કરવામાં આવી છે. આથી સિદ્ધ થાય છે કે દેવતાઓ પુરુષવિધ નથી. આ બીજા મતનું પ્રતિપાદન કરનારાઓએ પૂર્વોક્ત મતના દ્વિતીય કારણ (ख) નું ખંડન કર્યું નથી. પરંતુ પ્રધાનમલ્લ-નિબર્હણ-ન્યાયે તેનો પરિહાર થઈ જાય છે એમ માની

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

શકાય. આ બીજા મતનું પ્રતિપાદન કરનારાઓ "હરિદ્ વર્ણના પથ્થરો અવાજ કરે" અથવા "સોમરસ કાઢવાનો પથ્થર હવિને ખાઈ ગયો" એવાં વર્ણનોને રૂપકાત્મક ગણે છે. કેમ કે પથ્થરને કદાપિ મુખ હોતાં નથી કે તેઓ ખાવાની ક્રિયા પણ કરી શકતાં નથી.

આ બન્ને મતો ઉપરાંત એક ત્રીજો મત પણ છે, તે મત મુજબ દેવતાઓ ઉભયવિધ છે. અર્થાત્ દેવતાઓ મનુષ્યોનાં જેવાં શરીરવાળાં છે પણ ખરા અને નથી પણ. આવું માનવાનું કારણ એ છે કે બન્ને પ્રકારનાં ઉદાહરણો વેદમન્ત્રોમાંથી મળી આવે છે

અહીં ચોથો મત નોંધપાત્ર છે, કેમ કે તેમાં પહેલા બન્ને મતોનો બહુ સુંદર યુક્તિયુક્ત સમન્વય કરી બતાવવામાં આવ્યો છે. આ છેલ્લા મત મુજબ દેવતાઓ પુરુષવિધ જ છે અને અગ્નિ, વાયુ, સૂર્ય, પૃથિવી, ચન્દ્રમાદિ જેવા જે દેવતાઓ અપુરુષવિધ છે એમ જોવા મળે છે, તે પેલા પુરુષવિધ દેવતાઓના જ કર્માત્માઓ છે. અર્થાત્ બધા જ દેવતાઓ મનુષ્યના શરીર જેવા જ શરીરવાળા છે અને આ પ્રત્યક્ષ દેખાતાં સૂર્ય, પૃથિવી વગેરે દેવતાઓ તો તે પુરુષવિગ્રહવાળા દેવતાઓનું કાર્યાત્મક (કાર્ય કરનારું) બાહ્ય સ્વરૂપમાત્ર જ છે. (અહીં) પુરુષવિધ દેવતા અધિષ્ઠાતા ગણાશે અને પ્રત્યક્ષ દેખાતા સૂર્યાદિ અપુરુષવિધ દેવતાઓ અધિષ્ઠાન ગણાશે.* આ મતમાં પ્રત્યક્ષ પ્રમાણથી સિદ્ધ થનારા સૂર્ય, પૃથિવી વગેરે અપુરુષવિધ સ્વરૂપોનો (પ્રથમ મતના સમર્થનમાં નોંધેલા) આગમ પ્રમાણોથી સિદ્ધ થનારા પુરુષવિધ સ્વરૂપની સાથે સમન્વય કરી બતાવ્યો છે.

આ ચોથા મતના સમર્થનમાં બે મુદ્દા ઉપસ્થિત કરવામાં આવ્યા છે : (૧) યજમાનનો યજ્ઞ. જેવી રીતે યજ્ઞ એ અનુષ્ઠાન છે અને અપુરુષવિધ છે. એ અનુષ્ઠાન (યજ્ઞ)નો અનુષ્ઠાતા યજમાન મનુષ્ય શરીરધારી છે. તેવી રીતે સૂર્ય, પૃથિવી વગેરે અપુરુષવિધ દેખાતાં દેવતાઓનાં અધિષ્ઠાતા દેવતાઓ પુરુષવિધ જ છે.

(આ સન્દર્ભમાં પં. શિવનારાયણ શાસ્ત્રીનો એક મત ટાંકવા જેવો છે : "આ વ્યવહાર લોકમાં પણ થાય છે. યજમાન યજ્ઞનાં કર્માનું અનુષ્ઠાન પોતે કરતો નથી, પરંતુ દક્ષિણા વગેરે આપીને પરિક્રીત યાજક ઋત્વિજ્ દ્વારા જ યજ્ઞની તે તે ક્રિયાઓ સમ્પાદિત કરાવે છે. યજમાન તો સંકલ્પ માત્રથી જ અને દક્ષિણા વગેરે આપીને જ યજ્ઞની પ્રત્યેક ક્રિયાનો અધિષ્ઠાતા હોવાને નાતે કર્તા બની જાય છે અને તે યજ્ઞ યજમાનનો જ કહેવાય છે. આ જ રીતે અધિષ્ઠાતા દેવતા પણ ઋષિના સંકલ્પ અનુસાર વિવિધ અંગો, દ્રવ્યો અને કર્મોથી યુક્ત થાય છે.

અહીં દૃષ્ટાન્તમાં યજ્ઞ અપુરુષવિધ છે, આથી દાર્ષ્ટાન્તિક દેવતા પણ અપુરુષવિધ જ હોવો જોઈએ. માટે અમે નિરુક્તના વાક્યમાં वाऽपुरुषविधानामिव એવો સન્ધિચ્છેદ કર્યો છે. યાસ્કે અગ્નિ વગેરે તે તે સ્થળોમાં જે વર્ણન કર્યું છે, તેનાથી પણ અપુરુષવિધ હોવા છતાંય પૌરુષવૈવિધ્યનો આરોપ કર્મોની સિદ્ધિને માટે તેમને ઇષ્ટ છે, આ સિદ્ધ થાય છે. ("નિરુક્તમીમાંસા"–પૃ. ૨૯૮.)

(૨) આવો આખ્યાન (મહાભારતાદિ)નો સિદ્ધાન્ત પણ છે. મહાભારતમાં એવાં વર્ણનો જોવાં મળે છે કે અપુરુષવિધ દેખાતી પૃથિવીએ સ્ત્રીનું રૂપ ધારણ કરીને પોતાનો ભાર ઓછો કરવા બ્રહ્માની પાસે યાચના કરી. એ જ પ્રમાણે, અપુરુષવિધ દેખાતા અગ્નિએ વાસુદેવ અને અર્જુનની પાસે ઉપસ્થિત થઈ ખાંડવવનની યાચના કરી હતી. આથી સિદ્ધ થાય છે કે બધા દેવતાઓ પુરુષવિધ જ છે અને જે કેટલાંક પ્રત્યક્ષ રૂપે અપુરુષવિધ દેખાય છે તે પુરુષવિધ દેવતાઓનું જ કાર્ય કરનારું (કાર્યાત્મક) સ્વરૂપ છે.

દુર્ગાચાર્ય અગાઉની બધી જ ચર્ચાઓનો ઉપસંહાર કરતાં જણાવે છે કે દેવતાઓ પોતાના મહાઐશ્વર્યને કારણે શું નથી થઈ શકતા ? તેઓ ક્યારેક ઇન્દ્ર – રુદ્રાદિ રૂપે અમૂર્ત બને છે. અગ્નિ, પૃથિવી આદિ રૂપે મૂર્ત બને છે, અને ક્યારેક એક,

---

* ૧. અહીં पुरुषविधानामिव सतां कर्मात्मान एते स्युः । એમ જે કહ્યું તેને બીજા શબ્દોમાં शब्दरूपाः खलु देवताः । કહેવાયું છે. અર્થાત્ આપણી આંખે દેખાતા જે સૂર્ય, ચન્દ્ર, અગ્નિ વગેરે પદાર્થો છે તે તો વેદમાં જેમની સ્તુતિ કરવામાં આવી છે તે સૂર્ય, ચન્દ્ર, અગ્નિ વગેરે દેવતાઓનાં કાર્ય કરનારાં-કાર્યાત્મક શરીર છે. એટલે કે આપણી આંખે જે સૂર્ય, ચન્દ્રમા દેખાય છે, તેનો એક અધિદેવતા છે જે પુરુષવિધ દેહવાળો છે અથવા શબ્દરૂપ દેહવાળો છે. આ પુરુષવિધ દેવતાની જ સ્તુતિ થાય છે અને તે જ આપણું રક્ષણ કરે છે. આવી વૈદિક માન્યતા છે. આ માન્યતા રસપ્રદ છે. આધુનિક યુગમાં માનવી ચન્દ્ર ઉપર જઈ આવ્યો, છતાંય આ વૈદિક માન્યતા મુજબ તે "દેવતા" મટી જતો નથી. કેમ કે મૂળ ચન્દ્ર નામનો અધિદેવતા તો હજી અનાક્રાન્ત જ છે !

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

બે કે અનેક પણ બને છે. મન્ત્રદ્રષ્ટાઓએ તે દેવતાઓને જેવા સ્વરૂપે જોયા હતા તેવા સ્વરૂપે તેમની સ્તુતિ કરી છે. આમ, ઉપરની બધી ચર્ચાઓમાં સર્વથા દોષનો અભાવ છે. અહીં સાતમા અધ્યાયનો દ્વિતીય પાદ પૂરો થાય છે.

तृतीयः पादः

8. तिस्रः एव देवताः इत्युक्तं पुरस्तात् (निरु. ७/५) । तासां भक्तिसाहचर्यं व्याख्यास्यामः । अथ एतानि अग्निभक्तीनि । अयं लोकः । प्रातःसवनम् । वसन्तः । गायत्री । त्रिवृत् स्तोमः । रथन्तरं साम । ये च देवगणाः समाम्नातः प्रथमे स्थाने । अग्नायी पृथिवी इळा इति स्त्रियः । अथास्य कर्म वहनं च हविषाम् आवाहनं च देवतानाम् । यच्च किञ्चित् दार्ष्टिविषयकम् अग्निकर्मैव तत् ॥

अथास्य संस्तविकाः देवाः । इन्द्रः सोमः वरुणः पर्जन्यः ऋतवः । आग्नावैष्णवं च हविः । न तु ऋक् संस्तविकी दशतयीषु विद्यते । अथापि आग्नापौष्णं हविः । न तु संस्तवः । तत्र एतां विभक्तस्तुतिम् ऋचम् उदाहरन्ति ॥

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः । स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः (ऋ. सं. १०/१७/३) ॥ पूषा त्वा इतः प्रच्यावयतु विद्वान् अनष्टपशुर्भुवनस्य गोपाः इति । एष हि सर्वेषां भूतानां गोपायिता आदित्यः । स त्वैतेभ्यः परि ददत्पितृभ्यः इति सांशयिकः तृतीयः पादः । पूषा पुरस्तात् । तस्य अन्वादेशः इत्येकम् । अग्निः उपरिष्टात् । तस्य प्रकीर्तना इत्यपरम् । अग्निर्देवेभ्यः सुविदत्रियेभ्यः । सुविदत्रं धनं भवति । विन्दतेर्वा एकोपसर्गात् । ददातेर्वा स्यात् द्व्युपसर्गात् ॥

अथाकारचिन्तनव्यवधानाद् देवतात्रयाधिकारस्य तद्विशेषविवक्षया तदनुस्मृतये च स एतत् प्रकरोति,"—"तिस्रः एव देवताः'—इति" । यः पुनस्तत्र विशेषो विवक्षितः, स उच्यते,—"तासां भक्तिसाहचर्य्यं व्याख्यास्यामः" । तासामेव तिसृणां भक्तिसाहचर्य्यम् भक्तिश्च साहचर्य्यञ्च भक्तिकृतं वा साहचर्य्यमिति । लोकादीनामेवाग्न्यादिभिर्भजनं भक्तिः, सहचरभावः साहचर्य्यम् । तत् किमर्थम् ? उच्यते,—असंविज्ञातपदे मन्त्रे भक्त्या साहचर्य्येण वा यथा देवता गम्येतेत्येवमर्थं भक्तिसाहचर्य्यमुच्यते ॥

यद्येवमुच्यतां तर्हि कानि किम्भक्तीनि ? इति । तदुच्यते,—"अथ एतानि अग्निभक्तीनि" । अथेति विशेषाधिकारे । अग्निं भजन्ते अग्निना वा भज्यन्ते—इत्यग्निभक्तीनि । कतमानि ? "अयं लोकः"—इत्येवमादीनि अग्निभक्तीन्यवगन्तव्यानि । "ये च देवगणाः समाम्नाताः प्रथमे स्थाने" । तद्यथा,—आप्री, अक्षाः, ग्रावाणः, अभीशवः इत्येवमादीनि । "अग्नायी, पृथिवी, इला—इति स्त्रियः" । 'इला, पृथिवी, अग्नायी'—इति क्रमेण वक्तव्ये क्रमभेदोऽग्नायी तत्समानाख्यानात् सन्निकृष्टतरा, न तथा पृथिवीति, तस्मात् प्रथममुच्यते, ततः पृथिव्याश्रयसम्बन्धादग्नेर्न तथेला, परोक्षादभिधेयस्य । 'आप्री'—मध्ये 'तिस्रो देवीः'—इत्यत्र इला, भारत्याः द्युस्थानाया अनन्तरं श्रूयमाणा,—आ नो यज्ञं भारती तूयमेत्विलामनुष्यत् (ऋ० सं० ८, ६, ९, २)"—इति कथं पृथिवीस्थाना ? इति । उच्यते,—अनुयाजेषु सामर्थ्यात् "द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेलया वसुमत्या"—इत्यतः सामर्थ्यमुन्नीय वसुसाहचर्य्यात् इहैवेलयेति चाग्निभक्तिरिलेत्याह, रुद्रैः साहचर्य्यात् सरस्वती मध्यस्थाना, आदित्यैः साहचर्य्यात् भारती द्युस्थानेति ॥

"अथास्य कर्म" अथास्याग्नेः कर्म सहभावि, अनन्यदेवतागामि, यत्संयोगादसत्यप्यग्निशब्दे आग्नेय एव मन्त्रो भवति । "वहनञ्च हविषाम्"—इत्येवमादि । "दार्ष्टिविषयिकम्" दृष्ट्यनुग्रहो यस्य विषयः, तद्दार्ष्टिविषयिकम्, प्रकाशादि कर्मेत्यर्थः । "अग्निकर्मैव तत्"—इति पुनर्वचनमादरार्थम्, आध्यात्म्येऽपि यावान् कश्चित् प्रकाश इति ॥

"अथास्य संस्तविका देवाः" यैः सह अग्निः स्तूयते । संस्तवो तद्यथा, "इन्द्रः, सोमः"—इत्येवमादयः । मन्त्रस्वभावप्रदर्शनाय उदाहरणम् । अग्नेः पूर्वनिपाताद् देवताद्वन्द्व मुख्यता ।—

"अग्न इन्द्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोपयातम् । अमर्धन्ता सोमपेयाय देवा ॥"—इति (ऋ० सं० ३. १, २५. ४) । विश्वामित्रस्येयमार्षम् । विराट् । अनुष्टुप् । आग्रयणे विनियोगः । हे भगवन् ' 'अग्ने'!' त्वम् 'इन्द्रः च' 'देवा' देवौ अस्य 'दाशुषः' दत्तवतः हवींषि, यजमानस्य 'दुरोणे' यज्ञगृहे 'सुतावतः' अभिषुतवतः 'यज्ञम्' सोमम् ! 'अमर्धन्ता' मृधं संग्रमं कुर्वाणौ अन्तरा केनचित् सह । 'सोमपेयाय' सोमपानार्थम् 'उपयातम्' इत्येतदाशास्महे ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

''अग्नीषामाविमं सु मे शृणुतं वृषणा हवम् । प्रति सूक्तानि हर्य्यतं भवतं दाशुषे मयः ॥''—इति (ऋ० सं० १, ६, २८, १) । सोमेन सह संस्तवः । गोतमस्यार्षम् । अनुष्टुप् । पौर्णमासे अग्नीषोमस्यानुवाक्या । हे 'अग्नीषोमौ !' युवामुच्येथे । 'इमं' 'हवम्' आह्वानं 'मे' मम 'सु' सुष्ठु 'शृणुतम्' 'वृषणा' वृषणौ वर्षितारौ । श्रुत्वा चागच्छतम् । आगत्य च 'प्रतिहर्य्यतं' 'प्रतिप्रेप्सतं' मया पूर्वं प्रेप्सितौ प्रति कामयेथाम् इमानि सूक्तानि श्रोतुम् । श्रुत्वा चेमानि 'भवतं' 'दाशुषे' युवां हविर्दात्रे 'मयः' सुखावित्यर्थः ॥

''त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेलोऽवयासिसीष्ठाः । यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥''—इति (ऋ० सं० ३, ४, १२, ४) ! वरुणेन संस्तवः । वामदेवस्यार्षम् । त्रिष्टुप् । अवभृथे विनियोगः । हे भगवन् ! 'अग्ने !' 'त्वम्' 'नः' अस्मान् यथावत् 'विद्वान्' जानानः भक्ता मम एते इति । 'वरुणस्य देवस्य' यः अस्मान् प्रति 'हेलः' 'क्रोधः' तम् अनेनावभृथकर्मणा 'सवयासिसीष्ठाः' अपगमय । किञ्च, यः त्वं 'यजिष्ठः' यष्टृतमः, देवानां होतृत्वे वर्त्तमानः 'वह्नितमः' वोढृतमश्च हविषाम्, स त्वं पुनः 'शोशुचानः' देदीप्यमानः तेषु तेषु कर्मसु 'विश्वा' विश्वानि सर्वाणि 'द्वेषांसि' द्वेष्याणि 'प्र' प्रकर्षेण 'अस्मत्' अस्मत्तः 'मुमुग्धि' मुञ्च अवयोज्येत्यर्थः ॥

''अग्नी पर्जन्याववतं धियं मेऽस्मिन् हवे सुहवा सुष्टुतिं नः । इडामन्यो जनयद् गर्भमन्यः प्रजावतीरिष आधत्तमस्मे ॥'' —इति (ऋ० सं० ४, ८, १६, ६)। पर्जन्येव संस्तवः । भरद्वाजस्यार्षम् । त्रिष्टुप् । हे 'अग्नीपर्जन्यौ !' युवाम् उच्येथे । 'अवतम्' अवच्छतम् इमां 'धियं' इदं कर्म प्रति, 'मे' मम 'अस्मिन्' 'हवे' आह्वाने 'सुहवा' सुहवौ स्वाह्वानौ 'सुष्टुतिं' शोभनामिमां स्तुतिं श्रोतुम् । आगत्य च श्रुत्वा इमाम् 'इडाम्' अन्नम् 'अन्यः' एकः 'जनयत्' जनयतु, 'गर्भम् अन्यः' गर्भमेको जनयतु । तौ युवामेवं प्रतिसंवत्सरं 'प्रजावतीः' प्रजासंयुक्ताः 'इषः' अन्नानि 'आ' आभिमुख्येन स्थित्वा 'धत्तं' दत्तम्, 'अस्मे' अस्मभ्यमित्यर्थः ॥

''अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना ॥''—इति (ऋ० सं० १, १, २८, ४) । ऋतुभिः संस्तवः । मेधातिथेरार्षम् । गायत्री । ऋतुयाजेषु विनियोगः । हे भगवन् ! 'अग्ने !' देवान्' 'इह' अस्माकं कर्मणि 'आवह' । आहूय देवान् 'सादय' 'योनिषु त्रिषु' सवनेषु त्रिषु । एतान् यथाकालं यज । अमुना प्रकारेण 'परिभूष' सर्वतो देवयागेनालङ्कुरुष्व एतं यज्ञम्, आत्मना 'पिब' चैतं सोमम् 'ऋतुना' सह ॥

''अग्नावैष्णवं हविः'' । हविर्ग्रहणात् हविष एव सम्प्रदानार्थत्वम् । या ऋचः ताः संस्तवेनाग्नाविष्णोः सन्ति ।

''अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः । द्युम्नैर्वाजेभिरागतम् ॥''—इति । वामदेवस्येमार्षम् । गायत्री । आग्नावैष्णवे हविषि विनियोगः । हे 'अग्नाविष्णू' 'सजोषसा' सजोषसौ नित्यं सह जोषणौ नित्यं समानप्रीतौ 'वा'' युवामुच्येथे । 'इमाः' एताः युष्मद्'गिरः' अस्मत्स्तुतयः 'वर्द्धन्तु' वर्द्धयन्तु युवाम् । वृद्धौ च सत्यामस्मत्सम्प्रदेयैः 'द्युम्नैः' द्योतनवद्भिः 'वाजेभिः' अन्नैरभ्युद्यतैः 'आगतम्' अस्मान् प्रत्यायातम् ॥

''न त्वृक् संस्तविकी दशतयीषु विद्यते । 'न'—इति प्रतिषेधः । 'तु' शब्दोऽवधारणार्थः । 'ऋक्' 'संस्तविकी' संस्तवयुक्ता, 'दशतयीषु' दशमण्डलावयवप्रविभागेन तायत इति दशतयः ऋग्वेदः; तस्य शाखाः दशतय्यः, तासु एकापि हविष्यविनियुक्ता शस्त्रमध्यपातिनी ऋक् अग्नाविष्णोः संस्तविकी नास्ति । स्यादप्यन्यत्र संस्तविकी, न तु दशतयीषु । असंस्तवेन वा दशतयीष्वपि इत्युत्सर्गं दर्शयति, एवमेतन्मया निपुणमन्विष्यत इति ।

अथाप्ययमपर उत्सर्गः,—''अथाप्याग्नापौष्णं'' ''हविः'' एव, ''न संस्तवः'' । तस्मिंस्तु हविषु किन्तु पृथक् पृथगेव अग्निः स्तूयते पूषा च ''तत्र'' तस्मिन् संस्तवे अग्निपूष्णोः ''एतां विभक्तस्तुतिम् ऋचम्'' ''उदाहरन्ति'' नैरुक्ताः ॥ १ (८) ॥

''पूषा त्वेतः''—इति (ऋ० सं० ७, ६, २३, ३) । देवश्रवसो यामायनस्यार्षम् । त्रिष्टुप् । पुनः शवस्य कर्णे प्रमीतानुमन्त्रणे विनियोगः । सः प्रमीत उच्यते । 'पूषा' भगवान् ''आदित्यः'' पथामधिपतिः, सः 'त्वा' त्वाम् 'इतः' मनुष्यलोकात् विशिष्टेन पथा 'प्रच्यावयतु' 'विद्वान्' अव्यवहितज्ञानः । सर्वत्र ज्ञानाव्यवधानादेव च 'अनष्टपशुः' । 'भुवनस्य गोपाः' । 'भुवनस्य' भूतजातस्य 'गोपाः' रक्षिता । उपर्य्यवस्थितः 'सः' पूषा, एवंलक्षणः, 'त्वा' त्वां प्रगमय्य 'एतेभ्यः' चन्द्रमण्डलोपान्तवासिभ्यः 'पितृभ्यः 'परिददत्' परिददातु । तदुक्तम्,—''दक्षिणायनात् पितृलोकम्''—इति । 'अग्निः' अपि चैतेभ्यः उत्कृष्य 'देवेभ्यः सुविदत्रियेभ्यः' ये विद्युतो मध्ये निवसन्ति, तेभ्यः परिददातु । तदप्युक्तम्,—''चन्द्रमसो वैद्युतम्''—इति । सत्वमेमुभावपि देवलोकपितृलोकावभ्यश्च हीत्याशीः प्रमीतस्य । उक्तञ्च,—''ये देवयानाः पितृयानाश्च लोकाः सर्वांस्ताननृणाः सञ्चयेम,—इति ॥

''स त्वैतेभ्यः०—० इति सांशयिकः तृतीयः पादः'' संशयोऽस्मिन्नस्तीति सांशयिकः, तृतीयः पादोऽस्या ऋचः । कथं कृत्वा ? यथा,—''पूषा पुरस्तात्'' पूषा त्वेतश्च्यावयतु'—इति, ''तस्य अन्वादेशः—इति एकम्'' सामर्थ्याद्दर्शनम् । तथा व्यास्यातमेव । त्रयः पौष्णाः पादाः, एक एवाग्नेयः एवमियं विभक्तस्तुतिः । अथवा द्वावुत्तरावाग्नेयौ । तत्र अर्थयोजना,—पूष्णा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

प्रच्यावितं सन्तं सोऽग्निर्वक्ष्यमाणस्त्वामेतेभ्यः पितृभ्यो देवेभ्यः सुविदत्रियेभ्यः परिददातु, मा पितृभ्यः प्रेतेभ्यः इत्यभिप्रायः । तं प्रतं दिष्टमितोऽन्य एव हरन्तीत्यपेक्ष्य सर्वनाम्नश्चोत्तरेणाप्यग्निशब्देन सम्बन्धमविरुध्यमानं व्यपेक्ष्य अकल्पयत् । "अग्निः उपरिष्टात्, तस्य प्रकीर्त्तना—इति अपरम्"—इति ॥

"सुविदत्रं धनं भवति"—"विन्दतेः वा" "एकोपसर्गात्" सु—इति एतेन एकेन उपसर्गेण उपसृष्टात् । "ददातेः वा" "द्व्युपसर्गात्" सु-विभ्यां द्वाभ्याम् उपसर्गाभ्यां युक्तात् । तद् येषामस्ति, ते सुविदत्रियाः ॥ २ (९) ॥

---

8. *(અનુ૦)* 'ત્રણ જ દેવતાઓ છે' એવું અગાઉ કહ્યું હતું. હવે તે દેવતાઓના ભક્તિ અને સાહચર્યની અમે વ્યાખ્યા કરીશું. જેમ કે, અગ્નિની ભક્તિઓ આટલી છે : આ (પૃથિવી) લોક, પ્રાતઃ સવન, વસન્ત ઋતુ, ગાયત્રી છન્દ, ત્રિવૃત્ સ્તોમ, રથન્તર નામનો સામ અને જે દેવગણ પ્રથમ (પૃથિવી) લોકને વિષે (નિઘંટુના પાંચમા અધ્યાયના એકથી ત્રણ ખંડોમાં ગણાવવામાં આવ્યા છે; તથા અગ્નાયી, પૃથિવી અને ઈલા-એ ત્રણ સ્ત્રીઓ (અગ્નિની ભક્તિઓ છે.) હવે આ અગ્નિનું (મુખ્ય) કર્મ ૧. હવિષ્નું વહન કરવું (=દેવતાઓને હવિષાન્ન પહોંચાડવું) અને ૨. દેવતાઓને (યજ્ઞમાં) બોલાવી લાવવા. ૩. આ ઉપરાંત, જે કાંઈ દષ્ટિ-વિષયક (પ્રકાશ આપવો વગેરે) કર્મો છે તે પણ અગ્નિનું (ગૌણ) કર્મ છે એમ જાણવું.

હવે અગ્નિના જે સંસ્તવિક દેવો છે તે (અર્થાત્ અગ્નિની સાથે જેમની સ્તુતિ થાય છે તે દેવો) આ પ્રમાણે છે : ઇન્દ્ર, સોમ, વરુણ, પર્જન્ય અને ઋતુઓ (યજ્ઞોમાં) અગ્નિ અને વિષ્ણુને ઉદ્દેશીને (સંયુક્ત) હવિ આપવામાં આવે છે, પરંતુ ઋગ્વેદની કોઈ પણ શાખામાં (दशतयीषु=दशमण्डलावयवप्रविभागेन तांयत इति दशतयः= ऋग्वेदः, तस्य शाखाः दशतय्यः, तासु सर्वास्वपि शाखासु इति दशतयीषु ॥ दुर्गः) તે બન્ને દેવોની સંયુક્ત સ્તુતિવાળો મન્ત્ર (ઋક્) જોવા મળતો નથી. એ જ પ્રમાણે અગ્નિ અને પૂષાને ઉદ્દેશીને (સંયુક્ત) હવિ આપવામાં આવે છે, પરંતુ તેમની સહસ્તુતિ જોવા મળતી નથી. અહીં વિભક્ત (અલગ) સ્તુતિવાળી ઋચાનું ઉદાહરણ આપવામાં આવે છે :—

"ભુવન (લોક)નું રક્ષણ કરનાર, જ્ઞાની અને જેના પશુઓ નષ્ટ થયા નથી એવા પૂષન્ દેવ તને અહીંથી (મર્ત્યલોકમાંથી) ચ્યુત કરે.

તે (અગ્નિદેવ) તને પિતૃઓને આપી દે અને એ અગ્નિદેવ તને પુષ્કળ ધનવાળા દેવોને આપી દે." પૂષા (આદિત્ય) તને અહીંથી પ્રચ્યુત કરે. (એ પૂષા) વિદ્વાન્ અનષ્ટપશુ અને ભુવનના ગોપા છે. અર્થાત્ આ આદિત્ય જ બધા ભૂતોનું રક્ષણ કરનાર છે. આ મન્ત્રમાં स त्वैतेभ्यः परि ददत्पितृभ्यः । એવો ત્રીજો પાદ સંશયગ્રસ્ત છે, કારણ તે તેમાં સઃ એવું સર્વનામપદ પ્રથમ પાદમાં આવેલ પૂષાનો અન્વાદેશ છે એમ કેટલાકનું કહેવું છે, તો બીજા લોકોના મતે તે (સઃ એવું સર્વનામપદ) આગળ ઉપર ચોથા પાદમાં આવતા અગ્નિ પદનો ઉલ્લેખ કરનારું છે. 'અગ્નિ સુવિદત્રિય (= ધનવાળા) દેવોને (તને આપી દે). 'અહીં 'સુવિદત્ર' શબ્દ ધનનો વાચક છે. (તેની વ્યુત્પત્તિ આ પ્રમાણે હોઈ શકે :) સુ એવા ઉપસર્ગપૂર્વકના √વિદ્ (મેળવવું) ધાતુ ઉપરથી તે (સુવિદત્ર) શબ્દ બન્યો હશે. અથવા સુ + વિ એવા બે ઉપસર્ગપૂર્વકના √દા (આપવું) ધાતુ ઉપરથી તે શબ્દ બન્યો હશે.

8. *(વિમર્શ)* ત્રણ સ્થાનના ત્રણ દેવો છે એમ અગાઉ જોયું હતું. હવે આ દેવતાઓના ભક્તિ અને સાહચર્યની વ્યાખ્યા કરવામાં આવશે. અહીં भक्तिसाहचर्यम् એટલે भक्तिश्च साहचर्यञ्च भक्तिकृतं वा साहचर्यम्. એવો અર્થ થાય છે. અગ્નિ વગેરે દેવતાઓ વડે પૃથિવી વગેરે લોકનું સેવન (ભજન) થાય છે. તેને જ ભક્તિ કહે છે, અને સહચરભાવને સાહચર્ય કહે છે. શૌનકે બૃહદ્દેવતામાં કહ્યું છે કે—

निरूप्यते हविर्यस्यै सूक्तं च भजते च या ।

सैव तत्र प्रधानं स्यान्न निपातेन या स्तुता ॥ (१—७८)

(યજ્ઞાદિ કાર્યોમાં જે દેવતાને ઉદ્દેશીને હવિ આપવામાં આવે છે અને જે દેવતાની એક આખા સૂક્તમાં સ્તુતિ થાય છે તે દેવતાને પ્રધાનદેવતા કહે છે, પરંતુ જેની એક ગૌણ રૂપે-પ્રાસંગિક રૂપે-સ્તુતિ કરવામાં આવી હોય તે પ્રધાન દેવતા કહેવાતી નથી.) આ વ્યવસ્થા મુજબ અમુક મન્ત્રનો પ્રધાનાદિ દેવતા કોણ છે તે નક્કી થઈ શકે છે. પરંતુ અસંવિજ્ઞાતપદવાળા મંત્રમાં ભક્તિ કે સાહચર્યને આધારે પ્રધાનાદિ દેવતાનો નિર્ણય કરવામાં આવે છે. આ સન્દર્ભમાં હવે યાસ્ક પૂર્વોક્ત ત્રણેય સ્થાનના દેવતાઓના ભક્તિ-સાહચર્યને અહીં વર્ણવે છે.

---

9. अथ एतानि इन्द्रभक्तीनि । अन्तरिक्षलोकः । माध्यंदिनं सवनम् । ग्रीष्मः । त्रिष्टुप् । पञ्चदश स्तोमः । बृहत् साम । ये च देवगणाः समाम्नाताः मध्यमे स्थाने । याश्च स्त्रियः । अथास्य कर्म रसानुप्रदानम् । वृत्रवधः । या च का च बलकृतिः इन्द्रकर्मैव तत् । अथ अस्य संस्तविकाः देवाः । अग्निः सोमः वरुणः पूषा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

बृहस्पतिः ब्रह्मणस्पतिः पर्वतः कुत्सः विष्णुः वायुः । अथापि मित्रः वरुणेन संस्तूयते । पूष्णा रुद्रेण च० सोमः । अग्निना च पूषा । वातेन च पर्जन्यः ॥

"अथ एतानि इन्द्रभक्तीनि"—इति । पूर्ववत् सर्वम् "अन्तरिक्षलोकः"—इत्येवमादि । "ये च देवगणाः समाम्नाताः" मरुदादयः । "याश्च स्त्रियः" अदित्याद्याः ॥

"अथ अस्य कर्म" ।—"रसानुप्रदानम्" अवश्यायनम्, वर्षादि, "वृत्रवधः" मेघवधः, या च का च बलकृतिः" अन्यापि । इन्द्रकर्म एव तत्"—इति आदरार्थं पुनर्वचनम्, अपि कीटपिपीलिकादिषु, यद्बलेन क्रियते सर्वम्, इन्द्रकर्मैव तदिति ॥

"अथ अस्य संस्तविकाः देवाः" । "अग्निः, सोमः"—इत्येवमादयः । तद्यथा,—

'इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः । तद् वांचेति प्र वीर्य्यम् ॥'—इति (ऋ० सं० ३, १, १२, ४) विश्वामित्रस्यार्षम् । गायत्री । ऐन्द्राग्ने हविषि विनियोगः । हे 'इन्द्राग्नी' 'रोचना' रोचनौ दीपनौ हविषा च उदकेन च 'दिवः' 'परिभूषथः' वाजेषु, अस्मान् सर्वतः, येनान्नेषु स्वामित्वेन भवेमहि, तथा कुरुतम् । 'तत्' वीर्य्यम् 'वाम्' भवतः 'प्र' प्रकृष्टम् अहम् 'चेति' जाने येन परिभावययो यागेषु स्तोतॄन् पुरः । अत एवमाशास्महे ॥

सोमेन संस्तवः—"इन्द्रासोमा समघशंसम्"—इत्यत्र व्याख्यातः ॥

वरुणेन संस्तवः—"इन्द्रावरुणा युवमध्वराय नः"—इति व्याख्यातः शेषः ॥

"इन्द्रापूषणा वयं सख्याय स्वस्तये । हुवेम वाजसातये ॥"—इति (ऋ० सं० ४, ८, २३, १) । पूष्णा संस्तवः । भारद्वाजस्येयमार्षम् । गायत्री । ऐन्द्रापौष्णे हविषि विनियोगः । हे 'इन्द्रापूषणौ !' 'सख्याय' समानख्यानाय, 'स्वस्तये' स्वस्त्ययनाय च, 'वाजसातये च' अन्नसननाय च 'हुवेम' आह्वयामहे युवां वयं नित्यं यज्ञेषु इदमाशास्महे ॥

"इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती । उक्थं मदश्च शस्यते ॥"—इति (ऋ० सं० ३, ७, २५, १) । बृहस्पतिना संस्तवः । वामदेवस्यार्षम् । गायत्री । ऐन्द्राबार्हस्पत्ये हविषि विनियोगः । हे 'इन्द्राबृहस्पती !' 'इदं' 'हविः' यद् वयं दद्मः, तत् 'प्रियम्' इष्टम् 'आस्ये' 'वाम्' अस्तु । यत् च इदम् 'उक्थं' 'शस्यते' "मदः च' प्रतिगरेण सह, तच्च वां प्रियमस्तु । इत्येतदाशास्महे ॥

"विश्वं सत्यं मघवाना युवोरिदापश्च न प्रमिनन्ति व्रतं वाम् । अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम् ॥" —इति (ऋ० सं० २, ७, ३, २) । ब्रह्मणस्पतिना संस्तवः । गृत्समदस्येयमार्षम् । त्रिष्टुप् । 'विश्वं' सर्वं जगत् 'सत्यं' यावदिमस्ति । किञ्च, हे 'मघवाना' मघवानौ धनवन्तौ 'इन्द्रब्रह्मणस्पती !' युवामुच्येथे । 'युवोः' युवयोः सर्वम् एतत् स्वभूतम् । किञ्च, यतः सर्वस्येशानौ स्थः, अतः 'आपश्च' आपोऽपि 'न प्रमिनन्ति' न हिंसन्ति, 'व्रतम्' कर्म 'वां' युवयोः यथासङ्कल्पं वर्त्तते । यौ युवाम् एवमतिमहानुभावौ, तौ 'नः' अस्माकम् 'अच्छ' आभिमुख्येन इदं 'हविः' 'जिगातम्' आगच्छतं भोक्तुम् । 'युजा' युजौ 'इव' सहचारिणौ 'वाजिना' वाजिनौ रथात् विमुक्तौ बुभुक्ष स्वम् 'अन्नम्' । इत्येतदाशास्महे ॥

"इन्द्रापर्वता बृहता रथेन वामीरिष आवहतं सुवीराः वीतं हव्यान्यध्वरेषु वर्द्धेथां गीर्भिरिलया मदन्ता ॥"—इति (ऋ० सं० ३, ३, १९, १) । पर्वतेन संस्तवः । विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । हे 'इन्द्रापर्वता' इन्द्रापर्वतौ ! 'देवा' देवौ युवामुच्येथे । 'बृहता' महता रथेन, महतोदकरंहणेन उदकदानेन 'वामीः' वननीयाः 'इषः' अन्नानि 'आवहतम्' आवहन्तम् ईरयन्तं, व्रीह्यादीनि प्रेरयन्तम् । 'सुवीराः' शोभनवीराः । ततः स्वे काले ईजानानामस्माकं 'वीतं' भक्षयतम् 'हव्यानि' पुरोडाशादीनि 'अध्वरेषु' । 'वर्द्धेथाम्' च 'गीर्भिः' स्तुतिभिः पुनः पुनः प्रतिकर्म 'इलया' अन्नेन 'मदन्ता' मदन्तौ तृप्यन्तौ । इत्येतदाशास्महे ॥

"इन्द्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहन्तु । निःषीमद्भ्यो निर्धमथो निःषधस्थान्मघोनो हृदो वरथस्तमांसि ॥" —इति (ऋ० सं० ४, १, ३०, ४) । कुत्सेन संस्तवः । अवस्योरार्षम् । त्रिष्टुप् । 'इन्द्राकुत्सा' हे इन्द्राकुत्सौ ! 'वहमाना' वहमानौ उह्यमानौ रथेन । युवां ब्रुवे । 'आवहन्तु वाम्' 'अत्याः' अश्वाः 'अपि' 'कर्णे' नित्यं कर्मणे । ततश्च कर्मणा परितोषितः, अस्माभिः 'निःषीमद्भ्यः' 'निर्धमथः' सर्वतः अरीन् 'षधस्थात्' 'समानस्थानादन्तरिक्षादद्भ्यः' अपः । ततः ओषध्याद्युत्पत्त्या कालं कुर्वाणौ । 'मघोनः' महान्त्येतानि 'तमांसि' 'हृदः' हृदयस्य छादकानि अनाकालभयकृतानि 'वरथः' वारयथः । इत्येतदाशास्महे ॥

"इन्द्राविष्णूदृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् । शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसु रस्य वीरान् ॥" —इति (ऋ० सं० ५, ६, २४, ५) । विष्णुना संस्तवः । वसिष्ठस्यार्षम् । त्रिष्टुप् । त्रैधातव्यां विनियोगः । हे 'इन्द्राविष्णू !' युवां 'दृंहिताः' स्थिरीकृताः 'शम्बरस्य नवतिं नव च पुरः' मेघस्य असुरस्य वा स्वभूताः पुरः 'श्नथिष्टम्' हतवन्तौ स्थः । ताश्च त्वा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

मेघान्तर्गताः 'शतं' 'वर्चिनः' दीप्तिमतः अन्नवतो वा 'सहस्रञ्च साकम्' अवस्थितान् सहभावेन एकनिश्चयान् 'हथः' हतवन्तौ स्थः। 'अप्रति' अप्रतीकारान् 'वीरान्' 'असुरस्य' शम्बरस्य स्वभूतान्। यौ युवामेतदतिदुष्करमकार्षम्, तावस्माकमपि शत्रून् हथः इत्येतदाशास्महे।

"इन्द्रवायू इमे सुता उप प्रयोभिरागतम्। इन्दवो वामुशन्ति हि ॥"—इति (ऋ० सं० १, १, ३, ४)। वायुना संस्तवः। मधुच्छन्दस आर्षम्। गायत्री। उपात्तद्विकर्मात्मनोऽपि हि मध्यमस्य एकस्यापि वाय्विन्द्रभावेन विकरणधर्मित्वात् द्वित्वं बिभ्रतः नैरुक्तपक्षेऽपि द्विवचनसंस्तुतिरविरुद्धा, यथा एकस्योदकस्य द्विपात्रस्थस्य द्विवचनोक्तिः। ऐन्द्रवायवस्य ग्रहस्य पुरोऽनुवाक्येयम्। हे 'इन्द्रवायू !' युवामुच्येथे। 'इमे' 'सुताः' अभिषुताः इन्दवः, सोमः इत्यर्थः। सुसंस्कृताः सोमा यस्मात् 'उशन्ति' कामयन्ते युवामात्मपानाय, तस्मात् उपागच्छतम् पातुमेतान्। कथं पुनरुपागच्छतम् ? 'प्रयोभिः' अन्नैः अस्मत्सम्प्रदेयैरभ्युद्यतैः। इत्येतदाशास्महे ॥

"अथापि मित्रो वरुणेन संस्तूयते"। 'अथ' शब्दः प्रकृतात् इन्द्राद् विशेषतो मित्रादीन् प्रकरोति। 'अपि'—इति सम्भावने। प्रकृताभ्यस्तिसृभ्यो देवताभ्यः पराण्यपरेणाभिधानेन संस्तवयुक्तानीति भेदपक्षे अविरोध एव, नैरुक्तपक्षे यद्विरुद्धाभासमिव किञ्चिदत्र, तदिन्द्रवायुसंस्तवे प्रतिसमाहितम्। 'मित्रो वरुणेन'—इत्येवमादिषु या प्रथमया निर्दिश्यते, सा मुख्या स्तुतिः, या तृतीयया निर्दिष्टा, सा अमुख्या ॥

"आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजांसि सुक्रतू ॥"—इति (ऋ० सं० ३, ४, ११, ६)। विश्वामित्रस्यार्षम्। गायत्री। मैत्रावरुण्याः पयस्यायाः पुरोऽनुवाक्या। 'मित्रावरुणा' हे मित्रावरुणौ ! 'सुक्रतू' शोभनकर्माणौ ! युवामुच्येथे। 'गव्यूतिम्' गोयूतिम्, यवसोदकोत्पत्तये 'रजांसि' च गोयूतेर्यान्यन्यानि स्थानानि व्रीह्यादिधान्योत्पत्तिक्षेत्राणि, तानि च व्रीह्याद्युत्पत्तये 'मध्वा' मधुरेण शस्यसम्पत्करेण 'घृतैः' घृतेन उदकेन 'नः' अस्माकम् 'उक्षतम्' सिञ्चतम्। इत्येतदाशास्महे ॥

"पूष्णा रुद्रेण च सोमः"। सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः। जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम् ॥"—इति (ऋ० सं० २, ८, ६, १)। पूष्णा सोमस्य संस्तवः। गृत्समदस्यार्षम्। त्रिष्टुप्। सोमापौष्णस्य चरोः पुरोऽनुवाक्या। सोमापूष्णौ चन्द्रसूर्यौ, तावुच्येते। 'सोमापूषणा' हे सोमापूषणौ ! युवां 'जनना' जननौ जनयितारौ 'रयीणां' धनानाम्, 'जनना' जनयित्रारौ च 'पृथिव्याः'। 'जातौ' जातमात्रो एव युवां 'विश्वस्य' सर्वस्य 'भुवनस्य' भूतजातस्य 'गोपौ' गोप्तारौ बभूवथुः। 'देवाः' च रश्मयः युवामेव 'अमृतस्य' उदकस्य 'नाभिं' नहनं बन्धनम्, आधारं सर्वलोकस्य 'अकृण्वन्' सदा कुर्वन्ति। युवामिदं नाम अस्माकं कुरुतमित्याशिषा निराकाङ्क्षम् ॥

"सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम्। अवस्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥"—इति (ऋ० सं० ५, १, १८, ३)। रुद्रेण संस्तवः। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। सोमारौद्रस्य चरोः पुरोऽनुवाक्या। 'सोमारुद्रा' हे सोमारुद्रौ ! युवामुच्येथे। एतानि सर्वाणि 'भेषजानि' अस्मे, अस्माकं 'तनूषु' शरीरेषु 'धत्तम्'। किञ्च, 'अवस्यतम्' नित्यमस्मानवितुं रक्षितुमिच्छतम्। किञ्च, 'यत्' 'नः' अस्माकम् मनोवाक्कायैः 'कृतम्' 'एनः' किञ्चित् अस्ति, 'तनूषु' तत् 'मुञ्चतम्' 'अस्मत्' अस्मत्तः ॥

"अग्निना च पूषा" मध्यमस्थानेन च द्युस्थानेन च संस्तवः इति, पार्थिवेन प्रतिषेधात्। ऋचं नोदाहरति, मृग्यमुदाहरणं येन संस्तवः ॥

"वातेन च पर्जन्यः"। धर्त्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः। आप ओषधीः प्रतिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥"—इति (ऋ० सं० ८, २, १३, ५)। वसुकर्णस्यार्षम्। त्रिष्टुप्। 'धर्त्तारः दिवः ऋभवः 'सुहस्ता' शोभनहस्तौ 'वातापर्जन्या' वातापर्जन्यौ च, 'आपः' च, 'ओषधीः' ओषयश्च, 'भगः' च, 'रातिः' दाता, 'वाजिनः' च 'धर्त्तारः' धारयितारः, 'दिवः' द्योतनवन्तः ये उक्ताः उदकस्य। 'महिषस्य' महतः 'तन्यतोः' सर्वार्थतनितुः। 'हवं' हवनमाह्वानम् 'नः' अस्माकं 'आयन्तु' आगच्छन्तु। आगत्य च 'प्रतिरन्तु' प्रतीर्णाः कुर्वन्त्वेता अस्मद् 'गिरः' वर्द्धयन्त्वित्यर्थः। वातापर्जन्याविति अत्र संस्तवः ॥ ३ १० ॥

---

१. (અનુ०) હવે ઇન્દ્રની ભક્તિ વર્ણવવામાં આવે છે : અન્તરિક્ષ લોક, માધ્યન્દિન (બપોરનું) સવન, ગ્રીષ્મ ઋતુ, ત્રિષ્ટુપ્ છંદ, પંચદશ સ્તોમ, બૃહદ્ નામનો સામ અને મધ્યમ (અન્તરિક્ષ) સ્થાનના જે દેવગુણ (નિઘંટુ ૫-૪માં) ગણાવ્યા છે અને જે (અદિતિ વગેરે) સ્ત્રીઓ ગણાવી છે (તે ઇન્દ્ર ભક્તિઓ છે). હવે આ ઇન્દ્રનાં કર્મો આ પ્રમાણે છે : રસાનુપ્રદાન (જલવર્ષા કરવી) અને વૃત્રનો વધ કરવો; તદુપરાંત જે કાંઈ બળથી સંપન્ન થાય એવાં કર્મો હોય તે બધાં જ ઇન્દ્રનાં કર્મો છે. આ ઇન્દ્રના સંસ્તવિક

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

દેવો આટલા છે : અગ્નિ, સોમ, વરુણ, પૂષન્, બૃહસ્પતિ, બ્રહ્મણસ્પતિ, પર્વત, કુત્સ (ઋષિ), વિષ્ણુ અને વાયુ. આમાંથી મિત્ર (સૂર્ય)ની વરુણની સાથે સ્તુતિ થાય છે. સોમની પૂષન્ અને રુદ્રની સાથે સ્તુતિ થાય છે. પૂષન્‌ની અગ્નિની સાથે સ્તુતિ થાય છે અને પર્જન્યની વાતની સાથે સ્તુતિ થાય છે.

10. अथ एतानि आदित्यभक्तीनि । असौ लोकः । तृतीयसवनम् । वर्षाः । जगती । सप्तदश स्तोमः । वैरूपं साम । ये च देवगणाः समाम्नाताः उत्तमे स्थाने । याश्च स्त्रियः । अथास्य कर्म रसादानम् । रश्मिभिश्च रसधारणम् । यच्च किंचित् प्रवह्लितम् आदित्यकर्मैव तत् । चन्द्रमसा वायुना संवत्सरेण इति संस्तवः ॥

अथैतान्यादित्यभक्तीनि"—इति पूर्ववत् "असौ लोकः" इत्येवमादि । "सूर्यो द्युस्थानः"—इति पूर्वमधिकृत्य "अथ एतानि आदित्यभक्तीनि"—इति इहाब्रवीत् स्वपक्षोद्योतनानुस्मृतये ॥

"ये च देवगणाः समाम्नताः उत्तमे स्थाने" आदित्यादयः । "याश्च स्त्रियः—उषाः, सूर्य्या, वृषाकपायी, सरण्यूः, देवपत्न्यः इति ॥

"अथास्य कर्म"—"रसादानम्"—इत्येवमादि, "यच्च किञ्चित् प्रवल्हितम् आदित्यकर्म एव तत्" ।

"चन्द्रमसा, वायुना, संवत्सरेण इति संस्तवः" । अल्पत्वात् स्वशब्दैरेव ब्रवीति, नाधिकारवचनं करोति अथास्येति ॥

"पूर्वापरं चरतो माययैतौ शिशू परियातो अध्वरम् विश्वान्यन्यो भुवनाभिचष्ट ऋतूनन्यो विदधज्जायते पुनः ॥"—इति (ऋ० सं० ८, ३, २३, ३) । चन्द्रमसा संस्तवः । सूर्य्यायाश्चार्षम् । जगती । राजयक्ष्मेष्टचां वैश्वदेवस्य चरोः पुरोऽनुवाक्यैषा । 'पूर्वापरं चरतः' सूर्य्याचन्द्रमसौ पूर्वपक्षे पूर्वः सूर्य्यः अपरश्चन्द्रमाः, अपरपक्षे पुनरपरः सूर्य्यः पूर्वश्चन्द्रमाः । एवम् 'एतौ' चरणमनुपरन्तौ सर्वदा चरतः । तौ पुनः 'मायया' योगैश्वर्य्यकृतया कयापि प्रज्ञयेति कस्तत्वं वेद, न ह्ययोगिनौ एवं शक्तौ चरितुमिति । अपि चैतदपि चित्रम्,—यदपरिखिद्यमानौ आभूतसंप्लवात् 'शिशू' इव 'क्रीड़न्तौ' । 'सुध्वरं' यज्ञमभिनिष्पादयन्तौ सर्वमिदं 'परियातः' परिगच्छतः । तत् कथमिति,—"विश्वान्यन्यो भुवनाभिचष्टे" । 'विश्वानि' 'भुवना' भुवनानि भूतानि 'अभिचष्टे' अभिपश्यति 'अन्यः' आदित्यः, अथैतान्यभिद्रष्टव्यानि उपकारकत्वेन तथैव सत्तानि पश्यति । 'ऋतून्' 'अन्यः' चन्द्रमाः 'विदधत्' अभिनिष्पादयत् स्वगत्या । 'पुनः' पुनः पुनः प्रतिमासं 'जायते' जायमानः उदेति अस्तमेति च । असंस्तवेनोत्तरोऽर्द्धर्चः । यावेतदेवमत्यद्भुतं किमपि चरणं चरतः, तावेतौ अगदमस्मद्यजमानं कुरुतमित्याशिषा निराकाङ्क्षः ॥

वायुना संस्तवः "सप्त ऋषयः प्रतिहिताः (य० वा० सं० ३४, ५५)"—इत्यत्र । तत्र 'जागृतो अस्वप्नजौ'—इत्येतस्मिन् पादे "वाय्वादित्यौ"—इति वक्ष्यति ॥

संवत्सरेण च संस्तवः "पञ्चपादं पितरम् (ऋ० सं० २, ३, १६, २)"—इति व्याख्यातः ॥ ४ ॥

10. (અનુ૦) હવે આદિત્યની ભક્તિ વર્ણવવામાં આવે છે : પેલો (દ્યુ)લોક. તૃતીય (સાયંકાલિક) સવન, વર્ષાઋતુ, જગતી છન્દ, સપ્તદશ સ્તોમ, વૈરૂપ નામનો સામ અને ઉત્તમ (દ્યુ) સ્થાનના જે દેવગણ (નિઘંટુ ૫-૫ માં) ગણાવ્યા છે અને જે (ઉષા વગેરે) સ્ત્રીઓ ગણાવી છે (તે આદિત્ય-ભક્તિઓ છે.) આ આદિત્યનાં કર્મો આ પ્રમાણે છે : ૧. રસનું ગ્રહણ કરવું (જળ સૂકવવું), ૨. કિરણો વડે રસને ધારણ કરવું અને ૩. જે કંઈ ગુપ્ત કર્મો છે (દા.ત., વનસ્પતિની વૃદ્ધિ કે પુષ્ટિ વગેરે) તે આદિત્યનાં જ કર્મો છે. ચન્દ્રમા, વાયુ અને સંવત્સરની સાથે આ આદિત્યની સ્તુતિ થાય છે.

10. (વિમર્શ) यच्च किञ्चित् प्रवह्लितम्‌નો અર્થ 'જે કાંઈ ગુપ્ત કર્મો છે' એવો કર્યો છે. સ્કન્દસ્વામીએ પણ 'અન્તર્ધાન કર્મ' એવો અર્થ જ કર્યો છે. પરંતુ પં. શિવનારાયણ શાસ્ત્રી જણાવે છે કે આ શબ્દ અસ્પષ્ટ છે. દુર્ગે આની કોઈ વ્યાખ્યા કરી નથી. બૃહદ્દેવતામાં આ વિશેના પ્રકરણમાંથી પણ અર્થ સ્પષ્ટ થતો નથી. પં. સીતારામજી શાસ્ત્રીએ કોઈ વચન ઉદ્‌ધૃત કર્યું છે : अनभिव्यक्तिविशिष्टो वाक्यार्थः प्रवह्लितम् । મોનિયર વિલિયમે પ્રહેલિકા સમાન (દુર્બોધ) અને રોથે ગૂઢ (રહસ્યપૂર્ણ) અર્થ કર્યો છે. ડૉ. લક્ષ્મણ સરૂપે તેનો 'મહત્તા' અર્થ કર્યો છે. (નિરુક્તમીમાંસા. પૃ. ૨૯૧)

11. एतेषु एव स्थानव्यूहेषु ऋतुच्छन्दः स्तोमपृष्ठस्य भक्तिशेषम् अनुकल्पयीत । शरत् अनुष्टुप् एकविंशः स्तोमः वैराजं साम इति पृथिव्यायतनानि । हेमन्तः पङ्क्तिः त्रिणवः स्तोमः शाक्करं साम इत्यन्तरिक्षायतनानि । शिशिरः अतिच्छन्दाः त्रयस्त्रिंशः स्तोमः रैवतं साम इति द्युभक्तीनि ॥

"एतेषु एव स्थानव्यूहेषु ऋतुच्छन्दःस्तोमपृष्ठस्य भक्तिशेषमनुकल्पयीत" । ऋतवश्च छन्दांसि च स्तोमाश्च पृष्ठानि च

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ऋतुच्छन्दःस्तोमपृष्ठम्, तस्य ऋतुच्छन्दःस्तोमपृष्ठस्य । ऋतुभक्तिशेषम्, छन्दोभक्तिशेषम्, स्तोमभक्तिशेषम्, पृष्ठभक्तिशेषञ्च ।

तद्यथा,—"शरत्, अनुष्टुप्, एकविंशस्तोमः, वैराजं साम—इति पृथिव्यायतनानि" । अनग्निलिङ्गेऽपि चेन्मन्त्रे एतेषामन्यतमं स्यात् स आग्नेय इति प्रतिपत्तव्यम् । एवमेवोत्तरयोरपि स्थानव्यूहयोः । व्यूहो नाम विस्तारः । "हेमन्तः, पङ्क्तिः, त्रिवणस्तोमः, शाक्वरं साम—इति" "अन्तरिक्षायतनानि" अन्तरिक्षलोकायतनानि । "शिशिरः, अतिच्छन्दाः, त्रयस्त्रिंशस्तोमः, रैवतं साम—इति" "द्युभक्तीनि" द्यां भजन्त इति द्युभक्तीनि, अपि वा आदित्यं भजन्त इति द्युभक्तीनि । विभक्तिग्रहणं प्रणाडिकोपदर्शनार्थम्, एतेषां स्तुतिः सा स्तुतिसङ्क्रमणन्यायेन स्थानाधिपतेः सूर्य्यस्य स्तुतिरिति । सर्वत्रैवम् ॥ ५ (११) ॥

सर्वमितन्मन्त्राश्रयमित्युक्तम्, त एव तावत् मन्त्राः कस्मात् ? इति वक्तव्यमत आह,—

---

11. (અનુ૦) આ ત્રણ સ્થાનોના વિસ્તારને વિશે જ ઋતુ, છન્દ, સ્તોમ અને પૃષ્ઠનો ભક્તિશેષ (બાકી રહેલા ભાગો)ની વહેંચણી કરવી જોઈએ. જેમ કે, ૧. શરત્ ઋતુ, અનુષ્ટુભ્ છન્દ, એકવિંશતિ (એકવીસ) સ્તોમ અને વૈરાજ નામનો સામ-આ પૃથિવીસ્થાનીય છે. ૨. હેમન્ત ઋતુ, પંક્તિ છન્દ, ત્રિણવ (સત્યાવીસ) સ્તોમ અને શાક્વર નામનો સામ-આ અન્તરિક્ષસ્થાનીય છે. ૩. શિશિર ઋતુ, અતિચ્છન્દા છન્દ, ત્રયસ્ત્રિંશ (તેત્રીસ) સ્તોમ અને રૈવત નામનો સામ-આ દ્યુલોક સાથે જોડાયેલ છે.

11. (વિમર્શ) અહીં વર્ણવેલા ત્રણ સ્થાનના ત્રણ દેવતાઓના ભક્તિ, સાહચર્ય અને સાંસ્તવિક દેવો વગેરેની જ્યારે સ્તુતિ કરવામાં આવે છે ત્યારે સ્તુતિસંક્રમણ ન્યાયે તે તે સ્થાનના અધિપતિની સ્તુતિ થઈ એમ ગણાય છે.

---

12. मन्त्राः मननात् । छन्दांसि छादनात् । (स्तोमः स्तवनात्), यजुः यजतेः । साम संमितम् ऋचा । अस्यतेर्वा । ऋचा समं मेने इति नैदानाः । गायत्री गायतेः स्तुतिकर्मणः । त्रिगमना वा विपरीता । गायत्री मुखात् उदपतत् इति च ब्राह्मणम् । उष्णिक् उत्स्नाता भवति । स्निह्यतेर्वा स्यात् कान्तिकर्मणः । उष्णीषिणी इव इत्यौपमिकम् । उष्णीषं स्नायतेः । ककुप् ककुभिनी भवति । ककुप् कुब्जः च कुजतेर्वा । उब्जतेर्वा । अनुष्टुप् अनुष्टोभनात् । गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेन अनुष्टोभति इति च ब्राह्मणम् । बृहती परिबर्हणात् । पङ्क्तिः पञ्चपदा । त्रिष्टुप् स्तोभत्युत्तरपदा । का तु त्रिता स्यात् । तीर्णतमं छन्दः । त्रिवृत् वज्रः । तस्य स्तोभनी इति वा । यत् त्रिः अस्तोभत् तत् त्रिष्टुभः त्रिष्टुप्त्वम् इति विज्ञायते ॥

जगती गततमं छन्दः । जलचरगतिर्वा । जल्गल्यमानोऽसृजत् इति च ब्राह्मणम् । विराट् विराजनाद्वा । विराधनाद्वा । विप्रापणाद्वा । विराजनात् संपूर्णाक्षरा । विराधनात् ऊनाक्षरा । विप्रापणात् अधिकाक्षरा । पिपीलिकमध्या इत्यौपमिकम् । पिपीलिका पेलतेः गतिकर्मणः ॥

"मन्त्राः मननात्" तेभ्यो ह्यध्यात्माधिदैवाधियज्ञादि मन्तारो मन्यन्ते, तदेषां मन्त्रत्वम् ॥

ते पुनश्छन्दोमयाः, नाच्छन्दसि वागुच्चरतीति अथ "छन्दांसि" कस्मात् ?"छादनात्" । "यदेभिरात्मानमाच्छदयत् देवा मृत्योर्विभ्यत, तच्छन्दसां छन्दस्त्वम्"—इति विज्ञायते ॥

अथ "यजुः" कस्मात् ? "यजतेः" धातोः, तेन हि विशेषत इज्यते, सर्वत्र याज्यान्ते वषट्कारविधानात् ॥

अथ "साम" कस्मात् ? तद्धि "सम्मितम् ऋचा" यावती ऋक् तावदेव परिमाणतः । "अस्यतेः वा" क्षेपणार्थस्य (दि० प०), प्रक्षिप्तमिव हि तत् ऋचि भवति । विज्ञायते च "तस्मादृच्यध्यूढं साम गीयते" । अथवा "स्यतेः वा" इति । "षोऽन्तकर्मणि (दि० प०)" अन्त्यं तत् कर्म भवति, संहिता—पदम्—साम इति । "ऋचा समं मेने—इति नैदानाः" । 'ऋचा' एतत् 'समम्' इत्येवं प्रजापतिः 'मेने' ज्ञातवान् । अथवा आत्मानमेव 'ऋचा समं' 'मेने' ज्ञातवत्, तत् साम्नः सामत्वम् । इत्येवं 'नैदानाः' मन्यन्ते । निदानमिति ग्रन्थः, तद्विदो नैदानाः ॥

"छन्दांसि छादनात्"—इत्युक्तम्, तानि च पुनरमूनि गायत्रीप्रमुखानि । अतो गायत्रीं निराह,—"गायत्री, गायतेः स्तुतिकर्मणः" तया हि गीयन्ते स्तूयन्ते देवताः ॥ ६ ॥

अतः परमुष्णिगादीनि छदांसि चतुरुत्तराणि तानि, तत्प्रसङ्गेनैव निराह । —

तत्र तावत्, "उष्णिक्" "उत्स्नाता" गायत्रीतश्चतुर्भिरक्षरैरधिकैरुद्वेष्टिता इव "भवति" । उष्णिग्गायत्र्यौ जागतश्चेति । "स्निह्यतेः वा स्यात् कान्तिकर्मणः" स्निग्धमिष्टं देवतानां कान्तमेतच्छन्दः । "उष्णीषिणी" इव "वा,—इति औपमिकम्" । चत्वार्य्यक्षराण्यस्याः उष्णीषमिव लक्षयन्ते, तेनोष्णिक् । अथोष्णीषं कस्मात् ? "उष्णीषम्" "स्नायतेः" शौचार्थस्य, शुद्धं हि तद् भवति शुक्लम् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"ककुप्" "ककुभिनी" इव "भवति" सैवोष्णिक् जागतेन पादेनोपहितेन मध्यतः ककुबित्युच्यते, स तस्याः ककुबिव मध्यतो भवति. तेन ककुभिनीव ककुप् । अथ "ककुप्" कस्मात् ? "कुजतेः" "वा" कौटिल्यार्थस्य, "उब्जतेः" "वा" न्यग्भावार्थस्य, नतं हि तद् भवति ॥

"कुब्जश्च" कुब्जोऽप्यनयोरेवान्यतरस्मात् ॥

"अनुष्टुप्" "अनुष्टोभनात्" । किमियमनुष्टोभनमिति ?—"गायत्री मेव त्रिपदां सतीं चतुर्थेनपादेन अनुष्टोभति,—इति च ब्राह्मणम्" । स्वमतं 'च'शब्देन समुच्चिनोति । गायत्री, त्रिभिरष्टाक्षरैः पादैः समाप्यते, तस्याश्च पुनरपरः चतुर्थः पादो भवति, येन तामेव अनुष्टुप् अनुष्टोभति, तस्मादनष्टुप् ॥ ७ ॥

"बृहती" "परिबर्हणात्" परिवृब्ह्यसौ भवति, अनुष्टुभश्चतुर्भिरक्षरैः, उक्तं हि—"बृहती जागतस्त्रयश्च गायत्राः"—इति ॥

"पङ्क्तिः "पञ्चपदा" पञ्चभिः पादैः पङ्क्तिरित्युच्यते ॥

अथ "त्रिष्टुप्" कस्मात् ? ततो विगृह्योत्तरं पदं निराह,—"स्तोभत्युत्तरपदा" स्तोभतिर्धातुरुत्तरं पदं यस्या सेयं स्तोभत्युत्तरपदा । "का तु त्रिता स्यात् ?" अथ पुनः पूर्वपदे येयं त्रिता त्रित्वं श्रूयते 'त्रि' इति, एतत् किमर्थमिति ? "तीर्णतमं" स्तुततममिदं "छन्दः" गायत्र्यादिभ्यो बहुत्वात्, सेयं तीर्णतमा च स्तोभति च त्रिष्टुप् ।"त्रिष्टुप् वज्रः, तस्य स्तोभति इति वा" वज्रमायुधम्, तच्च पुनः प्रायः त्रिसन्धि—शरो वेणुः शृङ्गं शल्यमिति विज्ञायते, तस्य स्तोभति स्तुतिः । अथवा ऐन्द्रमेतच्छन्दः वज्रं चेन्द्रभक्ति, तस्मादुपपद्यते । "यत् त्रिः अस्तोभत्, तत् त्रिष्टुप्त्वम्—इति विज्ञायते" ॥ ८ (१२) ॥

"जगती" 'गततमं छन्दः' अन्त्यमित्वर्थः । अतःपरमतिच्छन्दांसि । "जलचरगतिर्वा" जलोर्मिप्रकारो हि तस्याः प्रस्तारः । "जल्गल्यमानोऽसृजत—इति च ब्राह्मण" । ग्लै हर्षक्षये (भ्वा० प०)' । क्षीणहर्ष इव किलैतां प्रजापतिः ससृजे, ददर्शेत्यर्थः, न हि छन्दांसि क्रियन्ते नित्यत्वादेव छन्दसाम् ॥

विराजः पुरस्तात् त्रिष्टुप् निरुक्ता, बाहुल्यादधियज्ञे च प्रयोगभूयस्त्वात् । अथ पुनर्विराजं निराह,—"विराट्" "विराजनाद्वा, विराधनाद् वा, विप्रापणाद् वा" । "विराजनात्, सम्पूर्णाक्षरा" साकल्याद् विराजत इव । "विराधनात्, ऊनाक्षरा" वैकल्याद् विराध्यन्तीव हि सा । "विप्रापणात्, अधिकाक्षरा" विप्रुतेव हि सा स्वरूपात् ।

"पिपीलिकमध्या इति औपमिकम्" मध्याल्पाक्षरपादा या, सा पिर्पीलिकमध्येव भवति, पिर्पीलिकस्वरूपा । "पिर्पीलिका" कस्मात् ? "पेलतेः" "गतिकर्मणः गत्यर्थस्य ॥ ९ ॥

---

12. (અનુ૦) 'मन्त्र' શબ્દ √मन (મનન કરવું) ધાતુ ઉપરથી બન્યો હશે. 'छन्द' શબ્દ √छद छादय (ઢાંકવું) ઉપરથી બન્યો હશે. ("મૃત્યુથી ડરતાં દેવોએ આ છન્દો વડે પોતાની જાતને ઢાંકી દીધી હતી" એવું બ્રાહ્મણગ્રંથમાં કહ્યું છે.) ('स्तोम' શબ્દ √स्तु સ્તવન કરવું ધાતુ ઉપરથી બન્યો હશે.) 'યજુસ્' શબ્દ √यज (યજન કરવું) ઉપરથી બન્યો હશે. 'સામ' શબ્દ (क) सम् + √मा ઉપરથી બન્યો હશે : ऋक् વડે માપવામાં આવેલાને સામ કહે છે. (અર્થાત્ જેટલી ऋक् હોય છે તેટલો સામ પરિમાણતઃ હોય છે.) (ख) અથવા તો √अस् (ફેંકવું) ઉપરથી 'સામ' શબ્દ બન્યો હશે. (ऋक्માં તે ફેંકવામાં આવેલ હોય એમ લાગે છે.) અહીં सम्मितं ऋचा स्यतेः એવો પદચ્છેદ લઈએ તો જે અન્તિમ કર્મ હોય √षो अन्तकर्मणि તેને સામ કહે છે. સામ ઉપાસનાત્મક છે અને તે અન્તકર્મ ગણાય છે.) (ग) 'निदान' નામના ગ્રન્થને જાણનારા (નૈદાન) લોકોના મતે (દેવતાઓએ) ऋक्ની સમાન (બરોબર) સામને માન્યો છે. 'ગાયત્રી' શબ્દ (क) स्तुत्यर्थक √गै ધાતુ ઉપરથી બન્યો હશે. (ख) અથવા તો જે ત્રિગમના હતી (અર્થાત્ त्रीणि गमनानि यस्याः सा । ત્રણ ચરણવાળી હતી) તેમાં વર્ણો વિપરીત થઈ જવાથી 'ગાયત્રી' શબ્દ બન્યો હશે. (ग) અથવા તો 'ગાતા ગાતા (બ્રહ્માજીના) મુખમાંથી જે પડી ગઈ તે ગાયત્રી' એવું બ્રાહ્મણગ્રન્થોમાં કહ્યું છે. અહીં જે ઉત્સ્નાતા હોય તે ઉષ્ણિગ્. ગાયત્રી છન્દની અપેક્ષાએ જે અધિક ચાર અક્ષરોથી ઉદ્વેષ્ટિત હોય તે ઉષ્ણિગ્ કહેવાય છે. (ख) અથવા કાન્ત્યર્થક √स्निह ધાતુ ઉપરથી આ શબ્દ બન્યો હશે, (એટલે કે જે છન્દ ઇષ્ટ દેવતાઓને સ્નિગ્ધ છે-પ્રિય છે તે) (ग) અથવા તો (ગાયત્રીની અપેક્ષાએ આ છન્દમાં જે ચાર અક્ષરો અધિક છે તે) ઉષ્ણીષ (=પાઘડી) જેવા હોઈ, તેની (ઉષ્ણીષની) ઉપમા આપવાથી એ છંદ ઉષ્ણિગ્ કહેવાયો હશે. અહીં ઉષ્ણીય શબ્દ उत् + √ष्णा (શુદ્ધ કરવું) ઉપરથી બન્યો હશે. (કેમ કે પાઘડી શુદ્ધ અને શુકલ હોય છે.) કકૂપ્ ખૂંધવાળી ककुभिनी હોય છે. (આ છન્દમાં મધ્યભાગમાં કેટલાક અક્ષરો વધારે હોય છે; તેથી તે મધ્યના ભાગમાંથી થોડોક ઉપસેલો જણાય છે. આ ઉપસેલો ભાગ ખૂંધ જેવો લાગે છે.) 'કકૂપ્' શબ્દ (કૌટિલ્ય અર્થવાળા) √कुज् ધાતુ ઉપરથી બન્યો હશે અથવા તો ન્યગ્ભાવાર્થ √उब्ज ધાતુ ઉપરથી બન્યો હશે. (ખૂંધ વાંકી હોય છે અને નમેલી હોય છે એના આધારે આ બે વ્યુત્પત્તિઓ કલ્પવામાં આવી છે.) અનુષ્ટુપ્ અનુષ્ટોભ-અનુસ્તવન-ને કહે છે. 'ત્રણ પાદવાળી ગાયત્રીનું જ ચોથા પાદથી અનુગમન કરે છે એથી એ છન્દને અનુષ્ટુપ્ કહે છે.' એવું બ્રાહ્મણગ્રન્થમાં કહ્યું છે. બૃહતી

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain Digitized by eGangotri

પરિવૃદ્ધિને કારણે કહેવાય છે. (કેમ કે બૃહતીમાં અનુષ્ટુપ્ કરતાં ચાર અક્ષર વધારે હોય છે.) પંક્તિ પાંચ પાદવાળી હોય છે. 'ત્રિષ્ટુપ્' શબ્દમાં સ્તોમતિ પદ ઉત્તરપદ તરીકે રહેલું છે, પરંતુ પ્રશ્ન થશે કે પૂર્વપદમાં જે ત્રિપદ આવેલું છે તે શું છે ? તો જે તીર્ણતમ (બીજા છંદોની પાર જનાર) છંદ છે તે. (અર્થાત્ બીજા છન્દો કરતાં જે અધિક વિસ્તૃત છે.) અથવા તો ત્રિવૃત્ નામનું વજ્ર છે તેમાંથી એ 'ત્રિ'પદં લીધું હશે. આ મુજબ ત્રિવૃત્ નામના વજ્રનું સ્તવન કરે છે તે ત્રિષ્ટુપ્. 'ત્રણવાર સ્તવન કર્યું છે તે ત્રિષ્ટુપ્ત્વ છે' એવું (બ્રાહ્મણગ્રન્થોને આધારે) જણાય છે. (આ છન્દ ઐન્દ્ર ગણાયો છે અને વજ્ર એ ઇન્દ્રસંબંધી-ભક્ત-છે; એ દૃષ્ટિએ આ વ્યુત્પતિ ઉચિત છે. —દુર્ગ.)

જગતી જે અતિદૂર સુધી ગયેલો અર્થાત્ સૌથી છેલ્લો (છન્દ) હોય તેને કહે છે અથવા જળના વહેણ (ઊર્મિ)ની જેમ જેનો પ્રસ્તાર હોય તેને જગતી કહે છે. બ્રાહ્મણગ્રન્થોમાં કહ્યું છે કે ક્ષીણહર્ષ થયા હોય એમ પ્રજાપતિએ આ છન્દની રચના કરી છે (તેનાં દર્શન કર્યાં છે). 'વિરાટ્' વિશેષપણે દીપ્તિમંત હોવાને કારણે (वि + √राज् दीप्तौ), અથવા વિગત ઋધિને કારણે (वि + √राध वृद्धौ), અથવા વિપ્રાપણને કારણે (वि + प्र + √आप व्याप्तौ) કહેવાય છે. અહીં વિરાજનનો અર્થ સમ્પૂર્ણ અક્ષરવાળો છન્દ થાય છે. વિરાધનનો અર્થ ઊન (ઓછા) અક્ષરવાળો છન્દ અને વિપ્રાપણનો અર્થ અધિક અક્ષરવાળો છન્દ થાય છે. પિપીલિકમધ્યા એવું નામ ઉપમાને આધારે આપવામાં આવ્યું છે. (આ છન્દનો મધ્યપાદ અલ્પાક્ષરવાળો હોય છે તેથી પિપીલિક જેવા સ્વરૂપવાળો લાગે છે. પિપીલિક (કીડી)ના શરીરનો વચ્ચેનો ભાગ ખૂબ પાતળો હોય છે. આ જોઈને આ છન્દને પિપીલિકમધ્યા કહ્યો છે.) અહીં 'પિપીલિકા' શબ્દ ગત્યર્થક पेलति ક્રિયા ઉપરથી બન્યો છે.

12. (વિમર્શ) દેવતકાણ્ડમાં દેવતાઓનાં નામોનો સંગ્રહ કરવામાં આવ્યો છે. આ નામોની વ્યાખ્યા શરૂ કરે તે પૂર્વે યાસ્કે અહીં દેવતાઓની સ્તુતિ જે મન્ત્રો દ્વારા વ્યક્ત થઈ છે તે મન્ત્રોના છન્દોનાં નામોનાં નિર્વચનો પણ પ્રાસંગિક રીતે રજૂ કર્યાં છે. અહીં અને અન્યત્ર યાસ્કે નિઘંટુમાં ન હોય એવા પણ ઘણા શબ્દોનાં નિર્વચનો આપ્યાં છે તે અનેક રીતે ઉપકારક છે.

---

13. इति इमाः देवताः अनुक्रान्ताः । सूक्तभाजः हविर्भाजः । ऋग्भाजश्च भूयिष्ठाः । काश्चित् निपातभाजः ॥ अथ उत अभिधानैः संयुज्य हविश्चोदयति इन्द्राय वृत्रघ्ने इन्द्राय अंहोमुचे इति । तान्यपि एके समामनन्ति । भूयांसि तु समाम्नानात् । यत्तु संविज्ञानभूतं स्यात् प्राधान्यस्तुति तत् समामने । अथ उत कर्मभिः ऋषिः देवताः स्तौति वृत्रहा पुरंदरः इति । तान्यपि एके समामनन्ति । भूयांसि तु समाम्नानात् व्यञ्जनमात्रं तु तत् तस्याभिधानस्य भवति । यथा ब्राह्मणाय बुभुक्षिताय ओदनं देहि । स्नाताय अनुलेपनम् । पिपासते पानीयम् इति ॥

"इति इमाः देवताः अनुक्रान्ताः" । इतिकरणः प्रकरंणसमाप्त्यर्थः । अथवा इतिकरणेनाभिनयेन दर्शयन्निव ब्रवीति । एवमनेन प्रकारेण यथापरिभाषितेन "यत्काम ऋषिः"—इत्येवमादिना । इमा देवता अनुक्रान्ताः—अग्निः, जातवेदाः वैश्वानरः—इत्येवमाद्याः समासतो निर्णीता इत्यर्थः । ताः पुनः "सूक्तभाजो हविर्भाजः" । काश्चित् हविर्भजन्ते न सूक्तम्, काश्चित् सूक्तं भजन्ते न हविः, काश्चित् उभयं भजन्ते । वक्ष्यति हि—"इतीमानि सप्तविंशतिर्देवतानामधेयान्यनुक्रान्तानि सूक्तभाञ्जि हविर्भाञ्जि, तेषामेतान्यहविर्भाञ्जि"—इति । "ऋग्भाजश्च भूयिष्ठाः" प्रायेणेत्यर्थः । तद्यथा,—आप्रीसूक्ते एकैकामृचं भजन्ते लक्षणभेदादिभिः । अर्द्धर्च्चभाजोऽपि क्वचिदुपेक्षितव्याः । तद्यथा,—"ऋचः सूर्य्याय गीयन्त उद्वेतीत्यर्द्धपञ्चमाः" । "यत्रा चक्रः"—इत्यस्याः पूर्वार्द्धर्च्चः सौर्य्यः शौनकस्य उत्तरो मैत्रावरुणः । पादभाजोऽपि क्वचिदुपेक्षितव्याः । तद्यथा,—"नवो नवो भवति जायमानः (ऋ० सं० ८, ३, २३, ४)"—इत्यस्याः आदित्यदैवतो द्वितीयः पादो भवति । भूयिष्ठग्रहणाच्च दर्शयति असमाम्नाता अपि सन्ति, ता अप्युपेक्षितव्य इति, यथालक्षणं त्रिषु कल्प्याः । तद्यथा,—परमेष्ठिग्रहनक्षत्रसर्पलाङ्गलकुसुम्भकप्रभृतीनि ॥

"काश्चित् निपातभाजः" इति । निपातो हि द्विविधः । देवतान्तरैः सह साधारण्येनोपस्तुतो नैघण्टुकत्वेन च । तत्र साधारणं नाम, तद्यथा,—"विधाता धात्रा व्याख्यातः" । तस्यैष निपातो भवति बहुदेवतायामृचि । सोमस्य राज्ञः" इति । अस्यां सोमप्रभृतिभिः सह विधानात् श्रूयते साधारण्येन । नैघण्टुकत्वेन पुनः तद्यथा,—"पृथिवी व्याख्याता" । तस्या एष निपातो भवत्यैन्द्राग्न्यामृचि । "यदिन्द्राग्नी परमस्यां पृथिव्याम्"—इति । ताभ्यामिन्द्राग्निभ्यां सह साधारण्येन पृथिवी न स्तूयते, किन्तर्हि ? लक्षणत्वेनैन्द्राग्न्योरेवोपादीयते । एवं तावदयमिहाधिकारे काश्चिन्निपातभाज इति द्विप्रकारो निपात उक्तः ॥

अथायमपरो निपातप्रकार उपेक्ष्यः, तद्यथा,—अत्यन्तनैघण्टुकम्, देवताभिधानमनत्यन्तनैघण्टुकञ्च । तत्र अत्यन्तनैघण्टुकं

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

नाम अत्यन्तमदृष्टस्वप्रधानस्तुतिः । तद्यथा,—आदित्यस्य स्वः पृश्निःप्रभृतिभिः अथ पुनः दृष्टस्वप्रधानस्तुतिमद्देवतापदं वाक्यार्थोपजनितपारतन्त्र्यमाक्षिप्तस्वाभिधेयसामर्थ्यमुपमानशब्दे स्वमर्थमन्यस्मिन् देवतापदे, प्रधाने वाक्यार्थसामर्थ्योपजनितप्राधान्यसामर्थ्यं यत् निगमयति, अनत्यन्तनैघण्टुकं तद् भवति । तद्यथा,—"अग्निरिव मन्यो"—इति (ऋ० सं० ८, ३, १९, २) । अग्निशब्दइवेत्यनेनोपमानशब्देन वाक्यार्थोपजनितसामर्थ्येनाक्षिप्तस्वाभिधेयसामर्थ्यो विशेषमाकाङ्क्षन् सम्बोधनान्तं मन्युशब्दं वाक्यगतैः पदैरुन्नीयगानसामर्थ्यमर्थिनिवेषणपक्षे स्वमर्थं मन्युशब्दे निगमयन् निपततीति नैघण्टुकं तदिति । एवमनेकप्रकारो निपातउपेक्ष्यः ॥

"अथ उत अभिधानैः संयुज्य हविः चोदयति" । 'अथ'—इति विशेषाधिकारे । 'उत'—इत्यप्यर्थे । अपरमपरमभिधानमपेक्ष्यापेक्ष्य । तद्यथा,—अभिधानैः संयोज्य विशेषणशब्दैः तत्रैतदभिधानमिन्द्रादिसंविज्ञानाद् दृढमिन्द्रादौ देवतार्थे आम्नायविधौ प्रयोगे च हविश्चोदयति ॥

तद्यथा,—"इन्द्राय वृत्रघ्ने एकादशकपालं निर्वपत्" इति, तथा "इन्द्रायांहोमुचे इति"—"इन्द्रायांहोमुचे एकादशकपालं निर्वपत्"—इति ॥

ततः किम् ? "तान्यप्येके समानन्ति" । 'एके' नैरुक्ताः 'तान्यपि' गुणपदानि वृत्रांहोमुक्प्रभृतीनि, अग्न्यादौ देवतापदसमाम्नाये पृथक् पृथक् 'समामनन्ति' अहं तु न समामने । कस्मात् ? "भूयांसि तु समाम्नानात्" यानि तेषु गुणपदानि वृत्रहांहोमुक्प्रभृतीनि समामनन्ति, ततोऽन्यान्यपि 'भूयांसि' बहुतराशि सन्ति एव, माहाभाग्यात् देवतायाः गुणानामियत्ता नास्ति, तेषां तु सर्वेषां समाम्नाने समाम्नायस्यापरिनिष्ठैव स्यात्, तथा च सति तेषां शास्त्रे असमाप्तिः, तन्ममापि मा भृदित्यतः "यत् तु संविज्ञानभूतं स्यात् प्राधान्यस्तुतिः, तत् समामने" इति । यदेतत् संविज्ञानभूतं रूढमगौणं केवलमपि निर्विशेषणं लब्धप्रधानस्तुतिदेवतापदमग्न्यादि, तत् समामने न गौणं व्रतभृत्-व्रतपत्यादि ।

अथवा तान्यप्येके समामनन्तीत्यत उत्तरस्य "भूयांसि तु समाम्नानात्"—इत्यस्यापरोऽर्थः । भूयांसि एव तेषां समाम्नानात गुणानि समाम्नातानि स्युः, न किञ्चिदतिरिक्तं प्रयोजनम्, वचनात् केवलं गुरु शास्त्रं सम्पद्यते, तन्मा भृत् इत्यर्थः ॥

'अथ उत कर्मभिः ऋषिः देवता स्तौति—वृत्रहा, पुरन्दरः'—इति । स वृत्रहा, शतक्रतुः, पुरन्दरः, गोत्रभित, वज्रबाहुः इति । "तानि अपि एके समामनन्ति" तानि अपि एके कर्मनामधेयानि समामनन्ति । को विशेषः पूर्वेभ्य समाम्नातृभ्यः विधिदर्शनात् पूर्वेण हविश्चोदयति इति वचनात् स्तुतिदर्शनादिकर्मभिर्ऋषिर्देवताः स्तौतीति वचनात् "भूयांसि तु समाम्नानात्" इति स एव दोषः ॥

"व्यञ्जनमात्रं तु तत, तस्याभिधानस्य भवति" । वृत्रहा पुरन्दर इति यदेवमादि गुणपदम्, 'तत्' तस्यैवेन्द्रादेःसंविज्ञातपदस्य 'व्यञ्जनमात्रं' विशेषणमात्रं भवति, न पृथक् प्रधानम्, केवलस्य सम्बन्धात् स्तुत्या । यथा लोके—"ब्राह्मणाय बुभुक्षिताय ओदनं देहि, स्नाताय अनुलेपनम्, पिपासते पानीयम्'-इति" । यो बुभुक्षितः तस्मै इति यथा तु बुभुक्षितशब्दो विशेषणम्, केवलस्य बुभुक्षितशब्दस्य विशेषतः क्वचिदनवस्थानात् । एवं वृत्रहा पुरन्दर इत्येवमादीनां विशेष्यमप्राप्यानवस्थानाद् व्यञ्जनमात्रा, न स्वप्रधानता । तस्मान्नैतान्यहं समामने ॥ १० (१३) ॥

इति निरुक्तभाष्यार्थोपनिबद्धौ द्वादशस्य (सप्तमस्य)
तृतीयः पादः समाप्तः ॥ ७, ३ ॥

---

13. (અનુ૦) આ પ્રમાણે દેવતાઓનું વર્ણન કરવામાં આવ્યું. તેમાંથી કેટલાક દેવતાઓ સૂક્તભાક્ (અર્થાત્ જે દેવતાની એક કે વધારે સૂક્તોમાં સ્તુતિ કરવામાં આવી હોય છે). કેટલાક હવિર્ભાક્ (અર્થાત્ જે દેવતાને ઉદ્દેશીને હવિ આપવામાં આવે) છે, પરંતુ ઋક્ભાક્ (એક ઋક્=ઋચામાં જેની સ્તુતિ કરવામાં આવી હોય તેવા) દેવતાઓની સંખ્યા ઘણી છે. કેટલાક દેવતાઓ નિપાતભાક્ પણ છે. (જે દેવતાની અન્ય દેવતાઓની સાથે સાધારણ રૂપે સ્તુતિ કરવામાં આવી હોય તે દેવતા નિપાતભાક્ કહેવાય છે.)

હવે, અભિધાન (વિશેષણવાચક) પદોથી પણ (દેવતાઓનાં રૂઢ નામોને) જોડીને હવિ આપવામાં આવે છે. જેમ કે, इन्द्राय वृत्रघ्ने (વૃત્રને મારનાર ઇન્દ્રને), અથવા इन्द्राय अंहोमुचे (एकादशः कपालं निर्वपेत्) એ પ્રમાણે ઇન્દ્રને તેનાં વિશેષણો સહિત સંબોધીને હવિ આપવામાં આવે છે. કેટલાક (નિઘંટુકારો) આવાં વિશેષણવાચક પદોને પણ સંગૃહીત કરે છે. પરંતુ આવાં વિશેષણવાચક પદોનો જો સંગ્રહ કરવામાં આવે તો તેવાં નામો તો ઘણાં છે. (પરિણામે એ સંગ્રહ ઘણો મોટો થઈ જાય.) માટે હું (યાસ્ક) તો જે દેવતાઓની પ્રધાનપણે સ્તુતિ કરવામાં આવે છે અને જે નામો (દેવતાનાં નામો તરીકે) રૂઢ છે (દા.ત., અગ્નિ, ઇન્દ્ર વગેરે) તેમનો જ સંગ્રહ કરીશ. આ જ પ્રમાણે, (દેવતાઓ જે કર્મો કરે છે તે) કર્મો વડે ઋષિઓ તેમની સ્તુતિ કરે છે. દા.ત., વૃત્રહા (વૃત્રને મારનાર), પુરન્દર (પૂરનું વિદારણ કરનાર) વગેરે. આવાં નામોનો પણ કેટલાક (નિઘંટુકારો) સંગ્રહ કરે છે,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

પરંતુ આવાં નામોનો સંગ્રહ કરવા જતાં તેવાં નામો ઘણાં છે. (આવાં નામોનો જો સંગ્રહ કરવામાં આવે તો તે સંગ્રહ ઘણો મોટો થઈ જાય.) તે તે દેવતાના જે (સંવિજ્ઞાન-રૂઢ-ઇન્દ્ર વગેરે) નામો છે, તેમના આ (વૃત્રહા વગેરે કર્મવાચક નામો) વિશેષણમાત્ર બની રહેશે. જેવી રીતે કહેવામાં આવે છે કે ભૂખ્યા થયેલા બ્રાહ્મણને ભાત આપો, સ્નાન કરેલા પુરુષને (ચંદન વગેરેનો) લેપ આપો, તરસ્યા થયેલાને પીવાનું જળ આપો. (અહીં 'ભૂખ્યા થયેલાને' વગેરે વિશેષણો છે તેવી રીતે 'વૃત્રને મારનાર' વગેરે ઇન્દ્રનાં વિશેષણો બની રહેશે.)

13. (વિમર્શ) દેવતાઓની સંખ્યા કેટલી ? દેવતાઓનો આકાર કેવો હશે ? વગેરે ચર્ચા પૂરી કરીને યાસ્ક જણાવે છે કે દૈવતકાણ્ડમાં દેવતાઓનાં અગ્નિ, ઇન્દ્ર વગેરે રૂઢ નામો જ એકત્ર કરવામાં આવ્યાં છે, પરંતુ બીજા કેટલાક નિઘંટુકારો આવા દેવતાઓના 'હવિનું વહન કરનાર' (અગ્નિ) કે 'વૃત્રને હણનાર' (ઇન્દ્ર) જેવાં વિશેષણોનો પણ તેમના નિઘંટુઓમાં સંગ્રહ કરે છે. યાસ્ક કહે છે કે આવાં વિશેષણોનો પણ સંગ્રહ કરવામાં આવે તો પોતાના નિઘંટુનો વ્યાપ ઘણો મોટો થઈ જાય, કેમ કે આવાં વિશેષણો તો અસંખ્ય છે. માટે યાસ્ક પોતાના નિઘંટુમાં તેમનો સમાવેશ કરવાના નથી એમ સ્પષ્ટ જણાવે છે. યાસ્ક પોતે તો જે દેવતાઓની પ્રધાનપણે સ્તુતિ કરવામાં આવે છે અને જે નામો દેવતાઓનાં નામો તરીકે રૂઢ (સંવિજ્ઞાન) છે (દા.ત., અગ્નિ, ઇન્દ્ર વગેરે) તેમનો સંગ્રહ કરશે.

(...तत् समामने ।) અહીં સમામને એવો ઉત્તમપુરુષ એકવચનનો નિર્દેશ નોંધપાત્ર છે. અહીં 'અમુક નામોનો જ હું (યાસ્ક) સંગ્રહ કરીશ'-એવી યાસ્કની પ્રતિજ્ઞા એવું સૂચવે છે કે વર્તમાન નિઘંટુના કર્તા યાસ્ક પોતે જ છે. હાલ જે નિઘંટુ મળે છે તે કશ્યપ નામના ઋષિએ કરેલો સંગ્રહ છે અથવા તો કાળક્રમે અનેક ઋષિઓ દ્વારા તૈયાર થયેલો તે સંગ્રહ છે—એવા જ મતો પ્રચલિત છે તેની વિરુદ્ધ જતું આ ઉપર્યુક્ત પમાણ છે.

દુર્ગાચાર્યે ચોથા અધ્યાયમાં दावने ॥३२॥ अकूपारस्य ॥३३॥ શબ્દોની વ્યાખ્યામાં જણાવ્યું હતું કે જે મન્ત્રમાં આ બે શબ્દોનો ઉલ્લેખ થયો છે ત્યાં अकूपारस्य। दावने। એવો ક્રમ છે. પરંતુ નિઘંટુમાં તે ક્રમ બદલાઈ ગયો છે. જો યાસ્કે પોતે જ આ નિઘંટુની રચના કરી હોત તો આવો ક્રમવિપર્યય ન કર્યો હોત. આથી એવું અનુમાન કરવાનું પ્રાપ્ત થાય છે કે વર્તમાન નિઘંટુના કર્તા અને નિરુક્તના કર્તા (યાસ્ક) ભિન્ન ભિન્ન વ્યક્તિઓ હશે. પરંતુ અહીં ૭મા અધ્યાયની આ ઉપર્યુક્ત ચર્ચામાં... तत् समामने । એવો જે ઉત્તમપુરુષ એકવચનનો નિર્દેશ છે એ સ્પષ્ટપણે એવું કહે છે કે વર્તમાન નિઘંટુની રચના યાસ્કે જ કરી છે. (ડૉ. સરૂપે समामनेને બદલે समामनेत् (=पठेत्) એવો પાઠ સૂચવ્યો છે. પરંતુ તે ચિન્ત્ય છે. જુઓ : निरुक्त मीमांसा-પૃ. २९२/२९३). આપણે જોયું કે યાસ્કે કહ્યું કે પોતે દેવતાઓના વિશેષણોનો દૈવતકાણ્ડમાં સંગ્રહ કરશે નહીં. આજે મળતા નિઘંટુના પાંચમા દૈવતકાણ્ડમાં अग्नि, इन्द्र વગેરે દેવતાના પર્યાયવાચી શબ્દો કે પરાક્રમ યા ગુણવાચક નામો (हव्यवाद् કે वृत्रघ्न વગેરે)નો સંગ્રહ જોવા મળતો નથી. આ અંતરંગ પુરાવો જ ચોથા અધ્યાયના દુર્ગાચાર્યના અનુમાનની વિરુદ્ધ જાય છે.

આ ચર્ચાને અન્તે સાતમા અધ્યાયનો ત્રીજો પાદ પૂરો થાય છે. અત્યાર સુધીની ચર્ચામાં જે ચર્ચાઓ કરી (જેવી કે, દેવતાઓની સંખ્યા કેટલી ? દેવતાઓનો આકાર કેવો હશે ? વગેરે) તે દૈવતકાણ્ડની ભૂમિકા રૂપ છે. હવે પછીની ચર્ચામાં દૈવતકાણ્ડ (નિઘંટુના પાંચમા અધ્યાય)માં આવેલા અગ્નિ, જાતવેદસ્, વૈશ્વાનર વગેરે શબ્દોની વ્યુત્પત્તિ વગેરે તપાસવામાં આવશે.

चतुर्थः पादः

14. अथातः अनुक्रमिष्यामः । अग्निः पृथिवीस्थानः । तं प्रथमं व्याख्यास्यामः । अग्निः कस्मात् । अग्रणीः भवति । अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति संनममानः । अक्नोपनः भवति इति स्थौलाष्ठीविः । न क्नोपयति । न स्नेहयति । त्रिभ्यः आख्यातेभ्यः जायते इति शाकपूणिः । इतात् । अक्तात् दग्धात् वा । नीतात् । स खलु एतेः अकारम् आदत्ते । गकारम् अनक्तेर्वा दहतेर्वा । नीः परः । तस्य एषा भवति ।

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् (ऋ. सं. १/१/१) ॥ अग्निम् ईळे अग्निं याचामि । ईळिः अध्येषणाकर्मा । पूजाकर्मा वा । पुरोहितः व्याख्यातः (निरु. २/१२) । यज्ञश्च (निरु. ३/१९) । देवः दानाद्वा । दीपनाद्वा । द्योतनाद्वा । द्युस्थानो भवति इति वा । यो देवः सा देवता । होतारं ह्वातारम् । जुहोतेः होता इति और्णवाभः । रत्नधातमं रमणीयानां धनानां दातृतमम् ॥

तस्य एषा अपरा भवति । अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एह वक्षति (ऋ. सं. १/१/२) ॥ अग्निः यः पूर्वैः ऋषिभिः ईडितव्यः वन्दितव्यः अस्माभिश्च नवतरैः स देवान् इह आवहतु इति ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"अथातोऽनुक्रमिष्यामः" । सामान्यतः परिख्यातोऽग्न्यादिदेवपत्न्यन्तो देवतापदसमाम्नायः, विशेषत इदानीं प्रतिपदमनु व्याख्यास्यते. तदर्थमधिकारवचनम्,—'अथ' इति ।

'अतः'—इति आनन्तर्य्ये । सामान्यात् पारिभाषिकाद् व्याख्यानादनन्तरात् 'अनु' आनुपूर्वेण यथासमाम्नातं 'क्रमिष्यामः' कथयिष्यामो वर्णयिष्यामो व्याख्यायोत वाक्यशेषः । सा च पुनर्व्याख्या अभिधानाभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्युदाहरणतन्निर्वचनविचारोपपत्त्यवधारणक्रमलक्षणा । तद्यथा,—(१) "अग्निः"—इत्यभिधानम्, (२) अयं पार्थिवः इत्यभिधेयम् (३) "अग्रणीर्भवति"—इत्यभिधानव्युत्पत्तिः, (४) अग्निमीळे"—इति प्राधान्यस्तुत्युदाहरणम्, (५) अग्निमीळे—"अग्निं याचामि" इति तन्निर्वचनम्, (६) "स न मन्येतायमेव अग्निः"—इति विचारः, (७) "यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते"—इत्युपपत्तिः, (८) "अयमेव सोऽग्निः"—इत्यवधारणम् । एवंप्रकारया व्याख्यया प्रतिपदमनुक्रमिष्यामः ॥

तदैतद् भवति कोऽयमग्निः ? इति । आत्मा—इत्यात्मविदः, "एकं सद्विप्रा बहुधा वदन्ति (ऋ० सं० २, २, २२, ६)"—इति मन्त्रदर्शनात् । अविवक्षितस्थानविशेषो निर्ज्ञाततदभिधानो देवताविशेषो लोकवेदप्रसिद्ध कर्माङ्गमिति याज्ञिकाः । विवक्षितस्थानविशिष्टकर्मा मध्यमोत्तमाभ्यां ज्योतिर्भ्यामन्यः पार्थिवोऽयमग्निरिति नैरुक्तसमयः । त्रित्वाभ्युपगमात्तत्सम्पिपादयिषयेदमारभ्यते ।

"अग्निः पृथिवीस्थानः तं प्रथमं व्याख्यास्यामः"—इति । पृथिव्येवास्य विशेषतः स्थानम्, न अन्तरिक्षम्, न द्यौः इति पृथिवीस्थानः, तत्र कर्माधिकारात् तस्य । तिष्ठत्यस्मिन् इति स्थानम् । यस्मात् पृथिवी अस्य स्थानम्, तस्मात् सन्निकर्षाल्लोकानुक्रमाच्च न ह्यसति कारणे प्रथमातिक्रमो न्याय्य इति तमेवं प्रथमं व्याख्यास्यामः ॥

"अग्निः कस्मात्" । देवताभिधाने देवता आत्मनः परोक्षीकृत्य परोक्षीकृतं तत्वमर्पितम्, परोक्षप्रिया इव हि देवाः प्रत्यक्षविषय इति हि विज्ञायते । तन्निर्वचनादागमप्रामाणिकं देवताताद्भाव्यमनुभवतीति अवेत्य तन्निर्विवक्षया "अग्निः कस्मात्" ? इत्युपोद्धत्य "अग्रणीः भवति"—इत्येवमादिना अग्निशब्दं निराह । सर्वत्रैवं देवतापदे उपोद्घातोपन्यासौ द्रष्टव्यौ । आत्मवित्पक्षे तु सर्वमभिधानमात्मार्थमिवेति सर्वावस्थमात्मानं सर्वाभिधानव्युत्पत्तितो निरुच्य याथार्थ्यतः परिज्ञाय सर्वात्मनः आत्मनः सर्वावस्थं विभूतिताद्भाव्यमनुभवतीति सर्वपदव्युत्पत्तिप्रयोजनम् । स्मर्य्यते हि,—"शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति"—इति ॥

"अग्रणीः भवति"—इति । अग्निशब्दं विगृह्य वाक्यीकृत्य कृतवाक्यपदवर्णनिष्कर्षणसमुदायोपजनितस्य अग्निशब्दस्य अग्रशब्दात् यकारमुपलभ्य अग्रशब्दं कर्माभिधायिनं पूर्वपदत्वेन व्यवस्थाप्य नयतिं च परमुत्तरपदस्थं कर्त्तव्यार्थात्मने व्यवस्थाप्य अग्निशब्दं निराह,—अथ कोऽर्थः ? इति । सर्वेष्वर्थेष्वसावात्मानमग्रं नयति, सर्वत्र तथोपकरोति यथा अग्रं समपद्यत इत्यर्थः । अग्रशब्दः प्रधानवाची, स एव वा अग्रं नयति । सेनां वा अग्रे नयति सैनापत्येऽवस्थित इत्येके, विज्ञायते हि,—अग्निर्वै देवानां सेनानीः" इति ॥

अथवा "अग्रं यज्ञेषु प्रणीयते" "प्रथमं यज्ञेषु प्रणीयते" न तावत् किञ्चिदप्यन्यत् क्रियते यावदयं न प्रणीयत इति, ततोऽस्मिन् व्रतमुपेत्यान्यानि कर्माणि क्रियन्त इति ॥

अथवा "अङ्गं नयति सन्नममानः" यत्रायं सन्नमयति साधनत्वेन वैदिकं वा लौकिकं वार्थे, तत्र सन्नममान एवात्मानं प्रधानीकृत्य सर्वमन्यदात्मनोऽङ्गतां नयति गुणीकरोतीत्यर्थः । अथवा "अङ्गं नयति सन्नममानः" तृणे वा काष्ठे वा यत्र सन्नमयति आश्रयति, तत आत्मनोऽङ्गतां नयति, आत्मसात् करोतीत्यर्थः ॥

"अक्नोपनो भवति इति स्थौलाष्ठीविः" स्थूलाष्ठीवतः पुत्रः स्थौलाष्ठीविः आचार्य्यः स एवं मन्यते,—अयमक्नोपनो यस्माद् भवतीति तस्मादग्निरिति । किमिदमक्नोपनः इति ? अत आह,—"न क्नोपयति' । एवमपि न गृह्यते क्नोपयतेः प्रसिद्धार्थत्वात् । अतः पुनर्ब्रवीति प्रसिद्धेनार्थेन,—"न स्नेहयति विरूक्षीकरोतीत्यर्थः, स हि तस्य स्वभावः ॥

"त्रिभ्यः आख्यातेभ्यः जायते इति शाकपूणिः" । त्रयाणामाख्यातानामभिधेयाः क्रिया अत्र लक्ष्यन्ते, ता उपादाय हेतुत्वेनाग्निशब्द आत्मानं लभते । तद्यथा,—"इतात्" 'इण् गतौ (अदा० प०)'—इत्यस्मादित्यर्थः । अक्तात्, दग्धाद् वा" अनक्तेर्वा दहतेर्वा विकल्प एतयोः । ततः "नीतात्" इति, 'णीञ् प्रापणे (भ्वा० प०)'—इत्येतस्मात् । धातवः केवलं निर्दिष्टाः । किं कुत आदत्ते ? इत्यत आह,—"सः खलु" शाकपूणिः "एतेः" धातो "अकारम् आदत्ते" । नन्वेतेरकार एव नास्ति, अतः किमादत्ते ? सत्यं नास्ति, वर्णसामान्येन तद्विकारमादाय इणोऽर्थदर्शनात् अग्नौ शब्दार्थ सम्बन्धनित्यत्वात्, अर्थे च गुणभूतत्वाच्छब्दस्य, ततः तं व्यापादयत्यकारत्वेन । अथवा रूपानेकत्वादिणो यथावस्थितस्याकारो भवति, तथा रूपमवस्थाप्य

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ततोऽकारमादत्ते, दर्शितं चैतत्—"एतेः कारितं च यकारादिं चान्तकरणम्"—इत्यत्र, भवति चास्य ण्यन्ते रूपम् 'आययति'—इति अत्र, अकारः, ततः आदत्ते । "गकारम्, अनक्तेः वा दहतेः वा" कृतकुत्वजशत्वयोर्विकल्पेन । "नीः परः" एषः ह्रस्वः । एति च व्यनक्ति च रूपाणि, अथवा एति च दहति च नयति च हवींषि देवेभ्यः इति अग्निः सार्धायस्तरः । एता एतद्धातुवाच्याः क्रियाः एष करोति इति "अग्निः" ॥

"तस्य" एतल्लक्षितलक्ष्यप्रधानस्तुतिसम्बन्धमभिधानमुपलक्ष्य देवतापदसमाम्नाये समाम्नातमग्निरिति, तस्य "अग्निमीळे"—इत्येतप्रमुखा अग्निकर्मलिङ्गलिङ्गिताः सर्वा आग्नेय्य ऋचः उदाहरणम्, न पुनरसति कारणे मुख्यातिक्रमो न्याय्य इति ऋग्वेदप्रथमामिमामृचमुदाजहार "तस्य एषा भवति" —इति — ॥ १ (१४) ॥

"अग्निमीळे (ऋ० सं० १, १, १, १,)" इति । मधुच्छन्दस आर्षम् । गायत्री । आश्विने विनियोगः । यः अग्निः देवपुरोहित पाकयज्ञे, अस्माकं यज्ञे यश्च ऋत्विक्, होता यज्ञस्य, रत्नधातमश्च दातृतमो रत्नानाम्, तमहं रत्नानि याचे इति समस्तार्थः ॥

अथैकपदनिरुक्तम् । —"इडिः" धातुः "अध्येषणाकर्मा" याचञाकर्मेह अन्यत्र "पूजाकर्मा वा" अपिः । "पुरोहितः व्याख्यातः" "पुर एनं दधति"—इति । "यज्ञः च" व्याख्यातः, "प्रख्यात यजतिकर्मा"—इति । "देवः" दानाद् वा" ददाति, ह्यसौ ऐश्वर्य्याणि । "दीपनाद् वा" धात्वन्यत्वमर्थैकत्वम् । "द्युस्थानो भवति—इति वा" पक्षे अर्थवत्त्वं निर्वचनस्य । अथवा अग्नीन्द्रावपि द्युस्थानौ. सामान्यं हि द्यौः स्थानं देवतानाम्, तयोस्तु कर्माधिकारस्थाने विशिष्टे पृथिव्यन्तरिक्षे । "होतारं—ह्वातारम्" देवानाम् । "और्णवाभः" तु "जुहोतेः" 'हु दानादानयोः (जु० प०)'—इत्यस्य मन्यते "होता इति" । "रत्नधातमम्— रमणीयानां धनानां दातृतमम्" ॥

ततः "तस्य" एव अग्नेः "एषा अपरा" ऋक् "भवति" । समानसंहितत्वादपरेति वा द्वितीयेत्यर्थः । सा पुनः किमर्थम् ? इति । अमुना प्रकारेण सर्वा एतस्यामुदाहरणमेतत्कर्मयुक्ता ऋच उपेक्ष्या इत्युपप्रदर्शनार्थम् ॥ २ (१५) ॥

'अग्निः पूर्वेभिः (ऋ० सं० १, १, १, २)"—इति । पूर्वेयैव समानार्षविनियोगच्छन्दस्का । तद्वृत्तमुत्तरत्रापेक्ष्य यद्वृत्तमध्याजहार भाष्यकारो यत्तदोर्नित्यसम्बन्ध इति दर्शयन् । "अग्निः यः" 'पूर्वेभिः, "पूर्वैः" चिरन्तनैः 'ऋषिभिः" "ईडितव्यः" ईडनं पूजनमर्हति, "अस्माभिश्च" "नवतरैः" ईडितव्य इति वर्त्तते । स किं करोति ? इत्याकाङ्क्षिते निराकाङ्क्षं क्रियते,—"स देवान्" "इह" एतस्मिन् कर्मणि अस्माकम् "आवहतु" इति लोटा निराह भाष्यकारः आशिषमाकाङ्क्षितामपेक्ष्य । ऋग्व्येकपदनिरुक्तम् ॥

---

14. (અનુ૦) હવે પછી દેવતાઓનું અનુક્રમે વર્ણન કરીશું : પૃથિવીસ્થાનનો દેવતા અગ્નિ છે, તેની વ્યાખ્યા પહેલાં કરીશું. તે અગ્નિ: શા માટે કહેવાયો છે ? -એ અગ્રણી (અગ્રેસર) છે (માટે તે અગ્નિ કહેવાયો છે). યજ્ઞમાં તેને આગળ (પ્રથમ) લઈ જવામાં આવે છે. અથવા તો એ જેને (કાષ્ઠ કે તૃણ) આશ્રયે રહે છે તેને પોતાનું અંગ બનાવી લે છે. (सन्नमति आश्रयति इति सन्नममानः ।) (માટે તેને અગ્નિ કહેવામાં આવે છે). સ્થૌલાષ્ઠીવિ ઋષિના મતે તે અક્નોપન (નહીં ભીંજવનારો) છે (માટે અગ્નિ કહેવાય છે). અહીં न क्नोपयतिનો અર્થ न स्नेहयति અર્થાત્ 'નહીં ભીંજવનારો' (ફલતઃ સૂકવનારો) થાય છે. શાકપૂણિ ઋષિના મતે ત્રણ આખ્યાત (ધાતુ)માંથી આ (અગ્નિ) શબ્દ બન્યો છે. એટલે કે ૧. √इण् गतौ ૨. √अञ्ज् व्यक्तिम्रक्षणकान्तिगतिषु અથવા √दह भस्मीकरणे અને ૩. √णीञ् प्रापणेમાંથી એ શબ્દ બન્યો હશે. જેમ કે તેઓ (શાકપૂણિ આ શબ્દને સિદ્ધ કરવા) एति (√इण् गतौ)માંથી અકારનું ગ્રહણ કરે છે, अनक्ति અથવા दहतिમાંથી ગકારનું ગ્રહણ કરે છે અને તેની પાછળ √नी ધાતુને (હ્રસ્વ કરીને) મૂકે છે (अ + ग् + नि > अग्निः). આ અગ્નિની સ્તુતિ કરતી ઋચા આ પ્રમાણે છે : "હું અગ્નિની સ્તુતિ કરું છું, આ અગ્નિ પુરોહિત, યજ્ઞનો દેવ, ઋત્વિજ, હોતા અને રત્નનો આપનાર છે." अग्निम् ईळेનો અર્થ 'હું અગ્નિ પાસે યાચના કરું છું' અહીં √ईळि ધાતુ યાચ્ઞા અર્થવાળો અથવા પૂજા અર્થવાળો છે. 'પુરોહિત' શબ્દની વ્યાખ્યા કરી નાખી છે. દેવ દાન આપવાને કારણે, ચમકવાને કારણે અથવા પ્રકાશવાને કારણે કહેવાય છે (અર્થાત્ 'देव' શબ્દ ददाति, दीपयति કે द्योतयति ક્રિયાપદ-ધાતુઓ-ઉપરથી બન્યો હશે) અથવા તો જે દ્યુસ્થાનનો દેવ હોય છે, તે દેવતા. અહીં होतारम्નો અર્થ ह्वातारम् (બોલાવનાર) થાય છે. ઔર્ણવાભ ઋષિના મતે √हु दानादानयोः (जुहोति) ધાતુ ઉપરથી 'होता' શબ્દ બન્યો છે. रत्नधातमम् એટલે રમણીય ધનોને પ્રકૃષ્ટપણે આપનાર.

આ અગ્નિની સ્તુતિ કરતી બીજી ઋચા છે : "અગ્નિ પૂર્વેના ઋષિઓ વડે અને નૂતન ઋષિઓ વડે પણ પૂજનીય છે. એવા એ અગ્નિદેવ બીજા દેવોને અહીં લઈ આવે." અગ્નિ જે પૂર્વેના ઋષિઓ વડે પૂજનીય છે, વંદનીય છે તે અમારા જેવા તદ્દન નવીન (ઋષિઓ) છે (તેમના વડે પણ વંદનીય છે). એવા આ અગ્નિદેવ અન્ય દેવોને અહીં લઈ આવે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

['અગ્નિ' એવું અભિધાન સંકીર્ણ હોવાથી, અર્થાત્ પાર્થિવાગ્નિ ઉપરાંત વિદ્યુત્ અને આદિત્યને માટે પણ તે નામ વપરાતું હોવાથી અહીં 'વિચાર' કરવામાં આવે છે :-]

14. (વિમર્શ) યાસ્કે 'અગ્નિ' શબ્દને ત્રણ ધાતુઓમાંથી વ્યુત્પન્ન કરી બતાવ્યો છે : √इ (=अ) + √अञ् √दह (=ग) + √नी (=नि). આ રીતે સિદ્ધ થયેલા અગ્નિ શબ્દનો અર્થ 'જે જાય છે, જે પ્રકાશે છે અથવા જે બાળે છે અને જે અગ્રેસર (નેતા) બને છે' એવો થશે. ડૉ. સિદ્ધેશ્વર વર્મા (પૃ. ૨૫ અને ૯૪) આ પ્રકારની વ્યુત્પત્તિના સન્દર્ભમાં જણાવે છે કે યાસ્ક ક્યારેક જુદા જુદા શબ્દોમાંથી એક એક વર્ણ લઈને કોઈ એક શબ્દ બનાવ્યો હોય એવી રીતે વ્યુત્પત્તિ આપે છે. આનું ઉદાહરણ અગ્નિ શબ્દ છે. પરંતુ બધાં જ નામોને ધાતુજ સાબિત કરવાનો પ્રાચીન ભારતીય વ્યુત્પત્તિકારોનો આ અસાધારણ પ્રયાસ ગણી શકાય. જ્યારે તેઓ કોઈ શબ્દને કોઈ એક જ સમુચિત ધાતુમાંથી નિષ્પન્ન થયેલો દર્શાવી શકતા નથી ત્યારે તે શબ્દના એક એક અંશ (વર્ણ)માં જુદા જુદા અનેક ધાતુઓની કલ્પના કરે છે.

બીજું, અગ્નિનો અર્થ 'અગ્રણી' આપ્યા પછી તેની જે બે વ્યુત્પત્તિઓ આપી છે (अग्रं यज्ञेषु प्रणीयते । अङ्गं नयति सन्नममानः ।) તે પણ નોંધપાત્ર છે. આ પ્રકારની વ્યુત્પત્તિઓમાં શબ્દનો અન્તિમભાગ, જે મહદંશે પ્રત્યયાંશ ગણાય તેમાં પણ ધાતુની કલ્પના કરવામાં આવી છે !

---

15. स न मन्येत अयमेव अग्निः इति । अपि एते उत्तरे ज्योतिषी अग्नी उच्येते । ततो नु मध्यमः ॥ अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम् । घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः (ऋ. सं. ४/५८/८) ॥ अभिनमन्त समनसः इव योषाः । समनं समननाद्वा । संमाननाद्वा । कल्याण्यः स्मयमानासो अग्निम् इत्यौपमिकम् । घृतस्य धाराः उदकस्य धाराः । समिधः नसन्त । नसतिः आप्नोतिकर्मा वा । नमतिकर्मा वा । ता जुषाणो हर्यति जातवेदाः । हर्यति प्रेप्साकर्मा । अभिहर्यति इति ॥

सङ्कीर्णत्वादग्न्यभिधानस्य अतः परं विचारः,—"स न मन्येत"—इत्येवमादिना आक्षिप्य विचारः । ननु नित्ये स्वार्थाभिधेयसम्बन्धे अभिधानानामर्थान्तरवृत्तितैव नास्ति, कुतः सङ्करः ? इति । अथास्त्यर्थान्तरवृत्तिता । जहत्स्वार्थमर्थान्तरमुपसंक्रामन्ननित्यतां सम्बन्धस्य द्योतयति । नैव जहत्स्वार्थमभिधानमभिधेयान्तरे वर्त्तते । किन्तर्हि ? द्वे ह्यभिधानस्य शक्ती गौणी मुख्या च । तयोर्गौणी गुणसाम्यात्, यस्मात् कस्माच्चित् गुणात् सर्वत्र वर्त्तते, तस्यास्तथाविध एव सम्बन्धः, सर्वार्थौ नित्यः समर्थप्रकरणोपपदपरतन्त्रः । मुख्यत्वे विनियोगेन लोकवेदप्रसिद्ध्या स्व एवार्थे वर्त्तते । तदेवमसङ्करेऽपि शब्दानां मुख्यगौणार्थवर्तिनां सङ्कर इवामेधसां प्रतिभाति ॥

क्व कस्य शब्दस्य गौणी शक्तिः ? क्व कस्य मुख्या ? इति तत्प्रविवेकार्थमिदमुपोद्घन्ति चोदकरूपेण "स न मन्येत" इति । 'सः' शिष्यः, 'न मन्येत' न जानीयात् सम्यगेतदभिहितम् "अयमेवाग्निः" पृथिवीस्थानः "इति" । कस्मात् पुनर्न मन्येत ? इतः,— यस्मात् "अपि एते उत्तरे ज्योतिषी" मध्यमश्च उत्तमश्च "अग्नी उच्यते" । कथम् ? इत्यत आह,—एतत् तावत् पार्थिवं ज्योतिः, आवाहनक्रियायोगात् "अग्निमीडे"—इत्येतस्यां च यथा भवतोक्तं तथैवोच्यते, "ततः नु" वयमपि यथा "मध्यमां" अग्निशब्देनोच्यते तत्कर्मयोगाच्च स एवाग्निः, तथेमामृचमुदाहरिष्यामः,— ॥ ३ (१६) ॥

"अभिप्रवन्त"—इति (ऋ० सं० ३, ८, ११, ३) । वामदेवस्यार्षम् । सप्तमेऽहनि दशरात्रस्य आज्यशस्त्रे विनियोगः । 'अभिप्रवन्त' "अभिनमन्त" आभिमुख्येन नमन्ति प्रह्वीभवन्ति । 'घृतस्य' "उदकस्य" 'धाराः' । कमभिप्रह्वीभवन्ति ? मध्यमम् 'अग्निम्' । कथम् ? इति,—'समना इव योषाः' "समनसः" समानमनसः । एकस्मिन् भर्त्तरि यासां मनांसि वर्त्तन्ते, ताः समनसः । ता यथा 'कल्याण्यः' रूपयौवनादिगुणसम्पन्नाः, 'स्मयमानासः' स्मयमानाः ईषद्धसन्त्यः हर्षमुपजनयन्त्यो भर्त्तुस्तं प्रति परिष्वजनाय अभिनमेयुः, तथा मध्यमस्थानमग्निं घृतस्योदकस्य धाराः 'समिधः' समिन्धयन्त्यः 'नसन्त' प्राप्नुवन्तीत्यर्थः । ताश्च ताश्च पुनः सः 'जातवेदाः' मध्यमस्थानो वैद्युतोऽग्निः, 'जुषाणः' प्रीयमाणः 'हर्य्यति' पुनः पुनः प्रेप्सति अभिकामयते ।

एवमेतस्मिन् मन्त्रे युगपदभिधानात्, पार्थिवे घृताहुतिहवनस्योपमानोपमेयवैधर्म्याच्च युगपत्सम्भवाच उदकस्य धारणं वैद्युतः, तत्रोपमानोपमेयसामञ्जस्याच्च सामार्थ्यात् प्रसिद्धिमुपरुन्ध्य घृतधाराशब्द उदकधारावचनः सम्पद्यन्ते, पठितं चैतदेव सामर्थ्यमपेक्ष्योदकनामसु "घृतम्" "मधु"—इति । एवञ्च योऽयमग्निशब्दोऽत्र सामर्थ्यात् मध्यमं ज्योतिराह, तस्मात् "सुष्ठु स न मन्येत, अयमेवाग्निः पृथिवीस्थानः"—इति ॥

"समनं समननाद्वा, सम्माननाद्वा"—इति । पूर्वम् अनितेः (भू० प०) प्राणनार्थस्य, उत्तरं मनोतेः (त० आ०) । ऋज्वन्यन्निर्वचनम् ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

15. (અનુ૦) તેણે (નિરુકતના મેધાવી શિષ્યે) એમ ન માનવું કે કેવળ આ પૃથિવીસ્થાનના દેવતાને જ 'અગ્નિ' કહે છે. કેમ કે બીજા બે લોકના જ્યોતિઓને (વિદ્યુત્ અને આદિત્યને) પણ (ક્યારેક) 'અગ્નિ' કહેવામાં આવે છે. (આ બે જ્યોતિઓમાંથી) જે મધ્યમ (અન્તરિક્ષ) સ્થાનનું જ્યોતિ (વિદ્યુત્) છે તેની સ્તુતિ કરતી આ ઋચા છે : "સમાન મનવાળી, કલ્યાણકારિણી, સ્મિત કરતી સ્ત્રીઓના જેવી ઘીના અર્થાત્ ઉદકની ધારાઓ (આ વિદ્યુત્) અગ્નિની પ્રત્યે અભિમુખ થઈને નમે છે. આ (ઘીની ધારાઓ) સમિધમાં પ્રવેશે અને તેને (ઘીની ધારાને) સેવતો (પીતો) જાતવેદસ્ એટલે કે વૈદ્યુતાગ્નિ વારંવાર તેની ઇચ્છા કરે છે." સમાન મનવાળી સ્ત્રીઓની જેમ (ઘીની ધારાઓ વૈદ્યુતાગ્નિ પ્રત્યે) અભિમુખ થઈને નમે છે. અહીં 'સમન' સમનન કે સંમાનનને કારણે કહેવાય છે. અર્થાત્ સમાન મનન અથવા સમાન માનને 'સમન' કહે છે). 'કલ્યાણકારિણી અને સ્મિત કરતી (સ્ત્રીઓની જેમ ઘીની ધારાઓ) અગ્નિની પ્રત્યે'–એ ઉપમામૂલક વર્ણન છે. અહીં 'ઘીની ધારાઓ'નો અર્થ 'ઉદકની ધારા' એવો થાય છે. (આ ધારાઓ) સમિધમાં પ્રવેશ કરે છે. नसति 'પ્રાપ્ત કરવું' અર્થમાં અથવા 'નમવું' અર્થમાં છે. મૂળ ઋચામાં ता जुषाणो हर्यति जातवेदाः । એ અંશમાં हर्यति ક્રિયાપદ 'કામના કરવી' અર્થમાં છે, અર્થાત् अभिहर्यति=पुनः पुनः प्रेप्सति ॥

15. (વિમર્શ) ઉપર્યુક્ત મન્ત્રમાં 'અગ્નિ' શબ્દ વિદ્યુત્નો વાચક છે અને જળની ધારાઓથી ઉત્પન્ન થનારી વિદ્યુત્નું તેમાં વર્ણન છે. આમ, અહીં 'અગ્નિ' શબ્દ મધ્યમ જ્યોતિનો વાચક હોઈ નિરુકતના શિષ્યે આ પૃથિવીસ્થાનના અગ્નિને જ 'અગ્નિ' કહે છે એમ ન માનવું. અર્થાત્ એ શ[illegible] બીજા બે સ્થાનના જ્યોતિઓને માટે પણ વપરાય છે. બીજું, समनं समननाद्वा सम्माननाद्वा । એ વાક્યમાં સમનસ્ શબ્દને સમજાવવા '[illegible]ન' શબ્દને દુર્ગે પૃથક્ ગણ્યો છે. એનો અર્થ થશે 'સાથે શ્વાસ લેવો'. અહીં પ્રાણનાર્થક √अन ધાતુ કલ્પવામાં આવે છે.

---

16. समुद्रादूर्मिर्मधुमाँ उदारत् (ऋ. सं. ४/५८/१) इति आदित्यम् उक्तं मन्यन्ते । समुद्राद्ध्येषोऽद्भ्यश्च उदेति (कौषी. ब्रा. २५/१) इति च ब्राह्मणम् । अथापि ब्राह्मणं भवति । अग्निः सर्वाः देवताः (ऐ.ब्रा. ६/३ श. ब्रा. १–६–२–२०) इति । तस्य उत्तरा भूयसे निर्वचनाय ॥

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः (ऋ. सं. १/१६४/४६) ॥ इमम् एव अग्निं महान्तम् (च) आत्मानम् एकम् आत्मानं बहुधा मेधाविनो वदन्ति । इन्द्रं मित्रं वरुणम् अग्निं दिव्यं च गरुत्मन्तम् । दिव्यः दिविजः । गरुत्मान् गरणवान् । गुर्वात्मा महात्मा इति वा ॥

यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते अयमेव सोऽग्निः । निपातमेव एते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते ॥

अथ खलु यथोत्तममपि ज्योतिर्भवत्यग्निस्तथोदाहरिष्यामः । "समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवनाममृतस्य नाभिः ॥"—इति (ऋ० सं० ३, ८, १०, १) । "आदित्यं उक्तं मन्यन्ते" । पूर्वैव समानार्षविनियोगा । नानादेवताभिवादस्त्वस्यां देवतानुक्रमण्यां शौनकेनोक्तः, इह पुनः सौरीति कृत्वोदाहृता भाष्यकारेण, सूक्तं सकलश्च । 'समुद्रात्' उदकसङ्घातात् 'ऊर्मिः' छादकः सर्वस्य प्रकाशेन, 'मधुमान्' उदकवान्, उदारत्' उदतीतरत्, उत्तरयति वा, उदेति अहन्यहनि प्रथमं जन्माभिप्रेत्य । स पुनर्जातः सन् 'अमृतत्वम्' अमृतभावम् 'अंशुना' चन्द्रमसा 'उपसम्-आनट्' उपसंव्याप्नोति । "सोऽस्यान्नं तेन न म्रियते यमक्षितिमक्षितयः पिबन्ति"—इत्युक्तम् । कथममृतत्वं तेन उपसमानट् ? इति । 'घृतस्य' उदकस्य हविषो वा 'यत्' 'नाम' नमनं 'गुह्यं' रहस्यमविज्ञानं केनचिदपि अत्र 'अस्ति' विद्यते चन्द्रमसि, तत्र 'देवानां' रश्मीनां 'जिह्वा' तदमृतं नित्यमास्वादयन्ति, देवास्तेन न म्रियन्ते । तेषाम् 'अमृतस्य' अमरणत्वस्यं नाभिः' नहनं स हेतुरित्यर्थः ॥

अथ कुतः सूर्य्योऽयमिति विशेषतोऽवध्रियते, न चैतस्मिन्नपि मन्त्रेऽग्निशब्दोऽस्ति, यः सत्यप्यादित्यदेवत्वेऽस्य मन्त्रस्याग्नित्वमादित्यस्य प्रख्यापयेत् घृतस्तोत्र्य एता इति च विज्ञायते, तस्मादसमर्थमिदमुदाहरणम् ? न असमर्थम् । कस्मात् ? सूक्तेऽग्निलिङ्गमेकेषां शाखिनामस्ति,—"इमं स्तनम्"—इत्यत्र "अपां प्रपीनमग्ने"—इति । निविच्चास्मिन् सूक्ते धीयते, सा चाग्निलिङ्गा । आदित्यश्चायमनेन मन्त्रेणोच्यत इति स्फुटमस्यैव मन्त्रस्य 'ब्राह्मणम्'—"समुद्राद्ध्येषोऽद्भ्य उदेति"—"इति च" न च पार्थिवः समुद्रात् उदेति, विरोधात् तस्य उदकेन, तस्मादादित्योऽत्राग्निरभिप्रेतः—इति नासमर्थमुदाहरणम् । "अथ अपि ब्राह्मणं भवति,—'अग्निः सर्वा देवताः'—इति" । अथ खलु अयमपरः सङ्करोऽग्निशब्दस्य ब्राह्मणं भवति, "अग्निः सर्वा

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

देवताः''—इति ॥

"तस्य" च ब्राह्मणस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "निर्वचनाय"— ॥ ४ (१७) ॥

"इन्द्रं मित्रम्"—इति (ऋ० सं० २. ३. २२. ६)। अस्यवामीयेषा। 'इन्द्रम्, मित्रम्, वरुणम्'—इत्येतैरभिधानैः 'अग्निम् आहुः' तत्त्वविदः। 'अथो' अपि च योऽयं 'दिव्यः' "दिविजः" दिवि जायते, 'सुपर्णः' सुपतनः 'गरुत्मान्' "गरणवान्" स्तुतिभिः तद्वान् रसानां वा गरिता आदित्यः, अयमपि 'सः' एवाग्निरित्याहुः। किं बहुना "इममेवाग्निम्" 'एकं' "महान्तम्" "आत्मानम्" अनन्यत्वेन पश्यन्तः 'विप्राः' "मेधाविनः" आत्मविदः 'बहुधा वदन्ति'—'अग्निम्, यमम्, मातरिश्वानम्' इति ॥

एवमाद्यैश्चाभिधानैरेतस्यैव सा विसृष्टिः, एष उह्येव सर्वे देवाः इति च विज्ञायते। तस्माद् युक्तं यत्र मन्येतायमेवाग्निरिति ॥

अत्र प्रतिसमाधानम्।—सत्यमेतत् सर्व एतेऽग्निशब्दे न स्तूयन्ते, न तु प्रधानतः, किन्तर्हि ? गुणतः स्तूयन्ते। यतो ब्रवीति,—"यस्तु सूक्तं भजते, यस्मै हविः निरूप्यते, अयम् एव सः अग्निः"। तुशब्दः पूर्वपक्षव्यावर्त्तकः, परमतव्युदासार्थः। यः सूक्तं भजते, प्रधानतः स्तुत्यत्वेनेत्यर्थः, यस्मै च हविर्निरूप्यते, चोदनासामर्थ्यात्—"आग्नेयमष्टकपालं निर्वपेत्" इति। अयमेव सोऽग्निः, पार्थिवः, अग्निशब्दस्य विशेषतोऽत्र लोके वेदे च प्रसिद्धेः,—'अग्निमानय—अग्निं प्रणय' इति, एतमेव हि लोकः प्रतिपद्यते न मध्यमं नात्युत्तमम्। न च प्रसिद्धिबाधो न्याय्यः, शास्त्रचोदिता अपि खदिर-पलाशादयो लोकप्रसिद्धित एव प्रतीयन्ते। तस्मादग्निशब्देन पार्थिवस्य ज्योतिषो मुख्यः सम्बन्धः, गौण इतरयोर्मध्यमोत्तमयोः। यथा अग्निशब्देन मध्यमोत्तमयोः, न तथा मध्यमोत्तमाभ्यां विद्युत्सूर्य्यशब्दाभ्यां लोकप्रसिद्ध्या मुख्यः सम्बन्धः। एवञ्चेत् सुष्ठुक्तम्,—"यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते, अयमेव सोऽग्निः" इति। एतमेव चात्र विचारे प्रयोजनम्, आग्नेयेषु सूक्तेषु हविःसम्प्रदानेषु स्तुत्यत्वेन भोक्तृत्वेन चैतमेवोपासीतेति ॥

अथ पुनर्योऽयं मध्यमोत्तमयोर्ज्योतिषोरग्निप्रवादः, स कथम् ? इति,—"निपातम् एव एते उत्तरे ज्योतिषी, एतेन नामधेयेन भजेते"। निपातो नाम अप्राधान्यम्, भक्तिरित्यर्थः ॥ ५ (१८) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)
चतुर्थः पादः ॥ ७, ४ ॥

---

16. (અનુ૦) "સમુદ્ર (આકાશ)માંથી (ઊર્મિ=) પ્રકાશથી બધાને આચ્છાદિત કરનાર, મધુમાન્ અર્થાત્ આદિત્ય ઉતરી આવ્યો." એ સૂક્તમાં ('અગ્નિ' શબ્દથી) આદિત્ય કહેવાયો છે એમ (નૈરુક્તો) માને છેઃ "સમુદ્રમાંથી, જળમાંથી એ (આદિત્ય) ઉદય પામે છે." એવું બ્રાહ્મણવચન પણ છે. એ જ પ્રમાણે, બીજું એક બ્રાહ્મણવચન છે : 'અગ્નિ જ સર્વ દેવતા છે' તેના વિશેષ નિર્વચન માટે નીચેની ઋચા છે : "અગ્નિને જ ઇન્દ્ર, મિત્ર અને વરુણ કહે છે. એ દિવ્ય, ગરુત્માન્ (=સ્તુતિયુક્ત) અને સુંદર પાંખોવાળો (આદિત્ય પણ અગ્નિ જ) છે. એક જ (મહાનાત્મા અને/અથવા અગ્નિ)ને વિપ્રો અનેક નામોથી બોલાવે છે. જેમ કે, "એક અગ્નિને જ યમ અને માતરિશ્વા કહે છે." આ મહાનાત્મા અને/અથવા અગ્નિને જ અનેક રીતે મેધાવીઓ બોલાવે છે. ઇન્દ્રને, મિત્રને, વરુણને અગ્નિને અને દિવ્ય ગરુત્મન્‌ને-અહીં દિવ્ય એટલે દ્યુલોકમાં જન્મેલ તથા ગરુત્મન્ (સ્તુતિયુક્ત) એટલે ગરણવાન્ (રસોનું ગ્રહણ કરનાર), ગુર્વાત્મા અથવા મહાત્મા.

પરંતુ જે દેવતાની એક આખા સૂક્તમાં સ્તુતિ થઈ હોય અને એ જ દેવતાને ઉદ્દેશીને હવિષ આપવામાં આવ્યો હોય તે તો આ જ (પૃથિવીસ્થાનીય) અગ્નિ છે. જ્યારે બીજા બે જ્યોતિઓ (વિદ્યુત્ અને આદિત્ય) તો આ 'અગ્નિ' નામથી નિપાત (ગૌણ) રૂપે સ્તુતિ પામ્યા છે.

16. (વિમર્શ) આ ચોથા પાદના પ્રારંભે કહ્યું છે કે હવે પછી દેવતાઓની અનુક્રમે વ્યાખ્યા કરવામાં આવશે. આ વ્યાખ્યા ક્યા પ્રકારની હશે ? તેની સમજૂતી આપતાં દુર્ગે કહ્યું હતું કે અભિધાન, અભિધેય, અભિધાનવ્યુત્પત્તિ, પ્રાધાન્ય સ્તુત્યુદાહરણ, તેનું નિર્વચન, વિચાર, ઉપપત્તિ અને અવધારણ-એવા ક્રમશઃ મુદ્દાઓવાળી વ્યાખ્યા કરવામાં આવશે. એટલે કે ૧. પહેલા દેવતાનું અભિધાન (નામ) દા.ત., 'અગ્નિ' આપવામાં આવશે. ૨. अयं पार्थिवः એમ અભિધેય (અર્થ) બતાવશે. ૩. अग्रणीर्भवति। એ રીતે અભિધાનની વ્યુત્પત્તિ આપવામાં આવશે, પછી ૪. પ્રધાનપણે જે ઋચામાં તે દેવતાની સ્તુતિ હોય એનું ઉદાહરણ આપવામાં આવશે-દા.ત., अग्निमीळे०। ૫. अग्निमीळे=अग्निं याचामि એમ કહીને તે ઋચાનું નિર્વચન આપવામાં આવશે, પછી ૬. स न मन्येतायमेव अग्निः। એવી રીતે વિચાર રજૂ કરવામાં આવશે, ૭. यस्तु सूक्तं भजते यस्मै हविर्निरूप्यते। એવા પૂર્વોક્ત સિદ્ધાન્તથી ઉપપત્તિ દર્શાવવામાં આવશે અને ૮. अयमेव सोऽग्निः એવી રીતે અન્તે અવધારણ કરવામાં આવશે. આ પ્રકારની વ્યાખ્યાશૈલીનું ઉદાહરણ ચોથા પાદના પ્રારંભથી માંડીને અત્યાર સુધીની ચર્ચામાં સ્પષ્ટપણે જોવા મળે છે.

આ પાદની અંદર 'અગ્નિ' શબ્દની વ્યુત્પત્તિ વગેરે વિચારીને જાહેર કર્યું કે અન્તરિક્ષ અને દ્યુલોકના જ્યોતિઓ અનુક્રમે વિદ્યુત્ અને

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

આદિત્યને માટે પણ 'અગ્નિ' એવો શબ્દ ઋચામાં વપરાયેલો જોવા મળે છે. તથાપિ આ ત્રણેયમાંથી જે સૂક્તભાક્ અને હવિર્ભાક્ દેવતા ગણાયો છે તે તો પાર્થિવ અગ્નિ જ છે. માટે 'અગ્નિ' શબ્દથી સ્તુતિ પામેલો વિદ્યુત્ અને આદિત્ય નિપાતભાક્ ગણાશે. આ નિર્ણયને અન્તે ચોથો પાદ પૂરો થાય છે, હવે પાંચમા પાદમાં 'જાતવેદસ્' શબ્દની વ્યુત્પત્તિ વગેરેની વિચારણા કરવામાં આવશે.

पञ्चमः पादः

17. जातवेदाः कस्मात् । जातानि वेद । जातानि वा एनं विदुः । जाते जाते विद्यते इति वा । जातवित्तो वा । जातधनः । जातविद्यो वा । जातप्रज्ञानः । यत्तज्जातः पशून् अविन्दत तज्जातवेदसो जातवेदस्त्वम् (मैत्रा. सं. १/८/२) इति ब्राह्मणम् । तस्मात् सर्वानृतून्पशवोऽग्निमभिसर्पन्ति (मैत्रा. सं. १/८/२) इति च ॥

"जातवेदाः"—इति वक्तव्यम् । स पुनरेष माहाभाग्यात् कर्मपृथक्त्वादग्निरेव ? अथवा पृथगभिधानस्तुत्यन्तरसम्बन्धाद् देवतान्तरम् । "जातवेदाः कस्मात्" ? स हि "जातानि वेद" न हि तदस्ति जातमस्मिंल्लोके यदसौ न वेद सर्वज्ञ इत्यर्थः । "जातानि वा एनं विदुः" स एव धातुः, कारकान्यत्वं केवलम् । "जाते जाते विद्यत इति वा" विदेः सत्तार्थस्याधिकरणे कारके, न तदस्ति जातं यत्रासौ नास्ति । "जातवित्तो वा जातधनः" जातशब्दः पूर्वपदम्, वित्तशब्द उत्तरपदम्, जातमस्य वित्तमिति जातवेदाः । "जातविद्यो वा जातप्रज्ञानः" जातशब्द एव पूर्वपदम्, विदेर्ज्ञानार्थस्योत्तरपदत्वम्, निसर्गत एवास्य जातं प्रज्ञानमित्यर्थः । "ब्राह्मणम्" अपि च भवति, जनेर्विदिश्च जातवेदा इति,—"यत्तज्जातः पशूनविन्दत—इति" । 'यत्' असौ 'तत्' तदा 'जातः' जातमात्र एव निसर्गतः 'पशून्' 'अविन्दत' 'अलभत' "तज्जातवेदसो जातवेदस्त्वम्—इति" विज्ञायते । यतश्चैतदेवम्, "तस्मात्" अद्यत्वेऽपि स्वाम्ययमस्माकमिति मन्यमानाः "पशवः" "सर्वान् ऋतून्" प्रति, अपि ग्रीष्मे, "अग्निम् अभिसर्पन्ति" ॥

"तस्य" जातवेदसः स्तुत्युदाहरणम् "एषा" ऋक् भवति—॥ १ (१९) ॥

17. (અનુ૦) 'જાતવેદસ્' શબ્દ કેવી રીતે બન્યો હશે ? તો (૧) જે જન્મેલાને જાણે છે (તે જાતવેદસ્); અથવા તો (૨) જન્મેલાઓ જેને જાણે છે (તે જાતવેદસ્); અથવા (૩) દરેક જન્મેલાઓમાં જે રહેલો છે (તે જાતવેદસ્); અથવા તો (૪) જે કાંઈ જન્મેલું છે તે જેનું ધન છે (તે જાતવેદસ્) અર્થાત્ જે જાતધન છે (તે જાતવેદસ્); (૫) (નિસર્ગતઃ જેને) જન્મતાંની સાથે જ જ્ઞાન પ્રાપ્ત થયું છે એટલે કે જે જાતપ્રજ્ઞાન છે તેને જાતવેદસ્ કહે છે. (૬) "જેણે જન્મતાંની સાથે જ પશુઓને મેળવ્યાં તે જાતવેદસ્નું જાતવેદસ્ત્વ છે" એવું બ્રાહ્મણગ્રન્થમાં કહ્યું છે. અને "તેથી (આ જાતવેદસ્ અમારો સ્વામી છે એવું માનતા) પશુઓ દરેક ઋતુમાં અગ્નિ તરફ સરકે છે." એવું પણ બ્રાહ્મણવચન છે.

17. (વિમર્શ) યાસ્કે 'જાતવેદસ્' શબ્દનાં છ નિર્વચનો આપ્યાં છે. આ તરફ ધ્યાન દોરતાં ડૉ. સિદ્ધેશ્વર વર્માએ કહ્યું છે કે એક જ શબ્દનાં આવાં અનેક નિર્વચનો સૂચવે છે કે યાસ્કના સમયમાં વ્યુત્પત્તિ અંગે ઘણો રસ જાગ્યો હતો. 'જાતવેદસ્' શબ્દનાં આ છ નિર્વચનો ત્રણ ધાતુઓ (√વિદ્ હોવું, √વિદ્ જાણવું અને √વિદ્ મેળવવું)ને આધારે સમજાવવામાં આવ્યાં છે. અહીં એ ધ્યાનપાત્ર બને છે કે વૈયાકરણોના ધાતુઓ જ યાસ્કને માટે વ્યુત્પત્તિનું સાધન બન્યા છે. આથી ડૉ. વર્મા કહે છે કે યાસ્ક વ્યક્તિગત રીતે ગમે તેટલા બુદ્ધિશાળી હોય તો પણ એક વ્યુત્પત્તિકાર તરીકે ઘણા દરિદ્ર હતા. કેમ કે તેમની વ્યુત્પત્તિઓ કેવળ ધાતુમૂલક જ છે.

જાતવેદસ્ એ અગ્નિનું ગુણવાચક-વિશેષણ છે. આ શબ્દનાં છ નિર્વચનો આપવામાં આવ્યાં છે, એથી એવું પણ કહી શકાય કે યાસ્કના સમયથી જ આ શબ્દની વ્યુત્પત્તિ અજ્ઞાત (obscure) બની હતી. આ છએ નિર્વચનો ત્રણ ત્રણ ધાતુઓ સાથે સંકળાયેલાં છે : (૧) √વિદ્ જાણવું. જે જન્મેલાં પ્રાણીઓને જાણે છે અથવા પ્રાણીઓ જેને જાણે છે તે. (૨) √વિદ્ મેળવવું જેણે, જન્મ્યો ત્યારે બધાં પ્રાણીઓને મેળવ્યાં. (૩) √વિદ્ હોવું. જે બધાં પ્રાણીઓમાં રહેલો (વિદ્યમાન) છે. काव्येन केन जातेनासि जातवेदाः । (કયા જ્ઞાનની શક્તિથી તું પ્રાણીઓને જાણે છે ?) (અથર્વવેદ : ૧૧-૨). આ સૂચવે છે કે जातानि वेद એ કદાચ સંભવિત નહીં, તો પણ ઘણા પ્રાચીન વ્યુત્પત્તિ છે. જો કે યાસ્કે (નિરુ. ૭/૧૯માં) જાતવેદસ્ શબ્દની વ્યુત્પત્તિ આપતું બ્રાહ્મણવચન ઉદ્ધૃત કર્યું છે. પરંતુ તેમણે આ દ્વારા બ્રાહ્મણગ્રન્થોમાં કેવી રીતે વ્યુત્પત્તિ આપવામાં આવે છે તેની કેવળ પદ્ધતિ જ દેખાડી છે. તેમણે આ શબ્દની વ્યુત્પત્તિ આપતા બધાં જ વૈદિક ઉદ્ધરણો એકત્ર કરી આપ્યાં નથી, કે જે સમગ્રપણે આ શબ્દની પ્રકૃતિ ઉપર કોઈક પ્રકાશ પાડી શકે. જ્યારે રોથે विश्वा वेद जनिमा जातवेदाः । (ऋ. ६—१५—१३) जन्मञ्जन्मन्निहितो जातवेदाः । (ऋ. ३—१—२०) આવા બે અંશો ઉદ્ધૃત કર્યા છે, જે સૂચવે છે કે जातानि वेद અને जाते जाते विद्यते । એવી બે વ્યુત્પત્તિઓની વેદકાળથી જ અટકળ કરવામાં આવી છે. રોથ પોતે જણાવે છે કે શબ્દ वेदस् (possession)માંથી વ્યુત્પન્ન કરવામાં આવ્યો હશે એમાં કોઈ શંકા નથી. આથી જાતવેદસ્નો શબ્દાર્થ થશે : "He, to whom all belongs'; 'All-possessor.' પરંતુ ડૉ. વર્મા કહે છે કે રોથે પોતાના આવા સ્પષ્ટ વિધાનના સમર્થનમાં કોઈ પુરાવો ટાંક્યો નથી.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

18. तस्य एषा भवति ।

[जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः (ऋ. सं. १/९९/१) ॥ जातवेदस इति जातवेदस्यां वैवं जातवेदसेऽर्चाय सुनवाम सोममिति । प्रसवायाभिषवाय सोमं राजानममृतम् । अरातीयतो यज्ञार्थमिति निदहाति निश्चयेन दहति भस्मीकरोति । सोमो ददिदित्यर्थः । स नः पर्षदति दुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नदीं जलदुर्गां महाकूलां तारयति । दुरितात्यग्निरिति दुरितानि तारयति ॥ तस्य एषा अपरा भवति ।]

प्र नूनं जातवेदसमश्वं हिनोति वाजिनम् । इदं नो बर्हिरासदे (ऋ. सं. १०/१८८/१) ॥ प्र हिणुत जातवेदस कर्मभिः समश्नुवानम् । अपि वा । उपमार्थे स्यात् । अश्वमिव जातवेदसम् इति । इदं नो बर्हिः आसीदतु इति । तदेतत् एकम् एव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते । यत्तु किञ्चित् आग्नेयं तत् जातवेदसानां स्थाने युज्यते ॥

"प्र नूनं जातवेदसम्"—इति (ऋ० सं० ८, ८, ४६, १) । श्येनस्याग्निपुत्रस्यार्षम् । गायत्री । हे स्तोतारो यूयमुच्यध्वे । 'प्रहिनोत' "प्रहिणुत" प्रेरयत स्तुतिभिरेतं 'जातवेदसम्' 'अश्वम्' "कर्मभिः" सर्वमेतत् जगत् "अश्नुवानम्" व्यापयन्तम्, 'वाजिनम्' वेजनवन्तं चञ्चलमर्चिर्भिः, अथवा "अश्वमिव", इति लुप्तोपमम्, रूढेर्बलीयस्त्वात्, 'वाजिनं' बेजनवन्तं ज्वलनस्वभावं शीघ्रम् । किमिति प्रहिणुत ? इति । इतः,—आसत्तुम् इति कृत्यार्थे केन वा—'इदं नो बर्हिरासदे' । 'इदम्' अस्मत्कर्म, बर्हिषोपलक्षितं बर्हिः । कथं नामास्मदभिमतार्थसिद्ध्यर्थमाभिमुख्येन सीदेदित्येवमर्थं प्रहिणुतेति ॥

इदानीमुत्सर्गं दर्शयति प्रयोजनार्थम्,—"तदेतदेकमेव जातवेदस्यं गायत्रं तृचम्"—इत्यादि । तदिति दशतयीष्वस्यानुस्मृतस्य परोक्षनिर्देशः, एतदिति प्रत्यक्षेण प्र नूनमित्येतया सन्निधीकृत्योपदिशति, गायत्रमिति छन्दोनिर्देशो विवक्षितप्रयोजनार्थः तृचमिति एतत्सूक्तस्य सङ्ख्यानिर्देशः, दशतयीषु सर्वास्वपीति निर्द्धारणे सप्तमी, 'विद्यते' अस्ति । ततः किं यद्येतदेवैकं जातवेदसं गायत्रं तृचं दशतयीषु विद्यते ? शृणु,—बहुभिरेतैर्गायत्रच्छन्दोयुक्तैर्जातवेदस्यैर्मन्त्रैरधियज्ञे प्रयोजनमस्ति, न चैते बहवः सन्ति सर्वास्वपि दशतयीष्वेतदेवैकं तृचं मुक्त्वा । तत्र किं कर्त्तव्यम् ? इति,—"यत्तु किञ्चिदाग्नेयम्" मन्त्रजातम् गायत्र एव छन्दसि अजातवेदोलिङ्गमपि, "तत्" "जातवेदसानाम्" मन्त्राणां "स्थाने" विनि"युज्यते" शास्त्रेण । तेन किं स्थितं भवति ? अग्निरेव जातवेदा इति, कर्मपृथक्त्वात् माहाभाग्याद्वा इति, इतरथा हि प्रयोगवैकल्यं स्यात्, न चान्यद्देवमन्यस्य स्थाने प्रयुज्यते । यथा चायमनर्थान्तरग्निर्जातवेदा । एतस्माद् विधिलिङ्गात्, तथा वैश्वानरप्रभृतयोऽपीत्युपेक्ष्यम् ॥

---

18. (અનુ૦) એ (જાતવેદસ્)ની (સ્તુતિ કરતી ઋચા) આ પ્રમાણે છે : ["અમે જાતવેદસ્‌ને માટે સોમ નીચોવીએ છીએ. શત્રુઓ જેવું આચરણ કરનાર (अरातीयतः)નું ધન (वेदः) તે બાળી મૂકે. તથા એ (અગ્નિ) અમારા દુઃસાધ્ય દુઃખોથી અમને પાર ઉતારે. જેવી રીતે કોઈ નાવિક નૌકાથી (મગર ઇત્યાદિ ગ્રાહોથી ભરેલી) નદીને પાર કરાવે તેવી રીતે આ અગ્નિ અમને પાપોથી તારે." અહીં जातवेदसः એટલે जातवेदस्याम् અથવા जातवेदसे (જાતવેદસ્‌ને માટે). અર્થાત્ અર્ચનીય જાતવેદસ્‌ને માટે અમે સોમ નીચોવીએ છીએ. અમૃતસ્વરૂપ રાજા સોમને प्रसवाय કે अभिषवाय = નીચોવવા માટે. શત્રુઓ જેવું આચરણ કરનારનું (ધન) યજ્ઞને માટે નિશ્ચયપૂર્વક બાળી નાખે છે, ભસ્મીભૂત કરે છે. 'સોમે આપ્યું' એવો અર્થ છે. (-આ વાક્ય અસ્પષ્ટ છે.) (એ અગ્નિ) અમારાં બધાં જ દુર્ગમ (દુઃખો)ને અર્થાત્ દુર્ગમ સ્થાનોને વિપુલ જળ ભરેલી અને દૂર કિનારાવાળી નદીને જેવી રીતે નૌકાથી પાર કરવામાં આવે તેવી રીતે પાર ઉતારે. અહીં दुरितात्यग्निः એટલે દુરિતોને તારે. તે જાતવેદસ્‌ની સ્તુતિ કરતી આ બીજી ઋચા છે :—]

"વેગવાન્ (वाजिनम्) ઘોડાની જેમ જાતવેદસ્‌ને અમારા આ (યજ્ઞમાં) કુશ (बर्हिः) ઉપર બેસાડવાને માટે પ્રેરણા આપો." કર્મો વડે બધે વ્યાપી વળનાર (અશ્વ) જાતવેદસ્‌ને પ્રેરિત કરો. (અહીં 'અશ્વ' શબ્દને જાતવેદસ્‌નું વિશેષણ માની સમજૂતી આપી છે) અથવા તો (અશ્વ શબ્દ) ઉપમાર્થે હશે. જેમકે, અશ્વની જેમ જાતવેદસ્‌ને. અર્થાત્ ઘોડાના જેવા વેગવાન્ આ અગ્નિને જણાવે કે તે અમારા આ કુશ ઉપર (કુશથી ઉપલક્ષિત યજ્ઞમાં આવીને) બેસે. આખા ઋગ્વેદમાં ગાયત્રી છન્દમાં ઉપનિબદ્ધ અને ત્રણ ઋચાઓવાળું આ (૧૦।૧૮૮।૧૩) એક જ સૂક્ત છે કે જેમાં જાતવેદસ્ શબ્દ વપરાયો છે. આથી બીજું જે કોઈ ગાયત્રી છન્દમાં રચાયેલું આગ્નેય સૂક્ત હોય તે જાતવેદસ્‌ને સ્થાને પ્રયોજાય છે.

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain. Digitized by eGangotri.

(18 વિમર્શ) ઉપર જે અંશ મોટા [ ] કૌંસમાં છાપ્યો છે તે પ્રક્ષિપ્ત લાગે છે. કેમ કે દુર્ગાચાર્યે તેની ઉપર ટીકા લખી નથી તથા તેની ગદ્યશૈલી પણ જુદી પડે છે. કેટલાક વિદ્વાનોના મતે નિરુકતના (પ્રક્ષિપ્ત મનાતા) ચૌદમા અધ્યાયના લેખકે આ અંશ જોડી દીધો હશે. જોકે આ અંશ જોડી દેવામાં તે સફળ થયેલ નથી.

ઉપર જે કહ્યું કે 'ગાયત્રી છન્દમાં રચાયેલું આગ્નેયસૂક્ત જાતવેદસ્‌ને સ્થાને પ્રયોજાય છે' તેનું તાત્પર્ય સ્પષ્ટ કરતાં દુર્ગાચાર્ય જણાવે છે કે અગ્નિ એ જ જાતવેદસ્ છે. કેવળ કર્મપૃથક્ત્વ કે મહા-ઐશ્વર્યને કારણે જુદાં જુદાં નામો વપરાય છે. અન્યથા પ્રયોગવૈકલ્પ આવી પડશે. એટલે કે અન્ય (અગ્નિ) દેવતા માટેનું સૂક્ત અન્ય (જાતવેદસ્) દેવતા માટે ન પ્રયોજી શકાય. આથી સાબિત થાય છે કે અગ્નિ અને જાતવેદસ્ એ અનર્થાન્તર છે. એ જ પ્રમાણે, વૈશ્વાનર વગેરે નામોને વિશે પણ સમજવું.

19. स न मन्येत अयमेव अग्निः इति । अपि एते उत्तरे ज्योतिषी जातवेदसौ उच्येते । ततो नु मध्यमः । अभि प्रवन्त समनेव योषाः (ऋ. सं. ४/५८/८) इति । तत्पुरस्तात् व्याख्यानम् (निरु. ७/१७) । अथ असौ आदित्यः । उदु त्यं जातवेदसम् (ऋ. सं. १/५०/१) इति । तदुपरिष्टात् व्याख्यास्यामः (निरु. १२/१५) । यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते अयमेव सोऽग्निर्जातवेदाः । निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते ॥

"स न मन्येत"—इति पूर्ववद् विचारः, केवलम् "अभिप्रवन्त"—इत्यत्राग्निपदविचारे अग्निशब्दो विशेष्य आसीत, जातवेदःशब्दोऽस्य गुणपदमिति, इह तु जातवेदःशब्दविचारे पुनः "अभिप्रवन्त"—इत्यस्मिन्नेवोपात्ते मन्त्रे गुणपदमग्निशब्दो जातवेदःशब्दस्येत्येतावदुपेक्ष्यम् ॥

यथा तु पूर्वस्मिन् "समुदादूर्मिः"—इति आदित्यस्याग्नित्वोपपत्तावुदाहरणम्, तथेह—"अथ असौ आदित्यः,—'उदु त्यं जातवेदसम् (ऋ० सं० १, ४, ६, १)'—इति" जातवेदस्त्वोपपत्तौ । तदेतत् प्रतिपदमुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"—"जातवेदसं सूर्य्यमुद्वहन्तीति तु विशेषणविशेष्यसामानधिकरण्यैकवाक्यप्रसिद्धया स्वनिगमसिद्धमस्मिन् मन्त्रे जातवेदाः सूर्य्यः"— इति । तस्मात् सुष्ठुक्तं यत् 'स न मन्येत अयम् एव अग्निः" जातवेदाः इति ॥

"यः तु सूक्तं भजते, यस्मै हविः निरूप्यते, अयम् एव सः अग्निः जातवेदाः"—इति । "यस्तु सूक्तं भजते, यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्जातवेदाः"—इति पूर्ववत् प्रसिद्धिरेव विशेषहेतुः । यद्यपि मन्त्रदर्शनमविशिष्टं त्रयाणामपि ज्योतिषां जातवेदस्त्वे, तथापि पार्थिवोऽग्निरितरयोः प्रसिद्ध्या विशेष्यते, जातवेदस्त्वं हि यथा प्रसिद्धमस्मिन्नग्नौ, न तथा वैद्युते, नापि सूर्य्ये इति । "निपातमेवैते उत्तरे ज्योतिषी" "एतेन" जातवेदा इत्यनेन 'नामधेयेन भजेते" इति । व्याख्यातम् ॥ ३ (२०) ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)

पञ्चमः पादः ॥ ७, ५ ॥

19. (અનુ૦) એ (નિરુક્તનો મેધાવી શિષ્ય) એમ ન માને કે આ (પાર્થિવ) અગ્નિને માટે જ 'જાતવેદસ્' શબ્દ વપરાય છે; કેમ કે અન્તરિક્ષ અને દ્યુલોકના બે જ્યોતિઓને પણ 'જાતવેદસ્' કહે છે, તો હવે મધ્યમ (અન્તરિક્ષ) સ્થાનના (અગ્નિની એટલે કે વિદ્યુત્‌ની સ્તુતિ આ પ્રમાણે છે :) अभिप्रवन्त समनेव योषाः० ॥ આ ઋચાની અગાઉ વ્યાખ્યા કરી નાંખી છે. હવે આ આદિત્યની સ્તુતિ કરતી જે ઋચા છે उदुत्यं जातवेदसम्० । તેની વ્યાખ્યા આગળ ઉપર કરીશું. પરંતુ જે દેવતાની એક આખા સૂક્તમાં સ્તુતિ થઈ હોય અને એ જ દેવતાને ઉદ્દેશીને હવિષ્ આપવામાં આવ્યો હોય તે તો આ (પૃથિવીસ્થાનનો) અગ્નિ જાતવેદસ્ જ છે. જ્યારે બીજા બે જ્યોતિઓ (વિદ્યુત્ અને આદિત્ય) તો આ (જાતવેદસ્) નામથી નિપાત (ગૌણ) રૂપે સ્તુતિ પામ્યા છે.

षष्ठः पादः

20. वैश्वानरः कस्मात् । विश्वान् नरान् नयति । विश्वे एनं नराः नयन्ति इति वा । अपि वा । विश्वानर एव स्यात् । प्रत्यृतः सर्वाणि भूतानि । तस्य वैश्वानरः । तस्य एषा भवति ।

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।

इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण (ऋ. सं. १/९८/१) ॥ इतो जातः सर्वमिदम् अभिविपश्यति । वैश्वानरः संयतते सूर्येण । राजा यः सर्वेषां भूतानाम् अभिश्रयणीयः तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्याम ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"वैश्वानरः"—इति वक्तव्यम, तदर्थमुपोद्घन्ति—"वैश्वानरः कस्मात् ?" "विश्वान् नरान्" इतो लोकात् अमुं लोकं "नयति हेतुकर्तृत्वेन सर्वासु प्रवृत्तिषु अयमेव नरान् नयति । यथा पञ्चाग्निविद्यामुयाच्यते—"अपि वा संति तस्मिन् सर्वाः प्रवृत्तयः फलवत्यो नराणां भवन्तीति हेतुकर्तृत्वेन सर्वासु प्रवृत्तिष्वयमेव नरान् नयति प्रवर्तयतीति वैश्वानरः" । अथवा "विश्वे एनं नराः नयन्ति इति वा" कर्मकारकम्, स नीयमानः तासु तासु क्रियास्वङ्गभावं नरैः कर्म सम्पद्यते । "अपि वा" "विश्वानरः एव" कश्चित् "स्यात्" । स पुनः कस्मात् ? "प्रत्यृतः सर्वाणि भृतानि" विश्वानि ह्यसौ भूतानि 'प्रति ऋतः' प्रविष्ट इत्यर्थः' । "तस्य" विश्वानरस्य अपत्यं "वैश्वानरः" ॥

"तस्य" वैश्वानरस्य "एषा" प्राधान्यस्तुतिर्ऋक् "भवति"—॥ १ (२१) ॥

"वैश्वानरस्य सुमतौ"—इति (ऋ० सं० १, ७, ६, १) । कुत्सस्यार्षम् । पृष्ठ्याभिप्लवयोश्चतुर्थपञ्चमयोरह्नोराग्निमारुतस्य प्रतिपत् । 'इतः' पृथिवीलोकात् ओषधिवनस्पतिभ्यः 'यः 'जातः' 'विश्वम् इदं विचष्टे' "सर्वमिदमभिपश्यति" । यश्चाभिद्रष्टव्य उपकारकत्वेन, दर्शयति वा प्रकाशकत्वेन । यश्च 'यतते' "सयंतते" 'सूर्य्येण' सङ्गच्छते स्वेन भासा । 'राजा' च 'यः' 'भुवनानां "सर्वेषां भूतानाम्" अभिश्रीः' "अभिश्रयणीयः आश्रयणीयः ॥ "तस्य वयम्" एवङ्गुणयुक्तस्य 'वैश्वानरस्य' नित्यं 'सुमतौ' "कल्याण्यां मतौ" उपकारप्रवृत्तायामात्मनो यथाभिमतार्थसाधिकायाम् 'स्याम' । —इत्येतत् आशास्महेः पश्यन् मन्त्रेष्वप्ययमेव न्याय इत्युपदर्शनार्थं पदानां क्रमं बिभेद, कल्याण्यां मतौ स्यामेत्याशिषा च समापयाञ्चक्रे ॥

अनेकतिङि चैतस्मिन् मन्त्रे प्रतितिङ् वाक्यभेदे प्राप्ते यत्तदोरध्याहारेण "राजा यः सर्वेषां भूतानामभिश्रयणीयः, तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्याम"—इत्येकवाक्यतया सामर्थ्यमुद्भावयाञ्चकार । एकोऽत्रार्थपतिर्वैश्वानरः, यतः कल्याणी आशास्यते मतिः, तमेभिः शब्दैरभिष्टौति, सन्तिष्ठते स्तुतिरिति । अयमेकवाक्यतान्यायः प्रायशो मन्त्रेषु, क्वचित् पुनः प्रत्याख्यातमर्थमपेक्ष्य एकस्मिन्नपि मन्त्रे वाक्यभेदो भवत्येव । तद्यथा,—'ऋचां त्वः पोषम् (ऋ० सं० ८, २, २४, ६)" इत्यत्र प्रतिपादं वाक्यसमाप्तिः । अन्येषामपि च मन्त्राणामाकाङ्क्षितार्थिनां परस्परमेकवाक्यता भवति. तदपि चोपप्रदर्शयिष्यति—"येना पावक चक्षसा (ऋ० सं० १, ४, ८, १)"—इत्यत्र ॥

---

20. (અનુ૦) 'વૈશ્વાનર' એવું નામ કેવી રીતે પડ્યું ? તો ૧. બધા જ મનુષ્યોને તે (અગ્નિ) લઈ આવે છે, અથવા ૨. બધા મનુષ્યો એને (અગ્નિને) લઈ આવે છે માટે તે વૈશ્વાનર કહેવાય છે. ૩. અથવા તો વિશ્વાનર (विश्वान् अर एव स्यात । અર્થાત્ બધા મનુષ્યોને પ્રાપ્ત થયેલો) હશે, એટલે કે જે બધા ભૂતોમાં પ્રવિષ્ટ થયેલો હોય તેને વિશ્વાનર કહે છે. તે વૈશ્વાનર સંબંધી ઋચા આ પ્રમાણે છે : "અમે વૈશ્વાનરની સુમતિમાં રહીએ. જે (વૈશ્વાનર) બધા ભુવનોને માટે આશ્રયસ્થાન રૂપ રાજા છે. અહીંથી (પૃથિવીલોકમાંથી) જન્મેલો એ (વૈશ્વાનર અગ્નિ) આ વિશ્વને જુવે છે. વૈશ્વાનર સૂર્યની સાથે જાય છે" અહીંથી જન્મેલો એ (વૈશ્વાનર) આ બધું જ જુવે છે. વૈશ્વાનર સૂર્યની સાથે ચાલે છે. જે રાજા બધા ભૂતોને માટે આશ્રયણીય છે, તે વૈશ્વાનરની કલ્યાણકારિણી મતિમાં અમે રહીએ.

20. (વિમર્શ) યાસ્કે આપેલી પહેલી બે વ્યુત્પત્તિઓમાં विश्व + नर + √नीના પદો કલ્પવામાં આવ્યાં છે. આમાંથી √नीનો લોપ થયો છે એમ માનવાનું રહે છે, પરંતુ આથી ડૉ. વર્માએ વ્યુત્પત્તિને આદિમકાળની ગણી છે. યાસ્કે विश्व + नर + √नीમાં કારકભેદ કરીને આ શબ્દને બે રીતે સમજાવ્યો છે : १. विश्वान् नरान् नयति । અહીં વૈશ્વાનર અગ્નિને કર્તા માન્યો છે અને २. विश्वे एनं नराः नयन्ति । ત્યાં વૈશ્વાનર અગ્નિને કર્મ માન્યો છે. યાસ્કે આ શબ્દને એક ત્રીજી રીતે પણ વ્યુત્પન્ન કરી બતાવ્યો છે. જેમ કે, विश्वानर एव स्यात, प्रत्यृतः सर्वाणि भूतानि, तस्य वैश्वानरः । વૈશ્વાનરમાં મૂળ 'વિશ્વાનર' શબ્દ છે. આમાં विश्वान् + अर (√ऋ) પદો કલ્પવામાં આવ્યા છે, પરંતુ ડૉ. વર્મા કહે છે કે આને વ્યુત્પત્તિ કહેવી કે નહીં એ અચોક્કસ છે. પીટર્સબર્ગના શબ્દકોશમાં belonging to all men—એ અર્થમાં 'વિશ્વાનર' શબ્દ સવિતા કે ઇન્દ્રનો, અને 'વૈશ્વાનર' શબ્દ અગ્નિનો વાચક બતાવ્યો છે. ડૉ. વર્મા જણાવે છે કે ગ્રાસમેને આ શબ્દનો pertaining to the whole of humanity અર્થ કર્યો છે, પરંતુ પદપાઠકારોએ શબ્દને વિભક્ત કર્યો નથી. કેમ કે તેમના સમયમાં ગ્રાસમેને દર્શાવેલો અર્થ પરિચિત ન હતો. 'માનવજાતની મિલકત' એવો અર્થ અગ્નિ એક સ્થાવર પદાર્થ હોય એવો ભાવ જન્માવે છે. જ્યારે યાસ્ક અને સાયણ તેને જંગમ પદાર્થ તરીકે જોતા હોય એમ લાગે છે. કેમકે તેમણે અનુક્રમે विश्वं + नर + √नी કે √ऋ; અને वैश्वानरः विश्वेषां नराणां लोकान्तरनेतृत्वेन स्वामित्वेन वा सम्बन्धोऽग्नेः either one who leads mankind or one who approaches mankind.—એ રીતે આ શબ્દને સમજાવ્યો છે. જોકે યાસ્કે દર્શાવેલો આવો અર્થ તે શબ્દથી વ્યક્ત થતો નથી. બીજું યાસ્કે આપેલી સમજૂતી અપ્રસિદ્ધ હોવાથી પદપાઠકારે વિશ્વાનર શબ્દને પણ વિભક્ત કર્યો નથી. જોકે તેઓએ વિશ્વાવસુ શબ્દ વિભક્ત કર્યો છે. 'વૈશ્વાનર' શબ્દ ઉપર ભાષ્ય રચતાં

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain. Digitized by eGangotri.

સાયણે પાણિનિનું नरे संज्ञायम् । ૪—૩—૧૨૯ સૂત્રને રજૂ કર્યું છે. આ સૂત્ર नर શબ્દ પરમાં રહેતાં પૂર્વે આવેલા विश्व શબ્દના અન્તિમ अ કારને દીર્ઘ બનાવે છે : विश्वानरः । આને तस्येदम् । ૪।૩।૧૨૦ સૂત્રથી વિશેષણ રૂપે वैश्वानरःમાં રૂપાંતરિત કરવામાં આવે છે. પરંતુ આ શાસ્ત્રીય પ્રક્રિયા ભાગ્યે જ શબ્દના અર્થ ઉપર પ્રકાશ પાડી શકે છે. પદપાઠકારોએ આ શબ્દને वैश्वाऽनर કે विश्वानऽअर । એ રીતે વિભાજિત કરી બતાવ્યો નથી–એમાં એક રીતે કદાચ પદપાઠકારોનું અજ્ઞેયવાદી વલણ છે એમ કહી શકાય. अपि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि । એની ઉપર દુર્ગે કહ્યું છે કે विश्वानर નામની કોઈ દેવતા હશે, જેનો પુત્ર 'वैश्वानर' કહેવાશે. પ્રા. રાજવાડે આ અનુસન્ધાનમાં કહે છે કે દુર્ગ પાસે જે નિરુક્તનો પાઠ હશે તેમાં भूतानि પછી तस्यापत्यम् એવું પદ હશે. પરંતુ ડૉ. વર્મા કહે છે કે પ્રા. રાજવાડે એ તેમના સૂચનના સમર્થનમાં કોઈ પુરાવો આપ્યો નથી. (પરંતુ રાજવાડેના સમર્થનમાં કહીએ તો...तस्य वैश्वानरः । એ મૂળપાઠમાં अपत्यम् એવો અધ્યાહાર લેવો પણ તર્કસંગત ગણાશે.)

21. तत्को वैश्वानरः । मध्यमः इति आचार्याः । वर्षकर्मणा हि एनं स्तौति । प्र नु महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते । वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् (ऋ. सं. १/५९/६) ॥ प्र ब्रवीमि तत् महित्वं महाभाग्यं वृषभस्य वर्षितुः अपां यं पूरवः पूरयितव्याः मनुष्याः वृत्रहणं मेघहनं सचन्ते सेवन्ते वर्षकामाः । दस्युः दस्यतेः क्षयार्थात् । उपदस्यन्ति अस्मिन् रसाः । उपदासयति कर्माणि । तम् अग्निर्वैश्वानरो घ्नन् अवाधूनोत् अपः काष्ठाः । अभिनत् शम्बरं मेघम् ॥

अथ असौ आदित्यः इति पूर्वे याज्ञिकाः । एषां लोकानां रोहेण सवनानां रोहः आम्नातः । रोहात् प्रत्यवरोहः चिकीर्षितः । ताम् अनुकृतिं होता आग्निमारुते शस्त्रे वैश्वानरीयेण सूक्तेन प्रतिपद्यते (ऐ. ब्रा. १२/३) । सोऽपि न स्तोत्रियम् आद्रियेत । आग्नेयो हि भवति । ततः आगच्छति मध्यस्थानाः देवताः रुद्रं च मरुतश्च । ततः अग्निम् इहस्थानम् । अत्रैव स्तोत्रियम् शंसति । अथापि वैश्वानरीयो द्वादशकपालो भवति । एतस्य हि द्वादशविधं कर्म । अथापि ब्राह्मणं भवति । असौ वा आदित्योऽग्निर्वैश्वानरः (मैत्रा. सं. २/१/२) इति । अथापि निवित् सौर्यवैश्वानरी भवति । आ यो द्यां भात्या पृथिवीम् (निवित् ८) इति । एष हि द्यावापृथिव्यौ आभासयति । अथापि छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवति । दिवि पृष्टो अरोचत् (आश्व. श्रौ. ८/१०) इति । एष हि दिवि पृष्टो अरोचत । इति अथापि हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवति ॥

"तत् को वैश्वानरः"—इति । अतः प्रभृति विचारः । तदिति वाक्योपादाने । कोऽयं वैश्वानरः ? इति कुतः संशयः ? आगमविप्रतिपत्तेः, विश्वानरविद्यायां तावत् 'आत्मा' इत्यात्मविदः, इन्द्रादित्यवाय्वाकाशोदकपृथिव्यादयश्च पृथक् पृथगेव वैश्वानरत्वेन विज्ञायन्ते । अपि च "मध्यमः" वैश्वानरः इति नैरुक्ताः केचित् आचार्य्याः मन्यन्ते । कस्मात् ? "वर्षकर्मणा ह्येनं स्तौति" मन्त्रदृक् । हिशब्दो हेत्वर्थः, वर्षकर्मणैनं वैश्वानरं यस्मान्मन्त्रदृक् स्तौति ॥ २ (२२) ॥

कथम् ? इति । अत आह,—"प्र नू महित्वम्" इति (ऋ० सं० १, ४, २५, ६) । नोधस आर्षम् । त्रिष्टुप् । वैश्वानरोऽग्निर्देवता । 'प्रवोचम्' "प्रब्रवीमि" अहम् । 'महित्वम्' "माहाभाग्यम्" स्तुत्या । कस्य ? 'वृषभस्य' "वर्षितुरपाम्" । 'यम्' अन्येऽपि 'पूरवः' "पूरयितव्याः मनुष्याः" कामैः, 'वृत्रहणम्' "मेघहनम्" 'सचन्ते' "सेवन्ते" "वर्षकामाः" स्तुतिभिः । तन्माहाभाग्यं प्रब्रवीमि,—यदसौ वर्षिता 'वैश्वानरः' 'अग्निः' 'दस्युं' दासयितारमुक्षयितारं रसानाम्, शुष्यन्ति हि तदनुद्गमे शस्यानि, कर्मणां वोपदासयितारमनावृष्टिद्वारेण, तं दस्युम्, 'शम्बरम्' "मेघम्" उदकवन्तमुदकपूर्णम्, 'जघन्वान्' हतवान्—'अवभेत्' "अवाभिनत् व्यदारयत्,—विदार्य्य च 'अधूनोत्' वर्षभावेनाकम्पयत् अक्षारयत् 'काष्ठाः' अपः । यः, तस्याहं वर्षप्राप्त्यर्थं प्रावोचं माहाभाग्यम्, स वर्षत्वस्माकमित्यभिप्रायः ॥

एवमेतस्मिन् मन्त्रे वैश्वानरस्य वर्षकर्मणैकवाक्यतासम्बन्धात् नान्यो मध्यमात् वैश्वानर इत्याचार्य्या मन्यन्ते । स्थितं तावदेवम् ॥

"असौ आदित्यः,—इति पूर्वे याज्ञिकाः । असाविति कर्मात्मनैनमुपदिशन् ब्रवीति, मा भूत् गौणः कश्चित् प्रत्यय इति । विधिमन्त्रार्थवादेभ्यो यज्ञसतत्वमुन्नयैनं यज्ञं प्रयोगतः प्रथमं ये चक्रुः, ते 'पूर्वे याज्ञिकाः' साक्षात्कृतधर्माण इत्यर्थः । त एनमेवमाहुः—'असौ आदित्यः इति' । कया पुनरुपपत्त्या त एवमाहुः ? इति । विध्यनुकरणप्रसिद्ध्या ॥ ३ ॥

कथम् ? इति । यतः तन्मतमाह,—"एषां लोकानां रोहेण सवनानां रोह आम्नातः" । य एव हि लोकानामारोहणानुक्रमः,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

पृथिवी—अन्तरिक्षम्—द्यौः इति, स एव सवनानामपि क्रमः, प्रातःसवनम्—माध्यन्दिनम्—तृतीयसंवनम् इति । ततः किम् ? कस्मिंश्चित् कर्मणि रोहप्रातिलोम्येन "रोहात् प्रत्यवरोहः" "चिकीर्षितः" कर्त्तुमीप्सितः, तदुपव्याचक्ष्महे । स एव होता प्रातःसवनं पृथिवीलोकभक्तिं शंसति, संसृतत्वात्, ततो माध्यन्दिनमन्तरिक्षलोकभक्ति, शंसति संसृतत्वात्, ततस्तृतीयसवनं द्युलोकभक्ति शंसति, संसृतत्वात् । प्रतिभक्तिसंसृतवच्च शंसन्—स पृथिवीलोकात् अन्तरिक्षलोकमारूढो भवति, अन्तरिक्षलोकात् द्युलोकम्, स च द्युलोकमासेहन् द्युलोकभक्ति तृतीयसवनं शंसति, तदपि शंसन् द्युलोकमारूढो भवति । सः अग्निष्टोमसाम्नि यज्ञायज्ञियं यत् शस्त्रम् आग्निमारुतं तत्सवनलोकप्रत्यवरोहानुकृतिं चिकीर्षञ्छस्त्रं "वैश्वानरीयेण सूक्तेन" "प्रतिपद्यते" प्रारभते । तद्यथा,—"वैश्वानराय पृथुपाजसे (ऋ० सं० ३, १, ३, सू०)" इतिप्रपित् । "सोऽपि न स्तोत्रियम् आद्रियेत आग्नेयो हि भवति" । प्रत्यवरोहे कर्त्तव्ये स च पुनराग्नेयोऽयं स्तोत्रियः, अग्निश्च पृथिवीस्थानः, तद्यदि तमाद्रियेत, न प्रत्यवरोहानुकृतिप्रारम्भः कृतः स्यात् । अन्येषु शस्त्रेषु च युक्त यदूर्ध्वमारुरुक्षमाणः स्तोत्रियेण प्रतिपद्यते, इह पुनरवरुरुक्षमाणो द्युस्थाधिदेवताः शंसमानः क्रमेण वैश्वानरीयेण सूक्तेन प्रातपद्यत इति, तेन ज्ञायते आदित्यो वैश्वानर इति ॥

अपि च सुतरां प्रत्यवरोहानुरिणमेतदिति गम्यते येन "तत आगच्छति मध्यमस्थाना देवताः—रुद्रश्च मरुतश्च" । 'ततः' वैश्वानरीयात् सूक्तात् प्रत्यवरोहानुकरणाभिप्रायेण शस्तात् प्रत्यवरुह्य मध्यस्थाना देवता आगच्छति मध्यस्थानेऽभिशंसितुम् । कतमाः ? रुद्रश्च मरुतश्च । तद्यथा,—"आते पतर्मरुतां सुम्नमेतु (ऋ० सं० २, ४, ११, सू०)" इति । ततोऽपि मध्यस्थानात् पृथिवीस्थानं प्रत्यवरुह्य अत्रैव तं स्तोत्रियं शंसति—"यज्ञायज्ञा वो अग्नये (ऋ० सं० ६, ४, ५, सू०)" इति । तदेवमेतस्मात् विध्यनुकरणात् पश्याम आदित्यो वैश्वानर इति ॥ ४ ॥

"अथापि वैश्वानरीयो द्वादशकपालो भवति" । देवतागुणसामान्येन हि अधियज्ञेषु गुणविधयः कल्प्यन्ते, वैश्वानरीयश्च सर्वत्र द्वादशकपालः । "एतस्य हि "द्वादशविधं" द्वादशमासप्रविभागलक्षणं "कर्म" । तेनैतस्मादपि देवतागुणकपालविध्यनुकरणात् पश्याम आदित्यो वैश्वानर इति ॥

"अथापि निवित् सौर्य्यवैश्वानरी भवति" । निविदित्याकृतिविशिष्टो मन्त्रः, शस्त्रमध्यपाती । स तथा भवति यथां सूर्य्यो वैश्वानर इति न पार्थिवो न मध्यम इति । कथम् ? इति । भवति हि तत्रैतत् पदम्,—"आ यो द्यां भात्यापृथिवीम्" इति । न च पुनरादित्यादन्योऽवभासयन्ते द्यावापृथिव्यौ, यत उच्यते,—"एष हि द्यावापृथिव्यावाभासायति" ॥

"अथापि छन्दोमिकं सूक्तं सौर्य्यवैश्वानरं भवति" । कतमत् ? 'दिवि पृष्टो अरोचताग्निर्वैश्वानरो बृहन् । क्ष्मया वृधान ओजसा चनोहितो ज्योतिषा बाधते तमः ॥'—इति (य० वा० सं० ३३, ९२ । ऋ० सं० १, ७, ६, २०—५, २, ७, २) । न च पुनरादित्याद्न्यो दिवि पृष्टो रोचते, यत उच्यते,—एष हि "दिवि पृष्टो अरोचत" । 'दिवि पृष्टः' द्युलोकं स्पृष्टः अवस्थित इत्यर्थः, 'अरोचत्' रोचते दीप्यते । कोऽसौ ? इति । 'अग्निर्वैश्वानरः' 'बृहन्' महान् इत्यर्थः । स रोचमानः किं करोति ? 'ज्योतिषा' स्वेन 'बाधते' 'तमः' नाशयत इत्यर्थः ॥

"अथापि हविष्पान्तीयं सूक्तं सौर्य्यवैश्वानरं भवति" । कथम् ? इति । भवति हि तत्र मन्त्रः—सूर्य्यो वैश्वानर इति समर्थः । तद्यथा,—"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन् (ऋ० सं० ८, ४, १२, २)"—इति । वैश्वानरं केतुं कर्त्तारमह्नामकृण्वन्निति । नैवः तावदादित्यादन्यस्याह्नां कर्त्तृत्वमुपपद्यते पार्थिव मध्यमे वा, आदित्य एव ह्युदयास्तमभ्राभ्यामह्नानि करोति । तेन वयमेतैर्हेतुभिः पश्यामः सूर्य्यो वैश्वानर इति ॥ ५ ॥

---

21. (અનુ.) આ વૈશ્વાનર કોણ છે ? (પાર્થિવાગ્નિ; વૈદ્યુતાગ્નિ કે આદિત્ય ?) આચાર્યો (કેટલાક નૈરુક્તો)ના મતે એ વૈશ્વાનર (૧) મધ્યસ્થાનનો (વૈદ્યુતાગ્નિ) છે કારણ કે તેને વર્ષાક્રિયા સાથે જોડીને સ્તુતિ કરવામાં આવી છે : "હવે હું (જળને વર્ષાવનાર) વૃષભના મહિમાને ગાઉં છું; અન્ય મનુષ્યો (પુરવઃ) પણ એ વૃત્રહન્તાને સેવે છે. એ વૈશ્વાનર અગ્નિએ દસ્યુને મારી નાંખ્યો અને મેઘને વિદારીને પાણીને વર્ષાવ્યાં." (વૃષભના અર્થાત્ જળના વર્ષાવનાર) મહિમાને = મહાભાગ્યને હું કહું છું. જે વૃત્રહન્તા અર્થાત્ મેઘહન્તાને વર્ષાની કામનાવાળા (પૂરવઃ = પૂરયિતવ્યાઃ એટલે કે) મનુષ્યો સેવે છે. અહીં દસ્યુ શબ્દ ક્ષયાર્થક √દસુ ઉપરથી બન્યો છે. અવર્ષાકાલમાં (ઓષધિઓના) રસોનો ઉપક્ષય થાય છે અથવા તો તે (અનાવૃષ્ટિ દ્વારા) કર્મોનો નાશ કરે છે (તેથી તેને દસ્યુ કહે છે). આવા દસ્યુને (અનાવૃષ્ટિને) વૈશ્વાનર = વૈદ્યુતાગ્નિ મારી નાખે છે. પાણીને વર્ષાવ્યા, શમ્બર અર્થાત્ મેઘને વિદારી નાખીને.

(૨) 'આ વૈશ્વાનર (દ્યુલોકનો) આદિત્ય છે' એવું પૂર્વેના યાજ્ઞિકોનું માનવું છે. આ (પૃથિવી, અન્તરિક્ષ અને દ્યુ) લોકના આરોહણની સાથે સાથે ત્રણ (પ્રાતઃસવન, માધ્યન્દિનસવન અને સાયંસવન એ પ્રમાણે) સવનોનો આરોહણ ક્રમ કહેવામાં

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

આવ્યો છે. (અર્થાત્ જે યજ્ઞકર્તા હોય તે ત્રણ સવનો દ્વારા અનુક્રમે પૃથિવી વગેરે લોકમાં આરોહણ કરે છે.) ત્યાં આરોહણ પછી અવરોહ કરવો પણ ઇષ્ટ છે. (એટલે કે ક્રમશઃ દ્યુલોકમાં આરૂઢ થયેલ યજ્ઞકર્તા પછીથી અવરોહણ કરે છે.) આનું અનુકરણ કરતો હોતા પણ અગ્નિમારુતના સ્તોત્રમાં વૈશ્વાનરીય સૂકત દ્વારા પ્રારંભ કરે છે. (અહીં અવરોહ કરતી વખતે) તે (હોતા) પણ (પૃથિવીસ્થાનીય) આગ્નેય સ્તોત્રનો આદર કરતો નથી. કેમ કે તે સ્તોત્ર આગ્નેય હોય છે (અને પૃથિવીસ્થાનના અગ્નિનો આદર કરે તો અવરોહ થઈ શકે નહીં.) (માટે દ્યુલોકના વૈશ્વાનરની પહેલાં સ્તુતિ કરીને પછી તે હોતા) મધ્યમસ્થાનના દેવતા રુદ્ર અને મરુત ઉપર આવે છે અને છેલ્લે આ (પૃથ્વી) સ્થાનના અગ્નિસ્તોત્રિય (સ્તુત્ય) ઉપર આવે છે. (અહીં યાજ્ઞિકો જે વિધિનું અનુકરણ કરે છે તેમાં પ્રત્યવરોહનો ક્રમ જોતાં નક્કી થાય છે કે વૈશ્વાનર આદિત્ય છે.) (વૈશ્વાનર શબ્દ આદિત્યનો વાચક છે-એમાં અન્ય કારણો પણ છે:-) (क) વૈશ્વાનરને ઉદ્દેશીને જે પુરોડાશ તૈયાર કરવામાં આવે છે તે બાર કપાલવાળો હોય છે, કારણ કે તેનું (સૂર્યનું) કાર્ય બાર પ્રકારનું હોય છે. (અહીં દેવતાના ગુણકર્મો અને કપાલની સંખ્યા જોતાં નક્કી થાય છે કે વૈશ્વાનર આદિત્યનો વાચક છે.) (ख) આના સમર્થનમાં બ્રાહ્મણવચન પણ છે : 'પેલો આદિત્ય અગ્નિ એ જ વૈશ્વાનર છે.' (ग) એ જ પ્રમાણે, નિવિત્ અર્થાત્ આકૃતિ વિશિષ્ટ મન્ત્ર પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને કહેનારો છે. જેમ કે, "જે (સૂર્ય) દ્યુલોકને પ્રકાશિત કરે છે.અને જે પૃથિવીને (પ્રકાશિત કરે છે)." આ (આદિત્ય) જ દ્યાવાપૃથિવીને પ્રકાશિત કરે છે. (घ) તથા છાન્દોમિક (નામનું) સૂકત પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને સંબોધનાર છે. જેમ કે, "દ્યુલોકમાં સ્પર્શ કરનારો પ્રકાશે છે." અહીં આ (સૂર્ય) જે દ્યુલોકમાં સ્પર્શ કરે છે અને પ્રકાશે છે. (ङ) અને હવિષ્પાન્તીય સૂકત પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને સંબોધનાર છે.

21. (વિમર્શ) 'વૈશ્વાનર' શબ્દની વ્યુત્પત્તિ વિચાર્યા પછી હવે વિચાર કરવામાં આવે છે કે આ વૈશ્વાનર કોણ છે ? અર્થાત્ એ શબ્દ કયા સ્થાનના અગ્નિને માટે વપરાય છે ? (૧) કેટલાક (નૈરુક્ત) આચાર્યોનો મત છે કે મધ્યમસ્થાનના વૈદ્યુતાગ્નિ માટે આ શબ્દ વપરાય છે. (૨) પૂર્વેના યાજ્ઞિકોના મતે દ્યુલોકના દેવતા આદિત્યને માટે આ શબ્દ વપરાય છે. યાજ્ઞિકોએ પોતાના મતના સમર્થનમાં પાંચ-છ કારણો રજૂ કર્યાં છે. આમાં ત્રણ સવનોના ક્રમે જુદા જુદા સ્થાનના દેવતાઓની સ્તુતિ કરતાં કરતાં જે આરોહ-અવરોહનો વિધિ જોવાં મળે છે, તથા પુરોડાશાદિની સંખ્યા અને સૂર્ય દ્વારા જે બાર માહિનાઓનું પ્રવર્તન કરવામાં આવે છે તેને આધારે યાજ્ઞિકોએ વૈશ્વાનર સૂર્યનો વાચક છે એવું સાબિત કરવાનો પ્રયત્ન કર્યો છે.

હવે પછીની ચર્ચા (પૅરેગ્રાફ-22)માં ત્રીજો અને છેલ્લો મત જોઈશું. આ સિદ્ધાન્ત મત શાકપૂણિનો છે.

---

22. अयमेव अग्निः वैश्वानरः इति शाकपूणिः । विश्वानरौ एते उत्तरे ज्योतिषी । वैश्वानरः अयम् । यत् ताभ्यां जायते कथं नु अयम् एताभ्यां जायते इति । यत्र वैद्युतः शरणम् अभिहन्ति यावदनुपात्तौ भवति मध्यमधर्मैव तावद्भवति । उदकेन्धनः शरीरोपशमनः । उपादीयमानः एव अयं संपद्यते । उदकोपशमनः शरीरदीप्तिः । अथ आदित्याद् । उदीचि प्रथमसमावृत्ते आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति तत् प्रदीप्यते । सः अयमेव संपद्यते । अथापि आह । वैश्वानरो यतते सूर्येण (ऋ. स: १/९८/१) इति । न च पुनरात्मना आत्मा संयतते । अन्येनैव अन्यः संयतते । इतः इमम् आदधाति । अमुतः अमुष्य रश्मयः प्रादुर्भवन्ति । इतः अस्य अर्चिषः । तयोः भासोः संसङ्गं दृष्ट्वा एवमवक्ष्यत् । अथ यानि एतानि औत्तमिकानि सूक्तानि भागानि वा सावित्राणि वा पौष्णानि वा वैष्णवानि वा तेषु वैश्वानरीयाः प्रवादाः अभविष्यन् । आदित्यकर्मणा च एनम् अस्तोष्यन् । इति उदेषि । इति अस्तमेषि । इति विपर्येषि इति । आग्नेयेषु एव हि सूक्तेषु वैश्वानरीयाः प्रवादाः भवन्ति । अग्निकर्मणा च एनं स्तौति । इति दहसि । इति वहसि । इति पचसि । इति । यथो एतत् । वर्षकर्मणा हि एनं स्तौति इति । अस्मिन्नपि एतदुपपद्यते । समानमेतदुदकमुच्चैत्यव चाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः (ऋ. सं. १/१६४/५१) ॥ इति सा निगदव्याख्याता ॥

"अयम् एव अग्निः वैश्वानरः, इति शाकपूणिः" । न मध्यमो न सूर्यः किं तर्हि ? अयमेव पार्थिवः अग्निः । केन हेतुना ? तद्धितोत्पत्तिसामर्थ्यात् । कथम् ? इति । "विश्वानरावेते उत्तरे ज्योतिषी" । तदुक्तम्,—"अपि वा विश्वानर एव कश्चित् स्यात्, तस्यापत्यं वैश्वानरः" इति । तदिदमुपपद्यते, —"वैश्वानरः अयम् यत् ताभ्यां जायते" । तस्मात् तद्धितेन व्यपदेशेन पार्थिवोऽग्निर्वैश्वानर इति ॥

"कथन्त्वयमेताभ्यां जायते" । यत उच्यते,—"यत्र वैद्युतः" अग्निः, "शरणम् अभिहन्ति" । आश्रयमात्मनो दारु, उदकम्,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

अन्यद्वा अभिहन्ति' निहन्ति, अभिगच्छति प्राप्नोतीत्यर्थः। किं तत्र तत् दीप्यते, स च पुनः "यावदनुपात्तो भवति" मनुष्यैरस्पृष्टो भवत्यपरिगृहीतो वा। किं तावत् ? "मध्यमधर्मैव तावत् भवति"। कः पुनर्मध्यमस्य धर्मः ? यदसौ "उदकेन्धनः शरीरोपशमनः" उदकेनेन्धते दीप्यते रसस्वभावकेन शरीरेण काष्ठेनान्येन वाप्रतिहतमूर्त्तिस्वभावकेन पार्थिवधातुबहुलेनोपशाम्यति, स मध्यमस्य धर्मः। तदेतत् स्थानजात्यादिकृतं स्वाभाव्यमहेतुकं ज्योतिषो न भवति प्रथमस्य धर्मः। स च पुनः "उपादीयमानः एव" "अयम" पार्थिवोऽग्निः "सम्पद्यते"। कथम् ? उपात्तो हि मनुष्यैः स्वजातिधर्मं हित्वा पार्थिवधर्मं प्रतिपद्यते। कथम् ? इति। "उदकोपशमनः" शरीरदीप्तिः। विपर्य्यस्तधर्मा मध्यमेन सम्पद्यते। एवन्तावन्मध्यमादयं विश्वानरात् स जायते, तेनायं तदपत्यमिति भवति हि तद्धितार्थोपपत्त्या वैश्वानरः॥ ६॥

अथ पुनरादित्यात् कथं जायते ? आह,—अथादित्यादुदीचि प्रथमसमावृत्त आदित्ये"—इत्यमेवादि। 'अथ' शब्दः आनन्तर्य्ये, प्रकृतादर्थान्तरमधिकरोति। उदीचीं दिशं प्रति प्रथमसमावृतः आदित्यः, तस्मिन् 'उदीचि प्रथमसमावृत्ते' उद् गमनादौ इत्यर्थः। कथम् ? इति। "कंसं वा मणिं वा परिमृज्य" यमादित्यमणिमित्याचक्षते। "प्रतिस्वरे" प्रत्युपतापे। "यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति, तत् प्रदीप्यते" "सोऽयमेव सम्पद्यते" यः शुष्कगोमयेऽग्निर्जायते। स एवमादित्यादपि कंसाद्वा मर्णेर्वा जायते, असावपि च वैश्वानरं इत्युच्यते तदपत्यापेक्षयाप्यस्य वैश्वानरत्वमुपपद्यते। अथाप्याह, तद्धितविग्रहव्यपदेशात् तावदेवमुपपद्यते—अन्य आदित्यात् तावद्वैश्वानरः॥

"अथापि" अयमपरो व्यपदेश एकवाक्ये विभक्त्यन्तरकृतः सूर्य्यवैश्वानरयोर्भेदं गमयति। तद्यथा,—"वैश्वानरो यतते सूर्य्येण" इति मन्त्रदृगाह। प्रथमान्तस्य वैश्वानरशब्दस्य तृतीयान्तेन, सूर्य्यशब्देन विभक्तिभेदाद् विशेषणविशेष्यभावेन सामानाधिकरण्यं नास्ति। एतदेवासामानाधिकरण्यमपेक्ष्य अनेकत्वं वैश्वानरसूर्य्यशब्दयोर्ब्रवीति,—"न च पुनरात्मनात्मा संयतते"। किं तर्हि ? "अन्येनैवान्यः" "संयतते" सङ्गच्छते, यथा देवदत्तो यज्ञदत्तेन। तत् कथमयं संयतते सूर्य्येण ? इति यत आह—"इत इममादधाति"। इतो लोकादोषधीभ्यः शरादिभ्यो वनस्पतिभ्यो वा मथित्वा प्रत्यक्षत एव इममादधाति अभ्यादधातीन्धनैः। 'अमुतः' मण्डलात् कर्मात्मनः "अमुष्य" च आदित्यमण्डलाधिष्ठातुः स्वभूताः "रश्मयः" "प्रादुर्भवन्ति"। "इतः" तेजःपिण्डात् "अस्य" तदधिष्ठातुः "अर्चिषः" प्रादुर्भवन्तीति वर्त्तते। "तयोः भासोः संसङ्गं दृष्ट्वैवमक्षत्" मन्त्रदृक् "वैश्वानरो यतते सूर्य्येण" —इति॥ ७॥

"अथ"—इति अधिकारान्तरे। यदि सूर्य्यो वैश्वानरोऽभविष्यत्, ततो ननु "यान्येतानि" "औत्तमिकानि सूक्तानि उत्तमस्थानदेवताविशेषस्तुत्यपर्गानि। तद्यथा,—"भागानि वा सावित्राणि वा पौष्णानि वा वैष्णवानि वा"। गुणपदत्वमभ्युपेत्य वैश्वानरशब्दस्य ब्रवीति। "तेषु" सूक्तेषु "वैश्वानरीयाः प्रवादाः" भगादीनां विशेषणत्वेन "अभविष्यन्" हे भग वैश्वानर ! हे सवितः वैश्वानर ! इत्येवमादयः। "आदित्यकर्मणा च एनमस्तोष्यन्"। एवं वैश्वानरीयेषु सूक्तेषु वैश्वानरमस्तोष्यन् मन्त्रदृशः। कथम् ? इति। "उदेषीत्यस्तमेषीति विपर्य्येषीति"। इतिकरणं एवंशब्दार्थे, एवमुदेषि त्वं वैश्वानर !—एवमस्तमेषि—एवं विपर्य्येषि इति। न च पुदरेतदुभयमप्यस्ति—न हि वैश्वानरीयाः प्रवादा औत्तमिकेषु सूक्तेषु सन्ति नाप्यादित्यकर्मणा वैश्वानरं संस्तुवन्ति मन्त्रदृशः। तस्मान्नैष सूर्य्यो वैश्वानर इति॥

किञ्चायमपरो विशेषहेतुरग्निर्वैश्वानर इति "आग्नेयेष्वेव हि सूक्तेषु वैश्वानरीयाः प्रवादाः भवन्ति" अग्निविशेषणत्वेन।— वैश्वानर मृत आजातमग्निम् (ऋ० सं० ४, ५, ९, १)"—इत्येवमादयः॥

"अग्निकर्मणा च" "हनं" वैश्वानरं प्रायेण 'स्तौतीति" "वहसीति, पचसीति, दहसीति"। एवं वैश्वानर ! वहसि हवींषि, पचसि पक्तव्यानि, दहसि दग्धव्यानि॥

तस्मादग्निरेव वैश्वामर इति स्थितम्॥

तदेते षट् हेतवः,—तद्धितेन विग्रहव्यपदेशात् (१) एकवाक्ये विभक्त्यन्तरव्यपदेशात् (२) औत्तमिकेषु सूक्तेषु अप्रवादात् (३) आदित्यकर्मणा असंस्तवात् (४) आग्नेयेषु सूक्तेषु प्रवादात् (५) अग्निकर्मणा च संस्तवात् (६) इति॥

तत् पुनरेतदग्नेर्वैश्वानरत्वं स्थितमप्यस्थितमिव परपक्षहेतुष्वनिराकृतेषु अतः तन्निराकरणाय प्रस्तौति। यथो एतत्"— इति। यत् पुनरेतदुक्तं वर्षकर्मणा यस्मात् स्तौति, तस्मान्मध्यम इति॥ "अस्मिन्नपि" पार्थिवेऽग्नौ "एतदुपपद्यते" वर्षकर्म॥ ८॥

कथम् ? इत्यत आह —"समानमेतत्"—इति (ऋ० सं० २, ३, २३, ५) 'समानम् एकमेवेदम् 'उदकम्' उदकत्वेनाविशिष्टम्, "उच्चैत्यव चाहभिः"। 'उत् एति च, ऊर्ध्वं चैति, अहोभिर्निमित्तभूतैः पुनश्चाहोभिरेव अवाङ्केति, दक्षिणोत्तरायणयोर्व्यावृत्तिभिः प्रतिसंवत्सरमहान्यभिप्रेतानि। तदेतदेकमेवोदकं पर्य्ययेणोत्तरायणदक्षिणायायनयोः जगद्यात्रासिद्ध्यै तदुदेति चावैति च वर्षकर्मभावेन। कथम् ? इत्यत आह—अवाङ तावदेति, 'भूमिं' 'पर्जन्याः' प्रार्जयितारो रसानां माध्यमिका देवगणा वर्षामभुतो मुञ्चन्तः 'भूमिं'

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

'जिन्वन्ति' तर्पयन्ति ओषध्युत्पत्तये । एवं तावदवाङ्केति । अथ पुनरूर्द्ध्वं कथमेति ? इत्यत आह,—"दिवं जिन्वन्त्यग्नयः" यथैवामुतो वर्षेणेमा पर्जन्या जिन्वन्ति, तथैवाहुतिप्रभवेण वर्षेण दिवं जिन्वन्त्यग्नयः. आहुतयो ह्यग्नौ प्रक्षिप्ताः तेन दग्धास्ता स्वार्चिभिः कृत्वोदकभावमापाद्य परमं सूक्ष्मं देवोपभोगयोग्यं द्यां प्रति वर्षभावेनोन्नीयन्ते तल्लोकनिवासिनां तृप्तये, ततस्त इह पुनर्वर्षं प्रकल्पयन्ति । तदुक्तम्—"अमुष्य लोकस्य का गतिरिति, अयं लोक इति होवाच"—इति ।

एवञ्च सुतरामयमपि च वर्षवान्, आहुमिमूलत्वात् सर्वस्य वर्षस्य । स्मर्य्यते च—"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते" इति । तत्र यदभूद् वर्षकर्मभावान्मध्यम इति, तदेतदवैशेषिकं मध्यमस्य वैश्वानरत्वेन लक्षणम् ॥

अपि चायमपरो मन्त्रः, यस्मिन्नग्निरादित्यो वर्षकर्मणा स्तूयते । तस्मात् सुतरामनैकान्तो वर्षकर्माभिष्टवो मध्यमस्येत्यत आह—"कृष्णं नियानम्" इति ॥ ९ (२३) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)

षष्ठः पादः ॥ ७, ६ ॥

---

22. *(અનુ૦)* 'આ (પાર્થિવ) અગ્નિ જ વૈશ્વાનર કહેવાય છે' એવો શાકપૂણિનો મત છે, કારણ કે આ બે ઉત્તર (અન્તરિક્ષલોકના અને દ્યુલોકના) જ્યોતિઓને (= વિદ્યુત્ અને આદિત્યને) વિશ્વાનર કહે છે અને એ બે જ્યોતિઓમાંથી જ આ વૈશ્વાનર (= પાર્થિવાગ્નિ) જન્મે છે. (હવે કોઈને પ્રશ્ન થાય કે–) આ (પાર્થિવાગ્નિ) તે બે જ્યોતિઓમાંથી કેવી રીતે જન્મે છે ? તો (૧) વૈદ્યુતાગ્નિ જે (કાષ્ઠ, જળ ઇત્યાદિ) શરણ (આશ્રયસ્થાન)માં પ્રવેશે છે, ત્યાં તે જ્યાં સુધી (મનુષ્યો વડે) ગ્રહણ કરવામાં આવતો નથી ત્યાં સુધી મધ્યમસ્થાનના ધર્મવાળો હોય છે; એટલે કે જળ રૂપી ઇન્ધણવાળો (उदकेन्धनः) અને પાર્થિવ ધાતુથી શાન્ત થઈ જનારો (शरीरोपशमनः) હોય છે, પરંતુ (મનુષ્ય વડે) ગ્રહણ કરવામાં આવતાં તે (વૈદ્યુતાગ્નિ) પાર્થિવાગ્નિ બની જાય છે. (આ પાર્થિવાગ્નિ) જળમાં શમી જનારો (उदकोपशमनः) અને પાર્થિવ વસ્તુના સ્પર્શથી સળગી ઊઠનારો (शरीरदीप्तिः) હોય છે. (૨) હવે આદિત્ય (વિશ્વાનર)માંથી વૈશ્વાનર (પાર્થિવાગ્નિ)ની ઉત્પત્તિ બતાવવામાં આવી છે : આદિત્ય જ્યારે ઉત્તર દિશામાં પ્રથમવાર આવે છે ત્યારે કાંસાને કે મણિને બરાબર સાફ કરીને તેમાં સૂર્યકિરણોને કેન્દ્રિત કરી સૂકાયેલા છાણાં ઉપર તે (છાણાં)ને અડકયા/અડકાડ્યા વિના ધરવામાં આવે તો તે (છાણાં) સળગી ઊઠે છે; તે (આદિત્ય) આ (પાર્થિવાગ્નિ)જ બની જાય છે.

અગાઉ (વૈશ્વાનર શબ્દની વ્યુત્પત્તિ વિચારતી વખતે) કહ્યું હતું કે 'વૈશ્વાનર સૂર્યની સાથે જાય.' પરંતુ કોઈ પોતે પોતાની સાથે જઈ શકે નહીં, પણ અન્યની સાથે જ અન્ય જઈ શકે (જેમ કે, યજ્ઞદત્તની સાથે દેવદત્ત જાય છે.) અહીં (પૃથિવીલોકમાં લાકડાંને ઘસીને) આ (પાર્થિવાગ્નિ)ને કોઈ મનુષ્ય પ્રાપ્ત કરે છે અને ત્યાંથી (દ્યુલોકમાંથી) એનાં (સૂર્યનાં) કિરણો પ્રાદુર્ભાવ પામે છે. ત્યાર પછી અહીંથી પાર્થિવાગ્નિની જ્વાળાઓ ઉપર જાય છે અને ત્યાંથી સૂર્યનાં કિરણો નીચે આવે છે–આવે વખતે બન્નેના પ્રકાશને સાથે જતાં જોઈ કોઈ ઋષિએ આ પ્રમાણે (: 'વૈશ્વાનર સૂર્યની સાથે જાય છે') કહ્યું છે. (આથી 'વૈશ્વાનર સૂર્યની સાથે જાય છે' એનો અર્થ એ છે કે વૈશ્વાનર અને સૂર્ય ભિન્ન ભિન્ન છે.)

(જો 'વૈશ્વાનર' શબ્દ આદિત્યનો વાચક હોય તો) જે ઉત્તમસ્થાનના (દ્યુલોકના) દેવતાઓની સ્તુતિ કરતા સૂક્તો, જેવાં કે ભગ, સવિતા, સૂર્ય, પૂષન્, વિષ્ણુ, વિશ્વદેવાદિનાં સૂક્તો છે તેમાં વૈશ્વાનરને સંબોધાયેલાં વાક્યો હોત; તથા જે આદિત્ય કર્મો છે (જેવાં કે–ઉદય પામવું વગેરે) તેનાથી તે ભગ, સવિતા વગેરે દેવતાઓની સ્તુતિ કરી હોત. જેમ કે, તું ઉદય પામે છે, તું અસ્ત પામે છે, તું ત્યાં જઈને પાછો ફરે છે વગેરે. (પરંતુ આવું ભગ, વિષ્ણુ, પૂષન્ વગેરે દેવોને કહેવામાં આવ્યું નથી. આથી સિદ્ધ થાય છે કે 'વૈશ્વાનર' શબ્દ આદિત્યનો વાચક નથી.)

કેવળ આગ્નેય-સૂક્તોમાં જ વૈશ્વાનરને સંબોધાયેલાં વાક્યો જોવાં મળે છે અને ત્યાં અગ્નિનાં જે કર્મો છે તેનાથી વૈશ્વાનરની સ્તુતિ કરવામાં આવે છે. જેમ કે, તું (વૈશ્વાનર) વહન કરે છે, તું પકાવે છે, તું બાળે છે.

(અગાઉ કેટલાક આચાર્યો અને પૂર્વેના યાજ્ઞિકોએ અનુક્રમે 'વૈશ્વાનર' શબ્દ વૈદ્યુતાગ્નિનો વાચક છે અથવા આદિત્યનો વાચક છે–એવા બે મતો રજૂ કર્યા હતા. હવે પછીની ચર્ચામાં તે મતોનું ખંડન કરવામાં આવે છે :)

અગાઉ જે (કેટલાક આચાર્યોએ) કહ્યું હતું કે વૈશ્વાનરને 'વર્ષાક્રિયા સાથે જોડીને સ્તુતિ કરવામાં આવી છે' તે આ પાર્થિવાગ્નિને વિશે પણ ઉપપન્ન થાય છે, જેમ કે, "આ એક જ જળ છે જે દિવસે ઉપર તરફ જાય છે અને નીચે પણ જાય છે. પર્જન્ય ભૂમિને તૃપ્ત કરે છે અને અગ્નિ દ્યુલોકને તૃપ્ત કરે છે." આ ઋચા વાંચતાની સાથે જ સમજાઈ જાય છે (આથી તેના ઉપર વ્યાખ્યાન કરવાની જરૂર નથી.)

22. *(વિમર્શ)* ઉપરની ચર્ચામાં યાસ્કે વૈશ્વાનર કોણ ? (વૈદ્યુતાગ્નિ કે આદિત્ય કે પાર્થિવાગ્નિ ?) આ ચર્ચાનું સમાપન કરતો સિદ્ધાન્ત પક્ષ રજૂ કર્યો છે. આ મતમા પુરસ્કર્તા શાકપૂણિ છે. શાકપૂણિના મતે વૈશ્વાનર શબ્દ પાર્થિવાગ્નિને માટે જ વેદમાં વપરાયેલો છે. તેમણે પોતાના મતની ઉપપત્તિ કરી બતાવવા માટે જણાવ્યું છે કે અન્તરિક્ષ લોકનું જ્યોતિ (વિદ્યુત્) અને દ્યુલોકનું

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

જ્યોતિ (આદિત્ય) એ બે 'વિશ્વાનર' કહેવાય છે અને તે વિશ્વાનર આ પાર્થિવાગ્નિના જન્મમાં કારણભૂત છે, માટે પાર્થિવાગ્નિને જ વૈશ્વાનર કહે છે; એટલે કે વિશ્વાનરનો અપત્ય તે વૈશ્વાનર.

શાકપૂણિએ ક્રમશઃ સમજાવ્યું છે કે વૈદ્યુતાગ્નિમાંથી અને આદિત્યમાંથી પાર્થિવાગ્નિ કેવી રીતે જન્મે છે ? જેમ કે, (૧) વાદળમાં જે વિદ્યુત્ હોય છે તે ઉદકેન્ધન હોય છે અને તે પૃથિવી ઉપર પડતાં જો લાકડાં ઉપર પડે તો તેં ત્યાં શમી જાય છે. ત્યાર પછી એ લાકડાંમાંથી જ પાર્થિવાગ્નિ પ્રજ્વલી ઊઠે છે. આ રીતે વૈદ્યુતાગ્નિમાંથી જ પાર્થિવાગ્નિ જન્મે છે એમ કહી શકાય. (૨) આદિત્યનાં (સૂર્યનાં) કિરણોને મણિ વગેરે પદાર્થોની મદદથી કેન્દ્રિત કરીને છાણાં કે રૂ ઉપર કેન્દ્રિત કરવામાં આવે તો ત્યાં પણ પાર્થિવાગ્નિ પ્રકટ થાય છે એ સુવિદિત છે. આ ઘટનાને આધારે પણ કહી શકાય કે પાર્થિવાગ્નિ આદિત્યમાંથી જન્મે છે. આ સન્દર્ભમાં ડૉ. લક્ષ્મણ સરૂપ નોંધે છે કે This shows that Yāska was familiar with the scientific law of the refraction of heat and light.

આ પછી શાકપૂણિ પોતાના મતના સમર્થનમાં બીજાં ત્રણ કારણો રજૂ કરે છે : (क) वैश्वानरो यतते सूर्येण । એવી ઋચામાં 'વૈશ્વાનર' શબ્દ પ્રથમા વિભક્તિમાં છે અને 'સૂર્ય' શબ્દ તૃતીયા વિભક્તિમાં છે. આથી તે બેની વચ્ચે વિશેષ્ય-વિશેષણ-ભાવ રૂપ સામાનાધિકરણ્ય જ નથી. બીજું : યાસ્કે કહ્યું છે તેમ કોઈ પોતે પોતાની સાથે ન જઈ શકે, અન્યની સાથે જ જઈ શકાય. જેમ કે, દેવદત્ત યજ્ઞદત્તની સાથે જાય છે. આ ઉપરથી સ્પષ્ટ થાય છે કે 'વૈશ્વાનર' શબ્દ સૂર્યનો વાચક નથી. હવે કોઈને પ્રશ્ન થાય કે- તો પછી કેવી રીતે ઋષિએ 'વૈશ્વાનર સૂર્યની સાથે જાય છે' એમ કહ્યું હશે ?-તો એનું પણ યાસ્કે સમાધાન ઉપર આપ્યું છે. (ख) 'વૈશ્વાનર' શબ્દ જો આદિત્યનો જ વાચક હોત તો દ્યુલોકના ભગ, પૂષન્, વિષ્ણુ વગેરે દેવતાઓના સૂક્તોમાં વૈશ્વાનરીય પ્રવાહો હોવા જોઈતા હતા. એટલે કે 'હે વૈશ્વાનર વિષ્ણુ ! તું પૂર્વમાં ઊગે છે, પશ્ચિમમાં આથમે છે' વગેરે પ્રકારનાં વાક્યો હોવા જોઈએ. પણ આપણે જાણીએ છીએ કે વિષ્ણુ વગેરે દેવતાઓને માટે 'વૈશ્વાનર' એવું વિશેષણ વપરાયું નથી. (ग) બીજી તરફ, જે અગ્નિદેવતાને સંબોધીને રચાયેલાં (દેખાયેલાં) સૂક્તો છે તેમાં જ કેવળ 'વૈશ્વાનર' એવા વિશેષણનો પ્રયોગ થયો છે. અગ્નિને જ ઉદ્દેશીને તે તે સૂક્તોમાં કહ્યું છે કે 'હે વૈશ્વાનર અગ્નિ ! તું હવિષ્નું વહન કરે છે' વગેરે. આથી પણ સાબિત થાય છે કે વૈશ્વાનર' શબ્દ પાર્થિવાગ્નિનો જ વાચક છે.

આ રીતે પોતાના મતનો પુરસ્કાર કર્યા પછી શાકપૂણિ પૂર્વોક્ત બે મતોનો પરિહાર કરે છે. કેટલાક નૈરુક્તોના મતે 'વૈશ્વાનર' શબ્દની વૈદ્યુતાગ્નિ સમજે છે. આ મતના સમર્થનમાં તેઓએ કહ્યું હતું કે વર્ષાક્રિયા સાથે જોડીને વૈશ્વાનરની સ્તુતિ કરવામાં આવી છે, માટે 'વૈશ્વાનર' શબ્દથી વૈદ્યુતાગ્નિ સમજવાનો છે. પરંતુ શાકપૂણિ કહે છે કે આ ઉચિત નથી. કેમ કે પાર્થિવાગ્નિને પણ વર્ષાક્રિયા સાથે સંયુક્ત કરવામાં આવ્યો છે. આના સમર્થનમાં તેમણે એક મન્ત્ર પણ ઉપર રજૂ કર્યો છે. અહીં સાતમા અધ્યાયનો છઠ્ઠો પાદ પૂરો થાય છે; પરંતુ સાતમા પાદમાં પણ આ જ ચર્ચા ચાલુ રહે છે.

सप्तमः पादः

23. कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति । त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते (ऋ. सं. १/१६४/४७) ॥ कृष्णं निरयणं रात्रिः आदित्यस्य । हरयः सुपर्णाः । हरणाः आदित्यरश्मयः । ते यदा अमुतः अर्वाञ्चः पर्यावर्तन्ते सहस्थानात् उदकस्य आदित्यात् अथ घृतेन उदकेन पृथिवी व्युद्यते । घृतम् (निघण्टु १/१२/१०) इति उदकनाम । जिघर्तेः सिञ्चतिकर्मणः ॥

अथापि ब्राह्मणं भवति । अग्निर्वा इतो वृष्टिं समीरयति । धामच्छद् दिवि भूत्वा वर्षति । मरुतः सृष्टां वृष्टिं नयन्ति । यदासावादित्योऽग्निं रश्मिभिः पर्यावर्तति अथ वर्षति (काठक सं. ११/१०) इति ॥

कृष्णं नियानम्''—इति (ऋ० सं० २, ३, २३, १) । दीर्घतमस आर्षम् । त्रिष्टुप् । वृष्टिकामस्य कारीर्यामग्नेयं धामच्छदं अष्टाकपालम्, तस्य पुरोऽनुवाक्या, तस्यां मैत्रायर्णायके अग्निरयमादित्यीकृत्य स्तूतये इति प्रकरणादध्यवसीयते । 'कृष्णम्' किं पुनस्तत् कृष्णम् ? 'नियानं' ''निरयणं'' निर्गतिः, निर्गच्छत्येतदिति 'नियानं' वर्त्म, पन्थाः, । तच्च पुनरेतत् ''रात्रिः आदित्यस्य'' द्वेह्यस्यायने शुक्लं चोत्तरम्, कृष्णं च दक्षिणम्, सा हि दैवी रात्रिरभिप्रेता । ततो ब्रवीति रात्रिरादित्यस्य ज्योतिषः । स एष भगवानादित्यो यदा जगदनुग्रहाय गर्भमुदकमात्मन्याधित्सुरुत्तरायणं प्रतिपद्यते, तदैते 'हरयः' रस ''हरणाः'' 'सुपर्णाः' तस्य ''रश्मयः'' सर्वस्मादस्माल्लोकात् 'अपो वसानाः' आत्मन्याच्छादयन्तः आददानाः 'दिवं द्योतनवन्तम् एतमादित्यं प्रति 'उत्पतन्ति' तदुदकं निधित्समानाः तस्मिन् गर्भत्वेन स एष आदित्य उत्तरायणं मासैः षड्भिः आहितोदकगर्भः सम्पद्यते । स एकः परिषिक्तोदकगर्भो दक्षिणं वर्त्म प्रतिपद्यमानो नभस्यात् मासात् प्रभृति प्रसूयते । तदिदमुच्यते,—''त आ ववृत्रन् संदनादृतस्य''

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

इति । 'ते' रश्मयः "यदा" "अमुतः" अमुष्मात् आदित्यात् 'ऋतस्य' उदकस्य 'सदनात्' सहस्थानात् 'आ ववृत्रन्' यदा "पर्य्यावर्त्तन्ते" 'आत्' "अथ" तदा वृत्तिसमनन्तरमेव 'घृतेन' "उदकेन" 'पृथिवीं' 'व्युद्यते' विविधमुद्यते । "घृतम् इति उदकनाम" 'पृथिवी व्युद्यते' इति सामर्थ्यात् । तत् पुनः "जिघर्त्तेः सिञ्चतिकर्मणः" ॥

एवमेतस्मिन् मन्त्रे मन्त्ररूपादादित्यः, प्रकरणादग्निः, उभयथाप्यन्यो मध्यमात् वर्षकर्मणः कर्त्ता ॥

"अथापि ब्राह्मणम्" एतस्मिन् प्रकरणे यस्मिन्नयं मन्त्रो विनियुज्यते, "अग्निर्वा इतो वृष्टिं समीरयति"—इत्येवमादि । अग्निः इतो लोकात् वृष्टिं समन्तत ईरयति । धूमभूता आप ओषधिवनस्पतिभ्यो विनिवर्त्त्यमानाः आहुतिभूताश्चामुं लोकमाविशन्ति । अग्नेर्वै धूमो जायते, धूमादभ्रम्, अभ्रात् वृष्टिरिति ह विज्ञायते । ताः पुनरग्निस्थानाभिसम्पत्तिप्रनाडिकया धामच्छदादित्यो भूत्वा धाम्नां छादयिता रश्मिभिर्मेघरूपैर्मध्यमस्थानमापादयति । एवं तेन सृष्टां वृष्टिं मध्यस्थानान्मरुतो वायवो मेघोदराणि विदार्य्य तेभ्यो विक्षिपन्तो वृष्टिमिमं लोकं नयन्ति प्रापयन्तीत्यर्थः ॥

अथापरमष्टि ब्राह्मणं भवति—"यदासावादित्योऽग्निं रश्मिभिः" इत्यवमादि । तदेवमेतत् वर्षकर्म समानं सर्वेषाम् इत्येहेतुर्मध्यमस्य वैश्वानरत्वे भवति ॥

---

23. *(અનુ.)* "રસનું હરણ (हरयः) કરનારાં સૂર્ય-કિરણો (सुपर्णाः) જળને લઈને (अपो वसानाः) દ્યુલોકમાં ઊડી જાય છે. તે દક્ષિણાયનમાં (कृष्णं नियानम्) જળના સ્થાનમાંથી (ऋतस्य सदनात्) એટલે કે આદિત્યમાંથી પાછી ફરે છે (आ ववृत्रन्) અને એ જ સમયે પૃથિવીને જળથી સિંચે છે." અહીં कृष्णं नियानम् એટલે કાળો માર્ગ અર્થાત્ રાત્રિ. (સૂર્યને માટે કાળો માર્ગ દક્ષિણાયન ગણાય છે અન તે સૂર્યની દૈવી રાત્રિ કહેવાય છે.) हरयः એટલે हरणाः=(રસનું) હરણ કરનારા અને सुपर्णाः એટલે આદિત્યના રશ્મિઓ. તે (સૂર્યકિરણો) આ (આદિત્યલોક)માંથી (अमुतः) નીચે (પૃથિવીલોક ઉપર) (अर्वाञ्चः) પાછા ફરે છે. (सदनात् એટલે) સહસ્થાનમાંથી; જળના સ્થાન રૂપ આદિત્યલોકમાંથી. જળથી પૃથિવીને સિંચે છે, અહીં 'घृत' એ ઉદક (જળ)નું નામ છે અને તે (घृत) શબ્દ 'સિંચવું એવા અર્થવાળા √घृ ધાતુ ઉપરથી બન્યો છે (માટે ઘૃતનો અર્થ જળ થાય છે).

વળી, બ્રાહ્મણવચન પણ છે : "અગ્નિ અહીંથી વૃષ્ટિને પ્રેરે છે અને અન્તરિક્ષમાં (મેઘ રૂપી કિરણોથી પ્રકાશનો) આચ્છાદક બનીને (धामच्छद् भूत्वा) વર્ષે છે, ત્યાર પછી મરુતો (પવન) તે વૃષ્ટિને (મધ્યમસ્થાનમાંથી) પૃથિવીલોક ઉપર લઈ આવે છે." "જ્યારે આ આદિત્ય પોતાનાં કિરણો વડે અગ્નિ તરફ અર્થાત્ પૃથિવીલોક તરફ) પાછો ફરે છે ત્યારે તે વરસી પડે છે."

23. *(વિમર્શ)* ઉપરની ઋચામાં મન્ત્ર રૂપે આદિત્યની સ્તુતિ છે અને પ્રકરણથી અગ્નિની સ્તુતિ છે. આમ, ઉભયથા મધ્યમસ્થાનના વૈદ્યુતાગ્નિથી ભિન્ન એવા આદિત્ય કે પાર્થિવાગ્નિને પણ વર્ષાક્રિયા સાથે જોડીને તેમની સ્તુતિ કરવામાં આવી છે એવું જોવા મળે છે. માટે અગાઉ જે કહ્યું હતું કે વર્ષાક્રિયા વડે વૈદ્યુતાગ્નિની સ્તુતિ છે માટે વૈશ્વાનર એ વૈદ્યુતાગ્નિનો વાચક છે-એ ઉચિત નથી. એ જ પ્રમાણે, પછીનાં બે બ્રાહ્મણ વચનોમાં પણ અનુક્રમે પાર્થિવાગ્નિ અને આદિત્યને વર્ષાક્રિયા સાથે જોડ્યા છે. માટે મધ્યમસ્થાનનો વૈદ્યુતાગ્નિ જ કેવળ વર્ષાક્રિયા સાથે જોડાયેલો છે; એમ નહીં કહી શકાય. આ રીતે 'વૈશ્વાનર વૈદ્યુતાગ્નિનો વાચક છે' એવા કેટલાક નૈરુક્ત આચાર્યોના મતનું ખંડન થઈ જાય છે.

---

24. यथो एतत् रोहात् प्रत्यवरोहः चिकीर्षितः इति । आम्नायवचनात् एतत् भवति ॥ (क) यथो एतत् वैश्वानरीयो द्वादशकपालो भवतीति अनिर्वचनं कपालानि भवन्ति । अस्ति हि सौर्यः एककपालः पञ्चकपालश्च ॥ (ख) यथो एतत् ब्राह्मणं भवतीति । बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति । पृथिवी वैश्वानरः । संवत्सरो वैश्वानरः । ब्राह्मणो वैश्वानरः इति ॥ (ग) यथो एतत् निवित् सौर्यवैश्वानरी भवतीति । अस्यैव सा भवति । यो विड्भ्यो मानुषीभ्यो दीप्यते (निवित्—८) इति ॥ (घ) यथो एतत् छान्दोमिकं सूक्तं सौर्यवैश्वानरं भवतीति । अस्यैव तत् भवति । जमदग्निभिराहुतः (आश्व. श्रौ. ८/९) इति । जमदग्नयः प्रजमिताग्नयः वा । प्रज्वलिताग्नयः वा । तैः अभिहुतः भवति ॥ (ङ) यथो एतत् हविष्पान्तीयं सूक्तं सौर्यवैश्वानरं भवतीति । अस्य एव तत् भवति ॥

हविष्पान्तमजरं स्वर्विदि दिविस्पृश्याहुतं जुष्टमग्नौ । तस्य भर्मणे भुवनाय देवा धर्मणे क स्वधया पप्रथन्त (ऋ. सं. १०/८८/१) ॥ हविः यत्पानीयम् अजरं सूर्यविदि दिविस्पृशि अभिहुतं जुष्टम् अग्नौ तस्य भरणाय च भावनाय च धारणाय च एतेभ्यः सर्वेभ्यः कर्मभ्यः इमम् अग्निम् अन्नेन अपप्रथन्त इति ॥

"यथो एतत् यत् पुनरेतदुक्तं याज्ञिकपक्षे—"रोहात् प्रत्यवरोहश्चिकीर्षितः इति" । अकारणमेतत् सूर्य्यस्य वैश्वानरत्वे ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कस्मात् ? "आम्नायवचनात् एतत्" एवं "भवति" रोहात् प्रत्यवरोह इत्यर्थवादमात्रमेव ॥

"यथो एतत्" यदपि चोक्तम् —॥ १ ॥

"वैश्वानरीयो द्वादशकपालो भवति"—इति । एतदप्यकारणं सूर्य्यस्य वैश्वानरत्वे । कस्मात् ? व्यभिचारात्, व्यभिचार्य्येतदित्यत आह,— "अस्ति हि सौर्य्य एककपालः पञ्चकपालश्च" । यदि हि देवतागुणाभिप्रायमभविष्यत् द्वादशविधमस्य कर्म, तस्मात् द्वादशकपाल इति । नन्वेवं सति सौर्य्योऽपि द्वादशकपाल एवाभविष्यत्, अभिधानमात्रं भिद्यते न कर्मेति, न च भवति सौर्य्यो द्वादशकपाल इति । तस्मादहेतुः कपालानि ॥

"यथो एतत्" यदप्युक्तम्—"ब्राह्मणं सौर्य्यं वैश्वानरप्रवादं भवतीति" । एतदप्यकारणम् । कस्मात् ? "बहुभक्तिवादीनि हि ब्राह्मणानि भवन्ति" । यस्मात् बहुभक्तिवादीनि ब्राह्मणानि भवन्ति । भक्तिर्नाम गुणकल्पना,, येन केनचिद् गुणेन ब्राह्मणं सर्वं सर्वथा ब्रवीति, तत्र तत्त्वमन्वेष्यमेव भवति । तद्यथा । "पृथिवी, वैश्वानरः"—इत्येवमादि किमपि ब्राह्मणेन बहु वैश्वानरशब्देनोच्यते भक्त्या ॥

"यथो एतत्"—"निवित् सौर्य्यवैश्वानरी भवतीति" । "अस्यैव" अग्नेः 'सा भवति" । कथम् ? इति । तस्याङ्के पदं भवति "यो विड्भ्यो मानुषीभ्यो दीदेदिति" । ततः किम् ? "एक हि विड्भ्यो मानुषीभ्यो दीप्यते" । "अग्निर्वैश्वानरः सोमस्य मत्सत् । विश्वेषां देवानां समित् । अजस्रं दैव्यं ज्योतिः । यो विड्भ्यो मानुषीभ्यो दीदेत् । द्युषु पूर्वासु दिद्युतानः । अजर उषसामनीके । आ यो द्यां भात्या पृथिवीम् । औरुमन्तरिक्षम् । ज्योतिषा यज्ञाय शर्म संयत् । अग्निर्वैश्वानर इह श्रवदिह सोमस्य मत्सत् । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद् ब्रह्मण्यवसागमत्"—इतीयं निवित् आग्निमारुते शस्यते । "निवित् पुरोरुचः प्रैषा विश्वामित्रस्य सर्वशः ।"—इति सर्वा विश्वामित्रस्यार्षम् । "अग्निर्वैश्वानरः सोमस्य मत्सत्" तृप्यतु । तृप्तश्च "प्रेमां देवो देवहूतिमवतु" । 'प्र' प्रकर्षेण 'इमाम्' अग्निः वैश्वानरः 'देवः' 'देवहूतिं' देवानामस्माकमाह्वानम् 'अवतु' रक्षतु । यः 'विश्वेषां' देवानां' 'समित्' समिन्धनः, स इदं करोतु । यश्च 'अजस्रं नित्यं 'ज्योतिः' । यश्च 'विड्भ्यः' मानुषीभ्यः 'दीदेत्' देदीप्यते । यश्च 'द्युषु पूर्वासु' पूर्वेष्वहःसु 'दिद्युतानः' दीप्यमान एवासीत् । यश्चासौ 'अजरः' जरावियुक्तः 'उषसामनीके' अग्निहोत्रादिषु द्योतते । 'यः' च 'आ' 'भाति' भासयति 'द्यां' सूर्य्यात्मना, 'आ' भासयति च 'पृथिवीम्' अग्न्यात्मना, 'आ' भासयति 'उरु' च 'अन्तिरिक्षं' मध्यमात्मना । एवं त्रिभिर्ज्योतिभिः यश्च 'ज्योतिषा' 'यज्ञाय' शर्म सुखं 'संयत्' यच्छति, ददाति । सः 'अग्निः, वैश्वानरः 'इह' 'श्रवत्' शृणोतु अस्माकं स्तुतीः । 'इह' च कर्मणि 'सोमस्य' 'मत्सत्' तृप्यतु । किञ्च 'प्रावत्विमां देवो देवहूतिं' 'देव्या धिया' देवनां या दात्री धीः प्रज्ञाः, तया 'अवतु' रक्षतु । 'प्रेदं ब्रह्म, प्रेदं क्षत्रम्' ब्रह्म प्रावत्विदम् । 'प्रेम सुन्वन्तम्' अभिषुण्वन्तं 'यजमानं प्रावतु' । 'चित्रः' चायनीयः पूज्यो वैश्वानरः 'चित्राभिः ऊतिभिः' शोभनाभिः गतिभिः प्रीतिभिर्वा । 'श्रवत्' शृणोतु इमानि 'ब्रह्माणि' अस्माकं नित्यं च अस्मान् प्रति 'आगमत' प्रत्यागच्छतु 'अवसा' पालनाभिप्रायेण मनसा कर्मसु । इत्येतदाशास्महे ॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"छान्दोर्मिकम्' छन्दोमयज्ञेषु दाशरात्रिकेषु यत् "सूक्तं" तत् "सौर्य्यवैश्वानरम्—इति, तदपि "अस्यैव" अग्नेः "भवति" । कथम् ? इति । तत्र हि "एतत्" विशिष्टं पार्थिवाग्नेर्वाचकं लिङ्गं "भवति"—जमदग्निभिराहुतः -इति" जमदग्नयो ह्येनम् आहुतिभिर्जुह्वति, नादित्यम्, अभिधानात् असम्भवाच्च । तस्मादत्रापि यद्वैश्वानरलिङ्गं तदप्येतस्य पार्थिवस्याग्नेर्व्यञ्जकं भवति । "वृषा पावक दीदिहि" । 'वृषा' वर्षिता, हे वैश्वानर ! 'पावक !' द्युमत्' दीप्तिमत, यस्त्वं जमदग्निभिराहुतः, "अभिहुतः" स त्वमस्माकं कर्मसु नित्यं 'दीदिहि' दीप्यस्व । इत्येतदाशास्महे । "जमदग्नयः" नित्यं "प्रजमिताग्नयः" प्रभृताग्नयः । "प्रज्वलिताग्नयो वा" ॥

"यथो एतत्" यदप्युक्तम्—"हविष्पान्तीयं सूक्तं सौर्य्यवैश्वानरं इति "तत्" अपि" "अस्यैव" "भवति" । कथम् ? इति । यतस्तस्य सूक्तस्य या प्रथमा ऋक्, सा यथा आग्नेयी भवति, न सौरी, तथा निराह—इदमाग्नेयं सूक्तम्, न सौर्य्यमित्युपप्रदर्शनार्थम् ॥ ३ (२४) ॥

"हविष्पान्तम्"—इति (ऋ० सं० ८, ४, १२, १,—१०, ७, ४, १) । सूक्तमेतत् मूर्द्धन्वत आङ्गिरसस्यार्षम् वामदेवस्य वा । व्यूढस्य दशरात्रस्य पश्चिमेऽहन्याग्निमारुतस्य प्रतिपत् । 'हविः' कतमत् ? "यत्" एतत् "पान्तम्" पानार्हं पानयोग्यं च देवानां च पुरोडाशादिनिर्दग्धस्थूलभावमग्निना क्रियते । 'अजरम्' जरा विपरिणामः, यतः परं विपरिणामो नास्ति कश्चित्, तत्प्रविवेकमापादितमग्निना । यदेतत् 'स्वर्विदि' स्वः आदित्यः, तं वेत्ति यथासौ वेदितव्य इति, तदर्थं वा वेत्ति हविः; स स्वर्विदयमग्निः, न सूर्य्यः । भाष्यकारोऽपि व्यपदेशेन निराह—"सूर्य्यविदि" इति । 'दिवि स्पृशि' द्यामसौ स्पृशत्यहन्यहनि हविरुपनयन्नादित्यम् । 'आहुतम्' "अभिहुतं" विसृष्टम् । 'जुष्टम्' प्रियं देवानाम् । 'तस्य' हविषः 'भर्मणे' "भरणाय" सम्भरणाय बहुलीकरणाय, अपि नाम अयमग्निरित्येतद् बहु कुर्य्यादित्येवमर्थम् । "भावनाय च" विभूतियुक्त्युपजायेतेत्येवमर्थमपि एतत् कथं नाम देवतातृप्तिसमर्थं

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

कुर्य्यादिति धर्मणे' ''धारणाय'' अविच्छेदनाय'' । कथं नामैतत् देवताभ्यो नित्यं प्रापयेदिति । ''एतेभ्यः'' ''कर्मभ्यः'' अर्थाय ''इमम्'' एव ''अग्निं''-पृथिवीस्थानं साधयते । 'स्वधया' ''अन्नेन'' हविषा, आज्येन पुरोडाशेन च । यदुक्तं निगमे—घृतं चापा पुरुषं चौषधीनामिति । तदेतद् 'अपप्रथन्त' देवाः अवर्द्धयन्तेत्यर्थः ॥

एवमेतस्मिन् सूक्ते प्रथमे मन्त्रे यदेतदग्निलिङ्गमस्पृष्टं वैश्वानरशब्देन, तदशंसयमग्निवाचि । तत्पुनरेतत्सूक्तं 'हविष्पान्तीयम्' प्रागेवाग्नेयं करोति प्रथम्यात्, प्रथमं लोके यो हि श्रूयते, स स्वेनाभिधानेनाव्यभिचारिणोपक्रम्यते स्तोतुम्, ततोऽन्यैर्भक्तिः स्तूयते, त्वं राजा त्वमिन्द्र इत्येवमादिभिः । तथैवं कृत्वा अस्मिन् सूक्ते यो वैश्वानरशब्दः उत्तरत्र स तस्यैवाग्नेः पृथिवीस्थानस्य व्यञ्जनमात्रं भवति । तथा चायमेव पृथिवीस्थानोऽग्निर्वैश्वानरः, न मध्यमः ॥

तथेममपरं मन्त्रं स्वपक्षोद्भिभावयिषया अन्यस्मात् सूक्तात् भिन्नज्योतिर्लक्षणमानीय मध्यमोत्तमयोर्ज्योतिषोरन्यत्वव्यपदेशवतो वैश्वानरस्य निर्णिनिषन् प्रकरोति ''अथाप्याह''—इति ॥ ३ (२५) ॥

---

24. (અનુ.) અગાઉ જે કહ્યું હતું (यथो एतत् કે 'આરોહણ પછી પ્રત્યવરોહણ કરવું ઇષ્ટ છે'-તે ઉચિત નથી. કેમ કે) આમ્નાયવચનને કારણે (એવો પ્રત્યવરોહણનો ક્રમ અનુસરવામાં આવે) છે. (આમ, વૈશ્વાનરનો દ્યુસ્થાન સાથે કે દ્યુસ્થાનના દેવતા આદિત્ય જોડે કોઈ સંબંધ નથી.)

('વૈશ્વાનર' શબ્દ આદિત્યનો વાચક છે-એમાં અન્ય કારણો પણ ગણાવ્યાં હતાં, તેનું હવે ક્રમશઃ ખંડન કરે છે :-) (क) 'વૈશ્વાનરને ઉદ્દેશીને જે પુરોડાશ કરવામાં આવે છે તે બાર કપાલવાળો હોય છે' એવું જે કહ્યું હતું તે યોગ્ય નથી, કેમકે તે કપાલોની સંખ્યા તો વ્યભિચરિત (अनिर्वचनम्) થતી જોવા મળે છે: કેમ કે સૂર્યનો એક કપાલ પણ હોય છે અને પાંચ કપાલ પણ હોય છે. (ख) અને જે બ્રાહ્મણવચન (असौ वा आदित्योऽग्निर्वैश्वानरः ।) ઉલ્લેખ્યું હતું, તે પણ ઉચિત નથી. કારણ કે બ્રાહ્મણ ગ્રન્થોનાં વાક્યો તો બહુભક્તિવાદવાળાં હોય છે. (અહીં 'ભક્તિ'નો અર્થ ગુણ કલ્પના થાય છે. આથી, કહેવાનું તાત્પર્ય એ છે કે બ્રાહ્મણગ્રન્થો એક ગુણની સાથે ગમે તે દેવતાને પણ જોડી દે છે. જેમ કે,—'પૃથિવી વૈશ્વાનર છે', 'સંવત્સર વૈશ્વાનર છે', 'બ્રાહ્મણ વૈશ્વાનર છે'. વગેરે (ग) વળી, નિવિત્ અર્થાત્ આકૃતિવિશિષ્ટ મન્ત્ર પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને કહેનારો છે' એવું જે કહ્યું હતું તે યોગ્ય ન હતું. કેમકે તે (ઋચા) તો આ (પાર્થિવાગ્નિ)ને માટે જ હતી. (એ સૂક્તમાં) જે ઋચા છે : "જે (અગ્નિ) 'માનુષી પ્રજામાંથી જન્મ્યો છે, પ્રકાશ્યો છે." આ ઋચામાં ઉલ્લેખેલો 'માનુષી પ્રજામાંથી જન્મતો અગ્નિ' આ (પાર્થિવાગ્નિ) છે. (घ) છાન્દોમિક સૂક્ત પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને સંબોધનાર છે' એવું જે કહ્યું હતું તે પણ ઠીક નથી. કેમ કે તે સૂક્ત પાર્થિવાગ્નિનું જ છે. એ સૂક્તમાં કહ્યું છે : જમદગ્નિઓ વડે બોલાવાયેલો અથવા આહુતિ અપાયેલો." અહીં જમદગ્નિઓ એટલે પ્રભૂતાગ્નિઓ (प्रजमिताग्नयः) અથવા પ્રજ્વલિતાગ્નિઓ. તેમના વડે આકૃતિ અપાયેલો." (વૈશ્વાનર એટલે આ પાર્થિવાગ્નિ જ) (ङ) હવિષ્પાન્તીય સૂક્ત પણ 'વૈશ્વાનર' શબ્દથી સૂર્યને સંબોધનાર છે' એવું જે કહ્યું હતું તે પણ યોગ્ય નથી, કારણ કે તે સૂક્ત પણ આ અગ્નિ (પાર્થિવાગ્નિ)નું જ છે. દા.ત., તે સૂક્તનો આ પ્રથમ મન્ત્ર જ જુઓ : "અજર, સેવવા યોગ્ય (जुष्टम) પીવા યોગ્ય (पान्तम्) એવા હવિને. આદિત્યને જાણનાર, દ્યુલોકને સ્પર્શ કરનાર અગ્નિમાં હોમવામાં આવ્યું. તેના પાલનને માટે, અસ્તિત્વને માટે અને ધારણ કરવા માટે દેવોએ એને અન્નથી ફેલાવ્યું," હવિ જે પાનીય છે, અજર (વૃદ્ધ ન થાય તેવું) છે અને સેવવા યોગ્ય છે તે સૂર્યને જાણનાર, દ્યુલોકને સ્પર્શ કરનાર (અગ્નિ)માં અભિહુત થયું. તેના ભરણને માટે, અસ્તિત્વને માટે અને ધારણ કરવા માટે — આ સઘળાં કર્મોને માટે દેવોએ આ (પાર્થિવ) અગ્નિને અન્નથી ફેલાવ્યો, વૃદ્ધિંગત કર્યો. (આ મન્ત્રથી 'વૈશ્વાનર પાર્થિવાગ્નિનો જ વાચક છે' એ મતનું સમર્થન થાય છે અને યાજ્ઞિકોની અન્તિમ દલીલનો પરિહાર થઈ જાય છે.)

24. (વિમર્શ) વૈશ્વાનર કોણ છે ? -એના જવાબ રૂપે યાજ્ઞિકોએ એક મત રજૂ કર્યો હતો કે વૈશ્વાનર આદિત્ય છે. આના પુરાવા રૂપે તેમણે સવનોના ક્રમે દેવતાઓનો આરોહણ-પ્રત્યવરોહણ ક્રમ આગળ ધર્યો હતો. આ ઉપરાંત તેમણે બીજાં પાંચ સમર્થક કારણો પણ આપ્યાં હતાં, પરંતુ શાકપૂણિએ "'વૈશ્વાનર' શબ્દ પાર્થિવાગ્નિનો વાચક છે" એવો મત પ્રદર્શિત કરીને પછી અહીં યાજ્ઞિકોના મતનું ખંડન કરવાનો પ્રયત્ન કર્યો છે. શાકપૂણિએ ઉપરની ચર્ચામાં યાજ્ઞિકોની બધી દલીલોનું ક્રમશઃ ખંડન કર્યું છે તથા હવે પછીની ચર્ચામાં યાસ્ક બીજાં ઉદાહરણો દ્વારા શાકપૂણિના મતનું સમર્થન કરે છે.

---

25. अथाप्याह ॥ अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियम् । आ दूतो अग्निमभरद् विवस्वतो वैश्वानरं मातरिश्वा परावतः (ऋ.सं. ६/८/४) ॥ अपाम् उपस्थे उपस्थाने । महति अन्तरिक्षलोके आसीनाः । महान्तः इति वा । अगृह्णत माध्यमिकाः देवगणाः । विशः इव राजानम् उपतस्थुः । ऋग्मियम् ऋग्मन्तम् इति वा । अर्चनीयम् इति वा । आहरत् यं दूतः देवानां विवस्वतः आदित्यात् । विवस्वान्

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

विवासनवान् प्रेरितवतः । परागताद्वा । अस्य अग्नेः वैश्वानरस्य मातरिश्वानम् आहर्तारम् । आह । मातरिश्वा वायुः । मातरि अन्तरिक्षे श्वसिति । मातरि आशु अनिति इति वा । अथ एनम् एताभ्यां सर्वाणि स्थानानि अभ्यापादं स्तौति ॥

"अपामुपस्थे"—इति (ऋ० सं० ४, ५, १०, ४) । भरद्वाजस्यार्षम् । प्रातरनुवाकाश्विनयोः शस्यते । 'अपाम्' 'उपस्थे' "उपस्थाने" यत्रोपगम्य तिष्ठन्त्यापः सोऽपामुपस्थः, अन्तरिक्षलोकः, तस्मिन्नपामुपस्थे । "महति" विस्तीर्णे । सन्तः 'महिषाः' "माध्यमिका देवगणाः" । अथवा 'महिषाः' त एव "महान्तः" । किमकुर्वन् ? 'अगृभ्णन्' "अगृह्णन्" । गृहीत्वा च 'विशः' "विश इव" मनुष्या इव 'राजानम्' परिवार्य्य 'उपतस्थुः' । 'ऋग्मियम्' ऋग्भिः स्तुतिभिः तद्वन्तम्, "अर्चनीयम्" अर्चनार्हं वा । कतमम् ? इति । "यम्" 'आ अभरत्' "आहरत्" । 'दूतः' देवानां 'मातरिश्वा' "वायुः" 'अग्निं' वैश्वानरम्, कुतः ? 'परावतः' "प्रेरितवतः" प्रकर्षेण ईरितवतः, प्रेरिततारत्, "परागताद्वा" दूरतरात् 'विवस्वतः' आदित्यात्, विवासनक्रियया तमसां तद्वतस्तं पर्य्यगृह्णन् अन्तरिक्षे लोके गृहीत्वा चोपतस्थुः विश इव राजानं मातरिश्वा वायुः । स हि "मातरि अन्तरिक्षे" अप्रतिबध्यमानशक्तिः श्वसिति" गच्छति । अथवा "मातरि" "आश्वनिति" गच्छति ।

एवमेतस्मिन् मन्त्रे यत आह्रियते, येन चाह्रियते, यश्चाह्रियते, सर्वे ते पृथग् व्यपदिष्टाः । अत्र विवस्वत आह्रियते मातरिश्वना वैश्वानर इति । तस्मादेतयोर्विवस्वन्मातरिश्वनोः सन्निधानव्यपदेशे सति साक्षाद् वैश्वानरशब्देन पार्थिव उक्त इति व्यवतिष्ठते पार्थिवो वैश्वानर इति ॥

अथ पुनर्यदङ्गीकृत्य सूर्य्यादिसम्बन्धि विशेषलिङ्गं हविष्पान्तीयस्य सौर्य्यवैश्वानरत्वमुक्तम्—"विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्"—इति नान्यः सूर्य्यादह्नां कर्त्ता, तस्मात् सूर्य्योऽत्र वैश्वानर इति । अत्र ब्रूमः—पार्थिव एवाग्निः सूक्ते प्रथमायामृचि प्रकृत्योत्तरास्वृक्ष्व एतस्मिन् सूक्ते प्रकृतिभूम्ना स्तूयते, महत आत्मनो माहाभाग्यात् । अपि तर्हि सत्त्वान्यश्वप्रभृतीनि प्रकृतिभूमभिः स्तूयन्ते,—किमङ्ग पुनर्देवताः, तासामपि च विशेषतोऽग्निः, यस्य सर्वदेवतात्माभिवादः साक्षात् "अग्निः सर्वा देवताः (ऐ० ब्रा० २, १, २)" "इन्द्रं मित्रं वरुणमग्निम् (ऋ० सं० २, ३, २२, ६)"— इति । तदेतदेतस्मिन्नेव सूक्ते स्फुटतरमुपदिश्यते । यथा पार्थिव एवायमग्निः तेन तेन देवता विशेषेण देवतात्मना तत्स्थानमापन्नः स्तूयत इति तदर्थमिदमाह ॥

"अथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति" एताभ्यां ये एते वक्ष्यमाणे, सर्वाणि स्थानानि पृथिव्यन्तरिक्षद्युलक्षणानि अभ्यापाद्य अभ्यापाद्य इत्यभ्यापादं स्तौति मन्त्रदृक् ॥ ४ (२६) ॥

25. (અનુ.) "જળના સ્થાનમાં (अन्तरिक्षમાં) રહેનાર માધ્યમિક દેવગણો (महिषा) આનું (વૈશ્વાનર અગ્નિનું) ગ્રહણ કરે છે. જેવી રીતે પ્રજા રાજાને ઘેરીને ઊભી રહે છે. એવી રીતે આ પૂજનીય (ऋग्मियम्) (અગ્નિ)ને ઘેરીને (પવનો) ઊભા રહે છે. દેવતાઓનો દૂત માતરિશ્વા (વાયુ) દૂર રહેલા વિવસ્વાન્ (આદિત્ય)માંથી આ વૈશ્વાનર અગ્નિને લઈ આવે છે (आ अभरत्)." अपामुपस्थे એટલે જળના સ્થાનમાં. महिषा (પદને સપ્તમ્યન્ત લઈએ તો-) મોટા અન્તરિક્ષ લોકમાં રહેનાર અથવા (પ્રથમાન્ત લઈએ તો-) મહાન્. માધ્યમિક દેવગણ આનું ગ્રહણ કરે છે. પ્રજા રાજાની આસપાસ વીંટળાઈને ઊભી રહે તેમ ऋग्मिय એટલે ઋગ્મન્ત. અર્થાત્ સ્તુતિઓવાળા અથવા અર્ચનીય કે પૂજનીય. વિવસ્વાન્ આદિત્ય પાસેથી દેવોનો દૂત (વાયુ) જે (અગ્નિ)ને લઈ આવે છે. અહીં વિવસ્વાન્ એટલે વિવાસનવાન્ (= અંધકારને દૂર કરવાની ક્રિયાયુક્ત). (परावतः એટલે) પ્રેરિત કરનાર પાસેથી અથવા ઘણે દૂર રહેલા (સૂર્ય) પાસેથી. માતરિશ્વાને આ વૈશ્વાનર (પાર્થિવ) અગ્નિનો આહર્તા કહ્યો છે. માતરિશ્વા એટલે વાયુ. કેમકે (તેની વ્યુત્પત્તિ આ પ્રમાણે છે :) मातरि अन्तरिक्षे श्वसिति । એટલે કે માતર્ = અન્તરિક્ષમાં જે શ્વાસ લે છે તે (વાયુ). અથવા તો मातरि आशु अनिति । જે અન્તરિક્ષમાં ઝડપથી જાય છે તે (વાયુ).-હવે પછીનાં બે મન્ત્રો દ્વારા બધાં (ત્રણેય) સ્થાનોમાં વ્યાપી વળનાર વૈશ્વાનર (પાર્થિવાગ્નિ)ની સ્તુતિ કરવામાં આવે છે :

25. (વિમર્શ) ઉપરના મન્ત્રમાં ૧. જેમાંથી આહારણ કરવામાં આવે છે (સૂર્ય), ૨. જેના વડે આહરણ કરવામાં આવે છે (વાયુ) અને ૩. જેનું આહરણ થાય છે (પાર્થિવાગ્નિ) તે ત્રણેયનો પૃથક્પથક્ નિર્દેશ છે. આથી સિદ્ધ થાય છે કે વૈશ્વાનર (=પાર્થિવાગ્નિ) આદિત્યથી અલગ છે.

26. मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायाम् तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥

(ऋ. सं. १०/८८/६) ॥ मूर्धा मूर्तम् अस्मिन् धीयते । मूर्धा यः सर्वेषां भूतानां भवति नक्तम् अग्निः ।

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

ततः सूर्यो जायते प्रातः उद्यन् स एव । प्रज्ञां तु एतां मन्य ते यज्ञियानां देवानां यज्ञसपादिनाम् । अपः यत् कर्म चरति प्रजानन् । सर्वाणि स्थनानि अनुसंचरते त्वरमाणः । तस्य उत्तरा भूयसे निर्वचनाय ॥

स्तोमे॑न॒ हि दि॒वि दे॒वासो॑ अ॒ग्निमजी॑जन॒ञ्छक्तिभी रोदसि॒प्राम् ।

तमू॑ अकृण्वन् त्रे॒धा भु॒वे कं स ओष॑धीः पचति वि॒श्वरू॑पाः ॥

(ऋ. सं. १०/८८/१०) ॥ स्तोमेन हि यं दिवि देवाः अग्निम् अजनयन् । शक्तिभिः कर्मभिः । द्यावापृथिव्योः आपूरणम् । तम् अकुर्वन् त्रेधा भावाय । पृथिव्याम् अन्तरिक्षे दिवि इति शाकपूणिः । यदस्य दिवि तृतीयं तदसावादित्यः इति ब्राह्मणम् । तत् अग्नीकृत्य स्तौति ॥

"मूर्द्धा भुवो भवति"—इति (ऋ० सं० ८, ४, ११, १) । "मूर्द्धा" मूर्त्तमस्मिन्" सर्वं सत्त्वजातमुपनिबद्धं "धीयते" यथा हि शिरसो वियोगे तद्वतोऽवश्यं भावि मरणम्, एवमग्निवियोगेऽप्यवश्यं म्रियन्ते भूतानि इत्यतः प्रधानम् 'अग्निः' 'मूर्द्धा' 'भुवः' भूलोकस्य भवति । विशेषतस्तु 'नक्तम्' रात्रौ तत्कृतत्वादालोकस्य, भूतानां चान्नपक्तेस्तत्कृतत्वात् । तत् किमयमन्योऽग्निरन्य" सूर्य्य इति ? न इत्युच्यते,—"ततः सूर्य्यो जायते प्रातरुद्यन्" रात्रावग्नित्वेन लोकस्योपकारं कृत्वा 'ततः' अनन्तरमेव प्रभातायां रात्र्यमाह्निकैरुपकारैरुपकरिष्यन् लाभाय 'सूर्य्यः' भूत्वा 'जायते' 'प्रातरुद्यन्' "स एव" अयमग्निः । तस्य इयं 'माया' । क एनां जानाति ? मायां "त्वेतां" "यज्ञियानां" "देवानां यज्ञसम्पादिनाम्" स तत्त्वविदो मन्यन्ते । तत् किम् ? इति । 'अपः' 'यत्' "कर्म" स्वाधिकारप्रयुक्तम् आत्माधिकारप्रयुक्तम्, आदित्यात्मना अग्न्यात्मना च कर्त्तव्यम् 'प्रजानन्' प्रकर्षेण जानन् "सर्वाणि स्थानानि अनुसञ्चरते" 'तूर्णिः' "त्वरमाणः" कर्मकालमपरिहापयन्नित्यभिप्रायः ॥

'तस्योत्तरा भूयसे निर्वचनाय" । यथा चैतदेवं तथेयमपरा ऋक्भूयस्तरमेतमेधार्थं वक्ति । किं पूर्वया नोक्तं यदनया भूयस्तरं निरुच्यते ? इति । स्थानद्वयमभिसम्पन्नः पूर्वया स्तुतः, —मूर्द्धा भुवो भवत्यग्निर्नक्तं ततः सूर्य्यात्मना प्रातरसावुदेति, अथ पुनरुत्तरया स्थानत्रयमभिसम्पन्नः स्फुटतरं स्तूयते,—इत्येतद् भूय-स्त्वम् ॥ ५ (२७) ॥

"स्तोमे॑ न॒ हि॒"—इति (ऋ० सं० ८, ४, ११, ५) । 'स्तोमेन' स्तुतिभिः, 'शक्तिभिः' "कर्मभिः" अग्निहोत्रादिभिः । 'दिवि' द्युलोके । एतम् 'अग्निम्' आदित्यात्मना । 'रोदस्योः' "द्यावापृथिव्योः" 'प्रां' "पूरणं" 'देवासः' "देवाः" 'अजीजनत्', अजनयत् यजमानाः, ते हि हविषां दातारः शश्वत् श्रद्धया । "एष नोदियाद् यद्येता मग्ना वाहुतिं न जुहुयादिति आहुतिभिरेवैनं जनयन्ति"—इति । 'तम् अकृण्वन्' तमेवाग्निं कृतवन्तः । 'त्रेधाभुवेकम्' । कमित्यनर्थको निपातः । "त्रेधाभावाय" "पृथिव्यामन्तिरिक्षे, दिवि" च । 'सः' एवमवस्थितो जगद्यात्रासिद्धये सर्वावस्थः 'ओषधीः पचति' 'विश्वरूपाः' सर्वरूपा इति ॥

प्रकृतस्यैव शाकपूणेः पुनर्ग्रहणं स्वपक्षानुस्मृतये । सङ्करो ह्यस्मिन् सूक्ते आत्मविन्नैरुक्तयाज्ञिकानामिति ।

ब्राह्मणमपि चैतमेवार्थं ब्रवीत्ययमेवाग्निरादित्यो भवतीति,—"यदस्य दिवि तृतीयं तदसावादित्य इति ब्राह्मणम्" । 'अस्य'—इति व्यपदेशात् पार्थिवस्याग्नेः प्राधान्यं दर्शयति । उभाभ्यां पक्षाभ्यां व्यावृत्य स्वपक्षसाधनमुक्त्वा देवतासतत्वमालम्ब्य निरुच्यते । एकमेवेदं ज्योतिः, ज्योतिष्ट्वाविशेषात् । तत्पुनरेतज्जगद्यात्रासिद्धये त्रिधा विभक्तं पृथिव्यामन्तरिक्षे दिवि च विभक्ताभिधानं सम्पद्यते, अग्निर्विद्युदादित्य इति ।

तत्रैव सति ज्योतिषो तृतीयमादित्याख्यमस्मिन् सूक्ते पूर्वास्वृक्षु "हविष्पान्तम्"—इत्येवमाद्यासु अग्नीकृत्य मन्त्रदृक् स्तौति, "अथैनमेतया पुनरादित्यीकृत्य स्तौति"— ॥ ६ (२८) ॥

---

26. (અનુ.) (૧) 'અગ્નિ રાત્રિએ પૃથિવીનું મસ્તક બને છે અને ત્યાર પછી સવારે ઉદય પામતાં એ (અગ્નિ) સૂર્ય બની જાય છે. યજ્ઞસંપાદકોની આ માયાને જાણનાર ઝડપથી કર્મો (અપઃ)ને કરે છે.'' અહીં મૂર્ધા (મસ્તક) એટલે જેમાં બધા શરીર રહેલા છે તે. અથવા તો બધા ભૂતોમાં જે મુખ્ય સ્થાને છે તે. રાત્રિમાં અગ્નિ આ રીતે બધા ભૂતોનું મસ્તક બને છે તે જ અગ્નિ સવારે ઉદય પામતાં સૂર્ય બની જાય છે. આને યજ્ઞિય દેવોની અર્થાત્ યજ્ઞસંપાદક દેવોની (માયા) પ્રજ્ઞા માનવામાં આવે છે. જે અપઃ અર્થાત્ કર્મ છે (આદિત્ય સ્વરૂપે જે કર્મો કરવાનાં છે અને પાર્થિવાગ્નિ રૂપે જે કર્મો કરવાનાં છે) તેને પ્રકર્ષપણે જાણતો એ (પાર્થિવાગ્નિ) બધાં સ્થાનોમાં ઉતાવળ કરતો ફરી વળે છે.

આ (પાર્થિવાગ્નિ)ના વિશેષ નિર્વચન માટે હવે પછીનો મન્ત્ર છે : (૨) ''દેવોએ સ્તુતિ દ્વારા અને શક્તિઓ વડે દ્યાવાપૃથિવીને વ્યાપી વળનાર અગ્નિને દ્યુલોકમાં જન્માવ્યો. તેને રહેવાને માટે (ભુવે) (દેવોએ તેને) ત્રણ પ્રકારનો બનાવ્યો. (અર્થાત્ ત્રણેય લોકમાં પાર્થિવાગ્નિ, વૈદ્યુતાગ્નિ અને આદિત્ય સ્વરૂપે સ્થાપ્યો.) એ બધાં જ રૂપોવાળી વનસ્પતિ ઉગાડે છે.'' અહીં દેવોએ દ્યુલોકમાં સ્તુતિ વડે જે અગ્નિને જન્માવ્યો. શક્તિઓ વડે એટલે કર્મો વડે. (રોદસિપ્રામ્ એટલે) દ્યાવાપૃથિવીને પૂરનાર. ત્રણ ભાવવાળો

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

બનાવવા માટે તેને બનાવ્યો. શાકપૂણિના મતે આનો અર્થ પૃથિવીલોકમાં, અન્તરિક્ષલોકમાં અને દ્યુલોકમાં (રહેવા માટે તે અગ્નિને ત્રણ સ્વરૂપવાળો) બનાવ્યો : (પાર્થિવાગ્નિ, વૈદ્યુતાગ્નિ અને આદિત્ય સ્વરૂપવાળો). આ મતના સમર્થનમાં એક બ્રાહ્મણવચન પણ મળે છે : "દ્યુલોકમાં આ (અગ્નિ)નું જે ત્રીજું (સ્વરૂપ) છે તે પેલો આદિત્ય છે." એને અગ્નિ બનાવીને (માનીને) સ્તુતિ કરી છે. હવે પછી રજૂ કરવામાં આવતી ઋચામાં તે (અગ્નિ)ને આદિત્ય બનાવીને (માનીને) સ્તુતિ કરવામાં આવે છે.

---

27. यदेदेंनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।

यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन् भुवनानि विश्वा ॥

(ऋ. सं. १०/८८/११) ॥ यदा एनम् अदधुः यज्ञियाः सर्वे दिवि देवाः सूर्यम् । आदितेयम् अदितेः पुत्रम् । यदा चरिष्णू मिथूनौ प्रादुरभूताम् । सर्वदा सहचारिणौ । उषाश्च आदित्यश्च । मिथुनौ कस्मात् । मिनोतिः श्रयतिकर्मा । थु इति नामकरणः । थकारो वा । नयतिः परः । वनिः वा । समाश्रितौ अन्योन्यं नयतः । वनुतो वा । मनुष्यमिथुनौ अपि एतस्मादेव । मेथन्तौ अन्योन्यं वनुतः इति वा । अथ एनम् एतया अग्निकृत्य स्तौति ॥

यत्रा वदेते अवरः परश्च यज्ञन्योः कतरो नौ वि वेद ।

आ शेकुरित्सधमादं सखायो नक्षन्त यज्ञं क इदं वि वोचत् ॥

(ऋ. सं. १०/८८/१७) ॥ यत्र विवदेते दैव्यौ होतारौ । अयं च अग्निः असौ च मध्यमः । कतरः नौ यज्ञे भूयः वेद इति । आशक्नुवन्ति तत् सहमदनं समानख्यानाः ऋत्विजः । तेषां यज्ञं समश्नुवानानां कः नः इदं विवक्ष्यति इति । तस्य उत्तरा भूयसे निर्वचनाय ॥

"यदेदेंनमदधुर्यज्ञियासः"—इति (ऋ० सं० ८, ४, १२, १) । "यदेनम्" 'सूर्य्यम्' 'आदितेयम्' "अदितेः पुत्रम्" 'दिवि अदधुः' द्युलोके स्थापितवन्तः, 'देवाः' 'यज्ञियासः' यज्ञसम्पादिनः, यजमानाः याज्ञेन कर्मणा सर्वस्यास्यापूर्वकृतत्वाज्जगद्विरचनाप्रपञ्चस्य । रश्मयो वा देवाः सौर्य्या तदेनमुन्नीतवन्तः । 'यदा' चैतौ 'चरिष्णू' "सर्वदा सहचरणशीलौ" "मिथुनौ" "प्रादुः" 'अभूताम्' उषाश्चादित्यश्च" । 'आत्' अथ तदा 'प्रापश्यत्' प्रकर्षेणापश्यत् 'भुवनानि' भूतानि, 'विश्वा' विश्वानि सर्वाणि ॥

"मिथुनौ" कस्मात् ?" "मिनोतिः" तावदत्र "श्रयतिकर्मा" मिथुनशब्दे पूर्वपदं 'मि'—इति ।—'थु'—इति नामकरणः" प्रत्ययः, "थकारो वा" नामकरणो विकल्पेन । "नयतिः परः" उत्तरपदं, "वनिर्वा" विकल्पेनं । तदा तावत् 'थु'—इति नामकरणो नयतिश्च परः, तदा धातोः पूर्वत्वात् प्रत्ययस्य च परत्वात् 'मि-न-थुः'—इति प्राप्ते रूढेर्बलीयस्त्वात् मध्यान्तविपर्य्ययेण मिथुनावित्युक्तम् । अथ पुनर्यदा थकारो नामकरणः, तदा वनिरुत्तरः, तदा वकारस्य सम्प्रसारणम्, सम्प्रसारणपरपूर्वत्वं मध्यान्तविपर्य्ययः । थकारे च यः स्वरः, तस्य लोपः, थकारश्च उकारमुपसंक्रमेत । एवं मिथुनाविति सिध्यति । अथ कोऽर्थः ? "समाश्रितौ" "अन्योऽन्यं" प्रति आत्मानं "नयतः" कालं वा समाश्रितौ भवतः परस्पर सम्भक्तौ । "मनुष्यमिथुनौ अपि एतस्मात् एव" । अथवा मेथतेर्मनुष्यमिथुनौ स्यातास्, तौ हि कमर्थं "मेथन्तौ" इव परस्परेण कालं नयतः ॥

"अथ" पुनः "एतम्" आदित्यम् "एतया" उत्तरयर्चा एतस्मिन्नेव सूक्ते होतृत्वेन "स्तौति" होतृत्वं ह्यग्नेः कर्म न सूर्य्यस्य । तस्मादिदमग्निवैश्वानरीयं सूक्तम् ॥ ७ (२९) ॥

"यत्रा वदेते"—इति (ऋ० सं० ८, ४, १३, २) । 'यत्र' यस्मिन् कर्मणि 'वि वदेते' वेरुपसर्गस्यापकृष्य यत्र क्रियापदेन सामर्थ्यं तत्रानयनम् । कौ पुनस्तौ विवदेते ? 'अवरः परश्च' 'दैव्यौ होतारौ'—"अयं च अग्निः" पार्थिवः "असौ च मध्यमः" वायुः । कथं विवदेते ? 'यज्ञन्योः' 'यज्ञनेत्र्योः । उभावप्यावां यज्ञस्य नेतारो, तत् कतरः 'नौ' आवयोः "यज्ञे" "भूयः" बहु 'वेद' इति । तत्र य एते 'सखायः' "समानख्याना ऋत्विजः" यज्ञे विनियुक्ताः 'नक्षन्त' समश्नुवते 'यज्ञम्' त एवं 'सधमादम्' सहमादम् "सहमदनम्" सहर्षम् उपश्रुत्य अनयोः 'आशेकुः' "आशक्नुवन्ति" । अथाशक्नुवन्तश्च किं ब्रूयुः ? 'क इदं विवोचत्' "को न इदं विवक्ष्यतीति" कतर एतयोर्यज्ञे वेद ? इति, उभावप्येतौ यज्ञे भूयोविदावित्यभिप्रायः ॥

यथाग्निप्रधानमेतत् सूक्तं होतृकर्मणोऽग्निसम्बद्धत्वात् विशेषलिङ्गेन न सूर्य्यप्रधानम्, तथा इयमपरा ऋक् "भूयसे निर्वचनाय" बहुतराय निरुच्य वचनाय । पूर्वस्याः को विशेषः ? अस्यां हि विभज्य वायोः केवलोऽग्निरेव स्तूयते, पूर्वस्यामभावपि भूयोविदावित्युक्तम् ॥ ८ (३०) ॥

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

27. (અનુ.) "જ્યારે આ અદિતિના પુત્ર સૂર્યને યજ્ઞિય દેવોએ દ્યુલોકમાં સ્થાપ્યો (अदधुः) અને જ્યારે (સાથે) ફરનારું (चरिष्णू) એ (ઉષા અને આદિત્યનું) મિથુન પ્રકટ થયું (अभूताम्) ત્યારે (आदित्) બધાં જ ભુવનોએ તેનું જોયું" આ મન્ત્રમાં જ્યારે આને-આદિતેય અર્થાત્ અદિતિના પુત્રને એટલે કે સૂર્યને બધા યજ્ઞિય દેવોએ દ્યુલોકમાં ધારણ કર્યો (અને) જ્યારે ફરનાર મિથુન પ્રકટ થયું-અહીં चरिष्णू એટલે સદાય સાથે ફરનાર બે. (તે બે કોણ ?) ઉષા અને આદિત્ય. (આ બેને 'મિથુન' કહ્યું છે.) પરંતુ 'મિથુન' શબ્દ કેવી રીતે બન્યો છે ? તો શ્રયણાર્થક √मि ધાતુ ઉપરથી તે શબ્દ બન્યો છે; તેમાં થુ અથવા થ એવો પ્રત્યય છે અને તે બેની પરમાં √नी ધાતુ છે. અથવા તો (√मि ધાતુને થ એવો પ્રત્યય લાગ્યો છે એમ માનીએ તો मि+थની પરમાં) √वन् ધાતુ લાગ્યો હશે (આમાં સમ્પ્રસારણ થવાથી उन् થશે). આનો અર્થ થશે : "જે અન્યોન્યને આશ્રયે (સમય) પસાર કરે છે" અથવા તો √वनु संभक्तौ ધાતુ લઈએ તો ('જે અન્યોન્ય મળેલા છે તે મિથુન'). મનુષ્યમાં જે 'મિથુન' જોવા મળે છે તે 'મિથુન' શબ્દ પણ આ જ રીતે બન્યો છે અથવા તો એનો (મનુષ્યોના 'મિથુન'નો) અર્થ થશે : "જ્યારે તેઓ જોડાય છે ત્યારે તેઓ પરસ્પરને જીતે છે." (સરૂપ). હવે આ (આદિત્ય)ને આના પછીની ઋચામાં (આ જ સૂક્તમાં) અગ્નિ બનાવીને (માનીને) (તેની હોતા રૂપે) સ્તુતિ કરે છે :

"જ્યાં નાના અને મોટા વિવાદ (विवदेते) કરે છે કે યજ્ઞ કરનારા આપણા બેમાંથી (यज्ञन्योः नौ) કોણ વધારે (वेद) જાણે છે. (અર્થાત્) પાર્થિવાગ્નિ અને વૈદ્યુતાગ્નિ-એ બેમાંથી કોણ યજ્ઞનું નેતૃત્વ વધુ સારી રીતે કરી શકે છે ?) ત્યારે યજ્ઞમાં ઉપસ્થિત રહેનારા (यज्ञं नक्षन्तः) સખાઓ આ બન્નેના સહમાદને-વિવાદને દૂર કરવા માટે સમર્થ ન બન્યા. (તેમણે કહ્યું :) કોણ આ કહી શકે (वि वोचत्) (કે તમારા બેમાંથી અમુક દેવ વધારે જાણે છે) ?" (અર્થાત્ યજ્ઞમાં તમે બન્ને ઘણું જાણનારા છો.) અહીં મન્ત્રમાં જ્યાં આ બે દિવ્ય હોતાઓ વિવાદ કરે છે. (આ બે કોણ ?-) આ (પાર્થિવ) અગ્નિ અને પેલો મધ્યમ સ્થાનનો (વૈદ્યુતાગ્નિ). 'આપણા બેમાંથી યજ્ઞવિષયક વધારે કોણ જાણે છે ?' ત્યારે સમાન શાસ્ત્રને જાણનારા ઋત્વિજો તેમના એ વિવાદને દૂર કરવા શક્તિમાન ન બન્યા. 'યજ્ઞનો સમાન ઉપભોગ કરનારાઓમાંથી કોણ આ નક્કી કરશે ? એના આના વિશેષ સ્પષ્ટીકરણ માટે હવે પછીની ઋચા છે:-

28. यावन्मात्रमुषसो न प्रतीकं सुपर्ण्यो३ वसंते मातरिश्वः ।
तावद्दधात्युप यज्ञमायन् ब्राह्मणो होतुरवरो निषीदन् ॥

(ऋ. सं. १०/८८/१९) ॥ यावन्मात्रम् उषसः प्रत्यक्तं भवति । प्रतिदर्शनम् इति वा । अस्ति उपमानस्य संप्रत्यर्थे प्रयोगः । इहेव निधेहि इति यथा । सुपर्ण्यः सुपतनाः । एताः रात्रयः । वसते मातरिश्वन् ज्योतिः वर्णस्य । तावत् उपदधाति यज्ञम् आगच्छन् ब्राह्मणः होता अस्त अग्नेः होतुः अवरः निषीदन् । होतृजपः तु अनग्निवैश्वानरीयः भवति । देव सवितर् एतं त्वा वृणुते अग्निं होत्राय सह पित्रा वैश्वानरेण (आश्व. श्रौ. १/३) इति । इमम् एव अग्निं सवितारम् आह । सर्वस्य प्रसवितारम् । मध्यमं वा उत्तमं वा पितरम् । यस्तु सूक्तं भजते यस्मै हविः निरुप्यते अयम् एव सः अग्निः वैश्वानरः । निपातम् एव एते उत्तरे ज्योतिषी एतेन नामधेयेन भजेते भजेते ॥

॥ इति सप्तमोऽध्यायः ॥

"यावन्मात्रमुषसो न प्रतीकम्"—इति (ऋ० सं० ८, ४, १२, ३) । अत्र 'न' कारः सम्प्रत्यर्थ एव, उपमानासम्भवात् । लोकेऽपि च "अस्ति उपमानस्य सम्प्रत्यर्थे प्रयोगः"—"इहेव निधेहीति यथा" इह सम्प्रति निधेहीत्यर्थः । मातरिश्वना कश्चित् पृष्टः दैव्यस्य होतुः अग्नेः यद् विज्ञानं तत् किमर्थं ब्राह्मणो मनुष्यहोता यज्ञमुपायन् बिभर्त्ति ? इति । स तं प्रत्याह—हे 'मातरिश्वन् !' 'यावन्मात्रम्' 'उषसः' 'प्रतीकं' "प्रत्यक्तम्" प्रत्यश्रितं प्रकाशस्य, "एताः" 'सुपर्ण्यः' "सुपतनाः" "रात्रयः" आत्मनि अनुप्रविष्टं 'वसते' छादयन्ति, अभिभूय तमो वर्त्तन्ते स्वयमेव । अथवा वसतिर्दर्शनार्थः । यावन्मात्रमुषसो रात्रिषु दृश्यन्ते, 'तावत्' इत्येवमपि स्वल्पमेव । एतावन्मात्रमयं स्वल्पविज्ञान उपायन् 'यज्ञं' 'ब्राह्मणः' होतृत्वे वृतो होतृषदने 'निषीदन्' 'दधाति' धारयति । दैव्यस्याग्नेः परस्य भूयोविदः, अवरः अन्योऽल्पविदिति अनुकरोत्यल्पमिति, मानुषो हि अग्न्यनुग्रहादेव अयमल्पविज्ञानोऽपि होता हौत्रं करोति इति पार्थिवोऽग्निर्विशेषतोऽभिष्टूयते ॥

तदेतदेवं कृत्वा सूक्तमग्निप्रधानकर्मत्वात् । वैश्वानरीयम् । येऽत्र वैश्वानरशब्दाः, ते पार्थिवाग्निं भजन्ते विशेषणत्वेन ॥

"होतृजपस्त्वनग्निर्वैश्वानरीयो भवति" । एवमपि तु सति अयम् अनग्निः वैश्वानरः होतृजपः । "देव सवितरेतं त्वा वृणतेऽग्निं होत्राय स ह पित्रा वैश्वानरेण—इति" । एवमेतं जपं वर्णयन्ति । "इमम् एव अग्निं सवितारम् आह" पार्थिवम्,

Vasant Bhatt Collection, Gujarat

CC-0. In Public Domain.Digitized by eGangotri.

"सर्वस्य प्रसवितारम्" यज्ञद्वारेण "मध्यमं वा उत्तमं वा" "पितरम्" अस्य वैश्वानरमाह । स ह तेन वैश्वानरेण पित्रा । एवं ह्यं पितापुत्राविति व्यपदेशात् पार्थिवादन्यो वैश्वानरः । स च पुनर्मध्यमो वोत्तमो वेत्येवमेवमयमनग्निर्वैश्वानरत्वेऽपि सति होतृजपः ॥

अत्रापि "यस्तु सूक्तं भजते, यस्मै हविर्निरूप्यतेऽयमेव सोऽग्निर्वैश्वानरः" । किं कारणम् ? अनग्निर्वैश्वानरत्वेऽपि सति होतृजपस्यायमेव पार्थिवोऽग्निर्वैश्वानर इत्यवध्रियते याज्ञिकपक्षे । आचार्य्यपक्षे च अयमेवैको मन्त्रो व्यपदेशहेतुरग्नेर्वैश्वानरत्वं ब्रवीति । सम्प्रति मन्त्रेणाग्नेर्व्यपदेशवता अग्नेर्वैश्वानरत्ववाचिना "आ दूतो अग्निमभरद् विवस्वतो वैश्वानरंमातरिश्वापरावतः"—इत्यनेन शाकपूणिपक्षेण स्वेनाव्यभिचारिणा समीभवति । तद्धितव्यपदेशादयस्तु पार्थिवस्य वैश्वानरत्व-साधका विशेषहेतवः षड्व्यभिचारिणोऽतिरिच्यन्ते ॥

एतस्माद् विशेषहेतुबाहुल्यात् अयमेव पार्थिवोऽग्निर्वैश्वानरः सूक्तभाक् हविर्भाक् च ॥

"निपातमेवैते उत्तरे ज्योतिषी" वैश्वानर इति "एतेन नामधेयेन भजेते भजेते" इति । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥

तदेवमेतस्मिन् 'वैश्वानर' पदविचारप्रसङ्गे हविष्पान्तीयं सूक्तमुपक्षिप्य सूर्यो वैश्वानरः, अग्निर्वैश्वानरः इति एकमेवेदं ज्योतिः त्रिधा वर्त्तते इति मन्त्रस्य भावोपप्रदर्शनार्थमुपवर्णितम् ॥

ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते, वयन्त्वेतावदत्रावबुध्यामह इति ॥ ९ (३१) ॥

इति निरुक्तवृत्तौ द्वादशाध्यायस्य (सप्तमाध्यायस्य)
सप्तमः पादः ॥ ७, ७ ॥
इति ऋज्वर्थायां निरुक्तवृत्तौ
जम्बूमार्गाश्रमवासिनः आचार्य्यभगवद्दुर्गस्य कृतौ
द्वादशः (सप्तमः) अध्यायः समाप्तः ॥ ७ ॥

---

